
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

॥श्रीकृष्णानंदरामसमर्थ॥

अथसटीकबृहदारण्योपनिषद्भाष्यस्यसप्तमोध्यायःप्रारभ्यते

ॐ॥ॐ तत्सत् ॐ॥ॐ

श्रीगणेशायनमः॥ हरिः ॐ म्॥ पूर्वस्मिन्नध्याये ब्रह्मात्मज्ञानं सफलं सांगोपांगं वादन्यायेनोक्तमिदानीं कांडांतरमवतारयति॥ पूर्णमिति॥ पूर्वाध्यायेष्वेव सर्वस्य वक्तव्यस्य समाप्तत्वादलं खिलकांडारंभणेनेत्याशंक्य पूर्वत्रानुक्तं परिशिष्टं वस्तु खिलशब्दवाच्यमस्तीत्याह॥ अध्यायचतुष्टयेनेति॥ सर्वांतरइत्युक्तइति शेषः॥ अमृतत्वसाधनं निर्धारितमिति पूर्वेण संबंधः॥ शब्दार्थादीत्यादिशब्देन मानमेयादिग्रहः॥ दयांशिक्षे दि

ॐ पूर्णमदइत्यादि खिलकांडमारभ्यते॥ अध्यायचतुष्टयेन यदेव साक्षादपरोक्षात् ब्रह्म आत्मा सर्वांतरो निरुपाधिको ऽशनाया द्यतीतो नेति नेतीति व्यपदेश्यो निर्धारितो यद्विज्ञानं केवलं अमृतत्वसाधनमधुना तस्यैवात्मनः सोपाधिकस्य शब्दार्थादिव्यवहारविषयापन्नस्य पुरस्तादनुक्तान्युपासनानि कर्मभिरविरुद्धानि प्रकृष्टाभ्युदयसाधनानि क्रममुक्तिभांजि च तानि वक्तव्यानीति परः सं

हरिः ॐ॥ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते॥ पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥

दर्भः सर्वोपासनशेषत्वेन ओंकारो दमं दानं दयामित्येतानि च विधित्सितानि पूर्णमदः पूर्णं न कुतश्चिद्व्यावृत्तं व्यापीत्येतन्निष्ठा चकर्त्तरि द्रष्टव्या अद इति परोक्षाभिधायि सर्वनाम तत्परं ब्रह्मेत्यर्थः॥ तत्संपूर्णमाकाशवद्व्यापि निरंतरं निरुपाधिकं च तदेवेदं सोपाधिकं नामरूपस्थं व्यवहारापन्नं पूर्णं स्वेन रूपेण परमात्मना व्याप्येव नोपाधिपरिच्छिन्नेन विशेषात्मना सूक्तानीति शेषः॥ ओंकारादि यत्र साधनत्वेन विधित्सितं तत्सूत्रोक्तमैक्यज्ञानमनुवदति॥ पूर्णमित्यादिना॥ अवयवार्थमुक्त्वा समुदायार्थमाह॥ तत्संपूर्णमिति॥ अदः पूर्णमित्यनेन लक्ष्यं तत्पदार्थं दर्शयति॥ तदेवेति॥ कथं सोपाधिकस्य पूर्णत्वमित्याशंक्याह॥ स्वेनेति॥ व्यावर्त्यमाह॥ नोपाधीनि॥ न वयमुपहितेन विशिष्टेन रूपेण पूर्णतां

यित्वा त्वंपदार्थं दर्शे

किंतु केवलेन स्वरूपेणेत्यर्थः॥ लक्ष्येोनत्वंपदार्थौ युक्तौ तावेव वाक्यैक्यं कथयन्ति॥ तदिदमिति॥ कथं कार्यात्मनोद्रिच्यमाणस्य पूर्णत्वमित्याशं
क्याह॥ यद्यपीति॥ लक्ष्यपदार्थैक्यज्ञानफलमुपन्यस्यति॥ पूर्णस्येति॥ उपक्रमोपसंहारयोरैकरूप्यमैक्ये श्रुतितात्पर्यलिंगं संगिरन्ते॥ यदु
क्तमिति॥ कथं पूर्णकंडिकाया ब्रह्मकंडिकया सह एकार्थत्वेनैकवाक्यत्वमित्याशंक्य तद्व्युत्पादयन्ति॥ तत्रेत्यादिना॥ उपक्रमोपसंहार

तदिदं विशेषापन्नं कार्यात्मकं ब्रह्म पूर्णात्कारणात्मनः उदच्यते उद्रिच्यते उद्गच्छतीत्येतद्यद्यपि कार्यात्मनोदच्यते तथापि यत्स्वरू
पं पूर्णत्वं परमात्मभावं तन्न जहाति पूर्णमेवोद्रिच्यते पूर्णस्य कार्यात्मनो ब्रह्मणः पूर्णं पूर्णत्वमादाय गृहीत्वा परमात्मस्वरूपैकरसत्व
मापाद्य विद्यया अविद्याकृतं भूतमात्रोपाधिसंसर्गजमन्यत्वावभासं तिरस्कृत्य पूर्णमेवानंतरमबाह्यं प्रज्ञानघनैकरसस्वभावं केव
लं ब्रह्मावशिष्यते यदुक्तं ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावेत्तस्मात्तत्सर्वमभवदित्येषोऽस्य मंत्रस्यार्थस्तत्र ब्रह्मेत्यस्यार्थः पूर्णमद
इति इदं पूर्णमिति ब्रह्म वा इदमग्र आसीदित्यस्यार्थस्तथा च श्रुत्यंतरं यदेवेह तदमुत्र यदमुत्र तदन्विहेति अतोऽदः शब्दवाच्यं पूर्णं ब्रह्म त
देवेदं पूर्णं कार्यस्थं नामरूपोपाधिसंयुक्तमविद्ययोद्रिक्तं तस्मादेव परमार्थस्वरूपादन्यदिव प्रत्यवभासमानं तदात्मानमेव परं पूर्णं ब्र
ह्म विदित्वाहमदः पूर्णं ब्रह्मास्मीत्येवं पूर्णमादाय तिरस्कृत्यापूर्णस्वरूपतामविद्याकृतां नामरूपोपाधिसंपर्कजामेतया ब्रह्मविद्यया
पूर्णमेव केवलमवशिष्यते तथा चोक्तं तस्मात्तत्सर्वमभवदिति यः सर्वोपनिषदर्थः ब्रह्म स एषोऽनेन मंत्रेणानूद्यते सिद्धे ब्रह्मात्मैक्ये कठश्रु
तिं संवादयति॥ तथा चेति॥ ब्रह्मात्मनोरैक्यमुक्तमुपजीव्य वाक्यार्थमाह॥ अत इति॥ पूर्णं यद्ब्रह्मेति यच्छब्दो द्रष्टव्यः॥ उक्तमेव व्यनक्ति॥ तस्मादेवे
ति॥ संसारावस्थां दर्शयित्वा मोक्षावस्थां दर्शयति॥ तदात्मानमिति॥ उक्ते विद्याफले वाक्योपक्रममनुकूलयति॥ तथा चोक्तमिति॥ न केवलं ब्रह्मकंडि

अनुवादफलमाह॥ उत्तरेति॥ तदेवस्फुटयति॥ ब्रह्मविदेति॥ तस्माद्युक्तोब्रह्मणोनुवादइतिशेषः॥ कथंतर्हिसर्वोपासनशेषत्वेन विधित्सितत्वमों
कारादीनामुक्तमत आह॥ खिलेति॥ अद्वितीयंब्रह्मेत्युत्सर्गप्रवृत्तंशास्त्रंप्रलयावस्थब्रह्मविषयंसृष्टिशास्त्रंतुविशेषप्रवृत्तंतस्यापवादस्ततोद्वैता
द्वैतरूपंब्रह्मसर्वोपनिषदर्थः॥ तदेवब्रह्मानेनमंत्रेणसंक्षिप्यतइतिभर्तृप्रपंचपक्षमुत्थापयति॥ अत्रेत्यादिना॥ कार्यकारणयोरुत्पत्तिकालेपूर्ण

उत्तरसंबंधार्थंब्रह्मविद्यासाधनत्वेनहिवक्ष्यमाणानिसाधनान्योंकारदमदानदयाख्यानिविधित्सितानिखिलप्रकरणसं
बंधात्सर्वोपासनांगभूतानिचात्रैकेवर्णयंतिपूर्णात्कारणात्पूर्णंकार्यमुद्रिच्यतेउद्रिक्तंकार्यंवर्तमानकालेपिपूर्णमेवपरमार्थ
वस्तुभूतंद्वैतरूपेणपुनःप्रलयकालेपूर्णस्यकार्यस्यपूर्णतामादायात्मनिधित्वापूर्णमेवावशिष्यतेकारणरूपमेवमुत्पत्तिस्थिति
प्रलयेषुत्रिष्वपिकालेषुकार्यकारणयोःपूर्णत्वंसाचैकैवपूर्णताकार्यकारणयोर्भेदेनव्यपदिश्यतेएवंचद्वैताद्वैतात्मकमेकंब्रह्मय
थाकिलसमुद्रोजलतरंगफेनबुद्बुदाद्यात्मकएवंयथाचजलंसत्यंतदुद्भवाश्चतरंगफेनबुद्बुदादयःसमुद्रात्मभूताएवआविर्भावति
रोभावधर्मिणःपरमार्थसत्याएवंसर्वमिदंद्वैतंपरमार्थसत्यमेवजलतरंगादिस्थानीयंसमुद्रजलस्थानीयंतुपरंब्रह्मएवंचकिलद्वैतस्य
सत्यत्वेकर्मकांडस्यप्रामाण्यं

त्वमुत्का स्थितिकालेपितदाह॥ उद्रिक्तमिति॥ प्रलयकालेपितयोःपूर्णत्वंदर्शयति॥ पुनरिति॥ कालभेदेनकार्यकार
णयोरुक्तांपूर्णतांनिगमयति॥ एवमिति॥ कार्यकारणेद्वेपूर्णेचेत्तर्हिकथमद्वैतसिद्धिरित्याशंक्याह॥ साचेति॥ कथंतर्हिद्वयोरेकंपूर्णत्वंतदाह॥ कार्यका
रणयोरिति॥ एकापूर्णताव्यपदिश्यतेचद्वयोरितिस्थितेलब्धमर्थमाह॥ एवंचेति॥ एकंद्व्यात्मकमितिविप्रतिषेधमाशंक्यदृष्टांतेननिराचष्टे॥ यथाकि
लेति॥ एवमेकंब्रह्मानेकात्मकमितिशेषः॥ ब्रह्मणोद्वैताद्वैतात्मकत्वेपिसत्यमद्वैतमसत्यमितरदित्याशंक्याह॥ यथाचेत्यादिना॥ द्वैतस्यपरमार्थसत्य

विपक्षेदोषमाह॥ यदापुनरिति॥ अस्तुकर्मकांडाप्रामाण्यंनेत्याह॥ तथाचेति॥ विरोधोध्ययनविधेरितिशेषः॥ तमेवविरोधंसाधयति॥ वेदेति॥
कथंतर्हिविरोधसमाधिस्तत्राह॥ तद्विरोधेति॥ प्राप्तंभर्तृप्रपंचप्रस्थानंप्रत्याचष्टे॥ तदसदिति॥ विशिष्टमद्वितीयंब्रह्मतद्विषयोत्सर्गापवादयो
र्विकल्पसमुच्चययोश्चासंभवंवक्तुंप्रतिज्ञाभागंविभजते॥ नहीति॥ तत्रप्रश्नपूर्वकंहेतुंविवृणोति॥ कस्मादित्यादिना॥ यथेत्यादिग्रंथस्यनचतथे

यदापुनर्द्वैतंद्वैतमिवाविद्याकृतंमृगतृष्णिकावदनृतमद्वैतमेवपरमार्थतस्तदाकिलकर्मकांडंविषयाभावादप्रमाणंभवतितथा
चविरोधस्यैवस्याद्द्वैतैकदेशभूतोपनिषत्प्रमाणंपरमार्थाद्वैतवस्तुप्रतिपादकत्वादप्रमाणंकर्मकांडमसद्द्वैतविषयत्वात्तद्विरोध
परिजिहीर्षयाश्रुत्यैतदुक्तंकार्यकारणयोःसत्यत्वंसमुद्रवत्पूर्णमदइत्यादिनेति॥ तदसद्विशिष्टविषयापवादविकल्पयोरसंभवा
न्नहीयंसुविवक्षिताकल्पनाकस्माद्यथाक्रियाविषयेउत्सर्गप्राप्तस्यैकदेशेपवादःक्रियतेयथाऽहिंसन्सर्वाभूतान्यन्यत्रतीर्थेभ्यइ
तिहिंसासर्वभूतविषयोत्सर्गेणनिवारितातीर्थेविशिष्टविषयेज्योतिष्टोमादावनुज्ञायतेनचतथावस्तुविषयेइहाद्वैतंब्रह्मोत्सर्गेणप्र
तिपाद्यपुनस्तदेकदेशेऽपवदितुंशक्यतेब्रह्मणोऽद्वैतत्वादेवैकदेशानुपपत्तेस्तथाविकल्पानुपपत्तेश्चयथातिरात्रेषोडशिनंगृह्णाति
नातिरात्रेषोडशिनंगृह्णातीतिग्रहणाग्रहणयोःपुरुषाधीनत्वाद्विकल्पोभवतिनत्विहतथावस्तुविषयेद्वैतंवास्यादद्वैतंवेतिविकल्पः
संभवत्यपुरुषतंत्रत्वादात्मवस्तुनो   स्यादिनासंबंधः॥ क्रियायामुत्सर्गापवादसंभावनामुदाहरति॥ यथेत्यादिना॥ तथान्यत्रापिक्रियायामुत्सर्गा

पवादौदृष्टावितिशेषः॥ वैधर्म्यदृष्टांतस्यदार्ष्टांतिकमाह॥ नचेति॥ विषयभेदेसत्युत्सर्गापवादौदृष्टौनतावदद्वितीयेब्रह्मणिसंभवतोनहिब्रह्माद्वै
यमेवजायतेलीयतेचेतिसंभावनास्पदमितिभावः॥ उत्सर्गापवादानुपपत्तिवद्ब्रह्मणिविकल्पानुपपत्तेश्चतदेकरसमेषितव्यमित्याह॥ तथेति॥ विक

ल्पानुपपत्तिमुपपादयति॥ यथेत्यादिना॥

संप्रतिसमुच्चयासंभवमभिदधाति॥विरोधाच्चेति॥उत्सर्गापवादविकल्पसमुच्चयानामसंभवान्नयुक्ता ब्रह्मणो नानारसत्वकल्पनेति फलितमाह॥तस्मादिति॥परकीयकल्पनानुपपत्तौ हेत्वंतरं प्रतिज्ञाय श्रुतिविरोधं प्रकटीकृत्य न्यायविरोधं प्रकटयति॥तथेति॥ब्रह्मणोऽनेकरसत्वे स्यादिति शेषः। नित्यत्वानुपपत्तेरात्मनो नित्यत्वांगीकारविरोधः स्यादित्यध्याहारः॥ननु तस्य नित्यत्वं नांगीक्रियते मानाभावादिति प्रासंगिकी

विरोधाच्च द्वैताद्वैतयोरेकस्य तस्मान्न सुविवक्षितेयं कल्पना श्रुतिन्यायविरोधाच्च सैंधवघनवत्प्रज्ञानैकरसघनं निरंतरं पूर्वापरबाह्याभ्यंतरभेदवर्जितं सबाह्याभ्यंतरमजं नेति नेत्यस्थूलमनण्वजमजरमभयममृतमित्येवमाद्याः श्रुतयो निश्चितार्थाः संशयविपर्यासशंकारहिताः सर्वाः समुद्रे प्रक्षिप्ताः स्युः अकिंचित्करत्वात् तथा न्यायविरोधोऽपि सावयवस्यानेकात्मकस्य क्रियावतो नित्यत्वानुपपत्तेर्नित्यत्वं चात्मनः स्मृत्यादिदर्शनादनुमीयते तद्विरोधश्च प्राप्नोति अनित्यत्वे तु भवत्कल्पनानर्थक्यं स्फुटमेव चास्मिन्पक्षे कर्मकांडानर्थक्यमप्रकृताभ्यागमकृतविप्रणाशप्रसंगात् ननु ब्रह्मणो द्वैताद्वैतात्मकत्वे समुद्रादिदृष्टांता विद्यंते कथमुच्यते भवतैकस्य द्वैताद्वैतत्वं विरुद्धमिति नान्यविषयत्वात् नित्यनिरवयववस्तुविषयं हि विरुद्धत्वमवोचाम द्वैताद्वैतस्य न कार्यविषये सावयवे

माशंकां प्रत्याह॥नित्यत्वं चेति॥स्मृत्यादिदर्शनादित्यादिशब्देन स एव तु कर्मानुस्मृतिशब्दविधिभ्य इत्यधिकरणोक्ता हेतवो गृह्यंते अनुमीयते कल्प्यते स्वीक्रियत इति यावत्॥तद्विरोधश्च स्मृत्यादिदर्शनकृतात्मनित्यत्वानुमानविरोधश्चेत्यर्थः॥आत्मनोऽनित्यत्वे दोषांतरमाह॥भवदिति॥कर्मकांडस्य सत्यार्थत्वं परेण कल्प्यते तदानर्थक्यमात्माऽनित्यत्वे स्फुटमापतेदित्युक्तमेव स्फुटयति॥स्फुटमेवेति॥ब्रह्मणो नानारसत्वे विरोधमुक्तमसहमानः स्वोक्तं स्मारयति॥नन्विति॥समुद्रादीनां कार्यत्वसावयवत्वाभ्यामनेकात्मकत्वमविरुद्धं ब्रह्मणस्तु नित्यत्वान्निरवयवत्वाच्च नाने

ब्रह्मणो नानारसत्वकल्पनानुपपत्तिमुपसंहरति॥ तस्मादिति॥ अजो नित्यः शाश्वतोयं पुराण इत्याद्याः स्मृतयः॥ ननु प्रत्यक्षाद्यविरोधेनोपनि
षदां विषयसिध्यर्थमेषा कल्पना क्रियते तथा च कथं सानुपपन्नेत्याशंक्याह॥ अस्मादिति॥ विरुद्धार्थत्वे कल्पितेपि तत्प्रामाण्यानुपपत्तेरविशेषा
दिति भावः॥ किंच॥ ब्रह्मणो नानारसत्वं लौकिकं वैदिकं वा॥ नाद्यः॥ तस्या लौकिकत्वात्॥ तन्नानारसत्वे लोकस्य तटस्थत्वात्॥ न द्वितीयः॥ तन्ना
नारसस्याध्येयत्वेन ज्ञेयत्वेन वा शास्त्रेणानुपदेशादित्याह॥ अध्येयत्वाच्चेति॥ तदेव स्फुटयति॥ नहीति॥ इतश्च नानारसत्वं ब्रह्मणो न यथा शास्त्रप्र

तस्माच्छ्रुतिस्मृतिन्यायविरोधादनुपपन्नेयं कल्पना॥ अस्याः कल्पनायाः वरमुपनिषत्परित्याग एव अध्येयत्वाच्च न शास्त्रार्थेयं
कल्पना न हि जननमरणाद्यनर्थशतसहस्रभेदसमाकुलं समुद्रवनादिवत्सावयवमनेकरसं ब्रह्माध्येयत्वेन विज्ञेयत्वेन वा श्रुत्यो
पदिश्यते प्रज्ञानघनतां चोपदिशति एकधैवानुद्रष्टव्यमिति चानेकधादर्शनापवादाच्च मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यती
ति यच्च श्रुत्या निंदितं तन्न कर्तव्यं यच्च न क्रियते न स शास्त्रार्थो ब्रह्मणोनेकरसत्वमनेकधात्वं च द्वैतरूपं निंदितत्वान्न द्रष्टव्यमतो
न शास्त्रार्थः यत्त्वेकरसत्वं ब्रह्मणस्तद्द्रष्टव्यत्वात्प्रशस्तं प्रशस्तत्वाच्च शास्त्रार्थो भवितुमर्हति॥ यत्तूक्तं वेदैकदेशस्याप्रामाण्यं कर्मवि
षये द्वैताभावाद्द्वैते च प्रामाण्यमिति तन्न यथाप्राप्तोपदेशार्थवत्त्वा

त्कृत्स्नस्य प्रामाण्यमित्याह॥ प्रज्ञानेति॥ चकारादुपदिशतीत्याकृष्यते॥ अनेकधादर्श
नापवादाच्च नानारसं ब्रह्म शास्त्रार्थो न भवतीति शेषः॥ भेददर्शनस्य निंदितत्वे लब्धमर्थमाह॥ यच्चेति॥ अकर्तव्यत्वे प्राप्तमर्थं कथयति॥ यच्च नेति॥ सा
मान्यन्यायं प्रकृते योजयति॥ ब्रह्मण इति॥ कस्तर्हि शास्त्रार्थस्तत्राह॥ यत्त्विति॥ ब्रह्मैकरस्ये प्रागुक्तं दोषमनुभाषते॥ यत्तूक्तमिति॥ कर्मकांडस्य कर्मविष
येन प्रामाण्यमसद्द्वैतविषयत्वाद्ब्रह्मकांडस्य तु अद्वैते प्रामाण्यं परमार्थाद्वैतवस्तुप्रतिपादकत्वात्तथा च विरोधोऽध्ययनविधेरित्यनुवादार्थः॥ कर्मकांडप्रा

प्रसिद्धं भेदमादाय तत्रैव विधिनिषेधोपदेशस्य प्रवृत्तिनिवृत्तिद्वारार्थवत्वान्न कर्मकांडानर्थक्यमित्यर्थः॥ ननु शास्त्रमेवादौ भेदं बोधयित्वा पश्चाद
भ्युदयसाधनं कर्मोपदिशति॥ तथा च नास्ति भेदस्यान्यतः प्राप्तिरत आह॥ नहीति॥ यथा हि शास्त्रं जातमात्रं पुरुषं प्रत्यद्वैतं वस्तु ज्ञापयित्वा पश्चाद्ब्र
ह्मविद्यामुपदिशतीति नेष्यते तथा च प्रथममेव पुरुषं प्रति द्वैतं बोधयित्वा कर्म पुनर्बोधयतीत्यपि नाभ्युपेयं प्रथमतो भेदवेदनावस्थायामस्य शास्त्रा
नधिकारित्वादित्यर्थः॥ द्वैतस्योपदेशार्हत्वमंगीकृत्योक्तं तदेव नास्तीत्याह॥ नचेति॥ ननु द्वैतसत्यबुध्यभावेऽश्रुत्युक्तानुष्ठानायप्रसंगात्प्रवृत्त्यनुपप

नहि द्वैतमद्वैतं वा वस्तु जातमात्रमेव पुरुषं ज्ञापयित्वा पश्चात्कर्म वा ब्रह्मविद्यां वोपदिशति शास्त्रं न चोपदेशार्हं द्वैतं जातमात्रप्राणि
बुद्धिगम्यत्वान्न च द्वैतस्यानृतत्वबुद्धिः प्रथममेव कस्यचित्स्याद्येन द्वैतस्य सत्यत्वमुपदिश्य पश्चादात्मनः प्रामाण्यं प्रतिपादयेच्छास्त्रं ना
पि पाषंडिभिरपि प्रस्थापिताः शास्त्रस्य प्रामाण्यं न गृह्णीयुः॥ तस्माद्यथाप्राप्तमेव द्वैतमविद्याकृतं स्वाभाविकमुपादाय स्वाभाविक्यैवावि
द्यया युक्ताय रागद्वेषादिदोषवते यथाभिमतपुरुषार्थसाधनं कर्मोपदिशत्यग्रे पश्चात्स्वसिद्धक्रियाकारकफलस्वरूपदोषदर्शनवते
तद्विपरीतौदासीन्यस्वरूपावस्थानफलार्थिने तदुपायभूतात्मैकत्वदर्शनात्मिकां ब्रह्मविद्यामुपदिशति॥ तेः स्वप्रामाण्यसिध्यर्थमेव द्वैतस

त्यत्वं श्रुतिर्बोधयिष्यतीनेत्याह॥ नच द्वैतस्येति॥ द्वैतानृतत्ववादिषु कर्मजडानां प्रद्वेषप्रतीतेर्न प्रथमतो द्वैतानृतत्वबुद्धिर्न च द्वैतसत्यत्वं श्रुत्यर्थः॥ त
त्परिचयहीनानामपि द्वैतसत्यत्वाभिनिवेशादित्यर्थः॥ किंच॥ न द्वैतवैतथ्यं शास्त्रप्रामाण्यविघातकं॥ यतो बौद्धादिभिः श्रेयसे प्रस्थापिताः स्वशिष्याः
द्वैतमिथ्यात्वावगमेपि स्वर्गकामश्चैत्यं वंदेतेत्यादिशास्त्रप्रामाण्यं गृह्णंति यथा तथाग्निहोत्रादिशास्त्रस्यापि प्रामाण्यं भविष्यति साधनत्वशक्त्यनपहारा
दित्याह॥ नापीति॥ कांडद्वयस्य प्रामाण्योपपत्तिमुपसंहरति॥ तस्मादित्यादिना॥ प्रसिद्धो योयं क्रियादिरूपे द्वैते दोषः सातिशयत्वादिस्तद्दर्शनं विवेकस्तद्वते

स्मृतिः ४ श्रुतिः ४ सिद्धान्ते २

तस्माद्द्वैताद्विपरीतमद्वैतमौदासीन्योपलक्षितं स्वरूपं तस्मिन्नवस्थानं कैवल्यं तदर्थिने मुमुक्षवे साधनचतुष्टयसंपन्नायेत्यर्थः॥ किंच॥ तत्त्वज्ञानादू
र्ध्वं पूर्वं वा कांडयोर्विरोधः शंक्यते नाद्य इत्याह॥ अथेति॥ अवस्थाभेदादेकस्मिन्नपि पुरुषे कांडद्वयस्य प्रामाण्यमविरुद्धमित्येवं स्थिते सत्युपनिषज्ज्ञा
स्तत्त्वज्ञानोत्पत्त्यनंतरं नांतरीयकत्वेन प्राप्ते कैवल्ये पुरुषस्य नैराकांक्ष्यं जायते॥ न च निराकांक्षं पुरुषं प्रति शास्त्रस्य शास्त्रत्वमस्ति॥ प्रवृत्तिर्वा निवृत्ति
र्वा नित्येन कृतकेन वा॥ पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयत इति न्यायात्कृतकृत्यं प्रति प्रवर्त्तकत्वादिविरहिणः शास्त्रत्वायोगात्तत्त्वज्ञानादूर्ध्व
धर्म्यभावाद्विरोधासिद्धिरित्यर्थः॥ एकस्मिन्पुरुषे दर्शितन्यायं सर्वत्रातिदिशति॥ तथेति॥ ज्ञानादूर्ध्वं विरोधाभावमुपसंहरति॥ इतिनेति॥ कल्पांत

अथैवं सति तत्त्वौदासीन्यस्वरूपावस्थाने फले प्राप्ते शास्त्रस्य प्रामाण्यं प्रत्यर्थित्वं निवर्त्तेत तदभावाच्छास्त्रस्यापि शास्त्रत्वं तं प्रति निव
र्त्तत एव तथा प्रतिपुरुषं परिसमाप्तं शास्त्रमिति न शास्त्रविरोधगंधोऽप्यस्ति अद्वैतज्ञानावसानत्वाच्छास्त्रशिष्यशासनादिद्वैतभेद
स्यान्यतमावस्थाने हि विरोधः स्यादवस्थितस्येतरेतरापेक्षत्वात् शास्त्रशिष्यशासनानां नान्यतमोऽप्यवतिष्ठते सर्वसमाप्तेरुक्तस्य विरो
धआशंक्येताद्वैते केवले शिवे सिद्धे नाप्यविरोधिता तत एव॥ रं प्रत्याह॥ अद्वैतेति॥ तत्त्वज्ञानात्पूर्वं भेदस्यावस्थितत्वात्तमाविद्यमादायाधिकारि
भेदादवस्थाभेदाद्वा कांडयोरविरोधसिद्धिरित्यर्थः उक्तमेवोपपादयति॥ अन्यतमेति॥ शिष्यादीनामन्यतमस्यैवावस्थानं चेदवस्थितस्येतरस्मिंश्च सापे
क्षत्वान्न सोऽप्यवतिष्ठते न च ज्ञानात्प्रागन्यतमस्यैवावस्थानं सर्वेषामेव तेषां यथाप्रतिभासमवस्थानादतो न पूर्वं विरोधाशंकेत्यर्थः॥ ऊर्ध्वं विरोधशंका
भावमधिकृत्य विवक्षयाऽनुवदति॥ सर्वेति॥ कथं कैवल्यं विरोधाभावस्य सत्त्वादित्याशंक्याह॥ नापीति॥ अद्वैतत्वाद्द्वैताभावस्यापि तत्र निमज्जनादित्याह॥
अत एवेति॥ अद्वितीयमेव ब्रह्म न द्वैताद्वैतात्मकमित्युपपादितमिदानीं ब्रह्मणो द्वैताद्वैतात्मकत्वाभ्युपगमेऽपि विरोधो न शक्यते परिहर्तुमित्याह॥

अथापीतितुल्यत्वात्तदभ्युपगमोऽस्त्वित्येतिशेषः॥ उक्तमेवोपपादयति॥ यद्यपीति॥ द्वैताद्वैतात्मकं ब्रह्मेति पक्षे कथं विरोधो न समाधीयते द्वैतमद्वैतं चा
धिकृत्य कांडद्वय प्रामाण्य संभवादित्याशंक्यपति॥ कथमिति॥ किं ब्रह्मविषयस्ते शास्त्रोपदेशः किं वाऽब्रह्मविषयः॥ प्रथमे द्वैताद्वैतरूपस्यैकस्यैव
ब्रह्मणोऽभ्युपगमात्तस्य च नित्यमुक्तत्वान्नोपदेशः संभवतीत्याह॥ एकं हीति॥ तस्योपदेशाभावे हेत्वंतरमाह॥ न चेति॥ उपदेष्टा हि ब्रह्मणोऽन्योऽन
न्यो वा॥ नाद्यः॥ अभ्युपगमविरोधात्॥ न द्वितीयः भेदमंतरेणोपदेश्योपदेशकभावासंभवादिति भावः कल्पांतरमुत्थापयति॥ अथेति॥ प्रतिज्ञावि

अथाप्यभ्युपगम्य ब्रूमः द्वैताद्वैतात्मकत्वेपि शास्त्रविरोधस्य तुल्यत्वाद्यदापि समुद्रादिवद्द्वैताद्वैतात्मकमेकं ब्रह्माभ्युपगच्छामो नान्य
द्वस्त्वंतरं तदापि भवदुक्ताच्छास्त्रविरोधान्न मुच्यामहे कथमेकं हि परं ब्रह्म द्वैताद्वैतात्मकं तच्छोकमोहाद्यतीतत्वादुपदेशं नाकांक्षति
न चोपदेष्टान्यो ब्रह्मणो द्वैताद्वैतरूपस्य ब्रह्मण एकस्यैवाभ्युपगमात्॥ अथ द्वैतविषयस्यानेकत्वादन्यान्योपदेशो न ब्रह्मविषय उप
देश इति चेत्तदा द्वैताद्वैतात्मकमेव ब्रह्म नान्यदस्तीति विरुध्यते यस्मिन्द्वैतविषयेऽन्योन्योपदेशः सोन्यो द्वैतं चान्यदेवेति समुद्रदृष्टां
तो विरुद्धः न च समुद्रोदकैकत्ववद्विज्ञानैकत्वे ब्रह्मणोऽन्यत्रोपदेशग्रहणादिकल्पना संभवति॥ न हि हस्तादिद्वैताद्वैतात्मके देवदत्ते
वाक्कर्णयोर्देवदत्तैकदेशभूतयोर्वागुपदेष्ट्री कर्णः केवल उपदेशस्य ग्रहीता देवदत्तस्तु नोपदेष्टा नाप्युपदेशस्य गृहीतेति कल्पयितुं शक्यते

रोधेन निराकरोति॥ तदेति॥ किंच॥ सर्वस्य ब्रह्मरूपत्वे यः समुद्रदृष्टांतः स न स्यात्सरस्परोपदेशस्याब्रह्मविषयत्वादित्याह॥ यस्मिन्निति॥ अथय
थाफेनादिविकाराणां भिन्नत्वेपि समुद्रोदकात्मत्वं तथा जीवादीनां भिन्नत्वेपि ब्रह्मस्वभावविज्ञानैक्याद्ब्रह्म सर्वमिति न विरुध्यते तत्राह॥ न चेति॥ स
र्वस्य ब्रह्मत्वमंगीकृतं चेद्ब्रह्मविषयस्त्वोपदेशः स्याद्वैदस्याऽविचारितरमणीयत्वादित्यर्थः॥ ननु नानारूपवस्तुसमुदायो ब्रह्म तत्र प्रदेशभेदादुपदेश्योप

तत्र हेतुमाह ॥ समुद्रेति ॥ यथा समुद्रस्योदकात्मना फेनादिभेदैकत्वं तथा देवदत्तस्यैकत्वस्य वागाद्यवयवेभेदैकत्वेन विज्ञानवत्त्वान्न व्यवस्थासंभवस्तथा
ब्रह्मण्यपि द्रष्टव्यमित्यर्थः ॥ मतांतरनिराकरणमुपसंहरति ॥ तस्मादिति ॥ आत्मैकत्वस्य प्रतिपादिका श्रुतिः न्यायश्च सा व्यवस्था नेकात्मकत्वे स्यात्
दावुक्तः ॥ अभिप्रेतार्थासिद्धिर्भेदकल्पनानर्थक्यं चेत्यादिना दर्शिता ॥ एवं कल्पनायामेकानेकात्मकं ब्रह्मेत्यभ्युपगता वित्यर्थः ॥ परकीयव्याख्यानासं
भवे फलितमाह ॥ तस्मादिति ॥ ध्यानशेषत्वेनोपनिषदर्थं ब्रह्मानूद्य तद्विधानार्थं तस्मिन्विनियुक्तं मंत्रमुत्थापयति ॥ ओं खमिति ॥ इषेत्वेत्यादिवत्त
स्य कर्मांतरे विनियुक्तत्वमाशंक्याह ॥ अयं चेति ॥ विनियोजकाभावादिति भावः ॥ तर्हि ध्यानेपि नायं विनियुक्तो विनियोजकाभावाविशेषादित्याशं

समुद्रैकोदकात्मत्ववदेकविज्ञानवत्त्वाद्देवदत्तस्य तस्माच्छ्रुतिन्यायविरोधश्चाभिप्रेतार्थासिद्धिश्चैवं कल्पनायां स्यात्तस्माद्यथाव्याख्यातए
वास्माभिः पूर्णमद इत्यस्य मंत्रस्यार्थः ॥ ॐ खं ब्रह्मेति मंत्रोयं चान्यत्राविनियुक्त इह ब्राह्मणे न ध्यानकर्मणि विनियुज्यते अत्र च ब्रह्मेति विशे
ष्याभिधानं खमिति विशेषणं विशेषणविशेष्ययोश्च सामानाधिकरण्येन निर्देशो नीलोत्पलवत्खं ब्रह्मेति ब्रह्मशब्दो बृहद्वस्तुमात्रास्य
दोः विशेषितोः तौ विशेष्यते खं ब्रह्मेति यत्तत्खं ब्रह्म तदोंशब्दवाच्यमोंशब्दस्वरूपमेव वा उभयथापि सामानाधिकरण्यमविरुद्धमिह
च ब्रह्मोपासनसाधनत्वार्थमोंशब्दः प्रयुक्तः

क्याह ॥ इहेति ॥ खं पुराणमित्यादि ब्राह्मणं तस्य च विनियोजकं ध्यानसमवेतार्थप्रकाशनसामर्थ्यात्
यद्यपि मंत्रनिष्ठसामर्थ्यं विनियोजकं तथापि मंत्रब्राह्मणयोरेकार्थत्वाद्ब्राह्मणस्य सामर्थ्यद्वारा विनियोजकत्वमविरुद्धमिति भावः ॥ अत्रेति मंत्रोक्तिः ॥ वि
शेषणविशेष्यत्वे यथोक्तं सामानाधिकरण्यं हेतूकरोति ॥ विशेषणेति ॥ ब्रह्मेत्युक्ते सत्याकांक्षाभावात्किं विशेषणेनेत्याशंक्याह ॥ ब्रह्मशब्द इति ॥ निरुपा
धिकस्य सोपाधिकस्य वा ब्रह्मणो विशेषणत्वेपि कथं तस्मिन्नोंशब्दप्रवृत्तिरित्याशंक्याह ॥ यत्तदिति ॥ किमिति यथोक्ते ब्रह्मण्योंशब्दो मंत्रे प्रयुज्यते तत्रा

॥ ईशा ३२ ॥ ३

बृ.स.
६

ॐ शब्दो ब्रह्मोपासने साधनमित्यत्र मानमाह॥ तथा चेति॥ सापेक्ष्यं श्रेष्ठ्यं वारयति॥ परमिति॥ आदिशब्देन प्रणवो धनुरित्यादयो गृह्यन्ते॥ ओं ब्रह्मेति
सामानाधिकरण्योपदेशस्य ब्रह्मोपासने साधनत्वमोंकारस्येत्यस्मादर्थांतरासंभवाच्च तस्य तत्साधनत्वमेष्टव्यमित्याह॥ अन्यार्थेति॥ एतदेव प्रपंचय
ति॥ यथेत्यादिना॥ अन्यत्रेति तैत्तिरीयश्रुतिग्रहणं॥ अपवर्गः स्वाध्यायावसानं॥ अर्थांतरावगतेरभावे फलितमाह॥ तस्मादिति॥ ननु शब्दांतरेष्वपि ब्रह्म

तथा च श्रुत्यंतरादेतदालंबनं श्रेष्ठमेतदालंबनं परमोमित्यात्मानं युंजीत ओमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीतेति ओमित्येवं
ध्यायथ आत्मानमित्यादेरन्यार्थासंभवाच्चोपदेशस्य॥ यथान्यत्रोमिति शंसत्योमित्युद्गायतीत्येवमादौ॥ स्वाध्यायारंभापवर्गयोरोंका
रप्रयोगो विनियोगादवगम्यते न च तथार्थांतरमिहावगम्यते तस्माद्ध्यानसाधनत्वेनैवेहोंकारशब्दस्योपदेशः यद्यपि ब्रह्मात्मादि

ॐ खं ब्रह्म खं पुराणं वायुरं खमिति ह स्माह कौरव्यायणीपुत्रो॥

शब्दाः ब्रह्मणो वाचकास्तथापि श्रुतिप्रामाण्यात् ब्रह्मणो नेदिष्ठमभिधानमोंकार एव ब्रह्मप्रतिपत्ताविदं परं साधनं तच्च द्विप्रकारेण
प्रतीकत्वेनाभिधानत्वेन च प्रतीकत्वेन यथा विष्ण्वादिप्रतिमाः भेदेनैवोंकारो ब्रह्मेति प्रतिपत्तव्यस्तथा ह्योंकारालंबनस्य ब्रह्म प्रसी
दति॥ एतदालंबनं श्रेष्ठमेतदालंबनं परं॥ एतदालंबनं ज्ञात्वा ब्रह्मलोके महीयत इति श्रुतेः वाचकेषु सत्सु किमित्योंशब्द एव ध्यानसा
धनत्वेनोपदिश्यते तत्राह॥ यद्यपीति॥ नेदिष्ठं निकटतमं प्रियतममित्यर्थः॥ प्रियतमत्वप्रयुक्तं फलमाह॥ अत एवेति॥ साधनत्वेऽवांतरविशेषं दर्श
यति॥ तच्चेति॥ प्रतीकत्वेन कथं साधनत्वमिति पृच्छति॥ प्रतीकत्वेनेति कथमित्यध्याहारः॥ परिहरति॥ यथेति॥ ओंकारो ब्रह्मेति प्रतिपत्तौ किं स्यात्तु

अ.
७

॥बृहदारण्यक॥

रामः
६

मंत्रमेवंव्याख्यायब्राह्मणमवतार्यव्याचष्टे॥तत्रेत्यादिना॥मंत्रःसप्तम्यर्थः॥ननुयथोक्तंतत्वंस्वेनैवरूपेणप्रतिपत्तुंशक्यतेकिंप्रतीकोपदेशेनेत्याशं
क्याह॥यत्तदिति॥भावविशेषोबुद्धेर्विषयपारवश्यंपरिहृत्यप्रत्यग्ब्रह्मज्ञानाभिमुख्यं॥ओंकारेब्रह्मावेशनमुदाहरणेनद्रढयति॥यथेति॥कत्संतर
माह॥वायुरमित्यादिना॥किमितिसूत्राधिकरणमव्याकृतमाकाशमत्रगृह्यतेतत्राह॥वायुरेहीति॥तदेवभूताकाशात्मनाविपरिणतमितिभावः॥त

तत्रखमितिभौतिकेखेप्रतीतिर्माभूदितिआहखंपुराणंचिरंतनंपरमात्माकाशमित्यर्थः॥यत्तत्परमात्माकाशंपुराणंखंतच्चक्षुराद्यवि
षयत्वान्निरालंबनमशक्यंगृहीतुमितिश्रद्धाभक्तिभ्यांभावविशेषेणचोंकारेआवेशयतियथाविष्ण्वंगांकितायांशिलादिप्रतिमायां
विष्णुलोकएवंवायुरंखंवायुरस्मिन्विद्यतइतिवायुरंखखमात्रंखमित्युच्यतेनपुराणंखमित्येवमाह स्म कोसौकौरव्यायणीपुत्रो

वेदोयंब्राह्मणाविदुर्वेदैनेनयद्वेदितव्यं॥१॥प्रथमंब्राह्मणं॥१॥

वायुरेहिखेमुख्यःखशब्दव्यवहारस्तस्मान्मुख्येसंप्रत्ययोयुक्तइतिमन्यतेतत्रयदिपुराणंखंब्रह्मनिरुपाधिस्वरूपंयदिवावायुरंखं
सोपाधिकंब्रह्मसर्वथापिओंकारःप्रतीकत्वेनैवप्रतिमावत्साधनत्वंप्रतिपद्यतेएतद्वैसत्यकामपरंचापरंचब्रह्मयदोंकारइतिश्रुत्यं
तराःकेवलंखशब्दार्थेविप्रतिपत्तिर्वेदोयमोंकारोवेदविजानात्यनेनयद्वेदितव्यंतस्माद्वेदओंकारोवाचकोऽभिधानंतेनाभिधानेनयद्वे
दितव्यंब्रह्मप्रकाश्यमानमभिधीयमानं

हिंपक्षद्वयेसंप्लवमानेकःसिद्धांतःस्यादित्याशंक्याधिकारिभेदमाश्रित्याह॥तत्रेति॥श्रुत्यंतरसान्य
थासिद्धिसंभवादोंकारस्यप्रतीकत्वेपिविप्रतिपत्तिमाशंक्याह॥केवलमिति॥इतरत्रविप्रतिपत्तिद्योतकाभावादितिभावः॥प्रतीकपक्षमुपपाद्याभिधानप

ब्रा०पातनिका॥वेदोयमिति॥

तदेवप्रपंचयति॥ तेनेति॥ वेदेत्यत्रादौ तच्छब्दो द्रष्टव्यः॥ ब्राह्मणा विदुरिति विशेषनिर्देशस्य तात्पर्यमाह॥ तस्मादिति॥ प्रतीकपक्षे वेदोयमित्यादि
ग्रंथो निर्वहतीत्याह॥ अथवेति॥ विध्यभावे कथमर्थवादः संभवतीत्याशंक्य परिहरति॥ कथमित्यादिना॥ वेदत्वेन स्तुतिमोंकारस्य संग्रहविवरणा
भ्यांदर्शयति॥ सर्वो हीति॥ ओंकारे सर्वस्य नामजातस्यांतर्भावे प्रमाणमाह॥ तद्यथेति॥ तत्रैव हेत्वंतरमवतार्य व्याकरोति॥ इतश्चेति॥ वेदितव्यपरम

वेद साधको विजानात्युपलभते तस्माद्वेदोयमिति ब्राह्मणा विदुस्तस्माद्ब्राह्मणानामभिधानत्वेन साधनत्वमभिप्रेतमोंकारस्य अथ
वा वेदोयमिति अर्थवादः कथमोंकारो ब्रह्मणः प्रतीकत्वेन विहितः ओंखंब्रह्मेति सामानाधिकरण्यात्तस्य स्तुतिरिदानीं वेदत्वेन सर्वो
ह्ययं वेदः॥ ओंकार एवैतत्प्रभवस्तदात्मकः सर्वर्ग्यजुःसामादिभेदभिन्न एष ओंकारस्तद्यथा शंकुना सर्वाणि पर्णानीत्यादिश्रुत्यं
तरात्॥ इतश्चायं वेद ओंकारो यद्वेदितव्यं तत्सर्वं वेदितव्यमोंकारेणैव वेदेनेनातोयमोंकारो वेद इतरस्यापि वेदस्य वेदत्वमत एव
तस्माद्विशिष्टोयमोंकारः साधनत्वेन प्रतिपत्तव्य इति अथवा वेदः सः कोसौ यं ब्राह्मणा विदुरोंकारं ब्राह्मणानां ह्यसौ प्रणवोद्गीथादि
विकल्पैर्विज्ञेयस्तस्मिन्प्रयुज्यमाने साधनत्वेन सर्वो वेदः प्रयुक्तो भवतीति॥१॥ सप्तमस्य प्रथमं ब्राह्मणं॥१॥ अधुना दमादिसाधनत्र
यविधानार्थोयमारंभः त्रयास्त्रिसंख्याकाः प्राजापत्याः प्रजापतेरपत्यानि प्राजापत्यास्ते किं प्रजापतौ परं च ब्रह्म द्वे ब्रह्मणी वेदितव्ये इति

श्रुत्यंतरात्तद्वेदनसाधनत्वेपि कथमोंकारस्य वेदत्वमित्याशंक्याह॥ इतरस्यापीति॥ अत एव वेदितव्यवेदनहेतुत्वादेवेत्यर्थः॥ प्रतीकपक्षे वाक्ययो
जनां निगमयति॥ तस्मादिति॥ अभिधानपक्षे प्रतीकपक्षे चैकं वाक्यमेकैकत्र योजयित्वा पक्षद्वयेपि साधारण्येन योजयति॥ अथवेति॥ तस्य पूर्वोक्तरीत्या
वेदत्वेलाभं दर्शयति॥ तस्मिन्निति॥ ओंकारस्य ब्रह्मोपास्तिसाधनत्वमित्थं सिद्धमित्युपसंहर्तुमितिशब्दः॥१॥ सप्तमस्य प्रथमं ब्राह्मणं॥१॥ ब्राह्मणांतर

तद्विधानं सर्वोपास्तिशेषत्वेनेति द्रष्टव्यं॥ आख्यायिकाप्रवृत्तिरारंभः पितरि ब्रह्मचर्यमूषुरिति संबंधः॥ प्रजापतिसमीपे ब्रह्मचर्यवासमात्रेण किमित्य
सौ देवादिभ्यो हितं ब्रूयादित्याशंक्याह॥ शिष्यत्वेति॥ शिष्यभावेन वृत्तेः संबंधिनो ये धर्मास्तेषां मध्ये ब्रह्मचर्यस्येत्यादियोज्यं॥ तेषामिति निर्धारणे षष्ठी ऊ

पितरि ब्रह्मचर्यं शिष्यत्ववृत्तेर्ब्रह्मचर्यस्य प्राधान्याच्छिष्याः संतो ब्रह्मचर्यमूषुरुषितवंत इत्यर्थः के ते विशेषतो देवा मनुष्या असुराश्च ते चो
षित्वा ब्रह्मचर्यं किमकुर्वन्नित्युच्यते तेषां देवा ऊचुः पितरं प्रजापतिं किमिति ब्रवीतु कथयतु नोस्मभ्यं यदनुशासनं भवानिति ते
भ्य एवमर्थिभ्यो ह स्म तदक्षरं वर्णमात्रमुवाच द इत्युक्त्वा च तान्प्रपच्छ पिता किं व्यज्ञासिष्टा३ इति॥ मयोपदेशार्थमभिहितस्याक्षरस्यार्थं

त्रयाः प्राजापत्याः प्रजापतौ पितरि ब्रह्मचर्यमूषुर्देवा मनुष्या असुरा उषित्वा ब्रह्मचर्यं देवा ऊचुर्ब्रवीतु नो भवानिति तेभ्यो
हैतदक्षरमुवाच द इति व्यज्ञासिष्टा३ इति॥ व्यज्ञासिष्मेति होचुर्दाम्यतेति न आत्थेत्योमिति होवाच व्यज्ञासिष्टेति॥ २॥ अथ है
नं मनुष्या ऊचुर्ब्रवीतु नो भवानिति तेभ्यो हैतदेवाक्षरमुवाच द इति व्यज्ञासिष्टा३ इति व्यज्ञासिष्मेति होचुर्दत्तेति न आत्थेत्योमि
ति होवाच व्यज्ञासिष्टेति॥ ३॥

विज्ञातवंतः आहोस्विन्नेति देवा ऊचुर्व्यज्ञासिष्मेति विज्ञातवंतो वयं यद्येवमुच्यतां किं मयोक्तमिति दे
वा ऊचुर्दाम्यत अदांता यूयं स्वभावतः अतो दांता भवतेति नोस्मानात्थ कथयसि इतर आहोमिति सम्यग्व्यज्ञासिष्टेति समानमन्यत्स्व
भावतो लुब्धा यूयमतो यथाशक्त्या संविभजत दत्तेति नोस्मानात्थ हापोहशक्तानामेव शिष्यत्वमिति द्योतनार्थो ह शब्दः॥ विचारार्थाप्लुतिरिति
अंगीकृत्य प्रश्नमेव व्याकरोति॥ मयेति॥ ओमित्यनुज्ञामेव विभजते॥ सम्यगिति॥ समानत्वेनोत्तरस्य सर्वस्यैवार्थवादस्याम्नाये पतेप्राप्तेदत्तेत्यत्रतात्स

दानमेवलोभत्यागरूपमुपदिष्टमितिकुतोनिश्शंकितं॥अन्यदेवविहितं किंचिदादिशेत्किंनस्यादित्याशंक्याह॥किमन्यदिति॥यथादेवामनुष्याश्च
स्वाभिप्रायानुसारेणदकारश्रवणेसत्यर्थंजगृहुस्तथेतियावत्॥दयध्वमित्यत्रतात्पर्यमीरयति॥क्रूराइति॥हिंसादीत्यादिशब्देनपरस्वापहारा
दिगृह्यते॥प्रजापतेरनुशासनंप्रागासीदित्यत्रलिंगमाह॥तदेतदिति॥अनुशासनस्यानुवृत्तिमेवव्याकरोति॥यःपूर्वमिति॥दइतिविसंधिकर

किमन्यद्ब्रूयान्नोहितमितिमनुष्याः॥तथाअसुरादयध्वमितिक्रूरायूयंहिंसादिपराअतोदयध्वंप्राणिषुदयांकुरुतेतितदेतत्प्रजा
पतेरनुशासनमद्याप्यनुवर्ततएवयःपूर्वंप्रजापतिर्देवादीननुशशाससोद्याप्यनुशास्त्येवदैव्यास्तनयित्नुलक्षणयावाचाकथ

अथहैनमसुराऊचुर्ब्रवीतुनोभवानितितेभ्योहैतदेवाक्षरमुवाचदइतिव्यज्ञासिष्टा३इतिव्यज्ञासिष्मेतिहोचुर्दयध्व
मितिनआत्थेत्योमितिहोवाचव्यज्ञासिष्टेतितदेतदेवैषादैवीवागनुवदतिस्तनयित्नुर्ददद इति॥ मेषाश्रूयतेदैवीवाक्कासौस्त
नयित्नुर्ददद इतिदाम्यतदत्तदयध्वमित्येषांवाक्यानामुपलक्षणायत्रिर्दकारउच्चार्यतेअनुकृतिःनतुस्तनयित्नुशब्दस्त्रिरेवसंख्या
नियमस्यलोकेऽप्रसिद्धत्वात्॥यस्मादद्यापिप्रजापतिर्दाम्यतदत्तदयध्वमित्यनुशास्त्येवतत्तस्मात्कारणादेतत्त्रयंकिंतत्त्रयमित्युच्य
तेदमंदानंदयामितिशिक्षेदुपादद्यात्प्रजापतेरनुशासनमस्माभिःकर्तव्यमित्येवंमतिंकुर्यात्तथाचस्मृतिः॥ णंसर्वत्रवर्णांतरभ्रमापोहा
र्थं॥यथादकारत्रयमत्रविवक्षितंतथास्तनयित्नुशब्देपित्रित्वंविवक्षितंचेत्स्वरसिद्धिविरोधःस्यादित्याशंक्याह॥अनुकृतिरिति॥दशब्दानुकरण
मात्रमत्रविवक्षितंनतुस्तनयित्नुशब्देपित्रित्वंप्रमाणाभावादित्यर्थः॥प्रकृतस्यार्थवादस्यविधिपर्यवसायित्वंफलितमाह॥यस्मादिति॥उपादानप्रक

श्रुतिसिद्धविध्यनुसारेणभगवद्वाक्यप्रवृत्तिंदर्शयति॥तथाचेति॥तदेतत्त्रयंशिक्षेदित्येषविधिश्चेत्कृतंत्रया:प्राजापत्याइत्यादिनाग्रंथेनेत्याशंक्य
यस्मादित्यादिनासूचितमाह॥अस्येति॥सर्वैरेवत्रयमनुष्ठेयंचेत्तर्हिदेवादीनुपदिश्यदकारत्रयोच्चारणमनुपपन्नमितिशंकते॥तत्रेति॥दमादित्र
यस्यसर्वैरनुष्ठेयत्वेसत्यतीतियावत्॥किंच॥पृथक्पृथगनुशासनार्थिनोदेवादयस्तेभ्योदकारत्रयमात्रोच्चारणेनापेक्षितमनुशासनंसिध्यतीत्याह
॥पृथगिति॥किमर्थमित्यादिनापूर्वेणसंबंध:॥दकारमात्रमुच्चारयतोपिप्रजापतेर्विभागेनानुशासनमभिसंहितमित्याशंक्याह॥तेवेति॥त्रयस

त्रिविधंनरकस्येदंद्वारंनाशनमात्मन:॥काम:क्रोधस्तथालोभस्तस्मादेतत्त्रयंत्यजेदित्यस्यहिविधे:शेष:पूर्वस्तत्रापिदेवादीनुद्दि
श्यकिमर्थंदकारत्रयमुच्चारितवान्प्रजापति:॥पृथगनुशासनार्थिभ्यस्तेवाकथंविवेकेनप्रतिपन्ना:॥प्रजापतेर्मनोगतंसमानेनैव

दाम्यतदत्तदयध्वमितितदेतत्त्रयंशिक्षेद्दमंदानंदयामिति॥४॥द्वितीयंब्राह्मणं॥

दकारवर्णमात्रेणेतिपराभिप्रायज्ञाविकल्पयंतिअत्रेकआहुर्दांतत्वा:दानत्वा:दयालुत्वैर्पराधित्वमात्मनोमन्यमाना:शंकि
तास्वप्रजापतावूचु:॥किंनोवक्ष्यतीतितेषांचदकारश्रवणमात्रादेवात्मशंकावशेनतदर्थप्रतिपत्तिरभूल्लोकेपिहिप्रसिद्धंपुत्रा:
शिष्याश्चानुशास्या:संतोदोषान्निवर्त्तयितव्याइति वैरनुष्ठेयमितिपरस्यसिद्धांतिनोभिप्रायस्तदभिज्ञा:संतोयथोक्तरीत्याविकल्पयंतीति
योजना॥पराभिप्रायज्ञाइत्युपहासोवा॥परस्यप्रजापतेर्मनुष्यादीनांचाभिप्रायाज्ञाइतिनञ्प्रश्लेषोवापाठ:॥एकीयंपरिहारमुक्त्वापरयति॥अत्रेति॥अ
स्तुतेषामेवमाशंकातथापिदकारमात्रात्कीदृशीप्रतिपत्तिरित्याशंक्याह॥तेषांचेति॥तदर्थोदकारार्थोदमादिस्तस्यप्रतिपत्तिस्तत्तद्द्वारेणदांतत्वादि

किमितिप्रजापतिर्दोषज्ञापनद्वारेणततोदेवादीननुशास्यान्दोषान्निवर्तयिष्यतितत्राह॥लोकेपीति॥दकारोच्चारणस्यप्रयोजनेसिद्धेफलित माह॥अतइति॥यत्तूक्तंतेवाकथमित्यादितत्राह॥दमादीति॥प्रतिपत्तुंचयुक्तंदमादीतिशेषः इतिशब्दःस्वयूथ्यमतसमाप्त्यर्थः॥परोक्तंपरिहा रमंगीकृत्याख्यायिकातात्पर्यसिद्धांतीब्रूते॥फलंत्विति॥निर्ज्ञातदोषादेवादयोयथादकारमात्रेणततोनिवर्त्स्यंतइतिशेषः॥इतिशब्दोदार्ष्टांतिक प्रदर्शनार्थः॥विशिष्टान्प्रत्यनुशासनस्यप्रवृत्तत्वादस्माकंनदभावादनुपादेयंदमादीतिशंकते॥नन्विति॥किंच॥देवादिभिरपिप्रातिस्विकानुशा

अतोयुक्तंप्रजापतेर्दकारमात्रोच्चारणंदमादित्रयेचदकारान्वयादात्मनोदोषानुरूपेणदेवादीनांविवेकेनप्रतिपत्तुंचेतिफलंत्वेतदा त्मदोषज्ञानेसतिदोषान्निवर्तयितुंशक्यतेऽल्पेनाप्युपदेशेन॥यथादेवादयोदकारमात्रेणेतिनन्वेतत्त्रयाणांदेवादीनामनुशा सनंदेवादिभिरप्येकैकमेवोपादेयमद्यत्वेपिनतुत्रयंमनुष्यैःशिक्षितव्यमितियत्रोच्यतेपूर्वैर्देवादिभिर्विशिष्टैरनुष्ठितमेतत्त्रयंतस्मा न्मनुष्यैरेवचशिक्षितव्यमितितत्रदयालुत्वस्याननुष्ठेयत्वंस्यात्कथमसुरैरप्रशस्तैरनुष्ठितत्वादितिचेन्नतुल्यत्वात्त्रयाणामतःन्यात्रा भिप्रायःप्रजापतेःपुत्रादेवादयःपुत्रेभ्यश्चहितमेवपित्रोपदेष्टव्यंप्रजापतिश्चहितज्ञोनान्यथोपदिशति सनवशादेकैकमेवदमाद्यनुष्ठे

यंनतत्त्रयमित्याह॥देवादिभिरिति॥यथापूर्वस्मिन्कालेदेवादिभिरेकैकमेवोपादेयमित्युक्तंतथावर्तमानेपिकालेमनुष्यैरेकैकमेवकर्तव्यंपूर्वाचा रानुसारान्नतुत्रयंशिक्षितव्यंनतथाचकस्यायंविधिरित्याह॥अद्यत्वेपीति॥आचारप्रामाण्यमाश्रित्यपरिहरति॥अत्रेति॥इत्येकैकमेवनोपादेयमिति शेषः॥दयालुत्वस्यानुष्ठेयत्वमाक्षिपति॥तत्रेति॥मध्येदमादीनामितियावत्॥असुरैरनुष्ठितत्वेपिदयालुत्वमनुष्ठेयंहितसाधनत्वाद्दानादिवदितिप रिहरति॥नेत्यादिना॥देवादिषुप्रजापतेरविशेषात्तेभ्यस्तदुपदिष्टमद्यत्वेपिसर्वमनुष्ठेयमित्यर्थः॥हितस्यैवोपदेष्टव्यत्वेपितदज्ञानात्प्रजापतिरन्यथोपदि

हितज्ञस्य पितुरहितोपदेशित्वाभावस्तस्मादित्युक्तः॥ विशिष्टैरनुष्ठितस्यास्मदादिभिरनुष्ठेयत्वे फलितमाह॥ अत इति॥ प्राजापत्या देवादयो विग्रहवंतः संतीत्यर्थवादस्य यथाश्रुतेर्थे प्रामाण्यमभ्युपगम्य दकारत्रयस्य तात्पर्यं सिद्धमिति वक्तुमिति शब्दः संप्रतिकर्ममीमांसकमतमनुसृत्याह॥ अथवेति॥ कथं मनुष्येष्वेव देवासुरत्वं तत्राह॥ मनुष्याणामिति॥ अन्ये गुणा ज्ञानादयः॥ किं पुनर्मनुष्येषु देवादिशब्दप्रवृत्तौ निमित्तं तदाह॥ अदांतत्वादिति॥ देवादिशब्दप्रवृत्तौ निमित्तांतरमाह॥ इतरांश्चेति॥ मनुष्येष्वेव देवादिशब्दप्रवृत्तौ फलितमाह॥ अत इति॥ इतिशब्दो विध्युप

तस्मात्सुत्रानुशासनं प्रजापतेः परमेतद्धितमतो मनुष्यैरेवैतत्त्रयं शिक्षितव्यमिति अथवा न देवा असुरा वाऽन्ये केचन विद्यंते मनुष्येभ्यो मनुष्याणामेवादांता येऽन्यैरुत्तमैर्गुणैः संपन्नास्ते देवा लोभप्रधाना मनुष्यास्तथा हिंसापराः क्रूरा असुरास्त एव मनुष्या अदांतत्वादिदोषत्रयमपेक्ष्य देवादिशब्दभाजो भवंति इतरांश्च गुणान्सत्त्वरजस्तमांस्यपेक्ष्यातो मनुष्यैरेव शिक्षितव्यमेतत्त्रयमिति॥ तदपेक्षयैव प्रजापतिनोपदिष्टत्वात्तथा हि मनुष्या अदांता लुब्धाः क्रूराश्च दृश्यंते तथा च स्मृतिः॥ कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेदिति॥ दमादिसाधनत्रयं सर्वोपासनशेषं विहितं दांतोऽलुब्धो दयालुः सन्सर्वोपासनेष्वधिक्रियत इति॥ ॥४॥ इति सप्तमे द्वितीयं ब्राह्मणं॥२॥ तत्र निरुपाधिकस्य ब्रह्मणो दर्शनमतिक्रांतमथाधुना सोपाधिकस्य तत्रैवाभ्युदयफलानि वक्तव्यानीत्येवमर्थो यमारंभः

तिप्रदर्शनार्थः॥ मनुष्यैरेवत्रयं शिक्षितव्यमित्यत्र हेतुमाह॥ तदपेक्षयेति॥ मनुष्याणामेव देवादिभावे प्रमाणमाह॥ तथा हीति॥ त्रयं शिक्षितव्यमित्यत्र स्मृतिमुदाहरति॥ तथा चेति॥ सार्थवादेन विधिना सिद्धमर्थमनुवदति॥ दमादीति॥ कथं तस्य सर्वोपासनशेषत्वं तदाह॥ दांत इति॥ अलुब्ध इति छेदः॥ इति शब्दो ब्राह्मणसमाप्त्यर्थः॥४॥ इति सप्तमे द्वितीयं ब्राह्मणं॥ संप्रत्युत्तरसंदर्भस्य तात्पर्यं वक्तुं भूमिकां करोति॥ तत्रेति॥ कांड

बृ० र०
१०

पापस्ययादिरक्षुदयस्तत्फलान्युपासनानीतिशेषः॥ अनंतरब्राह्मणमादायतस्यसंगतिमाह॥ एषइत्यादिना॥ उक्तस्यहृदयशब्दार्थस्यपांचमिकत्वं द्रंर्शयन्प्रजापतित्वंसाधयति॥ यस्मिन्निति॥ कथंहृदयस्यसर्वत्वंतदाह॥ उक्तमिति॥ सर्वत्वसंकीर्तनफलमाह॥ एतत्सर्वमिति॥ तत्रहृदयस्योपास्यत्वे

एषप्रजापतिर्यद्धृदयंप्रजापतिरनुशास्तीत्यनंतरमेवाभिहितंकः पुनरसावनुशास्ताप्रजापतिरित्युच्यतेएषप्रजापतिःकोसौयद्धृदयमितिहृदयस्थाबुद्धिरुच्यतेयस्मिन्नध्याकृत्यब्राह्मणांतेनामरूपकर्मणामुपसंहारउक्तोदिग्विभागद्वारेणतदेतत्सर्वभूतप्रतिष्ठंसर्वभूतात्मभूतंहृदयंप्रजापतिःप्रजानांस्रष्टाएतद्ब्रह्मबृहत्त्वात्सर्वात्मत्वाच्चब्रह्मएतत्सर्वमुक्तंपंचमाध्यायेहृदयस्यहृदयत्वंसर्वत्वंचैतत्सर्वंय

एषप्रजापतिर्यद्धृदयमेतद्ब्रह्मैतत्सर्वंतदेतत्त्र्यक्षरंहृदयमितिहृइत्येकमक्षरमभिहरन्त्यस्मैस्वाश्चान्येचयएवंवेद दइत्येकमक्षरंददत्यस्मैस्वाश्चान्येचयएवंवेदयमित्येकमक्षरमेतिस्वर्गंलोकंयएवंवेद॥ तृतीयंब्राह्मणं॥ ३॥ ॥

स्मात्तस्मादुपास्यंहृदयंब्रह्मतत्रहृदयनामाक्षरविषयमेवतावदुपासनमुच्यतेतदेतद्धृदयमितिनामत्र्यक्षरंत्रीण्यक्षराण्यस्येतित्र्यक्षरंकानिपुनस्तानित्रीण्यक्षराण्युच्यंतेहृइत्येकमक्षरं॥ अभिहरंतिहृतेराहरतिकर्मणोहृइत्येतद्रूपमितियोवेदयस्माद्धृदयायब्रह्मणेस्वाश्चेंद्रियाण्यन्येचविषयाःशब्दादयःस्वंस्वंकार्यमभिहरंतिहृदयंचभोक्त्रर्थमभिहरत्यतोहृदयनाम्नोहृइत्येतदक्षरमितियोवेदास्मैविदुषेऽभिहरंतिस्वाश्चज्ञातयोऽन्येचासंबद्धाबलिमितिवाक्यशेषः॥ विज्ञानानुरूप्येणैतत्फलं॥ सिद्धेसतीत्येतत्॥ फलोक्तिमुत्थाप्यव्याकरोति॥ अभिहरंतीति॥ योवेदास्मैविदुषेभिहरंतीतिसंबंधः॥ वेदनमेवविशदयति॥ यस्मादित्यादिना॥ स्वकार्यरूपदर्शनादिहृदयस्यतुकार्यं

अ० ८ ॥ ...कृतौ... रामः
१०

औचित्यमुक्ते फले कथयति॥ विज्ञानेति॥ अत्रापीति दकारोपासनेपि फलमुच्यत इति शेषः॥ तामेव फलोक्तिं व्यनक्ति॥ हृदयायेति॥ अस्मै
विदुषे स्वाश्चान्ये च ददति बलिमिति शेषः॥ नामाक्षरोपासनानि त्रीणि हृदयस्वरूपोपासनमेकमिति चत्वार्युपासनान्यत्र विवक्षितानीत्या

तयादइत्येतदप्येकमक्षरं एतदपि दानार्थस्य ददातेर्दइत्येतद्रूपं हृदयनामाक्षरत्वेन निबद्धमत्रापि हृदयाय ब्रह्मणे स्वाश्च करणान्य
न्ये च विषयाः स्वं स्वं वीर्यं ददति हृदयं च भोक्त्रे ददाति स्वं वीर्यमतो दकार इत्येवं यो वेदास्मै ददति स्वाश्चान्ये च॥ तयायमित्येतदप्येकम
क्षरं इणो गत्यर्थस्य यमित्येतद्रूपमस्मिन्नाम्नि निबद्धमिति यो वेद स्वर्गं लोकमेति एवं नामाक्षरादपीदृशं विशिष्टं फलं प्राप्नोति किमु व
क्तव्यं हृदयस्वरूपोपासनादिति हृदयस्तुतये नामाक्षरोपन्यासः॥५॥ सप्तमस्य तृतीयं ब्राह्मणं॥३॥ तस्यैव हृदयाख्यस्य ब्रह्मणः सत्य

तद्वैतदेतदेव तदास सत्यमेव स यो हैतं महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति जयतीमाँल्लोकाञ्जित इन्न्वसावसद्य एव
मेतन्महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति सत्यं ह्येव ब्रह्म॥६॥ चतुर्थं ब्राह्मणं॥४॥ मित्युपासनं विधित्सन्नाह तत्तदिति हृदयं ब्रह्म

परामृष्टं वै इति स्मरणार्थं तद्यद्धृदयं ब्रह्मास्मर्यत इत्येकस्तच्छब्दस्तदेतदुच्यते प्रकारान्तरेणेति द्वितीयस्तच्छब्दः॥ किं पुनस्तत्प्रकारान्तरमे
तदेव तदित्येतच्छब्देन संबध्यते तृतीयस्तच्छब्दः एतदिति वक्ष्यमाणं बुद्धौ संनिधीकृत्याह आस बभूव किं पुनरेतदेवास यदुक्तं हृदयं ब्रह्मेति त
दिति तृतीयस्तच्छब्दो विनियुक्तः किं तदिति विशेषतो निर्दिशति सत्यमेव सच्च त्यच्च मूर्तं चामूर्तं च सत्यं ब्रह्म पंचभूतात्मकमित्येतत शंकयाह॥ एव
मिति॥५॥ सप्तमे तृतीयं ब्राह्मणं॥३॥ ब्राह्मणांतरमस्याप्याक्षराणि व्याचष्टे॥ तस्यैवेत्यादिना॥ सत्यशब्दार्थस्य ज्ञानादिवाक्योपात्तं व्यावर्त्तयति॥ सद्वेति॥ स

वेदनमनूद्य फलोक्तिमवतारयति॥ सयइति॥ प्रथमजत्वं कथयति॥ सर्वस्मादिति॥ सयः कश्चिद्वेदेति संबंधः॥ कैमुतिकसिद्धं फलांतरमाह॥ किंचेति॥ वशीकृतस्य शत्रोः स्वरूपेण सत्त्वं वारयति॥ असच्चेति॥ सयो हैतमित्यादिना यएवमित्यादेरेकार्थत्वात्पुनरुक्तिरित्याशंक्याह॥ कस्मैतदिति॥ कथमस्य विज्ञानस्येदं फलमित्याशंक्याह॥ अतइति॥ पंचमी परामृष्टं स्पष्टयति॥ सत्यं हीति॥ चतुर्थं ब्राह्मणं॥ ४॥ इदमा ब्राह्मणं गृह्यते॥ त

स यः कश्चित्सत्यात्मानमेतम्महन्महत्त्वाद्यक्षं पूज्यं प्रथमजं प्रथमं जातं सर्वस्मात्संसारिणः एतदेवाग्रे जातं ब्रह्मातः प्रथमजं वेद विजानाति सत्यं ब्रह्मेति तस्येदं फलमुच्यते यथासत्येन ब्रह्मणा इमे लोका आत्मसात्कृता जिता एवं सत्यात्मानं ब्रह्म महद्यक्षं प्रथमजं वेद स जयतीमांल्लोकान्॥ किंच॥ जितो वशीकृतः इन्नु इत्थं यथा ब्रह्मणा असौ शत्रुरिति वाक्यशेषः असच्च असद्भवेदसौ शत्रुर्जितो भवेदित्य

आप एवेदमग्र आसुस्ता आपः सत्यमसृजंत सत्यं ब्रह्म ब्रह्म प्रजापतिं प्रजापतिर्देवाꣳस्ते देवाः सत्यमेवोपासते तदेतत्त्र्यक्षरꣳसत्यमिति॥ र्थः॥ कस्यैतत्फलमिति पुनर्निगमयति य एवमेतम्महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति अतो विद्यानुरूपं फलं युक्तं सत्यं ह्येव यस्माद्ब्रह्म॥ ६॥ सप्तस्य चतुर्थं ब्राह्मणं॥ ४॥ सत्यस्य ब्रह्मणः स्तुत्यर्थमिदमाह महद्यक्षं प्रथमजमित्युक्तं तत्कथं प्रथमजत्वमित्युच्यते आप एवेदमग्र आसुरापइति कर्मसमवायिन्योग्निहोत्राद्याहुतयः अग्निहोत्राद्याहुतेर्द्रवात्मकत्वादप्त्वं ताश्चापो ग्निहोत्रादिकर्मापवर्गोत्तरकालं केनचिददृष्टेन सूक्ष्मेणात्मना कर्मसमवायित्वमपरित्यजंत्य स्यावांतरसंगतिमाह॥ महदिति॥ आहुतीनामेव कर्मसमवायित्वं न त्वपामित्याशंक्याह॥ अग्निहोत्रादीति॥ यद्यप्यापः सोमाद्याहूयमानाः कर्मसमवायिन्यस्तथाप्युत्तरकाले कथं तासां तथात्वं कर्मणो ऽस्थायित्वादित्याशंक्य

कर्मसमवायित्वमपरित्यजंत्यस्तत्संबंधित्वेनापःप्रथमंप्रवृत्तास्तन्नाशोत्तरकालंसूक्ष्मेणादृष्टेनात्मनातींद्रियेणात्मनातिष्ठंतीतियोजना॥आप
इतिविशेषणंभूतांतरव्यासेधार्थमितिभ्रांतिंवारयति॥इतरेति॥कथंतर्हितासामेवश्रुतावुपादानंतदाह॥कर्मेति॥इतितासामेवात्रग्रहण
मितिशेषः॥विवक्षितपदार्थंनिगमयति॥सर्वाण्येवेति॥पदार्थमुक्तमनूद्यवाक्यार्थमाह॥ताइति॥यास्ताययोक्ताआपस्ताएवेतियत्शब्दानु

इतरभूतसहिताएवनकेवलाःकर्मसमवायित्वात्तुप्राधान्यमपामितिसर्वाण्येवभूतानिप्रागुत्पत्तेरव्याकृतावस्थानिकृत्स्नसहि
तानिनिर्दिश्यंतआपइतिताआपोबीजभूताजगतोऽव्याकृतात्मनावस्थितास्ताएवेदंसर्वंनामरूपविकृतंजगदग्रआसुर्नान्यत्किंचि
द्विकारजातमासीत्ताःपुनरापःसत्यमसृजंततस्मात्सत्यंब्रह्मप्रथमजंतदेतद्धिरण्यगर्भस्यसूत्रात्मनोजन्मयदव्याकृतस्यजगतो

सदृत्येकमक्षरंतीत्येकमक्षरंयमित्येकमक्षरंप्रथमोत्तमेअक्षरेसत्यंमध्यतोनृतंतदेतदनृतमुभयतःसत्येनपरिगृही
तꣳसत्यभूयमेवभवतिनैनंविद्वाꣳसमनृतꣳहिनस्ति॥१॥ व्याकरणंतत्सत्यंब्रह्मकुतोमहत्वात्कथंमहत्त्वमित्याहयस्मात्स
र्वस्यस्रष्टृकथंयत्सत्यंब्रह्मतत्प्रजापतिंप्रजानांपतिंविराजंसूर्यादिकरणमसृजतेत्यनुषंगःप्रजापतिर्देवान्सविराट्प्रजापतिर्देवा
नसृजतयस्मात्सर्वमेवंक्रमेणसत्याद्ब्रह्मणोजातंतस्मान्महत्सत्यंब्रह्मकथंपुनर्यस्मिन्नुच्यतेतएवंसृष्टादेवाःपितरमपिविराजमती
त्यैतदेवसत्यंब्रह्मोपासतेऽतएतत्प्रथमजंमहद्यक्षंतस्मात्सर्वात्मनोपास्यंततत्संबंधेनयोजना॥सत्यंज्ञानमनंतंब्रह्मेतिश्रुतंसत्यंकथंभूतांतर
सहिताभ्योद्भ्योजायतेतत्राह॥तदेतदिति॥तस्यब्रह्मत्वंप्रश्नपूर्वकंविशदयति॥तत्सत्यमिति॥सत्यस्यब्रह्मणोमहत्त्वंप्रश्नद्वारासाधयति॥कथमि

विशेषणत्रयेसिद्धेफलितमाह॥तस्मादिति॥तस्यापीत्यपिशब्दोहृदयब्रह्मदृष्टांतार्थः॥बुद्धिपूर्वकमनृतंविदुषोपिबाधकमित्यभिप्रेत्यविशिन

तस्यापिसत्यस्यब्रह्मणोनामसत्यमितितदेतत्त्र्यक्षरं॥कानितानिअक्षराणीत्याहसदृसेकमक्षरंतीत्येकमक्षरंतीतिदृकारानुबंधोनिर्देशा र्थः॥यमित्येकमक्षरंतत्रतेषांप्रथमोत्तमेअक्षरेसकारयकारौसत्यंमृत्युरूपाभावान्मध्यतोमध्येनृतमनृतंहिमृत्युर्मर्त्यनृतयोस्तका रसामान्यात्तदेतदनृतंमृत्युरूपमुभयतःसत्येनसकारयकारलक्षणेनपरिगृहीतंव्याप्तमंतर्भावितंसत्यरूपाभ्यामतोऽकिंचित्करंत त्सत्यभूयमेवसत्यबाहुल्यमेवभवतिएवंसत्यबाहुल्यसर्वस्यमृत्योरनृतस्याकिंचित्करत्वंचयोविद्वांस्तमेवंविद्वांसमनृतंकदाचित्त्रमा

तद्यत्तत्सत्यमसौसआदित्योयएषएतस्मिन्मंडलेपुरुषोयश्चायंदक्षिणेक्षन्पुरुषस्तावेतावन्योन्यस्मिन्प्रतिष्ठितौ

दोक्तंनहिनस्ति॥१॥अस्याधुनासत्यस्यब्रह्मणःसंस्थानविशेषउपासनमुच्यतेतत्किंतद्यत्तत्सत्यंब्रह्मप्रथमजंकिमसौसः॥कोसावा दित्यः॥कःपुनरसावादित्योयएषएतस्मिन्नादित्यमंडलेपुरुषोभिमानीसोसौसत्यंब्रह्मयश्चायमध्यात्मंयोयंदक्षिणेक्षन्नक्षिणिपु रुषश्चशब्दात्सचसत्यंब्रह्मेतिसंबंधस्तावेतावादित्याक्षिस्थौपुरुषावेकस्यसत्यस्यब्रह्मणःसंस्थानविशेषौयस्मात्तस्मादन्योन्यस्मिन्नि तरेतरस्मिन्नादित्यश्चक्षुषिचाक्षुषश्चादित्येप्रतिष्ठितावध्यात्माधिदैवतयोरन्योन्योपकार्योपकारकत्वात्कथंप्रतिष्ठितावित्युच्यतेरश्मि भिःप्रकाशेनानुग्रहंकुर्वन्नेषआदित्योस्मिंश्चाक्षुषेअध्यात्मेप्रतिष्ठितः॥ ष्टि॥प्रमादोक्तमिति॥ब्राह्मणांतरमवतारयन्व्याकरोति॥अस्येत्यादि ना॥तत्राधिदैविकंस्थानविशेषमुपन्यस्यति॥तदित्यादिना॥संप्रत्याध्यात्मिकंस्थानविशेषंदर्शयति॥यश्चेति॥प्रदेशभेदवर्तिनोःस्थानभेदेनभेदं

अन्योन्यमुपकार्योपकारकत्वेनान्योन्यस्मिन्प्रतिष्ठितत्वं प्रश्नपूर्वकं प्रकटयति॥ कथमित्यादिना॥ ङ्गोऽश्चक्षुरादिभिरिंद्रियैरिति यावत्॥ अनुगृह्णन्नादित्यमंडलात्मानं प्रकाशयन्नित्यर्थः॥ प्रासंगिकमुपासनाप्रसंगागतमित्यर्थः॥ तस्य दर्शनस्य किं फलमित्याशंक्याह॥ कथमिति॥ पुरुषद्वयस्या

अयं चाक्षुषः प्राणैरादित्यमनुगृह्णन्नमुष्मिन्नादित्येऽधिदैवे प्रतिष्ठितः॥ सोऽस्मिञ्शरीरे विज्ञानमयो यो भोक्ता यदा यस्मिन्काले उत्क्रमिष्यन्भवति तदासौ आदित्यपुरुषो रश्मीनुपसंहृत्य केवलेनौदासीन्येन रूपेणाव्यवतिष्ठते तदायं विज्ञानमयः पश्यति शुद्धमेव केवलं विरश्मिमेतन्मंडलं चंद्रमंडलमिव तदेतदरिष्टदर्शनं प्रासंगिकं प्रदर्श्यते कथं नाम पुरुषः करणीये यत्नवान्स्यादिति नैनमेनं चाक्षुषं

रश्मिभिरेषोऽस्मिन्प्रतिष्ठितः प्राणैरयममुष्मिन्स यदोत्क्रमिष्यन्भवति शुद्धमेवैतन्मंडलं पश्यति नैनमेते रश्मयः प्रत्यायंति॥ २॥ य एष एतस्मिन्मंडले पुरुषस्तस्य भूरिति शिर एकं शिर एकमेतदक्षरं भुव इति बाहू द्वौ बाहू द्वे एते अक्षरे स्वरिति॥ पुरुषमशरीकृत्यानुग्रहाय एते रश्मयः स्वामिकर्तव्यवशात्पूर्वमागच्छंतोऽपि पुनः तत्कर्मक्षयमनुरुध्यमाना द्रवनोपयंति न प्रत्यागच्छंत्येनमतोऽवगम्यते परस्परोपकार्योपकारकभावात्तस्यैवैकस्यात्मनोंऽशावेताविति तत्र योऽसौ कोऽयः एष एतस्मिन्मंडले पुरुषः सत्यनामा तस्य व्याहृतयोऽवयवाः॥ कथं भूरिति येयं व्याहृतिः सा तस्य शिरः प्राथम्यात्तत्र सामान्यं स्वयमेवाह श्रुतिरेकमेकं स्याद्युक्तं शिरस्तथैतदक्षरमेकं भूरिति भुव इति बाहू द्वित्वसामान्याद्द्वौ बाहू द्वे एते अक्षरे तथा स्वरिति न्योन्यमुपकार्योपकारकत्वमुक्तं

निगमयति॥ नेत्यादिना॥ पुनःशब्देन मतेरुत्तरकालो गृह्यते॥ रश्मीनां मचेतनत्वादिवशब्दः पुनर्नकारोच्चारणमन्वयप्रदर्शनार्थं तत्र स्या

तत्रेति प्रथमव्याहृतौ शिरोदृष्ट्यारोप्ये विवक्षिते तस्योपनिषदित्यादि व्याचष्टे॥ तस्येत्यादिना॥ यथा लोके गवादिः स्वेनाभिधानेनाभिधीयमानः
संमुखीभवति तद्वदित्याह॥ लोकवदिति॥ नामोपास्तिफलमाह॥ अहरिति चेति॥ ९॥ यथा मंडलपुरुषस्य व्याहृत्यवयवस्य सोपनिषत्कस्या

प्रतिष्ठा द्वे प्रतिष्ठे द्वे एते अक्षरे प्रतिष्ठे पादौ प्रतितिष्ठत्याभ्यामिति तस्यास्य व्याहृत्यवयवस्य सत्यस्य ब्रह्मणः उपनिषद्रहस्यमभिधा
नं येनाभिधानेनाभिधीयमानं तद्ब्रह्माभिमुखीभवति लोकवत्कासावित्याह अहरित्यहरिति चैतद्रूपं हंतेर्जहातेश्चेति यो वेद स

प्रतिष्ठा द्वे प्रतिष्ठे द्वे एते अक्षरे तस्योपनिषदहरिति हंति पाप्मानं जहाति च य एवं वेद॥ ९॥ योऽयं दक्षिणेऽक्षन्पुरुषस्तस्य
भूरिति शिर एकं शिर एकमेतदक्षरं भुव इति बाहू द्वौ बाहू द्वे एते अक्षरे स्वरिति प्रतिष्ठा द्वे प्रतिष्ठे द्वे एते अक्षरे तस्योपनि
षदहमिति हंति पाप्मानं जहाति च य एवं वेद॥ १०॥ सप्तमस्य पंचमं ब्राह्मणं॥ ५॥ मनोमयोऽयं पुरुषो भाः सत्यस्तस्मि
न्नंतर्हृदये यथा व्रीहिर्वा यवो वा

हंति जहाति च पाप्मानं य एवं वेद॥ ९॥ एवं योऽयं दक्षिणेऽक्षन्पुरुषस्तस्य भूरिति शिर इत्यादि सर्वं
समानं तस्योपनिषदहमिति प्रत्यगात्मभूतत्वात्पूर्ववद्धंतेर्जहातेश्चेति॥ १०॥ सप्तमस्य पंचमं ब्राह्मणं॥ ५॥ उपाधीनामनेकत्वादनेक
विशेषणत्वाच्च तस्यैव प्रकृतस्य ब्रह्मणो मनउपाधिविशिष्टस्योपासनं विधित्सन्नाह मनोमयो मनःप्रायो

धिदैवतमुपासनमुक्तं॥ त
थाध्यात्मं चाक्षुषपुरुषस्योक्तविशेषणस्योपासनमुच्यते इत्याह॥ एवमिति॥ चाक्षुषस्य कथमहमित्युपनिषदिष्यते तत्राह॥ प्रत्यगिति॥ हंते
र्जहातेश्चाहमित्येतद्रूपमिति यो वेद स हंति पाप्मानं जहाति चेति पूर्ववत्फलवाक्यं योज्यमित्याह॥ पूर्ववदिति॥ ४॥ सप्तमस्य पंचमं ब्राह्मणं॥ ५॥

अनेकविशेषणत्वाच्च प्रत्येकं तेषामिति शेषः॥ तत्प्राप्यत्वे हेतुमाह॥ मनसीति॥ प्रकारांतरेण तत्प्राप्यत्वमाह॥ मनसा चेति॥ तस्य भास्वररू
पत्वं साधयति॥ मनस इति॥ तस्य ध्यानार्थं स्थानं दर्शयति॥ तस्मिन्निति॥ औपाधिकमिदं परिमाणं स्वाभाविकं त्वानंत्यमित्यभिप्रेत्याह॥ स

मनस्युपलभ्यमानत्वान्मनसा चोपलभ्यत इति मनोमयोऽयं पुरुषो भाः सत्यः भा एव सत्यं सद्भावः स्वरूपं यस्य सोऽयं भाः सत्यो भास्वर
इत्येतन्मनसः सर्वार्थावभासकत्वान्मनोमयत्वाच्चास्य भास्वरत्वं तस्मिन्नंतर्हृदये हृदयांतस्तस्मिन्नित्येतद्यथा व्रीहिर्वा यवो वा परि
माणत एवं परिमाणस्तस्मिन्नंतर्हृदये योगिभिर्दृश्यत इत्यर्थः॥ स एष सर्वस्येशानः सर्वस्य स्वभेदजातस्येशानः स्वामी स्वामित्वेपि
सति कश्चिदमात्यादितंत्रोऽयं तु न तथा किं तर्हि अधिपतिरधिष्ठाय पालयिता सर्वमिदं प्रशास्ति यदिदं किंच यत्किंचित्सर्वं जगत्त

स एष सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किंच॥ ११॥ षष्ठं ब्राह्मणं॥ ६॥ विद्युद्ब्रह्मेत्याहुर्विदानाद्वि
द्युद्विद्यत्येनं पाप्मनो य एवं वेद विद्युद्ब्रह्मेति विद्युद्ध्येव ब्रह्म॥ १२॥ सप्तमं ब्राह्मणं॥ ७॥

त्सर्वं प्रशास्ति एवं मनोमयस्योपासनात्त
थारूपापत्तिरेव फलं तं यथा यथोपासते तदेव भवतीति ब्राह्मणं॥ ११॥ सप्तमस्य षष्ठं ब्राह्मणं॥ ६॥ तथैवोपासनांतरं सत्यस्य ब्रह्मणो विशि
ष्टफलमारभ्यते॥ विद्युद्ब्रह्मेत्याहुर्विद्युतो ब्रह्मणो निर्वचनमुच्यते विदानादवखंडनात्तमसो मेघांधकारं विदार्य ह्यवभासतेऽतो विद्युदेवं
गुणं विद्युद्ब्रह्मेति यो वेदासौ विद्यत्यवखंडयति विनाशयति पाप्मन

एष इति॥ यदुक्तं सर्वस्येशान इति तन्निगमयति॥ सर्वमिति॥ यथान्यत्र
तथात्र फलाश्रुतेरफलमिदमुपासनमकार्यमिति चेन्नेत्याह॥ एवमिति॥ ११॥ ॥ सप्तमे षष्ठं ब्राह्मणं॥ ६॥ ब्राह्मणांतरमुद्धाय्य विभजते॥ तथैवेत्या

स्त्रा॥ तमसो विदारणाद्विद्युदिति संबंधः॥ तदेव स्फुट
यति॥ मेवेति॥

उक्तमेवफलंप्रकटयति ॥ एनमिति॥१२॥सप्तमेसप्तमंब्राह्मणं॥७॥ब्राह्मणांतरमवतारयति॥पुनरिति॥तांधेनुमुपासीतेतिसंबंधः॥वाचोधे
नाश्वसादृश्यंविशदयति॥यथेत्यादिना॥स्तनचतुष्टयंभोक्तृत्रयंचप्रश्नपूर्वकंप्रकटयति॥केपुनरित्यादिना॥कथंदेवाः यथोक्तौस्तनावुपजीवंति

एनमात्मानंप्रतिप्रतिकूलभूताःपाप्मानोयेतान्सर्वान्पाप्मनोःवखंडयतीत्यर्थः यएवंवेदविद्युद्ब्रह्मेतितस्यानुरूपंफलंविद्युद्धिय
स्माद्ब्रह्म॥१२॥इतिसप्तमस्यसप्तमंब्राह्मणं॥७॥पुनरुपासनांतरंतस्यैवब्रह्मणःवाग्वैब्रह्मेतिवागितिशब्दःत्रयीतांवाचंधेनुंधेनु
रिवधेनुःयथाधेनुश्चतुर्भिःस्तनैःस्तन्यंपयःक्षरतिवत्सायएवंवाग्धेनुर्वक्ष्यमाणैःस्तनैःपयद्वान्नंक्षरतिदेवादिभ्यःकेपुनस्तेस्त

वाचंधेनुमुपासीततस्याश्चत्वारःस्तनाःस्वाहाकारोवषट्कारोहंतकारःस्वधाकारस्तस्यैद्वौस्तनौदेवाउपजीवंतिस्वाहा
कारंचवषट्कारंचहंतकारंमनुष्याःस्वधाकारंपितरस्तस्याःप्राणऋषभोमनोवत्सः॥१३॥अष्टमंब्राह्मणं॥८॥ नाःकेवातेये
भ्यःक्षरतितस्याएतस्यावाचोधेन्वाद्वौस्तनौदेवाउपजीवंतिवत्सस्थानीयाःकौतौस्वाहाकारंचवषट्कारंचाभ्यांहिहविर्दीयतेदेवेभ्यःहंत
कारंमनुष्याःहंतइतिमनुष्येभ्योन्नंप्रयच्छंतिस्वधाकारंपितरःस्वधाकारेणपितृभ्यःस्वधांप्रयच्छंतितस्याःधेन्वावाचःप्राणऋषभः
प्राणेनहिवाक्प्रसूयतेमनोवत्सोमनसाहिप्रस्राव्यतेमनसाह्यालोचितेविषयेवाक्प्रवर्ततेतस्मान्मनोवत्सस्थानीयमेवंवाग्धेनूपा
सकस्ताद्भाव्यमेवप्रतिपद्यते॥सप्तमेअष्टमंब्राह्मणं॥८॥ तत्राह॥आभ्यांहीति॥हंतयद्यपेक्षितमित्यर्थः॥स्वधामन्नं॥प्रस्राव्यतेप्रस्नुतास्तरणो
द्यताक्रियते॥मनसाहीत्यादिनोक्तंविवृणोतिमनसेति॥फलाश्रवणादेतदुपासनमकिंचित्करमित्याशंक्याह॥एवमिति॥ताद्भाव्यंयथोक्तवागुपाधिक

ब्राह्मणांतरमनूद्यतस्यतात्पर्यमाह॥ अयमिति॥ अन्नपानस्यपक्तातत्सद्भावेमानमाह॥ तस्येति॥ क्रियायाःश्रवणस्येतदितिविशेषणंतद्यथाभ

अयमग्निर्वैश्वानरःपूर्ववदुपासनांतरमयमग्निर्वैश्वानरःकोयमग्निरित्याहयोयमंतःपुरुषेकिंशरीरारंभकोनेत्युच्यतेयेनाग्निनावै
श्वानराख्येनेदमन्नंपच्यते॥ किंतदन्नंयदिदमद्यतेभुज्यतेन्नंप्रजाभिर्जाठरोग्निरित्यर्थः॥ तस्यसाक्षादुपलक्षणार्थमिदमाहतस्या
ग्नेरन्नंपचतोजाठरस्यैषघोषोभवतिकोसौयंघोषमेतदितिक्रियाविशेषणंकर्णावपिधायांगुलीभ्यामपिधानंकृत्वाशृणोतितंप्रजा
पतिमुपासीतवैश्वानरमग्निमत्रापिताद्रूप्यंफलंतत्रप्रासंगिकमिदमरिष्टलक्षणमुच्यतेसोत्रशारीरोभोक्तायदोत्क्रमिष्यन्भवतिनैनंघो

अयमग्निर्वैश्वानरोयोयमंतःपुरुषेयेनेदमन्नंपच्यतेयदिदमद्यतेतस्यैषघोषोभवतियमेतत्कर्णावपिधायशृणो
तिसयदोत्क्रमिष्यन्भवतिनैनंघोषंशृणोति॥१४॥ नवमंब्राह्मणं॥९॥

षंशृणोति॥१॥ सप्तमस्यनवमंब्राह्मणं॥ सर्वेषाम
स्मिन्प्रकरणेउपासनानांगतिरियंफलंचोच्यतेयदावैपुरुषोविद्वानस्माल्लोकात्प्रैतिशरीरंपरित्यजतिसतदावायुमागच्छत्यंतरि
क्षेतिर्यग्भूतोवायुःस्तिमितोभेद्यस्तिष्ठतिसवायुस्तत्रस्वात्मनितस्मैसंप्राप्तायविजिहीतेस्वात्मावयवान्विगमयतिछिद्रीकरोतीत्या
त्मानमित्यर्थः॥ किंपरिमाणंछिद्रमित्युच्यतेयथारथचक्रस्यखंछिद्रंप्रसिद्धपरिमाणंतेनछिद्रेणसविद्वानूर्ध्वआक्रमतेऊर्ध्वंसग

च्छति॥ सआदित्यमागच्छति

वतितथेत्यर्थः॥ कौक्षेयाग्न्युपाधिकस्यपरस्योपासनेप्रस्तुतेसतीत्याह॥ तत्रेति॥१४॥ सप्तमेनवमंब्रा
ह्मणं॥९॥ ब्राह्मणांतरस्यतात्पर्यमाह॥ सर्वेषामिति॥ फलंत्वश्रुतफलानामितिशेषः॥ किमितिविद्वान्वायुमागच्छतितमुपेक्ष्यैवब्रह्मलोकंकुतो

नगच्छतीत्याशंक्याह। अंतरिक्षादिति॥

मृदंगादि २

आदित्यंप्रत्यागमनेहेतुमाह॥आदित्यइति॥उक्तेर्थेवाक्यंपातयति॥तस्मादिति॥बहून्कल्पानित्यवांतरकल्पोक्तिः॥सप्तमस्यदशमंब्राह्मणं१०

आदित्योब्रह्मलोकंजिगमिषोर्मार्गनिरोधंकृत्वास्थितःसोप्येवंविदेउपासकायद्वारंप्रयच्छतितस्मैसतत्रविजिहितेयथालंबरस्यखं
वादित्रविशेषस्यछिद्रंपरिमाणंतेनसऊर्ध्वआक्रमतेसचंद्रमसंआगच्छतिसोपितस्मैसतत्रविजिहीतेयथादुंदुभेःखंप्रसिद्धंतेनऊ
र्ध्वआक्रमतेसलोकंप्रजापतिमागच्छतिकिंविशिष्टमशोकंमानसेनदुःखेनविवर्जितमित्येतत्दहिमंहिमवर्जितंशरीरदुःखवर्जित

यदावैपुरुषोस्माल्लोकात्प्रैतिसवायुमागच्छतितस्मैसतत्रविजिहीतेयथारथचक्रस्यखंतेनसऊर्ध्वआक्रमतेसआ
दित्यमागच्छतितस्मैसतत्रविजिहीतेयथालंबरस्यखंतेनसऊर्ध्वआक्रमतेसचंद्रमसमागच्छतितस्मैसतत्रविजि
हीतेयथादुंदुभेःखंतेनसऊर्ध्वआक्रमतेसलोकमागच्छत्यशोकमहिमंतस्मिन्वसतिशाश्वतीःसमाः॥१५॥द
शमंब्राह्मणं॥१०॥एतद्वैपरमंतपोयद्व्याहितस्तप्यतेपरमꣳहैवलोकंजयतियएवंवेदैतद्वैपरमंतपोयंप्रेतमरण्यꣳ

मित्यर्थः॥तंप्राप्यतस्मिन्वसतिशाश्वतीर्नित्याःसमाःसंवत्सरानित्यर्थः॥ब्रह्मणोबहून्कल्पान्वसतीत्येतत्॥सप्तमस्यदशमंब्रा
ह्मणं॥१०॥एतद्वैपरमंतपःकिंतद्यद्व्याहितोज्वरादिपरिगृहीतःसन्यत्तप्यतेतदेतत्परमंतपइत्येवंचिंतयेत्दुःखसामान्यात्त
स्यैवंचिंतयतोविदुषःकर्मक्षयहेतुस्तदेवतपोभवत्यनिंदतोऽविषीदतःसएवचतेनविज्ञानतपसादग्धकिल्बिषः

ब्रह्मोपासनप्रसंगेनफलवद्ब्रह्मोपासनमुपन्यस्यते॥एतदिति॥यद्व्याहितइतिप्रतीकमादायव्याचष्टे॥ज्वरादीति॥कर्मक्षयहेतुरित्यक्त

परमंहैवलोकमित्यन्नतपसोनुकूलंफलंलोकशब्दार्थः॥अस्तुग्रामादरण्यगमनंतथापिकथंतपस्त्वमित्याशंक्याह॥ग्रामादिति॥१६॥सप्तमस्यै

परमंहैवलोकंजयतियएवंवेदतथामुमूर्षुरादावेवकल्पयतिकिमेतद्धैपरमंतपोयंप्रेतंमांग्रामादरण्यंहरंतिऋत्विजोंत्यकर्मणे
तद्ग्रामादरण्यगमनसामान्यात्परमंममतत्तपोभविष्यति ग्रामादरण्यगमनंपरमंतपइतिहिप्रसिद्धंपरमंहैवलोकंजयतियए
वंवेदतथैतद्धैपरमंतपोयंप्रेतमग्नावभ्यादधतिअग्निप्रवेशसामान्यात्परमंहैवलोकंजयतियएवंवेद॥१६॥सप्तमस्यैकादशं
ब्राह्मणं॥११॥अन्नंब्रह्मेतितथैतदुपासनांतरंविधित्सन्नाह॥अन्नंब्रह्मान्नमद्यतेयत्तद्ब्रह्मेतिएकेआचार्याआहुस्तन्नतथागृहीत

हरंतिपरमंहैवलोकंजयतियएवंवेदैतद्धैपरमंतपोयंप्रेतमग्नावभ्यादधतिपरमंहैवलोकंजयतियएवंवेद॥१६॥एकादशमंब्रा
ह्मणं॥११॥अन्नंब्रह्मेत्येकआहुस्तन्नतथापूयतिवाअन्नमृतेप्राणात्प्राणोब्रह्मेत्येकआहुस्तन्नतथाशुष्यतिवैप्राणऋते
न्नादेतेहत्वेवदेवतेएकधाभूयंभूत्वापरमतांगच्छत व्यंअन्नंब्रह्मेत्यन्येचाहुःप्राणोब्रह्मेत्येतच्चतथानगृहीतव्यंकिमर्थंपुनर
न्नंब्रह्मेतिनग्राह्यंयस्मात्पूयतिक्लिद्यतेपूतिभावमापद्यतेऋतेप्राणात्तत्कथंब्रह्मभवितुमर्हतिब्रह्महिनामतद्यदविनाशिअस्तुतर्हि
प्राणोब्रह्मनैवंयस्माच्छुष्यतिवैप्राणःशोषमुपैतिऋतेन्नादत्ताहिप्राणोऽतोन्नेनाद्येनविनानशक्नोत्यात्मानंधारयितुंतस्माच्छुष्यतिवै
प्राणऋतेन्ना कादशंब्राह्मणं॥११॥ब्राह्मणांतरंगृहीत्वातात्पर्यमाह॥अन्नमिति॥यथापूर्वस्मिन्ब्राह्मणेफलवद्ब्रह्मोपासनमुक्तंतद्वदि
त्याह॥तथेति॥एतदितिब्रह्मविषयोक्तिःउपास्यंब्रह्मनिर्धारयितुंविचारयति॥अन्नमित्यादिना॥अन्नस्यविनाशित्वेपिब्रह्मत्वंकिंनस्यादतआ

कथमन्नं विना प्राणस्य शोषप्राप्तिस्तत्राह॥ अत्ताहीति॥ प्रत्येकं नाखिलमतः शब्दार्थः॥ किंस्विदित्यादिवाक्यस्यार्थं विवृणोति॥ अन्नप्राणाविति॥

दतएकैकस्य ब्रह्मता नोपपद्यते यस्मात्तस्मादेते ह तु एव अन्नप्राणदेवते एकधाभूयमेकधाभावं भूत्वा गत्वा परमतां परमत्वं गच्छतो ब्रह्मत्वं प्राप्नुतः तदेतदेवमध्यवस्य ह स्म आह स्म प्रातृदो नाम पितरमात्मनः किंस्वित्स्विदिति वितर्के यथा मया ब्रह्म परिकल्पितमेवं विदुषे किंस्वित्साधु कुर्यां साधु शोभनं पूजां कान्वस्मै पूजां कुर्यामित्यभिप्रायः किमेवास्मै एवं विदुषे असाधु कुर्यां कृतकृत्योसावित्यभिप्रायः अन्नप्राणौ सहभूतौ ब्रह्मेति विद्वान्नासावसाधुकरणेन खण्डितो भवति नापि साधुकरणेन महीकृत

स्तद्वस्माह प्रातृदः पितरं किं२ स्विदेवैवं विदुषे साधु कुर्यां किमेवास्मा असाधु कुर्यामिति स ह स्माह पाणिना मा प्रातृद कस्त्वेनयोरेकधाभूयं भूत्वा परमतां गच्छतीति तस्मा उ हैतदुवाच वीत्यन्नं वै व्यन्ने हीमानि सर्वाणि भूतानि विष्टानि रमिति प्राणो वै रं प्राणे हीमानि सर्वाणि भूतानि रमंते॥ तमेवंवादिनं स पिताह स्म आह पाणिना हस्तेन निवारयन्मा प्रातृद मैवं वोचः कस्त्वेनयोरन्नप्राणयोरेकधाभूयं भूत्वा परमतां कस्त्वा गच्छति न कश्चिदपि विद्वाननेन ब्रह्मदर्शनेन परमतां गच्छति तस्मान्नैवं वक्तुमर्हसि कृतकृत्योसाविति यद्येवं ब्रवीतु भवान्कथयतु कथं परमतां गच्छतीति तस्मै उ ह एतद्वक्ष्यमाणगुणद्वयं वच उवाच किं तद्धि इति किं तद्धि इत्युच्यते अन्नं वै वि अन्ने हि यस्मादिमानि सर्वाणि भूतानि विष्टान्याश्रितान्यतोन्नं वीत्युच्यते किं च रमिति चोक्तवान्पिता किं पुनस्तद्रं प्राणो वै रं कुतः इत्याह प्राणे हि यस्माद्बलाश्रये सति सर्वाणि भूतानि रमंतेऽतो रं प्राणः कस्त्विति प्रतीकमादा

यद्येवमुक्तरीत्या परमत्वं यदि नास्तीत्यर्थः॥ उक्तमसंकीर्णगुणद्वयं संक्षिप्याह॥ सर्वभूतेति॥ अन्नगुणं विना प्राणगुणादेव ध्यानं सिध्यतीत्या
शंक्याह॥ नहीति॥ प्राणगुणस्याप्यन्नगुणत्वसंभवादलं प्राणेनेत्याशंक्याह॥ नापीति॥ गुणद्वयस्य परस्परापेक्षामनुभवानुसारेण स्फोरय
ति॥ यदात्विति॥ आयतनवतो बलवतश्च कृतार्थते(त्य)त्र तैत्तिरीयश्रुतिं संवादयति॥ एवावस्यादिति॥ आशिष्टो दृढिष्ठो बलिष्ठस्तस्येयं पृथिवी स

सर्वभूताश्रयगुणमन्नं सर्वभूतरतिगुणश्च प्राणो न हि कश्चिदनायतनो निराश्रयो रमते नापि सत्यप्यायतनेऽप्राणो दुर्बलो रमते यदा
लायतनवान्प्राणी बलवांश्च तदा कृतार्थमात्मानं मन्यमानो रमते लोकः॥ युवा स्यात्साधुयुवाध्यायक इत्यादिश्रुतेः इदानीमेवंविदः फ

सर्वाणि ह वा अस्मिन्भूतानि विशंति सर्वाणि भूतानि रमंते य एवं वेद॥ १७॥ द्वादशं ब्राह्मणं॥ १२॥ उक्थं प्राणो वा उक्थं
प्राणो हीदꣳ सर्वमुत्थापयत्युद्धास्मादुक्थविद्वीरस्तिष्ठत्युक्थस्य सायुज्यꣳ सलोकतां जयति य एवं वेद॥ १८॥ लमाह सर्वाणि

ह वा अस्मिन्भूतानि विशंत्यन्नगुणज्ञानात्सर्वाणि भूतानि रमंते प्राणगुणज्ञानाद्य एवं वेद ॥ १७ ॥ सप्तमस्य द्वादशं ब्राह्मणं॥ १२॥
उक्थं तयोपासनांतरं उक्थं शस्त्रं तद्धि प्रधानं महाव्रते क्रतौ किं पुनस्तदुक्थं प्राणो वा उक्थं प्राणश्च प्रधान इंद्रियाणां उक्थं सर्वशस्त्रा
णामत उक्थमित्युपासीत कथं प्राण उक्थमित्याह प्राणो हि यस्मादिदं सर्वमुत्थापयति उत्थापनादुक्थं प्राणो वीर्यवित्तस्य पूर्णत्वादित्येतदादिशब्दे

नगृह्यते॥ अन्नप्राणयोर्गुणद्वयविशिष्टयोरुपासनमुक्तं॥ १७॥ सप्तमस्य द्वादशं ब्राह्मणं॥ १२॥ इदानीं ब्राह्मणांतरमादायतात्सर्यमाह॥ उक्थमिति
॥ सत्सु शस्त्रांतरेषु किमित्युक्थमुपास्यते नो पन्यस्यते तत्राह॥ तद्धीति॥ कस्मिन्किमारोप्य कस्योपास्यत्वमिति प्रश्नद्वारा विवृणोति॥ किं पुनरिति॥ तस्मि

बृ·र·
१७

तस्मिन्नुक्थशब्दस्यसमवेतार्थत्वंप्रश्नपूर्वकमाह॥कथमित्यादिना॥उत्थानस्यस्वतोपिसंभवान्नप्राणकृतत्वमित्याशंक्याह॥नहीति॥उक्थस्यप्रा

नह्यप्राणःकश्चिदुत्तिष्ठतितदुपासनफलमाहउत्हअस्मादेवंविदउक्थवित्प्राणविद्वीरःपुत्रःउत्तिष्ठतिहदृष्टमेतत्फलमदृष्टंतूक्थ
स्यसायुज्यंसलोकतांजयतियएवंवेद॥१८॥यजुरितिचोपासीतप्राणंप्राणोवैयजुःकथंयजुःप्राणःप्राणेहियस्मात्सर्वाणि
भूतानियुज्यंते॥नह्यसतिप्राणेकेनचित्कस्यचिद्योगसामर्थ्यंअतोयुनक्तीतिप्राणोवैयजुरेवंविदःफलमाहयुज्यंतेउद्यमंत
इत्यर्थःहअस्मैएवंविदेसर्वाणिभूतानिश्रैष्ठ्यंश्रेष्ठभावस्तस्मैश्रैष्ठ्यायश्रेष्ठभावायायंनःश्रेष्ठोभवेदितियजुषःप्राणस्यसायुज्यमि

यजुःप्राणोवैयजुःप्राणेहीमानिसर्वाणिभूतानियुज्यंतेयुज्यंतेहास्मैसर्वाणिभूतानिश्रैष्ठ्याययजुषःसायुज्यꣳसलो
कतांजयतियएवंवेद॥१९॥सामप्राणोवैसामप्राणेहीमानिसर्वाणिभूतानिसम्यंचिसम्यंचिहास्मैसर्वाणिभूतानिश्रै
ष्ठ्यायकल्पंतेसाम्नःसायुज्यꣳसलोकतांजयतियएवंवेद॥२०॥ त्यादिसर्वंसमानं॥१९॥सामेतिचोपासीतप्राणंप्राणोवैसा

मकथंप्राणःसामप्राणेहियस्मात्सर्वाणिभूतानिसम्यंचिसंगच्छंतेसंगमनात्साम्यतापत्तिहेतुत्वात्सामप्राणःसम्यंचिसंगच्छंतेह
अस्मैसर्वाणिभूतानिनकेवलंसंगच्छंतएवश्रेष्ठभावायचास्मैकल्प्यंतेसमर्थ्यंतेसमर्थानिभवंतिसाम्नःसायुज्यमित्यादिपूर्ववं
त्॥२०॥तंप्राणंक्षत्रमित्युपासीतप्राणोवैक्षत्रंप्रसिद्धमेतत्प्राणोहिवैक्षत्रंकथंप्रसिद्धतेत्याह॥ णस्येत्येतत्॥विज्ञानतारतम्यमपेक्ष्यसा
युज्यंसालोक्यंचव्याख्येयम्॥१८॥१॥यजुःशब्दस्यान्यत्ररूढत्वादयुक्तंप्राणविषयत्वमितिशंकित्वापरिहरति॥कथमित्यादिना॥असत्यपिप्राणे

अ·
७
॥पाः संभवतीत्याशंक्याह नहीति॥
राम:
१७

प्रकरणानुगृहीतप्राणशब्दश्रुत्या यजुःशब्दस्य रूढिं सक्त्वा योगो गीक्रियत इत्याह॥ अत इति॥ संगमनादित्येतदेव व्याचष्टे॥ साम्येति॥ शा
खांतरशब्देन माध्यंदिनशाखोच्यते॥ ४॥ सप्तमस्यत्रयोदशं ब्राह्मणं॥ १३॥ वृत्तमनूद्य गायत्रीब्राह्मणस्य तात्पर्यमाह॥ ब्रह्मण इत्यादिना॥
छंदोंतरेष्वपि विद्यमानेषु किमिति गायत्र्युपाधिकमेव ब्रह्मोपास्यमिष्यते तत्राह॥ सर्वछंदसामिति॥ तत्प्राधान्ये हेतुमाह॥ तदिति॥ तस्य

त्रायते पालयत्येनं पिंडं देहं प्राणः क्षणितोः शस्त्रादिहिंसितास्तु नमांसेनापूरयति यस्मात्तस्मात्क्षतत्राणात्प्रसिद्धं क्षत्रत्वं प्राणस्य
विद्वत्फलमाह प्र क्षत्रमत्रं न त्रायतेन्येन केनचिदित्यत्र क्षत्रं प्राणस्तमत्रं क्षत्रं प्राणं प्राप्नोतीत्यर्थः॥ शाखांतरे वा पाठः क्षत्रमात्रं प्रा
प्नोति प्राणो भवतीत्यर्थः॥ क्षत्रस्य सायुज्यं सलोकतां जयति य एवं वेद॥ २१॥ ४॥ सप्तमस्यत्रयोदशं ब्राह्मणं॥ १३॥ ब्रह्मणो हृदया

क्षत्रं प्राणो वै क्षत्रं प्राणो हि वै क्षत्रं त्रायते हैनं प्राणः क्षणितोः प्र क्षत्रमत्रमाप्नोति क्षत्रस्य सायुज्यꣳ सलोकतां जयति य
एवं वेद॥ २१॥

द्यनेकोपाधिविशिष्टस्योपासनमुक्तमथेदानीं गायत्र्युपाधिविशिष्टस्योपासनं वक्तव्यमित्यारभ्यते सर्वछंद
सां हि गायत्री छंदः प्रधानभूतं तत्प्रयोक्तृगयत्राणाद्गायत्रीति वक्ष्यति न चान्येषां छंदसां प्रयोक्तृप्राणत्राणसामर्थ्यं प्राणात्मभू
ता च सा सर्वछंदसां चात्मा प्राणः प्राणश्च क्षतत्राणात्क्षत्रमित्युक्तं प्राणश्च गायत्री

योगे तुल्यं प्रयोक्तृप्राणत्राणसामर्थ्यं छंदोंतरा
णामपीति चेन्नेत्याह॥ नचेति॥ प्रमाणाभावादिति भावः॥ किंच॥ प्राणात्मभावो गायत्र्या विवक्ष्यते प्राणश्च सर्वेषां छंदसां निर्वर्तकत्वादात्मा त
था च सर्वछंदोव्यापकगायत्र्युपाधिकब्रह्मोपासनमेवात्र विवक्षितमित्याह॥ प्राणात्मेति॥ तदात्मभूता गायत्रीत्युक्तं व्यक्तीकरोति॥ प्राणश्चेति॥

तत्प्रयोक्तृगयत्राणाद्धि गायत्री प्राणश्च वागादीनां त्राता तत्तश्चैकलक्षणत्वात्तयोस्तादात्म्यमित्यर्थः प्राणगायत्र्योस्तादात्म्ये फलितमाह॥ तस्मा दिति॥ गायत्रीप्राधान्ये हेत्वंतरमाह॥ द्विजेति॥ तदेव स्फुटयति॥ गायत्र्येति॥ तत्प्राधान्ये हेत्वंतरमाह॥ ब्राह्मणइति॥ कथमेतावता गायत्री प्राधान्यं तत्राह॥ तद्वेति॥ अतो वक्तव्यमित्यत्रातः शब्दार्थमाह॥ गायत्र्याहीति॥ अधिकारित्वकृतं कार्यमाह॥ ततइति॥ तद्रूब्दो गायत्रीविष

तस्मात्तदुपासनमेव विधित्स्यते द्विजोत्तमजन्महेतुत्वाच्च गायत्र्या ब्राह्मणमसृजत त्रिष्टुभा राजन्यं जगत्या वैश्यमिति द्विजो त्तमस्य द्वितीयं जन्म गायत्री निमित्तं तस्मात्प्रधाना गायत्री ब्राह्मणाव्युत्थाय ब्राह्मणा अभिवदंति स ब्राह्मणो विपापो विरजो विचिकित्सो ब्राह्मणो भवतीत्युत्तमपुरुषार्थसंबंधं ब्राह्मणस्य दर्शयति तच्च ब्राह्मणत्वं गायत्रीजन्ममूलमतो वक्तव्यं गायत्र्याः स

भूमिरंतरिक्षं द्यौरित्यष्टावक्षराण्यष्टाक्षरꣳह वा एकं गायत्र्यै पदमेतदु हैवास्या एतत्स यावदेषु त्रिषु लोकेषु ताव ज्जयति योस्या एतदेवं पदं वेद॥२२॥ तत्त्वं गायत्र्या हि यः सृष्टो द्विजोत्तमो निरंकुश एवोत्तमपुरुषार्थसाधनेऽधिक्रियते तत स्तन्मूलः परमपुरुषार्थसंबंधः॥ तस्मात्तदुपासनविधानायाह भूमिरंतरिक्षं द्यौरित्येतानि अष्टावक्षराणि अष्टाक्षराणि अष्टाक्षर मष्टावक्षराणि यस्य तदिदमष्टाक्षरं हवै प्रसिद्धावद्योतकावेकं प्रथमं गायत्र्यै गायत्र्याः पदं यकारेणैवाष्टत्वपूरणमेतदु ह एव एतदे वास्याः गायत्र्याः पदं पादः प्रथमो भूम्यादिलक्षणस्त्रैलोक्यात्माष्टाक्षरत्वसामान्या

यः॥ गायत्रीवैशिष्ट्यं परामृश्य फलितमुपसंहरति॥ त स्मादिति॥ गायत्रीप्रथमपादस्य सप्ताक्षरत्वं प्रतीयते न त्वष्टाक्षरत्वमित्याशंक्याह॥ यकारेणेति॥ गायत्रीप्रथमपादस्य त्रैलोक्यनाम्नश्च संख्यासा

गायत्रीप्रथमपादेत्रैलोक्यदृष्ट्यारोपस्यप्रयोजनंदर्शयति॥एवमिति॥प्रथमपादज्ञानंविराडात्मकंफलतीत्यर्थः॥२२॥प्रथमपादेत्रैलोक्यदृ
ष्टिवत्द्वितीयेपादेकर्त्तव्यात्रैविद्यदृष्टिरित्याह॥तथेति॥दृष्टिविध्युपयोगित्वेनसंख्यासामान्यंकथयति॥ऋचइति॥संख्यासामान्यफल

देवमेतत्त्रैलोक्यात्मकंगायत्र्याःप्रथमंपदंयोवेदतस्यैतत्फलंसविद्वान्यावत्किंचिदेषुत्रिषुलोकेषुजेतव्यंतावत्सर्वंहजयतियो
ऽस्याएतदेवंपदंवेद॥२२॥तथाऋचोयजूंषिसामानीतित्रयीविद्यानामाक्षराणिएतान्यप्यष्टावेवतथैवाष्टाक्षरंहवाएकंगाय
त्र्यैपदंद्वितीयमेतदुहैवास्याएतदृग्यजुःसामलक्षणंअष्टाक्षरत्वसामान्यादेवसयावतीयंत्रयीविद्यात्रय्याविद्ययायावत्फल

ऋचोयजूंषिसामानीत्यष्टावक्षराण्यष्टाक्षरंहवाएकंगायत्र्यैपदमेतदुहैवास्याएतत्सयावतीयंत्रयीविद्याता
वद्धजयतियोऽस्याएतदेवंपदंवेद॥२३॥ जातमाप्यतेतावद्धजयतियोऽस्याएतद्गायत्र्यास्त्रयीविद्यालक्षणंपदंवेद॥२३॥तथा
प्राणःअपानःविआनःएतान्यपिप्राणाद्यभिधानाक्षराणिअष्टौतच्चगायत्र्यास्तृतीयंपदंयावदिदंप्राणिजातंतावद्धजयतियोऽस्या
एतदेवंगायत्र्यास्तृतीयंपदंवेद॥अथानंतरंगायत्र्यास्त्रिपदायाःशब्दात्मिकायास्तुरीयंपदमुच्यतेअभिधेयभूतमस्याःप्रकृता
याःगायत्र्याएतदेववक्ष्यमाणंतुरीयंदर्शतंपदंपरोरजायएषतपतित्तुरीयमित्यादिवाक्यपदार्थस्वयमेवव्याचष्टेश्रुतिः॥यद्वैचतुर्थं

माह॥एतदिति॥विद्याफलंदर्शयति॥सयावतीति॥२३॥प्रथमद्वितीयपादयोस्त्रैलोक्यत्रैविद्यदृष्टिवत्तृतीयेपादेप्राणादिदृष्टिःकर्त्तव्येत्या
ह॥तथेति॥ननुत्रिपदागायत्रीव्याख्यातातत्केचिमुत्तरग्रंथेनेत्याशंक्याह॥अथेति॥शब्दात्मकगायत्रीप्रकरणविच्छेदार्थोऽयशब्दः॥यद्वैचतुर्थं

बृ·र·
१९

अ·
७

योगिभिर्दृश्यतइवेतिलक्ष्यतेनतुमुख्यमीश्वरस्यदृश्यत्वमतींद्रियत्वादित्याह॥दृश्यतइवेति॥लोकाद्रजांस्युच्यंतइतिश्रुत्यंतरमाश्रित्याह॥सम
स्तमिति॥आधिपत्यभावेनेतिकथंव्याख्यानमित्याशंक्याह॥उपर्युपरीतीति॥वीप्सामाक्षिपति॥नन्विति॥सर्वरजस्त्वपतीत्येतावतैवसर्वाधि

तदिहतुरीयशब्देनाभिधीयतेदर्शतंपदमित्यस्यकोर्थइत्युच्यतेददृशइवदृश्यतइवहिएषमंडलांतर्गतःपुरुषःअतोदर्शतंपदमुच्यतेपरो
रजाइत्यस्यपदस्यकोर्थइत्युच्यतेसर्वंसमस्तंउहिएवएषमंडलस्थःपुरुषोरजोरजोजातंसमस्तंलोकमित्यर्थःउपर्युपर्याधिपत्यभावेनसर्वंलोकंर
जोजातंतपतिउपर्युपरीतिवीप्सासर्वलोकाधिपत्यज्ञापनार्थानतुसर्वशब्देनैवसिद्धत्वाद्वीप्साऽनर्थिकानैषदोषोयेषामुपरिष्टात्सवि

प्राणोपानोव्यानइत्यष्टावक्षराण्यष्टाक्षरंँ हवाएकंगायत्र्यैपदमेतदुहैवास्याएतत्सयावदिदंप्राणितावद्धजयतियोस्या
एतदेवंपदंवेदाऽथास्याएतदेवतुरीयंदर्शतंपदंपरोरजायएषतपतियद्वैचतुर्थंतत्तुरीयंदर्शतंपदमितिददृशइवह्येष
परोरजाइतिसर्वमुह्येवैषरजउपर्युपरितपत्येवंँ हैवश्रियायशसातपतियोस्याएतदेवंपदंवेद॥२४॥ तादृश्यत्वेतद्धि
षयएवसर्वशब्दःस्यादित्याशंकानिवृत्त्यर्थावीप्सायेचामुष्मात्परांचोलोकास्तेषांचेष्टेदेवकामानांचेतिश्रुत्यंतरात्तस्मात्सर्वाविरोधार्था
वीप्सायथासौसवितासर्वाधिपत्यलक्षणयाश्रियायशसाचख्यात्यातपतिएवंहैवश्रियायशसाचतपतियोस्याएतदेवंतुरीयंदर्श
तंपदंवेद॥२४॥ पत्वस्यसिद्धत्वाद्व्यर्थावीप्सेतिचोद्यंदूषयति॥नैषदोषइति॥येषांलोकानामितियावत्॥मंडलपुरुषस्यनिरं
कुशमाधिपत्यमित्यत्रछांदोग्यश्रुतिमनुकूलयति॥येचेति॥वीप्सार्थवत्त्वमुपसंहरति॥तस्मादिति॥चतुर्थपादज्ञानस्यफलवत्त्वंकथय

रामः
१९

अभिधानाभिधेयात्मिकां गायत्रीं व्याख्यायाभिधानस्याभिधेयतंत्रत्वमाह॥ सैषेति॥ आदित्ये प्रतिष्ठिता मूर्तामूर्तात्मिका गायत्री सत्र हेतुमाह॥
मूर्तेति॥ भवतु मूर्तामूर्तं ब्राह्मणानुसारेणादित्यस्य तत्सारत्वं तथापि कथं गायत्र्यास्तस्मिन्प्रतिष्ठत्वं पृथगेव सा मूर्ताद्यात्मिकास्यास्तीत्याशंक्याह
॥रसेति॥ तद्धद्रादित्यसंबंधाभावे मूर्ताद्यात्मिका गायत्री स्यादप्रतिष्ठिते तिशेषः॥ सारादते स्वातंत्र्येण मूर्तादेर्न स्थितिरिति स्थिते फलित

सैषा त्रिपदोक्ता या त्रैलोक्यत्रैविद्यप्राणलक्षणा गायत्री एतस्मिंश्चतुर्थे तुरीये दर्शते पदे परोरजसि प्रतिष्ठिता मूर्तामूर्तरसत्वादादि
त्यस्य रसापाये हि वस्तु नीरसं अप्रतिष्ठितं भवति यथा काष्ठादिदग्धसारं तद्वत्तथा मूर्तामूर्तात्मकं जगत्त्रिपदा गायत्री आदित्ये प्रतिष्ठिता
तद्रसत्वात्सह त्रिभिः पादैस्तद्वै तुरीयं पदं सत्ये प्रतिष्ठितं किं पुनस्तत्सत्यमित्युच्यते चक्षुर्वै सत्यं कथं चक्षुः सत्यमित्याह प्रसिद्धमेतच्चक्षु

सैषा गायत्र्येतस्मिꣳस्तुरीये दर्शते पदे परोरजसि प्रतिष्ठिता तद्वै तत्सत्ये प्रतिष्ठितं चक्षुर्वै सत्यं चक्षुर्हि वै सत्यं तस्माद्यदिदा
नीं द्वौ विवदमानावेयातामहमदर्शमहमश्रौषमिति य एवं ब्रूयादहमदर्शमिति तस्मा एव श्रद्दध्याम॥ हि वै सत्यं कथं प्रसि

द्धते त्याह तस्माद्यद्यदिदिदानीमेवं द्वौ विवदमानौ विरुद्धं वदमानावेयातां आगच्छेयातामहमदर्शं दृष्टवानस्मीत्यन्य आह अहमश्रौषं
त्वया दृष्टं न तथा तद्वस्त्विति तयोर्य एवं ब्रूयादहमद्राक्षमिति तस्मै एव श्रद्दध्याम॥ न पुनर्यो ब्रूयादहमश्रौषमिति श्रोतुर्मृषाश्रवणम
पि संभवति न तु चक्षुषो मृषादर्शनं माह॥ तथेति॥ आदित्यस्य स्वातंत्र्यं वारयति॥ तद्वाइति॥ सत्यशब्दस्यानृतविपरीतवाग्विषयत्वशंकां द्वारा
वारयति॥ किंपुनरित्यादिना॥ चक्षुषः सत्यत्वे प्रमाणाभावं शंकित्वा दूषयति॥ कथमित्यादिना॥ श्रोतरि श्रद्धाभावे हेतुमाह॥ श्रोतुरिति॥ द्रष्टुरपि मृषा

दर्शनं संभवतीत्याशंक्याह॥ नन्विति॥

क्वचित्कथंचित्संभवेपिश्रोत्रपेक्षया द्रष्टरि विश्वासोदृष्टोलोकस्येत्याह॥ तस्मान्नेति॥ विश्वासातिशयफलमाह॥ तस्मादिति॥ आदित्यस्यचक्षुषिप्रतिष्ठितत्वंपंचमेपिप्रतिपादितमित्याह॥ उक्तंचेति॥ सत्यस्यस्वातंत्र्यंप्रत्याह॥ तद्वाइति॥ सत्यस्यप्राणेप्रतिष्ठितत्वंपांचमिकमित्याह॥ तथाचेति॥

तस्मान्नाश्रौषमित्युक्तवतेश्रद्दध्यामतस्मात्तत्सप्रतिपत्तिहेतुत्वात्सत्यंचक्षुस्तस्मिन्सत्येचक्षुषिसहत्रिभिरितरैःपादैस्तुरीयंपदंप्रतिष्ठितमित्यर्थः॥ उक्तंचसआदित्यःकस्मिन्प्रतिष्ठितइतिचक्षुषीतितदेतुरीयपदाश्रयंसत्यंबलेप्रतिष्ठितंकिंपुनस्तद्बलमित्याहप्राणोवैबलंतस्मिन्प्राणेबलेप्रतिष्ठितंसत्यंतथाचोक्तंसूत्रेतदोतंचप्रोतंचेतियस्माद्बलेसत्यंप्रतिष्ठितंतस्मादाहुर्बलंसत्यादोगीयओजीयओज

तद्वैतत्सत्यंबलेप्रतिष्ठितंप्राणोवैबलंतत्प्राणेप्रतिष्ठितंतस्मादाहुर्बलꣳसत्यादोगीयइत्येवम्वेषागायत्र्यध्यात्मंप्रतिष्ठितासाहैषागयाꣳस्तत्रेप्राणावैगयास्तत्प्राणाꣳस्तत्रेतद्यद्गयाꣳस्तत्रेतस्माद्गायत्रीनाम स्वरमित्यर्थः लोकेपियस्मिन्हियदाश्रितंभवतितस्मादाश्रितादाश्रयस्यबलवत्तरत्वंप्रसिद्धंनहिदुर्बलंबलवतःक्वचिदाश्रयभूतंदृष्टमेवमुक्तन्यायेनउएषागायत्रीअध्यात्ममध्यात्मेप्राणेप्रतिष्ठितासैषागायत्रीप्राणोतोगायत्र्याजगत्प्रतिष्ठितंयस्मिन्प्राणेसर्वेदेवाःएकंभवंतिसर्वेवेदाःकर्माणिफलंचसैवंगायत्रीप्राणरूपासतीजगतःआत्मासाहैषागयांस्तत्रेत्रातवतीकेपुनर्गयाःप्राणा सूत्रंप्राणोवायुस्तच्छब्देनसत्यशब्दितसर्वभूतग्रहणं॥ सत्यंबलेप्रतिष्ठितमित्यत्रलोकप्रसिद्धिंप्रमाणयति॥ तस्मादिति॥ तदेवोपपादयति॥ लोकेपीति॥ तदेवव्यतिरेकमुखेनाह॥ नहीति॥ एतेनगायत्र्याःसूत्रात्मत्वंसिद्धमित्याह॥ एवमिति॥ तस्मिन्नर्थेवाक्यंयोजयति॥ सैषेति॥ गायत्र्याःप्राणत्वेकिंसिध्यतितदाह॥ अतइति॥ तदेवस्पष्टयति

गायत्रीनामनिर्वचनेनतस्याजगज्जीवनहेतुत्वमाह॥साहैषेति॥प्रयोक्तृशरीरंसप्तम्यर्थः॥गायंतीतिगयाःवागुपलक्षिताश्चक्षुरादयः॥ब्राह्मण्य
मूलत्वेनस्तुत्यर्थंगायत्र्याएवसावित्रीत्वमाह॥सआचार्यइति॥पङ्क्तिःपादशः॥सावित्र्याःगायत्रीत्वंसाधयति॥सइति॥अतःसावित्रीगायत्रीति

वागादयोवैगयाःशब्दकरणात्तांस्तत्रेसैषागायत्रीततत्त्रयद्यस्माद्गयांस्तत्रेतस्माद्गायत्रीनामगयत्राणाद्गायत्रीतिप्रथिता॥सआचा
र्यःउपनीयमाणवकमष्टवर्षयामेवामूंसावित्रींसवितृदेवताकामन्वाहपच्छोर्धर्चशःसमस्तांचएषैवसासाक्षात्प्राणोजगतःआत्मा
माणवकायसमर्पितेहेदानींव्याख्यातानान्यासआचार्योयस्मैमाणवकायान्वाहप्रानुवक्तितस्यमाणवकस्यगयान्प्राणान्त्रायतेन

सयामेवामूंसावित्रीमन्वाहैषैवसासयस्माअन्वाहतस्यप्राणांस्त्रायते॥२५॥तांहैतामेकेसावित्रीमनुष्टुभमन्वा
हुर्वागनुष्टुबेतद्वाचमनुब्रूमइतिनतथाकुर्याद्गायत्रीमेवसावित्रीमनुब्रूयाद्यदिहवाअप्येवंविद्बह्विव रक्तादिपतना॥टि

त॥२५॥तामेतांसावित्रींहएकेशाखिनोनुष्टुभमनुष्टप्प्रभवामनुष्टुप्छंदस्कामन्वाहुरुपनीतायतदभिप्रायमाहवागनुष्टुप्वाक्
शरीरेसरस्वतीतामेवहिवाचंसरस्वतींमाणवकायअनुब्रूमइत्येतद्वदंतःनतथाकुर्यान्नतथाविद्याद्यत्तेआहुर्मेषैवतल्किं
तर्हिगायत्रीमेवसावित्रीमनुब्रूयात्कस्माद्यस्मात्प्राणोगायत्रीत्युक्तंप्राणेउक्तेवाक्सरस्वतीचान्येचप्राणाःसर्वेमाणवकायसमर्पि

शेषः॥२५॥मतांतरमुद्भावयति॥तामेतामिति॥तत्सवितुर्वृणीमहेवयंदेवस्यभोजनं॥श्रेष्ठंसर्वधातमंतुरंभगस्यधीमहीत्यनुष्टुभंसावित्रीमाहुः
॥सवितृदेवताकत्वादित्यर्थः॥उपनीतस्यमाणवकस्यप्रथमतःसरस्वत्यावर्णात्मिकायांसापेक्षत्वंद्योतयितुंहिशब्दःदूषयति॥नेत्यादिना॥नन्वपे

यदिहेत्यादेरुत्तरस्यग्रंथस्याव्यवहितपूर्वग्रंथसंगतिमाशंक्याह॥किंचेदमिति॥सावित्र्यागायत्रीत्वमितियावत्॥इवशब्दार्थंदर्शयति
॥नहीति॥यद्यपिबहुप्रतिगृह्णातिविद्वानितिपूर्वेणसंबंधः॥तथापिनतेनप्रतिग्रहजातेनैकस्यापिगायत्रीपदस्यविज्ञानफलंभुक्तंस्यात्

किंच॥इदंप्रासंगिकमुक्त्वागायत्रीविदंस्तौतियदिहवैअपिएवंवित्एवंविद्वानबह्विव॥नहितस्यसर्वात्मनोबहुनामास्तिकिं
चित्सर्वात्मकत्वाद्विदुषःप्रतिगृह्णातिनहवैतत्प्रतिग्रहजातंगायत्र्याएकंचनैकमपिपदंप्रतिपर्याप्तं॥२६॥सयइमांस्त्रीन्सयोगाय
त्रीविदिमान्भूरादींस्त्रीन्गोश्वादिधनपूर्णान्लोकान्प्रतिगृह्णीयात्सप्रतिग्रहःअस्यागायत्र्याःएतत्प्रथमंपदंयद्व्याख्यातमाप्नुया

प्रतिगृह्णातिनहैवतद्गायत्र्याएकंचनपदंप्रति॥२६॥सयइमांस्त्रींल्लोकान्पूर्णान्प्रतिगृह्णीयात्सोस्याएतत्प्रथमंपद
माप्नुयादथयावतीयंत्रयीविद्यायस्तावत्प्रतिगृह्णीयात्सोस्याएतद्द्वितीयंपदमाप्नुयादथयावदिदंप्राणियस्तावत्प्रतिगृ
ह्णीयात्सोस्याएतत्तृतीयंपदमाप्नुयादथास्याएतदेवतुरीयंदर्शतंपदंपरोरजायएषतपतिनैवकेनचनाप्यं॥ प्रथमपदवि

ज्ञानफलंतेनभुक्तंस्यान्नत्वधिकदोषोत्पादकःसप्रतिग्रहःअथपुनर्यावतीइयंत्रयीविद्यायस्तावत्प्रतिगृह्णीयात्सोस्याएतद्द्विती
यंपदमाप्नुयाद्द्वितीयपदफलंतेनभुक्तंस्यात्तथायावदिदंप्राणियस्तावत्प्रतिगृह्णीयात्सोस्याएतत्तृतीयंपदमाप्नुयात्तेनतृतीयप
दविज्ञानफलंभुक्तंस्यात्कस्यापिलेदमुच्यते दूरतस्तुदोषाधायकत्वंतस्येत्यर्थः॥२६॥गायत्रीविदःप्रतिगृह्णतोदोषाभावंसामान्येनोक्तंविशे
षतस्तदभावमाह॥सयइति॥यथात्रैलोक्यावच्छिन्नस्यत्रैविद्यावच्छिन्नस्यचार्थस्यप्रतिग्रहेपादद्वयविज्ञानफलमेवभुक्तंनाधिकंदूषणं॥तथेतिय

प्रतिग्रहीता ‾ दातावानैवंविधः संभाव्यते किंतु स्तुसर्थश्रुत्यैतत्कल्पितमित्याह॥ कल्पयित्वेति॥ उक्तमेव संगृह्णाति॥ पादत्रयेति॥ कल्प
यित्वेदमुच्यतद्रूतिकिमितिकल्प्यतेमुख्यमेवैतत्किंनस्यादित्याशंक्याह॥ नचेति॥ कल्सनापितर्हिकिमर्थेत्याशंक्याह॥ गायत्रीति॥ अंगीकृ
त्योत्तरवाक्यमुत्थापयति॥ दातेति॥ तदेवाकांक्षापूर्वकमाह॥ कस्मादिति॥ वागात्मकपादत्रयविज्ञानफलभोगोक्त्यानंतर्यमथशब्दार्थः॥ नै

पादत्रयसममपियदिकश्चित्प्रतिगृह्णीयात्तत्पादत्रयविज्ञानफलस्यैवक्षयकारणंनत्वन्यस्यदोषस्यकर्तृत्वेक्षमंनचैवंदाताप्रतिग्र
हीतावागायत्रीविज्ञानस्तुतयेकल्प्यतेदाताप्रतिगृहीताचयद्यपिएवंसंभाव्यतेनासौप्रतिग्रहोऽपराधक्षमः कस्माद्यतोभ्यधिकमपि
पुरुषार्थविज्ञानमवशिष्टमेवचतुर्थपदविषयंगायत्र्यास्तद्दर्शयतिअथास्याएतदेवतुरीयंदर्शतंपदंपरोरजायएषतपतिय्चेतन्नै

कुतउएतावत्प्रतिगृह्णीयात्॥ २७॥ तस्याउपस्थानंगायत्र्यस्येकपदीद्विपदीत्रिपदीचतुष्पद्यपदसिनहिपद्यसेनम
स्तेतुरीयायदर्शतायपदायपरोरजसेसावदोमाप्रापदिति॥ वक्रेनचनकेनचिदपिप्रतिग्रहेणाप्यंनैवप्राप्यमित्यर्थः॥ यथा
पूर्वोक्तानित्रीणिपदान्येतान्यपिनैवाप्यानिकेनचित्कल्पयित्वैवमुक्तंपरमार्थतः॥ कुतउएतावत्प्रतिगृह्णीयात्त्रैलोक्यादिसमंतस्मा
द्गायत्र्येवंप्रकारोपास्येत्यर्थः॥ २७॥ तस्याउपस्थानंतस्यागायत्र्याउपस्थानमुपेत्यस्थानंनमस्करणंभनेनमंत्रेणकोसौमंत्रइत्याहहेगा
यत्रिअसिभवसित्रैलोक्यपादेनैकपदीत्रयीविद्यारूपेणद्वितीयेनद्विपदीप्राणादिनात्तृतीयेनत्रिपद्यसिचतुर्थेनतुरीयेणचतुष्पद्यसि

वप्राप्यंप्रतिग्रहेणकेनचिदपिनैवभुक्तंस्यादित्यर्थः॥ तत्रैववैधर्म्यदृष्टांतमाह॥ यथेति॥ तानिप्रतिग्रहेणयथाप्याणिनिनतथैतदाप्यमित्यर्थः॥ कुतउइत्या

ऽप्याक्षिप्तास्तिमाहुः॥ प्रतारयित्विताग्रकीविदः
स्याक्षिप्तास्तिमाहुः॥ तत्काणिति॥

एवंप्रकारापादचतुष्टयरूपासवीत्मिकेत्यर्थः॥२७॥प्रकृतमुपासनमेवमंत्रेणसंगृह्णाति॥तस्मादित्यादिना॥ध्येयंरूपमुक्त्वाज्ञेयंगाय
त्र्यारूपमुपन्यस्यति॥अतःपरमिति॥चतुर्थस्यपादस्यपादत्रयापेक्षयाप्राधान्यमभिप्रेत्याह॥अतइति॥यथोक्तनमस्कारस्यप्रयोजनमाह॥

पादैरुपासकैःपद्यसेज्ञायसेऽतःपरंपरेणनिरुपाधिकेनस्वेनात्मनाऽपदसिअविद्यमानंपदंयेनपद्यसेसात्वमपदसियस्मान्नहि
पद्यसेनेतिनेत्यात्मत्वादतोऽव्यवहारविषयायनमस्तेतुरीयायदर्शतायपदायपरोरजसेअसौशत्रुःपाप्मात्वत्प्राप्तिविघ्नकरःअदस्य
दात्मनःकार्यंयत्त्वत्प्राप्तिविघ्नकर्तृत्वंमाप्रापन्नैवप्राप्नोत्वितिशब्दोमंत्रपरिसमाप्त्यर्थः॥यंद्विष्याद्यंप्रतिद्वेषंकुर्यात्त्वयंविद्वांस्तंप्रत्य

यंद्विष्यादसावस्मैकामोमासमृद्धीतिवानहैवास्मैसकामऋध्यतेयस्माएवमुपतिष्ठतेहमदःप्रापमितिवा॥२८॥एत
द्धवैतज्जनकोवैदेहोबुडिलमाश्वतराश्विमुवाचयन्नुहोतद्गायत्रीविदब्रूथाअथकथंहस्तीभूतोवहसीतिमुखं

नेनोपस्थानमसौशत्रुरमुकनामेतिनामगृह्णीयादस्मैयज्ञदत्तायाभिप्रेतःकामोमासमृद्धिसमृद्धिमाप्नोत्वितिचोपतिष्ठतेनहैवा
स्मैदेवदत्तायसकामःसमृध्यतेकस्मैयस्माएवमुपतिष्ठतेअहमदोदेवदत्ताभिप्रेतंप्रापमितिवोपतिष्ठतेअसावदोमाप्रापदित्यादि
त्रयाणांमंत्रपदानांयथाकामंविकल्पः॥२९॥गायत्र्यामुखविधानार्थार्थवादउच्यतेएतद्धकिलवैस्मर्यतेतत्तत्रगायत्रीविज्ञानविषयेज
नकोवैदेहःबुडिलोनामतो असाविति॥द्विविधमुपस्थानमाभिचारिकमाभ्युदयिकंचतत्राद्यंद्वेधाप्युत्पादयति॥यंद्विष्यादिति॥नामगृह्णीया
त्तदीयंनामगृहीत्वाचतदभिप्रेतंमाप्रापदित्यनेनोपस्थानमितिसंबंधः॥आभ्युदयिकमुपस्थानंदर्शयति॥अहमिति॥कीदृशमुपस्थानमत्रमंत्रपदेनक

किंतद्गायत्रीविज्ञानप्रतिकूलमुपलभ्यतेतदाह॥अथेति॥पूर्वापरविरोधद्योतकोथशब्दः॥तथापिगायत्रीविज्ञानस्यफलवत्वेसतिप्रतिकूलमिदं
हस्तीभूतस्सन्तवमांप्रतिवहनमित्याशंक्याह॥एकांगेति॥राजाब्रूते॥शृणिवति॥मुखविज्ञानस्यदृष्टांतावष्टंभेनफलमाचष्टे॥यदीत्यादिना॥इवश

ऽश्वतराश्वस्यापत्यमाश्वतराश्विस्त्वंकिलोक्तवान्यन्नु इति वितर्के होअहोइत्येतत्तद्यत्त्वंगायत्रीविद्ब्रूथाः गायत्रीविद्स्मीति यदब्रू
थाःकिमिदंतस्यवचसोऽननुरूपमथकथंयदिगायत्रीविस्प्रतिग्रहदोषेणहस्तीभूतोवहसीतिसप्रत्याहराज्ञास्मारितोमुखंगायत्र्याः
हियस्मादस्याहेसम्राट्नविदांचकारनविज्ञातवानस्मीतिहउवाचएकांगविकलत्वाद्गायत्रीविज्ञानंममाफलंजातंशृणुतर्हितस्याःगा

ह्यस्याःसम्राण्नविदांचकारेतिहोवाचतस्याअग्निरेवमुखंयदिहवाअपिबह्विवाग्नावभ्यादधतिसर्वमेवतत्संदहत्येवं॰
हैवैवंविद्यद्यपिबह्विवपापंकुरुतेसर्वमेवतत्संप्सायशुद्धःपूतोजरोमृतःसंभवति॥२१॥चतुर्दशंब्राह्मणं॥१४॥ गायत्र्याःअग्नि

रेवमुखं॥यदिहवैअपिबह्विवेंधनमग्नावभ्यादधतिलौकिकाःसर्वमेवतत्संदहत्येवेंधनमग्निरेवंविद्वान्गायत्र्याअग्निर्मुखमित्येवंवेत्ती
त्येवंवित्स्यात्स्वयंगायत्र्यात्माग्निमुखःसन्यद्यपिबह्विवपापंकुरुतेप्रतिग्रहादिदोषंतत्सर्वंपापजातंसंप्सायसंभक्षयित्वाशुद्धोग्निवत्पू
तश्चतस्मात्प्रतिग्रहदोषाद्गायत्र्यात्माजरोमृतश्चसंभवति॥२१॥सप्तमस्यचतुर्दशंब्राह्मणं॥१४॥योज्ञानकर्मसमुच्चयकारीसोंतका
लेआदित्यंप्रार्थयत्यस्तिचप्रसंगोगायत्र्यास्तुरीयपादोहिसः ब्दोवधारणार्थःपापसंस्पर्शराहित्यंशुद्धिः॥तत्फलासंस्पर्शस्तुपूततेतिभेदः॥गा
यत्रीज्ञानस्यक्रममुक्तिफलत्वंदर्शयति॥गायत्र्यात्मेति॥२१॥सप्तमस्यचतुर्दशंब्राह्मणं॥१४॥ब्राह्मणांतरस्यतात्पर्यमाह॥योज्ञानकर्मेति॥आ

तथापिकथमादित्यस्यप्रसंगस्तत्राह॥तदुपस्थानमिति॥नमस्तेतु रीयायेतिहिदर्शितमित्यर्थः आदित्यस्यप्रसंगेसतिफलितमाह॥अतइति॥स
माहितचेतसांप्रयततामपिदृश्यत्वात्नापिहितमेवकिंतुअपिहितमिवेत्यत्रहेतुमाह॥असमाहितेति॥जगतःपोषणाद्भूमेहिमवृष्ट्यादिदानेनेतिशे

तदुपस्थानंप्रकृतमतःसएवप्रार्थ्यतेहिरण्मयेनज्योतिर्मयेनपात्रेणयथापात्रेणेष्टंवस्त्वपिधीयतेएवमिदंसत्यास्यंब्रह्मज्योतिर्मयेनमं
डलेनापिहितमिवासमाहितचेतसामदृश्यत्वात्तदुच्यतेसत्यस्यापिहितंमुखंमुख्यंस्वरूपंतदपिधानंपात्रमपिधानमिव॥दर्शनप्रतिबंध
कारणंतत्त्वंहेपूषन्जगतःपोषणात्पूषासविताअपावृणुअपावृतंकुरुदर्शनप्रतिबंधकारणमपनयेत्यर्थः॥सत्यधर्मायसत्यंधर्मोस्यम

हिरण्मयेनपात्रेणसत्यस्यापिहितंमुखं॥तत्त्वंपूषन्नपावृणुसत्यधर्मायदृष्टये॥पूषन्नेकर्षेयमसूर्यप्राजापत्यव्यूहरश्मीन्स
मूहतेजो

मसोहंसत्यधर्मातस्मैत्वदात्मभूतायेत्यर्थः दृष्टयेदर्शनाय॥पूषन्नित्यादीनिनामान्यामंत्रणार्थानिसवितुःएकर्षेएक
श्चासावृषिश्चएकर्षिर्दर्शनादृषिःसहिसर्वस्यजगतआत्माचक्षुश्चसन्सर्वंपश्यत्येकोवागच्छतीत्येकर्षिःसूर्यएकाकीचरतीतिमंत्रव
र्णाद्यमसर्वस्यहिजगतःसंयमनंत्वत्कृतंसूर्यसुष्ठुईरयतेरसान्रश्मीन्प्राणान्धियोवाजगतइतिप्राजापत्यप्रजापतेरीश्वरस्यापत्यंहि
रण्यगर्भस्यवाहेप्राजापत्यव्यूहविगमयरश्मीन्समूहसंक्षिपात्मनस्तेजोयेनाहंशक्नुयांद्रष्टुं पः॥अपावरणकरणमेवविवृणोति॥दर्शनेति
॥सत्यंपरमार्थस्वरूपंब्रह्मधर्मस्वभावइतियावत्॥ननुदर्शनार्थंतत्प्रतिबंधकनिवृत्तौपूषणिनियुक्तेकिमित्यन्येसंबोध्यनियुज्यंतेतत्राह॥पूषन्नि
त्यादीति॥दर्शनादृष्टिरित्युक्तंविशदयति॥सहीति॥सूर्यआत्माजगतस्तस्थुषश्चेतिमंत्रवर्णमाश्रित्योक्तं॥जगतआत्मेति॥चक्षुर्मित्रस्यवरुणस्या

स्वाभाविकारश्मयोनविगमयितुंशक्याइत्याशंक्याह॥ समूहेति॥ मदीयतेजःसंक्षेपंविनापितेमत्स्वरूपदर्शनंस्यादित्याशंक्याह॥ तेजसाहीति
॥ विद्योतनंविद्युत्प्रकाशः॥ तस्मिन्सतिरूपाणांस्वरूपमंजसाचक्षुषानशक्यंद्रष्टुंतस्यचक्षुर्मोषित्वात्तथेत्याह॥ विद्योतनइवेति॥ तेजःसंक्षेपस्यप्र
योजनमाह॥ यदिति॥ किंच॥ नाहंत्वांभृत्यवद्याचेऽभेदेनध्यातत्वादित्याह॥ योसाविति॥ व्याहृतिशरीरेपुरुषेकथमहमितिप्रयोगोपपत्तिरित्याशं

तेजसाह्यपहतदृष्टिर्नेशक्नुयांत्वत्स्वरूपमंजसाद्रष्टुं॥ विद्योतनइवरूपाणाममतउपसंहरतेजः॥ यत्तेतवरूपंसर्वकल्याणानामतिश
येनकल्याणंकल्याणतमंतत्तेपश्यामिपश्यामोवयंवचनव्यत्यासेनयोसौभूर्भुवःस्वर्व्याहृत्यवयवःपुरुषःपुरुषाकृतित्वात्पुरुषःसोह
मस्मिभवामिअहरहमितिचोपनिषदुक्तत्वादादित्यचाक्षुषयोस्तदेवेदंपरामृश्यतेसोहमस्म्यमृतमितिसंबंधः॥ ममामृतस्यसत्यस्य

यत्तेरूपंकल्याणतमंतत्तेपश्यामि॥ योसावसौपुरुषःसोहमस्मि॥ वायुरनिलममृतमथेदंभस्मांतꣳशरीरं॥ ॐ क्रतोस्मर
कृतꣳस्मरक्रतोस्मरकृतꣳस्मर॥ शरीरपातेशरीरस्थोयःप्राणोवायुःसोनिलंबाह्यंवायुमेवप्रतिगच्छतुतथान्यादेवताःस्वांस्वां
प्रकृतिंगच्छंतुअथेदमपिभस्मांतंसत्पृथिवींयातुशरीरमथेदानीमात्मनःसंकल्पभूतांमनसिव्यवस्थितामग्निदेवतांप्रार्थयतिओमि
तिक्रतोइतिचसंबोधनार्थावेवओंकारप्रतीकत्वादोंमनोमयत्वाच्चक्रतुःहेओंहेक्रतो क्याह॥ अहरिति॥ तदेवेदमित्यहंरूपमुच्यते॥ ननुतवश
रीरपातेपिनामृतत्वमाध्यात्मिकवाय्वादिप्रतिबंधादतआह॥ ममेति॥ वायुग्रहणस्योपलक्षणत्वंविवक्षित्वाह॥ तथेति॥ देहस्यदेवतानामप्रतिबंधकत्वे
पिदेहस्यैवसूक्ष्मतांगतस्यप्रतिबंधकत्वान्नतवामृतत्वमित्याशंक्याह॥ अथेति॥ मंत्रांतरमवतार्यव्याकरोति॥ अथेदानीमित्यादिना॥ अवतीत्योमीश्व

सर्वस्य रसकस्तस्य जाठराग्निप्रतीकत्वेन ध्यातत्वादग्निशब्देन निर्देश एवमग्निदेवतां संबोध्य नियुंक्ते॥ स्मरेति॥ इष्टां गतिं जिगमिषता किमिति स्मरणे देवता नियुज्यते तत्राह॥ तत्स्मरणेति॥ प्रार्थनांतरं समुच्चिनोति॥ किं चेति॥ उक्तमेव व्यनक्ति॥ नेत्यादिना॥ अस्मान्नयेति पूर्वेण संबंधः॥ प्रज्ञानग्रहणं कर्मादीनामुपलक्षणं प्रार्थनांतरं दर्शयति॥ किं चेति॥ पापवियोजनफलमाह॥ तेनेति॥ भवद्भिराराधितो भवतां यथोक्तं फलं साधयिष्यामीत्याशंक्याह॥ किं

स्मर स्मर्तव्यमंतकाले हि॥ तत्स्मरणवशादिष्टा गतिः प्राप्यते ऽतः प्रार्थ्यते यन्मया कृतं तत्स्मर पुनरुक्तिरादरार्था॥ किं च॥ हे अग्ने नय प्रापय सुपथा शोभनेन मार्गेण राये धनाय कर्मफलप्राप्तय इत्यर्थः॥ न दक्षिणेन कृष्णेन पुनरावृत्तियुक्तेन किं तर्हि॥ शुक्लेनैव सुपथास्मान्विश्वानि सर्वाणि हे देव वयुनानि प्रज्ञानानि सर्वप्राणिनां विद्वान्॥ किं च॥ युयोधि अपनय वियोजयास्मदस्मत्तो जुहुराणं कुटिलमेनः पापं पापजातं सर्वं तेन पापेन वियुक्ताव

अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान्॥ युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम॥ १॥ पंचदशं ब्राह्मणं॥ इति बृहदारण्यके पंचमोऽध्यायः॥ ५॥ यमेष्याम उत्तरेण पथा त्वत्प्रसादात् किं तु वयं तुभ्यं परिचर्यां कर्तुं न शक्नुमो भूयिष्ठां बहुतमां ते तुभ्यं नम उक्तिं नमस्कारवचनं विधेम नमस्कारोक्त्या परिचरेमेत्यर्थो ऽन्यत्कर्तुमशक्ताः संतं इति॥ हरिः ॐ तत्सदिति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविंदभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवत्पूज्यपादकृतौ श्रीमद्बृहदारण्यकवृत्तौ सप्तमोऽध्यायः समाप्तः॥ त्विति॥ बहुतमत्वं भक्तिश्रद्धातिरेकयुक्तत्वं यागादिनापि परिचरणं क्रियतामित्याशंक्याह॥ अन्यदिति॥ सततं नमस्कारोक्त्या परिचरेमेति पूर्वेण संबंधः॥ अशक्तिश्च मुमूर्षावशादिति द्रष्टव्यं॥ इति शब्दोऽध्यायपरिसमाप्त्यर्थः॥ १॥ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानंदभगवत्पूज्यपादशिष्यश्रीमद्भगवदानंदज्ञानकृतायां बृहदारण्यकभाष्यटीकायां सप्तमोऽध्यायः समाप्तः॥ ७॥ मूल १०० भाष्य ५०० टीका ४००

ॐ तत्सत्

इतिसटीकबृहदारण्योपनिषद्भाष्यंसमाप्तम्

॥ ॐ नमस्व

॥ ॐ नमस्ता ॥

॥श्रीकृष्णानंदरामसमर्थ॥

अथसटीकबृहदारण्योपनिषद्भाष्यस्य अष्टमोध्यायः प्रारभ्यते॥

श्रीगणेशायनमः॥ ॐ॥ ओंकारोदमादित्रयंब्रह्माऽब्रह्मोपासनानितत्फलंतदर्थागतिरादित्याद्युपस्थानमित्येषोर्थः सप्तमेनिर्वृत्तः संप्रतिप्राधान्येनाब्रह्मोपासनंसफलंश्रीमंथादिकर्मचवक्तव्यमित्यष्टममध्यायंआरभमाणोब्राह्मणसंगतिमाह॥ प्राणइति॥ तस्मात्प्राणोगायत्रीतियुक्तमुक्तमितिशेषः॥ प्राणस्यश्रेष्ठत्वादिनाद्यापिनिर्धारितमितिशंकित्वापरिहरति॥ कथमित्यादिना॥ प्रकारांतरेणपूर्वोत्तरग्रंथसंगतिमाह॥ अथवेति॥ आदिशब्दादन्नवैशिष्ट्यादिनिर्देशः॥ तत्रेति॥ प्राणस्यैवविशिष्टगुणकस्योपास्यत्वोक्तिः हेतुर्ज्येष्ठत्वादिः॥ तन्मात्रमिहानंतरग्रंथेकथ्यतइति

हरिः ॐ प्राणोगायत्रीत्युक्तंकस्मात्पुनः कारणात्प्राणभावोगायत्र्याः नपुनर्वागादिभावइतियस्माज्ज्येष्ठश्चश्रेष्ठश्चप्राणोनवागादयोज्येष्ठश्रेष्ठभाजः कथंज्येष्ठत्वंश्रेष्ठत्वंचप्राणस्येतितन्निर्दिधारयिषयेदमारभ्यते॥ अथवाउक्थयजुःसामक्षत्रादिभावैः प्राणस्यैवोपासनमभिहितंसत्स्वप्यन्येषुचक्षुरादिषुतत्रहेतुमात्रमिहानंतर्येणसंबध्यतेनपुनः पूर्वशेषताविवक्षितंतुखिलत्वादस्यकांडस्यपूर्वत्रयदनुक्तंविशिष्टफलंप्राणविषयमुपासनंतद्वक्तव्यमिति॥ यःकश्चिद्धवैइत्यवधारणार्थीयोज्येष्ठश्रेष्ठगुणंवक्ष्यमाणंयोवेदासौभवत्येवज्येष्ठश्चश्रेष्ठश्चस्वएवंफलेनप्रलोभितःसन्प्रश्नायाभिमुखीभूतस्तस्मैचाहप्राणोवैज्येष्ठश्चश्रेष्ठश्चकथंपुनरवगम्यतेप्राणोज्येष्ठश्चश्रेष्ठश्चेति

शेषः॥ तदेवंपूर्वग्रंथस्यहेतुमत्वादुत्तरस्यचहेतुत्वादानंतर्येणपौर्वापर्येणपूर्वग्रंथेनसहोत्तरग्रंथजातंसंबध्यतइतिफलितमाह॥ आनंतर्येणेति॥ वक्ष्यमाणप्राणोपासनस्यपूर्वोक्तोक्थाद्युपास्तिशेषत्वमाशंक्यगुणभेदात्फलभेदाच्चनैवमित्यभिप्रेत्याह॥ नपुनरिति॥ किमितिप्राणोपासनमिहस्वतंत्रमुपदिश्यतेतत्राह॥ खिलत्वादिति॥ इतिशब्दोब्राह्मणारंभोपसंहारार्थः॥ एवंब्राह्मणारंभप्रतिपाद्याक्षराणिव्याचष्टे॥ यःकश्चिदित्यादिना॥ यच्छब्दस्यपुनरुपादानंअन्वयार्थं॥ निपातयोरर्थमवधारणमेवप्रागुक्तंप्रकटयति॥ भवत्येवेति॥ प्रश्नायकोसौज्येष्ठश्चश्रेष्ठश्चेतिप्रश्नस्तदर्थमितियावत्॥

प्राणस्य ज्येष्ठत्वादिकमाक्षिपति॥ कथमिति॥ तत्र हेतुमाह॥ यस्मादिति॥ तस्माज्ज्येष्ठत्वादिकं तुल्यमेवेति शेषः॥ संबंधाविशेषमंगीकृत्य ज्येष्ठत्वं प्राणस्य साधयति॥ तथापीति॥ उक्तमेव समर्थयते॥ निषेककालादिति॥ तत्रापि विप्रतिपन्नं प्रत्याह॥ प्राणे हीति॥ ज्येष्ठत्वेनैव श्रेष्ठत्वे सिद्धे किमिति पुनरुक्तिरित्याशंक्याह॥ भवतित्विति॥ ज्येष्ठत्वे सत्यपि श्रेष्ठत्वाभावमुक्त्वा तस्मिन्सत्यपि ज्येष्ठत्वाभावमाह॥ मध्यम इति॥ इहेति प्राणोक्तिः॥ प्राणस्य श्रेष्ठत्वे

यस्मान्निषेककाल एव शुक्रशोणितसंबंधः प्राणादिकलापस्याविशिष्टस्तथापि नाप्राणं शुक्रं विरोहतीति प्रथमो वृत्तिलाभः प्राणस्य चक्षुरादिभ्यो तो ज्येष्ठो वयसा प्राणो निषेककालादारभ्य गर्भं पुष्यति प्राणः प्राणे हि लब्धवृत्तौ पश्चाच्चक्षुरादीनां वृत्तिलाभो तो युक्तं प्राणस्य ज्येष्ठत्वं चक्षुरादिषु भवति तु कश्चित्कुले ज्येष्ठो गुणहीनत्वात्तु न श्रेष्ठो मध्यमः कनिष्ठो वा गुणाढ्यत्वाद्भवेच्छ्रेष्ठो न ज्येष्ठो न तथे

ॐ यो ह वै ज्येष्ठं च श्रेष्ठं च वेद ज्येष्ठश्च श्रेष्ठश्च स्वानां भवति प्राणो वै ज्येष्ठश्च श्रेष्ठश्च ज्येष्ठश्च श्रेष्ठश्च स्वानां भवत्यपि च येषां बुभूषति य एवं वेद॥ १॥

हेत्याह प्राण एव तु ज्येष्ठश्च श्रेष्ठश्च कथं पुनः श्रैष्ठ्यमवगम्यते प्राणस्य तदिह संवादेन दर्शयिष्यामः सर्वथापि तु प्राणं ज्येष्ठश्रेष्ठगुणं यो वेदोपास्ते स स्वानां ज्ञातीनां ज्येष्ठश्च श्रेष्ठश्च भवति ज्येष्ठश्रेष्ठगुणोपासनसामर्थ्यात्स्वव्यतिरेकेणापि च येषां मध्ये ज्येष्ठश्च श्रेष्ठश्च भविष्यामीति बुभूषति भवितुमिच्छति तेषामपि ज्येष्ठश्रेष्ठप्राणदर्शी ज्येष्ठश्च श्रेष्ठश्च भवति ननु वयोनिमित्तं ज्येष्ठत्वं तदिच्छातः कथं भवतीत्युच्यते नैष दोषः

प्रमाणाभावमाशंक्य प्रत्याह॥ कथमित्यादिना॥ पूर्वोक्तमुपास्तिफलमुपसंहरति॥ सर्वथापीति॥ आरोपेणानारोपेण वेत्यर्थः॥ ज्येष्ठत्वस्य विद्याफलत्वमाक्षिपति॥ नन्विति॥ तस्य विद्याफलत्वं साधयति॥ उच्यत इति॥ इच्छातो ज्यैष्ठ्यं दुःसाध्यमिति दोष

बृ.द.
२

तत्र हेतुमाह॥ प्राणवदिति॥ यथा प्राणकृताशनादिप्रयुक्तश्चक्षुरादीनां वृत्तिलाभस्तथा प्राणोपासकाधीनं जीवनमन्येषां स्वानां च भवतीति प्राणद
र्शिनो ज्येष्ठत्वं नवयोनिबंधनमित्यर्थः॥ वसिष्ठत्वमपि प्राणस्यैवेति वक्तुमुत्तरवाक्यमुत्थाप्य व्याचष्टे॥ योहेत्यादिना फलेन प्रलोभितं शिष्यं प्रश्ना
भिमुखं प्रत्याह॥ उच्यतामित्यादिना॥ वाचो वसिष्ठत्वं द्विधा प्रतिजानीते॥ वासयतीति॥ वासयत्यतिशयेनेत्युक्तं विशदयति॥ वाग्मिनो हीति॥ वा

प्राणवद्वृत्तिलाभत्वस्यैव ज्येष्ठत्वस्य विवक्षितत्वात्॥ योह वै वसिष्ठां वेद वसिष्ठः स्वानां भवति दर्शनानुरूप्येण फलं येषां च ज्ञातिव्यति
रेकेण वसिष्ठो भवितुमिच्छति तेषां च वसिष्ठो भवतीत्युच्यते तान्तर्हि कासौ वसिष्ठेति वाग्वै वसिष्ठा वासयत्यतिशयेन वस्ते वेति वसिष्ठा वा
ग्मिनो हि धनवंतो वसंत्यतिशयेनाच्छादनार्थस्य वा वसेर्वसिष्ठाभिभवंति हि वाग्मिनोऽन्यांस्तेन वसिष्ठगुणवत्परिज्ञानाद्वसिष्ठगु

योह वै वसिष्ठां वेद वसिष्ठः स्वानां भवति वाग्वै वसिष्ठा वसिष्ठः स्वानां भवत्यपि च येषां बुभूषति य एवं वेद॥ २॥ योह वै
प्रतिष्ठां वेद प्रतितिष्ठति दुर्गे च सुर्वै प्रतिष्ठा चक्षुषा हि समे च दुर्गे च प्रतितिष्ठति प्रतितिष्ठति समे प्रतितिष्ठति दुर्गे य एवं
वेद॥ ३॥

णो भवतीति दर्शनानुरूपं फलं॥ २॥ योह वै प्रतिष्ठां वेद प्रतितिष्ठत्यनयेति प्रतिष्ठा तां प्रतिष्ठां प्रतिष्ठागुणवंतीं यो वेद त
स्यैतत्फलं प्रतितिष्ठति समे देशे काले च तथा दुर्गे विषमे च दुर्गमने च देशे दुर्भिक्षादौ वा काले विषमे सर्यंति चेति द्रष्टव्यं॥ वस्ते वेत्युक्तं

स्फुटयति॥ आच्छादनार्थस्य वेति॥ आच्छादनार्थत्वमनुभवेन साधयति॥ अभिभवंतीति॥ उक्तमुपास्तिफलं निगमयति॥ तेनेति॥ २॥ गुणांतरं व
क्तुं वाक्यांतरमादाय व्याचष्टे॥ योह वा इति॥ समे प्रतिष्ठा विद्यां विनापि स्यादित्याशंक्याह॥ तथेति॥ विषमे च प्रतितिष्ठतीति संबंधः॥ विषमशब्द

अ.
६

रामः
२

इदानीं प्रश्नपूर्वकं प्रतिष्ठां दर्शयति॥ यद्येवमिति॥ प्रतिष्ठात्वं चक्षुषोऽभ्युत्पादयति॥ कथमित्यादिना॥ विद्याफलं निगमयति॥ अत इति॥ ३॥ वाक्यांतरमादाय विभजते॥ यो ह वै संपदमिति॥ प्रश्नपूर्वकं संपद्गुणत्ववाक्यमुपादत्ते॥ किं पुनरिति॥ श्रोत्रस्य संपद्गुणवत्त्वमुत्पादयति॥ कथमिति

यद्येवमुच्यतां कासौ प्रतिष्ठा चक्षुर्वै प्रतिष्ठा कथं चक्षुषः प्रतिष्ठात्वमित्याह चक्षुषा हि समे च दुर्गे च दृष्ट्वा प्रतितिष्ठत्यतो नु रूपं फलं प्रतितिष्ठति समे प्रतितिष्ठति दुर्गे य एवं वेदेति॥ ३॥ यो ह वै संपदं वेद संपद्गुणयुक्तं यो वेद तस्यैतत्फलं अस्मै विदुषे संपद्यते ह किं यं कामं कामयते स कामः किं पुनः संपद्गुणकं श्रोत्रं वै संपत्कथं पुनः श्रोत्रस्य संपद्गुणत्वमित्युच्यते श्रोत्रे सति हि यस्मात्सर्वे वेदा अभिसंपन्नाः

यो ह वै संपदं वेद सꣳ हास्मै पद्यते यं कामं कामयते श्रोत्रं वै संपच्छ्रोत्रे हीमे सर्वे वेदा अभिसंपन्नाः सꣳ हास्मै पद्यते यं कामं कामयते य एवं वेद॥ ४॥ यो ह वा आयतनं वेदायतनꣳ स्वानां भवत्यायतनं जनानां मनो वा आयतनमायतनꣳ स्वानां भवत्यायतनं जनानां य एवं वेद॥ ५॥

श्रोत्रेंद्रियवतोऽध्येयत्वाद्वेदविहितकर्मायत्ताश्च कामास्तस्माच्छ्रोत्रं संपदतो विज्ञानानुरूपं फलं संहास्मै पद्यते स यं कामं कामयते य एवं वेद॥ ४॥ यो ह वा आयतनं वेदायतनमाश्रयस्तद्यो वेदायतनं स्वानां भवत्यायतनं जनानामन्येषामपि किं पुनस्तदायतनमित्युच्यते मनो वा आयतनमाश्रय इंद्रियाणां विषयाणां च मनआश्रिता हि विषया आत्मनो भोग्यत्वं प्रतिपद्यंते

॥ अध्येयत्वमध्ययनार्हत्वं॥ तथापि कथं श्रोत्रं संपद्गुणकमित्याशंक्याह॥ वेदेति॥ पूर्वोक्तं फलमुपसंहरति॥ अत इति॥ ४॥ वाक्यांतरमादाय विभजते॥ यो ह वा इति॥ आयतनमिति॥ सामान्येनोक्तमायतनं प्रश्नपूर्वकं विशदयति॥ किं पुनरिति॥ मनसो विषयाश्रयत्वं विशदयति॥

इंद्रियाश्रयत्वं तस्य स्पष्टयति॥मनःसंकल्पेति॥पूर्ववत्फलं निगमयति॥अतइति॥५॥गुणांतरं वक्तुंवाक्यांतरं गृहीत्वा तदक्षराणि व्याकरोति॥ यो
हेत्यादिना॥वागादींद्रियाणितु तत्तद्गुणविशिष्टानिशिष्ठारेतोगुणविशिष्टमाचक्षाणस्य प्रकरणविरोधःस्यादित्याशंक्याह॥रेतसेति॥ विद्याफलमु

मनःसंकल्पवशानिचेंद्रियाणि प्रवर्तंते निवर्त्तंते चातोमनआयतनमिंद्रियाणामतोदर्शनानुरूप्येण फलमायतनंस्वानांभवत्या
यतनंजनानांयएवंवेद॥५॥ योहवैप्रजातिंवेद प्रजायतेह प्रजयापशुभिश्च संपन्नोभवतिरेतोवैप्रजातिः रेतसाप्रजननें
द्रियमुपलक्ष्यते तद्विज्ञानानुरूपंफलं प्रजायतेह प्रजयापशुभिर्यएवंवेद॥६॥तेहइमेप्राणाःवागादयःअहंश्रेयसेअहंश्रे

योहवै प्रजातिंवेद प्रजायतेह प्रजयापशुभीरेतोवै प्रजातिः प्रजायतेह प्रजयापशुभिर्यएवंवेद॥६॥ तेहेमेप्राणाअहं
ॅश्रेयसेविवदमानाब्रह्मजग्मुस्तद्धोचुः कोनोवसिष्ठ इतितद्धोवाचयस्मिन्वउत्क्रांत इदंॅशरीरं पापीयोमन्यतेसवो
वसिष्ठइति॥७॥ यानिस्वे तस्मै प्रयोजनाय विवदमानाविरुद्धं वदमानाब्रह्मजग्मुः ब्रह्मगतवंतोब्रह्मशब्दवाच्यंप्रजापतिंग
त्वाचतद्ब्रह्मऊचुरुक्तवंतःकोनोस्माकंमध्येवसिष्ठःकोस्माकंमध्येवसतिचवासयतिचतद्ब्रह्मतैः पृष्टंसद्धउवाचउक्तवद्यस्मिन्वो
युष्माकंमध्येउत्क्रांते निर्गते शरीरादिदंशरीरंपूर्वस्मादतिशयेनपापीयःपापतरंमन्यतेलोकःशरीरंहिनामनेकाशुचिसंघातत्वाज्जी
वतोपिपापमेवततोपिकष्टतरंयस्मिन्नुत्क्रांते भवतिवैराग्यार्थमिदमुच्यतेपापीयइतिसवोयुष्माकंमध्येवसिष्ठोभविष्यति पसंहरति॥तद्वि
ज्ञानेति॥६॥उक्ताःवसिष्ठत्वादिगुणाःनवागादिगामिनःकिंतुमुख्यप्राणगताएवेतिदर्शयितुमाख्यायिकामधिकरोति॥तेहेत्यादिना॥इयमुन्नयोग

शरीरं हीति किमितिशरीरस्यपापीयस्त्वमुच्यतेतदाह॥ वैराग्यार्थमिति॥ शरीरवैराग्योत्पादनद्वारातस्मिन्नहंममाभिमानपरिहारार्थमित्यर्थः
।वसिष्ठोभवतीत्युक्तवानितिसंबंधः॥ किमितिसाक्षादेवमुख्यप्राणंवसिष्ठत्वादिगुणकंनोचिवान्प्रजापतिःसहिसर्वज्ञइत्याशंक्याह॥ जा

जानन्नपिवसिष्ठंप्रजापतिर्नोवाचायंवसिष्ठइतिइतरेषामप्रियपरिहारायतएवमुक्ताब्रह्मणाप्राणाआत्मनोवीर्यपरीक्षण
यक्रमेणोच्चक्रमुः॥७॥ तत्रवागेवप्रथमंहअस्माच्छरीरादुच्चक्रामउत्क्रांतवतीसाचोत्क्रम्यसंवत्सरंप्रोष्यप्रोषिताभूत्वापुनरा
गत्योवाचकथमशकतशक्तवंतोयूयंमदृतेमांविनाजीवितुमितितेएवमुक्ताऊचुर्यथालोकेकलामूकाअवदंतोवाचाप्राणंतः

वाग्घोच्चक्रामसासंवत्सरंप्रोष्यागत्योवाचकथमशकतमदृतेजीवितुमितितेहोचुर्यथाकलाअवदंतोवाचाप्राणं
तःप्राणेनपश्यंतश्चक्षुषाशृण्वंतःश्रोत्रेणविद्वांꣳसोमनसाप्रजायमानारेतसैवमजीविष्मेतिप्रविवेशहवाक्
॥८॥ चक्षुर्होच्चक्रामतत्संवत्सरंप्रोष्यागत्योवाचकथमशकतमदृतेजीवितुमितितेहोचुर्यथांधाअपश्यंतश्चक्षुषा
प्राणंतःप्राणेनवदंतोवाचाशृण्वंतःश्रोत्रेणविद्वांꣳसः प्राणेनव्यापारंकुर्वंतःप्राणेनपश्यंतोदर्शनव्यापारंचक्षुषाकुर्वंतस्त

थाशृण्वंतःश्रोत्रेणविद्वांसोमनसाकार्यादिविषयंप्रजायमानारेतसापुत्रानुत्पादयंतःएवमजीविष्मवयमित्येवंप्राणेर्दत्तोत्तरा
वागात्मनोस्मिन्नवसिष्ठत्वंबुध्वाप्रविवेशहवाक्तथाचक्षुर्होच्चक्रामेत्यादिपूर्ववच्छ्रोत्रंमनःप्रजातिरिति॥८॥ नन्वपीति॥७॥ वाग्घोच्च
क्रामेत्यादेस्तात्पर्यमाह॥ एवमिति॥ उक्तेर्थेश्रुत्यक्षराणिव्याचष्टे॥ तत्रेत्यादिना॥ कार्याकार्यादिविषयमित्यादिशब्देनोपेक्षणीयसंग्रहः॥ चक्षुरा

वागादिप्रकरणविच्छेदार्थोऽथशब्दः॥उत्क्रमणंकरिष्यन्यदाभवतीतिशेषः॥उक्तमर्थंदृष्टांतेनस्पष्टयितुमुत्तरवाक्यमवतारयति॥किमि

अथहप्राणउत्क्रमिष्यन्नुत्क्रमणंकरिष्यंस्तदानीमेवस्वस्थानात्प्रचलितावागादयः॥किमिवेत्याहयथालोकेमहांश्चासौसुहय
श्चमहासुहयः॥शोभनोहययोलक्षणोपेतोमहान्परिमाणतः॥सिंधुदेशभवः॥सैंधवोभिजनतः॥पड्वीशशंकून्पादबंधनशंकून्पड्वीशा

सोमनसाप्रजायमानारेतसैवमजीविष्मेतिप्रविवेशहचक्षुः॥९॥श्रोत्रंहोच्चक्राम॥तत्संवत्सरंप्रोष्यागत्योवाचकथ
मशकतमदृतेजीवितुमितितेहोचुर्यथाबधिराअशृण्वंतःश्रोत्रेणप्राणंतःप्राणेनवदंतोवाचापश्यंतश्चक्षुषाविद्वांसो
मनसाप्रजायमानारेतसैवमजीविष्मेतिप्रविवेशहश्रोत्रं॥१०॥मनोहोच्चक्राम॥तत्संवत्सरंप्रोष्यागत्योवाचकथम
शकतमदृतेजीवितुमितितेहोचुर्यथामुग्धाअविद्वांसोमनसाप्राणंतःप्राणेनवदंतोवाचापश्यंतश्चक्षुषाशृण्वंतःश्रो
त्रेणप्रजायमानारेतसैवमजीविष्मेतिप्रविवेशहमनः॥११॥रेतोहोच्चक्राम॥तत्संवत्सरंप्रोष्यागत्योवाचकथमशकतमदृ
तेजीवितुमितितेहोचुर्यथाक्लीबाअप्रजायमानारेतसाप्राणंतःप्राणेनवदंतोवाचापश्यंतश्चक्षुषाशृण्वंतःश्रोत्रेणविद्वांसो
मनसैवमजीविष्मेतिप्रविवेशहरेतः॥१२॥ श्चतेशंकूंश्चतान्संवृहेदुद्यच्छेद्युगपदुत्खनेदेवमारोहआरूढेपरीक्षणायएवं
हएवइमान्वागादीन्प्राणानसंववर्हौद्यतनवान्स्वस्थानाद्भ्रंशितवांस्तेवागादयःऊचुःहेभगवःभगवन्मोत्क्रमीर्यस्मान्नवैशक्ष्यामःत्वदृते
त्वांविनाजीवितुमद्येवंमे वेत्यादिनाप्राणस्यश्रेष्ठत्वंवागादिभिर्निर्धारितमित्याह॥तेवागादयइति॥तर्हितत्फलेनभवितव्यमित्याह॥यद्येव

यथोक्तस्यप्राणसंवादस्यकाल्पनिकत्वंदर्शयति॥अयंचेति॥कल्पनाफलंसूचयति॥विदुषइति॥तदेवस्पष्टयति॥अनेनहीति॥उपास्यपरी
क्षणप्रकारोविवक्षितश्चेत्किंसंवादेनेत्याशंक्याह॥सएषइति॥संवादस्यमुख्यार्थत्वादकल्पितत्वमाशंक्याह॥नहीति॥संवादस्यकल्पितत्वेफ

ममश्रेष्ठताविज्ञाताभवद्भिरहमत्रश्रेष्ठस्तस्यउमेममबलिंकरंकुरुतकरंप्रयच्छतेति॥अयंचप्राणसंवादःकल्पितः॥विदुषःश्रेष्ठ
परीक्षणप्रकारोपदेशोऽनेनहिप्रकारेणविद्वान्कोनुखल्वत्रश्रेष्ठइतिपरीक्षणंकरोतिसएषपरीक्षणप्रकारःसंवादभूतःकथ्य
तेनह्यन्यथासंहत्यकारिणांसतामेषामंजसैवसंवत्सरमात्रमेकैकस्यनिर्गमनाद्युपपद्यतेतस्माद्विद्वानेवानेनप्रकारेणविचारय

अथहप्राणउच्चिक्रमिष्यन्यथामहासुहयःसैंधवःपड्वीशशंकून्संवृहेदेवँहैवेमान्प्राणान्संववर्हतेहोचुर्माभगवउत्क्र
मीर्नवैशक्ष्यामस्त्वदृतेजीवितुमितितस्योमेबलिंकुरुतेतितथेति॥१३॥साहवागुवाचयद्वाअहंवसिष्ठास्मित्वंतद्वसि
ष्ठोसीतियद्वाअहंप्रतिष्ठास्मित्वंतत्प्रतिष्ठोसीतिचक्षुर्यद्वाअहँ तिवागादीनांप्रधानबुभुत्सुरुपासनायबलिंप्रार्थिताःसं
तःअन्येप्राणास्तथेतिप्रतिज्ञातवंतः॥१३॥साहवाक्प्रथमंबलिदानायप्रवृत्ताहकिलउवाचउक्तवतीयद्वैअहंवसिष्ठास्मियन्मम
वसिष्ठत्वंतत्त्वमेवतेनवसिष्ठगुणेनत्वंतद्वसिष्ठोसिइतियदहंप्रतिष्ठास्मित्वंतत्प्रतिष्ठोसियाममप्रतिष्ठासात्वमसीतिचक्षुःसमा
नमन्यत्संपदायतनप्रजातिगुणांतंक्रमेणसमर्पितवंतःयद्येवंसाधुबलिंदत्तवंतोभवंतोब्रूततस्योमे लितमाह॥तस्मादिति॥एवंप्राण
संवादस्यतात्पर्यमुक्त्वाप्रकृतामक्षरव्याख्यामेवानुवर्तयति॥बलिमिति॥१२॥साहवागितिप्रतीकमादायव्याचष्टे॥प्रथममिति॥तेनवसिष्ठगुणेनत्व

॥मेवविभक्तिसिद्धितस्त्वंतवेतिवेत्तीति॥

बलिदानमंगीकृत्यान्नवाससी एकृति॥ यद्येवमित्यादिना॥ एवंगुणविशिष्टस्य ज्येष्ठत्वश्रेष्ठत्ववसिष्ठत्वादिसंबद्धस्येत्यर्थः॥ यदिदमित्यादिवाक्यंव्याच
ष्टे॥ यद्वेति॥ प्रकृतेनशुनामन्त्रेणकीटादीनांचान्नेनसहयत्किंचिल्लभ्यमन्नंदृश्यतेतत्सर्वमेवतवान्नमितियोजना॥ तदेवस्फुटयति॥ यत्किंचि
दिति॥ पदार्थमुक्त्वावाक्यार्थंकथयति॥ सर्वमिति॥ अस्मिन्नेववाक्येपक्षांतरमुत्थापयति॥ केचित्विति॥ नहवाअस्येत्यादेर्यथार्थवादत्वदर्शनादित्यर्थः

एवंगुणविशिष्टस्यकिमन्नंकिंवासइतिआहुरितरेयदिदंलोकेकिंचकिंचिदन्नंनामाश्वभ्यआकृमिभ्यआकीटपतंगेभ्यःयच्छ्वा
न्नंकृम्यन्नंकीटपतंगान्नंचतेनसहसर्वमेवयत्किंचित्प्राणिभिरद्यमानमन्नंतत्सर्वंतवान्नंसर्वंप्राणस्यान्नमितिदृष्टिरत्रविधीयते
केचित्तुसर्वभक्षणेदोषाभावंवदंतिप्राणान्नविदस्तदसच्छास्त्रांतरेणप्रतिषिद्धत्वात्तेनास्यविकल्पइतिचेन्नाविधायकत्वान्

संपदस्मित्वंतत्संपदसीतिश्रोत्रंयद्वाअहमायतनमस्मित्वंतदायतनमसीतिमनोयद्वाअहंप्रजातिरस्मित्वंतस्प्र
जातिरसीतिरेतस्तस्योमेकिमन्नंकिंवासइतियदिदंकिंचाश्वभ्यआकृमिभ्यआकीटपतंगेभ्यस्तत्तेन्नमापोवासइ
ति॥ नहवाअस्यानन्नंजग्धंभवति॥ हवाअस्यानन्नंजग्धंभवतीतिसर्वंप्राणस्यान्नमित्येतस्यविज्ञानस्यविहितस्यस्तुत्य
र्थमेतत्तेनैकवाक्यतापत्तेर्नतुशास्त्रांतरविहितस्यबाधनेसामर्थ्यमन्यपरत्वादस्य ॥ नहृष्यति॥ तदसदिति॥ शास्त्रांतरेणक्रमयोभवं
त्यभक्ष्यभक्षिणइत्यादिनेत्यर्थः॥ प्राणविदतिरिक्तविषयंशास्त्रांतरंसर्वभक्षणंतुप्राणदर्शिनोविवक्षितमतोव्यवस्थितविषयत्वात्प्रतिषेधेनसर्व
भक्षणस्योदितानुदितहोमवद्विकल्पःस्यादितिशंकते॥ तेनेति॥ किंतर्हिसर्वान्नभक्षणंविहितंनवा॥ नचेन्नतस्यनिषिद्धस्यानुष्ठानंप्राणविदितस्याप

हवेत्यादिना व्याविहितं नाद्यदृत्याह॥ नाविधायकत्वादिति॥ यदिदमित्यादिना हि सर्वं प्राणस्यान्नमिति ज्ञानमेव विधीयते न तु प्राणविदः सर्वान्नभ
क्षणं तद्ध्वद्योतिपदाभावान्न विकल्पोपपत्तिरित्यर्थः॥ द्वितीयं दूषयति॥ न ह वा इति॥ असत्येति विद्वत्परामर्शान्निपातयोरर्थवादत्वाद्योति
नोर्दर्शनादेकवाक्यत्वसंभवे वाक्यभेदस्यान्याय्यत्वाच्चेति हेतुमाह॥ तेनेति॥ अर्थवादस्यापि स्वार्थे प्रामाण्यं देवताधिकरणन्यायेन भविष्यतीत्या
शंक्य न कलंजं भक्षयेदिति विहितस्य भक्षणाभावस्य बाधनेन न ह वेत्यादेर्न सामर्थ्यं दृष्टिपरत्वादस्य मानांतरविरोधे स्वार्थे मानत्वायोगादित्याह॥
नन्विति॥ न हेत्यादेरन्यपरत्वं प्रपंचयति॥ प्राणमात्रस्येति॥ तत्र दोषाभावज्ञापनात्तदेव विधित्सितमित्याशंक्याह॥ यत्त्विति॥ अर्थवादस्य मानां

प्राणमात्रस्य सर्वमन्नमित्येतद्दर्शनमिह विधित्सितं न तु सर्वं भक्षयेदिति॥ यत्तु सर्वभक्षणे दोषाभावज्ञानं तन्मिथ्यैव प्रमाणाभावा
त्॥ विदुषः प्राणत्वात्सर्वान्नोपपत्तेः सामर्थ्याद्दोष एवेति चेन्नाशेषान्नत्वानुपपत्तेः सत्यं यद्यपि विद्वान्प्राणो येन कार्यकरणसं
घातेनाविशिष्टस्य विद्वत्ता तेन कार्यकरणसंघातेन कृमिकीटदेवाद्यशेषान्नभक्षणं नोपपद्यते तेन तत्राशेषान्नभक्षणे दोषाभाव
ज्ञापनमनर्थकं अप्राप्तत्वादशेषान्नभक्षणदोषस्य न तु प्राणः सन्भक्षयत्येव कृमिकीटाद्यन्नमपि॥ बाढं॥ किंतु न तद्विषयप्रतिषे
धोस्ति तस्माद्देवरक्तं किं शुकं तत्र दोषाभावो तरविरोधे स्वार्थे मानत्वायोग्यस्योक्तत्वादिति भावः॥ प्रमाणाभावस्यासिद्धिमाशंकते॥ विदुष
इति॥ सामर्थ्यात्प्राणस्वरूपबलादिति यावत्॥ अदोषः सर्वान्नभक्षणे तस्येति शेषः॥ अर्थापत्तिं दूषयति॥ नेत्यादिना॥ अनुपपत्तिमेव विवृणोति
॥ सत्यमिति॥ येनेत्यस्मात्प्राक्तथापीति वक्तव्यं॥ यद्यपीत्युपक्रमात्॥ प्राणस्वरूपसामर्थ्यादनुपपत्तिरपि शाम्यतीति शंकते॥ नन्विति॥ किं फला
त्मना विदुषः सर्वान्नभक्षणं साध्यते किं वा साधकत्वरूपेणेति विकल्प्याद्यमंगीकरोति॥ बाढमिति॥ प्राणरूपेण सर्वभक्षणं तद्बुद्ध्यर्थः॥ तत्र प्रति

षेधाभावे सदृशं तत्फलितमाह॥ तस्मादिति॥

बृ.र.
६

तथास्वारसिकं प्राणस्य सर्वभक्षणं तत्र चाप्रतिषेधाद्दोषराहित्यमिति शेषः॥ तद्ग्राहित्ये किं स्यादिति चेत्तदाह॥ अत इति॥ पंचम्यर्थमेव स्फोरयति॥ अप्राप्तत्वादिति॥ प्राणविदः साधकत्वाकारेण साध्यते सर्वान्नभक्षणमिति पक्षं प्रत्याह॥ येन त्विति॥ इहेति प्राणविदुच्यते॥ निमित्तांतरदृष्टं ताप्राप्तविषयो विधिः॥ प्रतिप्रसवो यथा ज्वरितस्याशनप्रतिषेधे प्योषधं पिबेदिति तथा शास्त्राधिकारिणः सर्वाभक्ष्यभक्षणनिषेधे पि प्राणविदो विशेषविधिर्नोपलभ्यते तथा च तस्य भक्षणं दुःसाध्यमित्यर्थः॥ प्रतिप्रसवाभावे लब्धं दर्शयति॥ तस्मादिति॥ अर्थवादस्य तर्हि का गतिरित्याशंक्याह॥ अन्यविषयत्वादिति॥ तस्य स्तुतिमात्रार्थत्वान्न तद्वशान्निषेधातिक्रम इत्यर्थः॥ ननु विशिष्टस्य प्राणस्य सर्वान्नत्वदर्शनमत्र विःतस्तद्रूपेण दोषाभावज्ञापनमनर्थकमप्राप्तत्वादशेषान्नभक्षणदोषस्य येन तु कार्यकरणसंघातसंबंधेन प्रतिषेधः क्रियते तत्संबंधेन त्विह नैव प्रतिप्रसवो स्ति तस्मात्प्रतिषेधातिक्रमे दोष एव स्या दन्यविषयत्वान्न ह वा इत्यादेर्न च ब्राह्मणादिशरीरस्य सर्वान्नत्वदर्शनमिह विधीयते किं तु प्राणमात्रस्यैव यथा च सामान्येन सर्वान्नस्य प्राणस्य किंचिदन्नजातं कस्यचिज्जीवनहेतुर्यथा विषं विषजस्य कृमेस्तद्देवान्यस्य प्राणान्नमपि सद्दृष्टमेव दोषमुत्पादयति मरणादिलक्षणं तथा सर्वान्नस्यापि प्राणस्य प्रतिषिद्धान्नभक्षणे ब्राह्मणत्वादिदेहसंबंधाद्दोष एव स्यात्तस्मान्मिथ्याज्ञानमेवाभक्ष्यभक्षणे दोषाभावज्ञानं आपो धीयते तथा च विदुषोपि तदात्मनः सर्वान्नभक्षणेन दोषो यथादर्शनं फलाभ्युपगमादत आह॥ न चेति॥ इतोपि सर्वं प्राणस्यान्नमित्येतदवष्टंभेन प्राणविदः सर्वभक्षणं न विधेयमित्याह॥ यथा चेति॥ प्राणस्य यथोक्तस्य स्वीकारे पि कस्यचित्किंचिदन्नं जीवनहेतुरिति अत्र दृष्टांतमाह॥ यथेति॥ तथा सर्वप्राणिषु व्यवस्थयान्नसंबंधे दार्ष्टांतिकमाह॥ तथेति॥ प्राणविदोपि कार्यकरणवतो निषेधातिक्रमायोगे फलितमाह॥ तस्मादिति॥ वाक्यांतरमादाय व्याक

अ.
३

राम:
६

स्मार्तादाचमनादन्यदेव श्रौतमाचमनं अन्यतोऽप्राप्तं विधेयं तदर्थमिदं वाक्यमिति केचित्तान्प्रत्याह॥ अत्रचेति॥ वासःकार्यं परिधानं तत्रसाक्षादपां विनियोगायोगे प्राप्तमर्थमाह॥ तस्मादिति॥ यदिदं किंचेत्यादावुक्तं दृष्टिविधेरर्थवादमादायव्याचष्टे॥ नेत्यादिना॥ पुनर्नं नानुकर्षणमन्वयार्थं॥ पदार्थमुक्त्वा वाक्यार्थमाह॥ यद्यपीति॥ अभक्ष्यभक्षणं तर्हि स्वीकृतमिति चेन्नेत्याह॥ इत्येतदिति॥ यथा प्राणविदो

वासइत्यापो भक्ष्यमाणा वासस्थानीयास्तथात्र च प्राणस्यापो वासइति एतद्दर्शनं विधीयते न तु वासःकार्ये आपो विनियोक्तुं शक्यास्तस्माद्यथाप्राप्ते प्रभक्षणे दर्शनमात्रं कर्तव्यं न ह वै अस्य सर्वं प्राणस्यान्नमित्येवंविदः अनन्नमनदनीयं न जग्धं भुक्तं भवति॥ यद्यप्यनेनानदनीयं भुक्तमदनीयमेव भुक्तं स्यान्न तु तत्कृतदोषेण लिप्यत इत्येतद्धि यास्तुतिरित्येवोचामतथाना

मानन्नं परिगृहीतं यएवमेतदनस्यान्नं वेदतद्धिद्वांसः श्रोत्रिया अशिष्यंत आचामंत्यशित्वाचामंत्येतमेव तदनम नग्नं कुर्वंतो मन्यंते॥ १४॥ प्रथमं ब्राह्मणं॥ १॥ नन्नं प्रतिगृहीतं यद्यप्यप्रतिग्राह्यं हस्त्यादि प्रतिगृहीतं स्यात्तदप्यन्नमेव प्रतिग्राह्यं प्रतिगृहीतं स्यात्तत्राप्यप्रतिग्राह्यप्रतिग्रहदोषेण न लिप्यत इति स्तुत्यर्थमेव यएवमेतदनस्य प्राणस्यान्नं वेद फलं तु प्राणात्मभाव एव न त्वेतत्फलाभिप्रायेण किं तर्हि स्तुत्यभिप्रायेणेति नन्वेतदेव फलं कस्मान्न भवति॥ न॥ प्राणात्मदर्शिनः प्राणात्मभाव एव फलं तत्र च प्राणात्मभूतस्य सर्वात्मनो नानन्नं भुक्तं भवतित थेत्येतत्॥ अनुमतस्तर्हि प्राणविदो दुःप्रतिग्रहोपीत्याशंक्याह॥ तत्रापीति॥ असत्प्रतिग्रहे प्राप्तेपीत्यर्थः॥ किमित्ययं स्तुत्यर्थवादः फलवाद एव किं न स्यादित्याशंक्याह॥ फलंत्विति॥ इतिशब्दः सर्वं प्राणस्यान्नमि

बृ·र·
७

उक्तमेवार्थं चोद्यसमाधिभ्यां समर्थयते॥ नन्वित्यादिना॥ यथाप्राप्तं प्रकृतवाक्यवशात्प्रतिपन्नं रूपमनतिक्रम्येति यावत्॥ वाक्यस्य विद्यास्तु-
तित्वे फलितमाह॥ अत इति॥ यदुक्तमापोवास इति तस्य शेषभूतमुत्तरग्रंथमुत्थाप्य व्याकरोति॥ यस्मादिति॥ तत्रैस्यशनात्प्रागूर्ध्वकालो-
क्तिः उक्तेभिप्राये लोकप्रसिद्धिमनुकूलयति॥ अस्ति चेति॥ तत्रैव वाक्योपक्रमस्यानुकूल्यं दर्शयति॥ प्राणस्येति॥ किमर्थमिदं सोपक्रमं वा-

ऽनदनीयमप्यद्यमेव तथाऽप्रतिग्राह्यमपि प्रतिग्राह्यमेवेति यथाप्राप्तमेवोपादाय विद्या स्तूयते ऽतो नैव फलविधिसरूपता वा-
क्यस्य यस्मादापोवासः प्राणस्य तस्माद्विद्वांसो ब्राह्मणाः श्रोत्रिया अधीतवेदाः अशिष्यंतो भोक्ष्यमाणा आचामंत्यपः अशित्वाचा-
मंति भुक्त्वा चोत्तरकालमपो भक्षयंति तत्र तेषामाचमतां कोभिप्राय इत्याह एतमेवानं प्राणमनग्नं कुर्वंतो मन्यते अस्ति चैतद्यो
य एवं वासो ददाति स तमनग्नं करोमीति हि मन्यते प्राणस्य चापो वास इति विद्ध्युक्तं यदपः पिबामि तत्प्राणस्य वासो ददामीति विज्ञा-
नं कर्त्तव्यमित्येवमर्थमेतत्॥ ननु भोक्ष्यमाणो भुक्तवांश्च प्रयतो भविष्यामीत्याचामति तत्र च प्राणस्यानग्नताकरणार्थत्वे चद्विः
कार्यताचमनस्य स्यान्न च कार्यद्वयमाचमनस्यैकस्य युक्तं यदि प्रायत्यार्थं नानग्नतार्थमथानग्नतार्थं न प्रायत्यार्थं यस्मादेवं तस्मा-
द्वितीयमाचमनांतरं प्राणस्यानग्नताकरणाय भवतु न क्रियाद्वित्वोपपत्तेर्द्वे ह्येते क्रिये भोक्ष्यमाणस्य भुक्तवतश्च यदाचमनं स्मृति-
विहितं तत्प्रायत्यार्थं भवति   कृत्यमित्यपेक्षायामत्र चेत्याद्युक्तं स्मारयति॥ यदप इति॥ दृष्टविधानसहमानः शंकते॥ नन्विति॥ अस्तु प्राय-
त्यार्थमाचमनं प्राणपरिधानार्थं चेत्याशंक्याह॥ तन्नेति॥ कुल्याप्रणयनन्यायेन द्विकार्यत्वाविरोधमाशंक्याह॥ न चेति॥ तत्र प्रत्यक्षत्वात्कार्यभेदस्या-
विरोधेपि प्रकृते प्रमाणाभावात् द्विकरणत्वानुपपत्तिरित्यभिप्रेत्योक्तमुपपादयति॥ यदेति॥ ननु स्मार्ताऽऽचमनस्य प्रायत्यार्थत्वं तथैवानग्नतार्थत्वं प्रकृतवा-

रामः
७

प्रामाणिकमित्याशंक्य वाक्यस्य विषयांतरं दर्शयति॥ यस्मादिति॥ द्विकरणत्वदोषमुक्तं दूषयति॥ नेत्यादिना॥ तच्चाचमनं दर्शननिरपेक्षमित्याह॥
क्रियामात्रमेवेति॥ नन्वाचमने फलभूतं प्रायस्य दर्शनसापेक्षमिति चेन्नेत्याह॥ नत्विति॥ क्रियाया एव तदाधानसामर्थ्यादित्यर्थः॥ तत्रेत्याचमनेशु
ध्यर्थक्रियांतरे सतीत्यर्थः॥ प्राणविज्ञानप्रकरणे वासोविज्ञानं चोद्यते चेद्वाक्यभेदः स्यादित्याशंक्याह॥ प्राणस्येति॥ सर्वान्नविज्ञानवदिति चका
रार्थः॥ आचमनीयास्वप्सु वासोविज्ञानं क्रियते चेत्कथमाचमनस्य प्रायस्यार्थत्वमित्याशंक्याह॥ नत्विति॥ द्विकरणत्वदोषाभावे फलितं दर्शनविधि

क्रियामात्रमेव न तु तत्र प्रायस्ये दर्शनाद्यपेक्ष्यते तत्र चाचमनांगभूतास्वप्सु वासोविज्ञानं प्राणस्येति कर्तव्यतया चोद्यते न तु तस्मि
न्क्रियमाण आचमनस्य प्रायस्यार्थता बाध्यते क्रियांतरत्वादाचमनस्य तस्माद्वो स्म माणस्य भुक्तवतश्च यदाचमनं तन्नाग्नोपावासः
प्राणस्येति दर्शनमात्रं विधीयते अप्राप्तत्वादन्यतः॥१४॥ अष्टमस्य प्रथमं ब्राह्मणं॥१॥ श्वेतकेतुर्ह वा आरुणेय इत्यस्य संबंधः॥
खिलाधिकारोयं तत्र यदनुक्तं तदुच्यते सप्तमाध्यायांते ज्ञानकर्मसमुच्चयकारिणाग्नेर्मार्गयाचनं कृतमग्ने नय सुपथेति तत्रानेके
षां पथां सद्भावो मंत्रेण सामर्थ्यात्प्रदर्शितः सुपथेति विशेषणात्संसृत्यनेककृतविपाकप्रतिपत्तिमार्गाः

मुपसंहरति॥ तस्मादिति॥ अ
प्राप्तत्वाद्वासोदृष्टेर्विधिव्यतिरेकेण प्राप्त्यभावादृष्टेश्चात्र प्रकृतत्वात्कार्यास्थानात्पूर्वमिति चन्यायादित्यर्थः॥१४॥ अष्टमे प्रथमं ब्राह्मणं॥१॥
ब्राह्मणांतरमादाय तस्य पूर्वेण संबंधं प्रतिजानीते॥ श्वेतकेतुरिति॥ कोसौ संबंधस्तमाह॥ खिलेति॥ तत्र कर्मकांडे ज्ञानकांडे वा यद्वस्तु प्राधा
न्येन नोक्तं तदस्मिन्कांडे वक्तव्यमस्य खिलाधिकारत्वात्तथा च पूर्वमनुक्तं वक्तुमिदं ब्राह्मणमित्यर्थः॥ वक्तव्यशेषं दर्शयितुं वृत्तं कीर्तयति॥ सप्त
मेति॥ समुच्चयकारिणो मुमूर्षोरग्निप्रार्थने पि किं स्यादित्याशंक्याह॥ तत्रेति॥ अध्यायावसाने सप्तम्यर्थः॥ सामर्थ्यमेव दर्शयति॥ सुपथेति॥

विशेषणवशाद्दहवोमार्गाभांतुकिंपुनस्तेषांस्वरूपंतदाह॥पंथानश्चेति॥तत्रवाक्यशेषमनुकूलयति॥वक्ष्यतिचेति॥संप्रत्याकांक्षाद्वारासमनं
तरब्राह्मणतात्पर्यमाह॥तत्रेति॥उपसंह्रियमाणांसंसारगतिमेवपरिछिनत्ति॥एतावतीहीति॥दक्षिणोदगधोगत्यात्मकेतियावत्॥क
र्मविपाकस्तर्हिकुत्रोपसंह्रियतेतत्राह॥एतावानिति॥इतिशब्दोयथोक्तसंसारगत्यतिरिक्तकर्मविपाकाभावात्तदुपसंहारार्थएवायमारं
भइत्युपसंहारार्थः॥अथोद्गीथाधिकारेसर्वोपिकर्मविपाकोनर्थएवेत्युक्तत्वात्परिशिष्टसंसारगत्यभावात्कथंखिलकांडेतन्निर्देशसिद्धिर

वक्ष्यतिचयत्कृत्वेत्यादितत्रकृतिकर्मविपाकप्रतिपत्तिमार्गाइतिसर्वसंसारगत्युपसंहारार्थोयमारंभः॥एतावतीहिसंसारगति
रेतावान्कर्मणोविपाकःस्वाभाविकस्यशास्त्रीयस्यचसविज्ञानस्येतियद्यपिद्वयाहप्राजापत्याइत्यत्रस्वाभाविकःपाप्मासूचितोन
चतस्येदंकार्यमितिविपाकःप्रदर्शितः॥शास्त्रीयस्येवतुविपाकःप्रदर्शितस्तस्मान्नात्मप्रतिपत्स्यतेनब्रह्मविद्यारंभेतद्वैराग्यस्य
विवक्षितत्वात्तत्रापिकेवलेनकर्मणापितृलोकोविद्ययाविद्यासंयुक्तेनचकर्मणादेवलोकइत्युक्तंतत्रकेनमार्गेणपितृलोकंप्र
तिपद्यतेकेनवादेवलोकमितिनोक्तंतच्चेहखिलप्रकरणेशेषत्वाद्वक्तव्यमितिअतआरभ्यतेअंतेचसर्वोपसंहारःशास्त्रस्यद

तआह॥यद्यपीति॥कस्तर्हिविपाकस्तत्रोक्तस्तत्राह॥शास्त्रीयस्येति॥तत्रसकृतविपाकस्यैवोपन्यासेहेतुमाह॥ब्रह्मविद्येति॥अनिष्टविपाका
त्तुवैराग्यंसुकृताभिमुख्यादेवसिद्धमितिनतत्रतद्विवक्षा॥इहपुनःशास्त्रसमाप्तौखिलाधिकारेतद्विपाकोप्युपसंह्रियतइतिभावः॥प्रकारांतरेण
संगतिंवक्तुंउक्तंस्मारयति॥तत्रापीति॥शास्त्रीयविपाकविषयेपीत्यर्थः॥उत्तरग्रंथस्यविषयपरिशेषार्थंपातनिकामाह॥तत्रेति॥लोकद्वयंसप्रम्यर्थः
॥प्रागनुक्तमपिदेवयानाद्यत्रवक्तव्यमितिकुतोनियमसिद्धिस्तत्राह॥तच्चेति॥वक्तव्यशेषस्यसत्त्वेफलितमाह॥इत्यतइति॥यत्तर्हिप्रागनुक्तंतदेवदेव

शास्त्रस्यांते चेति संबंधः॥ इतश्चेदं ब्राह्मणमगतार्थत्वादारभ्यमित्याह॥ अपि चेति॥ एतावदित्यात्मज्ञानोक्तिरमृतत्वं तत्साधनमिति यावत्। चका
राद्युक्तमित्यनुषंगः॥ ज्ञानमेवामृतत्वे हेतुरित्युक्तोर्थः तत्रेति सप्तम्यर्थः॥ तदर्थो हेत्वपदेशार्थः॥ कथं पुनर्वक्ष्यमाणा कर्मगतिर्ज्ञानमेवामृतत्व
साधनमित्यत्र हेतुत्वं प्रतिपद्यते तत्राह॥ यस्मादिति॥ व्यापारोस्ति कर्मण इति शेषः॥ सामर्थ्याद्ज्ञानातिरिक्तस्योपायस्य संसारहेतुत्वनिय
मादित्यर्थः॥ प्रकारांतरेण ब्राह्मणतात्पर्यं वक्तुमग्निहोत्रविषयेजनकयाज्ञवल्क्यसंवादसिद्धमर्थमनुवदति॥ अपि चेत्यादिना॥ एनयो

अपि चैतावदमृतत्वमित्युक्तं न कर्मणोमृतत्वाशास्तीति च तत्र हेतुर्नोक्तस्तदर्थश्चायमारंभः॥ यस्मादियं कर्मणो गतिर्ने नित्ये ऽमृ
तत्वे व्यापारोस्ति तस्मादेतावदेवामृतत्वसाधनमिति सामर्थ्याद्धेतुत्वं संपद्यते॥ अपि चोक्तमग्निहोत्रे न त्वेवैनयोस्त्वमुत्क्रांतिं
न गतिं न प्रतिष्ठां न तृप्तिं न पुनरावृत्तिं न लोकं प्रत्युत्थायिनं वेत्थेति तत्र प्रतिवचने ते वा एते आहुती हुते उत्क्रामत इत्यादिना आ
हुतेः कार्यमुक्तं॥ तच्चैतत्कर्त्रुराहुतिलक्षणस्य कर्मणः फलं न हि कर्तारमनाश्रित्याहुतिलक्षणस्य कर्मणः स्वातंत्र्येणोत्क्रांत्यादि
कार्यारंभ उपपद्यते कर्त्रर्थत्वात्कर्मणः कार्यारंभस्य साधनाश्रयत्वाच्च कर्मणस्तत्राग्निहोत्रस्तुत्यर्थत्वादग्निहोत्रस्यैव कार्यमित्युक्तं
षट्प्रकारमपी

एनयोरग्निहोत्राहुत्योः सायंप्रातश्चानुष्ठितयोरिति यावत्॥ लोकं प्रत्युत्थायिनं यजमानं परिवेष्ट्येमं लोकं प्रत्यावृत्तयोस्तयोरनुष्ठा
नोपचितयोः परलोकं प्रति षष्ठांश्च योस्तानभूतं परिणाममित्येतदिति प्रश्नषट्कमग्निहोत्रविषये जनकेन याज्ञवल्क्यं प्रत्युक्तमिति संबंधः॥ तत्रेत्यासे
पगर्भप्रश्नषट्कोक्तिः॥ ननु फलवतोः श्रवणात्कस्येदमाहुतिफलं न हि तत्स्वतंत्रं संभवतीति तत्राह॥ तच्चेति॥ कर्तृत्वापि पदाभावादाहुत्य पूर्वस्यैवोत्क्रां
त्यादिकार्यारंभकत्वान्न तत्र कर्तृगामि फलमुक्तमित्याशंक्याह॥ न हीति॥ किंच॥ कारकाश्रयत्वात्कर्मणो युक्तं तत्फलस्य कर्तृगामित्वमित्याह॥

स्वा॰ २ हेतु॰ २

बृ·उ·
९

स्वातंत्र्यासंभवादाहुत्योः सकर्तृकयोरेव गत्यादि विवक्षितं चेत्तर्हि कथं तत्र केवलाहुत्योर्गत्यादि गम्यते तत्राह॥ तत्रेति॥ अग्निहोत्रप्रकरणं सप्तम्यर्थः॥ अग्निहोत्रस्तुत्यर्थत्वात्प्रश्नप्रतिवचनरूपस्य संदर्भस्येति शेषः॥ भवत्वेवमग्निहोत्रप्रकरणस्थितिः॥ प्रकृते तु किमायातं तत्राह॥ इहेति॥ किमिति विद्याप्रकरणे कर्मफलविज्ञानं विवक्ष्यते तत्राह॥ तद्द्वारेणेति॥ ब्राह्मणारंभमुपपादितमुपसंहरति॥ एवमिति॥ संसारगत्युपसंहारेण कर्मविपाकस्य सर्वस्यैवोपसंहारः सिद्धो भवति तदतिरिक्ततद्विपाकाभावादित्याह॥ कर्मकांडस्येति॥ यथोक्तं वस्तु दर्शयितुं ब्राह्म

ह तु तदेव कर्तुः फलमित्युपदिश्यते षट्प्रकारमपि कर्मफलं विज्ञानस्य विवक्षितत्वात्तद्द्वारेण च पंचाग्निदर्शनमिहोत्तरमार्गप्रतिपत्तिसाधनं विधित्सितमेवमशेषसंसारगत्युपसंहारः कर्मकांडस्यैषा निष्ठेत्येतद्रूपं दिदर्शयिषुराख्यायिकां प्रणयति॥ श्वेतकेतुर्नामतो अरुणस्यापत्यमारुणिस्तस्यापत्यमारुणेयः ह शब्दः ऐतिह्यार्थः॥ वै निश्चयार्थः पित्रानुशिष्टः सन्नात्मनो यशः प्रथनाय पंचालानां परिषदमाजगाम पंचालाः प्रसिद्धास्तेषां परिषदमागत्य जित्वा राज्ञोपि परिषदं जेष्यामीति गर्वेण स आजगाम जीवलस्यापत्यं जैवलिस्तं पंचालराजं प्रवाहणनामानं स्वभृत्यैः परिचारयमाणं आत्मनः परिचरणं कारयंतमित्येतत् स राजा पूर्वमेव तस्य विद्याभिमानगर्वं श्रुत्वा विनेतव्योयमिति मत्वा तमुदीक्ष्योत्थस्यागतमात्रमेवाभ्युक्तवान् कुमारा इति संबोध्य भर्त्सनार्थां कु

तंज्योतिर्नदृश्यतेनकार्यंत्वासनाद्युपलभ्यतेतत्रापिविषयेस्वप्नादावितियावत्॥ अनुमानमेवाभिनयति॥ व्यतिरिक्तेति॥ विमतमतिरिक्तज्योतिरधीनंव्यवहारत्वा
त्संमतवदित्यर्थः॥ पक्षांतरमनूद्यलोकायतपक्षसिद्धिफलमाह॥ अथेत्यादिना॥ अप्रत्यक्षेपीत्यव्यतिरिक्तमितिच्छेदः॥ कल्पांतरमाह॥ अथेति॥ अनियमंव्याकरोति॥

तस्मिन्प्रत्यक्षेव्यवहारहेतौज्योतिष्यनिश्चयात्तद्विकारोव्यवहारोपिनस्थैर्यमालंबेतेत्याह॥ततइति॥व्याख्यातंप्रश्नमुपसंहरति॥इत्येवमिति॥प्रश्नमाक्षिपति॥ नन्विति॥व्यतिरिक्तज्योतिर्बुभुत्सयाप्रश्नोभविष्यतीतिचेत्तत्राह॥स्वयमेवेति॥राज्ञोनुमानकौशलमंगीकरोति॥सत्यमिति॥किमितितर्हिपृष्टवतोत्याशं क्याह॥तथापीति॥व्याप्यव्यापकयोस्तत्संबंधस्यचातिसूक्ष्मत्वादेकेनदुर्ज्ञानत्वात्तज्ज्ञानेयाज्ञवल्क्योप्यपेक्षितइत्यर्थः॥कथंतेषामतिसूक्ष्मत्वंतत्राह॥बहू नामपीति॥लिंगादिष्वनेकेषामपिविवेकिनांदुर्बोधतास्तिकिमुतैकस्यतेषुदुर्बोधतावाच्येत्यर्थः॥तेषामत्यंतसौक्ष्म्येमानवींस्मृतिंप्रमाणयति॥अतएवेति॥

अव्यतिरिक्तंवाज्योतिःपुरुषस्यव्यवहारहेतुस्ततोऽनध्यवसायएवज्योतिर्विषयइत्येवंमन्वानःपृच्छतिजनकोयाज्ञवल्क्यंकिंज्योतिरयंपुरुष इतिनन्वेवमनुमानकौशलेजनकस्यकिंप्रश्नेनस्वयमेवकस्मान्नप्रतिपद्यतइतिसत्यमेवमेतत्तथापिलिंगलिंगिसंबंधविशेषाणामत्यंतसौ-

याज्ञवल्क्यकिंज्योतिरयंपुरुष

क्ष्म्यात्दुरवबोध्यतांमन्यतेबहूनामपिपंडितानांकिमुतैकस्यातएवहिधर्मसूक्ष्मनिर्णयेपरिषद्व्यापारइष्यतेपुरुषविशेषश्चापेक्ष्यते॥दशाव रापरिषत्त्र्यवरावैकोवेतितस्माद्यद्यप्यनुमानकौशलंराज्ञस्तथापितद्युक्तोयाज्ञवल्क्यःप्रष्टुं कुशलस्यापिपुरुषार्थ्येनिर्णयेपुरुषांतरापेक्षायाःसत्वा देवेतियावत्॥पुरुषविशेषोवेदविदध्यात्मविदित्यादि॥तत्रस्मृत्यर्थंसंक्षिपति॥दृष्टेति॥उक्तंहि॥धर्मेणाधिगतोयैस्तुवेदःसपरिबृंहणः॥तेशिष्टाब्राह्मणा ज्ञेयाःश्रुतिप्रत्यक्षहेतवः॥दशावरावापरिषद्यंधर्मंपरिचक्षते॥त्र्यवरावापिवृत्तस्थास्तंधर्मंनविचारयेत्॥त्रैविद्याहेतुकस्तर्कीनैरुक्तोधर्मपाठकः॥त्रयश्चाश्रमि णःपूर्वेपरिषदेषादशावरा॥ऋग्वेदविद्यजुर्विच्चसामवेदविदेवच॥त्र्यवरापरिषज्ज्ञेयाधर्मसंशयनिर्णयइति॥एकोवेत्यध्यात्मविदुच्यते॥कुशलस्यापिराज्ञोयाज्ञ

सूक्ष्मार्थ ४

सूक्ष्मार्थनिर्णये पुरुषांतरापेक्षायाश्च दृष्टसंमतत्वादिति यावत्॥ तत्रैव हेत्वंतरमाह॥ विज्ञानेति॥ राज्ञो याज्ञवल्क्यापेक्षामुपपाद्य पक्षांतरमाह॥ अथवेति॥ तथा चात्र राज्ञो मुनेर्वा विवक्षितत्वाभावात्किमिति राजा मुनिमनुसरतीति चोद्यं निरवकाशमिति शेषः॥ प्रश्नोपपत्तौ प्रतिवचनमुपपन्नमेवेति मन्वानस्तदुत्थापयति॥ याज्ञवल्क्योपीति॥ अतिरिक्ते ज्योतिषि प्रष्टुः राज्ञोभिप्रायस्तदभिप्रायः तदभिज्ञतया तथाविधं ज्योती राजानं बोधयिष्यन्यथातिरिक्तज्योतिरावेदकं वक्ष्यमाणं लिंगं गृहीतव्याप्तिकं प्रसिद्धं भवति तथा तद्व्याप्तिग्रहणस्थलमादित्यज्योतिरित्यादिना मुनिरपि प्रतिपन्नवानित्यर्थः॥ व्याप्तिं बुभुत्समानः एव

विज्ञानकौशलतारतम्योपपत्तेः पुरुषाणामथवा श्रुतिः स्वयमेवाख्यायिकाव्याजेनानुमानमार्गमुपन्यस्यास्मान्बोधयति पुरुषमतिमनुसरंतीयाज्ञवल्क्योपि जनकाभिप्रायाभिज्ञतयाव्यतिरिक्तमात्मज्योतिर्बोधयिष्यन्जनकं व्यतिरिक्तप्रतिपादकमेव लिंगं प्रतिपेदे यथाप्रसिद्धमा

इत्यादित्यज्योतिः सम्राडिति होवाचा दित्येनैवायं ज्योतिषास्ते पल्ययते कर्मं कुरुते विपल्येतीत्येवमेवैतद्याज्ञवल्क्य॥१३॥र

दित्यज्योतिः सम्राडिति होवाच॥ कथमादित्येनैव स्वावयवसंघातव्यतिरिक्तेन चक्षुषोनुग्राहकेण ज्योतिषायं प्राकृतः पुरुष आस्त उपविशति पल्ययते पर्येति क्षेत्रमरण्यं वा तत्र गत्वा कर्म कुरुते विपल्येति विपर्येति च यथागतमस्तं तद्व्यतिरिक्तज्योतिष्ट्वप्रसिद्धताप्रदर्शनार्थमनेकविशे

ति॥ कथमित्यादिना॥ योव्यवहारः सोतिरिक्तज्योतिरधीनो यथा सवित्रधीनो जाग्रद्व्यवहार इति व्याप्तिं व्याकरोति॥ आदित्येनेति॥ एवकारं व्याचष्टे॥ स्वावयवेति॥ आदित्यापेक्षामंतरेण चक्षुर्वशादेवायं व्यवहारः सेत्स्यतीत्याशंक्याह॥ चक्षुष इति॥ आसनाद्यन्यतमव्यापारव्यपदेशे व्याप्तिसिद्धेर्वृथा विशेषणबहुत्वमित्याशंक्याह॥ अस्तं तेति॥ आसनादीनामेकैकव्यभिचारे देहस्यान्यथाभावेपि नानुग्राहकं ज्योतिरन्यथा भवति अतस्तदनुग्राह्याद्देहादसंतविलक्षणमिति विवक्षित्वा

तथापि किमर्थमादित्याद्यनेकपर्यायोपादानमेकेनैव व्याप्तिग्रहसंभवादित्याशंक्याह॥ बाह्येति॥ देहेंद्रियमनोव्यापाररूपं कर्मलिंगं तस्याव्यतिरि
क्तज्योतिरव्यभिचारसाधनार्थमनेकपर्यायोपन्यासो बहवो हि दृष्टांता व्याप्तिं दृढयंतीत्यर्थः॥ इंद्रियं व्यावर्तयति॥ वागितीति॥ शब्दस्य ज्योतिष्ट्वं स्व

बाह्यानेकज्योतिःप्रदर्शनं च लिंगस्याव्यभिचारित्वप्रदर्शनार्थमेवमेवैतद्याज्ञवल्क्य॥ २॥ तथास्तमित आदित्ये याज्ञवल्क्य किंज्योति
रेवायं पुरुष इति चंद्रमा एवास्य ज्योतिः॥ १४॥ अस्तमित आदित्ये चंद्रमस्यस्तमिते किंज्योतिः अग्निर्ज्योतिः॥ १५॥ शांतेऽग्नौ वाग्ज्योतिर्वा

अस्तमित आदित्ये याज्ञवल्क्य किंज्योतिरेवायं पुरुष इति चंद्रमा एवास्य ज्योतिर्भवतीति चंद्रमसैवायं ज्योतिषास्ते प
ल्ययते कर्म कुरुते विपल्येतीत्येवमेवैतद्याज्ञवल्क्य॥ १४॥ अस्तमित आदित्ये याज्ञवल्क्य चंद्रमस्यस्तमिते किंज्योतिरेवायं
पुरुष इत्यग्निरेवास्य ज्योतिर्भवतीत्यग्निनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीत्येवमेवैतद्याज्ञवल्क्य॥ १५॥ अ
स्तमित आदित्ये याज्ञवल्क्य चंद्रमस्यस्तमिते शांतेऽग्नौ किंज्योतिरेवायं पुरुष इति वागेवास्य ज्योतिर्भवतीति वाचैवायं ज्योतिषा
स्ते पल्ययते कर्म कुरुते विपल्येतीति॥ गिति शब्दः परिगृह्यते शब्देन विषयेण श्रोत्रमिंद्रियं दीप्यते श्रोत्रेंद्रिये संप्रदीप्ते मनसि विवेक उ
पजायते तेन मनसा बाह्यां चेष्टां प्रतिपद्यते मनसा ह्येव पश्यति मनसा शृणोतीति ब्राह्मणं॥ कथं पुनर्वाग्ज्योतिरिति वाचो ज्योतिष्ट्वमप्रसिद्ध
मित्यत आह

श्ययितुं पातनिकां करोति॥ शब्देनेति॥ तद्दीपनकार्यमाह॥ श्रोत्रेति॥ मनसि विषयाकारे परिणामे सति किं स्यात्तदाह॥ तेनेति॥ तत्र
प्रमाणमाह॥ मनसा हीति॥ एवं पातनिकां कृत्वा वाचो ज्योतिष्ट्वसाधनार्थ एकृति॥ कथमिति॥ का पुनरत्रानुपपत्तिस्तत्राह॥ वाच इति॥ तत्रानंतरवाक्यमुत्त

प्रसिद्धिमेवाकांक्षापूर्वकं स्फुटयति॥ कथमित्यादिना॥ उपैवेत्यादिव्याचष्टे॥ तेन शब्देनेति॥ ज्योतिःकार्यवत्त्वं तज्जन्यव्यवहाररूपकार्यवत्त्वमितिया
वत्॥ तत्र वाग्ज्योतिषइत्यत्र चतुर्थपर्यायः सप्तम्यर्थः॥ किमिति गंधादयः शब्देनोपलक्ष्यंते तत्राह॥ गंधादिभिरिति॥ प्रश्नांतरमुत्थापयति॥ एवमेवेति॥
तथापि स्वप्नादौ तस्य प्रवृत्तिदर्शनात्तत्कारणीभूतं ज्योतिर्वक्तव्यमिति शेषः॥ १६॥ कथं पुनरत्र एकस्य तेज्योतिरंतरमित्याशंक्य प्रष्टुरभिप्रायमाह॥ एतदु

तस्माद्वै सम्राड्यस्माद्वाचा ज्योतिषानुगृहीतोयं पुरुषो व्यवहरति तस्मात्प्रसिद्धमेतद्वाचो ज्योतिष्ट्वं कथमपि यत्र यस्मिन्काले प्रावृषि प्रायेण मे
घांधकारे सर्वज्योतिःप्रत्यस्तमये स्वोपि पाणिर्हस्तो न विस्पष्टं निर्ज्ञायतेऽथ तस्मिन्काले सर्वचेष्टानिरोधे प्राप्ते बाह्यज्योतिषोऽभावाद्यत्र वागुच्चर
ति श्वा वा भषति गर्दभो वा रौति उपैव तत्र न्येति तेन शब्देन ज्योतिषा श्रोत्रमनसो र्नैरंतर्यं भवति तेन ज्योतिःकार्यत्वं वाक्प्रतिपद्यते तेन वाचा ज्योति

तस्माद्वै सम्राळपि यत्र स्वः पाणिर्न विनिर्ज्ञायतेऽथ यत्र वागुच्चरत्युपैव तत्र न्येतीत्येवमेवैतद्याज्ञवल्क्य ॥ १६ ॥

षा उपन्येत्येव उपगच्छत्येव तत्र संनिहितो भवतीत्यर्थः॥ तत्र च कर्म कुरुते विपल्येति तत्र वाग्ज्योतिषो ग्रहणं गंधादीनामुपलक्षणार्थं गंधादिभि
रपि हि घ्राणादिष्वनुगृहीतेषु प्रवृत्तिनिवृत्त्यादयो भवंति तेन तैरप्यनुग्रहो भवति कार्यकरणसंघातस्य एवमेवैतद्याज्ञवल्क्य॥ १६॥ शांतायां पुनर्वा
चि गंधादिष्वपि च शांतेषु बाह्येष्वनुग्राहकेषु सर्वप्रवृत्तिनिरोधः प्राप्तोस्य पुरुषस्य॥ एतदुक्तं भवति॥ जाग्रद्विषये बहिर्मुखानि करणानि चक्षुरादीन्या
दित्यादिज्योतिर्भिरनुगृह्यमाणानि यदा तदा स्फुटतरः संव्यवहारोस्य पुरुषस्य भवतीत्येवं तावज्जागरिते स्वावयवसंघातव्यतिरिक्तेनैव ज्योतिषा ज्योतिःकार्य

कं भवतीति॥ योव्यवहारः सोतिरिक्तज्योतिर्निमित्तो यथादित्यादिनिमित्तो जाग्रद्व्यवहार इति व्याप्तिमुक्तां निगमयति॥ एवं तावदिति॥ व्याप्तिज्ञानकार्यमनुमानमा

तादृगवस्थायांसर्वज्योतिःप्रत्यस्तमयदशायामितियावत्॥ विमतोव्यवहारोऽतिरिक्तज्योतिरधीनोव्यवहारत्वात्संप्रतिपन्नवदित्यधस्तादेवानुमानमावे
दितमितिभावः॥ हेतोराश्रयासिद्धिमाशंक्यपरिहरति॥ दृश्यतेचेति॥ आदिशब्देनदेशांतरादौकर्मकरणंगृह्यते॥ आश्रयैकदेशासिद्धिमाशंक्याह ॥ सुषु
प्तावेति॥ ध्यानदशायामिष्टदेवतादर्शनंचकारार्थः॥ अनुमानफलंनिगमयति॥ तस्मादिति॥ यथोक्तानुमानाज्ज्योतिःसिद्धंचेत्किंप्रश्नेनेत्याशंक्याह॥ किं

वयंमन्यामहेसर्ववाह्यज्योतिःप्रत्यस्तमयेपिस्वप्नसुषुप्तकालेजागरितेचतादृगवस्थायांस्वावयवसंघातव्यतिरिक्तेनैवज्योतिषाज्योतिःका
र्यसिद्धिरस्येतिदृश्यतेचस्वप्नेज्योतिःकार्यसिद्धिःबंधुसंगमनवियोगदर्शनदेशांतरगमनादिचसुषुप्ताच्चोत्थानंसुखमहमस्वाप्संनकिंचि
द्वेदिषं॥ तस्मादस्तिव्यतिरिक्तंकिमपिज्योतिः॥ किंपुनस्तच्छांतायांवाचिज्योतिर्भवतीतिउच्यतेआत्मैवास्यज्योतिर्भवतीत्यात्मेतिकार्यकर

अस्तमितआदित्येयाज्ञवल्क्यचंद्रमस्यस्तमितेशांतेग्नौशांतायांवाचिकिंज्योतिरेवायंपुरुषइत्यात्मैवास्यज्योतिर्भवतीत्या
त्मनैवायंज्योतिषास्तेपल्ययतेकर्मकुरुतेविपल्येतीति॥ १७॥ ६॥ णस्वावयवसंघातव्यतिरिक्तंकार्यकरणावभासकमादि

त्यादिबाह्यज्योतिर्वत्स्वयमन्येनानवभास्यमानमभिधीयतेज्योतिरंतस्थंचतत्पारिशेष्यात्कार्यकरणव्यतिरिक्तंतदितितावत्सिद्धं॥ य
त्कार्यकरणव्यतिरिक्तंकार्यकरणसंघातानुग्राहकंचज्योतिस्तद्बाह्यैश्चक्षुरादिकरणैरुपलभ्यमानंदृष्टंनतुतथातच्चक्षुरादिभिरुपलभ्य
तेआदित्यादिज्योतिःषुसत्स्वपरतेषुकार्यंतुज्योतिषोदृश्यते पुनरिति॥ सर्वज्योतिरुपरमेदृश्यमानस्यव्यवहारस्यकारणतयानुमानतोज्योतिर्मात्रसिद्धा
वपितद्विशेषबुभुत्सायांप्रश्नोपपत्तिरित्यर्थः॥ प्रतिवचनमवतार्यव्याकरोति॥ उच्यतइत्यादिना॥ अवभासकत्वेदृष्टांतमाह॥ आदित्यादीति॥ तत्रव्यतिरिक्त

तंप्रत्ययवत्॥ कार्येति॥ अनुग्राहकत्वात्साहित्यविशेषः॥

तच्चांतस्थंपारिशेष्यादित्युक्तमुपपादयति॥ यच्चेति॥ उपरतेषात्मज्योतिरिति शेषः॥ तदेवतर्हिमाभूदितिचेन्नेत्याह॥ कार्यत्विति॥ स्वप्नादौ दृश्यमानंव्यवहा
रंहेत्वनूकृत्यफलितमाह॥ यस्मादित्यादिना॥ विमतमंतस्थमतींद्रियत्वादादित्यवद्व्यतिरेकीत्यर्थः॥ व्यतिरेक्यंतरमाह॥ किंचेति॥ संप्रतिलोकायतश्चोद
यति॥ नेत्यादिना॥ तत्रनञर्थंव्याचष्टे॥ यदिति॥ उक्तंहेतुंप्रश्नपूर्वकंविभजते॥ कस्मादित्यादिना॥ यद्यपिदेहादेरुपकार्यादुपकारकमादित्यादिसजा
तीयंदृष्टंतथापिनात्मज्योतिरुपकार्यसजातीयमनुमेयमित्याशंक्याह॥ यथादृष्टंचेति॥ तदेवस्पष्टयति॥ यदिनामेति॥ विमतमंतस्थमतिरिक्तंचातींद्रिय

यस्मात्तस्मादात्मनैवायंज्योतिषास्तेपल्ययतेकर्मकुरुतेविपल्येतीतितस्मान्नूनमंतस्थंज्योतिरित्यवगम्यते॥ किंच आदित्यादिज्योतिर्विलक्ष
णंतद्भौतिकंचसएवहेतुर्यच्चक्षुराद्यग्राह्यमादित्यादिवन्नसमानजातीयेनैवोपकारदर्शनाद्यदादित्यादिविलक्षणंज्योतिरंतरंसिद्धमि
त्येतदसत्कस्मादुपक्रियमाणसमानजातीयेनैवादित्यादिज्योतिषाकार्यकरणसंघातस्यभौतिकस्यभौतिकेनैवोपकारःक्रियमाणोदृश्यते
यथादृष्टंचेदमनुमेयं यदिनामकार्यकरणादर्थांतरंतदुपकारकमादित्यादिवज्ज्योतिस्तथापिकार्यकरणसंघातसमानजातीयमेवानुमे
यंकार्यकरणसंघातोपकारकत्वादादित्यादिज्योतिर्वद्यत्पुनरंतस्थत्वात्प्रत्यक्षत्वाच्चवैलक्षण्यमुच्यतेनचक्षुरादिज्योतिर्भिरनैकांतिकं
यतःप्रत्यक्षाण्यंतस्थानिचचक्षुरादिज्योतींषिभौतिकान्येवतस्मात्तवमनोरथमात्रंविलक्षणमात्मज्योतिःसिद्धमितिकार्यकरणसंघात
भावभावित्वाच्चसंघातधर्मत्वमनुमीयतेज्योतिषःसामान्यतोदृष्टस्यचानुमानस्यव्यभिचारित्वादप्रामाण्यं॥ त्वादादित्यवदितिपरोक्तंव्यतिरेक्यनुमा

नमनूद्यदूषयति॥ यत्पुनरित्यादिना॥ अनैकांतिकत्वंव्यनक्ति॥ यतइति॥ अंतस्थान्यव्यतिरिक्तानिचसंघातादितिद्रष्टव्यंव्यभिचारफलमाह॥ तस्मादिति॥
विलक्षणमंतस्थंचेतिमंतव्यं॥ किंच॥ चैतन्यंशरीरधर्मस्तद्भावभावित्वाद्रूपादिवदित्याह॥ कार्यकरणेति॥ विमतंसंघाताद्भिन्नंतद्भासकत्वादादित्यवदित्यनुमानान्नसं

लोकायतस्य देहावभासकमपि चक्षुस्ततो न भिद्यते॥ तथा च व्यभिचारान्नत्वदनुमानप्रामाण्यमित्यर्थः॥ मनुष्योहं जानामीति प्रत्यक्षविरोधाच्च तदनुमा
नमप्रमाणमित्याह॥ सामान्यतो दृष्टेति॥ ननु तेन प्रत्यक्षमुत्सार्यतामिति चेन्नेत्याह॥ न चेति॥ इतश्च देहस्यैव चैतन्यमित्याह॥ अयमेवेति॥ ज्योतिषो देह
व्यतिरेकमंगीकृत्यापि दूषयति॥ यदि नामेति॥ विमतं ज्योतिरनात्मा देहोपकारकत्वादादित्यवदित्यर्थः॥ आत्मत्वं तर्हि कस्येत्याशंक्याह॥ य एव त्विति॥
अनुमानादात्मनो देहव्यतिरिक्तत्वमुक्तमित्याशंक्याह॥ प्रत्यक्षेति॥ नान्य आत्मेति पूर्वेण संबंधः॥ देहस्यात्मत्वे कादाचित्कं द्रष्टृत्वं श्रोतृत्वाद्ययुक्तमिति शं

सामान्यतो दृष्टबलेन हि भवानादित्यादिवद्व्यतिरिक्तं ज्योतिः साधयति कार्यकरणेभ्यो न च प्रत्यक्षमनुमानेन बाधितुं शक्यते ऽयमेव तु कार्य
करणसंघातः प्रत्यक्षं पश्यति शृणोति मनुते विजानाति च यदि नाम ज्योतिरंतरमस्योपकारकं स्यादादित्यादिवन्न तदात्मा सा वात्मा स्याज्ज्योतिरंत
रमादित्यादिवदेव य एव तु प्रत्यक्षं दर्शनादिक्रियां करोति स एवात्मा स्यात्कार्यकरणसंघातो नान्यः प्रत्यक्षविरोधे ऽनुमानस्याप्रामाण्यात्॥ न
न्वयमेव चेद्दर्शनादिक्रियाकर्त्तात्मा संघातः कथमविकलस्यैवास्य दर्शनादिक्रियाकर्तृत्वं कदाचिद्भवति कदाचिन्नेति॥ नैष दोषो दृष्टत्वान्न हि
दृष्टेनुपपन्नं नाम न हि खद्योते प्रकाशाप्रकाशकत्वेन दृश्यमाने कारणांतरमनुमेयं अनुमेयत्वे च केन चित्सामान्यात्सर्वं सर्वत्रानुमेयं स्यात्तच्चानि
ष्टं न च पदार्थस्वभावो नास्ति न ह्यग्नेरुष्णस्वाभाव्यमन्यनिमित्तमुदकस्य वा शैत्यं॥ प्राणिधर्माधर्माद्यपेक्षमिति चेत् कृते॥ नन्विति॥ स्वभाववादी परि

हरति॥ नैष दोष इति॥ कादाचित्के दर्शनादर्शने संभवतो देहस्वाभाव्यादित्यत्र दृष्टांतमाह॥ नहीति॥ विमतं कारणांतरपूर्वकं कादाचित्कत्वाद्घटवदित्यनुमानं दृ
ष्टांते भविष्यतीत्याशंक्याग्निरुष्ण इति वदुष्णमुदकमित्यपि द्रव्यत्वादिनानुमीयेतेत्यतिप्रसंगमाह॥ अनुमेयत्वे चेति॥ ननु यद्भवति तत्सनिमित्तमेव न स्वभावा
द्भवेत्किंचिदस्माकं प्रसिद्धं तत्राह॥ न चेति॥ अग्नेरौष्ण्यमुदकस्य शैत्यमित्याद्यपि न निर्निमित्तं किंतु प्राण्यदृष्टापेक्षमिति शंकते॥ प्राणीति॥ आदिशब्देनेश्वरादिग्र

गूढाभिसंधिः स्वभाववाद्याह॥ धर्मेति॥ प्रसंगस्येष्टत्वं शंकित्वा स्वाभिप्रायमाह॥ अस्तित्यादिना॥ सिद्धांतीस्वप्नादिसिध्यनुपपत्त्यादेहातिरिक्तमात्मानमभ्युपगमयन्नुत्तरमाह॥ नेत्यादिना॥ तत्र न अर्थं विभजते॥ यदुक्तमिति॥ स्वप्ने दृष्टस्येव दर्शनादितिहेतुभागं व्यतिरेकद्वारा विवृणोति॥ यदिहीति॥ जाग्रद्देहस्य द्रष्टुः स्वप्ने नष्टत्वादतींद्रियस्य संस्कारस्य चानिष्टत्वादन्यदृष्टे चान्यस्य स्वप्नायोगान्न स्वप्ने दृष्टस्येव दर्शनं देहात्मवादे संभवतीत्यर्थः॥ माभूद्दृष्टस्यैव स्वप्ने दृष्टिरंधस्यापि स्वप्नदृष्टेरित्याशंक्याह॥ अंध इति॥ अपिशब्दोध्याहर्तव्यः॥ पूर्वदृष्टस्येव स्वप्ने दृष्टत्वेपि कुतो देहव्यतिरिक्तो द्रष्टा सिध्यतीत्याशंक्याह॥ ततश्चेति॥ अ

धर्माधर्मादेर्निमित्तांतरापेक्षस्वभावप्रसंगोस्त्विति चेन्न तदनवस्थाप्रसंगः स चानिष्टो न स्वप्नस्मृत्योर्दृष्टस्यैव दर्शनाद्यदुक्तं स्वभाववादिना देहस्यैव दर्शनादिक्रिया नव्यतिरिक्तस्येति तन्न यदिहि देहस्यैव दर्शनादिक्रिया स्वप्ने दृष्टस्यैव दर्शनं न स्यादंधः स्वप्नं पश्यन्दृष्टपूर्वमेव पश्यति न श्रुतद्वीपादिगतमदृष्टरूपं ततश्चैतत्सिद्धं भवति यः स्वप्नं पश्यति दृष्टपूर्वं वस्तु स एव पूर्वं विद्यमाने चक्षुष्यद्राक्षीन्न देह इति देहश्चेत् द्रष्टा स येनाद्राक्षीत्तस्मिन्नुद्धृते चक्षुषि स्वप्ने तदेव दृष्टपूर्वं न पश्येदस्ति च लोके प्रसिद्धिः पूर्वं दृष्टं मया हिमवतः शृंगमद्याहं स्वप्नेऽद्राक्षमिति उद्धृतचक्षुषामंधानामपि॥ तस्मादनुद्धृतेपि चक्षुषि यः स्वप्नदृक्स एव द्रष्टा न देह इत्यवगम्यते तथा स्मृतौ द्रष्टृस्मर्त्रोरेकत्वे सति य एव द्रष्टा स स्वस्मर्ता यदा चैवं तदा निमीलिताक्षोपि स्मरन्दृष्टपूर्वं यद्रूपं तद्दृष्टवदेव पश्यतीति

योभयत्र देहस्यैव द्रष्टृत्वे का हानिरिति चेदत आह॥ देहश्चेति॥ तत्र सहकारिचक्षुरभावाच्चक्षुरंतरस्यैवोत्पत्तौ देहांतरस्यापि समुत्पत्तिसंभवादन्यदृष्टेऽन्यस्य न स्वप्नः स्यादित्यर्थः॥ माभूत्पूर्वदृष्टस्य स्वप्ने देहत्वभावादित्याशंक्याह॥ अस्ति चेति॥ कथं तेजात्यंधानामीदृग्दर्शनमिति चेज्जन्मांतरानुभववशादिति ब्रूमोंधस्य देहस्याद्रष्टृत्वेपि चक्षुष्मतस्तस्य स्यादेव द्रष्टृत्वमित्याशंक्याह॥ तस्मादिति॥ स्वप्ने दृष्टस्यैव दर्शनादितिहेतुं व्याख्याय स्मृतौ दृष्टस्यैव दर्शनादितिहेतुं व्याचष्टे॥ तथेति॥ द्रष्टृस्मर्त्रोरेकत्वेपि कुतो देहाति

देहातिरिक्तस्यस्मर्तृत्वेपिकुतोद्रष्टृत्वमित्याशंक्याह॥तस्मादिति॥द्रष्टृस्मर्त्रोरेकत्वस्योक्तत्वाद्देहातिरिक्तःस्मर्तीचेद्द्रष्टापितथासिध्यतीतिभावः॥देह
स्याद्रष्टृत्वेहेत्वंतरमाह॥मृतेचेति॥नतस्यद्रष्टृतेतिशेषः॥तदेवोपपादयति॥देहस्यैवेति॥देहव्यतिरिक्तमात्मानमुपपादितमुपसंहरति॥तस्मा
दिति॥चैतन्यंयत्तदोरर्थः॥माभूद्देहस्यात्मत्वंइंद्रियाणांतुस्यादितिशंकतेचक्षुरादीनीति॥अन्यदृष्टस्येतरेणाप्रत्यभिज्ञानादितिन्यायेनपरिहरति॥
नेत्यादिना॥आत्मप्रतिपत्तिहेतूनांमनसिसंभवादितिन्यायेनशंकते॥मनइति॥ज्ञातुर्ज्ञानसाधनोपपत्तेःसंज्ञाभेदमात्रमितिन्यायेनपरिहरति॥नम

तस्माद्यन्निमीलितंतन्नद्रष्टृयन्निमीलितेचक्षुषिस्मरन्रूपंपश्यतितदेवानिमीलितेपिचक्षुषिद्रष्टासीदित्यवगम्यतेमृतेचदेहे॑विकल
स्यैवचरूपादिदर्शनाभावाद्देहस्यैवद्रष्टृत्वेमृतेपिदर्शनादिक्रियास्यात्तस्माद्यदपायेदेहेदर्शनंनभवतियस्यभावेभवतितद्दर्शनादिक्रि
याकर्तृनदेहइत्यवगम्यतेचक्षुरादीन्येवदर्शनादिक्रियाकर्तॄणीतिचेन्नयदहमद्राक्षंतत्स्पृशामीतिभिन्नकर्तृकत्वेप्रतिसंधानानुपपत्ते
र्मनस्तर्हीतिचेन्नमनसोपिविषयत्वाद्रूपादिवद्द्रष्टृत्वाद्यनुपपत्तेः॥तस्मादंतस्थंव्यतिरिक्तमादित्यादिवदितिसिद्धंयदुक्तंकार्यकरणसंघातस
मानजातीयमेवज्योतिरंतरमनुमेयमादित्यादिभिस्तत्समानजातीयैरेवोपक्रियमाणत्वादितितदसदुपकार्योपकारकभावस्यानियमदर्श
नात्कथंपार्थिवैरिंधनैःपार्थिवत्वसमानजातीयैस्तृणोलपादिभिरग्नेःप्रज्वलनोपकारःक्रियमाणोदृश्यतेनचतावतातत्समानजातीयैरेवाग्नेः
प्रज्वलनोपकारःसर्वत्रानुमेयःस्यात्नसोपीति॥देहादेरनात्मत्वेफलितमाह॥तस्मादिति॥आत्मज्योतिःसंघातादितिशेषः॥परोक्तमनुवदति॥यदुक्त
मिति॥अनुग्राह्यसजातीयमनुग्राहकमित्यत्रहेतुमाह॥आदित्यादिभिरिति॥उपकार्योपकारकत्वसाजात्यनियमंदूषयति॥तदसदिति॥अनियमदर्शनमाकां
क्षापूर्वकमुदाहरति॥कथंपार्थिवैरिति॥उलपंबालतृणं॥पार्थिवस्याग्निंप्रत्युपकारकत्वनियमंवारयति॥नचेति॥तावतापार्थिवेनाग्नेरुपक्रियामाणत्वदर्शनेने

लियावत्॥तत्समानजातीयेष्वितितर्कः॥पार्थिवत्वविषयः॥

तत्रहेतुमाह॥ येनेति॥ दर्शनफलंनिगमयति॥ तस्मादिति॥ उपकार्योपकारकभावेसाजात्यानियमवदुपकार्योपकारकभावेपिवैजात्यनियमोनास्तीत्य
र्थः॥ तत्रोपकार्योपकारकत्वेसाजात्यनियमाभावंउदाहरणांतरेणदर्शयति॥ कदाचिदिति॥ अंभसाग्निनावाग्नेरुपशांत्युपलंभादुपकार्योपकारकत्वे
वैजात्यनियमोनास्तीतिमत्वोपसंहरति॥ तस्मादिति॥ उक्तानियमदर्शनंतच्छब्दार्थः॥ अहेतुरात्मज्योतिषःसंघातेनसमानजीयतायामितिशेषः॥ अत्र

येनोदकेनापिप्रज्वलनोपकारोभिन्नजातीयेनवैद्युतस्याग्नेर्जाठरस्यचक्रियमाणोदृश्यतेतस्मादुपकार्योपकारकभावेसमानजातीयनि
यमोनास्तिकदाचित्समानजातीयामनुष्यामनुष्यैरेवोपक्रियंतेकदाचित्स्थावरपश्वादिभिश्चभिन्नजातीयैस्तस्मादहेतुःकार्यकरणसंघा
तसमानजातीयैरेवादित्यादिज्योतिर्भिरुपक्रियमाणत्वादितियत्पुनरात्मचक्षुरादिभिरादित्यादिज्योतिर्वद्दृश्यत्वादित्ययंहेतुर्ज्योतिरंतर
स्यांतस्थत्वंवैलक्षण्यंचनसाधयतिचक्षुरादिभिरनैकांतिकत्वादितितदसच्चक्षुरादिकरणेभ्योन्यत्वेसतीतिहेतोर्विशेषणत्वोपपत्तेःकार्य
करणसंघातधर्मत्वंज्योतिषइतियदुक्तंतन्न॥ अनुमानविरोधात्॥ आदित्यादिज्योतिर्वत्कार्यकरणसंघातादर्थांतरंज्योतिरिति
ह्यनुमानमुक्तंतेनविरुध्यतइयंप्रतिज्ञाकार्यकरणसंघातधर्मत्वंज्योतिषइतितद्भावभावित्वंत्वसिद्धंमृतेदेहेज्योतिषोऽदर्शनात्सामा
न्यतोदृष्टस्यानुमानस्याप्रामाण्येसतिपानभोजनादिसर्वव्यवहारलोपप्रसंगःसचानिष्टः॥ ग्राहकमनुग्राह्यसजातीयमनुग्राहकत्वाददादि

त्यवदित्यपास्तं॥ संप्रत्यतींद्रियत्वहेतोरनैकांत्यंपरोक्तमनुभाष्यदूषयति॥ यत्पुनरित्यादिना॥ विमतंज्योतिःसंघातधर्मस्तद्भावभावित्वाद्रूपादिवदि
त्युक्तमनूद्यनिराकरोति॥ कार्येति॥ अनुमानविरोधमेवसाधयति॥ आदित्यादीति॥ कालात्ययापदेशमुक्त्वाहेत्वसिद्धिंदोषांतरमाह॥ तद्भावेति॥ अद
र्शनादितिच्छेदः॥ यत्पुनर्विशेषेनुगमाभावःसामान्येसिद्धसाध्यतेत्यनुमानदूषणमभिप्रेत्यसामान्यतोदृष्टस्यचेत्याद्युक्तंतत्तद्दूषयति॥ सामान्यतोदृष्टस्येति॥

किमित्यनुमानाप्रामाण्येसर्वव्यवहारहानिरित्याशंक्याह॥पानेति॥तत्सामान्यात्पानत्वभोजनत्वादिसादृश्यादितियावत्॥पानभोजनाद्युपादानंदृश्यमान
मित्युक्तंविशदयति॥दृश्यंतेहीति॥तादर्थ्येनक्षुत्पिपासादिनिवृत्त्युपायभोजनपानाद्यर्थत्वेनेतियावत्॥देहस्यैवद्रष्टृत्वमित्युक्तमनूद्यपूर्वोक्तंपरिहारं
स्मारयति॥यदुक्तमित्यादिना॥ज्योतिरंतरमादित्यादिवदनात्मेत्युक्तंप्रत्याह॥अनेनेति॥संघातादेर्द्रष्टृत्वनिराकरणेनेतियावत्॥देहस्यकादाचि
त्कंदर्शनादिमत्त्वंस्वाभाविकमित्यत्रपरोक्तंदृष्टांतमनुभाष्यनिराचष्टे॥यत्पुनरित्यादिना॥सिद्धांतिनापिस्वभाववादस्यक्वचिदेष्टव्यत्वमुपदिष्टमनूद्यदू

पानभोजनादिषुहिक्षुत्पिपासादिनिवृत्तिमुपलभ्यवतस्तत्सामान्यात्सानभोजनाद्युपादानंदृश्यमानंलोकेनप्राप्नोति॥दृश्यंतेह्युपलब्धपा
नभोजनाःसामान्यतःपुनःपानभोजनांतरैःक्षुत्पिपासादिनिवृत्तिमनुमिन्वंतस्तादर्थ्येनप्रवर्त्तमानाःयदुक्तमयमेवतुदेहोदर्शनादिक्रियाकर्त्ते
तितत्स्वयममेवपरिहृतंस्वप्नस्मृत्योर्देहादर्थांतरभूतोद्रष्टेत्यनेनैवज्योतिरंतरस्यानात्मत्वमपिप्रत्युक्तं॥यत्पुनःखद्योतादेःकादाचित्कंप्रका
शाप्रकाशकत्वंतदसत्तस्याद्यवयवसंकोचविकासनिमित्तत्वात्प्रकाशाप्रकाशकत्वस्ययत्पुनरुक्तंधर्माधर्मयोरवश्यंफलदातृत्वंस्वभावो
भ्युपगंतव्यइतितदभ्युपगमेभवतःसिद्धांतहानादेतेनानवस्थादोषःप्रत्युक्तस्तस्मादस्तिव्यतिरिक्तंचांतस्थंज्योतिरात्मेति॥६॥१७॥यद्यपि ४८
व्यतिरिक्तत्वादिसिद्धंतथापिसमानजातीयानुग्राहकत्वदर्शननिमित्तभ्रांत्याकरणानामेवान्यतमोव्यतिरिक्तोवेत्यविवेकतःपृच्छतिकतमइ

षयति॥यत्पुनरिति॥धर्मादेर्यदिहेत्वंतराधीनंफलदातृत्वंतदाहेत्वंतरस्यापिहेत्वंतराधीनफलदातृत्वमित्यनवस्थेत्युक्तंप्रत्याह॥एतेनेति॥सिद्धांतविरोधप्रसं
जनेनेतियावत्॥लोकायतमतासंभवेस्वपक्षमुपसंहरति॥तस्मादिति॥६॥नन्वात्मज्योतिःसंघाताद्व्यतिरिक्तमंतस्थंचेतिसाधितंतथाचकथंकतमआत्मेतिपृच्छ्य
तेतत्राह॥यद्यपीति॥अनुग्राह्येणदेहादिनासमानजातीयस्यादित्यादेरनुग्राहकत्वदर्शनान्निमित्तादनुग्राहकत्वाविशेषादात्मज्योतिरपिसमानजातीयंदेहादिने

सिंगतिविर्भेवितकेतियावत्॥

अविवेकिनो निष्कृष्टदृष्ट्यभावादित्यर्थः॥व्यतिरेकसाधकस्य न्यायस्यादर्शितत्वात्कुतो भ्रांतिरित्याशंक्याह॥न्यायेति॥भ्रांतिनिमित्ताविवेककृतं प्रश्नमुक्त्वा प्रकारांतरेण प्रश्नमुत्थापयति॥अथवेति॥प्रश्नाक्षराणि व्याचष्टे॥कतमोसाविति॥ननु ज्योतिर्निमित्तो व्यवहारो मयोक्तो न त्वात्मेत्याशंक्याह॥येनेति॥आत्मनैवायं ज्योतिषेत्युक्तत्वादासनादिनिमित्तं ज्योतिरात्मेत्यर्थः॥प्रकारांतरेण प्रश्नं व्याकरोति॥अथवेति॥सप्रश्नस्यार्थं कथयति॥सर्वइति॥योयं त्वयाभिप्रेतो विज्ञानमयः सप्रा

न्यायसूक्ष्मतायादुर्विज्ञेयत्वादुपपद्यते भ्रांतिरथवा शरीरव्यतिरिक्ते सिद्धेपि करणानि सर्वाणि विज्ञानवंतीव विवेकत आत्मनोऽनुपलब्धत्वादतो
हं पृच्छामि कतम आत्मेति कतमोसौ देहेंद्रियप्राणमनःसु यस्त्वयोक्त आत्मा येन ज्योतिषास्त इत्युक्तमथवा योयमात्मा त्वयाभिप्रेतो विज्ञानमयः सर्वे
इमे प्राणा विज्ञानमया इवैषु प्राणेषु कतमो यथा समुदितेषु ब्राह्मणेषु सर्व इमे तेजस्विनः कतम एषु षडंगविदिति पूर्वस्मिन्व्याख्याने कतम आत्मे

कतम आत्मेति योयं विज्ञानमयः प्राणेषु ॥

त्येतावदेव प्रश्नवाक्यं योयं विज्ञानमय इति प्रतिवचनं द्वितीये तु व्याख्याने प्राणेष्वित्येवमंतं प्रश्नवाक्यमथवा सर्वमेव प्रश्नवाक्यं विज्ञानमयो हृद्यंत
र्ज्योतिःपुरुषः कतम इत्येतदंतं योयं विज्ञानमय इत्येतस्य शब्दस्य निर्धारितार्थविशेषविषयत्वं कतम आत्मेति चेति शब्दस्य प्रश्नवाक्यपरिसमाप्त्य
र्थत्वं व्यवहितसंबंधमंतरेण युक्तमिति कृत्वा कतम आत्मेत्येवमंतमेव प्रश्नवाक्यं णेषु मध्ये कतमः स्यात्तेपि हि विज्ञानमया इव भांतीतीति योजना॥उक्तमर्थं दृ

ष्टांतेन बुद्धावारोपयति॥यथेति॥व्याख्यानयोरवांतरविभागमाह॥पूर्वस्मिन्नित्यादिना॥हृदीत्यादि प्रतिवचनमिति शेषः॥पक्षांतरमाह॥अथवेति॥सर्वस्य प्रश्नत्वेवा
क्यं योजयति॥विज्ञानेति॥ससमानः सन्नित्यादि प्रतिवचनमिति शेषः॥द्वितीयतृतीयपक्षयोररुचिं सूचयन्नाद्यं पक्षमंगीकरोति॥योयमिति॥यस्त्वयाष्टष्टः सोयमित्यात्म

देहव्यवच्छेदार्थं विशिनष्टि॥ विज्ञानमय इति॥ विज्ञानशब्दार्थमाचक्षाणस्तन्मयत्वं प्रकटयति॥ बुद्धीति॥ बुद्धिरेव विज्ञानं विज्ञायतेऽनेनेति व्युत्पत्तेस्तेनोपाधि
नासंपर्क एवाविवेकस्तस्मादिति यावत्॥ तत्संपर्के प्रमाणमाह॥ बुद्धिविज्ञानेति॥ तस्माद्विज्ञानमय इति शेषः॥ ननु चक्षुर्मयः श्रोत्रमय इत्यादिं हित्वा विज्ञानम
य इत्येवकस्मादुपदिश्यते तत्राह॥ बुद्धिर्हीति॥ तस्याः साधारणकरणत्वे प्रमाणमाह॥ मनसा हीति॥ मनसः सर्वार्थत्वं समर्थयते॥ बुद्धीति॥ किमर्थानि त
र्हि चक्षुरादीनि करणानीत्याशंक्याह॥ द्वारमात्राणीति॥ बुद्धेः सति प्राधान्ये फलितमाह॥ तस्मादिति॥ विज्ञानं परं ब्रह्म तत्स्वरूपं कृतिको जीवो विज्ञानमय इति भ

योयमित्यादिपरं सर्वमेव प्रतिवचनमिति निश्चीयते योयमित्ययमित्यात्मनः प्रत्यक्षत्वान्निर्देशो विज्ञानमयो विज्ञानप्रायो बुद्धिविज्ञानोपाधिसं
पर्काविवेकाद्विज्ञानमय इत्युच्यते॥ बुद्धिविज्ञानसंयुक्त एव हि यस्मादुपलभ्यते राहुरिव चंद्रादित्यसंश्लिष्टो बुद्धिर्हि सर्वार्थकरणं तमसीव प्रदी
पः पुरोवस्थितो मनसा ह्येव पश्यति मनसा शृणोतीति ह्युक्तं बुद्धिविज्ञानालोकविशिष्टमेव हि सर्वं विषयजातमुपलभ्यते पुरोवस्थितप्रदी
पालोकविशिष्टमिव हि तमसि द्वारमात्राणि त्वन्यानि करणानि बुद्धेः॥ तस्मात्तेनैव विशेष्यते विज्ञानमय इति येषां परमात्मविज्ञप्तिविकार
इति व्याख्यानं तेषां विज्ञानमयो मनोमय इत्यादौ विज्ञानमयशब्दस्यान्यार्थदर्शनादश्रौतार्थतावसीयते संदिग्धश्च पदार्थोऽन्यत्र निश्चितप्र
योगदर्शनान्निर्धारयितुं शक्यो वाक्यशेषा त्. प्रपंचेरुक्तमनुवदति॥ येषामिति विज्ञानमयादिग्रंथे मयटो न विकारार्थतेति तैरेवोच्यते तत्र मनः
समभिव्याहाराद्विज्ञानं बुद्धिर्न चात्मा तद्विकारस्तस्माद्स्मिन्प्रयोगे मयटो विकारार्थत्वं वदतां स्वोक्तिविरोधः स्यादिति दूषयति॥ तेषामिति॥ कथं विज्ञान
मयपदार्थनिर्णयार्थं प्रयोगांतरमनुश्रीयते तत्राह॥ संदिग्धश्चेति॥ यथा पुरोडाशं चतुर्धा कृत्वा बर्हिषदं करोतीति पुरोडाशमात्रं चतुर्धाकरणवाक्यमेकार्थसं
बंधिना शास्त्रांतरीयेणाग्नेयं चतुर्धा करोतीत्यनेन विशेषविषयतया निश्चितार्थेनाग्नेय एव पुरोडाशे व्यवस्थाप्यते यथा चाक्ताः शर्करा उपदधातीत्यत्र तेनाक्ता तेज

यद्यपीते जीवे ब्रह्मणि विकालोकोपाधिकोटरः॥

आत्मविकारत्वेमोक्षानुपपत्त्याह्यबाधितन्यायाद्धाविज्ञानमयपदार्थेनिश्चयइत्याह॥ निश्चितेति॥ यदुक्तंनिर्णयोवाक्यशेषादितितदेवव्यनक्ति॥ सधीरिति
चेति॥ आधारव्यर्थासप्तमीदृष्टासाकथंव्यतिरेकप्रदर्शनार्थेत्याशंक्याह॥ यथेति॥ भवत्वत्रापिसामीप्यलक्षणासप्तमीतथापिकथंव्यतिरेकप्रदर्शनमित्या
शंक्याह॥ प्राणेषुहीति॥ फलितंसप्तम्यर्थमभिनयति॥ प्राणेष्विति॥ तेषुसमीपस्थोपिकथंतेभ्योव्यतिरिच्यतेतत्राह॥ योहीति॥ विशेषणांतरमादायव्याव
र्त्यांशंकामुक्त्वापुनरवतार्यव्याकरोति॥ हृदीत्यादिना॥ विशेषणांतरस्यतात्पर्यमाह॥ अंतरितीति॥ ज्योतिःशब्दार्थमाह॥ ज्योतिरिति॥ तस्यज्योतिष्ट्वंस्पष्ट

निश्चितन्यायबलाद्धासधीरितिचोत्तरत्रपाठाद्धृद्यंतरितिचवचनाद्युक्तंविज्ञानप्रायत्वमेवप्राणेष्वितिव्यतिरेकप्रदर्शनार्थासप्तमीयथावृक्षेषु
पाषाणइतिसामीप्यलक्षणाइतिप्राणेषुहिव्यतिरेकाव्यतिरेकतासंदिह्यतेआत्मनःप्राणेषुप्राणेभ्योव्यतिरिक्तइत्यर्थःयोहियेषुभवतिस
तद्व्यतिरिक्तोभवत्येवयथापाषाणेषुवृक्षः॥ हृदितत्रैतत्स्यात्प्राणेषुप्राणजातीयेवबुद्धिःस्यादित्यतआहहृद्यंतरितिहृच्छब्देनपुंडरीका
कारोमांसपिंडस्तात्स्थ्याद्बुद्धिर्हृत्तस्यांहृदिबुद्धौअंतरितिबुद्धिवृत्तिव्यतिरेकप्रदर्शनार्थंज्योतिरवभासात्मकत्वादात्मोच्यतेतेनह्ययव
भासकेनात्मनाज्योतिषास्तेपल्ययतेकर्मकुरुतेचेतनावानिवह्ययंकार्यकरणपिंडोयथादित्यप्रकाशस्थोघटोयथावामरकतादिमणिःक्षी
रादिद्रव्येप्रक्षिप्तःपरीक्षणायात्मच्छायमेवतत्क्षीरादिद्रव्यंकरोतितादृगेतदात्मज्योतिर्बुद्धेरपिहृदयात्सूक्ष्मत्वाद्धृद्यंतरस्थमपिहृदयादिकंका
र्यकरणसंघातंचैकीकृत्यात्मज्योतिश्छायंकरोति॥ पारंपर्येण

यति॥ तेनेति॥ आत्मज्योतिषाव्याप्तस्यकार्यकरणसंघातस्यव्यवहारक्षमत्वेदृष्टांतमाह
॥ यथेति॥ चेतनावानिवेत्युक्तंदृष्टांतेनोपपादयति॥ यथावेति॥ हृदयंबुद्धिस्ततोपिसूक्ष्मत्वादात्मज्योतिस्तदंतस्थमपिहृदयादिकंसंघातंचसर्वमेकी
कृत्यस्वच्छायंकरोतीतिकृत्वायथोक्तमणिसादृश्यमुचितमितिदार्ष्टांतिकेयोजना॥ कथमिदमात्मज्योतिःसर्वमात्मच्छायंकरोतितत्राह॥ पारंपर्येणेति॥

विषयादिषु प्रत्यगात्मांतेषूत्तरोत्तरसूक्ष्मतारतम्यात्तेष्वेवात्मादिविषयांतेषु स्थूलतारतम्याच्च प्रतीचः सर्वस्मादंतरतमत्वात्तत्रतत्र स्वाकारहेतुत्वमस्ती
त्यर्थः॥ बुद्धेरात्मच्छायत्वं समर्थयते॥ बुद्धिस्तावदिति॥ लौकिकपरीक्षकाणां बुद्धावात्माभिमानभ्रांतिमुक्तेऽर्थे प्रमाणयति॥ तेनहीति॥ बुद्धेः पश्चान्मनस्य
पिच्छायतेत्यत्र हेतुमाह॥ बुद्धीति॥ आत्मनः सर्वावभासकत्वमुक्तमुपसंहरति॥ एवमिति॥ आत्मनः सर्वावभासकत्वे किमितिकस्य चित्क चिदेवात्मधीरि

सूक्ष्मस्थूलतारतम्यात्सर्वांतरतमत्वाद्बुद्धिस्तावत्स्वच्छत्वादानंतर्याच्चात्मचैतन्यज्योतिः प्रतिच्छाया भवति तेन हि विवेकिनामपि तत्रात्मा
भिमानबुद्धिः प्रथमा ततोऽप्यानंतर्यान्मनसि चैतन्यावभासता॥ बुद्धिसंपर्कात्ततइंद्रियेषु मनःसंयोगात्ततोऽनंतरं शरीरे इंद्रियसंपर्कादेवं पा
रंपर्येण कृत्स्नं कार्यकरणसंघातमात्मचैतन्यं स्वरूपज्योतिषावभासयति तेन हि सर्वस्य लोकस्य कार्यकरणसंघाते तद्वृत्तिषु वाऽनियता

हृद्यंतर्ज्योतिः पुरुषः॥

त्माभिमानबुद्धिर्यथाविवेकं जायते॥ तथा च भगवतोक्तं गीतासु॥ यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः॥ क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशय
ति भारत॥ यदादित्यगतं तेज इत्यादि च॥ नित्यो नित्यानां चेतनश्चेतनानामिति च काठके॥ तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभा
तीति च॥ येन सूर्यस्तपति तेजसेद्ध इति च मंत्रवर्णात् स्यादाशंक्याह॥ तेनहीति॥ बुध्यादेरुक्तक्रमेणात्मच्छायत्वं तच्छब्दार्थः॥ आत्मज्योतिषः सर्वावभासक
त्वे लोकप्रसिद्धिरेव न प्रमाणं किंतु भगवद्वाक्यमपीत्याह॥ तथा चेति॥ अनाशिनामयमनाशी चेतनश्चेतयितारो ब्रह्मादयस्तेषामयमेव चेतनो यथोदकादीनामन
ग्नीनामग्निनिमित्तं दाहकत्वं तथात्मनिमित्तमेव चेतयितृत्वमन्येषामित्याह॥ नित्य इति॥ अनुगमनवदनुभानं स्वगतया भासा स्यादिति शंकां प्रत्याह॥ तस्येति॥ ये

बृ.र.
१७

ज्योतिःशब्दव्याख्यानमुपसंहरति॥तेनेति॥हृद्यंतःस्थितोयमात्मासर्वावभासकत्वेनज्योतिर्भवतीतियोजना॥पदांतरमादायव्याचष्टे॥पुरुषइति॥आदित्या
दिज्योतिषःसकाशादात्मज्योतिषिविशेषमाह॥निरतिशयंचेति॥प्रतिवचनवाक्यार्थमुपसंहरति॥सएषइति॥ससमानःसन्नित्याद्यवतारयितुंवृत्तंकी
र्त्तयति॥बाह्यानामिति॥तर्हिबाह्यज्योतिःसद्भावावस्थायामकिंचित्करमात्मज्योतिरित्याशंक्याह॥यदात्विति॥व्यतिरेकमुखेनोक्तमर्थमन्वयमुखेनक
थयति॥आत्मज्योतिरिति॥आत्मज्योतिषःसर्वानुग्राहकत्वेप्रमाणमाह॥यदेतदिति॥सर्वमंतःकरणादिप्रज्ञानेत्रमित्येतरेयकेश्रवणाद्युक्तमात्मज्योति

तेनायंहृद्यंतर्ज्योतिःपुरुषआकाशवत्सर्वगतत्वात्पूर्णइतिपुरुषोनिरतिशयंचास्यस्वयंज्योतिष्ट्वंसर्वावभासात्मकत्वात्स्वयमन्यानवभा
सत्वाच्चसएषपुरुषःस्वयमेवज्योतिःस्वभावोयंत्वंएकस्मिकतमआत्मेतिबाह्यानांज्योतिषांसर्वकरणानुग्राहकाणांप्रत्यस्तमयेंतःकरणद्वा
रेणहृद्यंतर्ज्योतिःपुरुषोऽनुग्राहकःकरणानामित्युक्तंयदात्वपिबाह्यकरणानुग्राहकाणामादित्यादिज्योतिषांसद्भावस्तदाप्यादित्यादिज्योति
षांपरार्थत्वात्कार्यकरणसंघातस्याचैतन्येनस्वार्थानुपपत्तिःस्वार्थज्योतिषआत्मनोनुग्रहाभावेऽयंकार्यकरणसंघातोनव्यवहारायकल्पते
आत्मज्योतिरनुग्रहेणैवहिसर्वदासर्वःसंव्यवहारोयदेतत्हृदयंमनश्चैतत्संज्ञानमित्यादिश्रुत्यंतरात्साभिमानोहिसर्वःप्राणिसंव्यवहारोभि
मानहेतुंचमरकतमणिदृष्टांतेनावोचामयद्यप्येवमेतत्तथापिजाग्रद्विषयेसर्वकरणगोचरत्वादात्मज्योतिषोबुध्यादिबाह्याभ्यंतरकार्यक
रणव्यवहारसन्निपातव्याकुलत्वान्नशक्यतेतज्ज्योतिरात्माख्यंमुंजेषीकावन्निष्कृष्यदर्शयितुमित्यतःस्वप्नेदिदर्शयिषुःप्रक्रमते॥ षःसर्वानुग्राह

कत्वमित्यर्थः॥किंच॥अचेतनानांकार्यकरणानांचेतनत्वसिध्यनुपपत्त्यासदाचिदात्मव्याप्तिरेष्टव्येत्याह॥साभिमानोहीति॥कथमसंगस्यप्रतीचःसर्वत्रबु
ध्यादावहंमानइत्याशंक्याह॥अभिमानेति॥वृत्तमनूद्योत्तरवाक्यमवतारयति॥यद्यपीति॥यथोक्तमपिप्रत्यग्ज्योतिर्जागरितेदर्शयितुमशक्यमितिश्रुतिःस्व

रामः
१७

स्वप्नेनिष्कृष्टंज्योतिरितिशेषः॥सदृशःसन्ननुसंचरतीतिसंबंधः॥सादृश्यस्यप्रतियोगिसापेक्षत्वमपेक्ष्यपृच्छति॥केनेति॥उत्तरं॥प्रकृतत्वादिति॥प्राणाना
मपितुल्यंतदितिचेत्तत्राह॥सन्निहितत्वाच्चेति॥हेतुद्वयंसाधयति॥हृदीत्यादिना॥प्रकृतत्वादिफलमाह॥तस्मादिति॥सामान्यंप्रश्नपूर्वकंविशदयति
॥किंपुनरित्यादिना॥विवेकतोनुपलब्धिंव्यक्तीकर्तुंबुद्धिज्योतिषोःस्वरूपमाह॥अवभास्येति॥अवभासकत्वेदृष्टांतमाह॥आलोकवदिति॥तथापिकथं

ससमानःसन्नुभौलोकावनुसंचरतियःपुरुषःस्वयमेवज्योतिरात्मासससमानःसदृशःसन्केनप्रकृतत्वात्संनिहितत्वाच्चहृदयेनहृदितिहृ
द्वाच्याबुद्धिःप्रकृतासन्निहितसाचतस्मात्तयैवसामान्यंकिंपुनःसामान्यमन्यमहिषवद्विवेकतोनुपलब्धिरवभास्याबुद्धिरवभासकंत
दात्मज्योतिरालोकवदवभास्यावभासकयोर्विवेकतोनुपलब्धिःप्रसिद्धाविशुद्धत्वाद्ध्यालोकोवभास्येनसदृशोभवतियथारक्तमवभासय

ससमानः

न्रक्तसदृशोरक्ताकारोभवतियथाहरितंनीलंलोहितंवावभासयन्नालोकस्तत्सदृशस्तत्समानोभवतितथाबुद्धिमवभासयन्बुद्धिद्वारेणकृ
त्स्नंक्षेत्रमवभासयतीत्युक्तंमरकतमणिनिदर्शनेन॥तेनसर्वेणसमानोबुद्धिसामान्यद्वारेणसर्वमयइतिचातएववक्ष्यतितेनासौकुतश्चित्प्र
विभज्यमुंजेषीकावत्स्वेनज्योतीरूपेणदर्शयितुंनशक्यते विवेकतोनुपलब्धिस्तत्राह॥अवभास्येति॥प्रसिद्धिमेवप्रकटयति॥विशुद्धत्वादीति॥उक्तम
र्थंदृष्टांतेनबुद्धावारोपयति॥यथेत्यादिना॥दृष्टांतगतमर्थंदार्ष्टांतिकेयोजयति॥तथेति॥पुनरुक्तिंपरिहरति॥इत्युक्तमिति॥सर्वावभासकत्वेकथंबुध्यैवसाम्य
मित्याशंक्याह॥तेनेति॥सर्वावभासकत्वंतच्छब्दार्थः॥किमर्थंतर्हिबुध्यासामान्यमुक्तमित्याशंक्यद्वारत्वेनेत्याह॥बुद्धीति॥आत्मनःसर्वेणसमानत्वेवाक्यशेष

वाक्यशेषसिद्धेर्थे लोकभ्रांतेर्गमकत्वमाह ॥ तेनेति ॥ सर्वमयत्नेनेति यावत् ॥ आत्मानात्मनोर्विवेकदर्शनस्याशक्यत्वे परस्पराध्यासस्तद्धर्माध्यासश्चस्यात्ततश्च लोकानां मोहो भवेदित्याह ॥ इति सर्वेति ॥ धर्मिविषयं मोहमभिनयति ॥ अयमिति ॥ धर्मविषयं मोहं दर्शयति ॥ एवंधर्मेति ॥ तदेव स्फुटयति ॥ कर्त्रेत्यादिना ॥ विकल्पैः सर्वो लोको मोमुह्यत इति संबंधः ॥ स समानः सन्नित्यस्यार्थमुक्त्वाऽवशिष्टं भागं व्याकरोति ॥ अत इत्यादिना ॥ आत्मनः स्वाभाविकमुभयलोकसंचरणमित्याशं

इति सर्वं व्यापारं तत्राध्यारोप्य नामरूपगतं ज्योतिर्धर्मं च नामरूपयोर्नामरूपे चात्मज्योतिषि सर्वो लोको मोमुह्यते ऽयमात्मा नायमात्मा एवंधर्मा नैवंधर्मा कर्ताऽकर्ता शुद्धोऽशुद्धो बद्धो मुक्तः स्थितो गत आगतोऽस्ति नास्तीत्यादिविकल्पैरतः समानः सन्नुभौ लोकौ प्रतिपन्नप्रतिपत्तव्याविहलोकपरलोकावुपात्तदेहेंद्रियादिसंघातत्यागान्योपादानसंतानप्रबंधशतसंनिपातैरनुक्रमेण संचरति धीसादृश्यमेवोभयलोकसंचरणहेतुर्न स्वत इति तत्र

सन्नुभौ लोकावनुसंचरति ध्यायतीव लेलायतीव ॥

तावन्नामरूपोपाधिसादृश्यं भ्रांतिनिमित्तं यत्तदेव हेतुर्न स्वत इत्येतदुच्यते ॥ यस्मात्स समानः सन्नुभौ लोकावनुक्रमेण संचरति तदेव प्रत्यक्षमित्येतद्दर्शयति यतो ध्यायतीव ध्यानव्यापारं करोतीव चिंतयतीव ध्यानव्यापारवतीं बुद्धिं स तात्स्थ्येन चित्स्वभावज्योतीरूपेणावभासयंस्तत्सदृशस्तत्समानः सन्ध्यायतीवालोकवदेवातो भवति चिंतयतीवेति भ्रांतिर्लोकस्य न तु परमार्थतो ध्यायति ॥ क्यानंतरं वाक्यमादत्ते ॥ तत्रेति ॥ आत्मा स इत्यस्यर्थः ॥ यतः शब्दो वक्ष्यमाणतः शब्देन संबध्यते ॥ अक्षरोत्थमर्थमुक्त्वा वाक्यार्थमाह ॥ ध्यानेति ॥ ध्यानवतीं बुद्धिं व्याप्नुवन्निदात्मा ध्यायतीवेत्यत्र दृष्टांतमाह ॥ आलोकवदिति ॥ यथा खल्वालोको नीलं पीतं वा विषयं व्याप्नुवानस्तदाकारो दृश्यते तथायमपि ध्यानवतीं बुद्धिं भासयन्ध्यानेवानिव भवतीत्यर्थः ॥ यथोक्तबुध्यवभासकत्वमुक्तं हेतुमनू

अवभासयन् १

बुद्धिधर्माणामात्मन्यौपाधिकत्वेन मिथ्यात्वमुक्त्वा प्राणधर्माणामपि तत्र तथात्वं कथयति॥ तथेति॥ आत्मनि चलनस्यौपाधिकत्वं साधयति॥ तेष्विति॥ इवशब्द सामर्थ्यसिद्धमर्थमाह॥ नत्विति॥ सहीत्याद्यनंतरवाक्यमाकांक्षाद्वारोत्थापयति॥ कथमित्यादिना॥ तच्छब्दो बुद्धिविषयः॥ संचरणादीत्यादिशब्दो ध्यानादि

तथा लेलायतीवात्यर्थं चलतीव तेष्वेव करणेषु बुद्ध्यादिषु वायुषु च चलत्सु तदवभासकत्वात्तत्सदृशं तदिति लेलायतीव न तु परमार्थतश्चलन धर्मकं तदात्मज्योतिः कथं पुनरेतदवगम्यते तत्समानत्वभ्रांतिरेवोभयलोकसंचरणादिहेतुर्न स्वत इत्यस्यार्थस्य प्रदर्शनाय हेतुरुपदिश्यते स आ त्मा हि यस्मात्स्वप्नो भूत्वा स यया धिया समानः सा धीर्यद्यद्भवति तत्तदेवासावपि भवतीव॥ तस्माद्यदासौ स्वप्नो भवति स्वापवृत्तिं प्रतिपद्यते धीस्तदा सोऽपि स्वप्नवृत्तिं प्रतिपद्यते यदा धीर्जिजागरिषति तदासावप्यत आह स्वप्नो भूत्वा स्वप्नवृत्तिमवभासयन्धियः स्वापवृत्त्याकारो भूत्वा इमं लोकं जागरि

स हि स्वप्नो भूत्वेमं लोकमतिक्रामति मृत्यो रूपाणि॥१८॥

तव्यवहारलक्षणं कार्यकरणसंघातात्मकं लौकिकशास्त्रीयव्यवहारास्पदमतिक्रामत्यतीत्य क्रामति विविक्तेन स्वेनात्मज्योतिषा स्वप्नात्मि कां धीवृत्तिमवभासयन्नवतिष्ठते यस्मात्तस्मात्स्वयंज्योतिःस्वभावत एवासौ विशुद्धः सन्कर्त्तृक्रियाकारकफलशून्यः परमार्थतो धीसादृश्य मेव तूभयलोकसंचारादिसंव्यवहारभ्रांतिहेतुर्मृत्यो रूपाणि मृत्युः कर्माविद्यादिर्न तस्यान्यद्रूपं स्वतः कार्यकरणान्येवास्य रूपाण्यतस्तानि मृत्यो रूपाण्यतिक्रामति क्रियाफलाश्रयाणि॥

व्यापारसंग्रहार्थः॥ स्वप्नो भूत्वा लोकमतिक्रामतीति संबंधः॥ कथमात्मा स्वप्नो भवतीति तत्राह॥ स ययेति॥ उक्तेऽर्थे वा क्यमवतार्य व्याकरोति॥ आहेति॥ उक्तं हेतुमनूद्य फलितमाह॥ यस्मादित्यादिना॥ कार्यकरणातीतत्वात्स्वस्यात्मनो न स्वतः संचारित्वमित्यत आह॥ मृत्योरिति॥

सो१

रूपाण्यतिक्रामतीति पूर्वेण संबंधः॥

क्रियास्तत्फलानि चाश्रयो येषां यानि वा क्रियाणां तत्फलानां चाश्रयस्तानीति यावत्॥ बुध्यवभासकं ज्योतिरात्मेत्युक्तंतत्राशाक्यः शंकते॥ नन्विति॥ प्रमाणादति
रिक्तात्मोपलब्धिरित्याशंक्य प्रत्यक्षमनुमानं वेति प्रमाणद्वैविध्यनियममभिप्रेत्य ताभ्यामतिरिक्तात्मानुपलंभान्नासावस्तीत्याह॥ धीव्यतिरेकेणेति॥ तत्र दृ
ष्टांतमाह॥ यथेति॥ घटादिरालोकश्चेत्युभयोर्मिथः संसृष्टयोर्विवेकेनानुपलंभवदवभास्यावभासकयोर्बुध्यात्मनोर्भेदेपि पृथगनुपलंभादैक्यमवभास
ते॥ वस्तुतस्तु तयोरन्यत्वमेवेति शंकामनुवदति यत्त्विति॥ वैषम्यप्रदर्शनेनोत्तरमाह॥ तत्रेति॥ दृष्टांतः सप्तम्यर्थः॥ घटादेरन्यत्वेनेति संबंधः॥ ज्योतिरंतरं ना

ननु नास्त्येव धिया समानमन्यद्धियोऽवभासकमात्मज्योतिर्धीव्यतिरेकेण प्रत्यक्षेण वाऽनुमानेन वानुपलंभाद्यथान्यात्तत्काल एव हि तौ या
धीर्यत्त्ववभास्यावभासकयोरन्यत्वेपि विवेकानुपलंभात्सादृश्यमिति घटाद्यालोकयोस्तत्र भवत्वन्यत्वेनालोकस्योपलंभाद्घटादेः संश्लिष्टयोः
सादृश्यं भिन्नयोरेव॥ न च तथेह घटादेरिव धियोऽवभासकं ज्योतिरंतरं प्रत्यक्षेण वाऽनुमानेन वोपलभामहे धीरेव हि चित्स्वरूपावभासकत्वेन सा
कारा विषयाकारा च तस्मान्नानुमानतो नापि प्रत्यक्षतो धियोऽवभासकं ज्योतिः शक्यते प्रतिपादयितुं व्यतिरिक्तं यदपि दृष्टांतरूपमभिहितं अ
वभास्यावभासकयोर्भिन्नयोरेव घटाद्यालोकयोः संयुक्तयोः सादृश्यमिति तत्राप्यभ्युपगममात्रमस्माभिरुक्तं न तु तत्र घटाद्यवभास्यावभास
कौ भिन्नौ परमार्थतस्तु घटादिरेवावभासात्मकः सालोकोऽन्योन्यो हि घटादिरुत्पद्यते॥ विज्ञानमात्रमेव सालोकघटादिविषयाकारमवभासते

स्ति चेत्कुतो ग्राह्यग्राहकसंवित्तिरित्याशंक्याह॥ धीरेवेति॥ बाह्यार्थवादिनोः सौत्रांतिकवैभाषिकयोरभिप्रायमुपसंहरति॥ तस्मान्नेति॥ इदानीं विज्ञानवादि बाह्या
र्थवादिभ्यामभ्युपगतं दृष्टांतमनुवदति॥ यदपीति॥ बाह्यार्थवादप्रक्रिया न सुगताभिप्रेतेति दूषयति॥ तत्रेति॥ उभयदृष्टांतस्वरूपं सप्तम्यर्थः॥ ननु घटादेरवभा
स्यादालोकोऽवभासको भिन्नो लक्ष्यते नेत्याह॥ परमार्थतस्त्विति॥ तस्य स्थायित्वं व्यावर्तयति॥ अन्योन्य इति॥ प्रतीतं विषयप्राधान्यं व्यावर्त्तयन्नुक्तमेव व्यनक्ति॥ विज्ञा

विज्ञानवादे यथोक्तदृष्टांतराहित्यं फलतीत्याह॥ यदेति॥ शिष्यबुध्यनुसारेण त्रिविधं बुद्ध्यभिप्रायमुपसंहरति॥ एवमित्यादिना॥ परिकल्प्येत्यंतेन बाह्यार्थवाद
मुपसंहृत्य तस्यैवेत्यादिना विज्ञानवादमुपसंजहार॥ तत्र विज्ञानवादोपसंहारं विवृणोति तदा ह्येति॥ शून्यवादिमतमाह॥ तस्यापीति॥ तदेव स्फुटयति॥ तदपी
ति॥ पक्षत्रयेपि दोषं संभावयति॥ सर्वाइति॥ कथममूषां कल्पनानां दूषणमित्याशंक्य प्रथमं बाह्यार्थवादिनं प्रत्याह॥ तत्रेति॥ निर्धारणे सप्तमी॥ यत्तु धीरेवाव

यदैवं तदा न बाह्योदृष्टांतोस्ति विज्ञानस्य लक्षणमात्रत्वात्सर्वस्य एवं तस्यैव विज्ञानस्य ग्राह्यग्राहकाकारतामलं परिकल्प्य तस्यैव पुनर्विशुद्धिं
परिकल्पयंति॥ तद्ग्राह्यग्राहकविनिर्मुक्तं विज्ञानं स्वच्छीभूतं क्षणिकं व्यवतिष्ठत इति केचित्॥ तस्यापि शांतिं केचिदिच्छंति अन्ये तदपि विज्ञानं
संवृतं ग्राह्यग्राहकांशविनिर्मुक्तं शून्यमेव घटादिबाह्यवस्तुवदित्यपरे माध्यमिका आचक्षते सर्वा एताः कल्पना बुद्धिविज्ञानावभासकस्य व्यति
रिक्तस्यात्मज्योतिषोऽपन्हवाद्स्यश्रेयोमार्गस्य प्रतिपक्षभूताः वैदिकस्य तत्र येषां बाह्योर्थोस्ति तांस्त्वत्युच्यते न तावत्स्वात्मानवभासकत्वाद्घटा
देस्तमस्यवस्थितो घटादिस्तावन्नकदाचिदपि स्वात्मनावभासते प्रदीपाद्यालोकसंयोगेन तु नियमेनैवावभास्यमानो दृष्टः॥ सालोको घट इति
संश्लिष्टयोरपि घटालोकयोरन्यत्वमेव पुनः पुनः संश्लेषे विश्लेषे च विशेषदर्शनाद्रज्जुघटयोरिव अन्यत्वे च व्यतिरिक्तावभासकत्वं न स्वात्मनैव
स्वमात्मानमवभासयति॥ ननु प्रदीपः स्वात्मानमेवभासयन्दृष्ट इति भासकत्वेन स्वाकारे तित्राह॥ नेति॥ यदवभास्यं तत्स्वातिरिक्तावभास्यं अवभास्यत्वा
द्यथा घटादि अवभास्या चेयं बुद्धिरित्यनुमानाद्बुध्यतिरिक्तः साक्षी सिध्यतीत्यर्थः॥ दृष्टांतं साधयति॥ तमसीति॥ तस्यावभासकापेक्षां दर्शयितुं विशेषणं॥ सालो
को घट इति॥ संश्लेषावगमान्नास्ति घटस्य व्यतिरिक्तावभास्यमित्याशंक्याह॥ संश्लिष्टयोरपीति॥ भवत्वन्यत्वं किं तावतेत्याशंक्याह॥ अन्यत्वे चेति॥ व्यति
रिक्तावभासकत्वं तादृशावभासकसाहित्यमिति यावत्॥ अवभासयति घटादिरिति शेषः॥ दृष्टांतस्य साध्यविकलत्वे परिहृते व्यभिचारमाशंकते॥ नन्वि

वृ°

बृ·र·
२०

तदेवव्यतिरेकमुखेनाह॥नहीति॥अनैकांतिकत्वंनिगमयति॥तस्मादिति॥प्रदीपस्यपक्षतुल्यत्वान्नव्यभिचारोस्तीतिपरिहरति॥नावभास्यत्वेति॥अथान्या
वभासकत्वात्तस्यनान्यावभास्यत्वमितिचेत्तत्राह॥यद्यपीति॥अवभास्यत्वहेतोरव्यभिचारेफलितमाह॥यदाचेति॥व्यतिरिक्तावभासत्वंबुद्धेरितिशेषः॥अ
वभास्यत्वेसत्यपिप्रदीपेस्वातिरिक्तेनैवावभास्यत्वमितिनियमासिद्धेर्व्यभिचारतादवस्थ्यमितिशंकते॥नन्विति॥यदिप्रदीपस्यस्वावभासनात्पूर्वमसन्वि
शेषःसमनंतरकालेस्यात्तदास्वात्मानंभासयतीतिवक्तुंयुक्तंनचसोस्तीतिदूषयति॥नेत्यादिना॥तदेवविवृणोति॥यथेति॥अवभास्यत्वाविशेषादित्यर्थः॥

नहिघटादिवत्प्रदीपदर्शनायप्रकाशांतरमुपादद्दतेलौकिकास्तस्मात्प्रदीपःस्वात्मानंप्रकाशयतिनावभास्यत्वाविशेषाद्यद्यपिप्रदीपोन्यस्याव
भासकःस्वयमवभासात्मकत्वात्तथापिव्यतिरिक्तचैतन्यावभास्यत्वंनव्यभिचरतिघटादिवदेवयदाचैवंतदाव्यतिरिक्तावभास्यत्वंतावदवश्यंभा
विननुयथाघटश्चैतन्यावभास्यत्वेपिव्यतिरिक्तमालोकांतरमपेक्षतेनत्वेवंप्रदीपोन्यदालोकांतरमपेक्षतेतस्मात्प्रदीपोन्यावभास्योपि
सन्नात्मानंघटंचावभासयतिनस्वतःपरतोवाविशेषाभावाद्यथाचैतन्यावभास्यत्वंघटस्यतथाप्रदीपस्यापिचैतन्यावभास्यत्वमविशिष्टं
॥यत्तूच्यतेप्रदीपआत्मानंघटंचावभासयतीतितदसत्॥कस्माद्यस्मादात्मानंनावभासयतितदाकीदृशःस्यान्नहितदाप्रदीपस्यस्वतोवा
परतोवाविशेषःकश्चिदुपलभ्यतेसह्यवभास्योभवतियस्यावभासकसन्निधावसन्निधौचविशेषउपलभ्यतेनहिप्रदीपस्यस्वात्मसन्निधि
रसन्निधिर्वाशक्यःकल्पयितुं॥असतिचकादाचित्केविशेषेआत्मानंप्रदीपःप्रकाशयतीतिमृषैवोच्यते॥ प्रदीपेपरोक्तंविशेषमनुभाष्यदूषयति॥
यत्त्वित्यादिना॥यदादीपोनस्वात्मानंभासयतितदाऽनवभासमानःस्यादित्याशंक्याह॥नहीति॥विशेषाभावेपिदीपस्यस्वेनैवावभास्यत्वंकिंनस्यादितिचे
त्तत्राह॥सहीति॥प्रदीपस्यविशेषांतराभावेपिस्वात्मसन्निध्यसंनिधीविशेषावित्याशंक्याह॥नहीति॥दीपस्यस्वेनान्येनवातस्मिन्निशेषाभावेफलितमा

अ·
६

॥शा॰भा॰टी॰
राम·
२०

व्यभिचारनिरासपूर्वकं भास्यत्वानुमानमुपपाद्यानुमानांतरमाह॥ चैतन्येति॥ यद्व्यंजकं तत्स्वविजातीयव्यंग्यं सूर्यादिव्यंजकं च विज्ञानं तस्माद्विज्ञानव्यतिरि
क्तश्चिदात्मा सिध्यतीत्यर्थः॥ प्रदीपस्य न स्वावभास्यत्वं किंतु विजातीयचैतन्यावभास्यत्वमिति स्थिते फलितमाह॥ तस्मादिति॥ यद्ग्राह्यं तद्ग्राहकांतरग्रा
ह्यं यथा दीपो ग्राह्यं चेदं विज्ञानमित्यनुमानांतरमाह॥ चैतन्येति॥ तथापि कथं तद्दिष्टग्राहकसिद्धिरित्याशंक्य विमृशति॥ चैतन्यग्राह्यत्वे चेति॥ कथं तर्हि
निर्णयस्तत्राह॥ इति संदिह्यमान इति॥ अस्तु लोकानुसारी निश्चयो लोकस्तु कथमित्याशंक्याह॥ तथा चेति॥ तथापि कुतो विवक्षितात्मज्योतिस्तत्राह॥

चैतन्यग्राह्यत्वं च घटादिभिरविशिष्टं प्रदीपस्य॥ तस्माद्विज्ञानस्यात्मग्राह्यग्राहकत्वे ॥ न प्रदीपो दृष्टांतः॥ चैतन्यग्राह्यत्वं च विज्ञानस्य बाह्य
विषयैरविशिष्टं चैतन्यग्राह्यत्वे च विज्ञानस्य किं ग्राह्यविज्ञानग्राह्यत्वैव किंवा ग्राहकविज्ञानं ग्राह्यतेति संदिह्यमाने वस्तुनि यथान्यत्र दृष्टो
न्यायः कल्पयितुं युक्तो न तु दृष्टविपरीतः तथा च सति यथा व्यतिरिक्तेनैव ग्राहकेण बाह्यानां प्रदीपानां ग्राह्यत्वं दृष्टं तथा विज्ञानस्यापि चैतन्यग्रा
ह्यत्वात्स्वकाशकत्वे सत्यपि प्रदीपवद्व्यतिरिक्तचैतन्यग्राह्यत्वं युक्तं कल्पयितुं न तत्त्वनन्यग्राह्यत्वं यश्चान्यो विज्ञानस्य ग्रहीता स आत्मा ज्योतिरंत
रं विज्ञानात्तदानवस्थेति चेन्न ग्राह्यत्वमात्रं हि तद्ग्राहकस्य वस्त्वंतरत्वे लिंगमुक्तं न्यायतः॥ न त्वेकांततो ग्राहकत्वे तद्ग्राहकांतरास्तित्वे वा कदाचि
दपि लिंगं संभवति तस्मान्न तदनवस्थाप्रसंगः

यश्चेति॥ विज्ञानस्य ग्राहकांतरग्राह्यत्वे तस्यापि ग्राहकांतरापेक्षायामनवस्थाप्रसक्तिरिति शंकते॥ त
दानवस्थेति चेदिति॥ कूटस्थबोधस्य विज्ञानसाक्षिणः विषयत्वान्नानवस्थेति परिहरति॥ नेति॥ यद्ग्राह्यं तत्स्वातिरिक्तग्राह्यं यथा घटादीति ग्राह्यत्वमात्रं बुद्धि
ग्राहकस्य ततो वस्त्वंतरत्वे प्रदीपस्य स्वानवभास्यत्वन्यायेन लिंगमुक्तं॥ न च बुद्धिसाक्षिणो ग्राह्यत्वमस्ति कूटस्थदृष्टिस्वाभाव्यात्तत्कुतोऽनवस्थेति उपपादयति॥ ग्रा
ह्यत्वमात्रं हीति॥ साक्षी स्वातिरिक्तग्राह्यो ग्राहकत्वाद्बुद्धिवदित्याशंक्याह॥ न त्विति॥ ग्राहकत्वं हि ग्रहणकर्तृत्वं वा तत्साक्षित्वं वा आद्ये बुद्धिसाक्षिणो मुख्यत्वस्याग्रह

वृ.र.
२१

द्वितीयेतस्यग्राहकांतरास्तित्वेनकदाचिदपिप्रमाणमस्तितत्कुतोनवस्थेत्यर्थः॥ग्राहकानवस्थांपरिहृत्यकरणानवस्थामाशंकते॥विज्ञानस्येति॥तस्यग्राह्य
त्वेचक्षुरादिस्थानीयेनकरणेनभवितव्यंतस्यापिग्राह्यत्वेन्यत्करणमित्यनवस्थांदूषयति॥ननियमाभावादिति॥नियमाभावंसाधयति॥नहीत्यादिना॥वैचित्र्य
दर्शनमाकांक्षापूर्वकंस्फुटयति॥कथमित्यादिना॥उभयव्यतिरेकंदर्शयति॥नहीति॥तथापिकथंवैचित्र्यंतत्राह॥घटवदिति॥नियमाभावमुपसंहरति॥तस्मा

विज्ञानस्यव्यतिरिक्तग्राह्यत्वेकरणांतरापेक्षायामनवस्थेतिचेन्ननियमाभावान्नहिसर्वत्रायंनियमोभवतियत्रवस्त्वंतरेणगृह्यतेवस्त्वंतरंतत्र
ग्राह्यग्राहकव्यतिरिक्तंकरणांतरंस्यादिति नैकांतेननियंतुंशक्यतेवैचित्र्यदर्शनात्कथंघटस्तावत्स्वात्मव्यतिरिक्तेनात्मनागृह्यतेतत्रप्रदीपादि
रालोकोग्राह्यग्राहकव्यतिरिक्तंकरणंनहिप्रदीपाद्यालोकोघटांशश्चक्षुरंशोवाघटवच्चक्षुर्ग्राह्यत्वेपिप्रदीपस्यचक्षुःप्रदीपव्यतिरेकेणन
बाह्यमालोकस्यानीयंकिंचित्करणांतरमपेक्षतेतस्मान्नैवनियंतुंशक्यतेयत्रयत्रव्यतिरिक्तग्राह्यत्वंतत्रतत्रकरणांतरंस्यादेवेतितस्माद्वि
ज्ञानस्यव्यतिरिक्तग्राहकग्राह्यत्वेनकरणद्वारानवस्थानापिग्राहकद्वाराकदाचिदप्युपपादयितुंशक्यतेतस्मात्सिद्धंविज्ञानव्यतिरि
क्तंआत्मज्योतिरंतरमिति॥ननुनास्त्येवबाह्योर्थोघटादिःप्रदीपोवाविज्ञानव्यतिरिक्तोयद्धियद्व्यतिरेकेणनोपलभ्यतेतत्तावन्मात्रंव
स्तुदृष्टंयथास्वप्नविज्ञानग्राह्यंघटपटादिवस्तुस्वप्नविज्ञानव्यतिरेकेणानुपलंभात्स्वप्नघटप्रदीपादेःस्वप्नविज्ञानमात्रत्वावगम्यतेतथा
जागरितेपिघटप्रदीपादेर्जाग्रद्विज्ञानव्यतिरेकेणानुपलंभाज्जाग्रद्विज्ञानमात्रत्वेनैवयुक्ताभवितुंतस्मान्नास्तिबाह्योर्थोघटप्रदीपादिर्विज्ञान

दिति॥अवस्थाद्वयनिराकरणंनिगमयति॥तस्माद्विज्ञानस्येति॥बाह्यार्थवादिमतनिराकरणमुपसंहरति॥तस्मात्सिद्धमिति॥बाह्यार्थवादिनिध्वस्तेविज्ञा
नवादीचोदयति॥नन्विति॥बाह्यार्थोविज्ञानातिरिक्तोनास्तीत्यत्रप्रमाणमाह॥यद्धीति॥नोपलभ्यतेचजाग्रद्वस्तुजाग्रद्विज्ञानव्यतिरेकेणेतिशेषः॥दृष्टांतस

अ:

रामः
२१

उक्तमनुमानमुपसंहरति॥तस्मादिति॥सर्वं विज्ञानमात्रमिति स्थिते फलितमाह॥तत्रेति॥किमिति तस्य मिथ्यात्वं तत्राह॥सर्वस्येति॥बाह्यार्थापलापवा
दिनं दूषयति॥नेत्यादिना॥हेतुं विशदयति॥नत्विति॥विज्ञानमात्रवादित्वादेकांतेन बाह्यार्थानभ्युपगतिरिति शंकते॥नन्विति॥बाह्यार्थं हठादंगीकार
यति॥नेत्यादिना॥अन्वयमुखेनोक्तमर्थं व्यतिरेकमुखेन विशदयति॥विज्ञानादिति॥ज्ञानज्ञेययोरैक्ये दोषांतरमाह॥तथेति॥अनर्थकं शास्त्रमुपदिश
तो बुद्धस्य सर्वज्ञत्वं नस्यादित्याह॥तत्कर्त्तुरिति॥वाशब्दश्चार्थः॥इतश्च सर्वस्य नास्ति विज्ञानमात्रत्वमित्याह॥किंचान्यदिति॥न केवलं पूर्वोक्तोपपत्ति व

त्त्रयदुक्तं विज्ञानस्य व्यतिरिक्तावभासत्वाद्विज्ञानव्यतिरिक्तमस्ति ज्योतिरंतरं घटादेरिवेति तन्मिथ्या सर्वस्य विज्ञानमात्रत्वे दृष्टांताभावा
न्न यावत्तावदभ्युपगमान्न तु बाह्यार्थो भवतैकांतेनैव नाभ्युपगम्यते न नुमया नाभ्युपगम्यत एव न विज्ञानं घटः प्रदीप इति च शब्दार्थश्च
त्वाद्यावत्तावदपि बाह्यमर्थांतरमवश्यमभ्युपगंतव्यं विज्ञानादर्थांतरं वस्तु न चेदभ्युपगम्यते विज्ञानं घटः पट इत्येवमादीनां शब्दानामे
कार्थत्वे पर्यायशब्दत्वं प्राप्नोति॥तथा साधनानां फलस्य चैकत्वे साध्यसाधनभेदोपदेशशास्त्रानर्थक्यप्रसंगस्तत्कर्त्तुरज्ञानप्रसंगो वा किंचा
न्यद्विज्ञानव्यतिरेकेण वादिप्रतिवादिवाददोषाभ्युपगमात्॥नह्यात्मविज्ञानमात्रमेव वादिप्रतिवादिवादस्तद्दोषो वाभ्युपगम्यते निराक
र्तव्यत्वात्प्रतिवाद्यादीनां नह्यात्मीयं विज्ञानं निराकर्त्तव्यमभ्युपगम्यते स्वयं वात्मा कस्यचित्॥तथा च सति सर्वसंव्यवहारलोपप्रसंगो न च

शादेव बाह्यार्थोऽभ्युपेयः किंतु तत्रैवान्यदपि कारणमुच्यत इति॥तदेव स्फुटयति॥विज्ञानेति॥यद्ग्राह्यं तत्स्वव्यतिरिक्तग्राह्यं यथा प्रतिवाद्यादिज्ञानग्रह स्तु चेदं
ग्राह्यमिति अनुमानान्न बाह्यार्थापलापसिद्धिरित्यर्थः॥दृष्टांते विप्रतिपत्तिं प्रत्याह॥नहीति॥निराकर्त्तव्यत्वेपि तेषां ज्ञानमात्रत्वं किं नस्यादित्याशंक्यात्मीयज्ञान
त्वमात्मज्ञानत्वं वा तेषामिति विकल्प्य क्रमेण दूषयति॥नहीत्यादिना॥स्वकीयनिषेधे स्वनिषेधे चानिष्टापत्तिमाचष्टे॥तथा चेति॥तदंगीकारालोचनायामपि प्रतिवा

ग्राह्यं नानाविज्ञानातिरिक्तं [illegible] सत्त्यादित्याह॥टि

मैत्रः संतानवान् संतानवद्व्यवहारत्वात् चैत्रवत् =२ नीलपीतादिकं विज्ञानव्यतिरिक्तं विज्ञानविषयत्वान्मैत्रसंतानवत् =२

अन्यथा विवादाभावापातादिति भावः॥ कथं तर्हि तेषामंगीकारस्तत्राह॥ व्यतिरिक्तेति॥ सिद्धे दृष्टांते फलितमनुमानं निगमयति॥ तस्मादिति॥ किंच॥ चैत्र संतानेन मैत्रसंतानां व्यवहारादनुमीयते सर्वज्ञज्ञानेन चासर्वज्ञज्ञानानि ज्ञायंते तत्र भेदस्यते पि सिद्धे स्तद्दृष्टांतान्नीलादेस्तद्धियश्च भेदः शक्योनुमातुमित्याह॥ संतत्यंतरवदिति॥ इति न बाह्यार्थापलापसिद्धिरिति शेषः॥ तदपलापासंभवे फलितमाह॥ तस्मादिति॥ विज्ञानार्थभेदोक्त्या प्रत्यगात्मा विज्ञानातिरिक्त उक्तः॥ संप्रतिद्विमतं ज्ञानाभिन्नं ग्राह्यत्वात्स्वप्नग्राह्यवदित्युक्तमनुवदति॥ स्वप्नइति॥ अयुक्तं विज्ञानातिरिक्तत्वमर्थस्येति शेषः॥ दृष्टांतस्य साध्यविकलतामभिप्रे

प्रतिवाद्यादयः स्वात्मनैव गृह्यंते इत्यभ्युपगमो व्यतिरिक्तग्राह्या हि ते अभ्युपगम्यंते तस्मात्तद्वत्सर्वमेव व्यतिरिक्तग्राह्यं वस्तु॥ जाग्रद्विषयत्वा ज्जाग्रद्वस्तु प्रतिवाद्यादिवदिति सुलभो दृष्टांतः संतत्यंतरवद्विज्ञानांतरवच्चेति॥ तस्माद्विज्ञानवादिनापि न शक्यं विज्ञानव्यतिरिक्तं ज्योतिरं तरं निराकर्तुं स्वप्ने विज्ञानव्यतिरेकाभावाद्युक्तमिति चेन्नाभावादपि भावस्य वस्त्वंतरत्वोपपत्तेः॥ भवतैव तावत्स्वप्ने घटादिविज्ञानस्य भावभू तत्वमभ्युपगतं तदभ्युपगम्य तद्व्यतिरेकेण घटाद्यभाव उच्यते स विज्ञानविषयो घटादिर्यद्यभावो यदि वा भावः स्यादुभयथापि घटादिविज्ञानस्य भावभूतत्वमभ्युपगतमेव न तु तन्निवर्तयितुं शक्यते तन्निवर्तकन्यायाभावादेतेन सर्वस्य शून्यताप्रत्युक्ता प्रत्यगात्मग्राह्यता चात्मनोहमिति मीमांसकप स्रः प्रत्युक्तः यत्तूक्तं सालोकोन्यश्चान्यश्च घटो जायत इति॥ सपरिहरति॥ नाभावादपीति॥ संग्रहवाक्यं विवृणोति॥ भवतैवेति॥ बाह्यार्थवादिभ्यो विशेष

माह॥ तदभ्युपगम्येति॥ तथापि कथं दृष्टांतस्य साध्यविकलतेत्याशंक्याह॥ स इति॥ घटादिविज्ञानस्य भावभूतस्याभ्युपगतस्य घटादेर्भावादभावाद्वा विषयादर्था नरत्वाद्यस्य कस्यचिद्बाह्यार्थस्योपगमाद्दृष्टांतस्य साध्यविकलतासुप्रसिद्धेत्यर्थः॥ माध्यमिकमतमतिदेशेन निराकरोति॥ एतेनेति॥ ज्ञानज्ञेययोर्निराकर्तुमश क्यत्ववचनेनेति यावत्॥ आत्मनो ग्राह्यस्याहमिति प्रत्यगात्मनैव ग्राह्यते ति मीमांसकमतमपि प्रत्युक्तमेकस्यैव ग्राह्यग्राहकतायानिरस्तत्वादित्याह॥ प्रत्यगात्मेति॥

क्षणभंगवादिनोक्तमनूद्यप्रत्यभिज्ञाविरोधेननिराकरोति॥ यत्तूक्तमित्यादिना॥ स्वपक्षेपिप्रत्यभिज्ञोपपत्तिंशाक्यः शंक्यते॥ सादृश्यादिति॥ दृष्टांतंविघट
यन्नुत्तरमाह॥ नतत्रापीति॥ तथापिकथंतत्रप्रत्यभिज्ञेत्याशंक्याह॥ जातीति॥ तन्निमित्तातेषुप्रत्यभिज्ञेतिशेषः॥ तदेवप्रपंचयति॥ कृत्तेष्विति॥ अभ्रां
तइतिछेदः॥ किमितिजातिनिमित्तैषाधीर्व्यक्तिनिमित्ताकिंनस्यादतआह॥ नहीति॥ ननुसादृश्यवशाद्व्यक्तिमेवविषयीकृत्यप्रत्यभिज्ञानंकेशादिषुकिं

तदसत्क्षणांतरेपिसएवायंघटइतिप्रत्यभिज्ञानात्सादृश्यात्प्रत्यभिज्ञानंकृत्तोत्थितकेशनखादिष्विवेतिचेन्न तत्रापिक्षणिकत्वस्यासिद्धत्वा
ज्जात्येकत्वाच्च कृत्तेषुपुनरुत्थितेषुचकेशनखादिषुकेशत्वनखत्वजातेरेकत्वात्केशनखप्रत्ययस्तन्निमित्तोऽभ्रांतएवनहिदृश्यमानत्व
नोत्थितकेशनखादिषुव्यक्तिनिमित्तस्सएवेतिप्रत्ययोभवति॥ कस्यचिद्दीर्घकालव्यवहितेषुदृष्टेषुतुल्यपरिमाणेषुतत्कालीनबालादिषुतुल्या
इमेकेशनखाद्याइतिप्रत्ययोभवतिनतुतएवेतिघटादिषुपुनर्भवतिसएवेतिप्रत्ययस्तस्मान्नसमोदृष्टांतः॥ प्रत्यक्षेणहिप्रत्यभिज्ञायमानेवस्तुनित
देवेतिनचान्यत्वमनुमातुंयुक्तंप्रत्यक्षविरोधेलिंगस्याभासत्वोपपत्तेः सादृश्यप्रत्ययानुपपत्तेश्च ज्ञानस्यक्षणिकत्वादेकस्यहिवस्तुदर्शिनोवस्त्वंतर
दर्शनेसादृश्यप्रत्ययःस्यात् नतुवस्तुदर्श्येकोवस्त्वंतरदर्शनायक्षणांतरमवतिष्ठतेविज्ञानस्यक्षणिकत्वात्सकृद्वस्तुदर्शनेनैवक्षयोपपत्तेः
तेनेदंसदृशमितिहिसादृश्यप्रत्ययोभवतितेनेतिदृष्टस्मरणमिदमितिवर्त्तमानप्रत्ययस्तेनेतिदृष्टंस्मृत्वायावदिदमितिवर्तमान —
क्षणकालमवतिष्ठेततततःक्षणवादहानिरथतेनेत्येवोपक्षीणःस्मार्तप्रत्ययइदमितिचान्यएववार्तमानिकःप्रत्ययःक्षीयतेततःसादृश्यप्रत्य
यानुपपत्तिस्तेनेदंसदृशमितिअनेकदर्शिनः॥ नस्यात्तत्राह॥ कस्यचिदिति॥ अभ्रांतस्येतियावत्॥ दार्ष्टांतिकेवैषम्यमाह॥ घटादिष्विति॥ वैषम्यमु
पसंहरति॥ तस्मादिति॥ तत्तत्तत्क्षणिकंयथाप्रदीपादिसंतश्चामीभावाइत्यनुमानविरोधाद्दृष्टांतंप्रत्यभिज्ञानमित्याशंक्याह॥ प्रत्यक्षेणेति॥ अनुक्षतानुमा

नचप्रत्यक्षविरोधेक्षणिकत्वानुमानंनोदेत्यबाधितविषयत्वस्याप्यनुमित्यंगत्वादितिभावः॥

ब॰स॰
२३

इतश्च प्रत्यभिज्ञानं सादृश्यनिबंधनो भ्रमो न भवतीत्याह॥ सादृश्येति॥ तदनुपपत्तौ हेतुमाह॥ ज्ञानस्येति॥ तस्य क्षणिकत्वेपि किमिति सादृश्यप्रत्ययो
न सिध्यतीत्याशंक्याह॥ एकस्येति॥ अस्तु तर्हि वस्तुद्वयदर्शित्वमेकस्येति चेन्नेत्याह॥ न त्विति॥ उक्तमेवार्थं प्रपंचयति॥ तेनेत्यादिना॥ भवतु किं तावते
ति तत्राह॥ तेनेति॥ दृष्टमिति अवतिष्ठेत यदीति शेषः॥ क्षणिकत्वहानिपरिहारं शंकित्वा परिहरति॥ अथेत्यादिना॥ तत्र हेतुमाह॥ अनेकेति॥ परपक्षे दो
षांतरमाह॥ व्यपदेशेति॥ तदेव विवृणोति॥ इदमिति॥ व्यपदेशक्षणे अनवस्थानासिद्धिं शंकित्वा दूषयति॥ अथेत्यादिना॥ अन्योद्रष्टान्यश्च व्यपदेष्टेत्याशंक्य

एकस्याभावाद्व्यपदेशानुपपत्तिश्च द्रष्टृव्यदर्शनेनैवोपक्षयाद्धि ज्ञानस्येदं पश्यामि यदोद्राक्षमिति व्यपदेशानुपपत्तिर्दृष्टवतो व्यपदेशक्षणानव
स्थानाद्यावतिष्ठेत क्षणवादहानिर्यादृष्टवतो व्यपदेशः सादृश्यप्रत्ययश्च तदानीं जात्यंधस्येव रूपविशेषव्यपदेशस्तत्सादृश्यप्रत्ययश्च स
र्वमंधपरंपरेति प्रसज्येत सर्वज्ञशास्त्रप्रणयनादि न चैतदिष्यते कृताभ्यागमकृतविप्रणाशदोषौ तु प्रसिद्धतरौ क्षणवादे द्रष्टृव्यपदेशहेतुः पू
र्वोत्तरसहित एक एव शृंखलावत्प्रत्ययो जायत इति चेत्तेनेदं सदृशमिति॥ न॥ वर्तमानातीतयोर्भिन्नकालत्वात्तत्र वर्तमानप्रत्यय एकः शृंख
लावयवस्थानीयोतीतश्चापरस्तौ प्रत्ययौ भिन्नकालौ तदेतदुभयप्रत्ययविषयस्त्वेकः शृंखलाप्रत्ययस्ततः क्षणद्वयव्यापित्वादेकस्य विज्ञानस्य
पुनः क्षणवादहानिर्ममतवतादिविशेषानुपपत्तेश्च सर्वसंव्यवहारलोपप्रसंगः सर्वस्य च

परिहरति॥ अथेत्यादिना॥ शास्त्रप्रणयनादीत्या
दिशब्देन शास्त्रीयं साध्यसाधनादि गृह्यते॥ क्षणिकत्वपक्षे दूषणांतरमाह॥ अकृतेति॥ व्यपदेशानुपपत्तिमुक्त्वा समादधानः शंकते॥ दृष्टेति॥ सादृश्यप्रत्यय
श्च शृंखलास्थानीयेनैव सेत्स्यतीत्याह॥ तेनेदमिति॥ अपसिद्धांतप्रसक्त्या प्रत्याचष्टे॥ नेत्यादिना॥ तावेवोभौ प्रत्ययौ विषयौ तदवगाही चेन्मध्यवर्ती शृंखलावयवस्था
नीयः प्रत्यय इति यावत्॥ क्षणानां मिथः संबंधस्तर्हि माभूदिति चेत्तत्राह॥ ममेति॥ व्यपदेशसादृश्यप्रत्ययानुपपत्तिस्तु स्थितैवेति चकारार्थः॥ यत्तु विज्ञानस्य दुःखाद्युप

अ॰
१

रामः
२३

शुद्धत्वात्तत्संसर्गद्रष्टृभावाच्च न ज्ञानस्य दुःखादिसंप्लवः॥ स्वसंवेद्यत्वांगीकारादित्यर्थः॥ ज्ञानस्य शुद्धबोधैकस्वाभाव्यमसिद्धं दाडिमादिवन्नानाविधदुःखाद्यंशबलत्वश्र
वणादित्याशंक्याह॥ नचेति॥ तत्रैव हेत्वंतरमाह॥ अनित्येति॥ तेषां तद्धर्मत्वे सत्यनुभूयमानत्वात्ततोतिरिक्तत्वं स्याद्धर्मिणां धर्मिमात्रस्वाभाव्ये मेयानां च मानादर्थांतर
त्वात्ततो यन्मेयं न तज्ज्ञानांशो यथा घटादि मेयं च दुःखादीत्यर्थः॥ ज्ञानस्य दुःखादिधर्मो न भवति किंतु स्वरूपमेवेति शंकामनुभाष्य दोषमाह॥ अथेत्यादिना॥ अनु
पपत्तिमेव प्रकटयति॥ स्वसंयोगीत्यादिना॥ स्वाभाविकस्यापि वियोगोस्ति पुष्परक्तत्वादीनां तथोपलंभादित्याशंक्याह॥ यदपीति॥ द्रव्यांतरशब्देन पुष्पसंबंधिनो

स्वसंवेद्यविज्ञानमात्रत्वे विज्ञानस्य च स्वच्छावबोधावभासमात्रस्वाभाव्याभ्युपगमात्तद्दर्शिनश्चान्यस्याभावे ऽनित्यदुःखशून्यानात्मत्वाद्यनेककल्प
नानुपपत्तिर्न च दाडिमादेरिव विरुद्धानेकांशत्वं विज्ञानस्य स्वच्छावभासस्वाभाव्याद् अनित्यदुःखादीनां विज्ञानांशत्वे च सत्यनुभूयमानत्वाद्व्यतिरिक्त
विषयत्वप्रसंगः॥ अथानित्यदुःखाद्यात्मकत्वमेव विज्ञानस्य तदा तत्तद्वियोगाद्विशुद्धिकल्पनानुपपत्तिः स्वसंयोगिमलवियोगाद्धि शुद्धिर्भवति यथा
ऽऽदर्शप्रभृतीनां॥ न तु स्वाभाविकेन धर्मेण कस्यचिद्वियोगो दृष्टो न ह्यग्नेः स्वाभाविकेन प्रकाशेनौष्ण्येन वा वियोगो दृष्टो यदपि पुष्पगुणानां रक्तत्वादी
नां द्रव्यांतरयोगेन वियोजनं दृश्यते तत्रापि संयोगपूर्वत्वमनुमीयते बीजभावनया पुष्पफलादीनां गुणांतरोत्पत्तिदर्शनादतो विज्ञानस्य विशुद्धिक
ल्पनानुपपत्तिर्निर्विषयविषय्याभासत्वं च यन्मलं परिकल्प्यते विज्ञानस्य तदप्यन्यसंसर्गाभावादनुपपन्नं न ह्य   वयवास्तद्व्रतरक्तत्वाद्यारंभका विवक्षिताः

॥ विमतं संयोगपूर्वकं विभागवत्त्वान्मेषादिवदित्यनुमानान्न स्वाभाविकस्य सति वस्तुनि नाशोस्तीत्यर्थः अनुमानानुगुणं प्रत्यक्षं दर्शयति॥ बीजेति॥ कार्पा
सादिबीजे द्रव्यविशेषसंपर्काद्रक्तादिवासनया तत्पुष्पादीनां रक्तादिगुणोदयोपलंभात्तत्संयोगिद्रव्यापगमादेव तत्पुष्पादिषु रक्तत्वाद्यपगतिरित्यर्थः॥
विशुध्यनुपपत्तिमुपसंहरति॥ अत इति॥ कल्पनांतरमनूद्य दूषयति॥ विषयविषयीति॥ कथं पुनर्ज्ञानस्यान्येन संसर्गाभावस्तस्य विषयेण संसर्गादित्याशंक्य

अथान्यसंसर्गमंतरेणापिविज्ञानस्यविषयविषय्याभासत्वंमलं स्यादितिचेत्तत्राह॥ असत्विति चेति॥ कल्पनाद्वयमप्रामाणिकमनादेयमित्युपसंहरति॥ तस्मा
दिति॥ कल्पनांतरमुत्थापयति॥ यदपीति॥ उपशांतिर्निर्वाणशब्दार्थः॥ दूषयतितत्रापीति॥ फलाभावेपिफलंस्यादितिचेन्नेत्याह॥ कंटकेति॥ दार्ष्टांतिकं विवृणो
ति॥ यस्यहीति॥ ननुत्वमतेपिवस्तुनोऽद्वयत्वात्तस्यासंगस्यकेनचिदपिसंयोगवियोगयोगात्फलित्वासंभवेमोक्षासंभवादितुल्यमित्याशंक्याह॥ यस्यपुनरिति॥ यद्यपि

विद्यमानेनविद्यमानस्यसंसर्गः स्याद्सतिचान्यसंसर्गेयोधर्मोयस्यदृष्टः सतत्स्वभावत्वान्नतेनवियोगमर्हतियथाग्नेरौष्ण्यंसवितुर्वाप्रभा॥ तस्माद
न्यसंसर्गेणमलिनत्वंतद्विशुद्धिश्चविज्ञानस्येतीयंकल्पनांधपरंपरेवप्रमाणशून्यैस्त्वयावगम्यतेयदपितस्यविज्ञानस्यनिर्वाणंपुरुषार्थंकल्पयंतितत्रा
पिफलाश्रयानुपपत्तिः कंटकविद्धस्यहिकंटकवेधजनितदुःखनिवृत्तिः फलंनतुकंटकविद्धमरणेतद्दुःखनिवृत्तिफलस्याश्रयउपपद्यतेतद्वत्स
र्वनिर्वाणेऽसतिचफलाश्रयेपुरुषार्थकल्पनाव्यर्थैव॥ यस्यहिपुरुषशब्दवाच्यस्यसत्वस्यात्मनोविज्ञानस्यवार्थः परिकल्प्यतेतस्यपुनःपुरुषस्यनि
र्वाणेकस्यार्थः पुरुषार्थइतिस्याद्यस्यपुनरस्त्यनेकार्थदर्शीविज्ञानव्यतिरिक्तआत्मातस्यदृष्टस्मरणदुःखसंयोगवियोगादिसर्वमेवोपपन्नमन्यसंयो
गनिमित्तंकालुष्यंतद्वियोगनिमित्ताचविशुद्धिरितिशून्यवादिपक्षस्तुसर्वप्रमाणविप्रतिषिद्धइतितन्निराकरणायनादरः क्रियते॥ ७॥ ॥ ॥

पूर्णवस्तुवस्तुतोसंगमंगीक्रियतेतथापिक्रियाकारकफलभेदस्याविद्यमात्रकृतत्वादस्मन्मतेसर्वव्यवहारसंभवान्नसाम्यमितिभावः॥ ननुबाह्यार्थवादोविज्ञानवादश्च
निराकृतौशून्यवादोपिनिराकर्तव्योपिकस्मान्ननिराक्रियतेतत्राह॥ शून्यवादीति॥ समस्तस्यवस्तुनः सत्वेनभानान्मानानांचसर्वेषांसद्विषयत्वाच्छून्यस्यचाविषयतया
प्राप्त्यभावेननिराकरणानर्हत्वात्तद्विषयत्वेचशून्यवादिनैवविषयनिराकरणोक्त्याशून्यस्यापन्हवात्तस्यचस्फुरणास्फुरणयोः सर्वशून्यत्वायोगात्तद्वादिनश्चसत्वास
त्वयोस्तदनुपपत्तेः संवृतेश्चाश्रयाभावादसंभवात्तदाश्रयत्वेचशून्यस्यस्वरूपहानान्निराश्रयत्वेचासंवृत्तित्वान्नास्माभिस्तद्वादनिरासायादरः क्रियतेतत्सिद्धंब्रह्माद्यति

प्रसंगागतं परपक्षं निराकृत्य श्रुतिव्याख्यानमेवानुवर्तयन्नुत्तरवाक्यतात्पर्यमाह॥ यथेति॥ एवमात्मा देहभेदेपि वर्तमानं जन्मत्यज्य जन्मांतरं चोपाददानः कार्यकरणान्यतिक्रामतीति शेषः॥ अतः स्वप्नजागरितसंचाराद्देहाद्यतिरेकवदिहलोकपरलोकसंचारोक्त्यापि तदतिरेकस्तस्योच्यते ऽनंतरवाक्येनेत्यर्थः॥ संप्रत्युत्तरं वाक्यं गृहीत्वा व्याकरोति॥ स वा इत्यादिना॥ पाप्मशब्दस्य लक्षणया तत्कार्यविषयत्वं दर्शयति॥ पाप्मसमवायिभिरिति॥ पाप्मशब्दस्य पापवाचित्वेपि कार्यसाम्याद्धर्मेपि वृत्तिः स्

यथैवेहैकस्मिन्देहे स्वप्ने भूत्वा मृत्यो रूपाणि कार्यकरणान्यतिक्रम्य स्वप्ने आत्मज्योतिषास्त एवं स वै प्रकृतः पुरुषो ऽयं जायमानः कथं जायमान इत्युच्यते शरीरं देहेंद्रियसंघातमभिसंपद्यमानः शरीर आत्मभावमापद्यमान इत्यर्थः॥ पाप्मभिः पाप्मसमवायिभिर्धर्माधर्माश्रयैः कार्यकरणैरित्यर्थः॥ संसृज्यते संयुज्यते स एवोत्क्रामन्छरीरांतरमूर्ध्वं क्रामन्नुपगच्छन्म्रियमाण इत्येतस्यैव व्याख्यानमुत्क्रामन्निति तानेव संसृष्टान्पाप्मरूपान्कार्यकरणलक्ष

स वा अयं पुरुषो जायमानः शरीरमभिसंपद्यमानः पाप्मभिः सꣳसृज्यते स उत्क्रामन्म्रियमाणः पाप्मनो विजहाति॥ १९ ॥

णान्विजहाति तैर्वियुज्यते तान्परित्यजति यथायं स्वप्नजाग्रद्वृत्त्योर्वर्तमान एवैकस्मिन्देहे पाप्मरूपकार्यकरणोपादानपरित्यागाभ्यामनवरतं संचरति धियासमानः संस्तथा सोयं पुरुष उभाविहलोकपरलोकौ जन्ममरणाभ्यां कार्यकरणोपादानपरित्यागाभ्यामनवरतं प्रतिपद्यमान आ संसारमोक्षात्संचरति तस्मात्सिद्धमस्यात्मज्योतिषो ऽन्यत्वं कार्यकरणरूपेभ्यः पाप्मभ्यः चयति॥ धर्माधर्मेति॥ उक्तमर्थं दृष्टांतत्वेनानुवदति॥ यथेति॥ अवस्थाद्वयसंचारस्य लोकद्वयसंचारं दार्ष्टांतिकमाह॥ तथेति॥ इहलोकपरलोकावनवरतं संचरतीति संबंधः॥ संचरणप्रकारं प्रकटयति॥ जन्मेति॥ जन्मना कार्यकरणयोरुपादानं मरणेन च तयोस्त्यागमविच्छेदेन लभमानो मोक्षादर्वागनवरतं संचरन्दुःखी भवतीत्यर्थः॥ स वा इत्यादिवाक्यतात्पर्यमुपसंहरति॥

तच्छब्दार्थमेव स्फुटयति॥ संयोगेति॥ कथमेतावता तेभ्योन्यत्वं तत्राह॥ नहीति॥ स्वाभाविकस्य हि धर्मस्य सति स्वभावे कुतः संयोगवियोगौ वह्न्यौष्ण्यादि
ष्वदर्शनात् कार्यकरणयोश्च संयोगविभागवशात् स्वाभाविकत्वे सिद्धमात्मनस्तदन्यत्वमित्यर्थः॥ ८॥ तस्येत्यादिवाक्यस्य व्यावर्त्यां शंकामाह॥ नन्विति॥ अवस्था
द्वयवल्लोकद्वयसिद्धिरित्याशंक्याह॥ स्वप्नेति॥ कथं तर्हि लोकद्वयप्रसिद्धिरत आह॥ तस्मादिति॥ तत्रोत्तरत्वेनोत्तरवाक्यमुत्थाप्य व्याकरोति॥ उच्यत इति॥ स्था

संयोगवियोगाभ्यां न हि तद्धर्मत्वे सति तैरेव संयोगो वियोगो वा युक्तः॥ १॥ ८॥ ननु न स्तो स्थो भौ लोकौ यौ जन्ममरणाभ्यामनुक्रमेण संचरति स्वप्न
जागरिते इव स्वप्नजागरिते तु प्रत्यक्षमवगम्येते न त्विह लोकपरलोकौ केनचित् प्रमाणेन तस्मादेते एव स्वप्नजागरिते इहलोकपरलोकाविति
उच्यते तस्यैतस्य पुरुषस्य वै द्वे एव स्थाने भवतो न तृतीयं वा चतुर्थं वा के ते इदं च यत् स्थ्रतिपन्नं वर्तमानं जन्मशरीरेंद्रियविषयवेदनाविशिष्टं स्थानं

तस्य वा एतस्य पुरुषस्य द्वे एव स्थाने भवत इदं च परलोकस्थानं च संध्यं तृतीयं स्वप्नस्थानं तस्मिन्संध्ये स्थाने तिष्ठन्नेते उभे स्थाने
पश्यती

प्रत्यक्षतोनुभूयमानं परलोक एव स्थानं परलोकस्थानं तच्च शरीरादिवियोगादुत्तरकालानुभाव्यं॥ ननु स्वप्नोपि परलोकस्तथा च सति
द्वे एवेत्यवधारणमयुक्तं न कथं तर्हि संध्यं तदिहलोकपरलोकयोर्यः संधिस्तस्मिन्भवं संध्यं यत्तत्तृतीयं तत्स्वप्नस्थानं तेन स्थानद्वित्वावधारणं

नद्वय

प्रसिद्धिद्योतनार्थो वै शब्दः॥ अवधारणं विवृणोति॥ नेति॥ वेदनासुखादिलक्षणा आगमस्य॥ परलोकसाधकत्वमभिप्रेत्याह॥ न चेति॥ अवधारणमाक्षि
पति॥ नन्विति॥ तस्य स्थानांतरत्वं दूषयति॥ नेति॥ स्वप्नस्य लोकद्वयातिरिक्तस्थानत्वाभावे कथं तृतीयत्वप्रसिद्धिरित्याह॥ कथमित्यादिना॥ तस्य संध्यतान्न स्था
नांतरत्वमित्युत्तरमाह॥ संध्यं तदिति॥ संध्यत्वं व्युत्पादयति॥ इहेति॥ यत्स्वप्नस्थानं तृतीयं मन्यसे तदिहलोकपरलोकयोः संध्यमिति संबंधः॥ तस्य संध्यत्वे फलि

पमद॥ नेतिति॥

पूरणप्रत्ययश्रुत्यास्थानांतरत्वमेवस्वप्नस्यकिंनस्यादित्याशंक्यप्रथमश्रुतसंध्यशब्दविरोधान्नैवमित्याह॥नहीति॥परलोकास्तित्वेप्रमाणांतरजिज्ञासयापृ
च्छति॥कथमिति॥प्रत्यक्षंप्रमाणयन्नुत्तरमाह॥यत्तइत्यादिना॥स्वप्नप्रत्यक्षंपरलोकास्तित्वेप्रमाणमित्युक्तंतदेवोत्तरवाक्येनस्फुटयितुंपृच्छतिकथमिति॥

नहिग्रामयोःसंधिस्तावेवग्रामावपेक्ष्यतृतीयत्वपरिगणनमर्हतिकथंपुनस्तस्यपरलोकस्थानस्यास्तित्वमवगम्यतेयदपेक्ष्यस्वप्नस्थानंसंध्यं
भवेद्यतस्तस्मिन्संध्येस्वप्नस्थानेतिष्ठन्भवन्वर्तमानएतेउभेस्थानेपश्यति॥केतेउभेइदंचपरलोकस्थानंचतस्मात्स्वप्नजागरितव्यतिरेकेणोभौ
लोकौयोधियासमानःसन्ननुसंचरतिजन्ममरणसंतानप्रबंधेनकथंपुनःस्वप्नेस्थितःसन्नुभौलोकौपश्यतिकिमाश्रयःकेनविधिनेत्युच्यते॥अ
थकथंपश्यतीतिशृणु॥यथाक्रमआक्रमत्यनेनेत्याक्रमआश्रयोवष्टंभइत्यर्थोयादृशआक्रमोस्यसोयंयथाक्रमःअयंपुरुषःपरलोकस्थानेप्र

दंचपरलोकस्थानंचाथयथाक्रमोयंपरलोकस्थानेभवतितमाक्रममाक्रम्योभयान्पाप्मनआनंदांश्चपश्यति॥

तिपत्तव्येनिमित्तेयथाक्रमोभवतितादृशेनपरलोकप्रतिपत्तिसाधनेनाविद्याकर्मपूर्वप्रज्ञालक्षणेनयुक्तोभवतीत्यर्थःतमाक्रमंपरलोकस्था
नायोन्मुखीभूतंप्राप्तांकुरीभावबीजंतमाक्रममाक्रम्यावष्टभ्याश्रित्योभयान्पश्यतिबहुवचनंधर्माधर्मफलानेकत्वादुभयाननुभयप्रकारानि
त्यर्थः॥कांस्तान्पाप्मनःपापफलानिनतुपुनःसाक्षादेवपाप्म

कथंशब्दार्थमेवप्रकटयति॥किमित्यादिना॥उत्तरवाक्यमुत्तरत्वेनोत्थापयतिउच्य
तेइति॥तत्राथशब्दमुक्तप्रश्नार्थतयाव्याकरोति॥अथेति॥उत्तरभागमुत्तरत्वेनव्याचष्टे॥शृण्विति॥यदुक्तंकिमाश्रयइतितत्राह॥यथाक्रमइति॥यदुक्तं
केनविधिनेतितत्राह॥तमाक्रममिति॥पाप्मशब्दस्ययथार्थत्वेसंभवतिकिमितिफलविषयत्वंतत्राह॥नत्विति॥साक्षादागमादृतेप्रत्यक्षेणेतियावत्॥पाप्म

नामेवसासाद्दर्शनासंभवस्तदुब्दार्थः॥कथंपुनराद्येवयसिपाप्मनामानंदानांचस्वप्नेदर्शनंतत्राह॥जन्मांतरेति॥यद्यपिमध्यमेवयसिकरणपाटवादैहिकवा
सनयास्वप्नोदृश्यतेतथापिकथमंतिमेवयसिस्वप्नदर्शनंतदाह॥यानिचेति॥फलानांसुदूरत्वमत्रलेशतोभुक्तत्वं॥यानीत्युपक्रमात्तानीत्युपसंख्यातव्यं॥ऐहिक
वासनावशादैहिकानामेवपाप्मनामानंदानांचस्वप्नेदर्शनसंभवान्नस्वप्नप्रत्यक्षंपरलोकसाधकमितिशंकते॥तत्कथमिति॥परिहरति॥उच्यतइति॥यद्यपिस्व
प्नेमनुष्याणामिंद्रादिभावोऽननुभूतोपिभातितथापितदपूर्वमेवदर्शनमित्याशंक्याह॥नचेति॥स्वप्नधियाभाविजन्मभाविनोपिस्वप्नेदर्शनात्स्वायेणेत्युक्तं॥नच

नांदर्शनंसंभवतितस्मात्पापफलानिदुःखानीत्यर्थःआनंदांश्चधर्मफलानिसुखानीत्येतत्तानुभयान्पाप्मनआनंदांश्चपश्यतिजन्मांतरदृष्टवास
नामयान्यानिचप्रतिपत्तव्यजन्मविषयाणिसुदूरधर्माधर्मफलानिधर्माधर्मप्रयुक्तोदेवतानुग्रहाद्वापश्यति॥तत्कथमवगम्यतेपरलोकस्थानसं
बंधितत्पाप्मानंददर्शनंस्वप्नइति॥उच्यतेयस्मादिहजन्मन्यननुभाव्यमपिपश्यतिबहुनचस्वप्नोनामाऽपूर्वदर्शनंपूर्वदृष्टस्मृतिर्हिस्वप्नःप्रायेण
तेनस्वप्नजागरितस्थानव्यतिरेकेणस्तउभौलोकौ॥यदुक्तमादित्यादिबाह्यज्योतिषामभावेऽयंकार्यकरणसंघातःपुरुषोयेनव्यतिरिक्तेना
त्मज्योतिषाव्यवहरतीत्युक्तंतदेवनास्तियदादित्यादिज्योतिषामभावगमनंयत्रेदंविविक्तंस्वयंज्योतिरुपलभ्येतयेनसर्वदैवायंकार्यकरण
संघातःसंसृष्टएवोपलभ्यते

तदपूर्वदर्शनमपिसम्यग्ज्ञानमुत्थानप्रत्ययबाधान्नचैवंस्वप्नधियाभाविजन्मासिद्धिर्यथाज्ञानमर्थोगीकारादितिभावः
॥प्रमाणफलमुपसंहरति॥तेनेति॥सयत्रेत्यादिवाक्यस्यव्यवहितेनसंबंधंवक्तुंवृत्तमनूद्याक्षिपति॥यदित्यादिना॥बाह्यज्योतिरभावेसत्ययंपुरुषःकार्यक
रणसंघातोयेनसंघातातिरिक्तेनात्मज्योतिषागमनादिनिर्वर्त्तयतितदात्मज्योतिरस्तीतियदुक्तमित्यनुवादार्थः॥विशिष्टस्थानाभावंवक्तुंविशेषणाभावंतावद्द
र्शयति॥तदेवेति॥आदित्यादिज्योतिरभावविशिष्टस्थानंयत्रेत्युक्तं॥तदेवस्थानंनास्तिविशेषणाभावादितिशेषः॥यथोक्तस्थानाभावेहेतुमाह॥येनेति॥संसृष्टोबाह्यै

अवहारभूमौबाह्यज्योतिरभावाभावेफलितमाह॥तस्मादिति॥उत्तरग्रंथमुत्तरत्वेनावतारयति॥अथेत्यादिना॥यथोक्तं सर्वव्यतिरिक्तत्वंस्वयंज्योतिष्ट्वमित्या
दि॥आहस्वप्नंप्रस्वपीतीतियावत॥उपादानशब्दःपरिग्रहविषयः॥कथमस्यसर्वावत्त्वंतदाह॥सर्वावत्त्वमिति॥संसर्गकारणभूताःसह्याध्यात्मादिविभागेनेतिशे

तस्मादसत्त्वमोःसन्नेववास्वप्नेस्वेनविविक्तस्वभावेनज्योतीरूपेणात्मेतिअथकचिद्धिविक्तःस्वेनज्योतीरूपेणोपलभ्येतबाह्याध्यात्मिकभूतभौ
तिकसंसर्गशून्यस्ततोयथोक्तंसर्वंभविष्यतीत्येतदर्थमाह॥सयःप्रकृतआत्मायत्रयस्मिन्कालेप्रस्वपितिप्रकर्षेणस्वापमनुभवतितदाकिमुपादानः
केनविधिनाप्रस्वपितिसंध्यंस्थानंप्रतिपद्यतइत्युच्यतेऽस्यदृष्टस्यलोकस्यजागरितलक्षणस्यसर्वावतःसर्वमवतीतिसर्वावानयंलोकःकार्यकरणसं
घातोविषयवेदनासंयुक्तःसर्वावत्त्वमस्यव्याख्यातमन्नत्रयप्रकरणेऽथोअयंवाआत्मेत्यादिनासर्वावाभूतभौतिकमात्राअस्यसंसर्गकारणभूताविद्यं

सयत्रप्रस्वपित्यस्यलोकस्यसर्वावतोमात्रामपादायस्वयंविहत्यस्वयंनिर्मायस्वेनभासास्वेनज्योतिषाप्रस्वपि

तेइतिसर्वावान्सर्ववानेवहिसर्वावांस्तस्यसर्वावतोमात्रामेकदेशमवयवमपादायापच्छिद्यादायगृहीत्वादृष्टजन्मवासनावासितःसन्नित्यर्थः॥स्वय
मात्मनेवविहत्यदेहंपातयित्वानिःसंबोधमापाद्यजागरितेह्यादित्यादीनांचक्षुरादिष्वनुग्रहोदेहव्यवहारार्थोदेहव्यवहारश्चात्मनोधर्माधर्मफलोप
भोगप्रयुक्तस्तद्धर्माधर्मफलोपभोगोपरमणमस्मिन्देहेआत्मकर्मोपरमकृतमित्यात्मास्यविहंतेत्युच्यतेस्वयंनिर्मायनिर्माणंकृत्वावासनामयंस्वप्नदे
हंमायामयमिव

षः॥किमुपादानमित्यस्योत्तरमुक्त्वाकेनविधिनेत्यस्योत्तरमाह॥स्वयमित्यादिना॥आपाद्यप्रस्वपितीत्युत्तरत्रसंबंधःकथंपुनरात्मनोदेह
विहंतृत्वंजाग्रद्धेतुकर्मफलोपभोगोपरमणाद्धिसविहन्यतेतत्राह॥जागरितेहीत्यादिना॥निर्माणविषयंदर्शयति॥वासनामयमिति॥यथामायावीमायामयंदेहं

निर्मितेत्यद्दर्शयाह॥मायामयमिवेति॥

——— कथं पुनरात्मनो यथोक्तदेहनिर्माणकर्तृत्वं कर्मकृतत्वात्तन्निर्माणस्येत्याशंक्याह॥ निर्माणमपीति॥ स्वेन भासेत्यत्रेत्थंभावे तृतीया॥ करणे तृतीयां व्यावर्तयति॥ साहीति॥ तत्रेति स्वप्नोक्तिः॥ यथोक्तांतःकरणवृत्तेर्विषयत्वेन प्रकाशमानत्वेपि स्वभासो भवतु करणत्वमित्याशंक्याह॥ सा तत्रेति॥ स्वेन ज्योतिषेति कर्त्तरि तृतीया॥ स्वशब्दोत्रात्मविषयः॥ कोयं प्रस्वापो नामतत्राह॥ यदेवमिति॥ विविक्तविशेषणं विवृणोति॥ बाह्येति॥ स्वप्ने स्वयंज्योतिरात्मे

निर्माणमपि तत्कर्मसापेक्षत्वात्स्वयंकर्तृकमुच्यते स्वेन भासा स्वेनात्मीयेन भासा मात्रोपादानलक्षणेन भासा दीप्त्या प्रकाशेन सर्ववासनात्मकेनांतःकरणवृत्तिप्रकाशेनेत्यर्थः॥ सा हि तत्र विषयभूता सर्ववासनामयी प्रकाशते सा तत्र स्वयंभा उच्यते तेन स्वेन भासा विषयभूतेन स्वेन च ज्योतिषा तद्विषयिणा विविक्तरूपेणालुप्तदृक्स्वभावेन तद्भारूपं वासनात्मकं विषयीकुर्वन्प्रस्वपिति॥ यदेवं वर्तनं तत्प्रस्वपितीत्युच्य

स्यत्रायं पुरुषः स्वयंज्योतिर्भवति॥ २०॥ तेऽत्रैतस्यामवस्थायामेतस्मिन्कालेऽयं पुरुष आत्मा स्वयमेव विविक्तज्योतिर्भवति बाह्याध्यात्मिकभूतभौतिकसंसर्गरहितं ज्योतिर्भवति ननु स्य लोकस्य मात्रोपादानं कृतं कथं तस्मिन्सत्यत्रायं पुरुषः स्वयंज्योतिर्भवतीत्युच्यते नैष दोषो विषयभूतमेव हि तत्तेनैव चात्रायं पुरुषः स्वयंज्योतिर्दर्शयितुं शक्यो न त्वन्यथाऽसति विषये कस्मिंश्चित्सुषुप्त

त्युक्तमाक्षिपति॥ नन्वस्येति॥ वासनापरिग्रहस्य मनोवृत्तिरूपस्य विषयतया विषयित्वाभावादविरुद्धमात्मनः स्वप्ने स्वयंज्योतिष्ट्वमिति समाधत्ते॥ नैष दोष इति॥ कुतो वासनोपादानस्य विषयत्वमित्याशंक्य स्वयंज्योतिष्ट्वश्रुतिसामर्थ्यादित्याह॥ तेनेति॥ मात्रादानस्य विषयत्वेनेति यावत्॥ तदेव व्यतिरेकमुखेनाह॥ नत्विति॥ यथा सुषुप्तिकाले व्यक्तस्य विषयस्याभावे स्वयंज्योतिरात्मा दर्शयितुं न शक्यते तथा स्वप्नेपि तस्मात्तत्र स्वयंज्योतिष्ट्वश्रुत्या मात्रादानस्य विषयित्वं प्रकाशि

भवतु स्वप्ने वासनादानस्य विषयत्वं तथापि कथं स्वयंज्योतिरात्मा शक्यते विविच्य दर्शयितुमित्याशंक्याह॥ यदा पुनरिति॥ अवभासयद्वभास्यं वासना
त्मकमंतःकरणमिति शेषः॥ स्वप्नावस्थायामात्मनोवभासकांतराभावे फलितमाह॥ तेनेति॥ २०॥ ९॥ यदुक्तं स्वप्ने स्वयंज्योतिरात्मेति तत्प्रकारांतरेणाक्षि
पति॥ नन्विति॥ अवस्थाद्वये विशेषाभावकृतं चोद्यं दूषयति॥ उच्यत इति॥ वैलक्षण्यं स्फुटयति॥ जागरिते हीति॥ मनस्तु स्वप्नेसदपि विषयत्वान्न स्वयंज्यो

यदा पुनः साभासा वासनात्मिका विषयभूतोपलभ्यमाना भवति तदासिःकोशादिव निष्कृष्टं सर्वसंसर्गरहितं चक्षुरादिकार्यकरणाव्यावृत्तस्वरू
पमलुप्तदृगात्मज्योतिः स्वेन रूपेणावभासयद्गृह्यते तेनात्रायं पुरुषः स्वयंज्योतिर्भवतीति सिद्धं॥ २०॥ ९॥ नन्वत्र कथं पुरुषः स्वयंज्योतिर्येन जाग
रित इव ग्राह्यग्राहकादिलक्षणः सर्वो व्यवहारो दृश्यते चक्षुराद्यनुग्राहकाश्चादित्याद्यालोकास्तथैव दृश्यंते यथा जागरिते तत्र कथं विशेषावधार

न तत्र रथा न रथयोगा न पंथानो भवंत्यथ रथान्रथयोगान्पथः सृजते ॥

णं क्रियते ऽत्रायं पुरुषः स्वयंज्योतिर्भवतीत्युच्यते वैलक्षण्यात्स्वप्नदर्शनस्य जागरिते हींद्रियबुद्धिमनआलोकादिव्यापारसंकीर्णमात्मज्योतिरि
ह तु स्वप्ने इंद्रियाभावात्तदनुग्राहकादित्याद्यालोकाभावाच्च विविक्तं केवलं भवति तस्माद्विलक्षणं ननु तथैव विषया उपलभ्यंते स्वप्नेपि यथा जागरि
ते तत्र कथमिंद्रियाभावाद्वैलक्षण्यमुच्यत इति शृणु न तत्र विषयाः स्वप्ने रथादिलक्षणाः तथा न रथयोगाः रथेषु युज्यंत इति रथयोगा अश्वादयस्तत्र
न विद्यंते न च पंथानो रथमार्गा भवंत्यथ च रथान्रथयोगान्पथश्च सृजते स्वयं कथं पुनः तिष्ठ्व विघाती तिभावः॥ उक्तं वैलक्षण्यं प्रतीतिमाश्रित्या
क्षिपति॥ नन्विति॥ न तत्रेत्यादिवाक्यं व्याकुर्वन्नुत्तरमाह॥ शृण्विति॥ प्रतीतिं घटयति॥ अथेति॥ रथादिसृष्टिमाक्षिपति॥ कथं पुनरिति ॥

बृ.र.
२८

वासनामयीसृष्टिः श्लिष्टेत्युत्तरमाह॥ उच्यतइति॥ तदुपलब्धिनिमित्तेनेत्यत्र तच्छब्देनवासनात्मिकामनोवृत्तिरेवोक्ता॥ उक्तमेवप्रपंचयति॥ नत्वित्यादिना
॥ तदुपलब्धिर्वासनोपलब्धिस्तत्रयत्कर्मनिमित्तंतेनचोदितातयायोद्भूतांतःकरणवृत्तिग्राहकावस्थातदाश्रयंतदात्मकंतद्वासनारूपंदृश्यतइतियोजना॥
तथापिकथमात्मज्योतिःस्वप्नेकेवलंसिध्यतितत्राह॥ तद्यसेति॥ यथाकोशादसिर्विविक्तोभवतितथादृश्यायाःबुद्धेर्विविक्तमात्मज्योतिरितिकैवल्यंसाध

सृजतेरथादिसाधनानांवृक्षादीनामभावेननूत्क्रमस्यलोकस्यसर्वावतोमात्रामपादायस्वयंविहत्यस्वयंनिर्मायेत्यंतःकरणवृत्तिरस्यलोकस्यवा
सनामात्रातामपादायरथादिवासनारूपांतःकरणवृत्तिस्तदुपलब्धिनिमित्तेनकर्मणाचोद्यमानादृश्यत्वेनव्यवतिष्ठतेतदुच्यतेस्वयंनिर्मायेति
तदेवाहरथादीन्सृजतइति॥ ननुतत्रकरणंवाकरणानुग्राहकाणिवादित्यादिज्योतींषितदवभास्यावारथादयोविषयाविद्यंतेतद्वासना

नतत्रानंदामुदःप्रमुदोभवंत्यथानंदान्मुदःप्रमुदःसृजतेनतत्रवेशांताःपुष्करिण्यःस्रवंत्योभवंत्यथवेशांतान्पुष्करिण्यः
स्रवंत्यःसृजतेसहिकर्ता॥२१॥ मात्रंतुकेवलंतदुपलब्धिकर्मनिमित्तचोदितोद्भूतांतःकरणवृत्त्याश्रयंदृश्यतेतद्यस्यज्योतिषोदृश्य
तेःलुप्तदृशस्तदात्मज्योतिरत्रकेवलमसिरिवकोशाद्विविक्तंतथानतत्रानंदाःसुखविशेषाःमुदोहर्षाःपुत्रादिलाभनिमित्ताःप्रमुदस्तएव
प्रकर्षोपेताअथवानंदादीन्सृजतेतथानतत्रवेशांताःपल्वलाःपुष्करिण्यस्तडागाःस्रवंत्योनद्योभवंत्यथवेशांतादीन्सृजतेवासनामात्ररूपा
न्यस्मात्सहिकर्त्ता॥ यति॥ असिरिवेति॥ तथारथाद्यभाववदितियावत्॥ सुखमेवविशिष्यतइतिविशेषाःसुखसामान्यानीत्यर्थः॥ तथेत्यानं
दाद्यभावोदृष्टांतितःअल्पीयांसिसरांसिपल्वलशब्देनोच्यंते॥ सहिकर्त्तेत्यत्रहिशब्दोयस्मादित्युक्तस्तस्मात्सृजतीतिशेषः॥

अ.
६

राम:
२८

कुतोस्य कर्तृत्वं सह कार्यभावादित्याशंक्याह॥ तद्वासनेति॥ तच्छब्देन वेशांतादिग्रहणं तदीयवासनाधारश्चित्तपरिणामस्तेनोद्भवति यत्कर्म तस्य सृज्य
मानस्य निदानत्वेनेति यावत्॥ मुख्यं कर्तृत्वं वारयति नत्विति॥ तत्रेति स्वप्नोक्तिः साधनाभावेपि स्वप्ने क्रिया किं न स्यादित्याशंक्याह॥ नहीति॥ तर्हि
स्वप्ने कारकाण्यपि भविष्यंतीनेत्याह॥ नचेति॥ तर्हि पूर्वोक्तमपि कर्तृत्वं कथमिति चेत्तत्राह॥ यत्रत्विति॥ उक्तेर्थे वाक्योपक्रममनुकूलयति॥ तदुक्त
मिति॥ उपक्रमे मुख्यं कर्तृत्वं इह त्वौपचारिकमिति विशेषमाशंक्याह॥ तत्रापीति॥ परमार्थतश्चैतन्यज्योतिषोव्यापारवदुपाध्यवभासकत्वव्यतिरेके

तद्वासनाश्रयचित्तवृत्त्युद्भवनिमित्तकर्महेतुत्वेनैवोचामतस्य कर्तृत्वं॥ नतु साक्षादेव तत्र क्रिया संभवति साधनाभावान्नहि कारकम
तरेण क्रिया संभवति न च तत्र हस्तपादादीनि क्रियाकारकाणि संभवंति यत्र तु तानि विद्यंते जागरिते तत्रात्मज्योतिरवभासितैः कार्यक
रणैः रथादिवासनाश्रयांतःकरणवृत्त्युद्भवनिमित्तं कर्म निर्वर्त्यते तेनोच्यते स हि कर्तेति तदुक्तमात्मनैवायं ज्योतिषास्ते पल्ययते कर्म कुरु
तइति तत्रापि न परमार्थतः स्वतः कर्तृत्वं चैतन्यज्योतिषोऽवभासकत्वव्यतिरेकेण यत्तु चैतन्यात्मज्योतिषांतःकरणद्वारेणावभासयति
कार्यकरणानि तदवभासितानि कर्मसु व्याप्रियंते कार्यकरणानि तत्र कर्तृत्वमुपचर्यते आत्मनः तदुक्तं ध्यायतीव लेलायतीवेति तदेवानू
द्यते स हि कर्तेति इह हि हेत्वर्थे॥ २१॥ १०॥ तदेतस्मिन्नुक्तेर्थ एते श्लोका मंत्रा भवंति॥ स्वप्नेन स्वप्नभावेन शारीरं शरीरमभिप्रहत्य निश्चेष्टमापाद्यासु
प्तः स्वयमसुप्तदृगादिशक्तिस्वाभाव्यात् णस्वतो न कर्तृत्वं वाक्योपक्रमेपि विवक्षितमित्यर्थः॥ आत्मनो वाक्योपक्रमे कर्तृत्वमौपचारिकमित्युपसंहरति॥ यदि
ति॥ स हि कर्तेत्यौपचारिकं कर्तृत्वमित्युच्यते चेत्तस्य ध्यायतीवेत्यादिनोक्तत्वात्सनरुक्तिरित्याशंक्याह॥ तदुक्तमिति॥ अनुवादे प्रयोजनमाह॥ हेत्वर्थमिति॥ स्व
प्ने रथादिस्रष्टा विविति शेषः॥ १०॥ तदेते श्लोका भवंतीत्येतत्प्रतीकं गृहीत्वा व्याचष्टे॥ तदेतस्मिन्निति॥ उक्तोर्थः स्वयंज्योतिष्ट्वादिः॥ शारीरमिति स्वार्थे वृद्धिः॥ स्वय

व्याख्येयंपदमादायव्याचष्टे॥सुप्तानित्यादिना॥उक्तमनूद्यपदांतरमवतार्यव्याकरोति॥सुप्तानभिचाकशीतीति॥२२॥तथाशब्दःस्वप्नगतविशेषसमु

सुप्तान्वासनाकारोद्भूतानंतःकरणवृत्त्याश्रयान्बाह्याध्यात्मिकान्सर्वानेवभावान्स्वेनरूपेणप्रत्यस्तमितान्सुप्तानभिचाकशीत्यलुप्तयात्म
दृष्ट्यापश्यत्यवभासयतीत्यर्थः॥शुक्रंशुद्धंज्योतिष्मदिंद्रियमात्रारूपमादायगृहीत्वापुनःकर्मणेजागरितस्थानमेत्यागच्छतिहिरण्मयइव
चैतन्यज्योतिःस्वभावःपुरुषएकहंसःएकएवहंतीत्येकहंसःएकोजाग्रत्स्वप्नेहलोकपरलोकादीन्गच्छतीत्येकहंसः॥२२॥तथाप्राणेनपं
चवृत्तिनारक्षन्परिपालयन्नन्यथामृतभ्रांतिःस्यादवरंनिकृष्टमनेकाशुद्धिसंघातत्वादत्यंतबीभत्संकुलायंनीडंशरीरंस्वयंतुबहिस्तस्मात्कु

तदेतेश्लोकाभवंति॥स्वप्नेनशारीरमभिप्रहत्यासुप्तःसुप्तानभिचाकशीति॥शुक्रमादायपुनरैतिस्थानंहिरण्मयःपुरुषएकहं
सः॥२२॥प्राणेनरक्षन्नवरंकुलायंबहिःकुलायादमृतश्चरित्वासईयतेमृतोयत्रकामंहिरण्मयःपुरुषएकहंसः॥२३॥स्वप्ना
तउच्चावचमीयमानोरूपाणिदेवःकुरुतेबहूनि॥उतेवस्त्रीभिःसहमोदमानोजक्षदुतेवापिभयानिपश्यन्॥२४॥

लायाच्चरित्वायद्यपि
शरीरस्थएवस्वप्नंपश्यतितथापितत्संबंधाभावात्तत्स्थइवाकाशोबहिश्चरित्वेत्युच्यतेऽमृतःस्वयममरणधर्माईयतेगच्छतियत्रकामंयत्रय
त्रकामोविषयेषुउद्भूतवृत्तिर्भवतितंतंकामंवासनारूपेणोद्भूतंगच्छति॥२३॥किंच॥स्वप्नांतेस्वप्नस्थानेउच्चावचमुच्चंदेवादिभावमवचंतिर्यगा
दिभावंनिकृष्टंतदुच्चावचमीयमानोगम्यमानःप्राप्नुवन्रूपाणिदेवोद्योतनवान्कुरुतेनिर्वर्तयतिवासनारूपाणिबहून्यसंख्येयानिउतअपिस्त्रीभिः
सहमोदमानइवजक्षदिवहसन्निववयस्यैः॥ च्चयार्थः॥किमितिस्वप्नेप्राणेनशरीरमात्मापालयतितत्राह॥अन्यथेति॥बहिश्चरित्वेत्ययुक्तंशरीरस्थ

तत्संबंधाभावाद्बहिश्चरित्वेत्युच्यतेइतिसंबंधः॥देहस्यस्यैवतदसंबंधेदृष्टांतमाह॥तत्स्थइति॥२३॥स्वप्नस्यविशेषांतरमाह॥किंचेति॥उच्चावचंविष
यीकुर्वतेनतेनात्मनास्वेनैवस्वयंगम्यमानइतियावत्॥२४॥१३॥आरामंविवृणोति॥ग्राममित्यादिना॥नतमित्यादेस्तात्पर्यमाह॥कष्टमिति॥दृष्टिगोच
रापन्नमपिनपश्यतीतिसंबंधः॥कष्टमित्यादिनोक्तंप्रपंचयति॥अहोइति॥श्लोकानांतात्पर्यमुपसंहरति॥अतेति॥वाक्यांतरमादायतात्पर्यमुक्त्वाऽकां

उतइवअपिभयानिबिभेत्येभ्यइतिभयानिसिंहव्याघ्रादीनिपश्यन्निव॥२४॥१३॥आराममारमणमाक्रीडामनेननिर्मितांवासनारूपामस्या
त्मनःपश्यंतिसर्वेजनाःग्रामंनगरंस्त्रियमन्नाद्यमित्यादिवासनानिर्मितमाक्रीडनरूपंनतंपश्यतितंनपश्यतिकश्चनकष्टंभोवर्त्ततेऽत्यंत
विविक्तंदृष्टिगोचरापन्नमपिअहोभाग्यहीनतालोकस्ययच्छक्यदर्शनमप्यात्मानंनपश्यतीतिलोकंप्रत्यनुक्रोशंदर्शयतिश्रुतिरत्यंतविवि

आराममस्यपश्यंतिनतंपश्यतिकश्चनेतितंनायतंबोधयेदित्याहु

क्तःस्वयंज्योतिरात्मास्वप्नेभवतीत्यभिप्रायस्तंनायतंबोधयेदित्याहुः॥प्रसिद्धिरपिलोकेविद्यतेस्वप्नेआत्मज्योतिषोव्यतिरिक्तत्वेकासौतमात्मा
नंसुप्तमायतंसहसाभृशंनबोधयेदित्याहुरेवंकथयंतिचिकित्सकादयोजनालोकेनूनंतेपश्यंतिजाग्रद्देहादिंद्रियद्वारतोपसृत्यकेवलोबहि
र्वर्त्ततइतियतआहुस्तंनायतंबोधयेदितितत्रचदोषंपश्यंति॥भृशंह्यसौबोध्यमानस्तानींद्रियद्वाराणिसहसाप्रतिबोध्यमानोनप्रतिपद्यत
इतितदेतदाह॥ 	क्षापूर्वकमक्षराणिव्याकरोति॥तंनेत्यादिना॥तेषामभिप्रायमाह॥नूनमिति॥इंद्रियाण्येवद्वाराण्यस्येतींद्रियद्वारोजाग्रद्देहस्तस्मा
दितियावत्॥तथापिसहसासौबोध्यतांकाहानिरित्याशंक्याह॥तत्रेति॥सहसाबोध्यमानत्वंसप्तम्यर्थः॥किमत्रप्रमाणमित्याशंक्यानंतरवाक्यमवतार्यव्या

बृ.र.
३०

पुनरप्रतिपत्तौ दोषप्रसंगं दर्शयति॥ कदाचिदिति॥ व्यत्यासप्रवेशस्य कार्यं दर्शयन्दुर्भिषज्यमित्यादि व्याचष्टे॥ तत इति॥ उक्तां प्रसिद्धिमुपसंहरति॥ तस्मा
दिति॥ वृत्तमनूद्य मतांतरमुत्थापयति॥ स्वप्नो भूत्वेत्यादिना॥ इतिशब्दो यस्मादर्थे॥ तदेवमतांतरं स्फोरयति॥ नेत्यादिना॥ उक्तमंगीकृत्य फलं पृच्छति॥
यद्येवमिति॥ स्वप्नो जागरितदेश इत्येवं यदीष्टमतश्च किं स्यादिति प्रश्नार्थः॥ फलं प्रतिज्ञापयन्प्रकटयति॥ शृण्विति॥ मतांतरोपन्यासस्य स्वमतविरोधि

दुर्भिषज्यं हास्मै भवति यमेष न प्रतिपद्यते यमिंद्रियद्वारदेशं यस्माद्देशात्क्रमादायापसृतस्तमिंद्रियदेशमेष आत्मा पुनर्न प्रतिपद्यते कदाचि
द्व्यत्यासेनेंद्रियमात्राः प्रवेशयति॥ तत आंध्यबाधिर्यादिदोषप्राप्तौ दुर्भिषज्यं दुःखं भिषक्कर्मता हास्मै देहाय भवति दुःखेन चिकित्सनीयो सौ दे
हो भवतीत्यर्थः तस्मात्प्रसिद्ध्यापि स्वप्ने स्वयंज्योतिष्ट्वं देहादिव्यतिरिक्तत्वमस्य गम्यते स्वप्नो भूत्वातिक्रांतो मृत्यो रूपाणीति तस्मात्स्वप्ने स्वयंज्यो

दुर्भिषज्यं हास्मै भवति यमेष न प्रतिपद्यते॥ अथो खल्वाहु र्जागरितदेश एवास्यैष इति यानि ह्येव जाग्रत्पश्यति तानि सुप्त इत्यत्रायं
पुरुषः स्वयंज्योतिर्भवति

तिरात्मा यो अपि खल्वन्य आहुर्जागरितदेश एवास्यैषः यः स्वप्नो न संध्यं स्थानांतरमिहलोकपरलोकाभ्यां व्यतिरि
क्तं॥ किं तर्हि इहलोक एव जागरितदेशो यद्येवं किं चातः शृण्वतो यद्भवति यदा जागरितदेश एवायं स्वप्नस्तदाऽयमात्मा कार्यकरणेभ्यो न व्या
वृत्तस्तैर्मिश्रीभूतोऽतो न स्वयंज्योतिरात्मेत्यतः स्वयंज्योतिष्ट्वबाधनायान्य आहुर्जागरितदेश एवास्यैष इति तत्र च हेतुमाचक्षते जागरितदे
शत्वे यानि हि यस्माद्धस्त्यादीनि पदार्थजातानि जाग्रज्जागरितदेशे पश्यति लौकिकस्तान्येव सुप्तोपि पश्यतीति तदसत् इंद्रियोपरमात् उपरते

त्वमाह॥ इत्यत इति॥ स्वप्नस्य जाग्रद्देशत्वं दूषयति॥ तदसदिति॥ तस्य जाग्रद्देशत्वाभावे फलितमाह॥ तस्मादिति॥ स्वप्ने बाह्यज्योतिषः संभवो ना

अ. ६

रामः
३०

बाह्यज्योतिरभावेपिस्वप्नेव्यवहारदर्शनात्तत्रस्वयंज्योतिष्ट्वमाक्षेप्तुमशक्यमित्युपसंहरति॥तस्मादिति॥कथंपुनर्विद्यायामनुक्तायांसहस्रदान
वचनमित्याशंक्यवृत्तंकीर्त्तयति॥स्वयंज्योतिरिति॥मृत्योरूपाण्यतिक्रामतीत्यत्रचकार्यकरणव्यतिरिक्तत्वमात्मनोदर्शितमित्याह॥अतिक्रामती
ति॥लोकद्वयसंचारवशादुक्तमर्थमनुद्रवति॥क्रमेणेति॥आदिशब्दस्तत्तद्देहादिविषयः॥स्थानद्वयसंचारवशादुक्तमनुभाषते॥तयेति॥इहलो
कपरलोकाभ्यामिवेतियावत्॥लोकद्वयेस्थानद्वयेचक्रमसंचारप्रयुक्तमर्थांतरमाह॥तत्रेति॥आत्मनःस्वयंज्योतिषोदेहादिव्यतिरिक्तस्यनित्य

न्यस्यज्योतिषस्तत्रसंभवोस्तितदुक्तंनतत्ररथानरथयोगाइत्यादितस्मादत्रायंपुरुषःस्वयंज्योतिर्भवत्येव॥स्वयंज्योतिरात्मास्तीतिस्वप्न
निदर्शनेनप्रदर्शितमतिक्रामतिमृत्योरूपाणीतिचक्रमेणसंचरन्निहलोकपरलोकादीनिहलोकपरलोकादिव्यतिरिक्तस्तथाजाग्रत्स्व

सोहंभगवतेसहस्रंददाम्यतऊर्ध्वंविमोक्षायब्रूहीति ॥ २५ ॥

प्रकुलायाभ्यांव्यतिरिक्तस्तत्रचक्रमसंचारान्नित्यश्चेत्येतत्प्रतिपादितंयाज्ञवल्क्येनातोविद्यानिष्क्रयार्थंसहस्रंददामीत्याहजनकःसोह
मेवंबोधितस्त्वयाभगवतेतुभ्यंसहस्रंददामिविमोक्षश्चकामप्रश्नोममाभिप्रेतस्तदुपयोगयंतादर्थ्यात्तदेकदेशएवातस्त्वांनियोक्ष्यामिसम
स्तकामप्रश्ननिर्णयश्रवणेनविमोक्षायातऊर्ध्वंब्रूहि स्यज्ञापितत्वादित्येततशब्दार्थः॥कामप्रश्नस्यनिर्णीतत्वान्निराकांक्षत्वमितिशंकांवारयति॥
विमोक्षश्चेति॥सम्यग्बोधस्तद्धेतुरितियावत्॥ननुसएवप्रागुक्तोनासौवक्तव्योस्तितत्राह॥तदुपयोगीति॥अयमित्युक्तात्मप्रत्ययोक्तिः॥तादर्थ्यात्पदार्थ
ज्ञानस्यवाक्यार्थज्ञानशेषत्वादितियावत्॥पदार्थस्यवाक्यार्थबहिर्भावंदूषयति॥तदेकदेशएवेति॥कामप्रश्नोनाद्यापिनिर्णीतइत्यत्रोत्तरवाक्यंगमकमित्याह॥

बृ.भ.
३१

विमोक्षशब्दस्यसम्यक्ज्ञानविषयत्वंसूचयति॥ येनेति॥ सम्यक्ज्ञानप्राप्तौगुरुप्रसादस्यप्राधान्यंदर्शयति॥ त्वत्प्रसादादिति॥ ननुविमोक्षपदार्थोनिर्णीतोन्य
थासहस्रदानस्याकस्मिकत्वप्रसंगादतआह॥ विमोक्षेति॥ २५॥ उत्तरकंडिकामवतारयितुंवृत्तंकीर्त्तयति॥ यत्प्रस्तुतमिति॥ आत्मनैवेत्यादिनायदात्मनःस्व
यंज्योतिष्ट्वंब्राह्मणादौप्रस्तुतंतदत्रायमित्यादिनाप्रत्यक्षतःस्वप्नेप्रतिपादितमितिसंबंधः॥ वृत्तमर्थांतरमनूद्यचोद्यमुत्थापयति॥ यत्तूक्तमिति॥ मृत्युंनाति

येनसंसाराद्विमुच्येयंत्वत्प्रसादाद्विमोक्षपदार्थैकदेशनिर्णयहेतोःसहस्रदानं॥२५॥१४॥ यत्प्रस्तुतमात्मनैवायंज्योतिषास्तइतितत्प्रत्यक्ष
तःप्रतिपादितमत्रायंपुरुषःस्वयंज्योतिर्भवतीतिस्वप्नेयत्तूक्तंसस्वप्नोभूत्वेमंलोकमतिक्रामतिमृत्योरूपाणीतितत्रैतदाशंक्यतेमृत्योरूपाण्येवा
तिक्रामतिनमृत्युंप्रत्यक्षंह्येतत्स्वप्नेकार्यकरणव्यावृत्तस्यापिमोदत्रासादिदर्शनंतस्मान्नूनंनैवायंमृत्युमतिक्रामतिकर्मणोहिमृत्योःकार्यंमोद

सवाएषएतस्मिन्त्संप्रसादे ॥

त्रासादिदृश्यतेयदिचमृत्युनाबद्धएवायंस्वभावतस्ततोविमोक्षोनोपपद्यतेनहिस्वभावात्कश्चिद्विमुच्यते। यस्वभावोनभवतिमृत्युःततस्तस्मा
न्मोक्षउपपद्यतेयथासौमृत्युरात्मीयोधर्मोनभवतितथाप्रदर्शनायातऊर्ध्वंविमोक्षायब्रूहीत्येवंजनकेनपर्यनुयुक्तोयाज्ञवल्क्यस्तद्दिदर्शयिष
याप्रववृतेसवै

क्रामतीत्यत्रहेतुमाह॥ प्रत्यक्षंहीति इच्छाद्वेषादिरादिशब्दार्थः॥ तथापिकुतोमृत्युंनातिक्रामतितत्राह॥ तस्मादिति॥ कार्यस्यकारणादन्य
त्रप्रवृत्त्ययोगादितियावत्॥ उक्तमुपपादयति॥ कर्मणोहीति॥ अतःस्वप्नगतोमृत्युंकर्माख्यंनातिक्रामतीतिशेषः॥ मातर्हिमृत्योरतिक्रमोभूत्कोदोषस्तत्राह॥
यदिचेति॥ स्वभावादपिमृत्योर्विमुक्तिमाशंक्याह॥ नहीति॥ उक्तंहि॥ नहिस्वभावोभावानांव्यावर्त्तेतौष्ण्यवद्रवेरिति॥ कथंतर्हिमोक्षोपपत्तिरित्याशंक्याह॥ अथेति॥

अ. ६
रामः
३१

तद्विदर्शयिषयेत्यत्र तच्छब्देन मृत्योरतिक्रमणं गृह्यते वैशब्दस्य प्रसिद्धार्थत्वमुपेत्य स इत्यादिशब्दार्थमाह॥ प्रकृत इति॥ एषशब्दमनूद्य व्याकरोति॥ एष इति॥ सम्य
क्प्रसादे स्थित्वा मृत्युमतिक्रामतीति शेषः॥ सुषुप्तस्य संप्रसादत्वं साधयति॥ जागरित इत्यादिना॥ तत्र वाक्यशेषमनुकूलयति॥ तीर्णो हीति॥ अस्तु सम्यक्प्रसा
दः सुषुप्तस्थानं तथापि किमायातमित्यत आह॥ स वा इति॥ पूर्वोक्तेन क्रमेण सम्यक्प्रसादे सुषुप्ते स्थित्वा सम्यक्प्रसन्नः सन्मृत्युमतिक्रामतीत्यर्थः॥ उक्तमर्थमुप

प्रकृतः स्वयंज्योतिः पुरुष एष यः स्वप्ने प्रदर्शितः एतस्मिन्संप्रसादे सम्यक्प्रसीदत्यस्मिन्निति संप्रसादो जागरिते देहेंद्रियव्यापारशतसंनिपात
जं हित्वा कालुष्यं तेभ्यो विप्रमुक्तः ईषत्प्रसीदति स्वप्ने इह तु सुषुप्ते सम्यक्प्रसीदतीत्यतः सुषुप्तः संप्रसाद उच्यते॥ तीर्णो हि तदा सर्वाञ्छो
कान्सलिल एको द्रष्टेति हि वक्ष्यति सुषुप्तस्थमात्मानं स वा एष एतस्मिन्संप्रसादे क्रमेण संप्रसन्नः सन्सुषुप्ते स्थित्वा कथं संप्रसन्नः स्वप्ना

रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च ॥

त्सुषुप्तं प्रविविक्षुः स्वप्नावस्थ एव रत्वा रतिमनुभूय मित्रबंधुजनदर्शनादिना चरित्वा विहृत्यानेकधा चरणफलं श्रममुपलभ्येत्यर्थः दृष्ट्वैव
न कृत्वेत्यर्थः॥ पुण्यं च पुण्यफलं पापं च पापफलं न तु पुण्यपापयोः साक्षाद्दर्शनमस्तीत्यवोचाम तस्मान्न पुण्यपापाभ्यामनुबद्धो यो हि करो
ति पुण्यपापे स ताभ्यामनुबध्यते न हि दर्शनमात्रेण तदनुबद्धः स्यात् तस्मात्स्वप्नो भूत्वा मृत्युमतिक्रामति एवं न मृत्युरूपाण्येव केवलमतीन् पादयितुमा

कांक्षामाह॥ कथमिति॥ रत्वेत्यादि व्याकुर्वन्परिहरति॥ स्वप्नादिति॥ पुण्यपापयोर्यथाश्रुतार्थत्वमाशंक्याह॥ न त्विति॥ अवोचामोभयान्पाप्मन आनंदांश्च पश्य
तीति शेषः॥ पुण्यपापयोर्दर्शनमेव न करणमित्यत्र फलितमाह॥ तस्मादिति॥ तद्द्रष्टुरपि तदनुबंधः स्यादित्याशंक्यातिप्रसंगान्नैवमित्याह॥ यो हीत्यादिना॥ पुण्य

मृत्योरस्वभावत्वमुपपादयति॥मृत्युश्चेदिति॥इष्टापत्तिमाशंक्याह॥नत्विति॥अनन्वागतवाक्यादसंगवाक्याच्चेत्यर्थः॥मोक्षशास्त्रप्रामाण्यादपिमृत्योरस्वभावत्वमित्या
ह॥स्वभावश्चेदिति॥इतश्चमृत्युःस्वभावोनभवतीत्याह॥नत्विति॥अभावादितिच्छेदः॥तस्यास्वभावत्वेलब्धमर्थंकथयति॥अतइति॥मृत्युमेवव्याच
ष्टे॥पुण्यपापाभ्यामिति॥स्वप्नेमृत्योःस्वभावत्वाभावेपिजाग्रदवस्थायांकर्तृत्वमात्मनःस्वभावस्तथाचनियमेनतस्यमृत्योरतिक्रमोनसिध्यतीतिशंक
ते॥नन्विति॥औपाधिकत्वात्कर्तृत्वस्यस्वाभाविकत्वाभावादात्मनोमृत्योरतिक्रमःसंभवतीतिपरिहरति॥नेति॥कथमौपाधिकत्वंकर्तृत्वस्यसिद्धवदु

मृत्योरात्मस्वभावत्वशंका॥मृत्युश्चेत्स्वभावोस्यस्वप्नेपिकुर्यान्नतुकरोतिस्वभावश्चेत्क्रियास्यादनिर्मोक्षस्तैवस्यान्नतुस्वभावःस्वप्नेऽभावा
दतोविमोक्षोस्योपपद्यतेमृत्योःपुण्यपापाभ्यां॥ननुजागरितेऽस्यस्वभावएवनबुध्याद्युपाधिकृतंहितन्नचप्रतिपादितंसादृश्यात्ध्यायतीव

पुनःप्रतिन्यायंप्रतियोन्याद्रवतिस्वप्नायैव॥

लेलायतीवेतितस्मादेकांतेनैवस्वप्नेमृत्युरूपातिक्रमणान्नस्वाभाविकत्वाशंका।निर्मोक्षस्तावान्ततःसंप्रसादानुभवोत्तरकालंपुनःप्रतिन्या
यंयथान्यायंयथागतंनिआयोन्यायःअयनमायोनिर्गमनंपुनःपूर्वगमनवैपरीत्येनयदागमनंसप्रतिन्यायः च्चैतत्राह॥तच्चेति॥ध्यायतीवेत्या
दौसादृश्यवाचकादिवशब्दादौपाधिकत्वंकर्तृत्वस्यप्रागेवदर्शितमित्यर्थः॥जागरितेपिकर्तृत्वस्यस्वाभाविकत्वाभावेफलितमाह॥तस्मादिति॥मृत्योःस्वा
भाविकत्वशंकाभावकृतंफलमाह॥अनिर्मोक्षस्तावेति॥वाशब्दोनञनुकर्षणार्थः॥पुण्यंचपापंचेत्येतदंतंवाक्यंव्याख्यायपुनरित्यादिव्याचष्टे॥ततइति॥
स्वप्नाद्युत्थायसुषुप्तिमनुभूयोत्तरकालमितियावत्॥स्थानात्स्थानांतरप्राप्तावभ्यासंवक्तुंपुनःशब्दः॥प्रतिन्यायमित्यस्यावयवार्थमुक्त्वाविवक्षितमर्थमाह॥

जागरितात्स्वप्नंततः सुषुप्तंगच्छतीतिपूर्वंगमनंततोवैपरीत्येनसुषुप्तात्स्वप्नंजागरितंवागच्छतीतियदागमनंसप्रतिन्यायस्तमेवसंक्षिपति॥यथे
ति॥यथास्थानमाद्रवतीत्येतद्विवृणोति॥स्वप्नस्थानादिति॥उक्तेर्थेवाक्यंपातयति॥प्रतियोनीति॥किमर्थंयथास्थानमागमनंतदाह॥स्वप्नायेति॥
सयदित्यादिवाक्यस्यव्यावर्त्यामाशंकामाह॥नन्विति॥तत्रवाक्यमुत्तरत्वेनावतार्यव्याकरोति॥अतआहेति॥अनन्वागतइत्यस्यार्थंस्फुटयति॥नैवेति॥

यथागतंपुनरागच्छतीत्यर्थः प्रतियोनियथास्थानंस्वप्नस्थानंस्वप्नस्थानाद्धिसुषुप्तंप्रतिपन्नःसन्यथास्थानमेवपुनरागच्छतिप्रतियोन्या
द्रवतिस्वप्नायैवस्वप्नस्थानायैव॥ननुस्वप्नेनकरोतिपुण्यपापेतयोःफलमेवपश्यतीतिकथमवगम्यतेयथाजागरितेतथाकरोत्येवस्वप्नेपितु
ल्यत्वाद्दर्शनस्येत्यतआहसआत्मायत्किंचितत्रस्वप्नेपश्यतिपुण्यपापफलमनन्वागतोऽननुगतोऽननुबद्धस्तेनदृष्टेनभवतिनैवानुबद्धोभव

सयत्तत्रकिंचित्पश्यत्यनन्वागतस्तेनभवत्य

तियदिहिस्वप्नेकृतमेवतेनस्यात्तेनानुबध्येतस्वप्नादुत्थितोपिसमन्वागतःस्यान्नचलोकेस्वप्नकृतकर्मणाऽन्वागतत्वप्रसिद्धिर्नहिस्वप्नकृतेना
गसाऽगस्कारिणमात्मानंमन्यतेकश्चिन्नचस्वप्नदृशःश्रुत्वालोकस्तंगर्हयतिपरिहरतिवाऽतोऽनन्वागतएवतेनभवतितस्मात्स्वप्नेकुर्वन्निवो
पलभ्यतेनतुतत्रक्रियास्तिपरमार्थतः सयदित्यादिवाक्यस्याक्षरार्थमुक्त्वातात्पर्यार्थमाह॥यद्धीति॥तेनात्मनेतियावत्॥स्वप्नेकृतंकर्मपुनस्तेनेत्यु
क्तं॥अनुबंधेदोषमाह॥स्वप्नादिति॥इष्टापत्तिमाशंक्याह॥नचेति॥स्वप्नकृतेनकर्मणाजाग्रदवस्थस्यपुरुषस्यान्वागतत्वप्रसिद्धिरितियदुच्यतेतन्नव्यवहा
रभूमौसंप्रतिपन्नमित्यर्थः॥स्वप्नदृष्टेनजाग्रद्धृतस्यनसंगतिरित्यत्रस्वानुभवंदर्शयति॥नहीति॥यथोक्तेनुभवेलोकस्यापिसंमतिंदर्शयति॥नचेति॥तत्रफ

लितमाह॥अतइति॥कथंतर्हीति॥स्वकृतेति
स्वमाह॥तस्मादिति॥

स्वप्नस्याभासत्वाच्च न तत्र वस्तुतोस्ति क्रियेत्याह॥उतेवेति॥तदाभासत्वे लोकप्रसिद्धिमनुकूलयति॥आख्यातारश्चेति॥स्वप्नस्याभासत्वे फलितमाह
॥अतइति॥अनन्वागतवाक्यं प्रतिज्ञारूपं आख्यायासंगवाक्यं हेतुरूपमवतारयितुमाकांक्षामाह॥कथमिति॥मूर्तस्य मूर्तांतरेण संयोगे क्रियो
पलंभाद्मूर्तस्य तदभावादात्मनश्चामूर्तत्वेनासंयोगाक्रियायोगाकर्तृत्वसिद्धिरित्युत्तरं हेतुवाक्यार्थकथनपूर्वकं कथयति॥कार्यकरणैरित्या

उतेव स्त्रीभिः सह मोदमानः इवेति हि श्लोके उक्तः॥आख्यातारश्च स्वप्ने सहेव शब्देनाचक्षते हस्तिनोद्य घटीकृताधावंतीव मया दृष्टा
इति अतो न तस्य कर्तृत्वमिति कथं पुनरस्याकर्तृत्वमिति कार्यकरणैर्मूर्तैः संश्लेषो मूर्तस्य सतः क्रियाहेतुर्दृष्टो न ह्यमूर्तः कश्चित्क्रिया
वान्दृश्यते अमूर्तश्चात्माऽतोऽसंगो यस्माच्चासंगोयं पुरुषस्तस्मादनन्वागतस्तेन स्वप्नदृष्टेन॥अतएव न क्रियाकर्तृत्वमस्य कथंचिदुप

संगो ह्ययं पुरुष इत्येवमेवैतद्याज्ञवल्क्य सोहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीति॥२६

पद्यते कार्यकरणसंश्लेषेण हि कर्तृत्वं स्यात्स च संश्लेषः संयोगोस्य नास्ति यतोऽसंगो ह्ययं पुरुषस्तस्मादमृत एवमेवैतद्याज्ञवल्क्य सोहं
भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहि मोक्षपदार्थैकदेशस्य कर्मप्रविवेकस्य सम्यग्दर्शितत्वादत ऊर्ध्वं विमोक्षायैव ब्रूहीति॥
॥२६॥१५॥तत्रासंगो ह्ययं पुरुष इत्यसंगताऽकर्तृत्वे हेतुरुक्तः दिना॥आत्मन असंगत्वेनाकर्तृत्वमुक्तं समर्थयते॥अतएवेति॥अतःशब्दार्थं वि
शदयति॥कार्येति॥क्रियावत्त्वाभावे जन्ममरणादिराहित्यं कौटस्थ्यं फलतीत्याह॥तस्मादिति॥कर्मप्रविवेकमुक्तमंगीकरोति॥एवमिति॥तत्प्रविविक्ता
त्मज्ञाने दार्ढ्यं सूचयति॥सोहमिति॥नैराकांक्ष्यं व्यावर्तयति॥अतइति॥कथं तर्हि सहस्रदानमित्याशंक्याह॥मोक्षेति॥कामप्रविवेकविषयं नियोगमभि
विक्र२

उत्तरकंडिकाव्यावर्त्याशंकामाह॥ नत्रेति॥ पूर्वकंडिकासप्तम्यर्थः॥ भवत्वकर्तृत्वहेतुरसंगत्वं किं तावतेत्याशंक्याह॥ उक्तंचेति॥ पूर्वश्लोकोपन्यासद शायामितियावत्॥ कर्मवशात्स्वप्नहेतुकर्मसामर्थ्यादित्यर्थः॥ आत्मनः स्वप्नेकामकर्मसंबंधेपि किमितिनासंगत्वंतत्राह॥ कामश्चेति॥ हेत्वसिद्धिंप रिहरति॥ नत्विति॥ नचेद्धेतोरसिद्धत्वं किं तर्हि कथं तत्सिद्धिरितिपृच्छति॥ कथमिति॥ हेतुसमर्थनार्थमुत्तरग्रंथमुत्थापयति॥ असंगइति॥ प्रतियोन्या

उक्तंच पूर्वं कर्मवशात्सईयतेयत्रकाममितिकामश्चसंगोऽतोऽसिद्धोहेतुरुक्तः असंगोह्ययंपुरुषइतिनत्वेतदस्तिकथंतर्हिअसंगएवेति तदुच्यते सवाएषएतस्मिन्स्वप्ने सवैएषपुरुषः संप्रसादात्प्रत्यागतः स्वप्नेरत्वाचरित्वायथाकामं दृष्ट्वैवपुण्यंचपापंचेतिसर्वंपूर्ववद्बुद्धांता यैवजागरितस्थानायतस्मादसंगएवायंपुरुषोयदिस्वप्नेसंगवान्स्यात्कामीततस्तत्संगजैर्दोषैर्बुद्धांतायप्रत्यागतोलिप्येत॥ २७॥ य

सवाएषएतस्मिन्स्वप्नेरत्वाचरित्वा॥

थासौस्वप्नेऽसंगत्वात्स्वप्नसंगजैर्जागरितेप्रत्यागतोनलिप्यतेएवंजागरितसंगजैरपिदोषैर्नलिप्यतएवबुद्धांतेतदेतदुच्यतेसवाएषए तस्मिन्बुद्धांतेजागरितेरत्वाचरित्वेत्यादिपूर्ववत्सयत्तत्रबुद्धांतेकिंचित्पश्यत्यनन्वागतस्तेनभवत्यसंगोह्ययंपुरुषइति॥ ननुदृष्ट्वैवेतिकथम वधार्यतेकरोतिचतत्रपुण्यपापेतत्फलंचपश्यति

दृष्ट्वैवेत्येतदंतंसर्वमित्युक्तंस्वप्नेकर्तृत्वाभावस्तच्छब्दार्थः॥ उक्तमसंगत्वंव्यतिरेकमुखेनविशद यति॥ यदीति॥ संगवानित्यस्यव्याख्यानं॥ कामीति॥ तत्संगजैस्तत्रस्वप्नविषयविशेषेषुकामाख्यसंगवशादुत्पन्नैरपराधैरितियावत्॥ नतुलिप्यतेप्रायश्चित्त विधानस्यापिस्वप्नसूचिताशुभाशंकानिबर्हणार्थत्वाद्वस्तुवृत्तानुसारित्वाभावादितिशेषः॥ २७॥ उक्तमर्थंदृष्टांतीकृत्यजागरितेपिनिर्लेपत्वमात्मनोदर्शयति॥ यथेसा

हिना॥ तत्र प्रमाणमाह॥ तदेतदिति॥ जाग्रदवस्थायामुक्त
मकर्तृत्वमाक्षिपति॥ नन्विति॥

बृ॰र॰
३४

तत्रकल्पितंकर्तृत्वमित्युत्तरमाह॥नेत्यादिना॥तदेवविवृणोति॥आत्मनैवेति॥स्वतोऽकर्तृत्वेवाक्योपक्रमंसंवादयति॥तथाचेति॥वाक्यार्थंसंगृह्णाति॥बुध्यादीति॥कर्तृत्वमितिशेषः॥नन्वौपाधिकंकर्तृत्वंपूर्वमुक्तमिदानींतन्निराकरणेपूर्वोत्तरविरोधःस्यादित्यत्राह॥इहत्विति॥उपाधिनिरपेक्षकर्तृत्वाभावइतिशेषः॥तेनेत्युक्तंहेतुंस्फुटयति॥यस्मादिति॥आत्मनोलेपाभावेभगवद्वाक्यमपिप्रमाणमित्याह॥तथाचेति॥अवस्थात्रयेपिअसं

नकारकावभासकत्वेनकर्तृत्वोपपत्तेरात्मनैवायंज्योतिषास्तइत्यादिनात्मज्योतिषावभासितःकार्यकरणसंघातोव्यवहरतितेनास्यकर्तृत्वमुपचर्यतेनस्वतःकर्तृत्वंतथाचोक्तंध्यायतीवलेलायतीवेतिबुध्याद्युपाधिकृतमेवनस्वतःइहतुपरमार्थापेक्षयोपाधिनिरपेक्षउच्यतेदृष्ट्वै

दृष्ट्वैवपुण्यंचपापंचपुनःप्रतिन्यायंप्रतियोन्याद्रवतिबुद्धांतायैवसयत्तत्रकिंचित्पश्यत्यनन्वागतस्तेनभवत्यसंगोह्ययंपुरुषइत्येवमेवैतद्याज्ञवल्क्यसोहंभगवतेसहस्रंददाम्यतऊर्ध्वंविमोक्षायैवब्रूहीति॥२७॥ वपुण्यंचपापंचनकृत्वेतितेननपूर्वापरव्याघाताशंकायस्मान्निरुपाधिकःपरमार्थतोनकरोतिनलिप्यतेक्रियाफलेनतथाचव्यासेनभगवतोक्तमनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः॥शरीरस्थोपिकौंतेयनकरोतिनलिप्यतइति तथासहस्रदानंतुकामप्रविवेकस्यदर्शितत्वात्॥तथासवाएषएतस्मिन्स्वप्नेसवाएषएतस्मिन्बुद्धांतइत्येताभ्यांकंडिकाभ्यांअसंगत्वेवप्रतिपादितायस्माद्बुद्धांतेकृतेनस्वप्नांतगतःसंप्रसन्नो गत्वमनन्वागतत्वंचात्मनःसिद्धंत्वेद्विमोक्षपदार्थस्यनिर्णीतत्वाज्जनकस्यनैराकांक्ष्यमित्याशंक्याह॥तथेति॥यथामोक्षैकदेशस्यकर्मविवेकस्यदर्शितत्वात्पूर्वत्रसहस्रदानमुक्तंतथात्रापितदेकदेशस्यकामविवेकस्यदर्शितत्वात्तद्दानंनतुकामप्रश्नस्यनिर्णीतत्वादित्यर्थः॥द्वितीयतृतीयकंडिकयोस्तात्पर्यंसंगृह्णाति॥तथेत्यादिना॥यथाप्रथमकंडिकायाःकर्म

राम:
३४

अवस्थात्रयेप्यसंगत्वेकिंसिध्यतितदाह॥अतइति॥प्रतीकमादायस्वप्नांतशब्दार्थमाह॥प्रतियोनीति॥कथंपुनस्तस्यसुषुप्नविषयत्वमतआ
ह॥दर्शनवृत्तेरिति॥दर्शनंवासनामयंतस्यवृत्तिर्यस्मिन्निति्व्युत्पत्त्यास्वप्नोदर्शनवृत्तिस्तस्यस्वप्नशब्देनैवसिद्धत्वादंतशब्दवैयर्थ्यात्तस्यांतो
लयोयस्मिन्नितिव्युत्पत्त्यास्वप्नांतशब्देनसुषुप्नग्रहेसत्यंतशब्देनस्वप्नस्यव्यावृत्त्युपपत्तेरत्रसुषुप्नस्थानमेवस्वप्नांतशब्दितमित्यर्थः॥तत्रैववाक्य

ऽसंबद्धोभवतिस्तैन्यादिकार्यादर्शनात्तस्मात्त्रिष्वपिस्थानेषुस्वतोऽसंगएवायमतोऽमृतःस्थानत्रयधर्मविलक्षणःप्रतियोन्याद्रवतिस्व
प्नांतायैवसंप्रसादायेत्यर्थःदर्शनवृत्तेःस्वप्नशब्देनाभिधानदर्शनादंतशब्देनचविशेषणोपपत्तेःएतस्माअंतायधावतीतिचसुषुप्तंदर्श
यिष्यतियद्पुनरेवमुच्यतेस्वप्नांतेरत्वाचरित्वाएताउभावंतावनुसंचरतिस्वप्नांतंचबुद्धांतंचेतिदर्शनात्स्वप्नांतायैवेत्यत्रापिदर्शनवृ

सवाएषएतस्मिन्बुद्धांतेरत्वाचरित्वादृष्ट्वैवपुण्यंचपापंचपुनःप्रतिन्यायंप्रतियोन्याद्रवतिस्वप्नांतायैव॥२८॥

त्तिरेवस्वप्नउच्यतइतितथापिनकिंचिद्दुष्यत्यसंगताहिसिषाधयिषितासिध्यत्येवयस्माज्जागरितेदृष्ट्वैवपुण्यंचपापंचरत्वाचरित्वाचस्व
प्नांतमागतोनजागरितदोषेणानुगतोभवति॥२८॥१७॥एवमयंपुरुषआत्मास्वयंज्योतिःकार्यकरणसंघातविलक्षणःतत्प्रयोजका
भ्यांकामकर्मभ्यांविलक्षणोयस्मादसंगोह्ययंपुरुषोऽसंगत्वादित्ययमर्थःसवाएषएतस्मिन्संप्रसादेइत्याद्याभिस्तिसृभिःकंडिकाभिःप्रति

शेषानुगुण्यमाह॥एतस्मादिति॥स्वप्नांतशब्दस्यस्वप्नेप्रयोगदर्शनादिहापितस्यैवतेनग्रहणमितिपक्षांतरमुत्थाप्यांगीकरोति॥यदीत्यादिना॥सिषा
धयिषितार्थसिद्धौहेतुमाह॥यस्मादिति॥२८॥१७॥कंडिकात्रयेणसिद्धमर्थमनुवदति॥एवमिति॥आत्मनःस्थानत्रयसंचारादसिद्धोऽसंगत्वहेतुरित्याशंक

बृ. र.
३५

सप्रयोजकाद्देहद्वयाद्वैलक्षण्यंतुदूरनिरस्तमित्येवशब्दार्थः॥एवंचोदितेहेतुसमर्थनार्थंमहामत्स्यवाक्यमितिसंगतिमभिप्रेत्यसंगत्यंतरमाह॥पूर्वमपीति॥यथाप्रदर्शितोर्थःसंगत्वंकार्यकरणविनिर्मुक्तत्वंचअहार्यत्वमप्रकंप्यत्वं॥स्वच्छंदचारित्वंप्रकटयति॥संचरन्नपीति॥किंपुनर्दृष्टांतेनदार्ष्टांतिके लभ्यतेतदाह॥दृष्टांतेति॥२९॥श्येनवाक्यमवतारयितुंवृत्तंकीर्तयति॥अत्रचेति॥पूर्वसंदर्भःसप्तम्यर्थः॥देहद्वयेनसप्रयोजकेनवस्तुतोऽसंबंधेफलमा

वात्मनःकुतोयस्माज्जागरितात्स्वप्नंस्वप्नाच्चसंप्रसादंसंप्रसादात्पुनःस्वप्नंक्रमेणबुद्धांतंजागरितंबुद्धांताच्चपुनःस्वप्नांतमित्येवमनुक्रमसंचारेणस्थानत्रयस्यव्यतिरेकःसाधितःपूर्वमप्युपन्यस्तोयमर्थःसस्वप्नोभूत्वेमंलोकमतिक्रामतिमृत्योरूपाणीतितंविस्तरेणप्रतिपाद्य केवलंदृष्टांतमात्रमवशिष्टंतदूरस्यामीत्यारभतेतत्तत्रैतस्मिन्यथाप्रदर्शितेर्थेदृष्टांतोयमुपादीयतेयथालोकेमहामत्स्योमहांश्चासौमत्स्यश्च नादेयेनस्रोतसाऽहार्यइत्यर्थःस्रोतश्चविष्टंभयतिस्वच्छंदचारीउभेकूलेनद्याःपूर्वंचापरंचानुक्रमेणसंचरतिससंचरन्नपिकूलद्वयंतन्मध्यवर्ति

तद्यथामहामत्स्यउभेकूलेअनुसंचरतिपूर्वंचापरंचैवमेवायंपुरुषएतावुभावंतावनुसंचरतिस्वप्नांतंचबुद्धांतंच ॥२९॥

नोदकस्रोतोवेगेननपरवशीक्रियतेएवमेवायंपुरुषःएतौउभौअंतौअनुसंचरतिकौतौस्वप्नांतंचबुद्धांतंच॥दृष्टांतप्रदर्शनफलंतुमृत्युरूपःकार्यकरणसंघातःसहतत्प्रयोजकाभ्यांकामकर्मभ्यामनात्मधर्मोऽयंचात्मैतस्माद्विलक्षणइतिविस्तरतोव्याख्यातं॥२९॥अत्रचस्थानत्रयानुसंचारेणस्वयंज्योतिषआत्मनःकार्यकरणसंघातव्यतिरिक्तस्यकामकर्मभ्यांविविक्ततोक्तास्वतोनायंसंसारधर्मवानुपाधिनिमित्तमेवतस्यसंसारित्वमविद्याध्यारोपितमित्येषसमुदायार्थउक्तस्तत्रच ह॥सवाइति॥कथंतर्हितत्रसंसारित्वधीरित्याशंक्याह॥उपाधीति॥औपाधिकस्यापिवस्तुत्वमाशंक्याह॥

अ.
६

रामः
३५

स्थानत्रयसंबंधित्वेन विप्रकीर्णं विश्लिष्टं रूपमस्येत्यात्मा तथा॥ पुंजीकृत्य विवक्षितं सर्वविशेषणमादायेति यावत्॥ एकत्रेति वाक्योक्तिः॥ तत्र हेतुं वदन्ना-
ग्रहवाक्येन विवक्षितात्मोक्तिरित्याह॥ यस्मादिति॥ ससंगत्वादेर्दृश्यमानरूपस्य मिथ्यात्वं सूचयति॥ अविद्ययेति॥ स्वप्नवाक्ये विवक्षितात्मसिद्धिमाशं-
क्याह॥ स्वप्नेति॥ तर्हि सुषुप्तवाक्ये तत्सिद्धिर्नेत्याह॥ सुषुप्ते पुनरिति॥ तत्राप्यविद्यानिर्मोकोन प्रतिभातीति भावः॥ एवं पातनिकां कृत्वा श्येनवा-
क्यमादत्ते॥ एकवाक्यतयेति॥ पूर्ववाक्यानामिति शेषः॥ कुत्र तर्हि यथोक्तमात्मरूपं पुंजीकृत्य प्रदर्श्यते तत्राह॥ सुषुप्ते हीति॥ तत्राभयमित्यविद्या-

जाग्रत्स्वप्नसुषुप्तस्थानानां त्रयाणां संबंधित्वेन विप्रकीर्णरूप उक्तो न पुंजीकृत्यैकत्र दर्शितः॥ यस्माज्जागरिते ससंगः समृत्युः सकार्य-
करणसंघात उपलक्ष्यतेऽविद्यया स्वप्ने तु कामसंयुक्तो मृत्युरूपविनिर्मुक्त उपलभ्यते सुषुप्ते पुनर्बुद्धांतमागतो बुद्धांताच्च सुषुप्ते संप्रस-
न्नोऽसंगो भवतीत्यसंगतापि दृश्यते एकवाक्यतया तूपसंह्रियमाणं फलं नित्यमुक्तबुद्धशुद्धस्वभावतास्य नैकत्र पुंजीकृत्य प्रदर्शितेति
तत्प्रदर्शनाय कंडिकारभ्यते सुषुप्ते ह्येवंरूपतास्य वक्ष्यमाणा तद्वा अस्यैतदतिच्छंदा अपहतपाप्माऽभयं रूपमिति यस्मादेवंरूपं विलक्षणं
सुषुप्तं प्रविविक्षति तत्कथमित्याह॥ दृष्टांतेनास्यार्थस्य प्रकटीभावो भवतीति तत्र दृष्टांत उपादीयते तद्यथास्मिन्नाकाशे भौतिके श्येनो वा सुप-
र्णो वा सुपर्णशब्देन क्षिप्रः श्येन उच्यते यथाकाशेऽस्मिन्विहृत्य विपरिपत्य श्रांतो नानापरिपतनलक्षणेन कर्मणा परिखिन्नः संहत्य पक्षौ संगमय्य
संप्रधार्य पक्षौ सम्यग्लीयतेऽस्मिन्निति संलयो नीडो नीडायैव ध्रियते स्वात्मनैव धार्यते

राहित्यमुच्यते॥ सा च सुषुप्ते स्वरूपेण सत्यपि नाभिव्यक्ता भातीति
द्रष्टव्यं॥ यस्मात्सुषुप्ते यथोक्तमात्मरूपं वक्ष्यते॥ तस्मादिति यावत्॥ एवंरूपमित्येतदेव प्रकटयति॥ विलक्षणमिति॥ कार्यकरणविनिर्मुक्तं कामकर्माविद्या-
रहितमित्यर्थः॥ स्थानद्वयं हित्वा कथं सुषुप्तं प्रवेष्टुमिच्छतीति पृच्छति॥ तत्कथमिति॥ स्वप्नादौ दुःखानुभवात्तत्त्यागेन सुषुप्तं प्राप्नोतीत्याह॥ आहेति॥ अथोत्त

अस्यार्थस्यसुषुप्तिप्राप्तिरूपस्येत्येतत्॥सएवार्थस्तत्रेतिसप्तम्यर्थः॥परमात्माकाशंव्यावर्त्तयितुंभौतिकविशेषणंमहाकायोमंदवेगःश्येनः॥सुपर्णस्सुवेगवानल्पविग्रहइतिभेदः॥धारणेसौकर्यंवक्तुंस्वयमेवेत्युक्तं॥स्वप्नजागरितयोरवसानमंतमज्ञातंब्रह्म॥तथानकंचनस्वप्नमिति॥स्वप्नजागरितयोरविशेषेणसर्वदर्शनंनिषिध्यतइतिशेषः॥स्वप्नविशेषणात्स्वप्नदर्शननिषेधेपिकुतोजाग्रद्दर्शनंनिषिध्यतेतत्राह॥जागरितेपीति॥कथमयमभि

स्वयमेवयथायंदृष्टांतएवमेवायंपुरुषएतस्माएतस्मैअंतायधावतिअंतशब्दवाच्यस्यविशेषणंयत्रयस्मिन्नंतेसुप्तोनकंचननकंचिदपि कामंकामयतेतथानकंचनस्वप्नंपश्यतिनकंचनकाममितिस्वप्नबुद्धांतयोरविशेषेणसर्वःकामःप्रतिषिध्यतेकंचनेत्यविशेषताभिधानात्॥ तथानकंचनस्वप्नमितिजागरितेपियद्दर्शनंतदपिस्वप्नंमन्यतेश्रुतिरतआहनकंचनस्वप्नंपश्यतीतितथाचश्रुत्यंतरंतस्यत्रयआवसथास्त्रयः

तद्यथास्मिन्नाकाशेश्येनोवासुपर्णोवाविपरिपत्यश्रांतःसंहत्यपक्षौसंल्लयायैवध्रियतएवमेवायंपुरुषएतस्माअंतायधावति यत्रसुप्तोनकंचनकामंकामयतेनकंचनस्वप्नंपश्यति॥३०॥ स्वप्नाइतियथादृष्टांतेपक्षिणःपरिपतनजश्रमापनुत्तयेस्वनीडोपसर्पणमेवंजाग्रत्स्वप्नयोःकार्यकरणसंयोगजक्रियाफलैःसंयुज्यमानस्यपक्षिणःपरिपतनजइवश्रमोभवतितत्क्लमापनुत्तयेस्वात्मनोनीडमायतनंसर्वसंसारधर्मविलक्षणंसर्वक्रियाकारकफलायासशून्यंस्वमात्मानंप्रविशति॥३०॥यद्यस्यायंस्वभावःसर्वसंसारधर्मशून्यतापरोपाधिनि-

प्रायःश्रुतेरवगतइत्याशंक्यविशेषणसामर्थ्यादित्याह॥अतआहेति॥जागरितस्यापिस्वप्नत्वेश्रुत्यंतरंसंवादयति॥तथाचेति॥दृष्टांतदार्ष्टांतिकयोर्विवक्षितमंशंदर्शयति॥यथेत्यादिना॥संयुज्यमानस्यक्षेत्रज्ञस्येतिशेषः॥सर्वसंसारधर्मविलक्षणमितिविशेषणंव्याचष्टे॥सर्वेति॥३०॥श्येनवाक्येनात्मनःसौषुप्तंरूप

असंगत्वतः स्वतो बुध्यादिसंबंधासंभवमुपेत्याह॥ यन्निमित्तं चेति॥ सिद्धांताभिप्रायमनूद्य पूर्ववादी विकल्पयति॥ तस्मादिति॥ आगंतुकत्वमस्वाभाविकत्वं अ
थ मोक्षस्यानुपपत्तिं विवक्षित्वाह॥ यदि चेति॥ अस्तु तर्हि द्वितीयोऽत्र मोक्षोपपत्तेरित्याशंक्याह॥ तस्याश्चेति॥ माभूदविद्यात्मस्वभावस्तद्धर्मस्तु स्यादुभयं तराभावा
दित्याह॥ कथं चेति॥ तत्रोत्तरत्वेनोत्तरग्रंथमुत्थापयति॥ सर्वानर्थेति॥ तासां परमसूक्ष्मत्वदृष्टांतेन दर्शयति॥ यथेति॥ कथमन्नरसस्य वर्णविशेषप्राप्तिरित्या

यन्निमित्तं चास्य परोपाधिकृतं संसारधर्मित्वं सा चाविद्या तस्या अविद्यायाः किं स्वाभाविकत्वमाहोस्वित्कामकर्मादिवदागंतुकत्वं॥ यदि चागंतुक
त्वं ततो विमोक्ष उपपद्यते तस्याश्चागंतुकत्वे कोपपत्तिः कथं वाऽनात्मधर्मोऽविद्येति॥ सर्वानर्थबीजभूताया अविद्यायाः सतत्वावधारणार्थं पराकं
डिकारभ्यते तावै अस्य शिरःपाण्यादिलक्षणस्य पुरुषस्य ता हिता नाम नाड्यो यथा केशः सहस्रधा भिन्नस्तावता तावत्परिमाणेनाणिम्नाणुत्वे

ता वा अस्यैता हिता नाम नाड्यो यथा केशः सहस्रधा भिन्नस्तावताणिम्ना तिष्ठंति शुक्लस्य नीलस्य पिंगलस्य हरितस्य लोहितस्य
पूर्णा॥

न तिष्ठंति ताश्च शुक्लस्य रसस्य नीलस्य पिंगलस्य हरितस्य लोहितस्य पूर्णा एतैः शुक्लत्वादिभी रसविशेषैः पूर्णा इत्यर्थः एते च
रसान्नां वर्णविशेषाः वातपित्तश्लेष्मणामितरेतरसंयोगवैषम्यविशेषाद्धि चित्रा बहवश्च भवंति तास्वेवंविधासु नाडीषु सूक्ष्मासु बालाग्र
सहस्रभेदपरिमाणासु शुक्लादिरसपूर्णासु सकलदेहव्यापिनीषु

शंक्याह॥ वातेति॥ भूतस्यान्नस्य परिणामविशेषो वातबाहुल्येन नीलो भवति पित्ता
धिक्ये पिंगलो जायते श्लेष्मातिशये शुक्लो भवति पित्तात्पत्वे हरितः साम्ये च धातूनां लोहित इति तेषां मिथः संयोगवैषम्यात्तत्साम्याच्च विचित्रा बहवश्चान्नर
सा भवंति तद्व्याप्तानां नाडीनामपि तादृशो वर्णो जायते अरुणाः शिरा वातवहा नीलाः पित्तवहाः शिराः॥ असृग्वहास्तु रोहिण्यो गौर्यः श्लेष्मवहाः शिरा इति सौश्रुते द
वैद्यके॥१

क्षीनादित्यर्थः॥ नाडीस्वरूपं निरूप्य तत्र जागरिते लिंगश
रीरस्य वृत्तिं दर्शयति॥ तास्विति॥

बृ.र.
३७

एवंविधास्त्वित्यस्यैव विवरणं॥ सूक्ष्माणीत्यादि॥ पंचभूतानि दशेंद्रियाणि प्राणोंतःकरणमिति सप्तदशकं॥ जागरिते लिंगशरीरस्य स्थितिमुक्त्वा स्वप्नांत
स्थितिमाह॥ तल्लिंगमिति॥ विवक्षितां स्वप्नस्थितिमुक्त्वा श्रुत्यक्षराणि योजयति॥ अथेत्यादिना॥ स्वप्ने धर्मादिनिमित्तवशान्मिथ्यैव लिंगं नानाकारमवभास
ते तन्मिथ्याज्ञानं लिंगानुगतं मूलाविद्याकार्यत्वादविद्येति स्थिते सतीति॥ अथ शब्दार्थमाह॥ एवं सतीति॥ तस्मिन्काले स्वप्नदर्शने विज्ञेयमिति शेषः॥ इ

सप्तदशकं लिंगं वर्तते तदाश्रिताः सर्वा वासना उच्चावचसंसारधर्मानुभवजनितास्तल्लिंगं वासनाश्रयं सूक्ष्मत्वात्स्वच्छं स्फटिकमणिकल्पं नाडी
गतरसोपाधिसंसर्गवशाद्धर्माधर्मप्रेरितोद्भूतवृत्तिविशेषं स्त्रीरथहस्त्याद्याकारविशेषैर्वासनाभिः प्रत्यवभासते ऽथैवं सति यत्र यस्मिन्काले
केचन शत्रवोऽन्ये वा तस्करा मामागत्य घ्नंतीति मृषैव वासनानिमित्तः प्रत्ययोऽविद्याख्यो जायते तदेतदुच्यते एनं स्वप्नदृशं घ्नंतीवेति तथा जिनंती

अथ यत्रैनं घ्नंतीव जिनंतीव हस्तीव विच्छाययति गर्तमिव पतति यदेव जाग्रद्भयं पश्यति तदत्राऽविद्यया मन्यते

व वशीकुर्वंतीव न केचन घ्नंति नापि वशीकुर्वंति केवलं त्वविद्यावासनोद्भवनिमित्तं भ्रांतिमात्रं तथा हस्तीवैनं विच्छाययति विच्छादयति
विद्रावयति धावयतीवेत्यर्थो गर्तमिव पतति गर्ते जीर्णकूपादिकमिव पतंतमात्मानमुपलक्षयति॥ तादृशी ह्यस्य मृषा वासनोद्भवत्यसं
तनिकृष्टाऽधर्मोद्भासितांतःकरणवृत्त्याश्रयाद्दुःखरूपत्वात्किं बहुना यदेव जाग्रद्भयं पश्यति हस्त्यादिलक्षणं तदेव भयरूपमत्रास्मिन्स्वप्नेऽविने

व शब्दार्थमाह॥ नेत्यादिना॥ उक्तोदाहरणेन समुच्चितोदाहरणांतरमाह॥ तथेति॥ गर्तादिपतनप्रतीतौ हेतुमाह॥ तादृशी हीति॥ तादृशत्वं विशदयति॥
असंतेति॥ यथोक्तं वासनाप्रभवत्वं कथं गर्तपतनादेरवगतमित्याशंक्याह॥ दुःखेति॥ यदेवेत्यादिश्रुतेरर्थमाह॥ किं बहुनेति॥ भयमित्यस्य भयरूपमिति॥ व्या

अ.
६

रामः
३७

तथाह स्त्यादिनास्तिचेत्कथं स्वप्ने भातीत्याशंक्याह॥ अविद्येति॥ अथयत्रदेवइवेत्यादेस्तात्पर्यमाह॥ अथेति॥ तत्रतस्याः फलमुच्यतेइतिशेषः॥ ता
त्पर्योक्त्याथशब्दार्थमुक्काविद्यायाविषयस्वरूपेप्रश्नपूर्वकंवदन्यत्रेत्यादेरर्थमाह॥ किंविषयेति॥ इवशब्दप्रयोगात्स्वप्नएवोक्तइतिशंकांवारय
ति॥ देवतेति॥ विद्येत्युपास्तिरुक्ताअभिषिक्तोराज्यस्थोजाग्रदवस्थायामितिशेषः॥ अहमेवेदमित्याद्यवतारयति॥ एवमिति॥ यथाविद्याया‍म

मविद्यावासनयाम्‌षैवोद्भूतयामन्यते॥ अथपुनर्यत्राविद्यापकृष्यमाणाविद्याचोत्कृष्यमाणा किंविषयाकिंलक्षणाचेत्युच्यतेअथपु
नर्यत्रयस्मिन्कालेदेवइवस्वयंभवति देवताविषयाविद्यायदोद्भूताजागरितकालेतदोद्भूतयावासनयादेवमिवात्मानंमन्यतेस्वप्नेपित
दुच्यतेदेवइवराजेवराज्यस्थोभिषिक्तःस्वप्नेपिराजाहमितिमन्यतेराजवासनावासितः एवमत्यंतप्रसीयमाणाऽविद्योद्भूताचविद्यासर्वा

ऽथयत्रदेवइवराजेवाहमेवेदꣳ सर्वोस्मीतिमन्यतेसोस्यपरमोलोकः॥ ३१॥

त्मविषयायदास्वप्नेपितद्भावभावितोहमेवेदंसर्वोस्मीतिमन्यतेसयःसर्वात्मभावःसोस्यात्मनःपरमोलोकःपरमआत्मभावःस्वाभाविकोय
त्रसर्वात्मभावाद्र्वाग्बालाग्रमात्रमन्यत्वेनदृश्यतेनाहमस्मीतितदवस्थाऽविद्यातयाऽविद्ययायेप्रत्युपस्थापिताअनात्मभावालोकास्तेऽपरमाः
स्थावरांतास्तान्संव्यवहारविषयांल्लोकानपेक्ष्यायंसर्वात्मभावःसमस्तोनंतरोबाह्यःसोस्यपरमोलोकः प्रकृष्यमाणायांकार्यमुक्तंतद्व्दित्यर्थः॥ यदे
तिजागरितोक्तिः॥ इदंचैतन्यमहंचिन्मात्रमेवनतुमदतिरेकेणास्तितस्मादहंपूर्णोस्मीतिजानातीत्यर्थः॥ सर्वात्मभावस्यपरमत्वमुपपादयति॥ यत्रेत्या
दिना॥ तत्रतेनाकारेणाविद्यावस्थितेत्याह॥ तदवस्थेति॥ तस्याःकार्यमाह॥ तयेति॥ समस्तत्वंपूर्णत्वमनंतरत्वमेकरसत्वं॥ अबाह्यत्वंप्रत्यक्त्वं॥ योयथोक्तो

वाक्यार्थमुपसंहरति॥तस्मादिति॥मोसोविद्याफलमित्युत्तरत्रसंबंधः॥तस्यप्रत्यक्षत्वंदृष्टांतेनस्पष्टयति॥यथेति॥विद्याफलवदविद्याफलमपिस्वप्नेप्र
त्यक्षमित्युक्तमनुवदति॥तथेति॥विद्याफलमविद्याफलंचेत्युक्तमुपसंहरति॥तेएतेइति॥उक्तंफलद्वयंविभजते॥विद्ययेति॥असर्वोभवतीत्येतत्प्रक
टयति॥अन्यतइति॥प्रविभागफलमाह॥यतइति॥विरोधफलंकथयति॥विरुद्धत्वादिति॥अविद्याकार्यंनिगमयति॥असर्वेति॥अविद्यायाश्चेत्परिच्छि
न्नफलत्वंतदातस्यभिन्नत्वादेवयथोक्तविरोधादिदुर्वारमित्यर्थः॥विद्याफलंनिगमयति॥समस्तस्त्विति॥नन्वविद्यायाःसतत्त्वंनिरूपयितुमारब्धंनचत

तस्मादपकृष्यमाणायामविद्यायांविद्यायांचकाष्ठांगतायांसर्वात्मभावोमोक्षो यथास्वयंज्योतिष्ट्वंस्वप्नेप्रत्यक्षतउपलभ्यतेतद्वद्विद्याफलमु
पलभ्यतइत्यर्थस्तथाऽविद्यायामप्युत्कृष्यमाणायांतिरोधीयमानायांविद्यायामविद्यायाःफलंप्रत्यक्षतएवउपलभ्यतेऽथयत्रैनंघ्नंतीवजिनं
तीवेतितेएतेविद्याविद्याकार्येसर्वात्मभावःपरिच्छिन्नात्मभावश्च॥विद्ययाशुद्धयासर्वात्माभवत्यविद्ययाचासर्वोभवत्यन्यतःकुत
श्चित्प्रविभक्तोभवतियतःप्रविभक्तोभवतितेनविरुध्यतेविरुद्धत्वाद्धन्यतेजीयतेविच्छाद्यतेवाऽसर्वविषयत्वेचभिन्नत्वादेतद्भवति
समस्तस्तुसन्कुतोभिद्यतेयेनविरुध्येतविरोधाभावेकेनहन्यतेजीयतेविच्छाद्यतेवाऽतइदमविद्यायाःसतत्त्वमुक्तंभवति॥सर्वात्मा
नंसंतमसर्वात्मत्वेनग्राहयत्यात्मनोन्यद्वस्त्वंतरमविद्यमानंचप्रत्युपस्थापयतिआत्मानमसर्वमापादयतिततस्तद्विषयःकामोभव
तियतोभिद्यतेकामतःक्रियामुपादत्ते॥ततःफलंतदेतदुक्तं द्यापिदर्शितंतथाचकिंकृतंस्यादतआह॥अतइति॥कार्यवशादितियावत्॥इदं
शब्दार्थमेवस्फुटयति॥सर्वात्मानमिति॥ग्राहकत्वमेवव्यनक्ति॥आत्मनइति॥वस्त्वंतरोपस्थितिफलमाह॥ततइति॥कामस्यकार्यमाह॥कामतइति॥
क्रियातःफलंलभतेतद्भोगकालेचरागादिनाक्रियामादधातीत्यविच्छिन्नःसंसारस्तद्यावन्नसम्यग्ज्ञानंतावन्मिथ्याज्ञाननिदानमविद्यादुर्वारेत्याह॥ततइति॥

तत्रैववाक्यशेषमनुकूलयति॥वक्ष्यमाणंचेति॥अविद्यात्मनःस्वभावोनवेतिविचारेकिंनिर्णीतंभवतीत्याशंक्यवृत्तंकीर्तयति॥इदमिति॥अविद्यायाः
परिच्छिन्नफलत्वमस्तिततोवैपरीत्येनविद्यायाःकार्यमुक्तंसचसर्वात्मभावोदर्शितइतियोजना॥संप्रतिनिर्णीतमर्थंदर्शयति॥साचेति॥ज्ञानेसत्यवि
द्यानिवृत्तिरित्यत्रवाक्यशेषंप्रमाणयति॥तच्चेति॥अविद्यानात्मनःस्वभावोनिवर्त्यत्वाद्रज्जुसर्पवदित्याह॥तस्मादिति॥निवर्त्यत्वेप्यात्मस्वभावत्वे
काहानिरित्याशंक्याह॥नहीति॥अविद्यायाःस्वाभाविकत्वाभावेफलितमाह॥तस्मादिति॥३१॥२०॥तद्वाअस्यैतदित्युत्तरवाक्यतात्पर्यमाह॥इद

वक्ष्यमाणंचयत्रहिद्वैतमिवभवतितदितरइतरंपश्यतीत्यादौदमविद्यायाःसतत्त्वंसहकार्येणप्रदर्शितंविद्यायाश्चकार्यंसर्वात्मभावःप्र
दर्शितोऽविद्याविपर्ययेणसाचाविद्यानात्मनःस्वाभाविकोधर्मोयस्माद्विद्यायामुत्कृष्यमाणायांस्वयमपचीयमानासतीकाष्ठांगतायांविद्या
यांपरिनिष्ठितेसर्वात्मभावेसर्वात्मनानिवर्ततेरज्ज्वामिवसर्पज्ञानंरज्जुनिश्चये तच्चोक्तंयत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येदित्यादितस्मा
न्नात्मधर्मोऽविद्यानहिस्वाभाविकस्योच्छित्तिःकदाचिदप्युपपद्यतेसवितुरिवौष्ण्यप्रकाशयोस्तस्मात्तस्याःमोक्षउपपद्यते॥३१॥इदानींयोसौ
सर्वात्मभावोमोक्षोविद्याफलंक्रियाकारकफलशून्यस्सप्रत्यस्तोनिर्दिश्यतेयत्राविद्याकामकर्माणिनसंतितदेतत्प्रस्तुतंयत्रसुप्तोनकंचन
कामंकामयतेनकंचनस्वप्नंपश्यतीतितदेतद्वैअस्यरूपंयःसर्वात्मभावःसोस्यपरमोलोकइत्युक्तस्तदतिच्छंदाअतिच्छंदमित्यर्थः॥रूपपर
त्वाच्छंदःकामोतिगतश्छंदोयस्माद्रूपात्तदतिच्छंदंरूप नीमिति॥विद्याविद्ययोस्तत्फलयोश्चप्रदर्शनानंतरमितियावत्॥मोक्षमेवविशिनष्टि॥य
त्रेति॥पदद्वयस्यान्वयंदर्शयन्विवक्षितमर्थमाह॥तदेतदिति॥यत्रेत्यंतशब्दितंब्रह्मोच्यते॥व्याख्यातंपदद्वयमनूद्यवैशब्दस्यप्रसिद्धार्थत्वंमन्वानोरू
पशब्देनषष्ठ्याःसंबंधंदर्शयति॥तदिति॥अतिच्छंदमितिप्रयोगेहेतुमाह॥रूपपरत्वादिति॥कथमतिच्छंदमित्यात्मरूपंविवक्ष्यतेतत्राह॥छंदइति॥

छंदःशब्दस्यगायत्र्यादिछंदोविषयस्यकथंकामविषयत्वमित्याशंक्याह॥अन्योसाविति॥गायत्र्यादिविषयत्वंसत्वाछंदःशब्दस्यकामविषयत्वमतःश
ब्दार्थःयद्यात्मरूपंकामवर्जितमित्येतदत्रविवक्षितंकिमितितर्हिदैर्घ्यंप्रयुज्यतेतत्राह॥तथापीति॥स्वाध्यायधर्मत्वंछांदसत्वं॥वृद्धव्यवहारमंतरेणकाम
वाचित्वंछंदःशब्दस्यकथमित्याशंक्याह॥अस्तिचेति॥तस्यकामवचनत्वेसतिसिद्धंयद्रूपमनूद्यतस्यार्थमुपसंहरति॥अतइति॥तथाकामवर्जितत्ववदित्ये

मन्योसावस्वरांतश्छंदःशब्दोगायत्र्यादिछंदोवाचीअयंतुकामवचनोऽतःस्वरांतएवतथाप्यतिछंदाइतिपाठःस्वाध्यायधर्मोद्रष्टव्योअस्तिचलो
केकामवचनप्रयुक्तःछंदःशब्दःस्वछंदःपरछंदइत्यादावतोतिछंदमित्येवमुपनेयंकामवर्जितमेतद्रूपमित्यस्मिन्नर्थेतथाऽपहतपाप्मापाप्म
शब्देनधर्माधर्मावुच्येतेपाप्मभिःसंसृज्यतेपाप्मनोविजहातीत्युक्तत्वादपहतपाप्मधर्माधर्मवर्जितमित्येतत्॥किंच॥अभयंभयंहि

तद्वाअस्यैतदतिछंदाअपहतपाप्माऽभयꣳरूपं॥

नामाविद्याकार्यमविद्ययाभयंमन्यतइतिह्युक्तंतत्कार्यद्वारेणकारणप्रतिषेधोयमभयंरूपमित्यविद्यावर्जितमित्येतद्यदेतद्विद्या
फलंसर्वात्मभावस्तदेतदतिछंदापहतपाप्माभयंरूपंसर्वसंसारधर्मवर्जितमतोऽभयंरूपमेतदिदंचपूर्वमेवोपन्यस्तमतीतानंतरब्रा
ह्मणसमाप्तावभयंवैजनकप्राप्तोसीत्यागमतइहतुतर्कतःप्रपंचितं तत॥नन्वत्राधर्मवर्जितत्वमेवप्रतीयतेनधर्मवर्जितत्वंपाप्मशब्दस्यअधर्ममा
त्रवचनत्वादतआह॥पाप्मशब्देनेति॥उपक्रमानुसारेणपाप्मशब्दस्योभयविषयत्वेविशेषणमनूद्यविवक्षितमर्थंकथयति॥अपहतेति॥तर्हिकार्यमेवावि
द्यायानिषिध्यतेनेत्याह॥तत्कार्येति॥तस्मादर्थैतछब्दः॥वाक्यार्थमुपसंहरति॥यदेतदिति॥कूर्चब्राह्मणांतेपीदंरूपमुक्तमित्याह॥इदंचेति॥आगमवशात्तत्रो

सविशेषत्वंचेदात्मत्वानुपपत्तिरित्यादिस्तर्कः॥आगमसिद्धे किंतर्कोपन्यासेनेत्याशंक्याह॥दर्शितेति॥स्त्रीवाक्यस्यसंगतिंवक्तुंवृत्तमनुद्रवति॥अयमि
ति॥अनन्वागतवाक्येनात्मनश्चेतनत्वमुक्तमित्याह॥सयदिति॥आत्मनःसदाचैतन्यज्योतिष्ट्वंस्वरूपंनकेवलमुक्तादागमादेवसिद्धंकिंतुपूर्वोक्तादनु
मानाच्चस्थितमित्याह॥अतइति॥वृत्तमनूद्यसंबंधंवक्तुकामश्चोदयति॥सयदीति॥अत्रेतिसुषुप्तिरुक्ता॥चैतन्यस्वभावस्यैवसुषुप्तेविशेषज्ञानाभा

दर्शितागमार्थप्रत्ययदार्ढ्यायायमात्मास्वयंचैतन्यज्योतिःस्वभावःसर्वंस्वेनैवचैतन्यज्योतिषावभासयतिसयत्तत्रकिंचित्पश्यतिरमतेच
रतिंजानातिचेत्युक्तमतःस्थितंचैतन्यायतोनित्यस्वरूपचैतन्यज्योतिष्ट्वमात्मनःसयद्यात्मात्राविनष्टःचैतन्यस्वरूपःस्वेनैवरूपेणवर्त्तते
कस्मादयमहमस्मीत्यात्मानंवाबहिर्वेमानिभूतानीतिजाग्रत्स्वप्नयोरिवनजानातीत्यत्रोच्यतेशृण्वत्राज्ञानहेतुं॥एकत्वमेवाज्ञानहेतुस्त

तद्यथाप्रिययास्त्रियासंपरिष्वक्तो

कथमित्युच्यतेदृष्टांतेनहिप्रत्यक्षीभवतिविवक्षितोर्थइत्याहतत्तत्रयथालोकेप्रिययेष्टयास्त्रियासंपरिष्वक्तः———— सम्यक्परि
ष्वक्तःकामयंत्याकामुकःसन्नबाह्यमात्मनःकिंचनकिंचिदपिनवेदमत्तोन्यद्वस्त्वितिनचांतरमयमहमस्मिसुखीदुःखीचेतिअपरिष्वक्त
स्तुतयाप्रविभक्तोजानातिसर्वमेवबाह्यमाभ्यंतरंच वंसाधयति॥उच्यतइति॥सुषुप्तिःसप्तम्यर्थः॥अज्ञानंविशेषज्ञानाभावः॥कोसावज्ञानहेतुस्त
माह॥एकत्वमिति॥जीवस्यपरेणात्मनायदेकत्वंतत्कथंसुषुप्तेविशेषज्ञानाभावेकारणंतस्मिन्सत्यपिचैतन्यस्वभावानिवृत्तेरितिशंकते॥तत्कथमिति॥त
त्रस्त्रीवाक्यमुत्तरत्वेनोत्थापयति॥उच्यतइति॥तत्रदृष्टांतभागमाचष्टे॥दृष्टांतेनेति॥एकत्वकृतोविशेषज्ञानाभावोविवक्षितोर्थः॥परिष्वंगप्रयुक्तसुखाभिनि

वैज्ञानंकिमितिकिंस्वात्मेवात्मविकिमवितकिं
स्मादित्याशंक्याह॥अपरिष्वक्तइति॥

तर्हि परिष्वंगवतोपि स्वभावविपरिलोपासंभवाद्विशेषविज्ञानं स्यादिति चेन्नेत्याह ॥ परिष्वंगेति ॥ स्त्रीपुंलक्षणयोर्व्यामिश्रत्वं परिष्वंगस्तदुत्तरकालं संभोगफलप्राप्तिरेकत्वापत्तिस्तद्दशायां विशेषाज्ञानमित्यर्थः ॥ दार्ष्टांतिकं व्याकरोति ॥ एवमेवेति ॥ भूतमात्राः शरीरेंद्रियलक्षणास्ताभिश्चिदात्मनस्तादात्म्याध्यासात्तत्प्रतिबिंबो जातः स्वतोविभक्तवद्भातीत्यत्र दृष्टांतमाह ॥ सैंधवेति ॥ तस्य देहादौ प्रवेशं दृष्टांतेन दर्शयति ॥ जलादाविति ॥ उपसर्गबललब्धमर्थं कथयति ॥ एकीभूत इति ॥ तादात्म्यं व्यावर्तयितुं निरंतर इत्युक्तं ॥ परमात्माऽभेदप्रयुक्तमनवच्छिन्नत्वमाह ॥ सर्वात्मेति ॥ एवं स्त्रीवाक्याक्षराणि व्याख्याय चोद्य

परिष्वंगोत्तरकाले त्वेकत्वापत्तेर्न जानाति एवमेव यथा दृष्टांतोयं पुरुषः क्षेत्रज्ञो भूतमात्रासंसर्गतः सैंधवखिल्यवत्स्वविभक्तो जलादौ चंद्रादिप्रतिबिंबवत्कार्यकरण इह प्रविष्टः सोयं पुरुषः प्राज्ञेन परमार्थेन स्वाभाविकेन स्वेनात्मना परेण ज्योतिषा संपरिष्वक्तः सम्यक्परिष्वक्तः ॥

न बाह्यं किंचन वेद नांतरमेवमेवायं पुरुषः प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नांतरं तद्वा अस्यैतदाप्तकाम

एकीभूतो निरंतरः सर्वात्मा न बाह्यं किंचन वस्त्वंतरं नाप्यांतरमात्मन्ययमहमस्मि सुखी दुःखी वेति वेद तत्र चैतन्यज्योतिःस्वभावत्वे कस्मादिह न जानातीति यदप्राक्षीस्तत्रायं हेतुर्मयोक्तः एकत्वं यथा स्त्रीपुंसयोः परिष्वक्तयोस्तत्रार्थान्नानात्वं विशेषविज्ञानहेतुरित्युक्तं भवति ॥ नानात्वे च कारणमात्मनो वस्त्वंतरस्य प्रत्युपस्थापिकाऽविद्येत्युक्तं ॥ परिहारं प्रकटयति ॥ तत्रेति ॥ प्रत्यगात्मनीति यावत् ॥ इहेति सुषुप्तिरुच्यते यथा परिष्वक्तयोः स्त्रीपुंसयोरेकत्वं पुंसो विशेषविज्ञानाभावे कारणं तथा परेणात्मना सुषुप्ते जीवस्यैकत्वं विशेषविज्ञानाभावे तस्य तत्र कारणमुक्तमित्यर्थः ॥ स्त्रीवाक्यश्रोतमर्थमाह ॥ तत्रेति ॥ किं पुनर्नानात्वे कारणमिति तदाह ॥ नानात्वे चेति ॥ उक्तमथ यो न्यामित्यादाविति अर्थः ॥

मभिधायार्थिकमर्थं

किमेतावतासुषुप्ते विशेषविज्ञानाभावस्यायातं तत्राह॥ तत्रेति॥ विशेषविज्ञानेनानात्वं तत्र चाविद्याकारणमिति स्थिते सतीतियावत्॥ यदात्
देति सुषुप्तिर्विवक्षिता॥ प्रविविक्तत्वं कार्यकरणाविद्याविरहित्वं॥ सर्वेण पूर्णेन परमात्मनासहेत्यर्थः॥ विज्ञानात्माषष्ठ्योच्यते॥ एकत्वफलमाह
॥ततश्चेति॥ उक्तमुपजीव्याप्तकामवाक्यमवतार्यव्याचष्टे॥ यस्मादिति॥ आप्तकामत्वं समर्थयते॥ यस्मात्तमस्तमिति॥ तदेवव्यतिरेकमुखेन विशद

तत्र चाविद्यायाः यदा प्रविविक्तो भवति तदा सर्वेणैकत्वमेवास्य भवति ततश्च ज्ञानज्ञेयादिकारकविभागे ऽसति कुतो विशेषविज्ञानप्रा
दुर्भावः कामो वा संभवति स्वाभाविके स्वरूपस्थ आत्मज्योतिषि यस्मादेवं सर्वैकत्वमेवास्य रूपमतस्तद्वै अस्य आत्मनः स्वयंज्योतिःस्वभाव
स्यैतद्रूपमाप्तकामं यस्मात्समस्तं तस्मादाप्ताः कामा अस्मिन्रूपे तदिदमाप्तकामं यस्य ह्यन्यत्वेन प्रविभक्तः कामस्तदनाप्तकामं भवति॥ यथा जा

मात्मकाममकाम॰रूप॰शोकांतरं॥ ३२॥ २१॥

गरितावस्थायां देवदत्तादिरूपं न त्विदं तथा कुतश्चित्प्रविभज्यते ऽतस्तदाप्तकामं भवति किमन्यस्माद्वस्त्वंतरान्न प्रविभज्यते आहोस्विदात्मै
वतद्वस्त्वंतरमत आह नान्यदस्त्यात्मनः कथं यतः आत्मकामं आत्मैव कामा यस्मिन्रूपे ऽन्यत्र प्रविभक्ता इवान्यत्वेन काम्यमानाः यथा जागरितस्वप्नयो
स्तेऽस्यात्मैवान्यत्व यति॥ यस्य हीत्यादिना॥ विशेषणांतरमाकांक्षापूर्वकमादाय व्याचष्टे॥ किमन्यस्मादित्यादिना॥ सुषुप्तेरन्यत्रात्मनः सकाश
दन्यत्वेन प्रविभक्ता इव काम्यमानाः सुषुप्तावात्मैव कामास्तस्मादात्मकाममात्मरूपमित्येतदृष्टांतेनाह॥ यथेति॥ अवस्थाद्वये खल्वात्मनः सकाशादन्य
त्वेन प्रविभक्ता इव कामाः काम्यंत इव कामाः नैवं सुषुप्त्यवस्थायामात्मनस्ते भिद्यंते किंतु सुषुप्तस्यात्मैव कामदृत्यात्मकाममेतद्रूपमित्यर्थः॥ तस्यात्मैवेव्य

यद्यपिसुषुप्ते: विद्याविद्यतेतथापिनसाभिव्यक्तास्तीत्यनर्थपरिहारोपपत्तिरित्यर्थ:॥कामानामात्माश्रयत्वपक्षंप्रतिक्षेप्तुंतृतीयंविशेषणं॥शोकमध्यं
शोकस्यांतरंप्रत्यग्भूतमितियावत्॥तर्हिशोकवत्वंप्राप्तंनेत्याह॥सर्वथेति॥पक्षद्वयेपिशोकशून्यमात्मरूपं॥नहिशोकोयेनात्मवांस्तस्यशोक
वत्वंशोकस्यात्माधीनसत्तास्फूर्त्तेरात्मातिरेकेणाभावादित्यर्थ:॥३२॥अत्रपितेत्यादिवाक्यमवतारयितुंवृत्तमनुद्रवति॥प्रकृतइति॥अविद्यादिनिर्मो
केहेतुद्वयमाह॥असंगत्वादिति॥यद्यपिनागंतुकत्वमविद्यायायुक्तंतथाप्यभिव्यक्तास्यानर्थहेतुरागंतुकीतिद्रष्टव्यं॥स्त्रीवाक्यनिरस्याशंकामनुवद

प्रत्युपस्थापकहेतोरविद्यायाअभावादात्मकाममतएवाकाममेतद्रूपंकाम्यविषयाभावाच्छोकांतरंशोकच्छिद्रंशोकशून्यमित्येतच्छोकम
ध्यमितिवासर्वथाप्यशोकमेतद्रूपंशोकवर्जितमित्यर्थ:॥३२॥२१॥प्रकृत:स्वयंज्योतिरात्मा:विद्याकामकर्मनिर्मुक्तइत्युक्तंअसंगत्वादा
त्मन:आगंतुकत्वाच्चतेषांतत्रैवमाशंकाजायते॥चैतन्यस्वभावत्वेसत्यप्येकीभावान्नजानातिस्त्रीपुंसयोरिवसंपरिष्वक्तयोरित्युक्तंत
त्रप्रासंगिकमेतदुक्तं॥कामकर्मादिवत्स्वयंज्योतिष्ट्वमप्यस्यात्मनोनस्वभावोयस्मात्संप्रसादेनोपलभ्यतइत्येवमाशंकायांप्राप्तायांतन्निरा
करणायस्त्रीपुंसयोर्दृष्टांतोपादानेनविद्यमानस्यैवस्वयंज्योतिष्ट्वस्यसुषुप्ते:ग्रहणमेकीभावाद्धेतोर्नतुकामकर्मादिवदागंतुकमित्येतत्प्रा
संगिकमभिधाययत्प्रकृतंतदेवानुप्रवर्त्तयतिअत्रचैतत्प्रकृतविद्याकामकर्मनिर्मुक्तमेवतद्रूपंयत्सुषुप्तेआत्मनोगृह्यतेप्रत्यक्षतइति

ति॥तत्रे
ति॥कामादिविमोकेदर्शितेसतीतियावत्॥स्वभावस्यापायोनसंभवतीत्यभिप्रेत्यहेतुमाह॥यस्मादिति॥शंकोत्तरत्वेनस्त्रीवाक्यमवतार्यतत्तात्पर्यंपूर्वोक्त
मनुकीर्त्तयति॥स्वंस्वयमिति॥वृत्तमनूद्योत्तरग्रंथमुत्थापयति॥इत्येतदिति॥स्वयंज्योतिष्ट्वस्यस्वाभाविकत्वमेतच्छब्दार्थ:॥प्रासंगिकंकामादेरागंतुकत्वोक्ति:
॥प्रसंगादागतमितियावत्॥प्रकृतमेवदर्शयति॥अत्रचेति॥अतिच्छंदादिवाक्यंसप्तम्यर्थ:॥प्रत्यक्षत:स्वरूपचैतन्यवशाद्यथोक्तात्मस्वरूपस्यसुषुप्तेगृह्यमाण

कामादिसंबंधवदात्मनस्तद्रहितमपिरूपंकल्पितमेवेत्याशंक्याह॥तदेतदिति॥प्रकृतमर्थमुक्त्वोत्तरवाक्यस्यसप्तम्यर्थमाह॥अत्रैवैतस्मिन्निति॥जन
कोप्यत्रापिताभवतीतिसंबंधः॥पिताप्यत्रापिताभवतीत्युपपादयति॥तस्येत्यादिना॥यथायस्मिन्कालेतत्पितापुत्रस्यापिताभवतितद्वदित्याह॥तथेति

तदेतद्यथाभूतमेवाभिहितंसर्वसंबंधातीतमेतद्रूपमिति॥यस्मादत्रैवैतस्मिन्सुषुप्तस्थानेतिछंदापहतपाप्माभयमेतद्रूपंतस्मादत्रपिता
जनकःतस्यजनयितृत्वाद्यस्तित्वंपुत्रंप्रतितत्कर्मनिमित्तंतेनचकर्मणायमसंबद्धोस्मिन्कालेतस्मात्पितापुत्रसंबंधनिमित्तस्यकर्मणोवि
निर्मुक्तत्वात्पिताप्यपिताभवतितथापुत्रोपिपितुरपुत्रोभवतीतिसामर्थ्याद्गम्यतेउभयोर्हिसंबंधनिमित्तंकर्मतदयमतिक्रांतोवर्ततेपहत
पाप्मेतिह्युक्तंतथामाताअमातालोकाःकर्मणाजेतव्याजिताश्चतत्कर्मसंबंधाभावाल्लोकाअलोकास्तथादेवाःकर्मांगभूतास्तत्कर्मसंबंधात्यया

अत्रपितापिताभवतिमातामातालोकाअलोकादेवाअदेवावेदाअवेदाअत्रस्तेनोस्तेनोभवति॥

देवाअदेवास्तथावेदाःसाध्यसाधनसंबंधविधायकाःमंत्रलक्षणाब्राह्मणलक्षणाश्चाभिधायकत्वेनकर्मांगभूताअधीताअध्येतव्या
श्चकर्मनिमित्तमेवसंबध्यंतेपुरुषेणतत्कर्मातिक्रमणादेतस्मिन्कालेवेदाअप्यवेदाःसंपद्यंतेनकेवलंशुभकर्मसंबंधातीतःकिंतर्हि
अशुभैरप्यत्यंतघोरैःकर्मभिरसंबद्धएवायंवर्ततइत्येतमर्थमाह॥अत्रस्तेनोब्राह्मणसुवर्णहर्ताभ्रूणघ्नासहपाठादवगम्यतेसतेन
घोरेणकर्मणैतस्मिन्कालेविनिर्मुक्तोभवतियेनायंकर्मणामहापातकीस्तेनउच्यते॥ ॥नास्यार्थस्यप्रतिपादकःशब्दोस्तीत्याशंक्याह॥सामर्थ्यादि
ति॥तदेवसामर्थ्यंदर्शयति॥उभयोरिति॥सुषुप्तेकर्मातिक्रमेप्रमाणमाह॥अपहतेति॥पुनर्लोकदेवशब्दावनुवादार्थौवाक्यांतरमादायव्याचष्टे॥तथेत्यादि

ना॥साध्यसाधनसंबंधाभिधायकाब्राह्मणलक्षणाइ
तिशेषः॥

अभिधायकत्वेनप्रमाणत्वेनमेयत्वेनचेत्यर्थः॥अत्रस्तेनोऽस्तेनोभवतीत्यादेस्तात्पर्यमाह॥नकेवलमिति॥स्तेनशब्दोऽत्रचोरमात्रेभातिकथंविशेषणमित्या
शंक्याह॥भ्रूणघ्नेति॥भ्रूणहाचवरिष्टब्रह्महंतोच्यते॥तदेवघोरंकर्मविशिनष्टि॥येनेति॥महत्पातकमस्येतिव्युत्पत्त्यामहापातकीस्तेनः॥स्तेनादिवाक्ये
नचंडालादिवाक्यस्यगतार्थत्वमाशंक्याह॥नेत्यादिना॥प्रत्युत्पन्नमागंतुकं॥ब्राह्मण्यां क्षत्रियात्सूतोवैश्याद्वैदेहकस्तथा॥शूद्राज्जातस्तुचंडालःसर्वध

तथाभ्रूणहाअभ्रूणहातथाचांडालोनकेवलंप्रत्युत्पन्नेनैवकर्मणाविनिर्मुक्तः:किंतर्हिसहजेनाप्युत्पत्तिनिकृष्टजातिप्रापकेणापिविनिर्मु
क्तएवायंचंडालोनामशूद्रेणब्राह्मण्यामुत्पन्नश्चंडालएवचांडालःसजातिनिमित्तेनकर्मणाऽसंबद्धत्वादचांडालोभवतिपौल्कसःपुल्क
सएवपौल्कसःशूद्रेणैवक्षत्रियायामुत्पन्नःसोप्यपुल्कसोभवतितथाचश्रमणलक्षणेश्चकर्मभिरसंबद्धोभवतीत्युच्यतेश्रमणःपरिव्राट्य

भ्रूणहाभ्रूणहाचांडालोचांडालःपौल्कसोपौल्कसःश्रमणोश्रमणस्तापसोतापसो

त्कर्मनिमित्तोभवतिसतेनविनिर्मुक्तत्वादश्रमणस्तथातापसोवानप्रस्थोऽतापसः॥सर्वेषांवर्णाश्रमादीनामुपलक्षणार्थमुभयोर्ग्रहणं
किंबहुनाऽनन्वागतंनअनन्वागतमसंबद्धमित्येतत्पुण्येनशास्त्रविहितेनकर्मणातथापापेनविहिताकरणप्रतिषिद्धक्रियालक्षणेन
रूपपरत्वान्नपुंसकंलिंग मेवबहिष्कृतइतिस्मृतिमाश्रित्याह॥चंडालोनामेति॥जातोनिषादाच्छूद्रायांजात्याभवतिपुल्कसइतिस्मृतेःशूद्रायां
ब्राह्मणाज्जातोनिषादःसचजात्याशूद्रस्तस्मात्क्षत्रियायांजातःपुल्कसोभवतीतिव्याख्यानमुपेत्याह॥शूद्रेणैवेति॥तथाचांडालवदितियावत्॥श्रम
णादिवाक्यतात्पर्यमाह॥तथेति॥परिव्राड्तापसयोरेवग्रहणात्तत्कर्मायोगेपिसोऽपन्नस्यवर्णाश्रमांतरकर्मयोगंशंकित्वाह॥सर्वेषामिति॥आदिशब्देनवयो

सोऽसुषुप्ते पुरुषे प्रकृते कथमनन्वागतमिति नपुंसकप्रयोगस्तत्राह ॥ रूपपरत्वादिति ॥ तत्परत्वे हेतुमनुषंगं दर्शयति ॥ अभयमिति ॥ हेतुवाक्यमा
कांक्षापूर्वकमुत्थाप्य व्याचष्टे ॥ किंपुनरित्यादिना ॥ यस्मादतिच्छंदादिवाक्योक्तस्वभावोयमात्मा सुषुप्तकाले हृदयनिष्ठान्सर्वान्शोकानतिक्रामति तस्मा
देतदात्मरूपं पुण्यपापाभ्यामनन्वागतं युक्तमित्यर्थः ॥ शोकशब्दस्य कामविषयत्वं साधयति ॥ इष्टेति ॥ कथं तस्याः शोकत्वापत्तिरित्याशंक्याह ॥ इष्टं हीति ॥

मभयं रूपमिति ह्यनुवर्तते किंपुनरसंबद्धत्वे कारणमिति तद्धेतुरुच्यते तीर्णो ह्यतिक्रांतो हि यस्मादेवंरूपः तदा तस्मिन्काले सर्वान्शोकान्शो
काः कामा इष्टविषयप्रार्थना हि तद्विषयवियोगे शोकत्वमापद्यते इष्टं हि विषयमप्राप्तं वियुक्तं चोद्दिश्य चिंतयानस्तद्गुणान्संतप्यते पुरुषोऽतः शो
कोऽरतिः काम इति पर्यायाः यस्मात्सर्वकामातीतो ह्यत्रायं भवति न कंचन कामं कामयते तिच्छंदा इति ह्युक्तं तत्प्रक्रियापतितोऽयं शोकशब्दः काम

ऽनन्वागतं पुण्येनानन्वागतं पापेन तीर्णो हि तदा सर्वाञ्छोकान्

वचन एव भवितुमर्हति कामश्च कर्महेतुः ॥ वक्ष्यति हि स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते इत्यतः सर्वकामातितीर्ण
त्वाद्युक्तमुक्तं अनन्वागतं पुण्येनेत्यादि हृदयस्येति हृदयमिति पुंडरीकाकारो मांसपिंडस्तत्स्थमंतःकरणं बुद्धिर्हृदयमुच्यते तात्स्थ्या तेषां पर्यायत्वे
पि प्रकृते किमायातं तदाह ॥ यस्मादिति ॥ अत्रेति सुषुप्तिरुच्यते ॥ अतः सर्वकामातितीर्णत्वादित्युत्तरत्र संबंधः ॥ न केवलं शोकशब्दस्य कामविषयत्वमुपप
न्नमेव किंतु सन्निधेरपि सिद्धमित्याह ॥ न कंचनेति ॥ शोकशब्दस्य कामविषयत्वेपि तद्रूपसमात्रात्कथं कर्मात्ययः स्यादित्याशंक्याह ॥ कामश्चेति ॥ तत्र वाक्यं
प्रमाणयति ॥ वक्ष्यति हीति ॥ कामस्य कर्महेतुत्वे सिद्धे फलितमाह ॥ अत इति ॥ हृदयस्य शोकानतिक्रामतीत्यत्र हृदयशब्दार्थमाह ॥ हृदयमितीति ॥ मांसपिंडवि

शोकविषयत्वं यदुक्तं कामस्य शोकहेतुत्वं ... इति ॥

बृ॰ र॰ ४३

यथामंचाः क्रोशंतीति मंचक्रोशनमुच्यमानं मंचस्थास्पुरुषानुपचारादाह ॥ तथा हृदयस्थत्वाद्बुद्धेरुपचाराद्बुद्धिं हृदयशब्दो दर्शयतीत्यर्थः ॥ हृदयश ब्दार्थमुक्त्वा तस्य संबंधं दर्शयति ॥ हृदयस्येति ॥ तानतिक्रांतो भवतीति शेषः ॥ आत्माश्रया स्तेन बुद्धिमाश्रयंतीत्याशंक्याह ॥ बुद्धीति ॥ कथं तर्हि केचि दात्माश्रयत्वं तेषां वदंतीत्याशंक्य भ्रांतिवशादित्याह ॥ आत्मेति ॥ भवतु कामादीनां हृदयाश्रितत्वं तथापि तत्संबंधद्वारा तदाश्रयत्वसंभवात्कथमात्मा सुष

न्मंचाक्रोशनवद्धृदयस्य बुद्धेर्ये शोकाः बुद्धिसंश्रया हि ते कामः संकल्पो विचिकित्सेत्यादि सर्वं मन एवेत्युक्तत्वाद्बृहस्पतिचकामा येस्य हृदिश्रिताइ ति आत्मसंश्रयभ्रांत्यपनोदाय हीदं वचनं हृदिश्रिता हृदयस्य शोकाइति च हृदयकरणसंबंधातीतश्चायमस्मिन्काले तिक्रामति मृत्यो रूपाणीति ह्युक्तं हृदयसंबंधातीतत्वात्तत्संश्रयकामसंबंधातीतो भवतीति युक्ततरं वचनं येतु वादिनो हृदिश्रिताः कामवासनाश्च हृदयसंबंधिनमात्मानमु

हृदयस्य भवति ॥ ३३ ॥

पसर्पोपश्लिष्यंते हृदयवियोगेपि चात्मन्यवतिष्ठंते पुटतैलस्थइव पुष्पादिवपुष्पादिगंधइत्याचक्षते ॥ तेषां कामः संकल्पो हृदये ह्येवरू पाणि हृदस्य शोकाइत्यादीनां वचनानामानर्थक्यमेव ॥ हृदयकरणोत्पाद्यत्वादिति चेन्न हृदिश्रिता इति विशेषणान्न हि हृदयस्य करणमात्रत्वे हृदिश्रिताइति वचनं समंजसं हृदये ह्येवरूपाणि प्रतिष्ठितानीति

प्रेकामा न निवर्त्तंते तत्राह ॥ हृदयकरणेति ॥ तत्संबंधातीतत्वे श्रुतिसिद्धं फलित माह ॥ हृदयेति ॥ भर्तृप्रपंचप्रस्थानमुत्थापयति ॥ येत्विति ॥ सत्येव हृदये तन्निष्ठानां कामादीनामात्मन्युपश्लेषो न तन्निवृत्ताविस्याशंक्याह ॥ हृदयवियोगेपीति ॥ तन्मते श्रुतिविरोधमाह ॥ तेषामिति ॥ करणेन हृदयेनोत्पाद्यत्वादात्मविकाराणामपि कामादीनां हृदयसंबंधसंभवान्नानर्थक्यं श्रुतीनामिति शंकते ॥ हृदयेति ॥

अ॰ ६

राम॰ ४३

नकामादिसंबंधमात्रंहृदयस्यश्रुत्यर्थः॥किंत्वाश्रयाश्रयित्वंतच्चकरणत्वे नस्यान्नहिचक्षुराद्याश्रयंरूपादिज्ञानंदृष्टमितिपरिहरति॥नहृदीति
॥चकाराद्वचनंनसमंजसमितिसंबध्यते॥प्रदीपायत्तंघटज्ञानमितिव दंतःकरणायत्तमात्माश्रितंकामादीतितस्यतदाश्रयत्ववचनमौपचारिक
मित्याशंक्याह॥आत्मशुद्धेश्चेति॥इतश्चेदंयथार्थमेवेत्याह॥ध्यायतीवेति॥अन्यार्थासंभवाद्बुध्याश्रयणवचनस्येतिशेषः॥दक्षिणेनाक्ष्णापश्यतीत्युक्ते
वामेननपश्यतीतिवत्प्रमुच्यंतेहृदिश्रिताइतिविशेषणमाश्रित्याशंकते॥कामायेइति॥प्रकारांतरेणविशेषणस्यार्थवत्त्वंदर्शयति॥नेत्यादिना॥अत्रेति
प्रकृतश्रुत्युक्तिः॥आश्रयांतरंबुध्यतिरिक्तमात्माख्यं॥बुध्यनाश्रिताःकामाएवनसंतियदपेक्षयाहृदयाश्रयत्वविशेषणमित्याशंक्याह॥येत्विति॥प्र

चात्मशुद्धेश्चविवक्षितत्वाद्धृदयणवचनंयथार्थमेवयुक्तंध्यायतीवलेलायतीवेतिचश्रुतेरन्यार्थासंभवात्कामायेस्यहृदिश्रिताइतिवि
शेषणादात्माश्रयाअपिसंतीतिचेन्नानाश्रितापेक्षत्वान्नात्राश्रयांतरमपेक्ष्यहृदीतिविशेषणंकिंतर्हियेहृद्यनाश्रिताःकामास्तानपेक्ष्यवि
शेषणंयेत्वप्ररूढाभविष्याभूताश्चप्रतिपक्षतोनिवृत्तास्तेनैवहृदिश्रिताःसंभाव्यंतेऽतोयुक्तंतानपेक्ष्यविशेषणंयेप्ररूढावर्तमानाःविष
येतेसर्वेप्रमुच्यंतइति॥तथापिविशेषणानर्थक्यमितिचेन्नतेषुयत्नाधिक्याधेयार्थत्वादितरथाऽश्रुतमनिष्टंचकल्पितंस्यादात्माश्रयत्वंका
मानां॥नकंचन तिपक्षतोविषयदोषदर्शनादितियावत्॥कामानांवर्तमानत्वनियमाभावाद्भूतभविष्यतामपिसंभवेफलितमाह॥यइति॥हृदया
नाश्रितभूतभविष्यत्कामसंभवेपिसर्वकामनिवृत्तेर्विवक्षितत्वाद्वर्तमानविशेषणमनर्थकमितिशंकते॥तथापीति॥अतीतानागतकामाभावःसंभ
वतिस्वतःसिद्धोनतन्निवृत्तौयत्नोपेक्ष्यतेमुद्धात्मदिदृक्षुणातुमुमुक्षुणावर्तमानकामनिरासेयत्नाधिक्यमाधेयमितिज्ञापयितुंवर्त्तमानग्रहणमितिप
रिहरति॥नतेष्विति॥यदियथोक्तंव्याख्यानमनादृत्यात्माश्रयत्वमेवकामानामाश्रीयतेतदाऽश्रुतंमोक्षासंभवेनानिष्टंचकल्पितंस्यादित्याह॥इतरथेति॥अश्रुत

अर्थादात्माश्रयत्वंश्रुतमेवकामानामित्येतत्दूषयति॥नेत्यादिना॥निषेधोहिप्राप्तिमपेक्षतेनवास्तवंकामानामात्मधर्मत्वंप्राप्तिस्तुभ्रांत्यापिसंभ
वतितस्मादात्मनोवस्तुतोनकामाद्याश्रयत्वमित्यर्थः॥इतश्चात्मनोनकामाद्याश्रयत्वमित्याह॥असंगेति॥नन्वसंगवचनमात्मनःसंगाभावंसाधयति
तस्यकामित्वेनविरुध्यतेसत्राह॥संगश्चेति॥कामश्चसंगस्ततोऽसिद्धोहेतुरत्रेतिशेषः॥वाक्यांतरमाश्रित्यात्मनिकामाश्रयत्वंशंकित्वादूषयति॥आत्मे
त्यादिना॥इच्छादयःक्वचिदाश्रिताःगुणत्वाद्रूपादिवदित्यनुमानात्परिशेषात्कामाद्याश्रयत्वमात्मनःसेत्स्यतीतिशंकते॥वैशेषिकादीति॥श्रुत्यवष्टंभेन

कामंकामयतइतिप्राप्तप्रतिषेधादात्माश्रयत्वंकामानांश्रुतमेवेतिचेन्नसधीःस्वप्नोभूत्वेतिपरनिमित्तत्वात्कामाश्रयत्वप्राप्तेरसंगवचना
च्चनहिकामाश्रयत्वेऽसंगवचनमुपपद्यतेसंगश्चकामइत्यवोचामात्मकामइतिश्रुतेरात्मविषयोस्यकामोभवतीतिचेन्नव्यतिरिक्तकामा
भावार्थत्वात्तस्याः॥वैशेषिकादितंत्रन्यायोपपन्नमात्मनःकामाद्याश्रयत्वमितिचेन्नहृदिश्रिताइत्यादिविशेषश्रुतिविरोधादनपेक्ष्यास्तावै
शेषिकादितंत्रोपपत्तयःश्रुतिविरोधेन्यायाभासत्वोपगमात्स्वयंज्योतिष्ट्वबाधनाच्चकामादीनांस्वप्नेकेवलंदर्शिमात्रविषयत्वात्स्वयंज्योतिष्ट्वं
सिद्धंस्थितंचबाध्येतात्मसमवायित्वेदृश्यत्वानुपपत्तेश्चक्षुर्गतविशेषणवद्द्रष्टुर्हिदृश्यमर्थांतरभूतमितिद्रष्टुःस्वयंज्योतिष्ट्वंसिद्धंतद्बाधितं
स्याद्यदिकामाद्याश्रयत्वंपरिकल्प्येतसर्वशास्त्रार्थप्रतिषेधाच्च निराचष्टे॥नेत्यादिना॥स्वयंज्योतिष्ट्वबाधनाच्चनात्माश्रयत्वंकामादीनामितिशेषः॥
तदेवविवृणोति॥कामादीनामिति॥स्थितंचानुमानादितिशेषः॥यद्यत्रसमवेतंतत्तेननदृश्यतेयथाचक्षुर्गतंकार्ष्ण्यंतेनैवचक्षुषानदृश्यतेतथाच
कामादीनामात्मसमवायित्वेदृश्यत्वंनस्याद्दृश्यत्वबलेनैवस्वयंज्योतिष्ट्वंसाधितंतथाचतद्बाधेपूर्वोक्तमनुमानमपिबाध्येतेत्यर्थः॥कथंकामादीनामात्मदृ
श्यत्वमाश्रित्यस्वप्नेस्वयंज्योतिष्ट्वस्योपदिष्टत्वंतत्राह॥द्रष्टुरिति॥तथापितेषामात्माश्रयत्वेकानुपपत्तिस्तत्राह॥तद्बाधितमिति॥यत्तुपरमात्मैकदेशंजीवमाश्रि

तदेव स्फुटयति॥ परस्येति॥ शास्त्रार्थजातं निरवयवत्वप्रत्यगेकत्वादि तस्य कथं कोपः स्यादित्याशंक्याह॥ एतच्चेति॥ चतुर्थे चेद्द्वैतप्रपंचमतं निरस्तं त
र्हि पुनर्निराकरणमकिंचित्करमित्याशंक्याह॥ महतेति॥ परेण सह प्रत्यगात्मनो यदेकत्वं तस्य शास्त्रार्थस्य सिध्यर्थमिति यावत्॥ अंशत्वकल्पनायामपि
शास्त्रार्थसिद्धिमाशंक्याह॥ तत्कल्पनायामिति॥ भर्तृप्रपंचकल्पनाया हेयत्वमुपसंहरति॥ यथेत्यादिना॥ ३३॥ यद्वैतन्न पश्यतीत्यादेः संबंधं वक्तुं वृत्तं की

परस्यैकदेशकल्पनायां कामाद्याश्रयत्वे च सर्वं शास्त्रार्थजातं कुप्येत एतच्च विस्तरेण चतुर्थेऽवोचाम महता हि प्रयत्नेन कामाद्याश्रयकल्पनाः
प्रतिषेद्धव्या आत्मनः परेणैकत्वशास्त्रार्थसिद्धये तत्कल्पनायां पुनः क्रियमाणायां शास्त्रार्थ एव बाधितः स्याद्यथेच्छादीनामात्मधर्मत्वं कल्पयं
तो वैशेषिका नैयायिकाश्चोपनिषच्छास्त्रार्थेन न संगच्छंते तथेयमपि कल्पनोपनिषच्छास्त्रार्थबाधनान्नादरणीया॥ ३३॥ स्त्रीपुंसयोरिवैकत्वान्न

यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यति॥

पश्यतीत्युक्तं स्वयंज्योतिरिति च स्वयंज्योतिष्ट्वं नाम चैतन्यात्मस्वभावता यदि ह्यग्न्युष्णत्वादिवच्चैतन्यात्मस्वभाव आत्मा स कथमेकत्वेपि स्वभा
वं जह्यान्न जानीयात् अथ न जहाति कथमिह सुषुप्ते न पश्यति विप्रतिषिद्धमेतच्चैतन्यमात्मस्वभावो न जानाति चेति न विप्रतिषिद्धमुभयमप्ये
तदुपपद्यत एव कथं यद्वै सुषुप्ते तन्न पश्यति पश्यन्वै तत्तत्र पश्यन्नेव न पश्यति

र्तयति॥ स्त्रीपुंसयोरिति॥ चकारादुक्तं स्वयंज्योतिष्ट्वमिति संबध्यते॥ कि
मिदं स्वयंज्योतिष्ट्वमिति तदाह॥ स्वयंज्योतिष्ट्वं नामेति॥ एवं वृत्तमनूद्योत्तरवाक्यव्यावर्त्यामाशंकामाह॥ यदीत्यादिना॥ स्वभावत्यागमेवाभिनयति॥ न जानीयादि
ति॥ तत्त्यागाभावे सुषुप्ते विशेषज्ञानराहित्यमयुक्तमित्याह॥ अथेत्यादिना॥ आत्माचिद्रूपोपि सुषुप्ते विशेषं न जानाति चेत्किं दुष्यतीत्याशंक्याह॥ विप्रतिषिद्ध

उभयस्वीकारे शंकितं विप्रतिषेधमाकांक्षापूर्वकं श्रुत्या निराकरोति॥ कथमित्यादिना॥ यद्वै तदित्यादिवाक्यं चोदितार्थानुवादस्तत्परिहारस्तु (सा) पश्यन्नित्या
दिवाक्यमिति विभजते॥ यत्तत्रेति॥ नहीत्यादिवाक्यनिरस्यामाशंकामाह॥ नन्विति॥ चक्षुरादिव्यापाराभावेऽपि सुषुप्ते दर्शनादि किं न स्यादिति शंक्याह॥ व्या
पृतेष्विति॥ अस्तु तर्हि तत्रापि करणव्यापारो नेत्याह॥ न चेति॥ अयमिति सुषुप्तपुरुषोक्तिः॥ न पश्यत्येवेति नियमं निषेधयति॥ नेति॥ तत्र हेतुं वक्तुं प्रश्न

यत्तत्र सुषुप्ते न पश्यतीति जानीषे तन्न तथा गृह्णीयाः कस्मात्पश्यन्वै भवति तत्र ननु एवं न पश्यतीति सुषुप्ते जानीमो यतो न चक्षुर्वा मनो वा द
र्शने करणं व्यापृतमस्ति व्यापृतेषु हि दर्शनश्रवणादिषु पश्यतीति व्यवहारो भवति शृणोतीति वा॥ न च व्यापृतानि करणानि पश्यामस्तस्मान्न
पश्यत्येवायं न हि किं तर्हि पश्यन्नेव भवति कथं न हि यस्मात् द्रष्टुर्दृष्टिः कर्त्री या दृष्टिस्तस्या द्रष्टुर्दृष्टेर्विपरिलोपो विनाशः स न विद्यते यथाग्नेरौष्ण्यं

नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेविनाशित्वा

यावदग्निभावि तथायं चात्मा द्रष्टाऽविनाशी अतोऽविनाशित्वादात्मनो दृष्टिरप्यविनाशिनी यावद्द्रष्टृभाविनी हि सा ननु विप्रतिषिद्धमिद
मभिधीयते द्रष्टुः सा दृष्टिर्न विपरिलुप्यत इति च दृष्टिश्च द्रष्ट्रा क्रियते दृष्टिकर्तृत्वाद्धि द्रष्टेत्युच्यते क्रियमाणा च द्रष्ट्रा दृष्टिर्न विपरिलुप्य
त इति चाशक्यं वक्तुं ननु न विपरिलुप्यत इति वचनादविनाशिनी सा

पूर्वकं प्रतिज्ञां प्रस्तौति॥ किं तर्हीति॥ तत्राकांक्षापूर्वकं हेतुवाक्यमुत्थाप्य
व्याचष्टे॥ कथमित्यादिना॥ अविनाशित्वादित्येतद्व्याकुर्वन्दृष्टेर्विनाशाभावं स्पष्टयति॥ यथेत्यादिना॥ द्रष्टुर्दृष्टिर्न नश्यतीत्यत्र विरोधं चोदयति॥ नन्वि
ति॥ विप्रतिषेधमेव साधयति॥ दृष्टिश्चेति॥ कार्यस्यापि वचनादविनाशः स्यादिति शंकते॥ नन्विति॥ तस्याकारकत्वान्नैवमिति परिहरति॥ न वचनस्ये

यत्कृतकं तदनित्यमितिव्याप्त्यनुगृहीतानुमानविरोधाद्वचो नकार्यनित्यत्वबोधकमित्यर्थः॥कूटस्थदृष्टिरेवात्र द्रष्टृशब्दार्थोनदृष्टिकर्त्तातन्नविप्रतिषे
धोस्तीतिसिद्धांतयति॥नैषदोषइति॥आदित्यादिप्रकाशकत्ववदित्युक्तंदृष्टांतंव्याचष्टे॥यथेति॥दृष्टांतेविप्रतिपन्नंप्रत्याह॥नहीति॥दर्शनोपपत्ते
रित्युक्तंदार्ष्टांतिकंविभजते॥तथेति॥आत्मनोनित्यदृष्टित्वेदोषमाशंकते॥गौणमिति॥गौणस्यमुख्यापेक्षत्वान्मुख्यस्यचान्यस्यद्रष्टृत्वस्याभावा
न्नैवमित्युत्तरमाह॥नेत्यादिना॥तामेवोपपत्तिमुपदर्शयति॥यदिहीत्यादिना॥अन्यथाकूटस्थदृष्टित्वमंतरेणेतियावत्॥दर्शनप्रकारस्यान्यत्वंक्रि

न्नवचनस्यज्ञापकत्वान्नहिन्यायप्राप्तेविनाशः कृतकस्यवचनशतेनापिवारयितुंशक्यतेवचनस्ययथाप्राप्तार्थज्ञापकत्वान्नैषदोषःआ
दित्यादिप्रकाशकत्ववद्दर्शनोपपत्तेः॥यथाआदित्यादयोनित्यप्रकाशस्वभावाएवसंतःस्वाभाविकेननित्येनैवप्रकाशेनप्रकाशयंतिन
ह्यप्रकाशात्मानःसंतःप्रकाशंकुर्वंतःप्रकाशयंतीत्युच्यंतेकिंतर्हिस्वभावेनैवनित्येनप्रकाशेनतथायमप्यात्माविपरिलुप्तस्वभावया
दृष्ट्यानित्ययाद्रष्टेत्युच्यतेगौणंतर्हिद्रष्टृत्वंनैवमेवमुख्यत्वोपपत्तेः॥यदिह्यन्यथाप्यात्मनोद्रष्टृत्वंदृष्टंतदास्यद्रष्टृत्वस्यगौणत्वंनत्वात्मनो
न्योदर्शनप्रकारोस्तितदेवमेवमुख्यंद्रष्टृत्वमुपपद्यतेनान्यथायथाआदित्यादीनांप्रकाशयितृत्वंनित्येनैवस्वाभाविकेनाक्रियमाणेनप्रका
शेनतदेवचप्रकाशयितृत्वंमुख्यंप्रकाशयितृत्वांतरानुपपत्तेस्तस्मान्नद्रष्टुर्दृष्टेर्विपरिलुप्यतइतिनविप्रतिषेधगंधोप्यस्ति॥नन्वनित्य
क्रियाकर्तृविषयएवतृच्प्रत्ययांतस्यशब्दस्यप्रयोगोदृष्टोयथाछेत्ताभेत्तागंतेतितथाद्रष्टे   यात्मत्वंतस्यनिष्क्रियत्वश्रुतिस्मृतिविरोधादितिशेषः

॥द्रष्टृत्वांतरानुपपत्तौफलितमाह॥तदेवमेवेति॥नित्यदृष्टित्वेनैवेत्यर्थः॥उक्तेर्थेदृष्टांतमाह॥यथेत्यादिना॥तथात्मनोपिद्रष्टृत्वंनित्येनैवस्वाभाविके
नचैतन्यज्योतिषासिध्यतितदेवचद्रष्टृत्वंमुख्यंद्रष्टृत्वांतरानुपपत्तेरितिशेषः॥आत्मनोनित्यदृष्टिस्वभावत्वेफलितमाह॥तस्मादिति॥तज्जंतंद्रष्टृश

४ ॥ टी॰ ॥

अत्राप्यनित्यक्रियाकर्तृविषयस्तृजंतशब्दप्रयोगइतिशेषः॥तृजंतशब्दप्रयोगस्यानित्यक्रियाकर्तृविषयत्वंव्यभिचारयन्नुत्तरमाह॥नेति॥वैष
म्यमाशंकते॥भवत्विति॥आदित्यादिषुस्वाभाविकप्रकाशेनप्रकाशयितृत्वमस्तुकादाचित्कप्रकाशेनप्रकाशयितृत्वस्यतेषुसंभवान्नत्वात्मनिनित्यादृ
ष्टिरस्तितन्नानाभावात्तथाचकादाचित्कदृष्ट्यैवतस्यद्रष्टृतेत्यर्थः॥प्रतीचश्चिद्रूपस्यश्रौतत्वात्कर्तृत्वंविनाप्रकाशयितृत्वमविशिष्टमित्युत्तरमाह॥नदृष्टी
ति॥कूटस्थदृष्टिरात्मेत्युक्तेप्रत्यक्षविरोधंशंकते॥पश्यामीति॥द्विविधोनुभवः तस्यकूटस्थदृष्टित्वमनुगृह्णातिचक्षुरादिव्यापारभावापेक्षयापश्यामिन

स्यत्रापीतिचेन्नप्रकाशयितेतिदृष्टत्वाद्भवतुप्रकाशकेष्वन्यथासंभवान्नत्वात्मनीतिचेन्नदृष्ट्यविपरिलोपश्रुतेः॥पश्यामिनपश्यामीत्यनुभ
वदर्शनान्नेतिचेन्नकरणव्यापारविशेषापेक्षत्वादुक्तंचक्षुषांचस्वप्नेआत्मदृष्टेरविपरिलोपदर्शनात्तस्मादविपरिलुप्तस्वभावैवात्मनोदृष्टिरत

न्नतुतद्द्वितीयमस्तिततोन्यद्विभक्तंयत्पश्येत्॥३०॥२३॥

स्तयाःविपरिलुप्तयादृष्ट्यास्वयंज्योतिःस्वभावयापश्यन्नेवभवति॥सुषुप्तेकथंतर्हिनपश्यतीत्युच्यतेनतुतदस्तिकिंतद्द्वितीयंविषयभूतंकिं
विशिष्टंततोद्रष्टुरन्यदन्यत्वेनविभक्तंयत्पश्येद्यदुपलभेत यद्धितद्विशेषदर्शनकारणमंतःकरणंचक्षुरूपंचतदविद्ययान्यत्वेनप्रत्युपस्थापि
तमासीत्तदेतस्मिन्कालेएकीभूत पश्यामीतिधियोरात्मसाक्षित्वादित्युत्तरमाह॥नकरणेति॥आत्मदृष्टेर्नित्यत्वेहेतुंतरमाह॥उक्तेति॥आत्मदृष्टेर्नित्य
त्वमुपसंहरति॥तस्मादिति॥तन्नित्यत्वोक्तिफलमाह॥अतइति॥वाक्यांतरमाकांक्षापूर्वकमुत्थाप्यव्याचष्टे॥कथमित्यादिना॥द्वितीयादिपदानांपौनरुक्त्य
माशंक्यार्थभेदंदर्शयति॥यद्धीत्यादिना॥साभासमंतःकरणंयत्पश्येदितिविशेषदर्शनकारणंप्रमातृद्वितीयंतस्मादन्यच्चक्षुरादिप्रमाणंरूपादिचप्रमेयं

विभक्तं तत्सर्वं जाग्रत्स्वप्नयोरविद्याप्रतिपन्नं सुषुप्तिकाले कारणमात्रतां गतमभिव्यक्तं नास्तीत्यर्थः॥ सुषुप्ते द्वितीयं प्रमातृरूपं नास्तीत्येतदुपपादयति॥ आत्मन इति॥ प्रमातृरूपं पृथङ्नास्तीति शेषः॥ तथापि करणव्यापारकृतं विषयदर्शनमात्मनः स्यादित्याशंक्याह॥ द्रष्टुरिति॥ सुषुप्तस्यापि परिच्छिन्नत्वमाशंक्याह॥ अयं त्विति॥ तस्य परेणैकीभावफलमाह॥ तेनेति॥ विषयेंद्रियाभावकृतं फलमाह॥ तदभावादिति॥ किमिति विषयाद्यभावाद्विशेषदर्शनं

मात्मनः परेण परिष्वंगात् द्रष्टुर्हि परिच्छिन्नस्य विषयदर्शनाय करणमन्यत्वेन व्यवतिष्ठते ऽयं तु स्वेन सर्वात्मना संपरिष्वक्तः स्वेन परेण प्राज्ञेनात्मना प्रिययेव पुरुषः तेन न पृथक्त्वेन व्यवस्थितानि करणानि विषयाश्च तदभावाद्विशेषदर्शनं नास्ति करणादिकृतं हि तन्नात्मकृतं आत्मकृ

यद्वै तन्न जिघ्रति जिघ्रन्वै तन्न जिघ्रति न हि घ्रातुर्घ्रातेर्विपरिलोपो विद्यते विनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यज्जिघ्रेत्॥ २५॥ यद्वै तन्न रसयते रसयन्वै तन्न रसयते न हि रसयितू रसयतेर्विपरिलोपो विद्यते विनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्रसयेत्॥ २६॥ यद्वै तन्न वदति वदन्वै तन्न वदति न हि वक्तुर्वक्तेर्विपरिलोपो विद्यते विनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्वदेत्॥ २७॥ यद्वै तन्न शृणोति शृण्वन्वै तन्न शृणोति न हि श्रोतुः श्रुतेर्विपरिलोपो विद्यते विनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यच्छृणुयात्॥ २८॥

तमिव प्रत्यवभासते॥ तस्मात्तत्कृते यं भ्रांति रात्मनो दृष्टिः परिलुप्यत इति॥ २४॥ २३॥ ॥

निषिध्यते सत्त्वमेव तस्यात्मसत्त्वाधीनं किं न स्यादित्याशंक्याह॥ करणादीति॥ नन्ववस्थाद्वये विशेषदर्शनमात्मकृतं प्रतिभाति तस्य प्रधानत्वादत आह॥ आत्मकृतमिति॥ नत्वित्यादेस्तात्पर्यमुपसंहरति॥ तस्मादिति॥ प्रमातृकरणविषयकृतत्वाद्विशेषदृष्टेस्तेषां च सुषुप्ते ऽभावात्तत्कार्याया विशेषदृष्टेरपि तत्रा

यद्वैतन्नपश्यतीत्यादावुक्तन्यायमुत्तरवाक्येष्वतिदिशति॥ समानमन्यदितिं मनोबुध्योः साधारणकरणत्वात्तयोर्व्यापाराभावे कथं एषद्रष्टेत्यादिदेशः
स्यादित्याशंक्याह॥ मननेति॥ वाक्यानिव्याख्याय स्वसिद्धांतस्फुटीकरणार्थं विचारयति॥ किंपुनरिति॥ धर्मभेदो धर्माणां सतां मिथो धर्मिणश्च भे
दोस्तीति यावत्॥ धर्मस्य दृष्ट्यादिपदार्थस्येत्यर्थः॥ परोपाधिनिमित्तं चक्षुराद्युपाधिकृतमित्येतत्॥ धर्मान्यत्वं धर्मिणो मिथोन्यत्वं चेत्यर्थः॥ भर्त

समानमन्यद्यद्वैतन्नजिघ्रति यद्वैतन्नरसयते यद्वैतन्नवदति यद्वैतन्नशृणोति यद्वैतन्नमनुते यद्वैतन्नस्पृशति यद्वैतन्नविजानातीति
मननविज्ञानयोर्दृष्ट्यादिसहकारित्वेपिसति चक्षुरादिनिरपेक्षो भूतभविष्यद्वर्तमानविषयव्यापारो विद्यतइति पृथग्ग्रहणं॥ किंपुनर्दृ

यद्वैतन्नमनुते मन्वानो वै तन्नमनुते नहि मंतुर्मतेर्विपरिलोपो विद्यते विनाशित्वान्नतु तद्द्वितीयमस्ति ततोन्यद्विभक्तं यन्मन्वीत
॥३९॥ यद्वैतन्नस्पृशति स्पृशन्वै तन्नस्पृशति नहि स्प्रष्टुः स्पृष्टेर्विपरिलोपो विद्यते विनाशित्वान्नतु तद्द्वितीयमस्ति ततोन्यद्विभक्तं
यत्स्पृशेत्॥४०॥ यद्वैतन्नविजानाति विजानन्वै तन्नविजानाति नहि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते विनाशित्वान्नतु तद्द्विती
यमस्ति ततोन्यद्विभक्तं यद्विजानीयात्॥४१॥ ष्ट्यादीनामग्नेरौष्ण्यप्रकाशनज्वलनादिवद्धर्मभेद आहोस्विदभिन्नस्यैव धर्मस्य परो
पाधिनिमित्तं धर्मान्यत्वमित्यत्र केचिद्व्याचक्षते आत्मवस्तुनः स्वतएवैकत्वं नानात्वं च यथा गोर्गोद्रव्यतयैकत्वं सास्नादीनां धर्माणां पर
स्परतो भेदो यथा स्थूलेष्वेवमेकत्वं नानात्वं च तथा निरवयवेष्वमूर्तवस्तुष्वेकत्वं नानात्वं चानुमेयं॥ प्रपंचमतेन पूर्वपक्षं गृह्णाति॥ अत्रेति॥
गवादीनां सावयवत्वाद्रूपभेदसंभवादेकेन रूपेणाभिन्नत्वं रूपांतरेण भिन्नत्वमित्युभयथात्वेपि निरवयवेष्वात्मादिषु कथमनेकरसत्वसिद्धिरित्या

एकरूपत्वेवस्तुनोदृष्टांतादृष्टेर्नानारूपत्वेगवादिदृष्टांतदर्शनात्तदेवानुमेयं॥विमतंभिन्नाभिन्नंवस्तुत्वाद्गवादिवदित्यर्थः॥यद्यपिगगनादिषुभि
न्नाभिन्नत्वमनुमीयतेतथापिकथमात्मनितदनुमानमित्याशंक्यवस्तुत्वस्यनानारूपत्वेनाव्यभिचारादात्मन्यपियथोक्तमनुमानंनिरंकुशप्रसरमि
त्याह॥सर्वत्रेति॥यथोक्तानुमानानुग्रहाद्यद्वैतदित्यादेर्भिन्नाभिन्नत्वेवस्तुनितात्पर्यमितिभावः॥भर्तृप्रपंचोक्तंवाक्यतात्पर्यंनिराकरोति॥नेत्यादिना॥
चैतन्याविनाशेवाक्यतात्पर्यंचेत्कथंतर्हिदृष्ट्यादिभेदवचनमित्याशंक्याह॥यदस्येति॥तद्धिसुषुप्त्यवस्थायामुपाधेरंतःकरणस्यचक्षुरादिभेदाधीनपरि

सर्वत्राव्यभिचारदर्शनादात्मनोपितद्वदेवदृष्ट्यादीनांपरस्परंनानात्वमात्मनाचैकरूपत्वमितिनान्यपरत्वान्नहिदृष्ट्यादिधर्मभेदप्रदर्श
नपरमिदंवाक्यंयद्वैतदित्यादिकिंतर्हियदिचैतन्यात्मज्योतिःकथंनजानातिसुषुप्तेनूनमतोनचैतन्यात्मज्योतिरित्येवमाशंकाप्राप्तौतन्निरा
करणायैतदारब्धंयद्वैतदित्यादियदस्यजाग्रत्स्वप्नयोश्चक्षुराद्यनेकोपाधिद्वारंचैतन्यात्मज्योतिःस्वाभाव्यमुपलक्षितंदृष्ट्याद्यभिधेयव्यवहा
रापन्नंसुषुप्तउपाधिभेदव्यापारनिवृत्तावनुद्भास्यमानत्वादनुपलक्ष्यमाणस्वभावमपिउपाधिभेदेनभिन्नमिवयथाप्राप्तानुवादेनैवभिद्यमा
नत्वमुच्यतेतत्रदृष्ट्यादिधर्मभेदकल्पनाविवक्षितार्थाऽनभिज्ञतयासैंधवघनवत्प्रज्ञानैकरसघनश्रुतिविरोधाच्चविज्ञानमानंदंसत्यंज्ञानंप्रज्ञा
नंब्रह्मेत्यादिश्रुतिभ्यश्चशब्दप्रवृत्तेश्च॥

णामव्यापारनिवृत्तौसत्यामुपाधिभेदस्यानुद्भास्यमानत्वात्तेनभिन्नमिवानुपलक्ष्यमाणस्वभावंयद्यपितथापि
चक्षुर्द्वारेणजायमानायांबुद्धिवृत्तौव्यक्तंचैतन्यंदृष्टिर्घ्राणद्वारेणजातायांतस्यांव्यक्तंघ्रातिरित्युपाधिभेदात्प्राप्तभेदानुवादेनचैतन्यस्याविनाशित्वेवा
क्यतात्पर्यमित्यर्थः॥उक्तेवाक्यतात्पर्येस्थितेफलितमाह॥तत्रेति॥इतश्चदृष्ट्यादिभेदकल्पनानश्लिष्टेत्याह॥सैंधवेति॥तदेवस्पष्टयति॥विज्ञानमिति
॥नदृष्ट्यादिभेदकल्पनेतिशेषः॥यथाघटाकाशोमहाकाशइत्येकशब्दविषयत्वादुपाधिभेदेप्याकाशस्यैकत्वमिष्टंतथैकशब्दप्रवृत्तेरेकत्वंचितोपिस्वीकर्तं

तामेव विवृणोति॥ लौकिकी चेति॥ यत्तु सिद्धांते दृष्टांतो नास्तीति तत्राह॥ दृष्टांतेति॥ किमेकरूपत्वे वस्तुनो दृष्टांतो नास्ति किं वा मिथ्यात्वे तन्नानारूपस्येति
वक्तव्यं नाद्यो नानारूपवस्तुवादिभिरप्येकैकरूपस्यानवस्थापरिहारार्थमनानारूपत्वांगीकारादस्माकं दृष्टांतसिद्धेर्वस्तुत्वहेतोश्च तत्रैवानैकांतिकत्वात्त
स्मादेकरूपमेव वस्तु स्वीकर्तव्यमिति भावः॥ द्वितीयं दूषयति॥ यथा हीति॥ तन्निमित्तमेवेत्यत्र तच्छब्देन स्वच्छस्वाभाव्यं परामृश्यते स्फटिके हरितादि
धर्माणां स्वाभाविकत्वं किं न स्यादित्याशंक्याह॥ नेति॥ तस्य हि स्वच्छस्वाभाव्यं तद्दर्शनेन हरिताद्युपाधिभेदसंबंधव्यतिरेकेणेति यावत्॥ एकस्य नानारू

लौकिकी च शब्दप्रवृत्तिश्चक्षुषा रूपं विजानाति श्रोत्रेण शब्दं विजानाति रसनेनान्नस्य रसं विजानातीति च सर्वत्रैव च दृष्ट्यादिशब्दाभि
धेयानां विज्ञानशब्दवाच्यतामेव दर्शयति शब्दप्रवृत्तिश्च प्रमाणं दृष्टांतोपपत्तेश्च यथा हि लोके स्वच्छस्वाभाव्ययुक्तः स्फटिकस्तन्निमित्त
मेव केवलं हरितनीललोहिताद्युपाधिभेदसंयोगात्तदाकारत्वं भजते न च स्वच्छस्वाभाव्यव्यतिरेकेण हरितनीललोहितादिलक्षणाधर्मभे
दाः स्फटिकस्य कल्पयितुं शक्यं तेन तथा चक्षुराद्युपाधिभेदसंयोगात्प्रज्ञानघनस्वभावस्यैवात्मज्योतिषो दृष्ट्यादिशक्तिभेद उपलक्ष्यते प्र
ज्ञानघनस्य स्वच्छस्वाभाव्यात्स्फटिकस्वच्छस्वाभाव्यवत्त्वं ज्योतिष्ट्वाच्च॥ यथा चादित्यज्योतिरवभास्यभेदैः संयुज्यमानं हरितनीलपीतलो
हितभेदैरविभाग्यं तदाकारावभासं भवति तथा च कृत्स्नं जगदवभासयच्चक्षुरादीनि च तदाकारं भवति न याचेत्तमात्मनैवायं ज्योतिषास्त इत्या

पत्वं मिथ्येत्यत्र दृष्टांतमुक्त्वा दार्ष्टांतिकमाह॥ तथेति॥ आत्मा मिथ्या नानानिर्भास उपहितत्वात्स्फटिकवदित्यर्थः॥ किंच॥ आत्मा मिथ्या नानात्वाधारः स्व
च्छत्वात्संप्रतिपन्नवदित्याह॥ प्रज्ञानेति॥ किंच॥ आत्माकल्पितनानात्वाधारो ज्योतिष्ट्वादादित्यादिज्योतिर्वदित्याह॥ स्वयमिति॥ आदित्यादावकल्पितोपि भे
दोस्तीत्याशंक्य विवक्षितं साम्यमाह॥ यथा चेत्यादिना॥ अविभाग्यं वस्तुतो विभागायोग्यमिति यावत्॥ चक्षुरादीनि चावभासयदिति संबंधः॥ आत्मनः सर्वावभा

यत्तु निरवयवेष्वपि नानारूपत्वमनुमेयमिति तत्राह॥ न चेति॥ आकाशादीनां दृष्टांतत्वमाशंक्य निराचष्टे॥ यद्पीत्यादिना॥ कथमाकाशस्यानेकधर्मव
त्वं सोपाधिकमित्याशंक्य तस्य सर्वगतत्वं तावदौपाधिकमिति साधयति॥ आकाशस्येति॥ कथं तर्हि सर्वगतत्वव्यवहारस्तत्राह॥ सर्वोपाधीति॥ नन्वाका
शस्य सर्वत्र गमनमपेक्ष्य सर्वगतत्वं किमिति न व्यवह्रियते तत्राह॥ न त्विति॥ आकाशे गमनायोगं वक्तुं तत्स्वरूपमाह॥ गमनं हीति॥ ननु कुतश्चिद्विभागे
संयोगे च केनचिद्देशेन तत्कारणीभूता क्रिया पिश्येनादाविवाकाशे भविष्यतीनेत्याह॥ सा चेति॥ सावयवे हि श्येनादौ क्रिया दृश्यते आकाशं त्वविशेषं नि

न च निरवयवेष्वनेकात्मता शक्यते कल्पयितुं दृष्टांताभावात् यद्प्याकाशस्य सर्वगतत्वादिधर्मभेदः परिकल्प्यते परमाण्वादीनां च गंधरसा
द्यनेकगुणवत्त्वं तद्पि निरूप्यमाणं परोपाधिनिमित्तमेव भवत्याकाशस्य तावत्सर्वगतत्वं नाम न स्वतो धर्मोस्ति सर्वोपाधिसंश्रयाद्धि सर्व
त्रस्वेन रूपेण सत्त्वमपेक्ष्य सर्वगतत्वव्यवहारो न त्वाकाशः क्वचिद्गतो वाऽगतो वा स्वतो गमनं हि नाम देशांतरस्थस्य देशांतरेण संयोगका
रणं सा च क्रिया नैवाविशेषे संभवति एवं धर्मभेदा नैव संत्याकाशे तथा परमाण्वादावपि॥ परमाणुर्नाम पृथिव्या गंधघनायाः परमः सूक्ष्मो
वयवो गंधात्मक एव न तस्य पुनर्गंधवत्त्वं नाम गुणः शक्यते कल्पयितुं अथ तस्यैव रसादिमत्त्वं स्यादिति चेन्न तत्राप्यबादिसंसर्गनिमित्तत्वात्

रवयवं कुतस्तत्र क्रियेत्यर्थः॥ तथापि धर्मांतराण्याकाशे भविष्यंतीत्याशंक्य तेषामपि क्रियापूर्वकाणामुक्तन्यायकवलीकृतत्वमाह॥ एवमिति॥ भेदाभे
दाभ्यां दुर्वचत्वाच्च तत्र धर्मधर्मिभावो न संभवतीति भावः॥ आकाशे दर्शितं न्यायमन्यत्रापि संचारयति॥ तथेति॥ पार्थिवत्वं परमाणोरेकं रूपं गंधव
त्वं चापरमित्यनेकरूपत्वमित्याशंक्याह॥ परमाणुर्नामेति॥ न हि पार्थिवत्वातिरेकि गंधवत्त्वं प्रामाणिकमिति भावः वैशेषिकपरिभाषामाश्रित्य शं
कयति॥ अथेति॥ पार्थिवे परमाणौ रसादिमत्त्वमनौपाधिकं न भवति जलादिसंसर्गकृतत्वात्तथा च निरुपाधिकभेदेनेदमुदाहरणमिति परिहरति॥

उक्तन्यायस्य दृगादावपि समत्वं मत्वोपसंहरति॥ तस्मादिति॥ संति परस्मिन्नात्मनि दृगादिशक्तिभेदास्तेषां मध्ये दृक्शक्तिश्चक्षुरात्मना रूपात्म
नाच पृथगेव परिणमते घ्रातिशक्तिश्च घ्राणात्मना गंधात्मना चेत्यनेन क्रमेण परस्मिन्परिणामकल्पनाभर्त्तृप्रपंचैर्या कृता सापि परस्यैकरूपत्वोप
पादनेन निरस्तेत्याह॥ एतेनेति॥ ४१॥ ३०॥ औपाधिको दृष्ट्यादिभेदो न वास्तवोस्तीत्युपपाद्य वृत्तमनुद्रवति॥ जाग्रदिति॥ यत्रेत्युत्तरवाक्यव्यावर्त्यां

तस्मान्न निरवयवस्यानेकधर्मवत्वे दृष्टांतोस्ति एतेन दृगादिशक्तिभेदानां पृथक्चक्षुरूपादिभेदेन परिणामभेदकल्पना परमात्मनि प्र
युक्ता॥ ४१॥ ३०॥ जाग्रत्स्वप्नयोर्विषयद्विजानीयान्न तद्द्वितीयं प्रविभक्तमन्यत्वेन नास्तीत्युक्तमतः सुषुप्ते न विजानाति विशेषं॥ ननु यद्य
स्यायमेव स्वभावः किं निमित्तमस्य विशेषविज्ञानं स्वभावपरित्यागेनाथ विशेषविज्ञानमेवास्य स्वभावः कस्मादेष विशेषं न जानातीत्युच्य

यत्र वा अन्यदिव स्यात्तत्रान्योन्यत्पश्येदन्योन्यज्जिघ्रेदन्योन्यद्रसयेदन्योन्यद्वदेदन्योन्यच्छृणुयादन्योन्यन्मन्वीतान्योन्यत्
स्पृशेदन्योन्यद्विजानीयात्॥ ४२॥ ते शृणु यत्र यस्मिन्जागरिते स्वप्ने वान्यदिवात्मनो वस्त्वंतरमिवाविद्यया प्रत्युपस्थापितं भवति
तत्र तस्मादविद्याप्रत्युपस्थापितादन्योन्यमिवात्मानं मन्यमानोऽसत्यात्मनः प्रविभक्ते वस्त्वंतरेऽसति चात्मनि ततः प्रविभक्तोऽन्योन्यत्पश्येदु
पलभेत तत्त्वदर्शितं स्वप्ने प्रत्यक्षतो घ्नंतीव जिनंतीवेति तथान्योन्यं पश्येज्जिघ्रेद्रसयेद्वदेच्छृणुयान्मन्वीत स्पृशेद्विजानीयादिति॥ ४२॥ ३१॥

माशंकां दर्शयति॥ नन्विति॥ किमस्य विशेषविज्ञानराहित्यं स्वरूपं किं वा विशेषविज्ञानवत्त्वमाद्ये जाग्रत्स्वप्नयोरनुपपत्तिर्द्वितीये सुषुप्ते रसिद्धिरिति भा
वः॥ प्रतीचश्चिन्मात्रज्योतिषो विशेषविज्ञानराहित्यमेव स्वरूपं तथापि स्वाविद्याकल्पितविशेषविज्ञानवत्त्वमाश्रित्यावस्थाद्वयं सिध्यतीत्युत्तरवाक्यम

[illegible]

पूर्वोक्तवस्तूपसंहारार्थंसलिलवाक्यमुत्थापयति॥ यत्रेत्यादिना॥ तेनाविद्यायाः शांतत्वेनेतियावत्॥ वस्तुनोऽभावात्तत्रेतिशेषः॥ सुषुप्तेविशेषवि
ज्ञानाभावप्रयुक्तंफलमाह॥ अतइति॥ पूर्वमेवास्यार्थस्योक्तत्वंद्योतयितुंहिशब्दः॥ संपरिष्वंगफलंसमस्तत्वंअपरिछिन्नत्वंतत्फलंसंप्रसन्नत्वं॥ असं
प्रसादोहिपरिछेदाभिमानकृतः॥ संप्रसन्नत्वेहेत्वंतरमाह॥ आप्तकामइति॥ तदेवसंप्रसन्नत्वंदृष्टांतेनस्पष्टयति॥ सलिलवदिति॥ उक्तेर्थेवाक्याक्षराणि

यत्रपुनः साऽविद्यासुषुप्तेवस्त्वंतरप्रत्युपस्थापिकाशांतातेनान्यत्वेनाविद्याप्रविभक्तस्यवस्तुनोऽभावात्तत्केनकंपश्येज्जिघ्रेद्विजानीयाद्वाऽतः
स्वेनैवहिप्राज्ञेनात्मनास्वयंज्योतिःस्वभावेनसंपरिष्वक्तउपसंहृतकरणःसमस्तःसंप्रसन्नआप्तकामआत्मकामःसलिलवत्स्वच्छीभूतःसलि
लइवसलिलएकोद्वितीयस्याभावादविद्ययाहिद्वितीयःप्रविभज्यतेसाचशांतात्रातएकोद्रष्टादृष्टेरविपरिलुप्तत्वादात्मज्योतिःस्वभावायाअ

सलिलएकोद्रष्टाद्वैतोभवत्येषब्रह्मलोकःसम्राडितिहैनमनुशशासयाज्ञवल्क्य॥

द्वैतोद्रष्टव्यस्यद्वितीयस्याभावादेतदमृतमभयमेषब्रह्मलोकोब्रह्मैवलोकोब्रह्मलोकः॥ परएवायमस्मिन्कालेव्यावृत्तकार्यकरणोपाधिभेदः
स्वेआत्मज्योतिषिशांतसर्वसंबंधोवर्ततेहेसम्राडितिहएवंहैनंजनकमनुशशासअनुशिष्टवान्याज्ञवल्क्यइतिश्रुतिवचनमेतत्कथंवानुश
शास॥ एषास्यविज्ञानमयस्यपरमागतिर्यास्त्वन्यादेहग्रहणलक्षणाब्रह्मादिस्तंबपर्यंताअविद्याकल्पिताःतागतयोऽतो पोजयति॥ स
लिलइवेति॥ द्वितीयस्याभावंसुषुप्तेव्यक्तीकरोति॥ अविद्ययेति॥ अद्रष्टाद्रष्टेतिवाछेदः॥ एकोऽद्वैतइत्यभ्यासस्तात्पर्यलिंगं॥ तस्यपरमपुरुषार्थत्वंद
र्शयन्कूटस्थत्वमाह॥ एतदिति॥ किमितिषष्ठीसमासमुपेक्ष्यकर्मधारयोगृह्यतेतत्राह॥ परएवेति॥ अस्मिन्कालेसुषुप्त्यवस्थायामित्येतत्॥ परमत्वंस

प्रस्तुतंसमस्तात्मभावंविशेषविज्ञानराहित्येनविशिनष्टि॥यत्रेति॥सर्वात्मभावाख्यस्यलोकस्यपरमत्वमुपपादयति॥येन्यदिति॥मीयतेपरिच्छिद्यतेसा
ध्यतइतियावत्॥सौषुप्तस्यसर्वात्मभावस्यपरमानंदत्वंविशदयति॥यानीति॥आत्मनोनवच्छिन्नानंदत्वेछांदोग्यश्रुतिंसंवादयति॥योवैभूमेति॥ननुवैष
यिकमेकंसुखमात्मरूपंचापरमितिसुखभेदांगीकारादपसिद्धांतःस्यादित्याशंक्यमुख्यामुख्यभेदेनतदुपपत्तेर्मैवमित्याह॥यत्रेत्यादिना॥किंच॥वस्तु

ऽपरमाअविद्याविषयत्वादियंतुदेवत्वादिगतीनांकर्मविद्यासाध्यानांपरमोत्तमायःसमस्तात्मभावोयत्रनान्यत्पश्यतिनान्यच्छृणोतिनान्यद्वि
जानातीत्येषैवचपरमासंपत्सर्वासांसंपदांविभूतीनामियंपरमास्वाभाविकत्वादस्याःकृतकाह्यन्याःसंपदस्तथैषोस्यपरमोलोकोयेन्येक
र्मफलाश्रयालोकास्तेऽस्मादपरमाअयंतुनकेनचनकर्मणामीयतेस्वाभाविकत्वादेषोस्यपरमोलोकस्तथैषोस्यपरमआनंदोयान्यन्यानि

एषास्यपरमागतिरेषास्यपरमासंपदेषोस्यपरमोलोकएषोस्यपरमआनंदएतस्यैवानंदस्यान्यानिभूतानिमात्रामुपजीवंति॥४३॥

विषयेंद्रियसंबंधजनितानिआनंदजातानितान्यपेक्ष्यैषोस्यपरमआनंदोनित्यत्वाद्योवैभूमातत्सुखमितिश्रुत्यंतराद्यत्रनान्यत्पश्यतिअन्य
द्विजानातितदल्पंमर्त्यमसुख्यंसुखमिदंतुतद्विपरीतमतएषोस्यपरमआनंदएतस्यैवानंदस्यमात्रांकलामविद्याप्रत्युपस्थापितांविषयें
द्रियसंबंधकालेविभाव्यामन्यानिभूतान्युपजीवंतिकानितान्येवानंदादविद्ययाप्रविभज्यमानस्वरूपाण्यन्यत्वेनतानिब्रह्मणःपरिक
ल्प्यमानान्यन्यानिसंत्युपजीवंतिभूतानिविषयेंद्रियसंपर्कद्वारेणविभाव्यमानां॥४३॥ तोनास्त्येवात्मसुखातिरिक्तंवैषयिकंसुखमित्या
ह॥एतस्येति॥ब्रह्मातिरिक्तचेतनाभावेकान्युपजीवकानिस्युरित्याशंक्यपरिहरति॥कानीत्यादिना॥विभाव्यमानामानंदस्यमात्रामितिपूर्वेणसंबं

सयोमनुष्याणामित्यादिवाक्यतात्पर्यमाह॥यस्येति॥यथासैंधवावयवैः सैंधवाचलंलोकोबोधयतितथातस्यानंदस्यमात्रानामावयवास्तत्प्रदर्श
नद्वारेणावयविनंपरमानंदमधिगमयितुमिछन्ननंतरोग्रंथः प्रवृत्तइत्यर्थः॥तात्पर्यमुक्त्वाक्षराणिव्याचष्टे॥सयः कश्चिदित्यादिना॥राद्धत्वमविक
लत्वंचेत्समृद्धत्वेनपुनरुक्तिरित्याशंक्याह॥समग्रेति॥तदेवसमृद्धत्वमपीत्याशंक्याव्याकरोति॥उपभोगेति॥अंतर्बहिः संपत्तिभेदादपुनरुक्तिरि

यस्यपरमानंदस्यमात्राअवयवाः ब्रह्मादिभिर्मनुष्यपर्यंतैरुपजीव्यंतेतदानंदमात्रावयवद्वारेणमात्रिणंपरमानंदमधिजिगमयिषन्ना
हसैंधवलवणशकलैरिवलवणशैलंसयः कश्चिन्मनुष्याणांमध्येराद्धः संसिद्धोऽविकलः समग्रावयवइत्यर्थः समृद्धः उपभोगोपकरण
संपन्नोभवति॥किंचान्येषांसमानजातीयानामधिपतिः स्वतंत्रः पतिर्नमांडलिकः सर्वैः समस्तैर्मानुष्यकैरितिदिव्यभोगोपकरणनिवृत्त्य

सयोमनुष्याणांराद्धः समृद्धोभवत्यन्येषामधिपतिः सर्वैर्मानुष्यकैर्भोगैः संपन्नतमः॥

र्थंमनुष्याणामेवयानिभोगोपकरणानितैः संपन्नानामप्यतिशयेनसंपन्नः संपन्नतमः समनुष्याणांपरमआनंदस्तत्रानंदानंदिनोरभेद
निर्देशान्नार्थांतरभूतत्वमित्येतत्॥परमानंदस्यैवेयंविषयविषय्याकारेणमात्राप्रसृतेतिह्युक्तंयत्रवाअन्यदिवस्यादित्यादिवाक्येनतस्माद्यु
क्तोयंसपरमआनंदइत्यभेदनिर्देशोयुधिष्ठिरादि तिभावः॥नकेवलमुक्तमेवतस्यविशेषणंकिंतुविशेषणांतरंचास्तीत्याह॥किंचेतिविशेषण
तात्पर्यमाह॥दिव्येति॥तदनिवर्तनेतस्यवक्ष्यमाणगंधर्वादिष्वंतर्भावः स्यादितिभावः॥अतिशयेनसंपन्नइतिशेषः॥अभेदनिर्देशस्याभिप्रायमाह॥तत्रे
ति॥प्रकृतंवाक्यंसप्तम्यर्थः॥आत्मनः सकाशादानंदस्येतिशेषः॥औपचारिकत्वमभेदनिर्देशस्यभविष्यतीत्याशंक्याह॥परमानंदस्येति॥तस्यैवविषयित्वंविषय

त्वमितिस्थितेफलितमाह॥तस्मादिति॥यथोक्तोमनुष्यो
नरदृष्टिपथमवतरतीत्याशंक्याह॥युधिष्ठिरादीति॥

अथयेशतंमनुष्याणामित्यादेस्तात्पर्यमाह॥हष्टमिति॥शतगुणेनोत्तरोत्तरत्रानंदस्योत्कर्षप्रदर्शनक्रमेणपरमानंदमुन्नीयतमधिगमयत्युत्तरेणग्रंथेनेति
संबंधः॥परमानंदमेवविशिनष्टि॥यत्रेति॥भेदःसंख्याव्यवहारः॥उक्तमेवप्रपंचयति॥यत्रेत्यादिना॥परमानंदेविवृद्धिकाष्ठायांहेतुमाह॥अन्येति॥यद्य
पियस्येत्यादिनोक्तमेतत्तथापीहाक्षरव्याख्यानावसरेतदेवविवृतमित्यविरोधः॥तत्तदानंदप्रदर्शनानंतर्यंतत्रतत्राथशब्दार्थः॥तत्तद्वाक्योपक्रमोवा॥

तुल्योराजात्रोदाहरणंदृष्टंमनुष्यानंदमादिंकृत्वाशतगुणोत्तरोत्तरक्रमेणोन्नीयपरमानंदंयत्रभेदोनिवर्ततेतमधिगमयतियत्रायमानंदःश
तगुणोत्तरोत्तरक्रमेणवर्धमानोयत्रवृद्धिकाष्ठामनुभवतियत्रगणितभेदोनिवर्ततेऽन्यदर्शनश्रवणमननाभावात्तंपरमानंदंविवक्षन्नाह
अथयेमनुष्याणामेवंप्रकाराःशतमानंदभेदाःसएकःपितृणांतेषांविशेषणंजितलोकानामितिश्राद्धादिकर्मभिःपितॄंस्तोषयित्वातेनकर्म

समनुष्याणांपरमआनंदोथयेशतंमनुष्याणामानंदाःसएकःपितृणांजितलोकानामानंदोथयेशतंपितृणांजितलोकाना
मानंदाः॥

णाजितोलोकोयेषांतेजितलोकाःपितरस्तेषांपितृणांजितलोकानांमनुष्यानंदशतगुणीकृतपरिमाणएकआनंदोभव
ति॥सोपिशतगुणीकृतोगंधर्वलोकएकआनंदोभवतिसचशतगुणीकृतःकर्मदेवानामेकआनंदोग्निहोत्रादिश्रौतकर्मणायेदेवत्वंप्रा
प्नुवंतितेकर्मदेवास्तथैवाजानदेवानामेकआनंदःआजानतएवोत्पत्तितएवयेदेवास्तेआजानदेवायश्चश्रोत्रियोऽधीतवेदःअवृजिनोवृ
जिनंपापंतद्रहितोयथोक्तकारीत्यर्थः॥

एवंप्रकारस्त्वंसमृद्धत्वादिपितृणामानंदइतिसंबंधः॥श्राद्धादिकर्मभिरित्यादिशब्देनपिंडपितृयज्ञादिग्र
ह्यते॥केतेकर्मदेवानामतआह॥अग्निहोत्रादीति॥यथागंधर्वानंदशतगुणीकृतःकर्मदेवानामेकआनंदस्तथाकर्मदेवानामानंदःशतगुणीकृतःसन्ना

कुत्रवीततृष्णत्वंतत्राह॥ आजानदेवेभ्यइति॥ श्रोत्रियादिवाक्यस्यप्रकृतासंगतिमाशंक्याह॥ तस्यचेति॥ एवंभूतस्यविशेषणत्रयविशिष्टस्येतियावत्॥ प्रजापतिलोकशब्दस्यब्रह्मलोकशब्दादर्थभेदमाह॥ विराडिति॥ यथाविराडात्मन्याजानदेवानंदः शतगुणीकृतःसन्नेकआनंदोभवतितथा

अकामहतोवीततृष्णः आजानदेवेभ्योऽर्वाग्प्राप्तवंतोविषयास्तेषुतस्यचैवंभूतस्याजानदेवैःसमानआनंदइत्येतदन्वाकृष्यतेचशब्दात्॥ तच्छतगुणीकृतपरिमाणःप्रजापतिलोकएकआनंदोविराट्शरीरेतथातद्विज्ञानवान्श्रोत्रियोधीतवेदश्चावृजिनइत्यादिपूर्ववत्तच्छ

सएकोगंधर्वलोकआनंदोथयेशतंगंधर्वलोकआनंदाःसएकःकर्मदेवानामानंदोयेकर्मणादेवत्वमभिसंपद्यंतेथयेश
तंकर्मदेवानामानंदाःसएकआजानदेवानामानंदोयश्चश्रोत्रियोवृजिनोकामहतोथयेशतमाजानदेवानामानंदाःसएकः
प्रजापतिलोकआनंदोयश्चश्रोत्रियोवृजिनोकामहतोथयेशतंप्रजापतिलोकआनंदाःसएकोब्रह्मलोकआनंदोयश्चश्रो
त्रियोवृजिनोकामहतो

तगुणीकृतपरिमाणएकआनंदोब्रह्मलोकेहिरण्यगर्भात्मनियश्चेत्यादिपूर्ववदेवातःपरंगणितनि
वृत्तिरेषपरमआनंदइत्युक्तःयस्यचपरमानंदस्यब्रह्मलोकाद्यानंदमात्राउदधेरिवविप्रुषः॥ एवंशतगुणोत्तरोत्तरवृध्युपेताआनंदायत्रै
कतांयांतियश्चश्रोत्रियप्रत्यक्षोथैषएवसंप्रसादलक्षणःपरमआनंदः॥ विराडात्मोपासिताश्रोत्रियत्वादिविशेषणोविराजातुल्यानंदःस्यादि
त्याह॥ तथेति॥ तच्छतगुणीकृतइतितच्छब्दोविराडानंदविषयः॥ श्रोत्रियत्वादिविशेषणवानपिहिरण्यगर्भोपासकस्तेनतुल्यानंदोभवतीत्याह॥ यश्चेति
॥ हिरण्यगर्भानंदादुपरिष्टादपिब्रह्मानंदेगणितभेदेप्राकरणिकेप्राप्तेप्रत्याह॥ अतःपरमिति॥ एषोस्यपरमआनंदइत्युपक्रम्यकिमित्यानंदांतरमुपदर्शि

तथापिसौषुप्तंसर्वात्मत्वमुपेक्षितमितिचेन्नेत्याह॥यस्यचेति॥प्रकृतस्यब्रह्मानंदस्यापरिछिन्नत्वमाह॥तत्रहीति॥अनवछिन्नत्वफलमाह॥भूम
त्वादिति॥ब्रह्मानंदादितरेपरिछिन्नामर्त्याश्चेत्याह॥इतरइति॥अथयत्रान्यत्पश्यतीत्यादिश्रुतेरितिभावः॥श्रोत्रियादिपदानिव्याख्यायतात्पर्यंदर्श
यति॥अत्रचेति॥मध्येविशेषणेषुत्रिष्वितियावत्॥तुल्येसर्वपर्यायेष्वितिशेषः॥विशेषणांतरेविशेषमाह॥अकामहतत्वेति॥यथोक्तंविभागमु
पपादयितुंसिद्धमर्थमाह॥अत्रैतानीति॥यश्चेत्यादिवाक्यंसप्तम्यर्थः॥तस्यतस्यानंदस्येतिदेवप्रजापत्यादिनिर्देशः॥अर्थादभिहितत्वेदृष्टांतमाह॥
यथेति॥येकर्मणादेवत्वमित्यादिश्रुतिसामर्थ्याद्देवानंदाप्तौयथाकर्माणिसाधनान्युक्तानितथायश्चेत्यादिश्रुतिसामर्थ्यादेवतान्यपिश्रोत्रियत्वादी

तत्रहिनान्यत्पश्यतिनान्यच्छृणोत्यतोभूमाभूमत्वादमृतः इतरेतद्विपरीताः॥अत्रचश्रोत्रियत्वावृजिनत्वेतुल्येऽकामहतत्वकृतोविशेष
आनंदशतगुणवृद्धिहेतुरत्रैतानिसाधनानिश्रोत्रियत्वावृजिनत्वाकामहतत्वानितस्यतस्यानंदस्यप्राप्त्यावर्थादभिहितानियथाकर्माण्यग्नि
होत्रादीनिदेवानांदेवत्वप्राप्तौतत्रचश्रोत्रियत्वावृजिनत्वलक्षणेकर्मणीअधरभूमिष्वपिसमानेइतिनोत्तरानंदप्राप्तिसाधनेअभ्युपेयेतेअका
महतत्वंतुवैराग्यतारतम्योपपत्तेरुत्तरोत्तरभूम्यानंदप्राप्तिसाधनमित्यवगम्यते॥ नितत्तदानंदप्राप्तौसाधनानिविवक्षितानीत्यर्थः॥ननुत्रयाणामवि
शेषश्रुतौकथंश्रोत्रियत्वावृजिनत्वयोःसर्वत्रतुल्यत्वंनहितेपूर्वभूमिषुश्रुतेतथाचाकामहतत्ववदानंदोत्कर्षेतयोरपिहेतुतेतितत्राह॥तत्रचेति॥निर्धार
णार्थासप्तमी॥नहिश्रोत्रियत्वादिभून्यःसार्वभौमादिसुखमनुभवितुमुत्सहतेतथाचसर्वत्रश्रोत्रियत्वादेस्तुल्यत्वान्नतदानंदातिरेकप्राप्त्यावसाधारणंसाधन
मित्यर्थः॥यदुक्तमानंदशतगुणवृद्धिहेतुरकामहतत्वकृतोविशेषइतितदुपपादयति॥अकामहतत्वंत्विति॥पूर्वपूर्वभूमिषुवैराग्यमुत्तरोत्तरभूम्यानंदप्राप्ति
साधनंवैराग्यस्यतरतमभावेनपरमकाष्ठोपपत्तेर्निरतिशयस्यतस्यपरमानंदप्राप्तिसाधनत्वसंभवादित्यर्थः॥यश्चेत्यादिवाक्यस्यतात्पर्यमुक्त्वाप्रकृतेपरमानं

सएषइति॥निरतिशयमकामहतत्वंपरमानंदप्राप्तिहेतुरित्यत्रप्रमाणमाह॥तथाचेति॥प्रकृतंप्रत्यग्भूतंपरमानंदमेषइतिपरामृशति॥श्रुतिर्मेधावी
त्याद्या॥व्याचष्टे॥नेत्यादिना॥तथापिकिंतद्भयकारणंतदाह॥यद्यदिति॥मेधावित्वात्स्वज्ञातिशयशालित्वादितियावत् तदेवभयकारणंप्रकटयति॥स

सएषपरमआनंदोवित्तस्यश्रोत्रियप्रत्यक्षोधिगतस्तथाचवेदव्यासः॥यच्चकामसुखंलोकेयच्चदिव्यंमहत्सुखं॥तृष्णाक्षयसुखस्यैतेनार्हतःषो
डशींकलामिति॥एषब्रह्मलोकोहेसम्राडितिहोवाचयाज्ञवल्क्यःसोहमेवमनुशिष्टोभगवतेतुभ्यंसहस्रंददामिगवामतऊर्ध्वंविमोक्षायैव
ब्रूहीतिव्याख्यातमेतत्॥अत्रहिविमोक्षायेत्यस्मिन्वाक्येयाज्ञवल्क्योविभयांचकारभीतवान्याज्ञवल्क्यस्यभयकारणमाहश्रुतिःनयाज्ञवल्क्यो

थैषएवपरमआनंदएषब्रह्मलोकःसम्राडितिहोवाचयाज्ञवल्क्यःसोहंभगवतेसहस्रंददाम्यतऊर्द्ध्वंविमोक्षायैवब्रूहीत्यत्रह
याज्ञवल्क्योविभयांचकारमेधावीराजासर्वेभ्योमांतेभ्यउदरौत्सीदिति॥४४॥ वक्तृत्वसामर्थ्याभावाद्भीतवानज्ञानाद्वा॥किंतर्हिमेधावी
राजासर्वेभ्योमामामंतेभ्यःप्रश्ननिर्णयावसानेभ्यःउत्अरौत्सीत्आवृणोत्अवरोधंकृतवानित्यर्थः॥यद्यन्मयानिर्णीतंप्रश्नरूपंविमोक्षार्थंत
त्तदेकदेशत्वेनैवकामप्रश्नस्यगृहीत्वापुनःपुनर्मांपर्यनुयुंक्तएवमेधावित्वादित्येतद्भयकारणंसर्वंमदीयंविज्ञानंकामप्रश्नव्याजेनोपादित्सती
ति॥४४॥३३॥अत्रविज्ञानमयःस्वयंज्योतिरात्मास्वप्नेदर्शितःस्वप्नांतबुद्धांतसंचारेणकार्यकरणव्यतिरिक्तताकामकर्मप्रविवेकश्चासंगतयाम
हामत्स्यदृष्टांतेनप्रदर्शितःपुनश्चा र्वेमिति॥४४॥३३॥एवाएषएतस्मिन्नित्यादिउत्तरग्रंथसंबंधंवक्तुंवृत्तंकीर्तयति॥अत्रेति॥अत्रायंपुरुषःस्वयंज्यो
तिर्भवतीतिवाक्यंसप्तम्यर्थः॥वृत्तमर्थांतरमनुद्रवति॥स्वप्नांतेति॥कार्यकरणव्यतिरिक्तत्वंप्रदर्शितमितिसंबंधःउक्तमर्थांतरमाह॥कामेति॥अथयत्रैनंघ्न

किंतत्कार्यप्रदर्शनसामर्थ्यान्निर्धारितमविद्यायाः सतत्वंतदाह॥ अतद्धर्मेति॥ अनात्मधर्मत्वमात्मनिचैतन्यवद्स्वाभाविकत्वं॥ अविद्याकार्यं
वद्विद्याकार्यंचस्वप्नेसर्वात्मभावलक्षणंप्रत्यक्षतएवदर्शितमित्याह॥ तथेति॥ सुषुप्तेपिस्वप्नवदेतद्दर्शितमित्याह॥ तत्रचेति॥ साक्षात्स्वरूप
चैतन्यवशादित्येतत्॥ अन्यथोत्थितस्यसुखपरामर्शोनस्यादितिभावः॥ उक्तंविद्याकार्यंनिगमयति॥ एषइति॥ तमेवविद्याविषयंविशदयति॥
सएषइति॥ वृत्तानुवादमुपसंहरति॥ इत्येतदिति॥ एवमंतेनग्रंथेनब्रह्मलोकांतवाक्येनेतियावत्॥ सोहमित्यादेस्तात्पर्यमनुवदति॥ तच्चेति॥ यतो

विद्याकार्यंस्वप्नएवघ्नंतीवेत्यादिनाप्रदर्शितंअर्थादविद्यायाः सतत्वंनिर्धारितं अतद्धर्माध्यारोपणरूपत्वमनात्मधर्मत्वंच॥ तथाविद्याया
श्चकार्यंप्रदर्शितंसर्वात्मभावः स्वप्नएवप्रत्यक्षतः सर्वोस्मीतिमन्यतेसोस्यपरमोलोकइतितत्रचसर्वात्मभावः स्वभावोस्याविद्याकामकर्मादि
सर्वसंसारधर्मसंबंधातीतंरूपमस्यसाक्षात्सुषुप्तेगृह्यतइत्येतद्दिर्शितंस्वयंज्योतिरात्माएषपरमआनंदः एषविद्याविषयः सएषप
रमः संप्रसादः सुखस्यचपराकाष्ठेत्येतदेवमंतेनग्रंथेनव्याख्यातंतत्रैतत्सर्वंविमोक्षपदार्थस्यदृष्टांतभूतंबंधनस्यचतेचएतेमोक्षबंधनेसहे
तुकेसप्रपंचेनिर्दिष्टेविद्याविद्याकार्येतत्सर्वंदृष्टांतभूतमेवेतितद्दार्ष्टांतिकस्थानीयेमोक्षबंधनेसहेतुकेकामप्रश्नार्थभूतेत्वयावक्तव्येइतिपु
नः पर्यनुयुंक्तेजनकोतऊर्ध्वंविमोक्षायैवब्रूहीति॥ तत्रमहामत्स्यवत्स्वप्नबुद्धांतावसंगः संचरत्येकआत्मास्वयंज्योतिरित्युक्तंयथाचा

राजेत्थंमन्यतेः तस्तस्यसहस्रदानेयुक्ताप्रवृत्तिरित्यर्थः॥ अतऊर्ध्वमित्यादेरभिप्रायमनुद्रवति॥ तेचेति॥ यद्यपियथोक्तलक्षणेमोक्षबंधनेप्रागेवोप
दिष्टेतथापिपूर्वोक्तंसर्वंदृष्टांतभूतमेवतयोरितियतोराजाभ्राम्यतिअतोमोक्षबंधनेदार्ष्टांतिकभूतेवक्तव्येयाज्ञवल्क्येनेतिमन्यमानस्तंप्रेरयतीत्य
र्थः॥ बंधमोक्षयोर्वक्तव्यत्वेनप्राप्तयोरपिप्रथमंबंधोवर्ण्यतइतिवक्तुंदृष्टांतंस्मारयति॥ तत्रेति॥ दृष्टांतमनूद्यदार्ष्टांतिकस्यबंधस्यसूत्रितत्वंदर्शयति॥ य

उभौलोकाविलत्र प्रथममेवंशब्दोद्रष्टव्यः॥ वृत्तमनूद्यानंतरप्रकरणमुत्थापयति॥ तदिहेति॥ अत्रः संसारीसप्तम्यर्थः॥ सनिमित्तंकामादिनानिमित्तेनसहि तमित्येतत्प्रकरणारंभमुक्त्वासमनंतरवाक्यस्यव्यवहितेनसंबंधमाह॥ तत्रचेति॥ सवाएषएतस्मिन्बुद्धांतेरत्वेत्युपक्रम्यस्वप्नांतायैवेतिवाक्यंसप्तम्या परामृश्यते॥ स्वप्नांतशब्दस्यस्वप्नविषयव्यावृत्त्यर्थंविशिनष्टि॥ संप्रसादेति॥ कथंपुनःसंप्रसन्नस्यसंसारोपवर्णनमित्याशंक्याह॥ ततइति॥ प्रागुक्तः

सोकार्यकरणानिमृत्युरूपाणिपरित्यजन्नुपाददानश्चमहामत्स्यवत्स्वप्नबुद्धांतावनुसंचरतितथाजायमानोम्रियमाणश्चतैरेवमृत्युरूपैः संयुज्यतेवियुज्यतेचोभौलोकावनुसंचरतीतिसंचरणंस्वप्नबुद्धांतानुसंचारस्यदार्ष्टांतिकत्वेनसूचितंतदिहविस्तरेणसनिमित्तंसंचरणंव र्णयितव्यमितितदर्थोयमारंभस्तत्रबुद्धांतात्स्वप्नांतमयमात्मानुप्रवेशितस्तस्मात्संप्रसादस्थानंमोक्षदृष्टांतभूतंततःप्रच्याव्यबुद्धांतेसंसारव्य

सवाएषएतस्मिन्स्वप्नांतेरत्वाचरित्वादृष्ट्वैवपुण्यंचपापंचपुनःप्रतिन्यायंप्रतियोन्याद्रवतिबुद्धांतायैव ॥

॥४५॥३४॥ वहारःप्रदर्शयितव्यइतितेनास्यसंबंधःसवैबुद्धांतात्स्वप्नांतक्रमेणसंप्रसन्नएषएतस्मिन्संप्रसादेस्थित्वाततःपुन रीषत्प्रच्युतःस्वप्नेरत्वाचरित्वेत्यादिपूर्ववद्बुद्धांतायैवाद्रवति॥४५॥ इतआरभ्यास्यसंसारोवर्ण्यतेयथाचायमात्मास्वप्नांताद्बुद्धांतमागत एवमयमस्माद्देहाद्देहांतरंप्रतिपत्स्यतइत्याहअत्रदृष्टांतंतत्तत्रयथालोकेअनःशकटंसुसमाहितंसुष्ठुभृशंवासमाहितं सप्तम्यर्थोव्यवहितोग्रं थस्तेनेतिपरामृश्यतेसमनंतरग्रंथःषष्ठ्योच्यते॥ वाक्यस्यव्यवहितेनसंबंधमुक्त्वातदक्षराणियोजयति॥ सवैबुद्धांतादिति॥ स्वप्नांतेरत्वाचरित्वेत्यादिबु द्धांतायैवाद्रवतीत्येतदंतंपूर्ववदितियोजना॥४५॥ तद्यथेत्यादेरितिनुकामयमानइत्यंतस्यसंदर्भस्यतात्पर्यंतदिहेत्यत्रोक्तमनुवदति॥ इतआरभ्येति॥ तद्य

इतइत्यत्रदृष्टांतमाहेति योजना॥ भांडोपस्करणेन भांडप्रमुखेन गृहोपस्करणेनेति यावत्॥ तदेवोपकरणं विशिनष्टि॥ उलूखलेति॥ पिठरं पाकार्थंस्थूलं भांडं॥ अन्वयं दर्शयितुं यथाशब्दोनूद्यते॥ लिंगविशिष्टमात्मानं विशिनष्टि॥ यः स्वप्नेति॥ जन्ममरणे विशदयति॥ पाप्मेति॥ कार्यकरणानि पाप्मशब्देनोच्यंते॥ शारीरस्य प्राधान्यं द्योतयति॥ यस्येति॥ उत्सर्जयातिचेत्तदंगीकृतमात्मनो गमनमित्याशंक्याह॥ तत्रेति॥ लिंगोपाधेरात्मनो गमनप्रतीतिरित्यत्रा

भांडोपस्करणेन उलूखलमुसलशूर्पपिठरादिनान्नाद्येन च संपन्नं संभारेणाक्रांतमित्यर्थः तथा भाराक्रांतं सदुत्सर्जच्छब्दं कुर्वद्यथाया—
यादृच्छकटं शाकटिकेनाधिष्ठितं सदेवमेव यथोक्तो दृष्टांतोयं शारीरः शरीरे भवः कोसावात्मा लिंगोपाधिः यः स्वप्नबुद्धांताविव जन्ममरणाभ्यां पाप्म
संसर्गवियोगलक्षणाभ्यामिहलोकपरलोकावनुसंचरति यस्योत्क्रमणमनु प्राणाद्युत्क्रमणं स प्राज्ञेन परेणात्मना स्वयंज्योतिःस्वभावेनान्वारूढो

तद्यथानः सुसमाहितमुत्सर्जद्यायादेवमेवायꣳ शारीर आत्मा प्राज्ञेनात्मनान्वारूढ उत्सर्ज्जन्याति ॥ ॥

धिष्ठितोवभासमानस्तथाचोक्तमात्मनैवायंज्योतिषास्ते पल्ययतेइति उत्सर्ज्जन्यातितत्रैवैतन्यात्मज्योतिषाभास्ये लिंगे प्राणप्रधाने गच्छतितत
दुपाधिरप्यात्मा गच्छतीव तथा च श्रुत्यंतरं कस्मिन्वहमित्यादि॥ ध्यायतीवेति चात एवोक्तं प्राज्ञेनान्वारूढ इति अन्यथा प्राज्ञेनात्मनैकीभूतः शक
टवत्कथमुत्सर्जन्यातितेनलिंगोपाधिरात्मा उत्सर्जन्मर्मसु निकृत्यमानेषु दुःखवेदनयार्तः शब्दं कुर्वन्याति गच्छतितत्कस्मिन्काल इत्युच्यते

थर्वणश्रुतिं प्रमाणयति॥ तथाचेति उत्सर्जन्यातीति श्रुतेर्मुख्यार्थत्वार्थमात्मनो वस्तुतो गमनं किं न स्यादित्याशंक्याह॥ ध्यायतीवेति॥ औपाधिकमात्मनो गमनमि
त्यत्र लिंगांतरमाह॥ अत एवेति॥ कथमेतावतानिरुपाधेरात्मनो गमनं नेष्यते तत्राह॥ अन्यथेति॥ प्रमाणफलं निगमयति॥ तेनेति॥ तत्कस्मिन्नित्यत्र तच्छ

एतदूर्ध्वोच्छ्वासित्वमस्य यथा स्यात्तथावस्था यस्मिन्काले भवति तस्मिन्नामनमित्युपपादयति ॥ उच्यत इत्यादिना ॥ किमिति प्रश्नस्य समर्थं श्रुतिरनुवदतीति तत्राह ॥ दृश्यमानस्येति ॥ कथं संसारस्वरूपानुवादमात्रेण वैराग्यसिद्धिस्तत्राह ॥ ईदृगिति ॥ ईदृशत्वमेव विशदयति ॥ येनेत्यादिना ॥ अनुवादश्रुतेरभिप्रायमुप

यत्रैतद्भवसेतदिति क्रियाविशेषणमूर्ध्वोच्छ्वासी यत्रोर्ध्वोच्छ्वासित्वमस्य भवतीत्यर्थः दृश्यमानस्याप्यनुवदनं वैराग्यहेतोरीदृशः कष्टः खल्वयं संसारो येनोत्क्रांतिकाले मर्मसु कृत्यमानेषु स्मृतिलोपो दुःखवेदनार्तस्य पुरुषार्थसाधनप्रतिपत्तौ चासामर्थ्यं परवशीकृतचित्तस्य तस्माद्यावदियमवस्था नागमिष्यति तावदेवायं पुरुषार्थसाधनकर्तव्यतायामप्रमत्तो भवेदित्याह कारुण्याच्छ्रुतिः ॥ ४६ ॥ ३५ ॥ तदसौ ऊर्ध्वोच्छ्वासित्वं कस्मिन्का

यत्रैतदूर्ध्वोच्छ्वासी भवति ॥ ४६ ॥

ले किंनिमित्तं कथं किमर्थं वा स्यादित्येतदुच्यते सोयं प्रकृतः शिरःपाण्यादिमान्पिंडो यत्र यस्मिन्काले ऽयमणिमानमणोर्भावमणुत्वं कार्श्यमित्यर्थः निरेति निगच्छति किंनिमित्तं जरया वा स्वयमेव कालपक्वफलवज्जीर्णः कार्श्यं गच्छति उपतपतीत्युपतपन् ज्वरादिरोगस्तेनोपतपता वा उपतप्यमानो हि रोगेण विषमाग्नितयान्नं भुक्तं न जरयति ततोन्नरसेनानुपचीयमानः पिंडः कार्श्यमापद्यते तदुच्यते उपतपता वेत्यणिमानं निगच्छति यदा त्यंतकार्श्यं प्रतिपन्नो जरादिनिमित्तैस्तदोर्ध्वोच्छ्वासी भवति

संहरति ॥ तस्मादिति ॥ ३५ ॥ प्रश्नचतुष्टयमनूद्य तदुत्तरत्वेन स यत्रेत्यादिवाक्यमादाय व्याकरोति ॥ तदसेत्यादिना ॥ प्रश्नपूर्वकं कार्श्यनिमित्तं स्वाभाविकमागंतुकं चेति दर्शयति ॥ किन्निमित्तमित्यादिना कथं ज्वरादिना कार्श्यप्राप्तिरित्याशंक्याह ॥ उपतप्यमानो हीति ॥ यथोक्तनिमित्तद्वयवशात्कार्श्यप्राप्तिं निगमयति ॥ अणिमानमिति ॥ कस्मिन्काले तदूर्ध्वोच्छ्वासित्वमस्येति प्रश्नस्योत्तरमुक्तविधया

अवशिष्टप्रश्नत्रयस्योत्तरमाह॥ यदोर्ध्वोच्छ्वासीति॥ तत्रहिकार्श्यंनिमित्तंसंभृतशकटवन्नानाशब्दकरणंस्वरूपंशरीरविमोक्षणंचप्रयोजनमित्यर्थः॥ सयत्रे
त्यादिवाक्याद्दर्थसिद्धमर्थमाह॥ जरेति॥ तद्यथेत्यादिवाक्यंप्रश्नपूर्वकमादायव्याचष्टे॥ यदेत्यादिना॥ फलंबंधनात्प्रमुच्यतइतिसंबंधः॥ किमितिवि
षमानेकदृष्टांतोपादानमेकेनापिविवक्षितसिद्धेरित्याशंक्याह॥ विषमेति॥ कथंमरणस्यानियतानिअनेकानिनिमित्तानिसंभवंतीत्याशंक्यानुभव

यदोर्ध्वोच्छ्वासीतदाभृशाहितसंभारशकटवदुत्सर्जन्यातिजराभिभवोरोगादिपीडनंकार्श्यापत्तिश्चशरीरवतोवश्यंभाविनः एतेऽनर्थाइ
तिवैराग्यायेदमुच्यते॥ यदासावुत्सर्जन्यातितदाकथंशरीरंविमुंचतीतिदृष्टांतउच्यतेतत्तत्रयथाम्रफलमुदुंबरंवाफलंपिप्पलंवाफलंविष
मानेकदृष्टांतोपादानंमरणस्यानियतनिमित्तत्वख्यापनार्थमनियतानिहिमरणस्यनिमित्तान्यसंख्यातानिचएतदपिवैराग्यार्थमेवयस्मादयम

सयत्रायमणिमानंन्येतिजरयावोपतपतावाणिमानंनिगच्छति॥ तद्यथाम्रम्वोदुंबरंवापिप्पलंवाबंधनात्प्रमुच्यतएवमेवायंपुरु
षएभ्योंगेभ्यःसंप्रमुच्य॥

नेकमरणनिमित्तवांस्तस्मात्सर्वदामृत्योरास्येवर्ततइतिबंधनाद्बध्यतेयेनवृंतेनसहसबंधनकारणोरसोयस्मि
न्बाबध्यतइतिवृंतमेवोच्यतेबंधनंतस्माद्रसाद्वृंताद्वाबंधनात्प्रमुच्यतेवातादनेकनिमित्तमेवमेवायंपुरुषोलिंगात्मालिंगोपाधिःएभ्योंगेभ्यश्च
क्षुरादिदेहावयवेभ्यःसंप्रमुच्यतेसम्यङ्निर्लेपेनप्रमुच्यते

मनुस्त्याह॥ अनियतानीति॥ अथमरणस्यानेकानियतनिमित्तवत्त्वंसंकीर्तनंकुत्रोपयुज्यते
तत्राह॥ एतदपीति॥ तदर्थवत्त्वमेवसमर्थयते॥ यस्मादिति॥ इत्यप्रमत्तैर्भवितव्यमितिशेषः॥ वृंतेनसहफलंयेनरसेनसंबध्यतेसरसोबंधनकारणभूतोबंधनंवृं
तमेववाबंधनंयस्मिन्फलंसंबध्यतेरसेनेतिव्युत्पत्तेस्तस्माद्बंधनादनेकनिमित्तवशात्पूर्वोक्तस्यफलस्यभवतिप्रमोक्षणमित्याह॥ बंधनादित्यादिना॥ ॥ ॥

लिंगमात्मोपाधिरस्येतितद्विशिष्टः शारीरस्तथोच्यते॥संप्रमुच्याद्रवतीतिसंबंधः॥समित्युपसर्गस्यतात्पर्यमाह॥नेत्यादिना॥यदिस्वप्नावस्थायामिवमरणा
वस्थायांप्राणेनदेहंरक्षन्नाद्रवतीतिनाद्रियतेकेनप्रकारेणतर्हितदादेहांतरंप्रतिगमनमित्याशंक्याह॥किंतर्हीति॥वायुनाप्राणेनसहकरणजातमुपसं
हृत्याद्रवतीतिपूर्ववत्संबंधः॥पुनःप्रतिन्यायमितिप्रतीकमादायपुनःशब्दस्यतात्पर्यमाह॥पुनरित्यादिना॥तथापुनराद्रवतीतिसंबंधः॥यथापूर्वमिमंदेहं
प्राप्तवान्पुनरपितथैवदेहांतरंगच्छतीत्याह॥प्रतिन्यायमिति॥देहांतरगमनेकारणमाह॥कर्मेति॥आदिशब्देनपूर्वप्रज्ञागृह्यते॥प्राणव्यूहायप्राणानांविशे

नसुषुप्तगमनकालइवप्राणेनरक्षन्॥किंतर्हिवायुनोपसंहृत्यपुनःप्रतिन्यायंपुनःशब्दात्पूर्वमप्ययंदेहाद्देहांतरमसकृद्गतवानन्यथास्वप्नबुद्धां
तौपुनःपुनर्गच्छतितथापुनःप्रतिन्यायंप्रतिगमनंयथागतमित्यर्थः॥प्रतियोनियोनिंयोनिंप्रतिकर्मश्रुतादिवशादाद्रवतिकिमर्थंप्राणाये

पुनःप्रतिन्यायंप्रतियोन्याद्रवतिप्राणायैव॥४७॥

वप्राणव्यूहायैवेत्यर्थः॥सप्राणएवहिगच्छतिततःप्राणायेवेतिविशेषणमनर्थकंप्राणव्यूहायहिगमनंदेहाद्देहांतरंप्रतितेनह्यस्यकर्मफलो
पभोगार्थसिद्धिर्नप्राणसत्तामात्रेणतस्मात्तादर्थ्यार्थंयुक्तंविशेषणंप्राणव्यूहायेति॥४७॥२६॥तत्रास्येदंशरीरंपरित्यज्यगच्छतोनान्यस्यदेहांतर
स्योपादानेसामर्थ्यमस्तिदेहेंद्रियवियोगा षाभिव्यक्तिलाभायेतियावत्॥प्राणायेतिश्रुतिःकिमर्थमित्यंव्याख्यायतेतत्राह॥सप्राणइति॥एतच्चत
दंतरप्रतिपत्त्यधिकरणेनिर्धारितं॥प्राणायेतिविशेषणस्यानर्थक्याद्युक्तंप्राणव्यूहायेतिविशेषणमित्याह॥प्राणेति॥नन्वस्यप्राणःसहवर्त्ततेचेत्ताव
तैवभोगसिद्धेरलंप्राणव्यूहेनेत्याशंक्याह॥तेनहीति॥अन्यथासुषुप्तिमूर्छयोरपिभोगप्रसक्तेरित्यर्थः॥तादर्थ्यार्थंप्राणस्यभोगशेषत्वसिध्यर्थत्वमितिया

वत्॥४७॥तद्यथाराजानमित्यादिवाक्यव्यावर्त्यामाशंका
माह॥तत्रेति॥मुमूर्षोरवस्थासप्रपंच्यत्र्थः॥

बृ॰ उ॰ ५६ अ॰ ६

अथास्य स्वयमसामर्थ्येपि शरीरांतरकर्त्तारोन्ये भविष्यंति यथा राज्ञो भृत्या गृहनिर्मातारस्तत्राह॥ नचेति॥ स्वयमसामर्थ्यमन्येषां चासत्वमिति स्थिते फलितमाह॥ अथेति॥ तद्यथेत्यादिवाक्यस्य तात्पर्यं दर्शयन्नुत्तरमाह॥ उच्यत इति॥ भवत्वज्ञस्य स्वकर्मफलोपभोगे साधनत्वसिध्यर्थं सर्वं जगदुपात्तं तथापि देहाद्देहांतरं प्रतिपित्समानस्य किमायातमित्याशंक्याह॥ स्वकर्मेति॥ स्वकर्मणेत्यत्र स्वशब्दस्तत्कर्मफलोपभोगयोग्यमित्यत्र तच्छब्दश्च प्रकृतभोक्तृविषयौ॥ तत्र प्रमाणमाह॥ कृतमिति॥

नचान्ये स्वभृत्यस्थानीया गृहमिव राज्ञे शरीरांतरं कृत्वा प्रतीक्षमाणा विद्यंते‍ऽथैवं सति कथमस्य शरीरांतरोपादानमित्युच्यते सर्वं ह्यस्य जगत्स्वकर्मफलोपभोगसाधनत्वायोपात्तं स्वकर्मफलभोगाय चायं प्रवृत्तो देहाद्देहांतरं प्रतिपित्सुस्तस्मात्सर्वमेव जगत्स्वकर्मणा प्रयुक्तं तत्कर्मफलोपभोगयोग्यं साधनं कृत्वा प्रतीक्षत एव कृतं लोकं पुरुषोभिजायत इति श्रुतेर्यथा स्वप्नाज्जागरितं प्रतिपित्सोस्तत्कथमिति लोकप्र

तद्यथा राजानमायांतमुग्राः प्रत्येनसः सूतग्रामण्योन्नैः पानैरावसथैः प्रतिकल्पंतेयमायात्ययमागच्छतीत्येवꣳ हैवंविदꣳ सर्वाणि भूतानि प्रतिकल्पंत इदं ब्रह्मायातीदमागच्छतीति॥ ४८॥ ३७॥

सिद्धो दृष्टांत उच्यते॥ तत्तत्र यथा राजानं राज्याभिषिक्तमायांतं स्वराष्ट्रे उग्रा जातिविशेषाः क्रूरकर्माणो वा प्रत्येनसः प्रति प्रत्येनसि पापकर्मणि नियुक्ताः प्रत्येनसस्तस्करादि

पुरुषो हि त्यक्तवर्तमानदेहो भूतपंचकादिना निर्मितमेव देहांतरमभिव्याप्य व्यज्यत इति श्रुतेरर्थः॥ उक्तमेवार्थं दृष्टांतेन स्पष्टयति॥ यथेति॥ स्वप्नस्थानाज्जागरितस्थानं प्रतिपत्तुमिच्छतः शरीरं पूर्वमेव कृतं नापूर्वं क्रियते तथा देहाद्देहांतरं प्रतिपित्समानस्य पंचभूतादिना कृतमेव देहांतरमित्यर्थः॥ सर्वेषां भूतानां देहांतरं कृत्वा संसारिणि परलोकाय प्रस्थिते प्रतीक्षणं केन प्रकारेणेति प्रश्नपूर्वकं दृष्टांतवाक्यमुत्थाप्य व्याचष्टे तत्तत्रेत्यादिना॥ तत्र पापकर्मणि नियुक्तत्वमेव व्यनक्षत्रियाच्छूद्रकन्यायां क्रूराचारविहा (वान॥ क्षत्रशूद्रवपुर्जंतुरुग्रो नाम प्रजायत इति मनुवाक्यं= १

॥ बृहदारण्यक ॥ रामः ५६

आदिपदेनान्येपिनिग्राह्यागृह्यंते॥दंडनादीत्यादिशब्दोहिंसाप्रभेदसंग्रहार्थः॥ब्राह्मण्यांक्षत्रियात्सूतइतिस्मृतिमाश्रित्यसूतशब्दार्थमाह॥वर्णसंक
रेतिभोज्यभक्ष्यादिप्रकारैरित्यादिशब्देनलेह्यचोष्ययोःसंग्रहः॥मदिरादिभिरित्यादिपदेनक्षीरादिगृह्यते॥प्रासादादिभिरित्यादिशब्दोगोपुरतोरणादि
ग्रहार्थः॥विद्वन्मात्रप्रतीयमानेकिमितिकर्मफलस्यवेदितारमितिविशेषोपादानमित्याशंक्याह॥कर्मफलंहीति॥तत्कर्मप्रयुक्तानीत्यत्रतच्छब्दःसंसा

दंडनादौनियुक्ताःसूताश्चग्रामण्यश्चसूतग्रामण्यःसूताःवर्णसंकरजातिविशेषाःग्रामण्योग्रामनेतारस्तेपूर्वमेवराज्ञआगमनंबु
ध्वान्नैर्भोज्यभक्ष्यादिप्रकारैःपानैर्मदिरादिभिरावसथैश्चप्रासादादिभिःप्रतिकल्पतेनिष्पन्नैरेवप्रतीक्षंतेऽयंराजाआयात्ययमागच्छती
त्येवंवदंतःयथायंदृष्टांतःएवंहएवंविदंकर्मफलस्यवेदितारंसंसारिणमित्यर्थःकर्मफलंहिप्रस्तुतंतदेवंशब्देनपरामृश्यतेसर्वाणिभूता

तद्यथाराजानंप्रयियासंतमुग्राःप्रत्येनसःसूतग्रामाण्योभिसमायंत्येवमेवेममात्मानमंतकालेसर्वेप्राणाअभिसमायंतिय
त्रैतदूर्ध्वोच्छ्वासीभवति॥४९॥ततीयंब्राह्मणं॥३॥ निशरीरकर्तृणिकरणानुगृहीतृणिचादित्यादीनितत्कर्मप्रयुक्तानिकृतैरेवकर्म
फलोपभोगसाधनैःप्रतीक्षंतइदंब्रह्मभोक्तृकर्तृचास्माकमायातितथेदमागच्छतीतिएवमेवचकृत्वाप्रतीक्षंतइत्यर्थः॥४८॥तमेवंजिगमि
षुंकेसहगच्छंतियेचागच्छंतितेकिंतत्क्रियाप्रणुन्नाआहोस्वित्तत्कर्मवशात्स्वयमेवगच्छंतिपरलोकशरीरकर्तृणीवभूतानीत्यत्रो रविषयः॥
संसारिणोवस्तुतोब्रह्माभिन्नत्वात्तस्मिन्ब्रह्मशब्दःअभ्यासस्तुभयत्रादरार्थः॥४८॥३॥तद्यथाराजानंप्रयियासंतमित्यादिवाक्यव्यावर्त्यंचोद्यमुत्थापयति॥त
मेवमिति॥वागादयस्तमनुगच्छंतीत्याशंक्याह॥येचेति॥तत्क्रियाप्रणुन्नास्तस्यगंतुर्वागादिव्यापारेणप्रेरिताःसमाहूताइतियावत्॥

यानिचभूतानिपरलोकशब्दितंशरीरंकुर्वंतियानिवाकरणानुगृहीतॄणिआदित्यादीनितेष्वपियथोक्तप्रश्नप्रवृत्तिंदर्शयति॥ परलोकेति॥ नाद्यः॥ परलोकार्थंप्रस्थितस्यवागादिव्यापाराभावादाह्वानानुपपत्तेर्नद्वितीयोभोक्तृकर्मणापिवागादिषुचेतनेषुस्वयंप्रवृत्तेरनुपपत्तेरितिचोदयितुरभिमानःउत्तरवाक्येनोत्तरमाह॥ अत्रेत्यादिना॥ मरणकालमेवविशिनष्टि॥ यत्रेति॥ अचेतनानामपिरथादीनांचेतनप्रेरितानांप्रवृत्तिदर्शनाद्वागादीनामपिभोक्तृ

३

——च्यतेदृष्टांतस्तद्यथाराजानंप्रयियासंतंप्रकर्षेणयातुमिच्छंतंउग्राःप्रत्येनसःसूतग्रामण्यस्तमेवाभिसमायंत्याभिमुख्येनसमायंत्येकीभावेनतमभिमुखाआयंत्यनाज्ञप्ताएवराज्ञाकेवलंतज्जिगमिषाभिज्ञाएवमेवइममात्मानंभोक्तारमंतकालेमरणकालेसर्वेप्राणावागादयोभिसमायंतियत्रैतदूर्ध्वोच्छ्वासीभवतीतिव्याख्यातं॥ ४९॥ इतिश्रीमद्बृहदारण्यकेषष्टेप्रपाठकेतृतीयंब्राह्मणं॥ ३॥ ३८॥ ४९॥

स यत्रायमात्माबल्यंन्येत्यसंमोहमिवन्येत्य

सयत्रायमात्मासंसारोपवर्णनंप्रस्तुतंतत्रायंपुरुषःएभ्योंगेभ्यःसंप्रमुच्यतइत्युक्तंतत्संप्रमोक्षणंकस्मिन्कालेकथंचेतिसविस्तरंसंसरणंवर्णयितव्यमित्यारभ्यतेसोयमात्माप्रस्तुतोयत्रयस्मिन्कालेअबल्यमबलभावंनिएत्यगत्वायद्देहस्यदौर्बल्यंतदात्मनएवदौर्बल्यमित्युपचर्यतेअबल्यंन्येत्येति कर्मवशात्तदाहूतत्वमंतरेणप्रवृत्तिःसंभवतीतिभावः॥ ॥इतिश्रीमद्बृहदारण्यकेषष्टेप्रपाठकेज्योतिर्ब्राह्मणंतृतीयंविवृतं॥ ॥३॥ ब्राह्मणांतरमुत्थापयति॥ सयत्रेति॥ तस्यसंबंधंवक्तुमुक्तंकीर्तयति॥ संसारेति॥ वक्ष्यमाणोपयोगित्वेनोक्तमर्थांतरमनुद्रवति॥ तत्रेति॥ संसारप्रकरणंसप्तम्यर्थः॥ संप्रत्याकांक्षापूर्वकमुत्तरब्राह्मणमादत्ते॥ तत्संप्रमोक्षणमिति॥ एवंब्राह्मणमवतार्यतदक्षराणिव्याकरोति॥ सोयमित्यादिना॥ गत्वासंमोहमिवन्येती

किमित्युपचारो मुख्यमेवात्मनो दौर्बल्यं किं न स्यादित्याशंक्याह॥ नहीति॥ यथायमबलभावं निगच्छति तथा संमोहं संमूढतामिव प्रतिपद्यते विवेकाभावो हि सं
मोहस्तथा च मूढतामिव निगच्छतीति युक्तमित्याह॥ तथेति॥ इवशब्दार्थमाह॥ न चेति॥ कथं पुनरात्मनः समारोपितोऽपि संमोहः स्यान्नित्यचैतन्यज्योतिष्ट्वा
दित्याशंक्याह॥ उत्क्रांतीति॥ व्याकुलीभावो लिंगस्येति शेषः तत्र लौकिकीं वार्तामनुकूलयति॥ तथेति॥ यथाश्रुतमिवशब्दं गृहीत्वा वाक्यं व्याख्याय पक्षांतर

न ह्यसौ स्वतोऽमूर्तत्वादबलभावं गच्छति तथा संमोहमिव संमोहो विवेकाभावः संमूढतामिव न्येतिनिगच्छति न चास्य स्वतः संमोहोऽसंमो
हो वाऽस्ति नित्यचैतन्यज्योतिःस्वभावत्वात्तेनेवशब्दः संमोहमिवन्येतीति उत्क्रांतिकाले हि करणोपसंहारनिमित्तो व्याकुलीभाव आत्मन इ
वलक्ष्यते लौकिकैस्तथा च वक्तारो भवंति संमूढः संमूढोऽयमिति अथवोभयत्रेवशब्दप्रयोगो योज्योऽबल्यमिव न्येत्य संमोहमिव न्येतीति॥ उ

थैनमेते प्राणा अभिसमायंति स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति॥

भयस्य परोपाधिनिमित्तत्वाविशेषात्समानकर्तृकनिर्देशाच्चाथास्मिन्काले एते प्राणा वागादयः एनमात्मानमभिसमायंति तदास्य शारी
रस्यात्मनोंऽगेभ्यः संप्रमोक्षणं कथं पुनः संप्रमोक्षणं केन वा प्रकारेणात्मानमभिसमायंतीत्युच्यते स आत्मा एतास्तेजोमात्रास्तेजसो मात्रास्ते
जोमात्रास्तेजोऽवयवाः रूपादिप्रकाशकत्वाच्चक्षुरादीनि करणानीत्यर्थः ता एताः समभ्याददानः सम्यङ्निर्लेपेनाभ्याददान आभिमुख्येनाद

माह॥ अथवेति॥ इवशब्दप्रयोगस्योभयत्र योजनामेवाभिनयति॥ अबल्यमिति॥ उभयत्र तद्योजने हेतुमाह॥ उभयस्येति॥ तुल्य प्रत्ययेनाबल्यसंमोहयोरेक
त्वनिर्देशादप्युभयत्रेवकारो द्रष्टव्य इत्याह॥ समानेति॥ अथेत्यादिवाक्यमवतार्य व्याकुर्वन्कस्मिन्काले तत्संप्रमोक्षणमित्यस्योत्तरमाह॥ अथेत्यादिना॥ कथं वेत्य

अत्रोत्तरत्वेनोत्तरं वाक्यमादाय व्याकरोति॥ उच्यत इत्यादिना॥ रूपादिप्रकाशनशक्तिमत्सत्वप्रधानभूतकार्यत्वात्तेजोमात्राश्चक्षुरादीनीत्युक्तं॥ संप्रतिसम
भ्याददान इत्यस्यार्थमाह॥ ता एता इति॥ संहरमाणो हृदयमन्ववक्रामतीत्यन्वयः तत्समिति विशेषणं स्वप्नापेक्षयेति संबंधः कथं स्वप्नापेक्षया विशेषणं तदाह
नत्विति॥ आदानमात्रमपि स्वप्नेनास्तीति कुतस्तद्व्यावृत्त्यर्थं विशेषणमित्याशंक्याह॥ अस्तीति॥ स एतास्तेजोमात्राः समभ्याददान इत्येतद्व्याख्याय हृदयमेवेत्या

संहरमाणस्तत्स्वप्नापेक्षया विशेषणं सम्यगिति न तु स्वप्ने निर्लेपेन सम्यगादानमस्ति स्वादानमात्रं गृहीता वागगृहीतं चक्षुरस्य लोकस्य सर्वावतो मा
त्रामपादाय स्वयं विहत्य स्वयं निर्मायेत्यादिवाक्येभ्यः हृदयमेव पुंडरीकाकारमन्ववक्रामत्यन्वागच्छति हृदयेऽभिव्यक्तविज्ञानो भवतीत्यर्थः॥ बुध्यादिविक्षे

स यत्रैष चाक्षुषः पुरुषः पराङ् पर्यावर्ततेऽथारूपज्ञो भवति॥ ५०॥

पोपसंहारे सति निहितस्य स्वतश्चलनं विक्षेपोपसंहारादिविक्रिया वा ध्यायतीव लेलायतीवेत्युक्तत्वात्॥ बुध्याद्युपाधिद्वारैव हि सर्वविक्रि
याऽध्यारोप्यते तस्मिन् कदापुनस्तस्य तेजोमात्राभ्यादानमित्युच्यते॥ स यत्रैष चक्षुषि भवश्चाक्षुषः आदित्यांशो भोक्तुः कर्मणा प्रयुक्तो यावद्देहधा
रणं तावच्चक्षुषोऽनुग्रहं कुर्वन्वर्तते दित्याचष्टे॥ हृदयमित्यादिना॥ स विज्ञानो भवतीति वाक्यशेषमाश्रित्य वाक्यार्थमाह॥ हृदय इति॥ कथमात्मनो निष्क्रिय
स्य तेजोमात्रादानकर्तृत्वमित्याशंक्याह॥ बुध्यादीति॥ तेषां तद्विक्षेपस्य चोपसंहारे सत्यात्मनस्तदादानकर्तृत्वमौपचारिकमित्यर्थः॥ तर्हि तद्विक्षेपोपसंहर्तृ
त्ववत्तदादानकर्तृत्वमपि मुख्यमेव भविष्यतीत्याशंक्याह॥ नहीति॥ आदिशब्देन क्रियाविशेषः सर्वो गृह्यते कथं तर्हि प्रतीचि कर्तृत्वादिप्रथेत्याशंक्याह॥ बुध्या
दीति॥ स यत्रेत्यादिवाक्यमाकांक्षापूर्वकमवतार्य व्याकरोति॥ कदा पुनरित्यादिना॥ तस्य पुरुषशब्दाद्धोक्तृत्वे प्राप्ते विशिनष्टि॥ आदित्यांश इति॥ तस्य चाक्षुषत्वं स

यावद्देहधारणमितिकुतोविशेषणंतत्राह॥ मरणकालेत्विति॥ आदित्यांशस्यचक्षुरनुग्रहमकुर्वतःस्वातंत्र्यंवारयति॥ स्वमिति॥ मरणावस्थायांचक्षु
रादयनुग्राहकदेवतांशानामधिदेवतात्मनोपसंहारेश्रुत्यंतरंसंवादयति॥ तदेतदिति॥ तर्हिदेहांतरेवागादिराहित्यंस्यादित्याशंक्याह॥ पुनरिति॥ संश्र

मरणकालेत्वस्यचक्षुरनुग्रहंपरित्यजतिस्वमादित्यात्मानंप्रतिपद्यतेतदेतदुक्तंयत्रास्यपुरुषस्यमृतस्याग्निंवागप्येतिवातंप्राणश्चक्षुरादि
त्यमित्यादिपुनर्देहग्रहणकालेसंश्रयिष्यंतितथास्वप्स्यतःप्रबुध्यतश्चतदेतदाहचाक्षुषःपुरुषोयत्रयस्मिन्कालेपराङ्पर्यावर्ततेपरिसमं
तात्पराङावर्ततइतिअथात्रास्मिन्कालेऽरूपज्ञोभवतिमुमूर्षूरूपंनजानातितदायमात्माचक्षुरादितेजोमात्राःसमभ्याददानोभवतिस्वप्नका

एकीभवतिनपश्यतीत्याहुरेकीभवतिनजिघ्रतीत्याहुरेकीभवतिनरसयतइत्याहुरेकीभवतिनवदतीत्याहुरेकीभवतिनशृणो
तीत्याहुरेकीभवतिनमनुतइत्याहुरेकीभवतिनस्पृशतीत्याहुरेकीभवतिनविजानातीत्याहुस्तस्यहैतस्यहृदयस्याग्रंप्रद्योततेते
नप्रद्योतेनैषआत्मानिष्क्रामति॥

लइव॥ ५०॥ एकीभवतिकरणजातंस्वेनलिंगात्मनातदैनंपार्श्वस्थाआहुर्नपश्यतीतितथाघ्राणदेवतानि
वृत्तौघ्राणमेकीभवतिलिंगात्मनातदानजिघ्रतीत्याहुःसमानमन्यत्जिह्वायांसोमोवरुणोवादेवतातन्निवृत्त्यपेक्षयानरसयतइत्याहु

यिष्यंतिवागाद
यस्तत्तद्देवताधिष्ठितायथास्थानमितिशेषः॥ मुमूर्षोरिवस्वप्स्यतःसर्वाणिकरणानिलिंगात्मनोपसंह्रियंतेप्रबुध्यमानस्यचोत्पिपित्सोरिवतानियथास्थानंप्रा
दुर्भवंतीत्याह॥ तथेति॥ उक्तेर्थेवाक्यंपातयति॥ तदेहाहेति॥ पराङ्पर्यावर्ततइतिरूपवैमुख्यंचाक्षुषस्यविवक्षितमितिशेषः॥ ५०॥ १॥ तर्हिभोक्तोपसंह
तेचक्षुरत्यंताभावीभूतमित्याशंक्याह॥ एकीति॥ उक्तेर्थेलोकप्रसिद्धिंदर्शयति॥ नदेति॥ चक्षुषिदर्शितन्यायंघ्राणेऽतिदिशति॥ तथेति॥ ॥ ।

यथाचक्षुर्देवतायांनिवृत्तौलिंगात्मनाचक्षुरेकीभवतितथाघ्राणदेवतांशस्यघ्राणानुग्रहनिवृत्तिद्वारेणांशिदेवतयैक्येलिंगात्मनाघ्राणमेकीभवतीत्यर्थः ॥तन्निवृत्त्यपेक्षयावरुणादिदेवतायाजिह्वायामनुग्रहनिवृत्तौजिह्वायालिंगात्मनैक्यमपेक्ष्येत्यर्थः॥तदनुग्राहकदेवतांशस्यतत्रतत्रानुग्रहनिवृत्त्या तत्तदंशिदेवताप्राप्तौतत्तत्करणस्यलिंगात्मनैक्यंभवतीत्यभिप्रेत्याह॥तथेति॥मरणदशायांरूपादिदर्शनराहित्यमर्थद्वयसाधकमित्याह॥तदेति॥तस्य हैतस्येत्यादिवाक्यमुपादत्ते॥तत्रेति॥मुमूर्षावस्थासप्तम्यर्थः॥केनायंप्रद्योतोभवतीत्यपेक्षायामाह॥स्वप्नेति॥यथास्वप्नकालेस्वेनभासास्वेनज्योतिषाप्र

स्वपानवदतिनशृणोतिनमनुतेनस्पृशतिनविजानातीत्याहुस्तदोपलक्ष्यतेदेवतानिवृत्तिःकरणानांचहृदयएकीभावस्तत्रहृदयसंहतेषु करणेषुयोंतर्व्यापारः॥सकथ्यतेतस्यहैतस्यप्रकृतस्यहृदयस्यहृदयच्छिद्रस्येत्येतत्॥अग्रंनाडीमुखंनिर्गमनद्वारंप्रद्योततेस्वप्नकालइव

चक्षुष्टोवामूर्ध्नोवान्येभ्योवाशरीरदेशेभ्यस्तमुत्क्रामंतं॥

स्वेनभासातेजोमात्रादानकृतेनस्वेनैवज्योतिषात्मनैवचतेनात्मज्योतिःप्रद्योतेनहृदयाग्रेणएषआत्माविज्ञानमयोलिंगोपाधिर्निर्गच्छतिनि ष्क्रामति॥तथाथर्वणेकस्मिन्वहमुत्क्रांतउत्क्रांतोभविष्यामिकस्मिन्वाप्रतिष्ठितेप्रतिष्ठास्यामीतिसप्राणमसृजतेतितत्रचात्मचैतन्यज्योतिः सर्वदाभिव्यक्ततरंतदुपाधि स्वपितीतिव्याख्यातंतथात्रापितेजोमात्राणांयदादानंतत्कृतेनवासनारूपेणप्राप्यफलविषयबुद्धिवृत्तिरूपेणस्वेनभासा स्वेनचात्मनाचैतन्यज्योतिषाहृदयाग्रप्रद्योतनमित्यर्थः॥तस्यार्थक्रियांदर्शयतितेनेति॥किमितिलिंगद्वारात्मनोनिर्गमनंप्रतिज्ञायतेतत्राह॥तथेति॥यदिम रणकालेतेजोमात्रादानंनतर्हिसदालिंगोपाधिरात्मेत्याशंक्याह॥तत्रचेति॥सप्तम्यालिंगमुच्यते॥सर्वदेतिलिंगसप्रदशोक्तिः॥आत्मोपाधिभूतेलिंगेकिंप्रमा

चक्षुरादिप्रसिद्धिरपि तत्र प्रमाणमित्याह ॥ तदात्मकं हीति ॥ एकादशविधं करणमित्यभ्युपगमात्कुतो द्वादशविधत्वमित्याशंक्य विशिनष्टि ॥ बुध्यादी ति ॥ वायुर्वै गौतम तत्सूत्रमित्यादिश्रुतिरपि यथोक्ते लिंगे प्रमाणमित्याह ॥ तत्सूत्रमिति ॥ जगतो जीवनमपि तत्र मानमित्याह ॥ तज्जीवनमिति ॥ एष सर्व भूतांतरात्मेति श्रुतिरपि यथोक्तं लिंगं साधयतीत्याह ॥ सोंतरात्मेति ॥ लिंगोपाधेरात्मनो यथोक्तप्रकाशेन मरणकाले हृदयान्निष्क्रमणे मार्गं प्रश्नपूर्वकमुत्त रवाक्येनोपदिशति ॥ तेनेत्यादिना ॥ चक्षुष्टो वेति विकल्पे निमित्तं सूचयति ॥ आदित्येति ॥ मूर्ध्नो वेति विकल्पे हेतुमाह ॥ ब्रह्मलोकेति ॥ तत्प्राप्तिनिमित्तं चे

द्वारहयात्मनि जन्ममरणगमनागमनादि सर्वविक्रियालक्षणः संव्यवहारस्तदात्मकं हि द्वादशविधं करणं बुध्यादि तत्सूत्रं तज्जीवनं सोंत रात्मा जगतस्तस्युषश्च तेन प्रद्योतेन हृदयाग्रप्रकाशेन निष्क्रममाणः केन मार्गेण निष्क्रामतीत्युच्यते चक्षुष्टो वादित्यलोकप्राप्तिनिमित्तं ज्ञानं

प्राणोनूत्क्रामति प्राणमनूत्क्रामंतꣳ सर्वे प्राणा अनूत्क्रामंति सविज्ञानो भवति सविज्ञानमेवान्ववक्रामति ॥

कर्म वा यदि स्यान्मूर्ध्नो वा ब्रह्मलोकप्राप्तिनिमित्तं चेदन्येभ्यो वा शरीरदेशेभ्यः यथाकर्म यथाश्रुतं तं विज्ञानात्मानमुत्क्रामंतं ॥ परलोकाय प्रस्थि तं परलोकायोद्भूताकूतमित्यर्थः प्राणः सर्वाधिकारिस्थानीयो राजेव वानूत्क्रामति तं च प्राणमनूत्क्रामंतं वागादयः सर्वे प्राणाः अनूत्क्रामंति यथाप्रधानाऽन्वाचिख्यासेयं न तु क्रमेण सार्थवद्गमनमिह विवक्षितं त्वानं कर्म वा स्यादिति पूर्वेण संबंधः ॥ देहावयवांतरेभ्यो निष्क्रमणे नियामकमाह ॥ यथेति ॥ कथं परलोकाय प्रस्थितमित्युच्यते प्राणगमनाधीनत्वाद्विज्ञानात्मगमनस्येत्याशंक्याह ॥ परलोकायेति ॥ ननु जीवस्य प्राणादितादात्म्ये सति कथम नुशब्देन क्रमो विवक्ष्यते तत्राह ॥ यथाप्रधानेति ॥ प्रधानमनतिक्रम्य ही यमन्वाख्याने रुक्तातथा च जीवादेः प्राधान्याभिप्रायेणानुशब्दप्रयोगो न क्रमाभिप्राये

बृ.र.
६०

समूहेव्यक्तिषुक्रमेणगमनंदृश्यतेनतथाप्राणादिष्वितिव्यतिरेकः॥यदुक्तंहृदयाग्रप्रद्योतनंतत्सविज्ञानश्रुत्याप्रकटयति॥तदेति॥कर्मवशा
दितिविशेषणंसाधयति॥नेति॥विपक्षेदोषमाह॥स्वातंत्र्येणेति॥इष्टापत्तिमाशंक्याह॥नैवेति॥मुमूर्षोरस्वातंत्र्यमानमाह॥अतएवेति॥कर्म
वशात् उक्तंसविज्ञानत्वमुपसंहरति॥कर्मणेति॥अतःकरणस्यवृत्तिविशेषोभाविदेहविषयस्तदाश्रितंतद्रूपंयद्वासनात्मकंविशेषविज्ञानंते
नेतियावत्॥म्रियमाणस्यसविज्ञानत्वेसत्यर्थसिद्धमर्थमाह॥सविज्ञानमेवेति॥गंतव्यंसविज्ञानत्वंविज्ञानाश्रयत्वमित्याशंक्यविशिनष्टि॥वि

तदैषआत्मासविज्ञानोभवतिस्वप्नइवविशेषविज्ञानवान्भवतिकर्मवशान्नस्वतंत्रःस्वातंत्र्येणहिसविज्ञानत्वेसर्वःकृतकृत्यःस्या
न्नैवतुतल्लभ्यतेऽतएवाहव्यासः॥सदातद्भावभावितइतिकर्मणानुद्भाव्यमानेनांतःकरणवृत्तिविशेषाश्रितवासनात्मकविशेषवि
ज्ञानेनसर्वोलोकएतस्मिन्कालेसविज्ञानोभवति॥सविज्ञानमेवचगंतव्यमन्ववक्रामतिअनुगच्छतिविशेषविज्ञानोद्भासितमेवेत्य
र्थः॥तस्मात्तत्कालेस्वातंत्र्यार्थंयोगधर्मानुसेवनंपरिसंख्यानाभ्यासश्चविशिष्टपुण्योपचयश्चश्रद्दधानैःपरलोकार्थिभिरप्रमत्तैःकर्तव्य
इति॥सर्वशास्त्राणांयत्नतोविधेयोर्थोदुश्चरिताच्चोपरमणंनहितत्कालेशक्यतेकिंचित्संपादयितुंकर्मणानीयमानस्यस्वातंत्र्याभावा
त्पुण्योवैपुण्येनकर्मणाभवतिपापःपापेनेत्युक्तंएतस्यह्यनर्थस्योपशमोपायविधानायसर्वशाखोपनिषदःप्रवृत्ताः शेषेति॥प्रागेवोक्तंकालेःस
विज्ञानत्वादिश्रुतेस्तात्पर्यमाह॥तस्मादिति॥पुरुषस्यकर्मानुसारित्वंतच्छब्दार्थः॥योगश्चित्तवृत्तिनिरोधःतस्यधर्मायमप्रभृतयःतेषामनुसेवनंपुनः
पुनरावर्तनं॥परिसंख्यानाभ्यासोयोगानुष्ठानं॥कर्तव्यइतिप्रकृतश्रुतेर्विधेयोर्थइतिशेषः॥किंच॥पुण्योपचयकर्तव्यतारूपेर्थेसर्वमेवविधिकांडपर्य
वसितमित्याह॥सर्वशास्त्राणामिति॥सर्वस्मादागामिदुश्चरितादुपरमणंकर्तव्यमित्यस्मिन्नर्थेनिषेधशास्त्रमपिपर्यवसितमित्याह॥दुश्चरिताच्चेति ॥

अ.
६

राम:
६०

ननु पूर्वं यथेष्टं चेष्टां कृत्वा मरणकाले सर्वमेतत्संपादयिष्यते नेत्याह ॥ नहीति ॥ कर्मणानीयमानत्वेमानमाह ॥ पुण्य इति तर्हि पुण्योपचयादेव यथो
क्तानर्थनिरसेर्व्यर्थं तत्वज्ञानमित्याशंक्याह ॥ एतस्येति ॥ उपशमोपायस्तत्वज्ञानं तस्य विधानं प्रकाशनं तदर्थमिति यावत् ॥ देवताध्यानादनर्थानिव
र्तिष्यते किं तत्वज्ञानेनेत्याशंक्याह ॥ नहीति ॥ तद्धि हितेतितच्छब्देन प्रकृताः सर्वशाखोपनिषदो गृह्यंते ॥ विधांतरेणानर्थध्वंसासिद्धौ फलितमाह ॥ त

न हितद्धिहितोपायानुसेवनं मुक्त्वात्यंतिकोऽस्यानर्थस्योपशमोपायोस्ति तस्मादत्रैवोपनिषद्विहितोपाये यत्नपरैर्भवितव्यमित्येषः प्रक
रणार्थः शकटवत्संभृतसंभार उत्सर्जनयानीत्युक्तं किंपुनस्तस्य परलोकाय प्रवृत्तस्य पथ्यदनं शाकटिकसंभारस्थानीयं गत्वा वा परलोकं य
द्भुंक्ते शरीराद्यारंभकं च यत्तत्किमुच्यते तं परलोकाय गच्छंतमात्मानं विद्याकर्मणी विद्या च कर्म च विद्याकर्मणी विद्या सर्वप्रकारा विहिता प्र

तं विद्याकर्मणी

तिषिद्धा च अविहिता अप्रतिषिद्धा च ॥ तथा कर्म विहितं प्रतिषिद्धं च अविहितमप्रतिषिद्धं च समन्वारभेते सम्यगन्वारभेते अन्वालभेते अनुग
च्छेते पूर्वप्रज्ञा च पूर्वानुभूतविषया प्रज्ञा पूर्वप्रज्ञातीतकर्मफलानुभववासने त्यर्थः सा च वासनाऽपूर्वकर्मारंभे कर्मविपाके चांगं भवति तेनासा
वप्यन्वारभते स्मादिति ॥ ज्ञापितं सविज्ञानवाक्येनेति शेषः ॥ वृत्तमनूद्य प्रश्नपूर्वकमुत्तरवाक्यमवतार्य व्याचष्टे ॥ शकटवदित्यादिना ॥ विहिता विद्या ध्या
नात्मिका ॥ प्रतिषिद्धा नग्नस्त्रीदर्शनादिरूपा ॥ अविहिता घटादिविषया अप्रतिषिद्धा पथि पतिततृणादिविषया ॥ विहितं कर्म यागादि ॥ प्रतिषिद्धं ब्रह्म
हननादि ॥ अविहितं गमनादि ॥ अप्रतिषिद्धं नेत्रपक्ष्मविक्षेपादि ॥ विद्याकर्मणोरुपभोगसाधनत्वप्रसिद्धेरन्वारंभेपि किमित्यन्वारभते वासनेत्याशंक्याह

॥ भाष्य ॥

अपूर्वकर्मारंभादावंगं पूर्ववासनेत्यत्र हेतुमाह॥ नहीति॥ उक्तमेव हेतुमुपपादयति॥ नहीत्यादिना॥ इंद्रियाणां विषयेषु कौशलमनुष्ठाने प्रयोजकं तच्च फ
लभोगे हेतुर्न चांतरेणाभ्यासमिंद्रियाणां विषयेषु कौशलं संभवति तस्मादनुष्ठानाद्यभ्यासाधीनमित्यर्थः॥ तथापि कथं पूर्ववासनाकर्मानुष्ठानादावंग
मित्याशंक्याह॥ पूर्वानुभवेति॥ तत्र लोकानुभवं प्रमाणयति॥ दृश्यते चेति॥ चित्रकर्मादीत्यादिशब्देन प्रासादनिर्माणादि गृह्यते॥ पूर्ववासनोद्भवकृतं

नहि तया वासनया विना कर्म कर्तुं फलं चोपभोक्तुं शक्यते नह्यनभ्यस्ते विषये कौशलमिंद्रियाणां भवति पूर्वानुभववासनाप्रवृत्तानां तिंद्रि
याणामिहाभ्यासमंतरेण कौशलमुपपद्यते दृश्यते च केषांचित्कासुचित्क्रियासु चित्रकर्मादिलक्षणासु विनैवेहाभ्यासेन जन्मत एव कौशलं
कासुचिदत्यंतसौकर्ययुक्तास्वप्यकौशलं केषांचित्तथा विषयोपभोगेषु स्वभावत एव केषांचित्कौशलाकौशले दृश्येते तच्चैतत्सर्वं पूर्व

समन्वारभेते पूर्वप्रज्ञा च॥ ५१॥

प्रज्ञोद्भवानुद्भवनिमित्तं तेन पूर्वप्रज्ञया विना कर्मणि वा फलोपभोगे वा न कस्यचित्प्रवृत्तिरुपपद्यते तस्मादेतत्त्रयं शाकटिकसंभार
स्थानीयं परलोकपथ्यदनं विद्याकर्मपूर्वप्रज्ञाख्यं यस्माद्विद्याकर्मणी पूर्वप्रज्ञा च देहांतरप्रतिपत्त्युपभोगसाधनं तस्माद्विद्याकर्मादि शु
भमेव समाचरेद्यथेष्टदेहसंयोगोपभोगौ स्यातामिति प्रकरणार्थः॥ ५१॥ २॥ एवं विद्यादिसंभारसंभृतो देहांतरं प्रतिपद्यमानो मुक्त्वा पूर्वदेहं
पक्षीव वृक्षांतरं देहांतरं प्रतिपद्यते
कार्यमुक्त्वा तदभावकृतं कार्यमाह॥ कासुचिदिति॥ रज्जुनिर्माणादिष्विति यावत्॥ तत्रैवोदाहरणसौलभ्यमाह॥ त
थेति॥ तत्र हेत्वंतरमाशंक्य परिहरति॥ तच्चेति॥ कर्मानुष्ठानादौ पूर्वप्रज्ञाया हेतुत्वमुपसंहरति॥ तेनेति॥ समन्वारंभवचनार्थं निगमयति॥ तस्मादिति॥ तस्ये

त्पणजलायुकावाक्यमवतारयितुं वृत्तमनूद्य वादिविवादान्दर्शयन्नादौ दिगंबरमतमाह॥एवमित्यादिना॥देवतावादिमतमाह॥अथवेति॥देवतायेनशरीरेणविशिष्टं जीवं परलोकं नयति तदातिवाहिकं शरीरांतरं तेनेति यावत्॥सांख्यादिमतमाह॥किंवेति॥सिद्धांतं सूचयति॥अहोस्विदिति॥वैशेषिकादिपक्षमाह॥किंवेति॥न्यूनत्वनिवृत्त्यर्थमाह॥किंवाकल्पनांतरमिति॥तत्रसिद्धांतस्यप्रामाणिकत्वेनोपादेयत्वंवदन्कल्पनांतराणामप्रामाणिकत्वेनत्याज्यत्वमभिप्रेत्याह॥उच्यतइति॥तेषांसर्वात्मकत्वेहेत्वंतरमाह॥सर्वात्मकेति॥कथंतर्हिकरणानांपरिछिन्नत्वधीरित्याशंक्याह॥तेषामिति॥आधिदैविकेनरू

अथवाऽऽतिवाहिकेनशरीरांतरेणकर्मफलजन्मदेशंनीयतेकिंवात्रस्थस्यैवसर्वगतानांकरणानांवृत्तिलाभोभवत्याहोस्विच्छरीरस्थस्यसंकुचितानिकरणानिमृतस्यभिन्नघटप्रदीपप्रकाशवत्सर्वतोव्याप्यपुनर्देहांतरारंभेसंकोचमुपगच्छंतिकिंवामनोमात्रंवैशेषिकसमयइवदेहांतरारंभदेशंप्रतिगच्छति॥किंवाकल्पनांतरमेववेदांतसमयइत्युच्यतेतत्रएतेसर्वएवसमाःसर्वेनंताइतिश्रुतेः॥सर्वात्मकानितावत्करणानिसर्वात्मकप्राणसंश्रयाच्चतेषामाध्यात्मिकाधिभौतिकपरिछेदःप्राणिकर्मज्ञानभावनानिमित्तोतद्वशात्स्वभावतःसर्वगतानामनंतानामपिप्राणानांकर्मज्ञानवासनानुरूपेणैवदेहांतरारंभवशात्प्राणानांवृत्तिःसंकुचतिविकसतिचतथाचोक्तंसमःप्लुषिणासमोमशकेनसमोनागेनसमएभिस्त्रिभिर्लोकैःसमोनेनसर्वेणेतितथाचेदंवचनमनुकूलंसयोहैताननंतानुपास्तइत्यादितंयथायथोपासतइतिच

पेणापरिच्छिन्नानामपिकरणानामाध्यात्मिकादिरूपेणपरिछिन्नतेतिस्थितेफलितमाह॥अतइति॥तद्वशादुदाहृतश्रुतिवशादित्येतत्॥स्वभावतोदेवतास्वरूपानुसारेणेतियावत्॥कर्मज्ञानवासनारूपेणेत्यत्रभोक्तुरितिशेषः॥उभयत्रसंबंधार्थंप्राणानामितिद्विरुक्तं॥तेषांवृत्तिसंकोचादौप्रमाणमाह॥तथाचेति॥परिछिन्नापरिछिन्नप्राणोपासनेगुणदोषसंकीर्तनमपिप्राणसंकोचविकासयोःसूचकमित्याह॥तथाचेदमिति॥आधिदैविकेनरूपेणसर्वगतानामपिकरणाना

माध्यात्मिकाधिभौतिकरूपेणापरिछिन्नत्वात्सर्वगतिः
तस्यागमेनसिद्धत्वादितिभावः॥

इदानीं तृणजलायुकादृष्टांताद्देहांतरं गृहीत्वा पूर्वदेहं मुंचत्यात्मेति स्थूलदेहविशिष्टस्यैव परलोकगमनमिति पौराणिकप्रक्रियां प्रत्याख्यातुं दृष्टांतवा
क्यस्य तात्पर्यमाह ॥ तत्रेत्यादिना ॥ देहनिर्गमनात्प्रागवस्थासप्तम्यर्थः ॥ तदेवं यथोक्ता वासनाहृदयस्थाविद्याकर्मनिमित्तं भाविदेहं स्पृशति जीवोपि त
त्राभिमानं करोति पुनश्च पूर्वदेहं त्यजति यथा स्वप्ने देवोहमित्यभिमन्यमानो देहांतरस्थ एव भवति तथोत्क्रांतावपि तस्मान्न पूर्वदेहविशिष्टस्यैव पर

तत्र वासना पूर्वप्रज्ञाख्याविद्याकर्मतंत्रा जलूकावत्संततैव स्वप्नकाल इव कर्मकृतं देहाद्देहांतरमारभते हृदयस्थैव पुनर्देहांतरारंभे पूर्वा
श्रयं विमुंचतीत्येतस्मिन्नर्थे दृष्टांत उपादीयते तत्तत्र देहांतरसंचारे इदं निदर्शनं यथा येन प्रकारेण तृणजलायुका तृणजलूका तृणस्यांत
मवसानं गत्वा प्राप्यान्यं तृणांतरमाक्रममाक्रम्य तदुत्याक्रमस्तमाक्रममाक्रम्याश्रित्यात्मानमात्मनः पूर्वावयवमुपसंहरति स्वावयवस्था

तद्यथा तृणजलायुका तृणस्यांतं गत्वान्यमाक्रममाक्रम्यात्मानमुपसंहरत्येवमेवायमात्मेदं शरीरं निहत्याविद्यां गमयित्वा
न्यमाक्रममाक्रम्यात्मानमुपसंहरति ॥५२॥

ने एवमेवायमात्मा यः प्रकृतः संसारी इदं शरीरं पूर्वोपात्तं निहत्य स्वप्नं प्रतिपित्सुरि
व पातयित्वाऽविद्यां गमयित्वाऽचेतनं कृत्वा स्वात्मोपसंहारेणान्यमाक्रमं तृणांतरमिव तृणजलूका शरीरांतरं गृहीत्वा प्रसारितया वासन
यात्मानमुपसंहरति तत्रात्मभावमारभते यथा स्वप्ने देहांतरमारभते स्वप्नदेहांतरस्थ इव शरीरारंभदेशे आरभ्यमाणे देहे जंगमे स्थावरे
वा तत्र च कर्मवशात्करणानि लब्धवृत्तीनि संहन्यंते

लोकगमनमित्यर्थः ॥ स्वात्मोपसंहारो देहे पूर्वस्मिन्नात्माभिमानत्यागः प्रसारितया वासनया शरीरां
तरं गृहीत्वेति संबंधः ॥ उपसंहारस्य स्वरूपमाह ॥ तत्रेति ॥ सप्तम्यर्थं विवृणोति ॥ आरभ्यमाण इति ॥ आरब्धे देहांतरे सूक्ष्मदेहस्याभिव्यक्तिमाह ॥ तत्रचे

ननु लिंगदेहबलादेवार्थक्रियासिद्धौ कृतं स्थूलशरीरेणेत्याशंक्य तद्व्यतिरेकेणेतरस्यार्थक्रियाकारित्वं नास्तीति मत्वाह॥ बाह्यं चेति॥ आरब्धे देहद्वये करणेषु देवतानामनुग्राहकत्वेनावस्थानं दर्शयति॥ तत्रेति॥ स्थूलो देहः सप्तम्यर्थः॥ करणव्यूहस्तेषामभिव्यक्तिः॥ ३॥ पेशस्कारिवाक्यमावर्त्याभा

बाह्यं च कुशमृत्तिकास्थानीयं शरीरमारभ्यते तत्र च करणव्यूहमपेक्ष्य वागाद्यनुग्रहायाग्न्यादिदेवताः संश्रयंते एष देहांतरारंभविधिः॥५२॥ ३॥ तत्र देहांतरारंभे नित्योपात्तमेवोपादानमुपमृद्योपमृद्य देहांतरमारभत आहोस्विदपूर्वमेव पुनः पुनराद‌त्त इत्यत्रोच्यते दृष्टांतस्तत्रैतस्मिन्नर्थे यथा पेशस्कारी पेशः सुवर्णं तत्करोतीति पेशस्कारी सुवर्णकारः पेशसः सुवर्णस्य मात्रामपादायापच्छिद्य गृहीत्वा

तद्यथा पेशस्कारी पेशसो मात्रामपादायान्यन्नवतरं कल्याणतरꣳरूपं तनुत एवमेवायमात्मेदꣳशरीरं निहत्याविद्यां गमयित्वान्यन्नवतरं कल्याणतरꣳरूपं कुरुते पित्र्यं वा गांधर्वं वा दैवं वा प्राजापत्यं वा ब्राह्मं वान्येषां वा भूतानां॥ ५३॥

न्यत्पूर्वस्माद्रचनाविशेषान्नवान्नवतरमभिनवतरं कल्याणात्कल्याणतरं रूपं तनुते निर्मिनोति एवमेवायमात्मेत्यादि पूर्ववन्नित्योपात्तान्येव पृथिव्यादीन्याकाशांतानि पंच भूता शंकामाह॥ तत्रेति॥ संसारिणो हि प्रकृते देहांतरारंभे किमुपादानमस्ति किं न वा॥ नास्ति चेन्न भावरूपं कार्यं सिध्येदस्ति चेत्तत्किंभूतं पंचकभूतान्यद्याद्येपि तन्नित्योपात्तमेव पूर्वपूर्वदेहोपमर्देनान्यमन्यं देहमारभते॥ किं वान्यदन्यद्भूतपंचकमन्यमन्यं देहं जनयति नाद्यो भूतपंचकस्य तत्तद्देहोपादानतेमा॒यायाः सर्वकारणत्वस्वीकारविरोधान्न द्वितीयो भूतपंचकोत्सत्तावपि कारणांतरस्य मृग्यत्वात्तस्यैव देहांतरकारणत्वसंभवान्नेतरो देहस्य पांचभौतिकत्वप्रसिद्धिविरोधादिति भावः उत्तरं वाक्यमुत्तरत्वेनादत्ते॥ अत्रेति॥ नक्

अवशिष्टंभागमादायव्याचष्टे॥ यथेत्यादिना॥ किंपुनरुपादानमेतावतादेहांतरारंभेभ्युपगतंभवतितत्राह॥ नित्योपात्तानीतिशरीरद्वयारंभका
णीतिशेषः॥ तेषामुभयारंभकत्वेनमूर्त्तामूर्त्तब्राह्मणेप्रस्तुतत्वंदर्शयतियानीति॥ देहविकल्पेनियामकमाह॥ यथाकर्मेति॥ शरीरारंभमायात्म
कभूतपंचकमुपादानमितिवदताभूतावयवानामपिसहैवगमनमित्युक्तं॥ ५३॥४॥ इदानींसवाअयमात्मेत्यादेस्तात्पर्यमाह॥ येस्येति॥ तानेवोपा
नियानिद्वेवावब्रह्मणोरूपेइतिचतुर्थेव्याख्यातानिपेशःस्थानीयानितान्येवोपमृद्योपमृद्यान्यच्चदेहांतरंनवतरंकल्याणतरंरूपंसंस्था
नविशेषंदेहांतरमित्यर्थः कुरुतेपित्र्यंवापितृभ्योहितंपितृलोकोपभोगयोग्यमित्यर्थः गांधर्वंगंधर्वाणामुपभोगयोग्यंतथादेवानांदैवं
प्रजापतेःप्राजापत्यंब्रह्मणइदंब्राह्मंवायथाकर्मयथाश्रुतमन्येषांवाभूतानांसंबंधिशरीरांतरंकुरुतेइत्यभिसंबध्यते॥ ५३॥४॥ येऽस्य

सवाअयमात्माब्रह्मविज्ञानमयोमनोमयःप्राणमयश्चक्षुर्मयःश्रोत्रमयःपृथिवीमयआपोमयोवायुमय

बंधनसंज्ञिताउपाधिभूताःयैःसंयुक्तस्तन्मयोयमितिविभाव्यतेतेपदार्थाःपुंजीकृत्येहैकत्रप्रतिनिर्दिश्यंतेसवैअयंयएवंसंसरत्यात्मा
ब्रह्मैवपरएवयोऽशनायाद्यतीतोविज्ञानमयोविज्ञानंबुद्धिस्तेनोपलक्ष्यमाणस्तन्मयःकतमआत्मेतियोयंविज्ञानमयःप्राणेष्वितिह्यु
क्तंविज्ञानमयोविज्ञानप्रायोयस्मात्तद्धर्मत्वमस्यविभाव्यते धिभूतान्पदार्थान्विशिनष्टि॥ येरिति॥ ननुपूर्वमप्येतेपदार्थादर्शिताःकिंपुनस्तत्प्र
दर्शनेनेत्याशंक्याह॥ पुंजीकृत्येति॥ सवाअयमात्माब्रह्मेतिभागंव्याकुर्वन्नात्मनोब्रह्मैक्यंवास्तवंवृत्तंदर्शयति॥ सवाइति॥ तस्यैवावास्तवंरूपमुपन्य
स्यति॥ विज्ञानमयइत्यादिना॥ ज्योतिर्ब्राह्मणेपिव्याख्यातंविज्ञानमयत्वमित्याह॥ कतमइति॥ कस्मिन्नर्थेमयट्प्रयुज्यतेतत्राह॥ विज्ञानेति॥ उक्तं

बुध्येक्याध्यासात्तद्धर्मस्यकर्तृत्वादेरात्मनिप्रतीतिरित्यत्रमानमाह॥ध्यायतीवेति॥मनःसंनिकर्षात्तेनद्रष्टव्यतयासंबंधादितियावत्॥चक्षुर्मयत्वादे
रुपलक्षणमंगीकृत्याह॥एवमिति॥उक्तमनूद्यसामान्येनभूतमयत्वमाह॥एवंबुद्धीति॥भूतमयत्वेसत्यवांतरविशेषमाह॥तत्रेत्यादिना॥नचाकाश

ध्यायतीवलेलायतीवेतितथामनोमयोमनःसंनिकर्षान्मनोमयःतथाप्राणमयःप्राणःपंचवृत्तिस्तन्मयोयेनचेतनश्चलतीवलक्ष्यतेतथाच
क्षुर्मयोरूपदर्शनकालेएवंश्रोत्रमयःशब्दश्रवणकालेएवंतस्यतस्येंद्रियस्यव्यापारोद्भवेतत्तन्मयोभवतिएवंबुद्धिप्राणद्वारेणचक्षुरादिकरण
मयःसन्छरीरारंभकपृथिव्यादिभूतमयोभवति तत्रपार्थिवशरीरारंभेपृथिवीमयोभवति तथावरुणादिलोकेष्वाप्यशरीरारंभेआपोमयो
भवतितथावायव्यशरीरारंभेवायुमयोभवति॥तथाकाशशरीरारंभेआकाशमयोभवतिएवमेतानितैजसानिदेवशरीराणितेष्वारभ्यमाणेषुत

आकाशमयस्तेजोमयोतेजोमयःकाममयोकाममयःक्रोधमयोक्रोधमयोधर्ममयोधर्ममयःसर्वमयस्तद्यदेतदिदंमयो

न्मयस्तेजोमयोभवत्यतोव्यतिरिक्तानिपश्वादिशरीराणिनरकप्रेतादिशरीराणिवाऽतेजोमयानितान्यपेक्ष्याहअतेजोमयइत्येवंकार्यकरणसंघा
तमयःसन्नात्माप्राप्तव्यंवस्त्वंतरंपश्यन्निदंमयाप्राप्तमदोमयाप्राप्तव्यमित्येवंविपरीतप्रत्ययस्तदभिलाषःकाममयोभवतितस्मिन्कामेदो
षंपश्यतस्तद्विषयाभिलाषप्रशमेचित्तंप्रसन्नमकलुषंशांतंभवतितन्मयोऽकाममयःएवंतस्मिन्विहतेकामेकेनचित्सकामःक्रोधत्वेनपरि
णमतेतेनतन्मयोभवेत्क्रोधमयःसक्रोधःकेनचिदुपायेननिवर्तितोयदाभवतितदाप्रसन्नमनाकुलंचित्तंसदक्रोधउच्यतेतेनतन्मयःएवंका
मक्रोधाभ्यामकामाक्रोधाभ्यांचतन्मयोभूत्वाधर्ममयोऽधर्ममयश्चभवतिनहि परमाण्वभावादाकाशस्यशरीरानारंभकत्वंश्रुतिविरुद्धारंभप्रक्रि

यानभ्युपगमादित्यभिप्रेत्याह॥तथाकाशेति॥कथंपुनर्धर्मा
दिमयत्वेकामादिमयत्वमुपपद्युज्यतेतत्राह॥नहीति॥

कथं धर्मादिमयत्वं सर्वमयत्वे कारणमित्याशंक्याह॥समस्तमिति॥तद्यदेतदित्यादेरर्थमाह॥किंबहुनेति॥विषयः शब्दादिः ततोन्यदपि प्रत्यस्ततो गृह्य
माणमादिशब्दार्थः॥इदंमयत्वमदोमयत्वे गमकमित्याह॥तस्मादिति॥विशेषतस्तन्मयत्वोक्तिं विना किमिति सामान्योक्तिरित्याशंक्याह॥अनंताहीति॥तदस्तित्वेमानमाह॥तस्मिन्निति॥अवगतिप्रकारमभिनयति॥इदमस्येति॥इदंमयत्वमदोमयत्वं चोपसंहरति॥तेनेत्यादिना॥परोक्षत्वंव्याक

कामक्रोधादिभिर्विना धर्मादिप्रवृत्तिरुपपद्यते॥यद्यद्धि कुरुते कर्म तत्तत्कामस्य चेष्टितमिति स्मरणाद्धर्ममयोऽधर्ममयश्च भूत्वा सर्वमयो भवति समस्तं धर्माधर्मयोः कार्यं यावत्किंचिद्व्याकृतं तत्सर्वं धर्माधर्मयोः फलं तत्प्रतिपद्यमानस्तन्मयो भवति किंबहुना तदेतत्सिद्धमस्य प्र
दयमिदंमयो गृह्यमाणविषयादिमय स्तस्मादयमदोमयः अद इति परोक्षं कार्येण गृह्यमाणेन निर्दिश्यते अनंता ह्यंतःकरणभावनाविशे

दोमय इति यथाकारी यथाचारी तथा भवति साधुकारी साधुर्भवति पापकारी पापो भवति पुण्यः पुण्येन कर्मणा भवति पा
पः पापेना
षानैव ते विशेषतो निर्देष्टुं शक्यंते तस्मिंस्तस्मिन्क्षणे कार्यतोऽवगम्यंते इदमस्य हृदि वर्तते दोस्येति तेन न गृह्यमाणकार्ये
णेदंमयतया निर्दिश्यते परोक्षोंतस्थो व्यवहारोयमिदानीमदोमय इति संक्षेपतस्तु यथा कर्तुं यथा वाचरितुं शीलमस्य सोयं यथाकारी य
थाचारी स तथा भवति करणं नाम नियता क्रियाविधिप्रतिषेधादिगम्या चरणं नामानियता इति विशेषः साधुकारी साधुर्भवति यथाका
रीत्यस्य विशेषणं पापकारी पापो भवतीति च यथाचारीत्यस्य रोति॥अंतस्थ इति॥व्यवहितविषयव्यवहारवानिति यावत्॥इदानीमित्यस्मादु
परिष्टादपि तेनेति संबध्यते परोक्षत्वावस्थेदानीमित्युक्ता तत्तीययाच प्रकृतो व्यवहारो निर्दिश्यते॥इतिशब्दः सर्वमयत्वोपसंहारार्थः॥विज्ञानमया

करणचरणयोरैक्येन पौनरुक्त्यमाशंक्याह॥ करणं नामेति॥ आदिशब्दः शिष्टाचारसंग्रहार्थः वाक्यांतरं शंकोत्तरत्वेनोत्थाप्य व्याचष्टे॥ ताद्धील्येत्या
दिना॥ कुत्र तर्हि ताद्धील्यमुपयुज्यते तत्राह॥ ताद्धील्ये त्विति॥ पूर्वपक्षमुपसंहरति॥ तत्रेत्यादिना॥ कर्मणः संसारकारणत्वमुपसंहरति॥ एत
त्त्वयुक्तो हीति॥ संसारप्रयोजके कर्मणि प्रमाणमाह॥ एतद्विषयौ हीति कथं यथोक्तकर्मविषयत्वं विधिनिषेधयोरित्याशंक्याह॥ अत्रेति॥ इति

ताद्धील्यप्रत्ययोपादानाद्यत्तत्तात्पर्यं तयैव तन्मयत्वं न तु तत्कर्ममात्रेणेत्याशंक्याह पुण्यः पुण्येन कर्मणा भवति पापः पापेनेति पु
ण्यपापकर्ममात्रेणैव तन्मयता स्यान्न तु ताद्धील्यमपेक्षते ताद्धील्ये तु तन्मयत्वातिशय इत्ययं विशेषस्तत्र कामक्रोधादिपूर्वकं पुण्या
पुण्यकारिता सर्वमयत्वे हेतुः संसारस्य कारणं देहाद्देहांतरसंचारस्य चैतत्त्वयुक्तो ह्यन्यदन्यद्देहांतरमुपादत्ते तस्मात्पुण्यापुण्ये संसा

थो खल्वाहुः काममय एवायं पुरुष इति स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तत
दभिसंपद्यते॥५॥

रस्य कारणमेतद्विषयौ हि विधिप्रतिषेधावत्र शास्त्रस्य साफल्यमिति॥ अथो अप्यन्ये बंधमोक्षकुशलाः ख
ल्वाहुः सत्यं कामादिपूर्वके पुण्यापुण्ये शरीरग्रहणकारणं तथापि कामप्रयुक्तो हि पुरुषः पुण्यापुण्ये कर्मणी उपचिनोति कामप्रहा
णे तु कर्म विद्यमानमपि पुण्यापुण्योपचयकरं न भवत्युपचितेऽपि पुण्यापुण्ये कर्मणी कामशून्ये फलारंभके न भवतस्तस्मात्काम
एव संसारस्य मूलं

शब्दः पूर्वपक्षसमाप्त्यर्थः॥ सिद्धांतमवतारयति॥ अथो इति॥ संसारकारणस्याज्ञानस्य प्राधान्येन कामः सहकारीति स्वसिद्धां
तं समर्थयते॥ सत्यमित्यादिना॥ कामाभावेऽपि कर्मणः सत्त्वं दृष्टमित्याशंक्याह॥ कामप्रहाणे त्विति॥ ननु कामाभावेऽपि नित्याद्यनुष्ठानात्पुण्यापुण्ये सं

योहि पशुपुत्रस्वर्गादीननतिशयपुरुषार्थान्मन्यमानस्तानेवकामयतेसतत्तद्भोगभूमौतत्तत्कामसंयुक्तोभवतीत्याथर्वणश्रुतेरर्थः॥ श्रुतियुक्ति
सिद्धमर्थंनिगमयति॥तस्मादिति॥धर्मादिमयत्वस्यापिसत्वादवधारणानुपपत्तिमाशंक्याह॥यदिति॥सयथाकामोभवतीत्यादिव्याचष्टे॥यस्मा

तथाचोक्तमाथर्वणे कामान्यःकामयतेमन्यमानःसकामभिर्जायतेतत्रतत्रेतितस्मात्काममयएवायंपुरुषोयदन्यमयत्वंतदकारणंविद्य
मानमपीत्यतोवधारयतिकाममयएवेतियस्मात्सचकाममयःसन्यादृशेनकामेनयथाकामोभवतितत्क्रतुर्भवतिसकामईषदभिलाषमा
त्रेणाभिव्यक्तोयस्मिन्विषयेभवतिसोऽविहन्यमानःस्फुटीभवन्क्रतुत्वमापद्यतेक्रतुर्नामाध्यवसायोनिश्चयोयदनंतराक्रियाप्रवर्ततेतत्क्र
तुर्भवति यादृक्कामकार्येणक्रतुनायथारूपःक्रतुरस्यसोयंयत्क्रतुर्भवतितत्कर्मकुरुतेयद्विषयःक्रतुस्तत्फलनिर्वृत्तयेयद्योग्यंकर्मतत्कु

तदेषश्लोकोभवतितदेवसक्तःसहकर्मणैतिलिंगंमनोयत्रनिषक्तमस्य

रुतेनिर्वर्तयतियत्कर्मकुरुतेतदभिसंपद्यतेतदीयंफलमभिसंपद्यतेतस्मात्सर्वमयत्वेस्यसंसारित्वेचकामएवहेतुरिति॥५४॥तत्तस्मिन्न
र्थेएषश्लोकोमंत्रोपिभवतितदेवैतितदेवगच्छतिसक्तःआसक्तस्तत्रोद्भूताभिलाषःसन्नित्यर्थःकथमेतिसहकर्मणायत्कर्मफलासक्तःस
न्नकरोत्तेनकर्मणासहैवतदेतितत्फलमेतिकिंतल्लिंगंमनोमनःप्रधानत्वाल्लिंगस्यमनोलिंगमित्युच्यतेअथवालिंग्यतेऽवगम्यतेज्ञायते

दित्यादिना॥यस्मादित्यस्यतस्मादितिव्यवहितेनसंबंधः॥इतिशब्दोब्राह्मणसमाप्त्यर्थः॥५४॥५५॥तत्रेतिगंतव्यपरामर्शः॥तदेवगंतव्यंफलंविशेषतोज्ञातुं
एच्छति॥किंतदिति॥प्रतीकमादायव्याचष्टे॥लिंगमिति॥योवगच्छतिसप्रमात्रादिसाक्षीयेनसाक्ष्येणमनसावगम्यतेतन्मनोलिंगमितिपक्षांतरमा

यस्मिन्निश्चयेनसंसारिणोमनःसंसक्तंतत्फलप्राप्तिस्तस्येतिसंबंधः॥तदेवोपपादयति॥तदभिलाषोहीति॥पूर्वार्धार्थमुपसंहरति॥तेनेति॥कामस्य संसारमूलत्वेसत्यर्थसिद्धमर्थमाह॥अतइति॥वंध्यप्रसवत्वंनिष्फलत्वं॥पर्याप्तकामस्यप्राप्तपरमपुरुषार्थस्येतियावत्॥कृतात्मनःशुद्धबुद्धेर्विदितसत्व स्येत्यर्थः॥इहेतिजीवदवस्थोक्तिः॥कामप्रधानःसंसरतिचेत्कर्मफलभोगानंतरंकामाभावान्मुक्तिःस्यादित्याशंक्याह॥किंचेति॥इतश्चसंसारस्यकाम

ऽवगच्छतियेनतल्लिंगंतन्मनोयत्रयस्मिन्निषक्तंनिश्चयेनसक्तमुद्भूताभिलाषमस्यसंसारिणःतदभिलाषोहितत्कर्मकृतवांस्तस्मात्तन्म नोभिषंगवशादेवास्यतेनकर्मणातत्फलप्राप्तिस्तेनैतत्सिद्धंभवतिकामोमूलंसंसारस्येत्यतउच्छिन्नकामस्यविद्यमानान्यपिकर्माणिब्रह्म विदोवंध्यप्रसवानिभवंतिपर्याप्तकामस्यकृतात्मनस्त्विहैवसर्वेप्रविलीयंतिकामाइतिश्रुतेः॥किंच॥प्राप्यांतंकर्मणःप्राप्यभुक्त्वांतमवसानं

प्राप्यांतंकर्मणस्तस्ययत्किंचेहकरोत्ययं तस्माल्लोकात्पुनरैत्यस्मैलोकायकर्मणइतिनुकामयमानोथाकामयमानोयोका मोनिष्कामआप्तकामआत्मकामो

यावत्कर्मणःफलपरिसमाप्तिंकृत्वेत्यर्थः॥कस्यकर्मणोंतंप्राप्येत्युच्यतेतस्ययत्किंचकर्मइहास्मि न्लोकेकरोतिनिर्वर्तयत्ययंतस्यकर्मणःफलंभुक्त्वांतंप्राप्यतस्माल्लोकात्पुनरैत्यागच्छत्यस्मैलोकायकर्मणेयंहिलोकःकर्मप्रधानस्तेने हकर्मणइतिपुनःकर्मकरणायपुनःकर्मकृत्वाफलासंगवशात्पुनरमुंलोकंयातीत्येवमितिनुएवंनुकामयमानःसंसरतियस्मात्कामय मानएवैवंसंसरत्यथतस्मादकामयमानोनक्वचित्संसरति॥

प्रधानत्वमास्थेयमित्यर्थः॥यावदवसानंतावद्भुक्त्वेतिसंबंधः॥उक्तमेवसंक्षिपति॥ कर्मणइति॥इत्येवंपारंपर्येणसंसरणादृतेज्ञानान्नमुक्तिरितिशेषः॥संसारप्रकरणमुपसंहरति॥इतिन्विति॥अवस्थाद्वयस्यदार्ष्टांतिकंबंधप्रबंधेन

कामरहितस्य संसाराभावं साधयति॥ फलासक्तस्येति॥ विदुषो निष्कामस्य क्रियाराहित्येन नैष्कर्म्यमयत्नसिद्धमिति भावः॥ अकामयमानत्वे प्रश्न
पूर्वकं हेतुमाह॥ कथमित्यादिना॥ बाह्येषु शब्दादिषु विषयेष्वासंगराहित्यादकामयमानतेत्यर्थः॥ अकामत्वे हेतुमाकांक्षापूर्वकमाह॥ कथमिति॥ वा
सनारूपकामाभावादकामतेत्यर्थः॥ निष्कामत्वे प्रश्नपूर्वकं हेतुमुत्थाप्य व्याचष्टे॥ कथमिति॥ प्राप्तपरमानंदत्वान्निष्कामतेत्यर्थः॥ आप्तकामत्वे हे
तुमाकांक्षापूर्वकमाह॥ कथमित्यादिना॥ हेतुमेव साधयति॥ यस्येति॥ तस्य युक्तमाप्तकामत्वमिति शेषः॥ उक्तमर्थं प्रमाणतः प्रदर्शनार्थं प्रपंचय

फलासक्तस्य हि गतिरुक्ताऽकामस्य हि क्रियानुपपत्तेरकामयमानो मुच्यत एव कथं पुनरकामयमानो भवतिय अकामो भवत्यसावका
मयमानः कथमकामतेत्युच्यते यो निष्कामो यस्मान्निर्गताः कामाः॥ सोयं निष्कामः कथं कामा निर्गच्छंतिय आप्तकामो भवत्याप्ताः कामाः
येन स आप्तकामः कथमाप्यंते कामा आत्मकामत्वेन यस्यात्मैव नान्यः कामयितव्यो वस्त्वंतरभूतः पदार्थो भवति॥ आत्मैवानंतरोऽबाह्यः
कृत्स्नः प्रज्ञानघन एकरसो नोर्ध्वं न तिर्यङ्नाध आत्मनोन्यत्कामयितव्यं वस्त्वंतरं यस्य सर्वमात्मैवाभूत्तत्केन कं पश्येच्छृणुयान्मन्वी
त विजानीयाद्वा एवं विजानन्किं कामयेत ज्ञायमानो ह्यन्यत्वेन पदार्थः कामयितव्यो भवति न चासावन्यो ब्रह्मविदः आप्तकामस्या
स्ति॥ य एवात्मकामतयाप्तकामः स निष्कामोऽकामोकामयमानश्चेति मुच्यते न हि यस्यात्मैव सर्वं भवति तस्यानात्मा कामयितव्योस्ति

ति॥ आत्मैवेति॥ कामयितव्याभावं ब्रह्मविदः श्रुत्यवष्टंभेन साधयति॥ यस्येति॥ इति विद्यावस्थायस्य विदुषोस्ति सोन्यमविजानन्न किंचिदपि कामये
तेति योजना॥ पदार्थोन्यत्वेनाविज्ञातोपि कामयितव्यः स्यादिति चेन्नेत्याह॥ ज्ञायमानो हीति॥ अनुभूते स्मरणविपरिवर्तिनि कामनियमादित्यर्थः॥ अन्य
त्वेन ज्ञायमानस्तर्हि पदार्थो विदुषोपि कामयितव्यः स्यादित्याशंक्याह॥ न चेति॥ आप्तकामस्य ब्रह्मविदो दर्शितरीत्या कामयितव्याभावे मुक्तिः सिद्धेत्युपसं
संष्टं३

कथंकामयितव्याभावोऽनात्मनस्तथात्वादित्याशंक्याह॥नहीति॥सर्वात्मत्वमनात्मकामयितृत्वंचस्यादित्याशंक्याह॥अनात्माचेति॥अथेत्यादि
वाक्येश्रौतमर्थमुक्त्वार्थसिद्धमर्थंकथयति॥सर्वात्मदर्शिनइति॥कर्मजडानांमतमुत्थाप्यश्रुतिविरोधेनप्रत्याचष्टे॥यत्विति॥ब्रह्मविदिप्रत्यवाय
प्राप्तिमंगीकृत्योक्तं॥इदानींतत्प्राप्तिरेवतस्मिन्नास्तीत्याह॥येनचेति॥यथोक्तस्यापिब्रह्मविदोविहितत्वादेवनित्याद्यनुष्ठानंस्यादितिचेन्नेत्याह॥नित्यमे

अनात्माचान्यःकामयितव्यःसर्वंचात्मैवाभूदितिविप्रतिषिद्धं॥सर्वात्मदर्शिनःकामयितव्याभावात्कर्मानुपपत्तिर्येतुप्रत्यवायपरिहारार्थं
कर्मकल्पयंतिब्रह्मविदोपितेषांनात्मैवसर्वंभवतिप्रत्यवायस्यजिहासितव्यस्यात्मनोन्यस्याभिप्रेतत्वाद्येनचाशनायाद्यतीतोनित्यंप्रत्यवाया
संबद्धोविदितआत्मातंवयंब्रह्मविदंब्रूमोनित्यमेवाशनायाद्यतीतमात्मानंपश्यतियस्माच्चजिहासितव्यमन्यमुपादेयंवायोनपश्यतित

नतस्यप्राणाउत्क्रामंतिब्रह्मैवसन्ब्रह्माप्येति ॥५५॥ ॥ ॥

स्यकर्मनशक्यतएवसंबद्धुंयस्त्वब्रह्मवित्तस्यभवत्येवप्रत्यवायपरिहारार्थंकर्मेतिनविरोधःअतःकामाभावादकामयमानोनजायतेमुच्य
तएवतस्यैवमकामयमानस्यकर्माभावेगमनकारणाभावात्प्राणावागाद्योनोत्क्रामंतिनोर्ध्वंक्रामंतिदेहात्सचविद्वानाप्तकामःआत्मका
मतयाइहैवब्रह्मभूतः वेति॥योहिसदैवासंसारिणमात्मानमनुभवतिनचहेयमादेयंवात्मन्योन्यत्पश्यतियस्मादेवंतस्मात्तस्यकर्मसंस्पृष्टुमयोग्यं
यथोक्तब्रह्मविद्ययाकर्माधिकारहेतूनामुपमृदितत्वादित्यर्थः॥कर्मसंबंधस्तर्हिकस्येत्याशंक्याह॥यस्त्विति॥नविरोधोविधिकांडस्येतिशेषः॥श्रुत्यर्थाभ्यां
सिद्धमर्थमुपसंहरति॥अतइति॥विद्यावशादित्येतत्॥कामाभावात्कर्माभावाच्चेतिद्रष्टव्यं॥अकामयमानोऽकुर्वाणश्चेतिशेषः॥देशांतरप्राप्त्यायत्तामुक्तिरि
वा

स्येतन्निराकर्तुंनतस्येत्यादिनावष्टे॥तस्येत्यादिना॥ब्र
ह्मैवसन्नित्येतदवतारयति॥सचेति॥

कथंवर्त्तमानेदेहेतिष्ठन्नेवब्रह्मभूतोभवतितत्राह॥सर्वात्मनोहीति॥दृष्टांतालोचनयादार्ष्टांतिकेपिसदाब्रह्मत्वंभातीतिभावः॥सदाब्रह्मीभूतस्यमुक्तिर्नामनास्तीतिशंकितापरिहरति॥सकथमिति॥परिहारमेवस्फोरयितुंनतस्येत्यादिवाक्यार्थमनुद्रवति॥तस्यैवेति॥ब्रह्मैवसन्नित्यस्यार्थमनुद्रवति॥किंत्विति॥विद्वानिहैवब्रह्मचेत्कथंतस्यब्रह्मप्राप्तिरित्याशंक्याह॥ब्रह्मैवेतियदुक्तंब्रह्मैवसन्नित्यादितदुपपादयति॥यस्मादिति॥प्रागपिब्रह्मभूतस्यैवपुनर्देहपातेब्रह्मप्राप्तिरित्ययुक्तंविदुषोमृतस्यभावांतरापत्तिसीकारादित्याशंक्याह॥नहीति॥कथंतर्हिब्रह्माप्येतीत्युच्यतेतत्राह॥देहांतरेति॥वि

सर्वात्मनोहिब्रह्मणोदृष्टांतत्वेनप्रदर्शितमेतद्रूपंतद्वाअस्यैतदाप्तकाममात्मकाममकामंरूपमितितस्यहिदार्ष्टांतिकभूतोयमर्थउपसंह्रियते अथाकामयमानइत्यादिनासकथमेवंभूतोमुच्यतइत्युच्यतेयोहिसुषुप्तावस्थमिवनिर्विशेषमद्वैतमलुप्तचिद्रूपज्योतिःस्वभावमात्मानंपश्यतितस्यैवाकामयमानस्यकर्माभावेगमनकारणाभावात्प्राणावागादयोनोत्क्रामंतिकिंतुविद्वान्सइहैवब्रह्मयद्यपिदेहवानिवलक्ष्यतेसब्रह्मैवसन्ब्रह्माप्येतियस्मान्नहितस्याब्रह्मत्वपरिच्छेदहेतवःकामाःसंतितस्मादिहैवब्रह्मैवसन्ब्रह्माप्येतिनशरीरपातोत्तरकाले॥नहिविदुषोमृतस्यभावांतरापत्तिर्जीवतोन्योभावोदेहांतरप्रतिसंधानाभावमात्रेणैवतुब्रह्माप्येतीत्युच्यतेभावांतरापत्तौहिमोक्षस्यसर्वोपनिषद्विवक्षितोर्थःआत्मैकत्वाख्यःसबाधितोभवेत् कर्महेतुकश्चमोक्षःप्राप्नोतिनज्ञाननिमित्तइतिसचाऽनिष्टोऽनित्यत्वंचमो

क्षस्यप्राप्नोति नहि क्रियानिर्वृत्तोर्थोनित्योदृष्टः

दुषोभावांतरापत्तिर्मुक्तिरितिपक्षेपिकिंदूषणमितिचेत्तदाह॥भावांतरापत्तौहीति॥तथाचोपनिषदामप्रामाण्यंविनाहेतुनास्यादितिभावः॥भावांतरापत्तिर्मुक्तिरित्यत्रदोषांतरमाह॥कर्मेति॥इतिपदादुपरिष्टात्क्रियापदस्यसंबंधः॥अस्तुकर्मनिमित्तोमोक्षोज्ञाननिमित्तस्तुमाभूत्तत्राह॥सचेति॥प्रसंगःसर्वनाम्नापरामृश्यतेप्रतिषेधशास्त्रविरोधादितिभावः॥मोक्षस्यकर्मसाध्यत्वेदोषांतरमाह॥अनित्यत्वंचेति॥तंत्रोपयुक्तांव्याप्तिमाह॥

१= नह्यध्रुवैःप्राप्यतेहिध्रुवंतत्॥नास्त्यकृतःकृतेन॥मोक्षस्यतुनाशास्तिवित्तेनेति॥एवंरूपः

अस्तुतर्हिप्रासादादिवत्क्रियासाध्यस्यमोक्षस्याप्यनित्यत्वंनेत्याह॥नित्यश्चेति॥कृतकोपिब्रह्मभावोध्वंसवन्नित्यःस्यादित्याशंक्याह॥नचेति॥कृत्रि
मस्वभावव्यावृत्त्यर्थंस्वाभाविकंपदं॥अतोन्यदार्त्तमितिहिश्रुतिः॥ध्वंसस्यतुविकल्पमात्रत्वान्नित्यत्वमसंमतमितिभावः॥मोक्षोकृत्रिमस्वभावोपिकर्मो
त्थःस्यादित्याशंक्याह॥स्वाभाविकश्चेति॥अग्नेरौष्ण्यवदात्मनोमोक्षश्चस्वाभाविकस्वभावश्चेन्नसक्रियासाध्योव्याघातादित्यर्थः॥दृष्टांतंसमर्थयते।
नहीति॥अरणिगतस्याग्नेरौष्ण्यप्रकाशौनोपलभ्येतेसतिचज्वलनेदृश्येतेतेनस्वाभाविकावपितावागंतुकौकादाचित्कोपलब्धिमत्त्वादितिशंकते॥

क्रियानिर्वृत्तोर्थोनित्योदृष्टः नित्यश्चमोक्षोभ्युपगम्यते॥एषनित्योमहिमेतिमंत्रवर्णान्नचस्वाभाविकात्स्वभावादन्यन्नित्यंकल्पयितुं
शक्यंस्वाभाविकश्चेदग्न्युष्णत्ववदात्मनःस्वभावःसनशक्यतेपुरुषव्यापारानुभावीतिवक्तुंनह्यग्नेरौष्ण्यंप्रकाशोवाग्निव्यापारानुभावी
स्वाभाविकश्चेतिविप्रतिषिद्धंज्वलनव्यापारानंतरानुभावित्वमुष्णप्रकाशयोरितिचेन्नान्योपलब्धिव्यवधानापगमाभिव्यक्त्यपेक्षत्वात्
ज्वलनादिपूर्वकमग्निरुष्णप्रकाशगुणाभ्यामभिव्यज्यतेइतितन्नाग्न्यपेक्षयाकिंतर्ह्यन्यदृष्टेरग्नेरौष्ण्यप्रकाशौधर्मौव्यवहितौक
स्यचिद्दृष्ट्यात्वसंबध्यमानोज्वलनापेक्षयाव्यवधानापगमेदृष्टेरभिव्यज्येतेतदपेक्षयाभ्रांतिरुपजायतेज्वलनपूर्वकावेतावुष्णप्रका
शौधर्मौजाताविति

ज्वलनेति॥नहिसतोग्नेरौष्ण्यादिकादाचित्कंयुक्तंतद्दृष्टेर्व्यवधानस्यदार्वादेर्ध्वंसेज्वलनमथनादिनावह्न्यभिव्यक्तिमपेक्ष्य
तत्स्वभावस्यौष्ण्यादेर्व्यक्त्यभ्युपगमादितिपरिहरति॥नान्येति॥तदेवप्रपंचयति॥ज्वलनादीति॥मथनादिव्यापारवशात्प्रकाशादिनाभिव्यज्यतेग्निरि
तियदुच्यतेतदग्नेःसत्यैवतद्गतव्यापारापेक्षयातदौष्ण्याद्यभिव्यक्तिवशान्नभवतिकिंतुदेवदत्तदृष्टेरग्निधर्मौव्यवहितौननुतौकस्यचिद्दृष्ट्यासंबध्ये
तेज्वलनादिव्यापारात्तुदृष्टेर्व्यवधानभंगेनयोरभिव्यक्तिरित्यर्थः॥कथंतर्हिज्वलनव्यापारादग्नेरौष्ण्यप्रकाशौजातावितिबुद्धिस्तत्राह॥तदपेक्षयेति॥

ज्वलनादिव्यापारादृष्टिव्यवधानभंगेवन्हेरौष्ण्यप्रकाशाभिव्यक्त्यपेक्षयेतियावत्॥यथावन्हेरौष्ण्यादिस्वाभाविकंनक्रियासाध्यंतथात्मनोमुक्तिः
स्वाभाविकीनक्रियासाध्येत्युक्तं॥इदानीमग्नेरौष्ण्यादिनस्वाभाविकमित्याशंक्याह॥यदीति॥उदाहरिष्यामोमोक्षस्यात्मस्वभावस्याकर्मसाध्यत्वा
पेतिशेषः अथाग्नेःस्वाभाविकोनकश्चिद्धर्मोस्तियोमोक्षस्यदृष्टांतःस्यादतआह॥नचेति॥त्वआत्मकंहिवस्तुवस्त्वंतरेणसंबध्यतेऽस्तिचनिंबादौतिक्त
त्वादिधीरित्यर्थः॥भावांतरापत्तिपक्षंप्रतिक्षिप्यपक्षांतरंप्रत्याह॥नचेति॥नहिबंधस्यतथाभूतस्यनिवृत्तिर्विरोधान्नाप्यन्यथाभूतस्यानवस्थानान्नच
प्रसिद्धिविरोधःदुर्निरूपध्वस्तिविषयत्वादितिभावः॥किंच॥परस्मादन्यस्यबंधनिवृत्तिस्तस्यैववानाद्यइत्याह॥नचेति॥तत्रहेतुत्वेनपरमात्मैकत्वाभ्युप

यद्युस्मप्रकाशयोरपिस्वाभाविकत्वनस्याग्नेःस्वाभाविकोग्नेर्धर्मस्तमुदाहरिष्यामःनचस्वाभाविकोधर्मएववनास्तिपदार्थानामितिश
क्यंवक्तुंनचनिगडभंगइवाभावभूतोमोक्षोबंधननिवृत्तिरूपउपपद्यतेपरमात्मैकत्वाभ्युपगमादेकमेवाद्वितीयमितिश्रुतेः॥नचान्यो
बद्धोस्तियस्यनिगडनिवृत्तिवद्बंधनिवृत्तिर्मोक्षःस्यात्परमात्मव्यतिरेकेणान्यस्याभावंविस्तरेणावादिष्मतस्मादविद्यानिवृत्तिमात्रेमोक्ष ६८
व्यवहारइतिचावोचामयथारज्ज्वादौसर्पाद्यज्ञाननिवृत्तौसर्पादिनिवृत्तिवदिति॥येप्याचक्षतेमोक्षेविज्ञानानंतरमानंदांतरंचाभिव्यज्यतइ

गमादित्यादिभाष्यंव्याख्येयं॥नद्वितीयःतस्यनित्यमुक्तस्यत्वयापिबद्धत्वानभ्युपगमादितिद्रष्टव्यं॥कथंपरस्मादन्योबद्धोनास्तीत्याशंक्यप्रवेशविचारा
दावुक्तंस्मारयति॥परमात्मेति॥नचेदन्योबद्धोस्तिकथंमोक्षव्यवहारःस्यादित्याशंक्याह॥तस्मादिति॥अन्यस्यबद्धस्याभावात्परस्यचनित्यमुक्तत्वादि
तियावत्॥यथारज्ज्वादावधिष्ठानेसर्पादिहेतोरज्ज्वज्ञानस्यनिवृत्तौसत्यांसर्पादेरपिनिवृत्तिस्तथाऽविद्यायाबंधहेतोर्निवृत्तिमात्रेणतत्कार्यस्यबंधस्या
पिनिवृत्तिव्यवहारोभवतीतिचावादिष्मेतियोजना॥मतांतरमुद्भावयति॥येप्याचक्षतइति॥वैषयिकज्ञानानंदापेक्षयांतरशब्दः॥केयमभिव्यक्तिरु

मोक्षेसुखाद्युत्पत्तौतदनित्यत्वापत्तेरित्यभिप्रेत्याह॥तैरिति॥द्वितीयमालंबते॥यदीति॥तत्रदोषंवक्तुंविकल्पयति॥ततइति॥द्वितीयेखरविषाण
वदपरोक्षाभिव्यक्तिर्नस्यादित्यभिप्रेत्याद्यमनुभाष्यदूषयति॥विद्यमानंचेदिति॥उपलब्धिस्वभावत्वावदात्मातस्यविद्यमानंसुखादिव्यज्यतेचेत्वाना
नंदयोर्देशादिव्यवधानाभावादानंदःसदैवव्यज्यतइतिमुक्तिविशेषणमनर्थकमित्यर्थः॥चक्षुर्घटयोर्विषयविषयित्वप्रतिबंधककुड्यादिवदधर्मा
दिप्रतिबंधादानंदोज्ञानंचसंसारदशायांनव्यज्यतेमोक्षेतुव्यज्यतेतदभावादितिशंकते॥अथेति॥उपलब्धिदेशाद्भिन्नदेशस्यैवघटादेरुपलब्धिप्र

तैर्वक्तव्योभिव्यक्तिशब्दार्थः यदितावल्लौकिक्यैवोपलब्धिविषयप्राप्तिरभिव्यक्तिशब्दार्थः ततोवक्तव्यंकिंविद्यमानमभिव्यज्यतेऽवि
द्यमानमितिवाविद्यमानंचेद्यस्यमुक्तस्यतदभिव्यज्यतेतस्यात्मभूतमेवतदित्युपलब्धिव्यवधानानुपपत्तेर्नित्याभिव्यक्तत्वान्मुक्तस्याभि
व्यज्यतइतिविशेषवचनमनर्थकमथकदाचिदेवाभिव्यज्यतेउपलब्धिव्यवधानादनात्मभूतंतदित्यन्यतोभिव्यक्तिप्रसंगः॥तथाचाभि
व्यक्तिसाधनापेक्षताउपलब्धिसमानाश्रयत्वेतुव्यवधानकल्पनानुपपत्तेःसर्वदाभिव्यक्तिरनभिव्यक्तिर्वानत्वंतरालकल्पनायांप्रमाणम
स्तिनचसमानाश्रयाणामेकस्यात्मभूतानांधर्माणामितरेतरविषयविषयित्वंसंभवति॥विज्ञानसुखयोश्चप्रागभिव्यक्तेःसंसारित्वमभिव्य
क्त्युत्तरकालेचमुक्तत्वंयस्यसोन्यःपरस्मान्नित्याभिव्यक्तिज्ञानस्वरूपादस्यंतवैलक्षण्यात्क्वे त्यमिवौस्या तिबंधदर्शनादनात्मभूतंसुखंनस्वभाव
भूतयोपलब्ध्याप्रकाशेतकिंतुविषयेंद्रियसंपर्कादित्युत्तरमाह॥उपलब्धीति॥अन्यतोभिव्यक्तौकिंस्यादितिचेत्तदाह॥तथाचेति॥तत्साधनानिचे
न्मुक्तौस्युःसंसाराद्विशेषःस्यादितिभावःउपलब्धिव्यवधानमानंदस्यांगीकृत्योक्तं॥इदानींतदेवनास्तीत्याह॥उपलब्धीति॥कदाचिदभिव्यक्तिर
नभिव्यक्तिश्चकदाचिदित्येवंकालभेदेनोभयंकिंनस्यादित्याशंक्याह॥नत्विति॥आनंदज्ञानयोर्विषयविषयित्वमभ्युपेत्यकादाचित्कीतावदभिव्यक्तिर्नि

बृ॰र॰
६९

सिद्धांतः ५

आत्मभूतत्वंस्वाभाविकत्वं॥विमतंनसमानाश्रयविषयंधर्मत्वात्प्रदीपप्रकाशवदितिभावः॥मुक्तावानंदज्ञानाभिव्यक्तिपक्षेदोषांतरंवक्तुंभूमिकां
करोति॥विज्ञानसुखयोश्चेति॥तद्भेदापादनमिष्टमेवेत्याशंक्यविवक्षितंदोषमाह॥परमात्मेति॥परमतेनिराकृतेसिद्धांतेदोषद्वयमाशंकते॥मो
क्षस्येति॥मोक्षार्थाधिकोयत्नःशमदमादिः॥शास्त्रंमोक्षविषयं॥मोक्षस्यनिर्विशेषत्वेपिप्रत्यगविद्यातदुत्थानर्थध्वंसित्वेनोभयमर्थवदितिपरिहर
ति॥नाविद्येति॥तत्रनञर्थंविवृणोति॥नहीति॥कथंतर्हिशास्त्राद्यर्थवत्त्वमित्याशंक्याह॥किंत्विति॥तत्रशास्त्रस्यार्थवत्वंसमर्थयते॥नहिष

परमात्मभेदकल्पनायांचवैदिककृतांतैः परित्यक्तःस्यात्॥मोक्षस्येदानीमिवनिर्विशेषत्वेतदर्थाधिकयत्नानुपपत्तिःशास्त्रवै
यर्थ्यंचप्राप्नोतीतिचेन्नाविद्याभ्रमापोहार्थत्वान्नहिवस्तुतोमुक्तामुक्तत्वविशेषोस्त्यात्मनोनित्यैकरूपत्वात्किंतुतद्विषयाविद्या
पोह्यतेशास्त्रोपदेशजनितविज्ञानेनप्राक्तदुपदेशप्राप्तेस्तदर्थश्चप्रयत्नउपपद्यतएवअविद्यावतोऽविद्यानिवृत्त्यनिवृत्तिकृतो
विशेषआत्मनःस्यादितिचेन्नाविद्याकल्पनाविषयत्वाभ्युपगमाद्रज्जूषरशुक्तिकागगनानांसर्पोदकरजतमलिनत्वादिवददो
षइत्यवोचाम॥तिमिरातिमिरदृष्टिवदविद्याकर्तृत्वाकर्तृत्वकृतआत्मनोविशेषःस्यादितिचेन्नध्यायतीवलेलायतीवेतिस्वतोऽ
विद्याकर्तृत्वस्यप्रतिषिद्धत्वा येति॥प्रस्तुतात्मविषयस्तच्छब्दः॥संप्रतिप्रयत्नस्यार्थवत्वंप्रकटयति॥प्रागिति॥प्रथमस्तच्छब्दःशास्त्रवि
षयः॥द्वितीयोमोक्षविषयः॥आत्मनःसदैकरूपत्वंप्रागुक्तमाक्षिपति॥अविद्येति॥आविद्यःसोपीतिसमाधत्ते॥नेति॥यथारज्ज्वाद्यविद्यात्थ
सर्पादेस्तद्विद्ययाध्वंसाध्वंसयोरज्ज्वादेर्नवास्तवोविशेषस्तथात्मनोपिस्वाविद्यामात्रोत्थविशेषवत्त्वेपितद्ध्वंसाध्वंसयोर्नवास्तवोविशेषोस्तीत्य
र्थः॥अदोषः सविशेषत्वदोषराहित्यं॥प्रकारांतरेणसविशेषत्वंशंकते॥तिमिरेति॥किमिदमविद्याकर्तृत्वंतज्जनकत्वंवातदाश्रयत्वमितिवि

अ॰ ६

राम:
६९

आत्मनः स्वतोऽविद्याकर्तृत्वाभावे हेत्वंतरमाह॥ अनेकेति॥ विषयविषय्याकारोंतःकरणस्य तत्र चिदाभासोदयश्चात्मनो व्यापारस्तथा चानेकव्यापारसंनिपाते सति अहं संसारीत्यविद्यात्मको भ्रमो जायते तस्मान्न तस्यात्मकार्यतेत्यर्थः॥ कल्पांतरं प्रत्याह॥ विषयत्वेति॥ अविद्यादेरात्मदृश्यत्वान्न तदाश्रयत्वं न हि तद्भूतस्य तद्ग्राह्यत्वमंशतः स्वग्रहापत्तेरित्यर्थः॥ तदेव स्फोरयति॥ यस्य चेति॥ अनुभवमनुसृत्य शंकते॥ अहं नेत्यादिना॥ साक्षिस्वभावेन भेदाभ्युपगमान्नात्मनोऽविद्याश्रयत्वमित्युत्तरमाह॥ न तस्यापीति॥ तदेव स्पष्टयति॥ नहीति॥ अविद्यादेर्विवेकेन गृहीतर्यर्पितद्विषये भ्रांतत्वे

दनेकव्यापारसन्निपातजनितत्वाच्चाविद्याभ्रमस्य विषयत्वोपपत्तेश्च यस्य चाविद्याभ्रमो घटादिवद्धि विक्तो गृह्यते स नाविद्याभ्रमवान्

हं न जाने मुग्धोस्मीति प्रत्ययदर्शनादविद्याभ्रमवत्त्वमेवेति चेन्न तस्यापि विवेकग्रहणान्न हि यो यस्य विवेकेन गृहीता स तस्मिन्भ्रांत इत्युच्य

ते॥ तस्य च विवेकग्रहणं तस्मिन्नेव भ्रम इति विप्रतिषिद्धं न जाने मुग्धोस्मीति दृश्यत इति च ब्रवीषि तद्दर्शिनश्चाज्ञानं मुग्धरूपता दृश्यत इ

ति च दर्शनस्य विषयो भवति कर्मतामापद्यत इति॥ तत्कथं कर्मभूतं सत्कर्तृस्वरूपदृशिविशेषणमज्ञानमुग्धते स्यातामथ दृशिविशेषण

त्वं तयोः कथं कर्म स्यातां दृशिना व्याप्येते कर्म हि कर्तृक्रियया व्याप्यमानं भवत्यन्यच्च व्याप्यमन्यद्व्यापकं न तेनैव तद्व्याप्यते वद कथमेवं

सत्यज्ञानमुग्धते दृशिविशेषणे स्यातां

काहानिरित्याशंक्याह॥ तस्य चेति॥ अज्ञानं मुग्धत्वं चात्मनो न विशेषणमिति विधांतरेणादर्शयितुं

चोद्यवाक्यमनुवदति॥ न जान इति॥ तद्व्याचष्टे॥ तद्दर्शिनश्चेति॥ अज्ञानादिस्तच्छब्दार्थः॥ दृश्यमानत्वमेव विशदयति॥ कर्मतामिति॥ इति ब्रवीषी

ति संबंधः॥ एवं परकीयवाक्यं व्याख्याय फलितमाह॥ तत्कथमिति॥ तत्र चोद्यवाक्यार्थे दर्शितरीत्या स्थिते सति कर्तृविशेषणं नाज्ञानमुग्धते स्यातां त

योः प्रत्येकं कर्मभूतत्वादित्यर्थः॥ विपक्षे दोषमाह॥ अथेति॥ कथं कर्म स्यातामित्येतदेव व्याचष्टे॥ दृशिनेति॥ तत्रापि कथं शब्दः संबध्यते तदेव स्फुटयति॥

अज्ञानमुपलब्धधर्मोनभवत्युपलभ्यमानत्वाद्देहगतकार्श्यादिवदित्याह॥नचेति॥अज्ञानवत्कार्यमपिनात्मधर्मःस्यादित्यतिदिशति॥तथेति॥अज्ञा
नोत्थस्येच्छादेरात्मधर्मत्वनिराकरणेप्रतीतिविरोधःस्यादितिशंकते॥सुखेति॥तेषांग्राह्यत्वमंगीकृत्यपरिहरति॥तथापीति॥आत्मनिनिष्ठत्वेसुखा
दीनांचैतन्यवदात्मग्राह्यत्वायोगात्तद्ग्राह्याणांतेषांनतद्धर्मतेतिभावः॥प्रकारांतरेणनिराकर्तुंनिराकृतमेवचोद्यमनुद्रवति॥नजानइति॥किंप्रमा
तुरज्ञानाद्याश्रयत्वमनुभवादभिदधासितत्साक्षिणोवातत्राद्यंप्रत्याह॥भवत्विति॥कल्पांतरंनिराकरोति॥यस्त्विति॥नहियोयत्रसाक्षीसतत्राज्ञोमू

नचाज्ञानविवेकदर्शीअज्ञानमात्मनःकर्मभूतमुपलभमानःउपलब्धधर्मत्वेनगृह्णातिशरीरकार्श्यरूपादिवत्तथासुखदुःखेच्छाप्रय
त्नादीन्सर्वोलोकोगृह्णातीतिचेत्तथापिगृहीतुर्लोकस्यविविक्ततैवाभ्युपगतास्यान्नजानेहंत्वदुक्तंमुग्धएवेतिचेद्भवत्वेवम
ज्ञोमुग्धोयस्त्वेवंदर्शीतंज्ञंअमुग्धंप्रतिजानीमहेवयंतथाव्यासेनोक्तंइच्छादिकृत्स्नंक्षेत्रंक्षेत्रीप्रकाशयतीति॥समंसर्वेषुभूते
षुतिष्ठंतंपरमेश्वरं॥विनश्यत्स्वविनश्यंतमित्यादिशतशउक्तंतस्मान्नात्मनःस्वतोबंधमुक्तज्ञानाज्ञानकृतोविशेषोस्तिसर्वदा
समैकरसस्वाभाव्याभ्युपगमाद्येत्वतोन्यथात्मवस्तुपरिकल्प्यबंधमोक्षादिशास्त्रंचार्थवादमापादयंतितउत्सहंतेखेपिशाकुनंप
दंद्रष्टुंखंवामुष्टिनाकष्टुंचर्मवद्वेष्टयितुं

ढोवेतितथाचसर्वसाक्षीनाज्ञानादिमान्भवतीत्यर्थः॥आत्मनोमोहादिराहित्येभगवद्वाक्यंप्रमा
णयति॥तथेति॥तस्यसर्वस्यविशेषशून्यत्वेवाक्यांतरमुदाहरति॥सममिति॥आदिपदेनसमंपश्यन्हिसर्वत्रज्योतिषामपितज्ज्योतिरित्यादि
गृह्यते॥आत्मनोनिर्विशेषत्वेप्रामाणिकेस्वमतमुपसंहरति॥तस्मान्नेति॥पक्षांतरमनुभाषते॥येत्विति॥अतोनिर्विशेषस्वाभाव्यादितियावत्॥
अज्ञानाद्बंधोज्ञानान्मुक्तिरितिशास्त्रमर्थवादः॥आदिशब्देनरुद्ररोदनाद्यर्थवाददृष्टांतंसूचयति॥सोपहासंदूषयति॥उत्सहंतइति॥नहिविशेष

कथंतर्हिभवद्भिरात्मतत्वमभ्युपगम्यतेतत्राह॥वयंत्विति॥प्रमाणविरुद्धार्थप्रदर्शनंतच्छब्देनपरामृश्यते॥सत्वादीनामिवसाम्यंदूषयति॥स
र्वदेति॥भेदाभेदमपवदति॥एकरसमिति॥तत्रहेतुमाह॥अद्वैतमिति॥द्वैताभावोपलक्षितत्वादित्यर्थः॥ऐकरस्यैकौटस्थ्यंहेत्वंतरमाह॥अ
विक्रियमिति॥तदुपपादयति॥अजमित्यादिना॥अमरंमरणायोग्यं॥तत्रसर्वत्राविद्यासंबंधराहित्यंहेतुमाह॥अभयमिति॥ननुब्रह्मैवंविधं
नत्वात्मतत्वमित्याशंक्याह॥ब्रह्मैवेति॥यथोक्तंप्रत्यग्भूतंब्रह्मेत्यत्रप्रमाणमाह॥इत्येषइति॥तत्रैवविद्वदनुभवंप्रमाणयति॥इत्येवमिति॥प

वयंतुतत्कर्तुमशक्ताःसर्वदासममेकरसमद्वैतमविक्रियमजमजरममरममृतमभयमात्मतत्वंब्रह्मैवास्मीत्येषसर्ववेदांतनिश्चितो
र्थइत्येवंप्रतिपद्यामहेतस्माद्ब्रह्माप्येतीत्युपचारमात्रमेतद्विपरीतग्रहवद्देहसंततेर्विच्छेदमात्रंविज्ञानफलमपेक्ष्य॥पूर्व॥स्वप्नबुद्धा
तगमनदृष्टांतस्यदार्ष्टांतिकःसंसारोवर्णितःसंसारहेतुश्चविद्याकर्मपूर्वप्रज्ञावर्णिताःयैश्चोपाधिभूतैःकार्यकरणलक्षणैर्भूतैःपरिवे
ष्टितःसंसारित्वमनुभवतितानिचोक्तानितेषांसाक्षात्प्रयोजकौधर्माधर्माविइतिपूर्वपक्षंकृत्वाकामएवेत्यवधारितंयथाचब्राह्मणेना
यमर्थोवधारितएवंमंत्रेणापिबंधंबंधकारणंचोक्त्वोपसंहृतंप्रकरणमितिनुकामयमानइतिअथाकामयमानइत्यारभ्यसुषुप्तद
ष्टांतस्यदार्ष्टांतिकभूतःसर्वात्मभावोमोक्षउक्तोमोक्षकारणंचात्मकामतयापदाप्तकामत्वमुक्तंतच्चसामर्थ्यान्नात्मज्ञानमंतरेणात्म
कामतयाप्तकामत्वमितिसामर्थ्याद्ब्रह्मविद्यैवमोक्षकारणमित्युक्तमतोयद्यपिकामो रपक्षनिरासेनप्रकृतंवाक्यार्थमुपसंहरति॥तस्मादि
ति॥उपचारेनिमित्तमाह॥विपरीतेति॥आत्मातत्वतःसंसारीतिविपरीतग्रहवतीयादेहसंततिस्तस्याःविच्छेदमात्रंज्ञानफलमपेक्ष्योपचारमात्र
मित्यर्थः॥ब्राह्मणोक्तेर्थेमंत्रमवतारयितुंब्राह्मणार्थमनुवदति॥स्वप्नेत्यादिना॥अयमर्थःसंसारस्तद्धेतुश्चमंत्रस्तदेवसक्तःसहकर्मणेत्यादिः॥आ

त्मज्ञानस्यतर्हिमोक्षकारणत्वमुपेक्षितमित्याशंक्या
ह॥तच्चेति॥

अतोब्रह्मज्ञानंमोक्षकारणमित्युक्तत्वादितियावत्॥मूलंबंधस्येतिशेषः॥अत्रेतिमोक्षप्रकरणोक्तिः॥बंधप्रकरणंदृष्टांतयितुमपिशब्दः॥उक्तेर्थेतदेष
इत्यक्षराणिव्याचष्टे॥तस्मिन्नेति॥यस्मिन्कालेविद्यापरिपाकावस्थायामित्यर्थः॥सुषुप्तिव्यावृत्त्यर्थंसर्वविशेषणमितिमत्वाह॥समस्ताइति॥कामशब्दस्या
र्थांतरविषयत्वंव्यावर्तयति॥तस्येति॥क्रियापदंसोपसर्गंव्याचष्टे॥आत्मकामस्येति॥तानेवविशिनष्टि॥येप्रसिद्धाइति॥कामानांमाश्रयत्वंनिराकरोति॥

मूलमित्युक्तंतथापिमोक्षकारणविपर्ययेणबंधकारणमविद्येत्येतदप्युक्तमेवभवति॥अत्रापिमोक्षोमोक्षसाधनंचब्राह्मणेनोक्तंतस्यैवदृढीक
रणायमंत्रउदाह्रियतेश्लोकशब्दवाच्यस्त- स्मिन्नेवार्थएषश्लोकोमंत्रोभवति यदायस्मिन्कालेसर्वेसमस्ताःकामास्तृष्णाप्रभेदाःप्रमुच्यंतेआ
त्मकामस्यब्रह्मविदःसमूलतोविशीर्यंतेयेप्रसिद्धाःलोकेइहामुत्रार्थाःपुत्रवित्तलोकैषणालक्षणाअस्यप्रसिद्धस्यपुरुषस्यहृदिबुद्धौश्रिता

तदेषश्लोकोभवतियदासर्वेप्रमुच्यंतेकामायेस्यहृदिश्रिताः॥अथमर्त्योमृतोभवत्यत्रब्रह्मसमश्नुतइति॥

आश्रिताःअथतदामर्त्योमरणधर्मासन्कामवियोगात्समूलतोऽमृतोभवति॥अर्थादनात्मविषयाःकामाअविद्यालक्षणामृत्यवइत्येतदुक्तं
भवतिअतोमृत्युवियोगेविद्वान्जीवन्नेवामृतोभवत्यत्रास्मिन्नेवशरीरेवर्तमानोब्रह्मसमश्नुतेब्रह्मभावंमोक्षंप्रतिपद्यतइत्यर्थः॥अतोमोक्षो
नदेशांतरगमनाद्यपेक्षतेतस्माद्विदुषोनोत्क्रामंतिप्राणाःयथावस्थिताएवस्वकारणेपुरुषेसमवनीयंतेनाममात्रंह्यवशिष्यतइत्युक्तं हृदीति॥

समूलतःकामवियोगादितिसंबंधः॥कामवियोगादमृतोभवतीतिनिर्देशसामर्थ्यसिद्धमर्थमाह॥अर्थादिति॥तेषांमृत्युत्वेकिंस्यात्तदाह॥अतइति॥अत्रेत्या
दिनाविवक्षितमर्थमाह॥अतोमोक्षेति॥आदिपदमुत्क्रांत्यादिसंग्रहार्थं॥मुक्तेस्तदपेक्षाभावेफलितमाह॥तस्मादिति॥तर्हिमरणासिद्धिरित्याह॥यथेति॥उ

एतच्च पंचमे प्रतिपादितमित्याह ॥ नाममात्रमिति ॥ तद्यथेत्यादिवाक्यनिरस्यांशंकामाह ॥ कथं पुनरिति ॥ विदुषाविद्ययात्ममात्रत्वेन प्राणादिवाधितेष
पि देहे चेद्सौवर्ततेततोस्यपूर्ववद्देहित्वाद्विद्यावैयर्थ्यमित्यर्थः ॥ दृष्टांतेन परिहरति ॥ अत्रेत्यादिना ॥ देहे वर्तमानस्यापि विदुषस्तत्राभिमान
राहित्यं तत्रैवोच्यते ॥ यस्यांत्वचि सर्पोनितरांलीयते साहि निर्ल्वयनी सर्पत्वग्गुच्यते सर्पनिर्मोकदृष्टांतस्यदार्ष्टांतिकमाह ॥ एवमेवेति ॥ सर्पदृष्टं

कथं पुनः समवनीतेषु प्राणेषु देहे च स्वकारणे प्रलीने विद्वान्मुक्तोत्रैव सर्वात्मा सन्वर्त्तमानः पुनः पूर्ववद्देहित्वं संसारित्वलक्षणं न
प्रतिपद्यत इत्यत्रोच्यते तत्तत्रायं दृष्टांतो यथा लोकेऽहिः सर्पस्तस्य निर्ल्वयनी निर्मोकः साहि निर्ल्वयनी वल्मीके सर्पाश्रये वल्मीका
दावित्यर्थः प्रत्यस्ता प्रक्षिप्ताऽनात्मभावेन सर्पेण परित्यक्ता शयीत वर्त्तेत ॥ एवमेव यथायं दृष्टांतः इदं शरीरं सर्पस्थानीयेन मुक्तेनाना

तद्यथाहि निर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदंशरीरंशेते

त्मभावेन परित्यक्तं मृतमिव शेते अथेतरः सर्पस्थानीयो मुक्तः सर्वात्मभूतः सर्पवत्तत्रैव वर्त्तमानोप्यशरीर एव न पूर्ववत्पुनः सशरी
रो भवति ॥ कामकर्मप्रयुक्तशरीरात्मभावेन हि पूर्वं सशरीरो मर्त्यश्च तद्वियोगादथेदानीमशरीरोत एव चामृतः प्राणः प्राणितीति प्रा
णः प्राणस्य प्राणमिति हि वक्ष्यमाणे श्लोके प्राण तस्यदार्ष्टांतिकं दर्शयति ॥ अथेति ॥ अज्ञानेन सह देहस्य नष्टत्वमशरीरत्वादौ हेतुरथश
ब्दार्थः ॥ अथशब्दाद्वद्योतितं देहेत्ववष्टंभेनाशरीरत्वं विशदयति ॥ कामेति ॥ पूर्वमित्यविद्यावस्थोक्तिः ॥ इदानीमिति विद्यावस्थोच्यते ॥ मृत्युसत्रुसा
रेणरूढंचमुख्यं प्राणं व्यावर्त्तयति ॥ प्राणस्येति ॥ श्लोके पर एव आत्मा यथा प्राणशब्दस्तथात्रापीत्यर्थः ॥ यथा च श्रुत्यंतरे प्राणशब्दः पर एवात्मा तथा

परविषयमिदंप्रकरणमथाकामयमानइतिमोक्षस्यप्रक्रांतत्वाद्यायमित्यादिवाक्यंचतद्विषयमन्यथाब्रह्मादिशब्दानुपपत्तेस्तस्मादुभयसाम
र्थ्यादत्रपरएवात्माप्राणशब्दितइत्याह॥प्रकरणेति॥विशेष्यंदर्शयित्वाविशेषणंदर्शयति॥ब्रह्मैवेति॥ब्रह्मशब्दस्यकमलासनादिविषयत्वंवार
यति॥किंपुनरिति॥तेजःशब्दस्यकार्यज्योतिर्विषयत्वमाशंक्याह॥विज्ञानेति॥तत्रप्रमाणमाह॥येनेति॥प्रज्ञाप्रकृष्टाज्ञप्तिःस्वरूपचैतन्यंनेत्रमि

बंधनंहिसोम्यमनइतिचश्रुत्यंतरेप्रकरणवाक्यसामर्थ्याच्चपरएवात्मात्रप्राणशब्दवाच्यःब्रह्मैवपरमात्मैवकिंपुनस्तत्तेजएवविज्ञान
ज्योतिर्येनात्मज्योतिषाजगदवभास्यमानंप्रज्ञानेत्रंविज्ञानज्योतिष्मत्सदविभ्रंशहृतेतेयःकामप्रश्नोविमोक्षार्थोयाज्ञवल्क्येनवरोदत्तो
जनकायसहेतुकोबंधमोक्षार्थलक्षणोदृष्टांतदार्ष्टांतिकभूतःसएषनिर्णीतःसविस्तरोजनकयाज्ञवल्क्याख्यायिकारूपधारिण्याश्रु

ऽयमशरीरोमृतःप्राणोब्रह्मैवतेजएव ॥

त्यासंसारविमोक्षोपायउक्तःप्राणिभ्यः॥इदानींश्रुतिःस्वयमेवाहविद्यानिष्क्रयार्थंजनकेनैवमुक्तमितिकथंसोहमेवंविमोक्षितस्त्वयाभग
वतेतुभ्यंविद्यानिष्क्रयार्थंसहस्रंददामीतिहएवंकिलउवाचोक्तवान्जनकोवैदेहः॥अत्रकस्माद्धिमोक्षपदार्थेनिर्णीतेविदेहोराज्यमात्मा
नमेवचननिवेदयत्येकदेशोक्ताविवसहस्रमेवददातितत्रकोभिप्रायइत्यत्र वनेत्रंप्रकाशकमस्येतितथोक्तं॥सोहमित्यादेस्तात्पर्यंवक्तुं
वृत्तंकीर्त्तयति॥यःकामप्रश्नइति॥निर्णयप्रकारंसंक्षिपति॥संसारेति॥सोहमित्यादिवाक्यांतरमुत्थापयति॥इदानीमिति॥आकांक्षापूर्वकंवाक्य
मादायविभजते॥कथमिति॥सहस्रदानमाक्षिपति॥अत्रेति॥सर्वस्वदानप्राप्तावपिसहस्रदानेहेतुमेकदेशीयंदर्शयति॥अत्रकेचिदित्यादि

कदाचिद्धि गुरवे सर्वस्वं राजा निवेदयिष्यति तत्राह ॥ श्रुत्वेति ॥ ननु पुनः शुश्रूषुरपि राजा किमिति संप्रश्ने एव सर्वस्वं गुरवे न प्रयच्छति प्रभूता हि दक्षि
णा गुरुं प्रीणयंती स्वीयां शुश्रूषां फलयति तत्राह ॥ यदि वेति ॥ अनाप्तो कोऽह दयेन्यन्निधाय वा चान्यन्निष्पादनात्मकं व्याजोत्तरं युक्तं ॥ श्रुतौ तत्पौरुषेय्या
म पास्ताशेषदोषशंकायां न व्याजोक्तिर्युक्ता तदीय स्वारसिक प्रामाण्यभंगप्रसंगादिति दूषयति ॥ सर्वमपीति ॥ एकदेशीय परिहारासंभवे हेत्वंतरमाह ॥
अर्थेति ॥ तदुपपत्तिमेवोपपादयति ॥ विमोक्षेति ॥ तस्यापि पूर्वमसकृदुक्ते स्तदीय शुश्रूषाधीनं सहस्रदानमनुचितमित्याशंक्य प्रमादे ज्ञानसाधनत्वे

केचिद्वर्णयंति अध्यात्मविद्यारसिको जनकः श्रुतमप्यर्थं पुनर्मैत्रेः शुश्रूषत्यतो न सर्वमेव निवेदयति श्रुत्वाभिप्रेतं याज्ञवल्क्यात्पुनरंते निवे
दयिष्यामीति हि मन्यते यदि वात्रैव सर्वं निवेदयामि निवृत्ताभिलाषोऽयं श्रवणादिति मत्वा श्लोकान्नवक्ष्यतीति च भयात्सहस्रदानं शुश्रूषा
लिंगज्ञापनाये ति सर्वमप्येतदसत्पुरुषस्येव प्रमाणभूतायाः श्रुतेर्व्याजानुपपत्तेः ॥ अर्थशेषोपपत्तेश्च विमोक्षपदार्थ उक्तेप्यात्मज्ञानसाधन

सोऽहं भगवते सहस्रं ददामीति होवाच जनको वैदेहः ॥ ५६ ॥ ३ ॥

आत्मज्ञानशेषभूतः सर्वैषणापरित्यागः संन्यासाख्यो वक्तव्योऽर्थशेषो विद्यते तस्मात् श्लोकमात्रशुश्रूषाकल्पनाः नञ्वी अगतिका हि ग
तिः पुनरुक्तार्थकल्पना सा चायुक्ता सत्यां गतौ न च तत्स्तुतिमात्रमित्यवोचाम नन्वेवं सत्यत ऊर्ध्वं विमोक्षायैवेति वक्तव्यं नैष दोषः ॥ प्रागनुक्ते से
न सह भूयोपि संन्यासस्य वक्तव्यत्वयोगात्तदपेक्षया युक्तं सहस्रदानमित्याह ॥ अगतिका हीति ॥ ननु संन्यासादि विद्यास्तुत्यर्थमुच्यते महाभागा हीयं यत्तद
र्थीं दुष्करमपि करोत्यतो नार्थशेषसिद्धिस्तत्राह ॥ न चेति ॥ न तावत्संन्यासो विद्यास्तुतिर्विदित्वाव्युत्थायेति समानकर्तृत्वनिर्देशादिति पंचमे स्थितं ॥

१-पुरोडाशसंस्कारः प्रतिपत्तिकर्म

नापि शमादिर्विद्यास्तुतिस्तत्रापि विधेर्वक्ष्यमाणत्वादित्यर्थः। अर्थशेषशुश्रूषया सहस्रदानमित्यत्र जनकस्याकौशलं चोदयति॥ नन्विति॥ राज्ञः शं-
कितमकौशलं दूषयति॥ नैष इति॥ तत्र हेतुमाह॥ आत्मज्ञानवदिति॥ यथात्मज्ञानं मोक्षे प्रयोजकं न तथा संन्यासो न चास्मिन्पक्षे तस्याकर्तव्यत्वं
प्रतिपत्तिकर्मवदनुष्ठानसंभवादिति राजा यतो मन्यते ततः सन्यासस्य न ज्ञानतुल्यत्वमतो नातऊर्ध्वं विमोक्षायैव ब्रूहीति पृच्छतीत्यर्थः॥ संन्यास-
स्य प्रतिपत्तिकर्मवत्कर्तव्यत्वे प्रमाणमाह॥ संन्यासेनेति॥ ननु विविदिषासंन्यासमंगीकुर्वता न तस्य प्रतिपत्तिकर्मवदनुष्ठेयत्वमिष्यते तत्राह॥ सा-

आत्मज्ञानवदप्रयोजकः संन्यासः पक्षे प्रतिपत्तिकर्मवदिति हि मन्यते संन्यासेन तनुं त्यजेदिति स्मृतेः साधनत्वपक्षेपि नातऊर्ध्वं विमो-
क्षायैवेति प्रश्नमर्हति मोक्षसाधनभूतात्मज्ञानपरिपाकार्थत्वात्॥ ७॥ आत्मकामस्य ब्रह्मविदो मोक्ष इत्येतस्मिन्नर्थे मंत्रब्राह्मणोक्तेवि-

तदेते श्लोका भवंत्यणुः पंथा विततः पुराणो मां स्पृष्टोनुवित्तो मयैव॥

स्तरप्रतिपादका एते श्लोका भवंति॥ अणुः सूक्ष्मः पंथाः दुर्विज्ञेयत्वाद्धिततो विस्तीर्णो विस्पष्टतरणहेतुत्वाद्वा वितर इति पाठांतरात्
मोक्षसाधनो ज्ञानमार्गः पुराणश्चिरंतनो नित्यः श्रुतिप्रकाशितत्वान्न तार्किकबुद्धिप्रभवकुदृष्टिमार्गवदर्वाक्कालिकः मां स्पृष्टो मां स्पृ-
ष्टो मया लब्ध इत्यर्थो धनत्वेति॥ त्यजतैव हि तत्ज्ञेयं त्यक्तुः प्रत्यक्परं पदमित्युक्तत्वादित्यर्थः॥ ७॥ राज्ञोऽकौशलं परिहृत्य मंत्रानवतारयति॥ आ-
त्मकामस्येति॥ यदेतस्मादतीतश्लोकेनागामिश्लोकानामर्थापौनरुक्त्यं सूचयति॥ विस्तरेति॥ ज्ञानमार्गस्य सूक्ष्मत्वे हेतुमाह॥ दुर्विज्ञेयत्वादिति॥
विस्तीर्णत्वं पूर्णवस्तुविषयत्वादवधेयं॥ माध्यंदिनश्रुतिमाश्रित्याह॥ विस्पष्टेति॥ प्रयत्नसाध्यत्वं तस्य पंचम्या विवक्ष्यते॥ कथं पुनरधुनातनो वेदि-

विशेषणप्रकाशितमर्थमुक्त्वा तस्यव्यवछेद्यमाह॥ ननार्किकेति॥ मंत्रदृशालब्धत्वेपिकुतोज्ञानमार्गस्यतत्संस्पर्शित्वमित्याशंक्याह॥ योहीति॥ अनुवेदनलाभयोर्विशेषाभावात्पौनरुक्त्यमाशंक्याह॥ अनुवेदनमिति॥ पूर्वशब्देनपाठक्रमानुसारेणलाभोगृह्यते॥ एवकारमाश्रित्यशंक ते॥ किमसाविति॥ तथाचतद्योयोदेवानामित्यादिअविशेषश्रुतिर्विरुध्येतेतिशेषः॥ अवधारणश्रुतेरन्यपरत्वेनान्ययोगव्यवछेदकाभावम

योहियेनलभ्यतेसतंस्पृशतीवसंबध्यतेतेनायंब्रह्मविद्यालक्षणोमोक्षमार्गोमयालब्धत्वान्मांस्पृष्टइत्युच्यतेनकेवलंमयालब्धः किंत्वनुवित्तोमयैवानुवेदनंनामविद्यायाःपरिपाकापेक्षयाफलावसानतानिष्ठाप्राप्तिःभुजेरिवतृप्त्यवसानतापूर्वंतुज्ञानप्राप्ति संबंधमात्रमेवेतिविशेषः॥ किमसावेवमंत्रदृगेकोब्रह्मविद्याफलंप्राप्नोनान्यःप्राप्तवान्येनानुवित्तोमयैवेत्यवधारयतिनैषदो

तेनधीराअपियंतिब्रह्मविदःस्वर्गलोकमितऊर्ध्वोविमुक्ताः॥५॥७॥८॥

षोऽस्याःफलमात्मसाक्षिकमनुवित्तमितिब्रह्मविद्यायाःस्तुतिपरत्वात्॥ एवंहिकृतार्थाभिमानकरणमात्मप्रत्ययसाक्षिकमात्मज्ञा नंकिमतःपरमन्यत्स्यादितिब्रह्मविद्यांस्तौतिनतुपुनरन्योब्रह्मवित्तत्फलंनप्राप्नोतीतितद्योयोदेवानामितिसर्वार्थश्रुतेस्तदेवाह तेनब्रह्मविद्यामार्गेणधीराःप्रज्ञावंतोन्येपिब्रह्मविदइत्यर्थो भिप्रेत्यपरिहरति॥ नैषदोषइतिस्तुतिपरत्वमेवप्रकटयति॥ एवंहीति॥ कृ तार्थोस्मीत्यात्मन्यभिमानकरणंस्वानुभवसिद्धमात्मज्ञानंनास्मादन्यदुत्कृष्टंकिंचिदित्येवंविद्यामवधारणश्रुतिःप्रस्तौतीत्यर्थः॥ यथाश्रुतार्थ त्वेकोदोषःस्यादितिचेत्तत्राह॥ नत्विति॥ इत्यवधारणश्रुत्याविवक्षितमितिशेषः॥ तत्रहेतुः॥ तद्यायइति॥ सर्वार्थश्रुतेर्ब्रह्मविद्यासर्वार्थासर्वसाधार

ब्रह्मविद्यायाः सर्वार्थत्वेवाक्यशेषंप्रमाणत्वेनावतार्यव्याचष्टे॥ तदेवेति॥ ननुमोक्षेस्वर्गशब्दोनयुज्यतेतस्यअर्थांतरेरूढत्वादतआह॥ स्वर्गेति॥ य
याज्योतिष्टोमप्रकरणेश्रुतोज्योतिःशब्दोज्योतिष्टोमविषयस्तथामोक्षप्रकरणेश्रुतःस्वर्गशब्दोमोक्षमधिकरोतिरूढ्यंगीकारेब्रह्मविद्यायानिष्कृष्टप्र
संगादितिभावः॥ जीवंतएवमुक्ताःसंतःशरीरपातादूर्ध्वंमोक्षमपियंतीतिसंबंधः॥ ५७॥ ८॥ तस्मिन्नित्यादिपूर्वपक्षमुत्थापयति॥ तस्मिन्निति॥ विप्रति
पत्तीरेवप्रश्नपूर्वकंविशदयति॥ कथमित्यादिना॥ पिंगलंवन्हिज्वालातुल्यं॥ लोहितंजपाकुसुमसन्निभं॥ सप्रपंचंशब्दस्पर्शरूपरसादिमद्ब्रह्मतदुपा

ःपियंत्यपिगच्छंतिब्रह्मविद्याफलंमोक्षंस्वर्गलोकंस्वर्गलोकशब्दस्त्रिविष्टपवाच्यपिसन्निहप्रकरणान्मोक्षाभिधायकः इतोस्मात्कुरीर
पातादूर्ध्वंजीवंतएवविमुक्ताःसंतः॥ ५७॥ ८॥ तस्मिन्मोक्षसाधनमार्गेविप्रतिपत्तिर्मुमुक्षूणांकथंतस्मिन्शुक्लंशुद्धंविमलमाहुःकेचिन्मु

तस्मिन्शुक्लमुतनीलमाहुः पिंगलं हरितंलोहितंच॥

मुक्षवोनीलमन्येपिंगलमन्येहरितंलोहितंयथादर्शनंनाड्यस्त्वेताःसुषुम्नाद्याःश्लेष्मादिरससंपूर्णाःशुक्लस्यनीलस्यपिंगलस्येत्याद्युक्त
त्वादादित्यंचमोक्षमार्गमेवंविधंमन्यंतेएषशुक्लएषनीलइत्यादिश्रुसंतरादर्शनमार्गस्यचशुक्लादिवर्णासंभवा सनमनुसत्यतत्प्राप्तिमार्गेविप्र
दोमुमुक्षूणामित्याह॥ यथादर्शनमिति॥ तथापिकथंब्रह्मप्राप्तिमार्गेशुक्लादिरूपसिद्धिः॥ नहिज्ञानस्यरूपादिमत्वमित्याशंक्याह॥ नाड्यस्त्विति॥ ता
सामपिकथंयथोक्तरूपवत्वमित्याशंक्याह॥ श्लेष्मादीति॥ तथापिकथंशुक्लादिरूपवत्वमित्याशंक्यनाडीखंडोक्तंस्मारयति॥ शुक्लस्येति॥ नाडीपरिग्र
हेनियामकाभावमाशंक्यपक्षांतरमाह॥ आदित्यंचेति॥ एवंविधंशुक्लादिनानावर्णमित्यर्थः॥ तस्यतथात्वेप्रमाणमाह॥ एषइति॥ प्रकृतेज्ञानमार्गेकिमि

तर्हिनाडीपक्षोवादित्यपक्षोवाकतरोविवक्षितस्तत्राह॥सर्वथापीति॥शुक्लमार्गस्यज्ञानमार्गादन्यत्वमाक्षिपति॥नन्विति॥शुक्लशब्दस्यनाद्वैतमा
र्गविषयत्वंनीलादिशब्दसमभिव्याहारविरोधादितिपरिहरति॥ननीलेति॥सैद्धांतिकमंत्रभागंव्याख्यातुंपूर्वपक्षंदूषयति॥यान्शुक्लादीनिति
॥नकेवलंदेहदेशान्निःसरणसंबंधादेवनाडीभेदानांसंसारविषयत्वंकिंतुब्रह्मलोकादिसंबंधादपीत्याह॥ब्रह्मादीति॥आदित्योपिदेवयानमध्य

सर्वथापितुप्रकृताद्ब्रह्मविद्यामार्गादन्यएतेशुक्लादयोननुशुक्लःशुद्धोऽद्वैतमार्गोननीलपीतादिशब्दैःवर्णवाचकैःसहानुद्रवणाद्या
न्शुक्लादीन्योगिनोमोक्षपथानाहुर्नतेमोक्षमार्गाःसंसारविषयाएवहितेचक्षुष्टोवामूर्ध्नोवान्येभ्योवाशरीर

एषपंथाब्रह्मणाहानुवित्तस्तेनैतिब्रह्मवित्पुण्यकृत्तैजसश्च॥५८॥

देशेभ्यइतिशरीरदेशान्निःसरणसंबंधाद्ब्रह्मादिलोकप्रापकाहिते॥तस्मादयमेवमोक्षमार्गोयआत्मकामत्वेनाप्तकामतयासर्वक
र्मक्षयेगमनानुपपत्तौप्रदीपनिर्वाणवच्चक्षुरादीनांकार्यकरणानामत्रैवसमवनयइत्येषज्ञानमार्गःपंथाब्रह्मणापरमात्मस्वरू
पेणैवब्राह्मणेनत्यक्तसर्वैषणेनानुवित्त पातीब्रह्मलोकप्रापकःसंसारहेतुरेवेतिमत्वानोमोक्षमार्गमुपसंहरति॥तस्मादिति॥आप्तकाम
तयाज्ञानमार्गइतिसंबंधः॥एवंभूमिकांकृत्वेषइत्यस्यार्थमाह॥सर्वकर्मेति॥यथातैलादिविलयेप्रदीपस्यज्वलनानुपपत्तौतेजोमात्रेनिर्वाणमिष्य
तेतथास्थूलस्यसूक्ष्मस्यचसर्वस्यैवकामस्याज्ञानात्क्षयेसतिगत्यनुपपत्तावत्रैवप्रत्यगात्मनिकार्यकरणानामेकीभावेनावस्थानमित्येवमेषशब्दा
र्थःपंथाइत्येतद्व्याचष्टे॥ज्ञानमार्गइति॥इत्थंभावेतृतीयामाश्रित्याह॥परमात्मेति॥अनुवेदनकर्तुर्ब्राह्मणस्यसंन्यासित्वंदर्शयति॥त्यक्तेति॥विप्रतिप

किंनिराकुलमोक्षमार्गोनिधीयतेतधीराअभिविषकं
सर्वत्रकंतिगामयति॥नैति॥

अन्योपिमंत्रदृशः सकाशादितिशेषः॥ इहेतिजीवदवस्थोक्तिः॥ समुच्चयकारिणोत्रब्रह्मप्राप्तिर्विवक्षितेतिकेचित्तान्प्रत्याह॥ नपुनरिति॥ विरो
धात्ज्ञानकर्मणोरितिशेषः॥ किंच॥ क्रमसमुच्चयः समसमुच्चयोवेतिविकल्पाद्यमंगीकृत्यद्वितीयंदूषयति॥ अपुण्येति॥ ज्ञानस्यकर्मासमुच्च
येपिविवेकज्ञानेनसमुच्चयोस्तीत्याशंक्याह॥ त्यजेति॥ ब्रह्मविदोपित्युत्यादिदृष्टेस्तेनसमुच्चयोज्ञानस्येत्याशंक्याह॥ निराशिषमिति॥ काम्या
ननुष्ठानमनारंभः॥ अक्षीणत्वंनिषिद्धानाचरणं॥ क्षीणकर्मत्वंनित्यादिकर्मराहित्यं॥ असमुच्चयेवाक्यांतरमाह॥ नेत्यादिना॥ एकतानिरपेक्षता

स्तेनब्रह्मविद्यामार्गेणब्रह्मविदन्योप्येतिकीदृशोब्रह्मवित्तेनैतीत्युच्यतेपूर्वंपुण्यकृद्भूत्वापुनस्त्यक्तपुत्राद्येषणः परमात्मतेजस्या
त्मानंसंयोज्यतस्मिन्नभिनिर्वृत्तस्तैजसश्चात्मभूतइहैवेत्यर्थः॥ ईदृशोब्रह्मवित्तेनमार्गेणैतिनपुनः पुण्यादिसमुच्चयकारिणोग्रह
णंविरोधादित्यवोचाम॥ अपुण्यपुण्योपरमेयंपुनर्भवनिर्भयाः शांताः संन्यासिनोयांतितस्मैमोक्षात्मनेनमइतिचस्मृतेः॥ त्यजधर्मम
धर्मंचउभेसत्यानृतेत्यज॥ उभेसत्यानृतेत्यक्त्वायेनत्यजसितंत्यजेत्यादिपुण्यापुण्यत्यागोपदेशात्॥ निराशिषमनारंभंनिर्नमस्कारमस्तु
तिं॥ अक्षीणंक्षीणकर्माणंतंदेवाब्राह्मणंविदुः॥ नैतादृशंब्राह्मणस्यास्तिवित्तंयथैकतासमतासत्यताच॥ शीलंस्थितिर्दंडनिधानमार्जवं
ततस्ततश्चोपरमः क्रियाभ्यइत्यादिस्मृतिभ्यः॥ उपदेक्ष्यतिचेहापि॥ एषनित्योमहिमाब्राह्मणस्यनवर्धतेकर्मणानोकनीयानितिकर्मप्रयो
जनाभावेहेतुमुक्त्वा सर्वौदासीनतेतियावत्॥ समतामित्रोदासीनशत्रुबुद्धिव्यतिरेकेणसर्वत्रसमस्मिन्निवदृष्टिः॥ दंडनिधानंअहिंसा
परत्वं॥ अर्थस्यमूलंनिकृतिः क्षमाच॥ कामस्यवित्तंचवपुर्वयश्च॥ धर्मस्ययागादिदयादमश्च॥ मोक्षस्यसर्वोपरमः क्रियाभ्यइत्यादिचतुर्विधपुरुषार्थसाध
नभेदोपदेशिवाक्यमादिशब्दार्थः॥ इत्यादिस्मृतिभ्यश्चनपुण्यादिसमुच्चयकारिणोग्रहणमितिसंबंधः॥ तथापिप्रकृतेमंत्रेसमुच्चयोभातीत्याशंक्याह॥ उपदे

वाक्यशेषादिपर्यालोचनासिद्धमर्थमुपसंहरति॥ तस्मादिति॥ पूर्वं पुण्यकृद्भूत्वा पुनस्त्यक्तपुत्राद्येषणो ब्रह्मवित्तेनैतीति क्रमो न युज्यते ऽश्रुतत्वादित्या
शंक्याह॥ अथवेति श्रुतिमेवोपपादयति॥ पुण्यकृतीति॥ तेजांसि करणान्युपसंहृत्य स्थितस्तैजसो दहराद्युपासीनो योगी तस्मिन्न णिमाद्यैश्वर्यान्महा

तस्माद्ब्राह्मणः शांतो दांत इत्यादिना सर्वक्रियोपरमं दर्शयति तस्माद्यथा व्याख्यातमेव पुण्यकृत्त्वमथवा यो ब्रह्मवित्तेनैति स पुण्यकृत्तैजस
श्चेति ब्रह्मवित्स्तुतिरेषा पुण्यकृति तैजसे च योगिनि महाभाग्यं प्रसिद्धं लोके ताभ्यामतो ब्रह्मवित्स्तूयते प्रख्यातमहाभाग्यत्वाल्लोके॥ ९॥ अं
धमदर्शनात्मकं तमः संसारनियामकं प्रविशंति प्रतिपद्यंते के ये ऽविद्यां विद्यातोन्यां साध्यसाधनलक्षणामुपासते कर्मानुवर्तंत इत्यर्थः त
तस्तस्मादपि भूय इव बहुतरमिव तमः प्रविशंति के ये उ विद्यायामविद्यावस्तुप्रतिपादिकायां कर्मार्थायां त्रय्यामेव विद्यायां रता अभिरता

अंधं तमः प्रविशंति येऽविद्यामुपासते॥ ततो भूय इव ते तमो य उ विद्यायां रताः॥ ५९॥ अनंदा नाम ते लोका अंधेन तमसा
वृताः॥ तांस्ते प्रेत्याभिगच्छंत्यविद्वांसोऽबुधो जनाः॥ ६०॥

विधिप्रतिषेधपर एव वेदो नान्योऽस्तीत्युपनिषदर्थानपेक्षिण इत्यर्थः॥ १०॥

यदि ते ऽदर्शनलक्षणं तमः प्रविशंति को दोष इत्युच्यते॥ अनंदाः अनानंदाः असुखा नाम ते लोकास्तेनांधेनादर्शनलक्षणेन तमसावृताः व्याप्ता
स्ते तस्य अज्ञानतमसो गोचरास्तांस्ते प्रेत्य मृत्वा अभिगच्छंति अभियांति के ये ऽविद्वांसः किं सामान्येनाविद्वत्तामात्रेण नेत्युच्यते अबुधः नुभावत्वप्र

सिद्धिः॥ ताभ्यां पुण्यकृत्तैजसाभ्यामित्यर्थः॥ अतः शब्दपरामृष्टं स्पष्टयति॥ प्रख्यातेति॥ पुण्यकृत्तैजसयोरिति शेषः॥ ५९॥ ९॥ प्रस्तुतज्ञानमार्गस्तुत्यर्थमा
र्गांतरं निंदति॥ अंधमित्यादिना॥ उ विद्यायामिति प्रतीकमादाय व्याकरोति॥ अविद्येति॥ कथं पुनस्त्रय्यामभिरतानामधःपतनमित्याशंक्याह॥ विधीति॥ १०॥

बृ॰ र॰
९६

अबुध इत्यस्य निष्पत्तिं सूचयन्विवक्षितमर्थमाह॥ बुधेरिति॥ ११॥ उक्तात्मज्ञानस्तुत्यर्थमेवतन्निष्ठस्य कायक्लेशाभावं दर्शयति॥ आत्मानमित्यादिना॥ विज्ञानात्मनो वैलक्षण्यार्थं विशिनष्टि॥ सर्वेति॥ ताटस्थ्यं व्यावर्तयति॥ हृत्स्थमिति॥ बुद्धिसंबंधप्राप्तं संसारित्वं वारयति॥ अशनायादीति॥ प्रश्नपूर्वकं ज्ञानप्रकारं प्रकटयति॥ कथमित्यादिना॥ सर्वभूतसंबंधप्रयुक्तं दोषं वारयितुं विशिनष्टि॥ नित्येति॥ इति विजानीयादिति संबंधः॥ प्र

बुधेरवगमार्थस्य धातोः क्विप्प्रत्ययांतस्य रूपमात्मावगमवर्जिता इत्यर्थः॥ जनाः प्राकृता एवजननधर्मिणो वेत्येतत्॥ ९०॥ ११॥ आत्मानं स्वं परं सर्वप्राणिमनीषितज्ञं हृत्स्थमशनायादिधर्मातीतं चेद्यदि विजानीयात्सहस्रेषु कश्चिच्चेदित्यात्मविद्यायादुर्लभत्वं दर्शयति कथमयं पर आत्मा सर्वप्राणिप्रत्ययसाक्षी यो नेति नेत्यादिउक्तो यस्मान्नान्योस्ति द्रष्टा श्रोता मंता विज्ञाता समः सर्वभूतस्थो नित्यशुद्धबुद्ध

आत्मानं चेद्विजानीयादयमस्मीति पूरुषः। किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत्॥ ९१॥

मुक्तस्वभावोस्मि भवामीति पूरुषः पुरुषः स किमिच्छंस्तत्स्वरूपव्यतिरिक्तमन्यद्वस्तु फलभूतं किमिच्छन्कस्य वान्यस्यात्मनो व्यतिरिक्तस्य कामाय प्रयोजनाय न हि तस्यात्मन एष्टव्यं फलं न चाप्यात्मनोन्योस्ति यस्य कामायेच्छति सर्वस्यात्मभूतत्वादतः किमिच्छन्कस्य वा कामाय शरीरमनुसंज्वरेदनुसंतप्येत शरीरोपाधिकृतदुःखमनु दुःखी स्याच्छरीरतापमनुतप्येत अनात्मदर्शिनो हि तद्व्यतिरिक्तवस्त्वंतरेप्सोर्ममेदं स्यात्पुत्रस्येदं भार्याया इदमित्येवमीहमानः पुनः पुनर्जननमरणप्रबंधारूढः शरीररोगमनुरुज्यते॥ योजनाय शरीरमनुसंज्वरेदिति संबंधः॥ किमिच्छन्नित्याक्षेपं समर्थयते॥ नहीति॥ कस्य वा कामायेत्याक्षेपमुपपादयति॥ नचेति॥ आक्षेपद्वयं निगमयति॥ अत इति॥ तदेव स्पष्टयति॥ शरीरेति॥ विदुषस्तापा

राम:
९६

वस्त्वंतरे भोक्तापसंभवद्विशेषः॥ सचेत्येतदध्याहृत्य ममेदमित्यादि योज्यमित्येतदाह किमिच्छन्नित्याद्याश्रुतिरिति शेषः॥६१॥१२॥ न केवलमात्म
विद्यारसिकस्य कायक्लेशराहित्यं किंतु कृतकृत्यता चास्तीत्याह॥ किंचेति॥ संदेहे पृथिव्यादिभिर्भूतैरुपचिते शरीरे संदेहत्वं साधयति॥ अनेकेति॥
विषमत्वं विशदयति॥ ---- ----------- अनेकशतेति॥ न नाममात्रमित्यत्र पुरस्तान्नञस्तस्मादिति पठितव्यं॥ यस्मादित्युपक्रमाद्धि

सर्वात्मदर्शिनस्तु तदसंभवद्इत्येतदाह॥१२॥ किंच॥ यस्य ब्राह्मणस्यानुवित्तोनुलब्धः प्रतिबुद्धः साक्षात्कृतः कथमहमस्मि परं ब्रह्मेत्ये
वं प्रत्यगात्मत्वेनावगतः आत्मास्मिन्संदेह्ये संदेहे अनेकानर्थसंकटोपचये गहने विषमे॥ अनेकशतसहस्रविवेकविज्ञानप्रतिपक्षे
विषमे प्रविष्टः स यस्य ब्राह्मणस्यानुवित्तः प्रतिबोधेनेत्यर्थः॥ स विश्वकृद्धि विश्वस्य कर्ता कथं विश्वकृत्त्वं तस्य किं विश्वकृदिति नामेत्याशंक्या

यस्यानुवित्तः प्रतिबुद्धआत्मास्मिन्संदेह्ये गहने प्रविष्टः॥ स विश्वकृत्स हि सर्वस्य कर्ता तस्य लोकः स उ लोक एव॥६२॥

ह॥ स हि यस्मात्सर्वस्य कर्ता न नाममात्रं न केवलं विश्वकृत्पर प्रयुक्तः सन्किं तर्हि तस्य लोकः सर्वः किमन्यो लोको न्योसावित्युच्यते स उ लो
क एव लोकशब्देनात्मोच्यते तस्य सर्वस्यात्मेत्यर्थः॥ य एष ब्राह्मणेन प्रत्यगात्मा प्रतिबुद्धस्तयानुवित्त आत्मानर्थसंकटे गहने प्रविष्टः स
न संसारी किंतु परमेश्वर एव यस्माद्विश्वस्य कर्ता सर्वस्यात्मा तस्य च सर्व आत्मा स एक एव स एकोऽद्वितीयः पर एवास्मीति मंतव्य इति श्लोका
र्थः॥६२॥१३॥ ᳝विश्वकृत्त्वमिति शेषः पर शब्दो विद्याविषयः विश्वकृत्कृतकृत्य इत्येतत्॥ लोकलोकिविभागेन भेदं शंकित्वा दूषयति॥ किमि
त्यादिना॥ य सेत्यादिमंत्रस्य तात्पर्यार्थं संगृह्णाति॥ य एष इति॥ अस्त्वेवं किं तावता इत्याशंक्याह॥ एक एवेति॥ यो हि परः सर्वप्रकारभेदराहित्यासू

३= अनुसंधातव्यः

ब्रह्मविदो विद्यया कृतकृत्यत्वे श्रुतिसंप्रतिपत्तिरेव केवलं न भवति किंतु स्वानुभवसंप्रतिपत्तिरस्तीत्याह॥ किंचेति॥ अथेत्यस्य कथंचिदेवेति व्याख्यानं॥ तदित्यस्य ब्रह्मतत्वमित्युक्तमर्थं स्फुटयति॥ तदेतदिति॥ ब्रह्मज्ञाने कृतार्थत्वं श्रुत्यनुभवाभ्यामुक्त्वा तदभावे दोषमाह॥ यदेतदिति॥ तर्हि महती विनष्टिरिति संबंधः॥ बहुत्वं न विवक्षितं॥ ज्ञानान्मोक्षोऽत्र विवक्षित इत्यभिप्रेत्य वेदिरित्यस्यार्थमाह॥ वेदनमित्यादिना॥ न चेद्ब्रह्मविदितवंतो व

किंच इहैवानेकानर्थसंकुले संतो भवंतोऽज्ञानदीर्घनिद्रारहिताः संतः कथंचिदिव ब्रह्मतत्वमात्मत्वेनाथ विद्मः विजानीमः तदेतद्ब्रह्म प्रकृतमहो वयं कृतार्था इत्यभिप्रायो यदेतद्ब्रह्म विजानीमस्तन्न चेद्विदितवंतो वयं वेदनं वेदो वेदोऽस्यास्तीति वेदी वेद्येव वेदिर्न वेदिरवेदिर्न चेद्वेदिस्ततोऽहमवेदिः स्यां यद्यवेदिः स्यां को दोषः स्यान्महती अनंतपरिमाणा जन्ममरणादिलक्षणा विनष्टिः विनशनं महो वयमस्मान्महतो विनशना

इहैव संतोऽथ विद्मस्तद्वयं न चेदवेदिर्महती विनष्टिः॥ ये तद्विदुरमृतास्ते भवंत्यथेतरे दुःखमेवापयंति ॥६३॥

न्निर्मुक्ता यत्तद्वयं विदितवंत इत्यर्थः॥ यथा च वयं ब्रह्मविदित्वाऽस्माद्विनशनाद्विमुक्ता एवं ये तद्विदुरमृतास्ते भवंति ये पुनर्नैवं ब्रह्मविदुस्त इतरे ब्रह्मविद्भ्योऽन्येऽब्रह्मविद इत्यर्थः दुःखमेव जन्ममरणादिलक्षणमेवापियंति प्रतिपद्यंते न कदाचिदप्यविदुषां ततो विनिवृत्तिरित्यर्थः दुःखमेव हि ते आत्मत्वेनोपगच्छंति॥६३॥१४॥ यदा पुनरेतमात्मानं कथंचित्परमकारुणिकं कंचिदाचार्यं प्राप्य ततो लब्धप्रसादः यं ततोऽहमवेदिः स्यामिति योजना॥ विद्याभावे दोषमुक्त्वा विद्वदनुभवसिद्धमर्थं निगमयति॥ अहो वयमिति॥ इहैवेत्यादिना पूर्वार्धेनोक्तमेवार्थमुत्तरार्धेन प्रपंचयति॥ यथा चेत्यादिना॥ दुःखाद्विदुषां विनिर्मोकाभावे हेतुमाह॥ दुःखमेवेति॥६३॥१४॥ किंच॥ विदुषो विहिताकरणादिप्रयुक्तं भयं नास्तीति विद्वांस्तोतुमेव मंत्रांतरमाद

उक्तमर्थं व्यतिरेकमुखेन विशदयति ॥ सर्वो हीति ॥ जुगुप्सायाः निंदात्वेन प्रसिद्धत्वात्कथमवयवार्थमादाय व्याख्यायते रूढिर्योगमपहरतीति न्याया
दित्याशंक्याह ॥ यदेति ॥ तदेवोपपादयति ॥ सर्वमिति ॥ ६४ ॥ अथेश्वरस्यापि कालान्यत्वे सति वस्तुत्वाद्घटवत्कालावच्छिन्नत्वात्कालत्रयं प्रति युक्तमी
श्वरत्वमत आह ॥ किंचेति ॥ यस्मादीशानादर्वाक्संवत्सरो वर्तते तमुपासते देवा इति संबंधः ॥ ननु कथं संवत्सरोऽर्वागित्युच्यते कालस्य कालांतराभावेन पू

सन्ननु पश्चात्पश्यति साक्षात्करोति स्वमात्मानं देवं द्योतनवंतं दातारं वा सर्वप्राणिकर्मफलानां यथाकर्मानुरूपमंजसा साक्षादीशानं
स्वामिनं भूतभव्यस्य कालत्रयस्यैतेतन्नततस्तस्मादीशानाद्देवादात्मानं विशेषेण जुगुप्सते गोपायितुमिच्छति सर्वो हि लोक ईश्वराद्गुप्ति
मिच्छति भेददर्शी अयं त्वेकत्वदर्शी न बिभेति कुतश्चनातो न तदा विजुगुप्सते यदेशानं देवमंजसात्मत्वेन पश्यति न तदा निंदते वा कंचित्सर्वं

यदैतमनुपश्यत्यात्मानं देवमंजसा ॥ ईशानं भूतभव्यस्य न ततो विजुगुप्सते ॥ ६४ ॥ यस्मादर्वाक्संवत्सरोऽहोभिः परिवर्तते ॥ त
द्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतं ॥ ६५ ॥ १६ ॥ मात्मानं हि पश्यति स एवं पश्यन्कमसौ निंद्यात् ॥ १५ ॥ किंच ॥ यस्मादीशानादर्वा
ग्यस्मादन्यविषय एवेत्यर्थः संवत्सरः कालात्मा सर्वस्य जनिमतः परिच्छेत्ता ॥ यमपरिच्छिंदन्नर्वागेव वर्तते अहोभिः स्वावयवैरहो
रात्रैरित्यर्थस्तज्ज्योतिषां ज्योतिरादित्यादिज्योतिषामप्यवभासकत्वादायुरित्युपासते देवाः अमृतं ज्योतिरतोऽन्यन्म्रियते न हि ज्योतिः
॥ सर्वस्य ह्येतज्ज्योतिरायुरायुर्गुणेन यस्माद्देवास्तज्ज्योतिरुपासते तस्मादायुष्मंतस्ते तस्मादायुःकामेनायुर्गुणेनोपास्यममृतं ब्रह्मेत्यर्थः

र्वं कालसंबंधाभावादत आह ॥ यस्मादिति ॥ अन्वयस्तु पूर्ववत् ॥ आत्मज्योतिषो गुणमायुष्ट्वलक्षणं स्पष्टयन्नुपासकस्य फलमाह ॥ सर्वस्येति ॥ यथोक्तोपास

नेदृशानामकालविशेषितत्वादित्याशंक्याह ॥ यस्मादिति ॥ ६४ ॥

ज्योतिषां ज्योतिरमृतमित्युक्तं तस्यामृतत्वं सर्वाधिष्ठानत्वेन साधयति किंचेति॥ एवकारार्थमाह॥ न चेति॥ यद्यात्मानं ब्रह्म जानासि तर्हि किं तेन तद्विद्या फल
मिति प्रश्नपूर्वकमाह॥ किं तर्हीति॥ कथं तर्हि ते मर्त्यत्वप्रतीतिस्तत्राह॥ अज्ञानमात्रेणेति॥ १७॥ प्रकृताः पंचजनाः पंचज्योतिषा सह प्राणादयो वासुरि

किंच॥ यस्मिन्यत्र ब्रह्मणि पंचजना गंधर्वादयः पंचैव संख्याता गंधर्वाः पितरो देवा असुरा रक्षांसि निषादपंचमा वा वर्णा आकाशश्चाव्याकृता
ख्यो यस्मिन्सूत्रमोतं प्रोतं च यस्मिन्प्रतिष्ठित एतस्मिन्नु खल्वक्षरे गार्ग्याकाश इत्युक्तं तमेवात्मानममृतं ब्रह्म मन्येऽहं न चाहमात्मानं ततोऽन्यत्वे
न जाने किं तर्ह्यमृतोऽहं ब्रह्म विद्वान्सन्नज्ञानमात्रेण तु मर्त्योऽहमासं तदपगमाद्विद्वानहममृत एव॥ १७॥ किंच॥ तेन हि चैतन्यात्मज्योतिषा

यस्मिन्पंच पंचजना आकाशश्च प्रतिष्ठितः॥ तमेव मन्य आत्मानं विद्वान्ब्रह्मामृतोऽमृतं॥ ६६॥ प्राणस्य प्राणमुत चक्षुषश्चक्षु
रुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुः॥ ते निचिक्युर्ब्रह्म पुराणमग्र्यं॥ ६७॥ ववभास्यमानः प्राण आत्मभूतेन प्राणिति तेन प्राणस्या
पि प्राणः सः तं प्राणस्य प्राणं तथा चक्षुषोऽपि चक्षुरुत श्रोत्रस्यापि श्रोत्रं ब्रह्मशक्त्यधिष्ठितानां हि चक्षुरादीनां दर्शनादिसामर्थ्यं स्वतः काष्ठलोष्ठ
समानि हि तानि चैतन्यात्मज्योतिःशून्यानि मनसोऽपि मन इति ये विदुश्चक्षुरादिव्यापारानुमितास्तित्वं प्रत्यगात्मानं न विषयभूतं ये विदुस्ते किं
निचिक्युर्निश्चयेन ज्ञातवंतो ब्रह्म पुराणं चिरंतनमग्र्यमग्रे भवं तद्यदात्मविदो विदुरिति ह्याथर्वणे॥ ६७॥ १८॥ त्यभिप्रेत्याह॥ किं चेति॥ क
थं चक्षुरादिषु चक्षुरादित्वं ब्रह्मणः सिध्यति तत्राह॥ ब्रह्मशक्तीति॥ विमतानि केनचिदधिष्ठितानि प्रवर्त्तते करणत्वाद्वास्यादिवदिति चक्षुरादि
व्यापारेणानुमितास्तित्वं प्रत्यगात्मानं ये विदुरिति योजना॥ विदिक्रियाविषयत्वं व्यावर्तयति॥ नेति॥ प्रत्यगात्मविदां कथं ब्रह्मवित्वमित्याशंक्याह॥

ॐज्ञानेप्रभवालोकावादाश्चाज्ञानसंभवाः॥ विदित्वात्मसतत्वस्यनेहनानास्तिकिंचनेत्यादिकास्मृतिः = ५
मनसोब्रह्मदर्शनसाधनत्वेकथंब्रह्मणोवाङ्मनसातीतत्वश्रुतिरित्याशंक्याह॥ परमार्थेति॥ केवलंमनोब्रह्माविषयीकुर्वदपिश्रवणादिसंस्कृतं
तदाकारंजायतेतेनद्रष्टव्यंतदुच्यतेऽतएववृत्तिव्याप्यंब्रह्मेत्युपगच्छंतीतिभावः॥ अनुशब्दार्थमाह॥ आचार्येति॥ द्रष्टृद्रष्टव्यादिभावेनभेदमाशंक्या
ह॥ तत्रचेति॥ एवकारार्थमाह॥ नचेति॥ कथमात्मनिवस्तुतोभेदरहितेपिभेदोभातीत्याशंक्याह॥ असतीति॥ नेहेत्यादेः संपिंडितमर्थंकथयति॥ अवि

तद्ब्रह्मदर्शनेसाधनमुच्यतेमनसैवपरमार्थज्ञानसंस्कृतेनाचार्योपदेशपूर्वकंचानुद्रष्टव्यंतत्रचदर्शनविषयेब्रह्मणिनचइहनानास्तिकिंच
नकिंचिदपि॥ असतिनानात्वेनानात्वमध्यारोपयत्यविद्ययासमृत्योर्मरणान्मरणमाप्नोतिकोसौयइहनानेवपश्यति॥ ॐअविद्याध्यारोपणव्य

मनसैवानुद्रष्टव्यंनेहनानास्तिकिंचन॥ मृत्योःसमृत्युमाप्नोतियइहनानेवपश्यति॥ ९८॥ एकधैवानुद्रष्टव्यमेतदप्रमयंध्रुवं॥

तिरेकेणनास्तिपरमार्थतोद्वितीयमित्यर्थः॥ १९॥ यस्मादेवंतस्मादेकधैवएकेनैवप्रकारेणविज्ञानघनैकरसप्रकारेणाकाशवन्निरंतरे
णानुद्रष्टव्यंयस्मादेतद्ब्रह्माप्रमयमप्रमेयंसर्वैकत्वादन्येनह्यन्यत्प्रमीयतेइदंत्वेकमेवातोऽप्रमेयंध्रुवंनित्यंकूटस्थमविचालीत्यर्थः॥ ननुविरु
द्धमिदमुच्यतेअप्रमेयंज्ञायतइतिचज्ञायतइतिप्रमाणेर्मीयतइत्यर्थोऽप्रमेयमितिचतत्प्रतिषेधः॥ नैषदोषःअन्यवस्तुवदनागमप्रमाण
प्रमेयत्वप्रतिषेधार्थत्वा

द्येति॥ १९॥ द्वैताभावेकथमनुद्रष्टव्यमित्याशंक्याह॥ यस्मादिति॥ तमेवैकंप्रकारंप्रकटयति॥ विज्ञानेति॥ परिच्छिन्नत्वं
व्यवच्छिनत्ति॥ आकाशवदिति॥ एकरसत्वंहेतूकृत्याप्रमेयत्वंप्रतिजानीते॥ यस्मादिति॥ एतद्ब्रह्मयस्मादेकरसंतस्मादप्रमेयमितियोजना॥ हेत्व
र्थंस्फुटयति॥ सर्वैकत्वादिति॥ तथापिकथमप्रमेयत्वंतदाह॥ अन्येनेति॥ मिथोविरोधमाशंकते॥ नन्विति॥ विरोधमेवस्फोरयति॥ ज्ञायतइतीति॥

संगृहीतं समाधानं विशदयति ॥ यथेत्यादिना ॥ तस्य मानांतरैर्विषयीकर्त्तुमशक्यत्वे हेतुमाह ॥ सर्वस्येति ॥ इति सर्वद्वैतोपशांतिश्रुतेरिति शेषः ॥ आगमोपि तर्हि कथमात्मानं आवेदयेदित्याशंक्याह ॥ प्रमात्रिति ॥ आत्मनः स्वर्गादिवद्विषयत्वेनागमप्रतिपाद्यत्वाभावे हेतुमाह ॥ प्रतिपादयित्रिति ॥ तथापि किमिति विषयत्वेनाप्रतिपाद्यत्वं तत्राह ॥ प्रतिपादयितुरिति तदिति प्रतिपाद्यत्वमुक्तं ॥ कथं तर्हि तस्मिन्नागमिकं ज्ञानं तत्राह ॥ ज्ञानं चेति ॥ पर

यथान्यानि वस्तून्यागमनिरपेक्षैः प्रमाणैर्विषयीक्रियंते न तथैतदात्मतत्वं प्रमाणांतरेण विषयीकर्त्तुं शक्यते सर्वस्यात्मत्वे केन कं पश्येद्विजानीयादिति प्रमातृप्रमाणादिव्यापारप्रतिषेधेनैवागमोपि विज्ञापयति नत्वभिधानाभिधेयलक्षणवाक्यधर्मांगीकरणेन ॥ तस्मान्नागमेनापि स्वर्गमेर्वादिवत्तत्प्रतिपाद्यते प्रतिपादयित्रात्मभूतं हि तत्प्रतिपादयितुः प्रतिपादनस्य प्रतिपाद्यविषयत्वाद्भेदे हि

विरजः पर आकाशादज आत्मा महान्ध्रुवः ॥

सति तद्भवति ज्ञानं च तस्मिन्परात्मभावनिवृत्तिरेव न तस्मिन्साक्षादात्मभावः कर्तव्यो विद्यमानत्वादात्मभावस्य ॥ नित्यो ह्यात्मभावः सर्वस्यातद्विषय इव प्रत्यवभासते तस्मादतद्विषयाभासनिवृत्तिव्यतिरेकेण न तस्मिन्नात्मभावो विधीयते स्मिन्देहादावात्मभावस्यारोपितस्य निवृत्तिरेव वाक्येन क्रियते तथा चात्मनि परिशिष्टे स्वाभाविकमेव स्फुरणं प्रतिबंधविगमात्प्रकटीभवतीति भावः ॥ ननु ब्रह्मण्यात्मभावः श्रुत्या कर्तव्यो विवक्ष्यते न तु देहादावात्मत्वव्यावृत्तिरत आह ॥ न तस्मिन्निति ॥ ब्रह्मणश्चेदात्मभावः सदा मन्यते कथमन्यथा प्रथेत्याशंक्याह ॥ नित्यो हीति ॥ सर्वस्य पूर्णस्य ब्रह्मण इत्येतत् ॥ अतद्विषयो ब्रह्मव्यतिरिक्तविषय इत्यर्थः ॥ ब्रह्मण्यात्मभावस्य सदा विद्यमानत्वे फलितमाह ॥ तस्मादिति ॥ अत

२=वैक्षुः संनिहितं कुंभं यथा सूर्योवभासयेत् चित्तवृत्त्या यथाव्याप्तं चिदात्मैव प्रकाशयेत् स्वप्रकाशं चिदात्मानं वृत्तिरात्मांतरं विना भासयेद्भास्करमिव चक्षुः सूर्यांतरं विना वृत्तिव्याप्तिमपेक्ष्यैव वे
अन्यस्मिन्नात्मभावनिवृत्तिरेवागमेन क्रियते चेत्तर्हि कथमात्मा तेन गम्यत इत्युच्यते तत्राह॥ अन्येति॥ यद्यागमिकवृत्तिव्याप्यत्वेनात्मनो मेयत्वमिष्यते कथं
तर्हि तस्यामेयत्ववाचोयुक्तिरित्याशंक्याह॥ स्वतश्चेति॥ वृत्तिव्याप्यत्वेन मेयत्वं स्फुरणाव्याप्यत्वेन चामेयत्वमित्युपसंहरति॥ इत्युभयमिति॥ यदुक्तं ध्रुवत्वं त
दुपस्कारपूर्वकमुपपादयति॥ विरज इत्यादिना॥ कथं जन्मनिषेधादितरे विकारा निषिध्यंते तत्राह॥ सर्वेषामिति॥ यथोक्ते वस्तुनि दर्शनं निगमयति॥ तमीदृ

अन्यात्मभावनिवृत्तावात्मभावः स्वात्मनि स्वाभाविको यः स केवलो भवतीत्यात्मा ज्ञायत इत्युच्यते स्वतश्चाप्रमेयः प्रमाणांतरेण न विषयीक्रि
यत इत्युभयमप्यविरुद्धमेव विरजो रजो नाम धर्माधर्मादिमलं तद्रहित इत्येतत्॥ परः परो व्यतिरिक्तः सूक्ष्मो व्यापी वा आकाशादप्यव्याकृता
ख्यादजो न जायते जन्मप्रतिषेधादुत्तरेपि भावविकाराः प्रतिषिद्धाः सर्वेषां जन्मादित्वादात्मा महान्परिमाणतो महत्तरः सर्वस्मात् ध्रुवोऽविनाशी

तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः नानुध्यायाद्बहूञ्छब्दान्वाचो विग्लापनं हि तदिति॥ ६९॥

॥तमीदृशमात्मानमेव धीरो धीमान्विज्ञायोपदेशतः शास्त्रतश्च प्रज्ञां शास्त्राचार्योपदिष्टविषयां जिज्ञासापरिसमाप्तिकरीं कुर्वीत ब्राह्मणः एवं
प्रज्ञाकरणसाधनानि संन्यासशमदमोपरमतितिक्षासमाधानानि कुर्यादित्यर्थः॥ नानुध्यायान्नानुचिंतयेद्बहून्प्रभूताञ्छब्दांस्तत्र बहुत्वप्रति
षेधात्केवलात्मैकत्वप्रतिपादकाः॥ स्वल्पाः शब्दा अनुज्ञायंते॥ ओमित्येवं ध्यायथ आत्मानमन्या वाचो विमुंचथेति चाथर्वणे॥ वाचो विग्लापनं विशे
षेण ग्लानिकरं श्रमकरं हि यस्मात्तद्बहुशब्दाभिध्यानमिति॥ २०॥

शमिति॥ नित्यशुद्धत्वादिलक्षणमिति यावत्॥ उक्तरीत्या प्रज्ञाकरणे कानि साधनानि
इति चेत्तानि दर्शयति॥ एवमिति॥ काम्यनिषिद्धत्यागः संन्यास उपरमो नित्यनैमित्तिकत्याग इति भेदः॥ बहूनिति विशेषणवशादापातमर्थं दर्शयति॥ तत्रेति॥ किं

ध्यत्वं प्राहुरात्मनः चिरंतराननपेक्षत्वाद्वेद्यत्वं तथागमाः = २

पुंह्वार्थमश्वमानीय नवीथ्यानृत्समारभेत्॥ न खड्गं विजपार्थी चेत्संहरेत्स्थूणखादरं = ३

नानुध्यायादित्यत्रहेतुमाह॥वाचइति॥तस्माद्बहून्शब्दान्नानुचिंतयेदितिपूर्वेणसंबंधः॥इतिशब्दःश्लोकव्याख्यानसमाप्त्यर्थः॥२०॥६।४॥कंडिकांतरमव
तारयितुंवृत्तंकीर्तयति॥सहेतुकाविति॥उत्तरकंडिकातात्पर्यमाह॥एवमिति॥विरजःपरइत्यादिनोक्तक्रमेणावस्थितेब्रह्मणीतियावत्॥तदिग्यु
पयुक्तोक्तिः॥तदर्थाब्रह्मात्मनिसर्वस्यवेदस्यविनियोगप्रदर्शनार्थेतियावत्॥ननुविविदिषावाक्येनब्रह्मात्मनिसर्वस्यवेदस्यविनियोगोवक्ष्यतेतत
याचतस्मात्साक्तनवाक्यंकिमर्थमित्याशंक्याह॥तत्रेति॥यथास्मिन्नध्यायेसफलमात्मज्ञानमुक्तंतथैवतदनूद्येतियोजना॥कथंयथोक्तेज्ञानेसर्वोवे

सहेतुकौबंधमोक्षावभिहितौमंत्रब्राह्मणाभ्यांश्लोकैश्चपुनर्मोक्षस्वरूपंविस्तरेणप्रतिपादितमेवमेतस्मिन्नात्मविषयेसर्वोवेदोयथोप
युक्तोभवतितत्तथावक्तव्यमितितदर्थेयंकंडिकाआरभ्यते॥तत्रचयथास्मिन्प्रपाठकेभिहितंसप्रयोजनमनूद्यात्रैवोपयोगःकृत्स्नस्यवेद

सवाएषमहानजआत्मायोयंविज्ञानमयःप्राणेषु॥

स्यकाम्यराशिवर्जितस्येत्येवमर्थउक्तार्थानुवादःसवाएषइत्यादिःसइत्युक्तपरामर्शार्थःकोसावुक्तःपरामृश्यतेतंप्रतिनिर्दिशतियएषवि
ज्ञानमयइत्यतीतानंतरवाक्योक्तसंप्रत्ययोमाभूदितियएषःकतम दोविनियोक्तुंशक्यतेस्वर्गकामादिवाक्यस्यस्वर्गादावेवपर्यवसानादित्याशं
क्यसंयोगपृथक्त्वन्यायमनादृत्यविशिनष्टि॥काम्यराशीति॥उक्तस्यसफलस्यात्मज्ञानस्यानुवादइतियावत्॥उक्तानांभूयस्त्वेविशेषंज्ञातुंपृच्छति॥कोसावि
ति॥विशेषणानर्थक्यमाशंक्यपरिहरति॥अतीतेति॥तद्धिविरजःपरइत्यादिनोक्तोयोमहत्त्वादिविशेषणःपरमात्मातत्रसशब्दात्प्रतीतिर्माभूदितिकृत्वा
तेनज्योतिर्ब्राह्मणस्थंजीवंपरामृश्यतमेववैशब्देनस्मारयित्वातस्यसन्निहितेनपरेणात्मनैक्यमेषशब्देननिर्दिशतीत्यर्थः॥विशेषणवाक्यस्थमेषशब्दंप्र

कथंजीवोविज्ञानमयःकथंवाप्राणेष्वितिसप्तमीप्रयुज्यतेतत्राह॥उक्तेति॥तदनुवादस्यसशब्दार्थसंदेहापोहंफलमाह॥संशयेति॥उक्तवाक्योल्लिंगन
मित्युक्तंविवृणोति॥उक्तंहीति॥योयंविज्ञानमयःप्राणेषुप्रागुक्तः॥सएषमहानजआत्मेतिजीवानुवादेनपरमात्मभावोविहितइतिवाक्यार्थमाह

एषइत्युच्यतेविज्ञानमयःप्राणेष्वित्युक्तवाक्योल्लिंगनंसंशयनिवृत्त्यर्थं॥उक्तंहिपूर्वंजनकप्रश्नारंभेकतमआत्मेतियोयंविज्ञानमयःप्राणे
ष्वित्यादिएतदुक्तंभवतियोयंविज्ञानमयःप्राणेष्वित्यादिनावाक्येनप्रतिपादितःस्वयंज्योतिरात्मासएषकामकर्माविद्यानामनात्मधर्म
त्वप्रतिपादनद्वारेणमोक्षितःपरमात्मभावमापादितःपरएवायंनान्यइतिएषसाक्षान्महानजआत्मेत्युक्तोयोयंविज्ञानमयःप्राणेष्विति
यथाव्याख्यातार्थएवयएषोंतर्हृदयेहृदयपुंडरीकमध्येयएषआकाशोबुद्धिविज्ञानसंश्रयस्तस्मिन्नाकाशेबुद्धिविज्ञानसहितेशेते

यएषोंतर्हृदयआकाशस्तस्मिंछेते॥

तिष्ठत्यथवासंप्रसादकालेंतर्हृदयेयएषआकाशःपरएवआत्मानिरुपाधिकोविज्ञानमयस्यस्वस्वभावस्तस्मिन्स्वस्वभावेपरमात्म
न्याकाशाख्येशेतेचतुर्थेएतद्व्याख्यातंक्वैषतदाभूदित्यस्यप्रतिवचनत्वेनसचसर्वस्यब्रह्मेंद्रादेर्वशीसर्वोह्यस्यवशेवर्ततेउक्तं

।एतदिति॥परमात्मभावापादनप्रकारमनुवदति॥साक्षादिति॥विशेषणवाक्यस्यव्याख्येयत्वप्राप्तावुक्तवाक्योल्लिंगनमित्यत्रोक्तंस्मारयति॥योय
मिति॥वाक्यांतरमवतार्यव्याचष्टे॥यएषइति॥कथंपुनराकाशशब्दस्यपरमात्मविषयत्वमुपेत्यद्वितीयंव्याख्यानंतस्यार्थांतरेरूढत्वादित्याशंक्याह॥चतुर्थ
इति॥इत्थमुक्तंज्ञानमनूद्यतत्फलमनुवदति॥सचेत्यादिना॥कथंपुनर्निरुपाधिकस्येश्वरस्यवशित्वंकथंचतदभावेतदात्मनोविदुषस्तदुपपद्यतेतत्राह॥उक्तं

विशेषणत्रयस्य हेतुहेतुमद्रूपत्वमेव विशदयति॥ यस्मादित्यादिना॥ तत्र प्रसिद्धिं प्रमाणयति॥ योहीति॥ न केवलमुक्तमेव विद्याफलं किंत्वन्यच्चास्तीत्याह॥
किंचेति॥ एवंभूतत्वं ज्ञातपरमात्माभिन्नत्वं॥ परिशुद्धत्वमर्थमनुवदति॥ हदीति॥ ब्रह्मीभूतस्य विदुषः स्वातंत्र्यादिवद्धर्माधर्मास्पर्शित्वमपि फलमित्यर्थः॥ अधि

तस्य वा अस्य रस्य प्रशासने इति न केवलं वशी सर्वस्येशान ईशिता च ब्रह्मेंद्रप्रभृतीनामीशितृत्वं च कदाचिज्जातिकृतं यथा राजकुमारस्य बल
वत्तरानपि भृत्यान्प्रति तद्वन्मा भूदित्याह सर्वस्याधिपतिरधिष्ठाय पालयिता स्वतंत्र इत्यर्थः न राजपुत्रवदमात्यादिभृत्यतंत्रः त्रयमप्येतद्वशि
त्वादि हेतुहेतुमद्रूपं यस्मात्सर्वस्याधिपतिस्ततोसौ सर्वस्येशानो यो हि यमधिष्ठाय पालयति स तं प्रतीष्ट एवेति प्रसिद्धं यस्माच्च सर्वस्येशानस्त
स्मात्सर्वस्य वशीति किंचान्यत्स एवंभूतो हृद्यंतर्ज्योतिः पुरुषो विज्ञानमयः न साधुना शास्त्रविहितेन कर्मणा भूयान्भवति न वर्धते पूर्वावस्था

सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयानेष सर्वेश्वर एष भूताधिपतिरेष भू
तपाल एष सेतुर्विधरण एषां लोकानामसंभेदाय॥ तः केनचिद्धर्मेण नो एव शास्त्रप्रतिषिद्धेनासाधुना कर्मणा कनीयानल्पतरो भव
ति पूर्वावस्थातो न हीयत इत्यर्थः सर्वो ह्यधिष्ठानपालनादि कुर्वन्परानुग्रहपीडाकृतेन धर्माधर्माख्येन युज्यते ऽस्यैव तु कथं तदभाव इत्युच्यते
यस्मादेष सर्वेश्वरः सन्कर्मणोपीशितुं भवत्येव शीलमस्य तस्मान्न कर्मणा संबध्यते किंच॥ एष भूताधिपतिः ब्रह्मादिस्तंबपर्यंतानां भूतानाम
धिपतिरित्युक्तार्थं पदमेष भूतानां तेषामेव पालयिता रक्षिता शानादिकर्तृत्वाद्विदुषोपि लौकिकवद्धर्मादिसंबंधित्वं स्यादिति शंकते॥ सर्वो
हीति॥ परतंत्रत्वमुपाधिरिति परिहरति॥ उच्यत इति॥ सर्वाधिपत्यराहित्यं चोपाधिरित्याह॥ किंचेति॥ सर्वपालकत्वराहित्यं चोपाधिरित्याह॥ एष

सर्वानाधारत्वं चोपाधिरित्याह॥एषइति॥कथंविधारयितृत्वमित्याशंक्याह॥तदाहेति॥तदेवसाधयति॥परमेश्वरेणेति॥सर्वस्यवशीत्यादिनोक्तमुपसं
हरति॥एवंविदिति॥सफलंज्ञानमनूद्यविविदिषावाक्यमवतारयति॥किंज्योतिरिति॥एवंफलायांसर्वस्यवशीत्यादिनोक्तफलोपेतायामि
तियावत्॥तादर्थ्येनपरंपरयाज्ञानोत्पत्तिशेषत्वेनेत्यर्थः॥विनियोजकंवाक्यमाकांक्षापूर्वकमादायव्याचष्टे॥तत्कथमित्यादिना॥एवंभूतंश्लोको

एषसेतुः किंविशिष्टइत्याहविधरणोवर्णाश्रमादिव्यवस्थायाः विधारयितातदाहएषांभूरादीनांब्रह्मलोकांतानांलोकानामसंभेदाया
संभिन्नमर्यादायै॥परमेश्वरेणसेतुवद्विधार्यमाणालोकाः संभिन्नमर्यादाः स्युरतोलोकानामसंभेदायसेतुभूतोयंपरमेश्वरोयः स्व
यंज्योतिरात्मैवेवंवित्सर्वस्यवशीत्यादिब्रह्मविद्यायाः फलमेवंनिर्दिष्टं॥किंज्योतिरयंपुरुषइत्येवमादिषष्ठप्रपाठकविहितायामेतस्यां

तमेतंवेदानुवचनेनब्राह्मणाविविदिषंति ॥

ब्रह्मविद्यायामेवंफलायांकाम्यैकदेशवर्जितंकृत्स्नंकर्मकांडंतादर्थ्येनविनियुज्यतेतत्कथमित्युच्यतेतमेतमेवंभूतमौपनिषदंपु
रुषंवेदानुवचनेनमंत्रब्राह्मणाध्ययनेननित्यस्वाध्यायलक्षणेनविविदिषंतिवेदितुमिच्छंतिकेब्राह्मणाब्राह्मणग्रहणमुपलक्षणार्थंम
विशिष्टोह्यधिकारस्त्रयाणांवर्णानामथवाकर्मकांडेनमंत्रब्राह्मणेनवेदानुवचनेनविविदिषंतिकथंविविदिषंतीत्युच्यतेयज्ञेनेत्यादियें
पुनर्मंत्रब्राह्मणलक्षणेनवेदानुवचनेनप्रकाश्यमानंविविदिषंतीतित्याचक्षतेतेषामारण्यकमात्रमेववेदानुवचनंस्या त्कविशेषणमित्यर्थः॥ब्राह्मण
शब्दस्यक्षत्रियाद्युपलक्षणत्वेहेतुमाह॥अविशिष्टोहीति॥संभावितंपक्षांतरमाह॥अथवेति॥तेनविविदिषाप्रकारंप्रश्नपूर्वकंविवृणोति॥कथमि

तत्रहेतुमाह॥नहीति॥भवतूपनिषन्मात्रग्रहणमित्याशंक्यवेदोवानूच्यतेगुरूच्चारणानंतरंपठ्यतइतिव्युत्पत्तेर्वेदानुवचनशब्देनसर्ववेदग्र
होसंभवतितदेकदेशत्यागोनयुक्तइत्याह॥वेदेति॥दोषसाम्यमाशंकते॥नन्विति॥सिद्धांतेप्युपनिषदंवर्जयित्वावेदानुवचनशब्देनकर्मकांडंगृ
हीतमितिकृत्वातस्यवेदैकदेशविशेषविषयत्वंस्यात्ततश्चपक्षोभयोःसमोदोषः परिहारोपितासमः॥नैकःपर्यनुयोक्तव्यस्तादृगर्थविचारणेपक्षो
भयोरित्यादिन्यायविरोधइत्यर्थः॥नित्यस्वाध्यायोवेदानुवचनमितिपक्षमादायपरिहरति॥नेत्यादिना॥वेदैकदेशपरिग्रहपरित्यागात्मकविरो

न्नहिकर्मकांडेनपरआत्माप्रकाश्यतेतंत्वौपनिषदमितिविशेषश्रुतेः॥वेदानुवचनेनेतिचाविशेषितत्वात्समस्तग्राहीदंवचनंन
चतदेकदेशोत्सर्गोयुक्तः ननुत्वत्पक्षेप्युपनिषत्यक्तेत्येकदेशत्वंस्यात्॥नाद्यव्याख्यानेऽविरोधादस्मत्पक्षेनैषदोषोभवतियदावेदा
नुवचनशब्देननित्यस्वाध्यायोविधीयतेतदोपनिषदपिगृहीतैवेतिवेदानुवचनशब्दार्थैकदेशोनपरित्यक्तोभवति॥यज्ञादिसहपा
ठाच्चयज्ञादीनिकर्माण्येवानुक्रमिष्यन्वेदानुवचनशब्दंप्रयुंक्तेतस्मात्कर्मैववेदानुवचनशब्देनोच्यतइतिगम्यतेकर्महिनित्यस्वाध्या
यःकथंपुनर्नित्यस्वाध्यायादिभिःकर्मभिरात्मानंविविदिषंतिनैवहितान्यात्मानंप्रकाशयंतियथोपनिषदःनैषदोषःकर्मणांविशुद्धि
हेतुत्वात्कर्मभिःसंस्कृताहिविशुद्धात्मानःशक्नुवंत्यात्मानमुपनिषत्प्रकाशितमप्रतिबंधनवेदितुं॥ धाभावंसाधयति॥यदेति॥तर्हि
व्याख्यानांतरमुपेक्षितमित्याशंक्यतदपिवाक्यशेषवशादपेक्षितमेवेत्याह॥यज्ञादीति॥संग्रहवाक्यंविवृणोति॥यज्ञादीनिकर्माणीति॥त
र्हिप्रथमव्याख्यानेकथंवाक्यशेषोपपत्तिरित्याशंक्याह॥कर्महीति॥वेदानुवचनादीनामात्मविविदिषासाधनत्वमाक्षिपति॥कथमिति॥उप
निषद्भिरिवात्मातैरपिज्ञायतामित्याशंक्याह॥नैवेति॥कर्मणामप्रमाणत्वेपिपरंपरयाज्ञानहेतुत्वाद्विविदिषाश्रुतिरविरुद्धेतिसमाधत्ते॥नैषदोषइ

तत्रश्रुत्यंतरंप्रमाणयति॥तथाहीति॥ततोनित्याद्यनुष्ठानाद्विशुद्धधीरात्मानंसदाचिंतयन्नुपनिषद्भिस्तंपश्यतीत्यर्थः॥आदिशब्देनकषायपक्तिरित्या
दिस्मृतिसंग्रहः॥नित्यकर्मणांसंस्कारार्थत्वेप्रमाणंपृच्छति॥कथमिति॥यद्यपिश्रुतिस्मृतिभ्यांकर्मभिःसंस्कृतस्योपनिषद्भिरात्माज्ञातुंशक्यतेतथापितेषां
संस्कारार्थत्वेकिंप्रमाणमितिप्रश्नेश्रुतिस्मृतीप्रमाणयति॥सहवाइत्यादिना॥किंपुनःस्मृतिशास्त्रंतदाह॥अष्टाचत्वारिंशदिति॥अष्टावनायासाद्योगुण

तथाह्याथर्वणेविशुद्धसत्त्वस्ततस्तुतंपश्यतिनिष्कलंध्यायमानइतिस्मृतिश्चज्ञानमुत्पद्यतेपुंसांक्षयात्पापस्यकर्मणइत्यादिः॥कथंपुनर्नित्यानि
कर्माणिसंस्कारार्थानीत्यवगम्यतेसहवाआत्मयाजीयोवेदेदंमेऽनेनांगंसंस्क्रियतइदंमेऽनेनांगमुपाधीयतइत्यादिश्रुतेः॥सर्वेषुचस्मृतिशास्त्रेषु
कर्माणिसंस्कारार्थान्येवाचक्षतेअष्टाचत्वारिंशत्संस्कारइत्यादिषुगीतासुचयज्ञोदानंतपश्चैवपावनानिमनीषिणांसर्वेप्येतेयज्ञविदोयज्ञक्ष

यज्ञेनदानेनतपसानाशकेने

पितकल्मषाइतियज्ञेनेतिद्रव्ययज्ञाज्ञानयज्ञाश्चसंस्कारार्थाःसंस्कृतस्यचविशुद्धसत्त्वस्यज्ञानोत्पत्तिरप्रतिबंधेनभविष्यत्यतोयज्ञेनविवि
दिषंतिदानेनदानमपिपापक्षयहेतुत्वाद्धर्मवृद्धिहेतुत्वाच्चतपसातपइत्यविशेषेणकृच्छ्रचांद्रायणादिप्राप्तौविशेषणमनाशकेनेतिकामान
शनमनाशकंनतुभोजननिवृत्तिर्भोजननिवृत्तोम्रियतएवनात्मवेदनं
श्चत्वारिंशद्गर्भाधानाद्यःसंस्कारइतिविभागः॥बहुवचनोपात्तस्मृत्यंतरमा
ह॥गीतासुचेतिपदांतरमादायव्याचष्टे॥यज्ञेनेतीति॥तेषांसंस्कारार्थत्वेपिकथंज्ञानसाधनत्वमित्याशंक्याह॥संस्कृतस्येति॥दानेनविविदिषंतीतिपूर्वेण
संबंधः॥कथंपुनःस्वतंत्रंदानंविविदिषाकारणमतमाह॥दानमपीति॥विविदिषाहेतुरितिशेषः॥तपसेत्यत्रापिपूर्ववदन्वयःकामानशनंरागद्वेषरहितैरिंद्रि

यैर्विषयसेवनंयदृच्छालाभसंतुष्टत्वमितियावत्॥यथा
श्रुतार्थत्वेकाहानिरित्याशंक्याह॥नत्विति॥

भवतूपात्तानांवेदानुवचनादीनामिष्यमाणेज्ञानेविनियोगस्तथापिकथंसर्वंनित्यंकर्मतत्रविनियुक्तमित्याशंक्याह॥ वेदानुवचनेति॥ उपलक्षणमाह॥ एवमिति॥ प्रनाड्याकर्मणोमुक्तिहेतुत्वेकांडद्वयस्यैकवाक्यत्वमपिसिध्यतीत्याह॥ एवंकर्मेति॥ वाक्यांतरमवतार्यव्याकरोति॥ एवमिति॥ तस्ये वार्थमाह॥ यथोक्तेनेति॥ यज्ञाद्यनुष्ठानाद्विशुद्धिद्वाराविविदिषोत्पत्तौगुरुपादोपसर्पणंश्रवणादिचेत्यनेनक्रमेणेत्यर्थः॥ यथाप्रकाशितंमोक्ष

वेदानुवचनयज्ञदानतपःशब्देनसर्वमेवनित्यंकर्मोपलक्ष्यते॥ एवंकाम्यवर्जितंनित्यंकर्मजातंसर्वमात्मज्ञानोत्पत्तिद्वारेणमोक्षसा धनत्वंप्रतिपद्यतेएवंकर्मकांडेनास्यैकवाक्यतावगतिः एवंयथोक्तेनन्यायेनैतमेवात्मानंविदित्वायथाप्रकाशितंमुनिर्भवतिमननान्मु नियोगीभवतीत्यर्थः एतमेवविदित्वामुनिर्भवतिनान्यं नन्वन्यवेदनेपिमुनित्वंस्यात्कथमवधार्यतेएतमेवेति॥ बाढं॥ अन्यवेदनेपिमुनि

तमेवविदित्वामुनिर्भव

र्भवेत्किंत्वन्यवेदनेनमुनिरेवस्यात्किंतर्हिकर्म्यपिभवेत्स एतंत्वौपनिषदंपुरुषंविदित्वामुनिरेवस्यान्नतुकर्मीअतोऽसाधारणंमुनि त्वंविवक्षितमस्येत्यवधारयत्येतमेवेति॥ एतस्मिन्हिविदितेकेनकंपश्येदित्येवंक्रियाऽसंभवान्मननमेवस्यात्॥ किंच॥ एतमेवात्मानं स्वंलोकमिछंतःप्रार्थयंतःप्रव्राजिनःप्रव्रजनशीलाः॥ प्रव्रजंतिप्रकर्षेणव्रजंतिसर्वाणिकर्माणिसंन्यसंतीत्यर्थः॥ प्रकरणेमंत्रब्राह्मणाभ्यामु क्तलक्षणमित्यर्थः॥ योगिशब्दोजीवन्मुक्तविषयः॥ एवकारंव्याकरोति॥ एतमेवेति॥ अवधारणमाक्षिप्यसमाधत्ते॥ नन्वित्यादिना॥ एवकारस्तर्हित्यज्य तामित्याशंक्याह॥ किंत्विति॥ आत्मवेदनेपिकर्मित्वंस्यादितिचेन्नेत्याह॥ एतंत्विति॥ कथमात्मविदोपिमुनित्वमसाधारणंतदाह॥ एतस्मिन्निति॥ इतश्चा

आत्मलोकमिछंतां मुमुक्षूणामपि कर्मत्यागश्रवणादात्मविदां नकर्मिते ति किं वक्तव्यमित्यर्थः॥ ताद्धील्यं वैराग्यातिशयशालित्वं॥ अवधारणसाम
र्थ्यसिद्धमर्थमाह॥ एतमेवेति॥ पारिव्राज्ये लोकत्रयार्थिनामनधिकारे दृष्टांतमाह॥ नहीति॥ लोकत्रयार्थिनश्चेत्पारिव्राज्येनाधिक्रियंते कुत्र तर्हि तेषा
मधिकारस्तत्राह॥ तस्मादिति॥ स्वर्गकामस्य स्वर्गसाधने यागेधिकारवल्लोकत्रयार्थिनामपि तत्साधने पुत्रादावधिकार इत्यर्थः॥ पुत्रादीनां बाह्यलोक

एतमेव लोकमिछंत इत्यवधारणान्न बाह्यलोकत्रये प्सूनां पारिव्राज्ये धिकार इति गम्यते नहि गंगाद्वारं प्रति पित्सुः काशिदेशनिवासी
पूर्वाभिमुखः प्रैति तस्माद्बाह्यलोकत्रयार्थिनां पुत्रकर्मापरब्रह्मविद्यासाधनं पुत्रेणैवायं लोको जय्यो नान्येन कर्मणेत्यादिश्रुतेरतस्त द
र्थिभिः पुत्रादिसाधनं प्रत्याख्यायन पारिव्राज्यं प्रतिपत्तुं युक्तमतत्साधनत्वात्पारिव्राज्यस्य तस्मादेतमेव लोकमिछंतः प्रव्रजंतीति युक्तम

त्येतमेव प्रव्राजिनो लोकमिछंतः प्रव्रजं

वधारणमात्मलोकप्राप्तिर्हि विद्यानिवृत्तौ स्वात्मन्यवस्थानमेव॥ तस्मादात्मानं चेल्लोकमिछति यस्तस्य सर्वक्रियोपरम एवात्मलोकसाध
नं मुख्यमंतरंगं साधने प्रमाणमाह॥ पुत्रेणेति॥ पुत्रादीनां लोकत्रयसाधनत्वे सिद्धे फलितमाह॥ अत इति॥ अतत्साधनत्वं लोकत्रयं प्रत्यनुपाय
त्वं॥ अवधारणार्थमुपसंहरति॥ तस्मादिति॥ लोकत्रयार्थिनां पारिव्राज्येऽनधिकारादिति यावत्॥ आत्मलोकस्य स्वरूपत्वेन सदाप्तत्वात्कथं तत्रेछेत्याशं
क्याह॥ आत्मेति॥ तस्यात्मत्वेन नित्यप्राप्तत्वेप्यविद्ययात्यव्यवहितत्वात्प्राप्त्यसंभवतीति भावः॥ भवत्वात्मलोकप्रेप्सा तथापि किं तत्प्राप्तिसाधनं तदाह॥ तस्मा
दिति॥ अविद्यावशात्तदीप्सासंभवादित्यर्थः॥ तदिछायादौ लभ्यं द्योतयितुं चेछब्दः॥ मुख्यत्वं श्रुत्यक्षरप्रतिपन्नत्वं॥ प्रणादिकसाधनेभ्यो वेदानुवचना

पारिव्राज्यमेवात्मलोकस्यांतरंगसाधनमिति दृष्टांतमाह॥ यथेति॥ तथा पारिव्राज्यमेवात्मलोकस्य साधनमिति शेषः॥ पारिव्राज्यमेवेति नियमे हेतु
माह॥ पुत्रादीति॥ तस्यान्यत्र विनियुक्तत्वादिति शेषः यद्यपि केवलं पुत्रादिकं नात्मलोकप्रापकं तथापि पारिव्राज्यसमुच्चितं तथा स्यादित्याशंक्याह॥ अ
संभवेनेति॥ नहि परिव्राजकस्य पुत्रादि तद्वतो वा पारिव्राज्यं संभवति॥ उक्तं च समुच्चयं निराकुर्वद्भिः सपरिकरस्य ज्ञानस्य कर्मादिना विरुद्धत्वं तेन कुतः स
मुच्चितं पुत्राद्यात्मलोकप्रापकमित्यर्थः साधनांतरे संभवे फलितमुपसंहरति॥ तस्मादात्मानमिति॥ प्रव्रजंतीति वर्तमानापदेशान्नात्र विधिरस्तीत्याशंक्या

यथा पुत्रादिरेव बाह्यलोकत्रयस्य पुत्रादिकर्मण आत्मलोकं प्रत्यसाधनत्वादसंभवेन च विरुद्धमेवोचाम तस्मादात्मानं लोकमिच्छंतः प्रव्रजंये
व सर्वक्रियाभ्यो निवर्त्तेरन्नेवेत्यर्थः॥ यथा च बाह्यलोकत्रयार्थिनः प्रतिनियतानि पुत्रादीनि साधनानि विहितान्येवमात्मलोकार्थिनः सर्वै
षणानिवृत्तिः पारिव्राज्यं ब्रह्मविदो विधीयत एव कुतः पुनस्त आत्मलोकार्थिनः प्रव्रजंत्येवेत्युच्यते तत्रार्थवादवाक्यरूपेण हेतुं दर्शयति॥ ए
तद्ध स्म वै तत्तदेतत्पारिव्राज्ये कारणमुच्यते ह स्म वै किल पूर्वे अतिक्रांतकालीनाः विद्वांसः आत्मज्ञाः प्रजां कर्मापरब्रह्मविद्यां च प्रजोपलक्षि
तं हि त्रयमेतद्बाह्यलोकत्रयसाधनं निर्दिश्यते प्रजामिति प्रजां किं न कामयंते पुत्रादिलोकत्रयसाधनं नानुतिष्ठंतीत्यर्थः ननु परब्रह्मदर्शी
नमनुतिष्ठंत्येव ग्निहोत्रं जुहोतीति वद्विधिमाश्रित्याह॥ यथा चेति॥ पारिव्राज्यविधिमुक्त्वा तदपेक्षितमर्थवादमाकांक्षापूर्वकमुत्थापयति॥ कुतः
पुनरिति॥ उत्थापितस्यार्थवादस्य तात्पर्यमाह॥ तत्रेति॥ आत्मलोकार्थिनां पारिव्राज्यनियमः सप्तम्यर्थः॥ अर्थवादस्यान्यक्षराणि व्याचष्टे॥ तदेतदि
ति॥ क्रियापदेन स्मेति संबध्यते॥ निपातद्वयस्यार्थमाह॥ किलेति॥ प्रजां न कामयंत इत्युत्तरत्र संबंधः॥ प्रजामात्रे श्रुते कथं कर्मादि गृह्यते तत्राह॥ प्रजे
ति॥ आकांक्षापूर्वकमन्वयमन्वाचष्टे॥ प्रजां किमिति॥ अकामयमानतस्य पर्यवसानं दर्शयति॥ पुत्रादीति॥ पूर्वे विद्वांसः साधनत्रयं नानुतिष्ठंतीत्युक्तमासि

=४ अपरब्रह्मध्यानार्थं हि व्युत्थानं

४= ध्यानं चैवात्मनो भूप परमार्थार्थशब्दितं भेदकारी परेभ्यस्तु तत्परमार्थो न भेदवान्॥ एकं समस्तं यदिहास्ति किंचित्तदुच्यते नास्ति परं ततोऽन्यत् सोऽहं स च त्वं स च सर्वमेतदात्मस्वरूपं त्यज भेद

एषणाभ्यो व्युत्तिष्ठतां किं तदनुष्ठानेनेत्याशंक्याह॥ तद्ध लाद्वीति॥ आत्मविदामपरविद्यानुष्ठानं दूषयति॥ नापवादादिति॥ अथात्र सर्वस्यानात्म
नो दर्शनमेवापोद्यते न त्वपरस्य ब्रह्मणो दर्शनमत आह॥ अपरब्रह्मणोपीति॥ तदपवादे श्रुत्यंतरमाह॥ यत्रेति॥ यस्मिन्भूम्नि स्थितस्तज्ज्ञस्तु दृष्टि
रन्यं न पश्यति न शृणोतीत्यादिना च दर्शनादिव्यवहारस्य वारितत्वादात्मविदो न युक्तमपरब्रह्मदर्शनमित्यर्थः॥ तत्र वह्वेतंतरमाह॥ पूर्वेति॥ प्रति

तेंह लात्थिव्युत्थानं नोपवादो ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद सर्वं तं परादादित्यपरब्रह्मदर्शनमप्यपवदत्येव अपरब्रह्मणो
पि सर्वमध्यांतर्भावाद्यत्र नान्यत्पश्यतीति च पूर्वापरबाह्यांतरदर्शनप्रतिषेधाच्चापूर्वमनपरमनंतरमबाह्यमिति तत्केन कं पश्येद्विजा

१= अपरब्रह्मदर्शनस्य व्युत्थानकारणत्वाभावात्

एतद्ध स्म वै तत्पूर्वे विद्वांसः प्रजां न कामयंते ॥

नीयादिति च तेषां त्वात्मदर्शनव्यतिरेकेणान्यद्व्युत्थानकारणमपेक्ष्यते॥ कः पुनस्तेषामभिप्राय इत्युच्यते किं प्रयोजनं फलं साध्यं करि
ष्यामः प्रजया साधनेन प्रजा हि बाह्यलोकसाधनं निर्ज्ञाता षेधप्रकारमभिनयति॥ अपूर्वमिति॥ इतश्चात्मविदां नापरब्रह्मदर्शनमित्याह॥
तत्केनेति॥ अपरब्रह्मदर्शनासंभवे किं तेषामेषणाभ्यो व्युत्थानेकारणमित्याशंक्याह॥ तस्मादिति॥ साधनत्रयमननुतिष्ठतामभिप्रायं प्रश्नपूर्वकमा
ह॥ कः पुनरित्यादिना॥ कैवल्यमेव तत्साध्यं फलमित्याशंक्याह॥ प्रजा हीति॥ निर्ज्ञातासौ पं मित्यादिश्रुतावितिशेषः॥ १सोऽयं मनुष्यलोकः पुत्रेणैव जय्य इत्यादि

२= चतुर्थमायुषो भागं त्यक्त्वा संगान्परिव्रजेत् आश्रमादाश्रमं गत्वा हुतहोमो जितेंद्रियः ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ऋणान्यपाकृत्य मोक्षमिच्छन् व्रजत्यधः अ
धीत्य विधिवद्वेदान् पुत्रांश्चोत्पाद्य धर्मतः इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत् अनधीत्य द्विजो वेदाननुत्पाद्य तथात्मजान् अनिष्ट्वा चैव यज्ञैस्तु मोक्षमिच्छन्व्रजत्यध इत्यादि मनुव
चनं वैराग्याभावे बोध्यमन्यथा श्रुतिविरोधः २=

सएवतर्हिप्रजयासाध्यतामितिचेन्नेत्याह॥सचेति॥आत्मव्यतिरिक्तोनास्तीत्युक्तमुपपादयति॥सर्वंहीति॥आत्मव्यतिरिक्तस्यैवलोकस्यप्रजादिसाध्यत्वमिष्यतांइतिचेन्नेत्याह॥आत्माचेति॥आत्मयाजिनःसंस्कारार्थकर्मसंगीकारादात्मनोस्तिसंस्कार्यत्वमित्याशंक्याह॥यद्यपीति॥अथांगांगित्वंचमुख्यात्मदर्शनविषयमेवकिंनेष्यतेतत्राह॥नहीति॥आत्मविदांप्रजादिसाध्याभावमुपसंहरति॥तस्मान्नेति॥केषांतर्हिप्रजादिभिःसाध्यंफलंतदाह॥अ

सचबाह्योलोकोनास्त्यस्माकमात्मव्यतिरिक्तःसर्वंह्यस्माकमात्मभूतमेवसर्वस्यचवयमात्मभूताःआत्माचनःआत्मत्वादेवनकेनचित्साधनेनोत्पाद्यःआप्योविकार्यःसंस्कार्योवायद्यप्यात्मयाजिनःसंस्कारार्थंकर्मेतितदपिकार्यकरणात्मदर्शनविषयमेवइदंमेनेनांगंसंस्क्रियतइत्यंगांगित्वादिश्रवणान्नहिविज्ञानघनैकरसनैरंतर्यदर्शिनोंगांगिसंस्कारोपधानदर्शनंसंभवतितस्मान्नकिंचित्प्रजादिसा

किंप्रजयाकरिष्यामोयेषांनोयमात्मा

धनैःकरिष्यामःअविदुषांहितत्प्रजादिसाधनैःकर्तव्यंफलंनहिमृगतृष्णिकायामुदकपानायतदुदकदर्शीप्रवृत्तइतितत्रोषरमात्रमुदकाभावंपश्यतोपिप्रवृत्तिर्युक्ताएवमस्माकमपिपरमार्थात्मलोकदर्शिनांप्रजादिसाधनसाध्येमृगतृष्णिकादिसमेऽविद्वद्दर्शनविषये नप्रवृत्तिर्युक्तेत्यभिप्रायस्तदेतदुच्यतेयेषामस्माकंपरमार्थदर्शिनामयमात्माऽशनायादिविनिर्मुक्तःसाध्वसाधुभ्यामविकार्योयंलोकःफलमभिप्रेतंनचास्यात्मनःसाध्यसाधनादिसर्वसंसारधर्मविनिर्मुक्तस्यसाधनंकिंचिदेषितव्यं विदुषांहीति॥केषांचित्पुत्रादिषुप्रवृत्तिश्चेत्तेनैवन्यायेनविदुषामपितेषुप्रवृत्तिःस्यादित्याशंक्याह॥नहीति॥तत्रप्रवृत्तिरितिसंबंधःअविद्वद्दर्शनविषयइतिच्छेदः॥उक्तेर्थेवाक्यमवतार्यव्याचष्टे॥नदेतदिति॥आत्माचेत्तदभि

कृतर्हि साधनमेष्टव्यमित्याशंक्याह॥ साध्यस्येति॥ विपक्षे दोषमाह॥ असाध्यस्येति॥ येषामित्यादिवाक्यार्थमुपसंहरति॥ तस्मादिति॥ ब्राह्मणानां ब्रह्मवि
दां प्रजादिभिः साध्याभावादिति यावत्॥ वाक्यांतरं प्रश्नद्वारेणावतार्य पांचमिकं व्याख्यानं तस्य स्मारयति॥ तएवमित्यादिना॥ यद्यर्थोयमर्थवादस्तं विधिं
निगमयति॥ तस्मादिति॥ महानुभावोयमात्मलोकोयत्तद्दर्शिनो दुष्करमपि पारिव्राज्यं कुर्वंतीति स्तुतिरत्र विवक्षितान विधिरित्याशंक्याह॥ नहीति॥ त

साध्यस्य हि साधनान्वेषणा क्रियते असाध्यस्य साधनान्वेषणायां हि जलबुध्यास्थल इवतरणं कृतं स्यात्खेवा शाकुनपदान्वेषणं तस्मादेतदा
त्मानं विदित्वा प्रव्रजेयुरेव ब्राह्मणाः नकर्मारभेरन्नित्यर्थः॥ यस्मात्पूर्वे ब्राह्मणा एवं विद्वांसः प्रजामकामयमानास्त एवं साध्यसाधनसंव्यव
हारं निंदंतोऽविद्वद्विषयमिति कृत्वा किं कृतवंत इत्युच्यते ते ह स्म किल पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं

यं लोक इति ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरंति ॥

चरंतीत्यादि व्याख्यातं तस्मादात्मानं लोकमिच्छंतः प्रव्रजंति प्रव्रजेयुरित्येष विधिरर्थवादेन संगच्छते न हि सार्थवादस्यास्य लोकस्तुत्य
भिमुखत्वमुपपद्यते प्रव्रजंतीत्यस्यार्थवादरूपो ह्येतद्धस्मेत्यादिरुत्तरो ग्रंथः॥ अर्थवादश्चेन्नार्थवादांतरमपेक्षतापेक्षते ते तद्धस्मेत्याद्य
र्थवादं प्रव्रजंतीत्येतद्यस्मात्पूर्वे विद्वांसः प्रजादिकर्मभ्यो निवृत्ताः प्रव्रजितवंत एव तस्मादधुनातना अपि प्रव्रजंति प्रव्रजेयुरित्येवं संबध्यमा
नेन लोकस्तुत्यभिमुखं भवितुमर्हतिं॥ देव प्रपंचयति॥ प्रव्रजंतीत्यस्येति॥ तथापि प्रव्रजंतीति वाक्यस्यार्थवादत्वं किं न स्यादित्याशंक्याह॥ अर्थवाद
श्चेति॥ अपेक्षाप्रकारमेव प्रकटयंस्तस्य स्तुत्यभिमुखत्वाभावाद्विधित्वमेवेत्याह॥ यस्मादिति॥ किंच॥ विदित्वा व्युत्थाय भिक्षाचर्यं चरंतीत्यत्र विज्ञानेन समानकर्तृ

ऽतोप्युत्थानमपि विविधिमर्हतीत्युक्तं तथा चात्रापि व्युत्थानापरपर्यायं पारिव्राज्यं विधेयमित्याह ॥ विज्ञानेति ॥ इतश्च पारिव्राज्यवाक्यमर्थवादो न भवतीत्याह ॥ वेदेति ॥ तदेव साधयति ॥ यथेत्यादिना ॥ पारिव्राज्यस्य विधेयत्वे हेत्वंतरमाह ॥ फलेति ॥ पुत्रादिफलापेक्षया पारिव्राज्यफलं विभागेनोपदिश्यते तथा च फलवत्त्वात्पुत्रादिवत्पारिव्राज्यस्य विधेयत्वसिद्धिरित्यर्थः ॥ तदेव विवृणोति ॥ एतमेवेति ॥ प्रकृतमात्मानं स्वलोकमाप्तात्तो विदित्वा तमेव साक्षात्कर्तुमिच्छंतः ॥ प्रव्रजंतीतिवचनात्पुत्रादिसाध्यान्मनुष्यादिलोकादात्माख्यं लोकं पारिव्राज्यस्य फलांतरत्वेन यतः श्रुतिर्विभज्याभिदधाति अतस्तस्य

विज्ञानसमानकर्तृकत्वोपदेशादित्यादिना वोचाम वेदानुवचनादिसहपाठाच्च यथात्मदर्शनसाधनत्वेन विहितानां वेदानुवचनादीनां यथार्थत्वमेवं नार्थवादत्वं तथा तैरेव सह पठितस्य पारिव्राज्यस्यात्मलोकप्राप्तिसाधनत्वेनार्थवादत्वमयुक्तं फलविभागोपदेशा

याह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लोकैषणोभे ह्येते एषणे एव भवतः ॥

च्च एतमेवात्मानं लोकं विदित्वेत्यन्यस्माद्बाह्याल्लोकादात्मानं फलांतरत्वेन प्रविभजति यथा पुत्रेणैवायं लोको जय्यो नान्येन कर्मणा कर्मणा पितृलोक इति न च प्रव्रजंतीत्येतस्मात्प्रवल्लोकस्तुतिपरं ॥ प्रधानवच्चार्थवादापेक्षं विधेयत्वमप्रत्यूहमित्यर्थः ॥ फलविभागोपदेशे दृष्टांतमाह ॥ यथेति ॥ तथा पारिव्राज्येपि यथोक्तफलविभागोक्तेर्विधीयतेतिदार्ष्टांतिकमिति शब्दार्थः ॥ पारिव्राज्यस्य स्तुतिपरत्वाभावे हेत्वंतरमाह ॥ न चेति ॥ यथा वायुर्वै क्षेपिष्ठेत्यादिरर्थवादः प्राप्ताप्तार्थो देवतादिस्तुत्यर्थः स्थितो न तथेदं स्तुतिपरं तद्वद्द्योतिशब्दाभावादित्यर्थः ॥ किंच ॥ प्रधानस्य दर्शपूर्णमासादेरर्थवादापेक्षावत्पारिव्राज्यमपि तदपेक्षमुपलभ्यते तेन तस्य दर्शादिवद्विधेयत्वं दुर्वारमित्याह ॥ प्रधानवच्चेति ॥ किंच ॥

पारिव्राज्यंसकृदेवश्रुतंचेदविवक्षितमन्यस्तुतिपरंस्यान्नचेदंसकृदेवश्रूयतेप्रव्रजंतीत्युपक्रम्यप्रजांनकामयंतेत्युत्थायाथभिक्षाचर्यंचरंतीत्यभ्यासाद्
तोपिनस्तुतिमात्रमेतदित्याह॥सकृदिति॥नचेत्यत्रापिसंबध्यते॥कथंतर्हिपारिव्राज्यस्यस्तुतिपरत्वप्रतीतिस्तत्राह॥तस्मादिति॥अस्तुतर्हिविधेयमपि
पारिव्राज्यंस्तावकमपीतिचेन्नेत्याह॥नचेति॥विपक्षेदोषमाहविध्यनुपलंभादित्यर्थः॥अन्यत्रविध्यनुपलंभंसमर्थयते॥यदीत्यादिना॥अन्यत्रप्रक्रिया
यामितियावत्॥कर्माधिकारेतत्यागविधेर्विरुद्धत्वादितिभावः॥भवत्विहपारिव्राज्यविधिस्तथापिसर्वकर्मानधिकृतविषयःस्यादित्याशंक्याह॥यदपी

सकृत्कुतंस्यात्तस्माद्व्यतिरेकेवैषालोकस्तुतिपरमितिनचानुष्ठेयेनपारिव्राज्येनस्तुतिरुपपद्यतेयदिपारिव्राज्यमनुष्ठेयमपिसदन्यस्तुत्य
र्थंस्याद्दर्शपूर्णमासादीनामप्यनुष्ठेयानांस्तुत्यर्थतास्यान्नचान्यत्रकर्तव्यतैतस्माद्विषयान्निर्ज्ञातायतइहस्तुत्यर्थंभवेद्यदिपुनःक्वचिद्विधिःप
रिकल्प्येतपारिव्राज्यस्यसइहैवमुख्योनान्यत्रसंभवतियदप्यनधिकृतविषयेपारिव्राज्यंकल्प्यतेतत्रवृक्षाद्यारोहणाद्यपिपारिव्राज्यव
त्कल्प्येतकर्तव्यत्वेनानिर्ज्ञातत्वाविशेषात्॥तस्मात्स्तुतित्वगंधोप्यत्रनशक्यःकल्पयितुंयद्ययमात्मालोकइष्यतेकिमर्थंतत्प्राप्तिसाधनत्वेन
कर्माण्येवनारभेरन्किंपारिव्राज्येनेतिअत्रोच्यतेअस्यात्मलोकस्यकर्मभिरसंबंधात्यमात्मानमिच्छंतःप्रव्रजेयुःसआत्मासाधनत्वेनफलत्वेन
चोत्पाद्यत्वादिप्रकाराणामन्यतमत्वेनापिकर्मभिर्नसंबध्यते

ति॥तत्रकर्मानधिकृतेपुंसीत्येतत्॥तत्रहेतुमाह॥कर्तव्यत्वेनेतिकर्मानधिकृतेनकर्त
व्यतयाज्ञातत्वंवृक्षारोहणादाविवपारिव्राज्येपिनास्तितथाचानधिकृतविषयेपारिव्राज्यंकल्प्यतेचेत्तस्मिन्विषयेवृक्षारोहणाद्यपिकल्प्येताविशेषा
दित्यर्थः॥पारिव्राज्यस्याधिकृतविषयत्वेविधेयत्वेचसिद्धेफलितमाह॥तस्मादिति॥सार्थवादंपारिव्राज्यंव्याख्यायसएषइत्यादिव्याकर्तुंशंकय
ति॥यदीति॥परिहरति॥अत्रेति॥तदर्थिनोनारंभन्तेकर्माणीतिशेषः॥कर्मभिरसंबंधमात्मलोकस्यसाधयति॥यमात्मानमिति ॥

तस्यकर्मासंबंधेनिष्प्रपंचत्वंफलतीत्याह॥तस्मादिति॥आत्मनोनिष्प्रपंचत्वेपिकथंतद्दर्थिनांपारिव्राज्यसिद्धिरित्याशंक्याह॥यस्मादिति॥निर्विशेषस्व
त्रतत्रवाक्येदर्शितस्वरूपोयमात्मेत्येतदागमोपपत्तिभ्यांयथापूर्वंत्रस्थापितंतथात्रापिब्राह्मणद्वयेविशेषतोयस्मान्निर्धारितंतस्मादस्मिन्नात्मनिआ
पाततोज्ञातेकर्मानुष्ठानप्रयत्नासिद्धिरितियोजनाउक्तात्मविषयविवेकविज्ञानवतोनकर्मानुष्ठानमित्यत्रदृष्टांतमाह॥नहीति॥ब्रह्मज्ञानफलेसर्वकर्मफ

तस्मात्सएषनेतिनेत्यात्माऽगृह्योनहिगृह्यतेइत्यादिलक्षणोयस्मादेवंलक्षणआत्माकर्मफलसाधनासंबंधीसर्वसंसारधर्मविलक्षणो
ऽशनायाद्यतीतोऽस्थूलादिधर्मवानजोऽजरोऽमरोऽमृतोऽभयःसैंधवघनवद्विज्ञानैकरसस्वभावःस्वयंज्योतिरेकएवाद्वयोपूर्वोऽन
परोऽनंतरोबाह्यइत्येतदागमतस्तर्कतश्चस्थापितंविशेषतश्चेहजनकयाज्ञवल्क्यसंवादेस्मिन्तस्मादेवंलक्षणेआत्मनिविदिते

सएषनेतिनेत्यात्माऽगृह्योनहिगृह्यतेशीर्योनहिशीर्यतेसंगोनहिसज्जतेसितोनव्यथतेनरिष्यत्ये

आत्मत्वेननैवकर्मारंभउपपद्यतेनहिचक्षुष्मान्पथिप्रवृत्तोहनिकूपेकंटकेवापततिकृत्स्नस्यकर्मफलस्यचविद्याफलेंतर्भावान्नचा
यत्नप्राप्येवस्तुनिविद्वान्यत्नमातिष्ठति॥अंकेचेन्मधुविंदेतकिमर्थंपर्वतंव्रजेत्इष्टस्यार्थस्यसंप्राप्तौकोविद्वान्यत्नमाचरेत्॥सर्वंकर्मा
खिलंपार्थज्ञानेपरिसमाप्यतेइतिगीतास्विहापिचैतस्यैवपरमानंदस्यब्रह्मवित्प्राप्यस्यान्यानिभूतानिमात्रामुपजीवंतीत्युक्ते लांतर्भावा
च्चतदर्थिनोमुमुक्षोर्नकर्तव्यंकर्मेत्याह॥कृत्स्नस्येति॥तथापिविचित्रफलानिकर्माणीतिविवेकीकुतूहलवशादनुष्ठास्यतीत्याशंक्याह॥नचेति॥तत्र
लौकिकंन्यायंदर्शयति॥अंकेतिपुरोदेशेमधुलभेतचेदितियावत्॥ज्ञानफलेकर्मफलांतर्भावेमानमाह॥सर्वमिति॥अखिलंसमग्रांगोपेतमित्यर्थः॥तत्रै

निषेधवाक्यतात्पर्यमुपसंहरति॥ अत इति॥ एतमित्यादिवाक्यं योजयति॥ यस्मादिति॥ उहेति निपाताभ्यां सूचितोऽर्थो यस्मादित्यनुभाषितः॥ इति श
ब्दस्यापेक्षितं पूरयति॥ इति युक्तमिति॥ आकांक्षापूर्वकमुत्तरवाक्यमवतार्य व्याकरोति॥ के त इत्यादिना॥ यथोक्तात्मविदस्तापहर्षासंस्पर्शे हेतुमा

अतो ब्रह्मविदां न कर्मारंभो यस्मात्सर्वैषणाविनिवृत्तः स एष नेति नेत्यात्मानमात्मत्वेनोपगम्य तद्रूपेणैव वर्तते तस्मादेतमेवंविदं ने
ति नेत्यात्मभूतं उ ह एव एते वक्ष्यमाणे न तरतो न प्राप्नुत इति युक्तमेवेति वाक्यशेषः के ते इत्युच्यते अतोऽस्मान्निमित्ताच्छरीरधारणा
दिहेतोः पापमपुण्यं कर्माकरवं कृतवानस्मि कष्टं खल्वहमनेन पापेन कर्मणा नरकं प्रतिपत्स्य इति॥ योऽयं पश्चात्तापः कर्म

तमु हैवैते न तरत इत्यतः पापमकरवमि त्यतः कल्याणमकरवमित्युभे उ हैवैष एते तरति नैनं कृताकृते तपतः॥ ७०॥

कृतवतः परितापः स एनं नेति नेत्यात्मभूतं न तरति तथातः कल्याणं फलविषयकामान्निमित्ताद्यज्ञदानादिलक्षणं शोभनं कर्म कृ
तवानस्मि अतोऽहमस्य फलं सुखमुपभोक्ष्ये देहान्तर इत्येषोऽपि हर्षस्तं न तरति उभे उ ह एष ब्रह्मविदेते कर्मणी तरति पुण्यपापलक्षणे
एवं ब्रह्मविदः संन्यासिन उभे अपि कर्मणी क्षीयेते पूर्वजन्मनि कृते ये ते च इह जन्मनि कृते ये ते च अपूर्वे च नारभेते किंच॥ नैनं कृताकृ
ते कृतं नित्यानुष्ठानं अकृतं तस्यैवाक्रिया ते अपि कृताकृते एनं न तपतः नात्मज्ञं हि कृतं फलदानेनाकृतं प्रत्यवायोत्पादनेन तपतो

ह॥ उभे इति॥ पुण्यपापे तरतीत्युक्ते पृथगवस्थानं तयोः शंकेत तन्निरस्यति॥ एवमिति॥ निषेधवाक्योक्तक्रमेणेति यावत्॥ इतश्चात्मविदो ध
र्मादिसंबंधो नास्तीत्याह॥ किंचेति॥ तदेवानंतरवाक्यव्याख्यानेन स्फोरयति॥ नैनमिति॥ तयोस्तर्हि कुत्र तापकत्वं तदाह॥ अनात्मज्ञं हीति॥

बृ.र.
८८

पुरुषत्वाद्ब्रह्मविदुष्यपि तयोस्तापकत्वं स्यादित्याशंक्याह॥ अयंत्विति॥ अत्र भगवद्वाक्यं प्रमाणयति॥ यथेति॥ यद्यपि पूर्वोत्तरयोर्धर्माधर्मयोरनार
ब्धयोरात्मविद्यावशाद्विनाशाश्लेषौ तथापि प्रारब्धयोरस्ति तयोस्तापकत्वमित्याशंक्याह॥ शरीरेति॥ प्रकृतं विद्याफलमुपसंहरति॥ अत इति॥ कर्मकार्य
संबंधादिति यावत्॥ २१॥ ७०॥ उक्ते विद्याफले मंत्रं संवादयति॥ तदेतदिति॥ एष नित्यो महिमेत्यत्र नित्यत्वमुपपादयति॥ अन्ये त्विति॥ न हि लक्षणत्वमक

ऽयं तु ब्रह्मविदात्मविद्याग्निना सर्वाणि कर्माणि भस्मीकरोति यथैधांसि समिद्धोऽग्निरित्यादिस्मृतेः शरीरारंभकयोस्तूपभोगेनैव क्षयः॥ अ
तो ब्रह्मविदकर्मसंबंधी॥ ७०॥ २१॥ तदेतदृचाभ्युक्तं ब्राह्मणेनोक्तमर्थं मंत्रेणाभ्युक्तं प्रकाशितमेष नेति नेत्यादिलक्षणो नित्यो महिमा अन्ये तु महिमा
नः कर्मकृता इत्यनित्या अयं तु तद्विलक्षणो नेति नेत्यादिलक्षणो महिमा स्वाभाविकत्वान्नित्यो ब्रह्मविदो ब्राह्मणस्य त्यक्तसर्वैषणस्य कुतोऽस्य

तदेतदृचाभ्युक्तमेष नित्यो महिमा ब्राह्मणस्य न वर्द्धते कर्मणा नो कनीयान्। तस्यैव स्यात्पदवित्तं विदित्वा न लिप्यते कर्मणा पापके
नेति॥ नित्यत्वमिति हेतुमाह न कर्मणा वर्धते शुभलक्षणेन कृतेन वृद्धिलक्षणां विक्रियां प्राप्नोति तथाऽशुभेन कर्मणा नो कनीयान्नाप्यपक्ष
यलक्षणां विक्रियां प्राप्नोति उपचयापचयहेतुभूता एव हि सर्वा विक्रिया इत्येताभ्यां प्रतिषिध्यंते अतोऽविक्रियत्वान्नित्य एष महिमा तस्मात्त
स्यैव महिम्नः स्यात् भवेत्पदवित्पदस्य वेत्ता पद्यते गम्यते ज्ञायत इति महिम्नः स्वरूपमेव पदं तस्य वेदिता किं तत्पदवेदनेन स्यादित्युच्यते तं विदि
त्वा महिमानं न लिप्यते न संबध्यते कर्मणा पापकेन धर्माधर्मलक्षणेन॥ र्मकृतत्वं अकर्मकृतो महिमा स्वाभाविकत्वान्नित्य इत्यत्राकर्मकृतत्वेन स्वाभावि
कत्वमसिद्धमित्याशंक्याह॥ कुतोऽस्येति॥ वृद्धिरपक्षयश्चेति विक्रियाद्वयाभावेऽपि विक्रियांतराणि भविष्यंतीत्याशंक्याह॥ उपचयेति॥ एताभ्यां निषेधाभ्यामि

अं.
८

रामः
८८

तस्यनित्यत्वेपिकिंतदाह॥तस्मादिति॥अधर्मलक्षणेनेतिवक्तव्येकिमिदंधर्माधर्मलक्षणेनेत्युक्तमतआह॥उभयमपीति॥संसारहेतुत्वाविशेषादित्यर्थः
॥तस्मादित्यादिवाक्यंव्याचष्टे॥यस्मादिति॥एवंविदात्माकर्मतत्फलसंबंधशून्यइत्यापाततोजानन्नित्यर्थः॥विशेषणाभ्यामुत्सर्गतोविहितस्योभयवि
धकरणव्यापारोपरमस्ययावज्जीवादिश्रुतिविहितकर्मापवादस्तस्माद्विरक्तस्यापिनित्यादित्यागः॥उत्सर्गस्यापवादेनबाधःकस्यनसंमतइत्यादिन्या

उभयमपिपापकमेवविदुषोयस्मादेवमकर्मसंबंध्येषब्राह्मणस्यमहिमानेतिनेत्यादिलक्षणःतस्मादेवंवित्शांतोबाह्येंद्रियव्यापारतउपशां
तःतथादांतोंतःकरणतृष्णातोनिवृत्तःउपरतःसर्वैषणाविनिर्मुक्तःसंन्यासीतितिक्षुःद्वंद्वसहिष्णुःसमाहितःइंद्रियांतःकरणचलनस्व
रूपाद्व्यावृत्त्यैकाग्र्यरूपेणसमाहितोभूत्वातदेतदुक्तंपुरस्ताद्बाल्यंचपांडित्यंचनिर्विद्येतिआत्मन्येवस्वेकार्यकरणसंघातआत्मानंप्र

तस्मादेवंवित्शांतोदांतउपरतस्तितिक्षुःसमाहितोभूत्वात्मन्येवात्मानंपश्यतिनैनंपाप्मातरतिसर्वंपाप्मानंतरति॥

त्यक्चेतयितारंपश्यतितत्रकिंतावन्मात्रंपरिच्छिन्नंनेत्युच्यतेसर्वंसमस्तमात्मानमेवपश्यतिनान्यदात्मव्यतिरिक्तंबालाग्रमात्रमप्य
स्तीत्येवंमननात्मुनिर्भवतिजाग्रत्स्वप्नसुषुप्त्याख्यंस्थानत्रयंहित्वाएवंपश्यंतंब्राह्मणंनैनंपाप्मापुण्यपापलक्षणस्तरतिनप्राप्नोतिअ
यंतुब्रह्मवित्सर्वंपाप्मानंतरत्यात्मभावेनैवव्याप्नोत्यतिक्रामति॥ यादित्याशंक्याह॥उपरतइति॥जीवनविच्छेदव्यतिरिक्तशीतादिसहिष्णु
त्वंतितिक्षुत्वं॥यत्रकर्तुःस्वातंत्र्यंतेषांकर्मणांनिरत्तिःशमादिपदैरुक्ता॥यत्रसम्यग्धीविरोधिनिनिद्रालस्यादौपुंसोनस्वातंत्र्यंतन्निवृत्तिःसमाधानंसमा
हितोभूत्वापश्यतीतिसंबंधः॥पश्यतीतिवर्त्तमानापदेशात्कथंविशेषणेषुसंक्रामितोविधिरित्याशंक्याह॥तदेतदिति॥यथोक्तैःसाधनैरुदितायांविद्यायां

तस्यपुण्यपापासंस्पर्शेहेतुमाह॥अयंत्विति॥इतश्चविदुषोनकर्मसंबंधोस्तीत्याह॥नचैनमिति॥किमितिपाप्माब्रह्मविदंनतपतीत्याशंक्याह॥सर्व
मिति॥कथंब्राह्मणोभवतीत्यपूर्ववदुच्यतेप्रागपिब्राह्मण्यस्यसत्वादित्याशंक्याह॥अयंत्विति॥मुख्यत्वमबाधितत्वं॥सफलांविद्यांमंत्रब्राह्मणाभ्या

नचैनंपाप्माकृताकृतलक्षणस्तपतीष्टफलप्रत्यवायोत्पादनाभ्यांसर्वंपाप्मानमयंतपतिब्रह्मवित्सर्वात्मदर्शनवह्निनाभस्मीकरोतिस
एषएवंविद्विपापोविगतधर्माधर्मोविरजोविगतरजःरजःकामोविगतकामोअविचिकित्सश्छिन्नसंशयोहमस्मिसर्वात्मापरंब्रह्मेतिनि
श्चितमतिःब्राह्मणोभवति॥अयंत्वेवंभूतःएतस्यामवस्थायांमुख्योब्राह्मणःप्रागेतस्माद्ब्रह्मस्वरूपावस्थानाद्गौणमस्यब्राह्मण्यमेष

नैनंपाप्मातपतिसर्वंपाप्मानंतपतिविपापोविरजोविचिकित्सोब्राह्मणोभवत्येषब्रह्मलोकःसम्राडितिहोवाचयाज्ञव
ल्क्यःसोहंभगवतेविदेहान्ददामिमांचापिसहदास्यायेति॥७१॥ ब्रह्मलोकोब्रह्मैवलोकोब्रह्मलोकोमुख्योनिरुपचरितःस

र्वात्मभावलक्षणःहेसम्राट्एनंब्रह्मलोकंपरिप्रापितोस्यभयंनेतिनेत्यादिलक्षणमितिहोवाचयाज्ञवल्क्यएवंब्रह्मभूतोजनकोयाज्ञ
वल्क्येनब्रह्मभावमापादितःप्रत्याहसोहंत्वयाब्रह्मभावमापादितःसन्भगवतेतुभ्यंविदेहान्देशान्ममराज्यंददामिमांचसहविदेहैर्दा
स्यायदासकर्मणेददामीतिचशब्दात्संबध्यते॥परिसमापिताब्रह्मविद्यासहसंन्यासेनसांगासेतिहासेतिकर्तव्यताकापरिसमाप्तःपरम

मुपदिश्योपसंहरति॥एषइति॥तत्रकर्मधारयसमासंसूचयति॥ब्रह्मैवेति॥तथाविधसमासपरिग्रहेप्रकरणमनुग्राहकमभिप्रेत्याह॥मुख्यइति॥त
थापिकिंममसिद्धमितितदाह॥एनमिति॥आत्मीयंविद्यालाभंद्योतयितुंराज्ञोवचनमित्याह॥एवमिति॥सतिवक्तव्यशेषकथमिस्थंराज्ञोवचनमित्याशं

॥ परिसमाप्येतीति ॥

तथापिपरमपुरुषार्थस्यवक्तव्यत्वमाशंक्याह॥परिसमाप्तइति॥कर्तव्यांतरंवक्तव्यमस्तीत्याशंक्याह॥एतावदिति॥तथापियत्रनिष्ठाकर्तव्यातद्व
च्यमित्याशंक्याह॥एषेति॥तथापिपरमानिष्ठाऽन्यास्तीतिचेन्नेत्याह॥एषेति॥निश्चितंश्रेयोन्यदस्तीत्याशंक्याह॥एतदिति॥तथापिकृतकृत्यतयामु
ख्यब्राह्मण्यसिध्यर्थं वक्तव्यांतरमस्तीत्याशंक्याह॥एतत्प्राप्येति॥किमस्यांप्रतिज्ञापरंपरायांनियामकमित्याशंक्याह॥एतदिति॥निरुपाधिकब्रह्मज्ञा

एतावत्स्वरूपेणकर्तव्यमेषानिष्ठाएषापरागतिरेतन्निश्रेयसमेतत्प्राप्यकृतकृत्योब्राह्मणोभवत्येतत्सर्ववेदानुशासनमिति॥११॥योयं
जनकयाज्ञवल्क्याख्यायिकायांव्याख्यातःआत्मासवैएषमहानजआत्माअन्नादःसर्वभूतस्थःसर्वान्नानामत्तावसुदानःवसुधनंसर्वप्राणि
कर्मफलंतस्यदाताप्राणिनांयथाकर्मफलेनयोजयितेत्यर्थःतमेतमजमन्नादंवसुदानमात्मानमन्नादवसुदानगुणाभ्यांयुक्तंयोवेदससर्व

सवाएषमहानजआत्मान्नादोवसुदानोविंदतेवसुयएवंवेद॥१२॥

भूतेष्वात्मभूतोअन्नमत्तिलभतेविंदतेवसुसर्वकर्मफलजातंलभतेसर्वात्मत्वादेवयएवंयथोक्तंवेदअथवादृष्टफलार्थिभिरप्येवंगुणउ
पास्यस्तेनान्नाद[illegible]सोऽश्नलब्धाद्दृष्टेनैवफलेनान्नात्त्वेनगोश्वादिनाचास्ययोगोभवतीत्यर्थः॥१२॥२३॥

नात्कैवल्यमितिगमयितुमिति
शब्दः॥२२॥[illegible]यकब्रह्मध्यानादभ्युदयंदर्शयति॥योयमित्यादिना॥ईश्वरश्चेत्प्राणिभ्यःकर्मफलंददातितर्हितस्यवैषम्यनैर्घृण्येस्याता
मित्याशंक्याह[illegible]णिनामिति॥उपास्यस्वरूपंदर्शयित्वातदुपासनंसफलंदर्शयति॥तमेतमिति॥सर्वात्मत्वफलमुपासनमुक्त्वापक्षांतरमाह॥अथ
वेति॥दृष्टंफलमन्नात्त्वंधनलाभश्च॥उक्तगुणकमीश्वरंध्यायतःफलमाह॥तेनेति॥तदेवफलंस्पष्टयति॥दृष्टेनेति॥अन्नात्त्वंदीप्ताग्नित्वं॥२३॥

बृ·स·
९०

निरुपाधिकब्रह्मज्ञानान्मुक्तिरुक्तासोपाधिकब्रह्मध्यानाच्चाभ्युदय उक्तस्तथाच किमुत्तरकंडिकयेत्याशंक्याह॥ इदानीमिति॥ अजत्वाच्चाविनाशीतिवक्तुं चशब्दः॥ कथं जन्मजराभावयोरमरत्वाविनाशित्वसाधकत्वं तदाह॥ योहीति॥ अयंत्वजत्वाच्चाविनाशी॥ अजरत्वाच्चामरोऽमरत्वाच्चाविनाशीति योजना॥ मरणायोग्यत्वमुपजीव्यमरणकार्यत्वाभावंदर्शयति॥ अतएवेति॥ जन्मापक्षयविनाशानामेवभावविकाराणामिहमुख्यत्वेनानिषेधाद्वृद्ध्या

इदानींसमस्तस्यैवारण्यकस्ययोर्थउक्तः ससमुच्चित्यास्यांकंडिकायांनिर्दिश्यते एतावान्समस्तारण्यकार्थइति सवाएषमहानजआत्मा अजरोनजीर्यतइतिनविपरिणमतइत्यर्थः॥ अमरोयस्माच्चाजरस्तस्मादमरोनम्रियतइत्यमरोयोहिजायतेजीर्यतेचसविनश्यतिम्रियतेच अयंत्वजत्वादजरत्वाच्चाविनाशीयतोतएवामृतोयस्मात्जनिप्रभृतिभिस्त्रिभिर्भावविकारैर्वर्जितस्तस्मादितरैरपिभावविकारैस्त्रिभिस्त

सवाएषमहानजआत्माजरोमरोमृतोभयोब्रह्म

त्कृतैश्चकामकर्ममोहादिभिर्मृत्युरूपैर्वर्जितइत्येतदभयोतएवयस्माच्चैवंपूर्वोक्तविशेषणस्तस्माद्भयवर्जितोभयंचनामाविद्याकार्यं तत्कार्यप्रतिषेधेनभावविकारप्रतिषेधेनचाविद्यायाःप्रतिषेधःसिद्धोवेदितव्यः अयमभयआत्मैवंगुणविशिष्टःकिमसौब्रह्मपरिवृढंनिरतिशयंमहदित्यर्थः॥ अभयंवैब्रह्म

दीनिविकारांतराण्यात्मनिभविष्यंतीतिविशेषनिषेधस्यशेषाभ्यनुज्ञापरत्वादित्याशंक्याह॥ यस्मादिति॥ इतरेसत्त्ववृद्धिपरिणामाः॥ अतएवाभयइत्युक्तंविवृणोति॥ यस्माच्चेति॥ किंतद्भयंतदाह॥ भयंचेति॥ अविद्यानिषेधिविशेषणाभावादात्मानंसासदास्यप्रतीत्याशंक्याह॥ तत्कार्येति॥ विशेषणांतरंप्रश्नपूर्वकमस्याप्यव्याकरोति॥ अभयइति॥ कथंपुनरभयगुणविशिष्टस्यात्मनोब्रह्मत्वंतदाह॥ अभय

अ·
६

श्री
ह
रामः
९०

वैशब्दार्थमाह॥प्रसिद्धमिति॥लोकशब्दःशास्त्रस्याप्युपलक्षणं॥वेद्यस्वरूपमुक्त्वाविद्याफलंकथयति॥यएवमिति॥कंडिकार्थमुपसंहरति॥एषइ
ति॥सृष्ट्यादेरपितदर्थत्वात्किमित्यसाविहनोपसंह्रियतेतत्राह॥एतस्येति॥सृष्ट्यादेरारोपितत्वेगमकमाह॥तदपोहेनेति॥तच्छब्दःसृष्ट्यादिप्रपंचवि
षयः॥तदपोहेनेतियदुक्तंतदेवस्फुटयति॥नेतीति॥अध्यारोपापवादन्यायेनतत्त्वस्यावेदितत्वादारोपितंभवत्येवसृष्ट्यादिद्वैतमित्यर्थः॥अध्यारोपाप

प्रसिद्धमेतल्लोकेऽभयंब्रह्मेतितस्माद्युक्तमेवंगुणविशिष्टःआत्माब्रह्मेतियएवंयथोक्तमात्मानमभयंब्रह्मवेदसोभयंहिवैब्रह्मभवतिएष
सर्वस्याउपनिषदःसंक्षिप्तोर्थउक्तएतस्यैवार्थस्यसम्यक्प्रबोधायोत्पत्तिस्थितिप्रलयादिकल्पनाक्रियाकारकफलाध्यारोपणाचात्मनि
कृतातदपोहेनचनेतिनेतीत्यध्यारोपितविशेषापनयद्वारेणपुनस्तत्त्वमावेदितंयथाएकप्रभृत्यापरार्धसंख्यास्वरूपपरिज्ञानायरेखा

भयंवैब्रह्माभयंहिवैब्रह्मभवतियएवंवेद॥७३॥ चतुर्थंब्राह्मणं ॥

ध्यारोपणंकृत्वाएकेयंरेखादशेयंशतेयंसहस्रेयमितिग्राहयतिअवगमयतिसंख्यास्वरूपंकेवलंनतुसंख्यापारेखात्मत्वमेव॥यथाचाका
रादीन्यक्षराणिविजिग्राहयिषुःपत्रमषिरेखादिसंयोगोपायमास्थायवर्णानांसतत्वमावेदयतिनपत्रमष्याद्यात्मतामक्षराणांग्राहयतित
थाचेहोत्पत्त्याद्यनेकोपायमास्थायैकंब्रह्मतत्त्वमावेदितं वादन्यायस्यपंकप्रक्षालनन्यायविरुद्धत्वात्तत्वंविवक्षितंचेत्तदेवोच्यतांकृतंसृ
ष्ट्यादिद्वैतारोपेणेत्याशंक्याह॥यथेति॥उदाहरणांतरमाह॥यथाचेति॥दृष्टांतद्वयमनूद्यदार्ष्टांतिकमाचष्टे॥तथाचेति॥इहेतिमोक्षशास्त्रोक्तिः॥
ई=स्थानंदशगुणंविद्यादृशदेशशतंतथा॥सहस्रमयुतंतस्मान्नियुतंप्रयुतंततः॥अर्बुदंन्यर्बुदंचैववृंदंचैवततःपरं॥खर्वंचैवनिखर्वंचशंखःपद्मस्तथैवच॥समुद्रोमध्यमंतश्च
परार्द्धंपरमेवच॥एवमष्टादशैतानिपदानिगणनाविधौ = ई

तथाकल्पितप्रपंचसंबंधप्रयुक्तंसविशेषत्वंब्रह्मणःस्यादित्याशंक्याह॥पुनरिति॥तस्मिन्नात्मनिकल्पितःसृष्ट्यादिरूपायस्तेनजनितोविशेषस्त
स्मिन्कारणत्वादिस्तस्यनिरासार्थमितियावत्॥तर्हिद्वैताभावविशिष्टंतत्वमितिचेन्नेत्याह॥तदुपसंहृतमिति॥परिशुद्धंभाववद्भावेनापिनसंस्पृष्टमि
त्यर्थः॥केवलमित्यद्वितीयोक्तिः॥सृष्ट्यादिवचनस्यगतिमुक्त्वाप्रकृतमुपसंहरति॥सफलमिति॥इतिशब्दःसंग्रहसमाप्त्यर्थोब्राह्मणसमाप्त्यर्थोवा॥
॥७३॥इतिषष्टेप्रपाठकेशारीरकब्राह्मणंचतुर्थं॥४॥समाप्तेशारीरकब्राह्मणेवंशब्राह्मणंव्याख्यातव्यंकृतंगतार्थेनमैत्रेयीब्राह्मणेनेत्याशंक्यमधुकांडा

पुनस्तत्कल्पितोपायजनितविशेषपरिशोधनार्थंनेतिनेतीतितत्वोपसंहारःकृतःतदुपसंहृतंपुनःपरिशुद्धंकेवलमेवसफलंज्ञानमंतेसां
कंडिकायामिति॥७३॥बृहदारण्यकेषष्ठाध्यायस्यशारीरकंचतुर्थंब्राह्मणं॥४॥आगमप्रधानेनमधुकांडेनब्रह्मतत्वंनिर्द्धारितंपुनस्तस्यैवो
पपत्तिप्रधानेनयाज्ञवल्कीयेनकांडेनपक्षप्रतिपक्षपरिग्रहंकृत्वाविगृह्यवादेनविचारितं॥शिष्याचार्यसंबंधेनचषष्ठेप्रश्नप्रतिवचनन्यायेन
सविस्तरंविचार्योपसंहृतमथेदानींनिगमनस्थानीयंमैत्रेयीब्राह्मणमारभ्यते॥अयंचन्यायोवाक्यकोविदैःपरिगृहीतोहेत्वपदेशात्प्रतिज्ञा
याः॥पुनर्वचनंनिगमनमितिअथवाआगमप्रधानेनमधुकांडेनयदमृतत्वसाधनंससंन्याससमात्मज्ञानमभिहितंतदेवतर्केणाप्यमृतत्वसा
धनंससंन्यासमात्मज्ञानमधिगम्यतेतर्कप्रधानंहियाज्ञवल्कीयंकांडंतस्माच्छास्त्रतर्काभ्यांनिश्चितमेतद्यदेतदात्मज्ञानंससंन्यासममृतत्वसा

र्थमनुद्रवति॥आगमेति॥पांचमिकमर्थमनुभाषते॥पुनरिति॥तस्यैवब्रह्मणस्तत्वमितिशेषः॥विगृह्यवादोजयपराजयप्रधानोजल्पन्यायः॥षष्ठप्र
तिष्ठापितमनुवदति॥शिष्येति॥प्रश्नप्रतिवचनन्यायस्तत्वनिर्णयप्रधानोवादः॥उपसंहृतंतदेवतत्वमितिशेषः॥संप्रत्युत्तरब्राह्मणस्यागतार्थत्वमाह॥
अथेति॥आगमोपपत्तिभ्यांनिश्चितेतत्वेनिगमनमकिंचित्करमित्याशंक्याह॥अयंचेति॥प्रकारांतरेणसंगतिमाह॥अथवेति॥कथमिहतर्केणाधिगतिस्त

इतिफलतीतिशेषः॥शास्त्रादिनायथोक्तस्यज्ञानस्यनिश्चितत्वेपिकिंसिध्यतित्तदाह॥तस्मात्कुद्धावद्भिरिति॥एतच्छब्दोयथोक्तज्ञानपरामर्शार्थः॥
इतिसिध्यतीतिशेषः॥तत्रहेतुमाह॥आगमेति॥अव्यभिचारान्मानयुक्तिगम्यस्यार्थस्यतथैवसत्वादितियावत्॥इतिशब्दोब्राह्मणसंग
तिसमाप्त्यर्थः॥तात्पर्यार्थेव्याख्यातेसत्यक्षरव्याख्यानप्रसक्तावाह॥अक्षराणांत्विति॥तर्हिब्राह्मणेऽस्मिन्वक्तव्याभावात्परिसमाप्तिरेवेत्या

तस्माच्छास्त्रश्रद्धावद्भिरमृतत्वप्रतिपित्सुभिरेतत्प्रतिपत्तव्यमितिआगमोपपत्तिभ्यांहिनिश्चितोर्थः श्रद्धेयोभवत्यव्यभिचारादिति॥
अक्षराणांतुचतुर्थेयथाव्याख्यातोर्थस्तथाप्रतिपत्तव्योत्रापियान्यक्षराण्यव्याख्यातानितानिव्याख्यास्यामः॥अथेतिहेतूपदेशानंतर्य
प्रदर्शनार्थौहेतुप्रधानानिहिवाक्यानिअतीतानितदनंतरमागमप्रधानेनप्रतिज्ञातोर्थोनिगम्यतेमैत्रेयीब्राह्मणेनहशब्दोवृत्तावद्यो

अथहयाज्ञवल्क्यस्यद्वेभार्येबभूवतुर्मैत्रेयीचकात्यायनीचतयोर्हमैत्रेयीब्रह्मवादिनीबभूवस्त्रीप्रज्ञैवतर्हिकात्यायन्यथ
हयाज्ञवल्क्योन्यद्वृत्तमुपाकरिष्यन्॥७४॥मैत्रेयीतिहोवाचयाज्ञवल्क्यः प्रव्रजिष्यन्वाअरेहमस्मात्स्थानादस्मिहंततेनया
कात्यायन्यांतंकरवाणीति॥७५॥

तकः॥याज्ञवल्क्यस्यऋषेः किलद्वेभार्येपत्न्यौबभूवतुरास्तांमैत्रेयीचनामतः एकापराकात्या
यनीनामतस्तयोर्भार्ययोर्मैत्रेयीहकिलब्रह्मवादिनीब्रह्मवदनशीलाबभूवआसीत्स्त्रीप्रज्ञास्त्रियांयोचितासास्त्रीप्रज्ञासैवयस्याः प्र
ज्ञागृहप्रयोजनान्वेषणासास्त्रीप्रज्ञाएवतर्हितस्मिन्कालेआसीत्कात्यायनीअथहैवंसति

शंक्याह॥यानीति॥ननुवाक्यानिपूर्वत्रव्याख्या
ताॅनिनहेतुरुपदिष्टस्तत्कथंतदुपदेशानंतर्यसंन्यासस्यामृतत्वहेतोरात्मज्ञानस्याथशब्देनद्योत्यतेतत्राह॥हेतुप्रधानानीति॥तदेवव्यनक्ति॥

भार्याद्वयेदर्शितरीत्यास्थिते स्वस्यचवैराग्यातिरेकेसतीतियावत्॥२॥तस्याःब्रह्मवादित्वंतदामंत्रणद्वारेणतांप्रत्येवंसंवादेहेतूकर्त्तव्यं॥तस्याःब्रह्म

हकिलयाज्ञवल्क्यःपूर्वस्माद्गार्हस्थ्यलक्षणाद्वृत्तादन्यत्पारिव्राज्यलक्षणंवृत्तमुपाकरिष्यन्नुपाचिकीर्षुःसन्हेमैत्रेयीतिज्येष्ठांभार्यामामं
त्रयामासआमंत्र्यचोवाचहप्रव्रजिष्यन्पारिव्राज्यंकरिष्यन्वैअरेमैत्रेयिअस्मात्स्थानाद्गार्हस्थ्यादहमस्मिभवामिमैत्रेय्यनुजानीहिमां
हंतेकुस्मियदितेःनयाकात्यायन्यांतंकरवाणीत्यादिव्याख्यातं॥२॥सैवमुक्तोवाचमैत्रेयीसर्वेयंपृथिवीवित्तेनपूर्णास्यान्नुकिंस्यांकि

साहोवाचमैत्रेयीयन्नुमइयंभगोःसर्वापृथिवीवित्तेनपूर्णास्यात्स्यान्न्वहंतेनामृताहो३नेतिनेतिहोवाचयाज्ञवल्क्योय
थैवोपकरणवतांजीवितंतथैवतेजीवितंस्यादमृतत्वस्यतुनाशास्तिवित्तेनेति॥७६॥साहोवाचमैत्रेयीयेनाहंनामृ—
तांस्यांकिमहंतेनकुर्यांयदेवभगवान्वेत्थतदेवमेविब्रूहीति॥७७॥सहोवाचयाज्ञवल्क्यःप्रियावैखलुनोभवतीसतीप्रिय
मवृधद्धंततर्हिभवत्येतद्व्याख्यास्यामितेव्याचक्षाणस्यतुमेनिदिध्यासस्वेति॥७८॥सहोवाचनवाअरेपत्युःकामायपतिः
प्रियोभवत्यात्मनस्तुकामायपतिःप्रियोभवतिनवाअरेजायायैकामायजायाप्रियाभवत्यात्मनस्तुकामायजायाप्रियाभवति
नवाअरेपुत्राणांकामायपुत्राः

महंवित्तसाध्येनकर्मणामृताआहोनस्यामितिनेतिहोवाचयाज्ञवल्क्यइत्यादिसमानमन्यत्॥४॥सहोवाच
प्रियैवपूर्वंखलुनोअस्मभ्यंभवतीभवंतीसतीप्रियमवृधद्वर्द्धितवतीनिर्धारितवत्यस्यतस्तुष्टोहंहंतेकुसिचेदमृतत्वसाधनंज्ञातुंहेभवतितेतुभ्यंतद
वादितंद्योतयितुमिच्छसियदीत्युक्तंमैत्रेयीत्वमृतत्वमात्रार्थितामात्मनोदर्शयति॥सैवमिति॥गुरुप्रसादाधीनाविद्याप्राप्तिरितिद्योतनार्थमाह॥सहोवाचेति

[illegible] ॥ ७९ ॥

अ॰ ६ ॥ [illegible] ॥ ७९ ॥

व्याख्यानप्रकारमेवाह॥आत्मनीति॥दृष्टेसर्वमिदंविदितंभवतीत्युत्तरत्रसंबंधः॥केनोपायेनात्मनिदृष्टेसर्वंदृष्टंभवतीत्युपायंपृच्छति॥कथमिति॥आ

आत्मनिखल्वरेमैत्रेयिदृष्टेकथंदृष्टआत्मनीत्युच्यते॥पूर्वमाचार्यागमाभ्यांश्रुतेपुनस्तर्केणोपपत्त्यामतेविचारितेश्रवणंत्वागममात्रेणमते

प्रियाभवंत्यात्मनस्तुकामायपुत्राःप्रियाभवंतिनवाअरेवित्तस्यकामायवित्तंप्रियंभवत्यात्मनस्तुकामायवित्तंप्रियंभवतिनवाअ
रेपशूनांकामायपशवःप्रियाभवंत्यात्मनस्तुकामायपशवःप्रियाभवंतिनवाअरेब्रह्मणःकामायब्रह्मप्रियंभवत्यात्मनस्तुकामा
यब्रह्मप्रियंभवतिनवाअरेक्षत्रस्यकामायक्षत्रंप्रियंभवत्यात्मनस्तुकामायक्षत्रंप्रियंभवतिनवाअरेलोकानांकामायलोकाःप्रि
याभवंत्यात्मनस्तुकामायलोकाःप्रियाभवंतिनवाअरेदेवानांकामायदेवाःप्रियाभवंत्यात्मनस्तुकामायदेवाःप्रियाभवंतिनवाअरे
वेदानांकामायवेदाःप्रियाभवंत्यात्मनस्तुकामायवेदाःप्रियाभवंतिनवाअरेभूतानांकामायभूतानिप्रियाणिभवंत्यात्मनस्तुकामा
यभूतानिप्रियाणिभवंतिनवाअरेसर्वस्यकामायसर्वंप्रियंभवत्यात्मनस्तुकामायसर्वंप्रियंभवत्यात्मावारेद्रष्टव्यःश्रोतव्योमंतव्यो
निदिध्यासितव्योमैत्रेय्यात्मनिखल्वरेदृष्टेश्रुतेमतेविज्ञातइदंसर्वंविदितं॥७९॥ब्रह्मतंपरादाद्योन्यत्रात्मनोब्रह्मवेदक्षत्रंतंप
रादाद्योन्यत्रात्मनः

उपपत्त्यापश्चाद्विज्ञातेएवमेतन्नान्यथेतिनिर्धारितेकिंभवतीत्युच्यतेइदंसर्वंविदितंभवतीदंसर्वमितियदात्म
नोन्यदात्मव्यतिरेकेणाभावात्॥७९॥

त्मदर्शनोपायंश्रवणादिकंदर्शयन्नुत्तरमाह॥उच्यतेइति॥उक्तोपायफलंप्रश्नपूर्वकमाह॥किमित्यादिना
॥इदंसर्वमित्यनूद्यतस्यार्थमाह॥यदात्मनोन्यदिति॥तदात्मनिदृष्टेदृष्टंस्यादितिशेषः कथमन्यस्मिन्दृष्टेऽन्यस्यदृष्टंभवतितत्राह॥आत्मव्यतिरेकेणेति

॥१८॥

स यथार्द्रैधाग्नेरित्यादाविष्टं हुतमित्याद्यधिकं दृष्टं तस्यार्थमाह ॥ चतुर्थ इति ॥ सामर्थ्यादर्थशून्यस्य शब्दस्यानुपपत्तेरित्यर्थः ॥ ॥ ॥ ॥ ॥

चतुर्थे शब्दनिश्वासेनैव लोकाद्यर्थनिश्वासः सामर्थ्यादुक्तो भवतीति पृथङ्नोक्तः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

स्तत्रं वेद लोकास्तं परादुर्योन्यत्रात्मनो लोकान्वेद देवास्तं परादुर्योन्यत्रात्मनो देवान्वेद वेदास्तं परादुर्योन्यत्रात्मनो वेदान्वेद भूतानि तं परादुर्योन्यत्रात्मनो भूतानि वेद सर्वं तं परादाद्योन्यत्रात्मनः सर्वं वेदेदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमे वेदा इमानि भूतानीदꣳ सर्वं यदयमात्मा ॥ ८० ॥ स यथा दुंदुभेर्हन्यमानस्य न बाह्याꣳछब्दाꣳछक्नुयाद्ग्रहणाय दुंदुभेस्तु ग्रहणेन दुंदुभ्याघातस्य वा शब्दो गृहीतः ॥ ८१ ॥ स यथा शंखस्य ध्मायमानस्य न बाह्याꣳछब्दाꣳछक्नुयाद्ग्रहणाय शंखस्य तु ग्रहणेन शंखध्मस्य वा शब्दो गृहीतः ॥ ८२ ॥ स यथा वीणायै वाद्यमानायै न बाह्याꣳछब्दाꣳछक्नुयाद्ग्रहणाय वीणायै तु ग्रहणेन वीणावादस्य वा शब्दो गृहीतः ॥ ८३ ॥ स यथार्द्रैधाग्नेरभ्याहितस्य पृथग्धूमा विनिश्चरंत्येवं वा अरेऽस्य महतो भूतस्य निश्वसितमेवैतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वांगिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानीष्टꣳ हुतमाशितं पायितमयं च लोकः परश्च लोकः सर्वाणि च भूतान्यस्यैवैतानि सर्वाणि निश्वसितानि ॥ ८४ ॥ स यथा सर्वासामपाꣳ समुद्र एकायनमेवꣳ सर्वेषाꣳ स्पर्शानां त्वगेकायनमेवꣳ सर्वेषाꣳ रसानां जिव्हैकायनमेवꣳ सर्वेषां गंधानां नासिके एकायनमेवꣳ सर्वेषां रूपाणां चक्षुरेकायनमेवꣳ सर्वेषाꣳ शब्दानाꣳ श्रोत्रमेकायनमेवꣳ सर्वेषाꣳ संकल्पानां मन एकायनमेवꣳ सर्वासां विद्यानाꣳ हृदयमेकायनमेवꣳ सर्वेषां कर्मणाꣳ हस्तावेकायनमेवꣳ सर्वेषामानंदानामुपस्थ एकायनमेवꣳ सर्वेषां विसर्गाणां पायुरेकायनमेवꣳ सर्वेषामध्वनां पादावेकाय

=इष्टं इष्टनिमित्तं धर्मजातं ॥ हुतं होमनिमित्तं धर्मजातं ॥ अशितमन्नदाननिमित्तं ॥ पायितं पेयदाननिमित्तं ॥ ५=

नन्वत्रापिसामर्थ्याविशेषात्पृथगुक्तिरयुक्तेत्याशंक्याह ॥ इहत्विति ॥ ८५ ॥ सयथासैंधवघनइत्यादिवाक्यतात्पर्यमाह ॥ सर्वकार्येति ॥ एतेभ्योभूतेभ्य

इहतुसर्वशास्त्रार्थोपसंहारइतिकृत्वार्थप्राप्तोप्यर्थः स्पष्टीकर्तव्यइतिपृथगुच्यते ॥ ८५ ॥ सर्वकार्यप्रलयेविद्यानिमित्तेसैंधवघनवदनंत
रोऽबाह्यः कृत्स्नः प्रज्ञानघनएकआत्मावतिष्ठतेनेतरत् ॥ पूर्वंतुभूतमात्रासंसर्गविशेषाल्लब्धविशेषविज्ञानस्तस्मिन्प्रविलापितेविद्य
याविशेषविज्ञानेतन्निमित्तेचभूतसंसर्गेनप्रेत्यसंज्ञास्तीत्येवंयाज्ञवल्क्येनोक्तासाहोवाच ॥ अत्रैवमाभगवानेतस्मिन्नेववस्तुनिप्रज्ञा
नघनएव ॥ नप्रेत्यसंज्ञास्तीतिमोहांतंमोहमध्यमापीपिपदापीपदद्वगमितवानसिसंमोहितवानसीत्यर्थः ॥ अतोनवैअहमिममात्मा

सयथासैंधवघनोनंतरोबाह्यः कृत्स्नोरसघनएवैवंवाअरेयमात्मानंतरोबाह्यः कृत्स्नः प्रज्ञानघनएवैतेभ्योभूतेभ्यः समु
त्थायतान्येवानुविनश्यतिनप्रेत्यसंज्ञास्तीत्यरेब्रवीमीतिहोवाचयाज्ञवल्क्यः ॥ ८६ ॥ साहोवाचमैत्रेय्यत्रैवमाभगवान्मोहां
तमापीपिपन्नवाअहमिमंविजानामीतिसहोवाचनवाअरेहंमोहंब्रवीम्यविनाशीवाअरेयमात्मानुच्छित्तिधर्मा ॥ ८७ ॥

नमुक्तलक्षणंविजानामिविवेकतइतिसहोवाचनाहंमोहंब्रवीम्यविनाशीवाअरेअयमात्मायतः विनष्टुंशीलमस्येतिविनाशीनविनाशी
अविनाशीविनाशशब्देनविक्रियाअविनाशीत्यविक्रियआत्मेत्यर्थः ॥ अरेमैत्रेय्ययमात्माप्रकृतोऽनुच्छित्तिधर्माउच्छित्तिरुच्छेदः उच्छेदोंतो
विनाशः उच्छित्तिर्धर्मोऽस्येतिउच्छित्तिधर्मानउच्छित्तिधर्माअनुच्छित्तिधर्मानापिविक्रियालक्षणोऽन्योप्युच्छेदलक्षणोविनाशोस्यविद्यतइत्यर्थः ॥

इत्यादेरर्थमाह ॥ पूर्वंत्विति ॥ ज्ञानोदयात्प्रागवस्थायामित्यर्थः ॥ लब्धविशेषविज्ञानः सन्व्यवहरतीतिशेषः ॥ प्रविलापितेतस्येत्यध्याहारः ॥ ८६ ॥ पूर्वंत्त

प्रत्यध्यायमन्यथाप्रतिपादनादात्मनः सविशेषत्वमाशंक्य स एष इत्यादेस्तात्पर्यमाह ॥ चतुर्थेपीति ॥ केन प्रकारेण तस्य तुल्यत्वमित्याशंक्याह ॥ परं ब्र
ह्मेति ॥ अध्यायभेदस्तर्हि कथमित्याशंक्याह ॥ उपायेति ॥ उपायभेदेप्युपेयभेदोपि स्यादित्याशंक्याह ॥ उपेयस्त्विति ॥ चातुर्थिकाद्दर्शितांचमिकस्या
र्थस्य भेदं व्यावर्त्तयति ॥ स एवेति ॥ प्राणपणोपन्यासेन मूर्द्धा ते विपतिष्यतीति मूर्धपातोपन्यासात्प्राणःपणत्वेन गृहीत इति गम्यते तेन शाकल्यब्राह्म
णेन निर्विशेषः प्रत्यगात्मा निर्धारित इत्यर्थः ॥ विज्ञानमानंदं ब्रह्मेत्यादावुक्तं स्मारयति ॥ पुनरिति ॥ पंचमसमाप्तौ पुनर्विज्ञानमित्यादिना स एव निर्धारि

चतुर्थेपि प्रपाठके षेक आत्मा तुल्यो निर्धारितः परं ब्रह्म ॥ उपायविशेषस्तु तस्याधिगमे ऽन्यश्चान्यश्चोपेयस्तु स एवात्मा यश्चतुर्थे अथात
आदेशो नेति नेतीति निर्दिष्टः स एव पंचमे प्राणपणोपन्यासेन शाकल्ययाज्ञवल्क्यसंवादेन निर्धारितः पुनः पंचमसमाप्तौ पुनर्जनक
याज्ञवल्क्यसंवादे पुनरिहोपनिषत्समाप्तौ चतुर्णामपि प्रपाठकानामेतदात्मनिष्ठता नान्योंतराले कश्चिदपि विवक्षितोर्थ इत्येतत्प्रद
र्शनाय ांते उपसंहारः स एष नेति नेत्यादिर्यस्मात्प्रकारशतेनापि निरूप्यमाणे तत्त्वे नेति नेत्यात्मैव निष्ठा नान्योपलभ्यते तर्केण वा
आगमेन वा तस्मादेतदेवामृतत्वसाधनं यदेतन्नेति नेत्यात्मपरिज्ञानं सर्वसंन्यासश्चेत्येतमर्थमुपसंजिहीर्षन्नाह एतावदेता
वन्मात्रं यदेतन्नेति नेत्यद्वैतात्मदर्शनमिदं च अन्यसहकारिकारणनिरपेक्षमेवारे मैत्रेय्यमृतत्वसाधनं ॥ ॥ ॥ ॥

त इति योजना ॥ कूर्चब्राह्मणादावपि स एवोक्त इत्याह ॥ पुनर्जनकेति ॥ अस्मिन्नपि ब्राह्मणे स एवोक्त इत्याह ॥ पुनरिहेति ॥ किमिति पूर्वत्र त
त्र तत्रोक्तस्य निर्विशेषस्यात्मनोवसाने वचनमित्याशंक्याह ॥ चतुर्णामपीति ॥ पौर्वापर्यपर्यालोचनायामुपनिषदर्थो निर्विशेषमात्मतत्त्वमि
त्युपपाद्य वाक्यांतरमवतार्य व्याकरोति ॥ यस्मादित्यादिना ॥ इति होक्त्वेत्यादिवाक्यमाकांक्षापूर्वकमादाय व्याचष्टे ॥ ॥ ॥

यत्रत्वस्यसीत्यादिना॥ब्राह्मणार्थमुपसंहरति॥परिसमाप्तेति॥तथाप्युपदेशांतरंकर्तव्यमस्तीत्याशंक्याह॥एतावानिति॥किमत्रप्रमाणमिति
तदाह॥एतदिति॥तथापिपरमानिष्ठासंन्यासिनोवक्तव्येतिचेन्नेत्याह॥एषेति॥आत्मज्ञानेससंन्यासेसत्यपिपुरुषार्थांतरंकर्तव्यमस्तीत्याशं

यत्रत्वस्यसियदेवभगवान्वेत्थतदेवमेविब्रूह्यमृतत्वसाधनमितितदेतावदेवेतिज्ञेयंत्वयाइतिहएवंकिलामृतत्वसाधन
मात्मज्ञानंप्रियायैभार्यायैउक्त्वायाज्ञवल्क्यःकिंकृतवान्यत्पूर्वंप्रतिज्ञातंप्रव्रजिष्यन्नस्मीतितच्चकारविजहारप्रव्रजितवानि

यत्रहिद्वैतमिवभवतितदितरइतरंपश्यतितदितरइतरंजिघ्रतितदितरइतरꣳरसयतेतदितरइतरमभिवदतित
दितरइतरꣳशृणोतितदितरइतरंमनुतेतदितरइतरꣳस्पृशतितदितरइतरंविजानातियत्रत्वस्यसर्वमात्मैवाभूत्तत्केन
कंपश्येत्तत्केनकंजिघ्रेत्तत्केनकꣳरसयेत्तत्केनकमभिवदेत्तत्केनकꣳशृणुयात्तत्केनकंमन्वीततत्केनकꣳस्पृशेत्तत्केनकंवि
जानीयाद्येनेदꣳसर्वंविजानातितंकेनविजानीयात्सएषनेतिनेत्यात्माऽगृह्योनहिगृह्यतेऽशीर्योनहिशीर्यतेऽसंगोनहिसज्य
तेऽसितोनव्यथतेनरिष्यतिविज्ञातारमरेकेनविजानीयादित्युक्तानुशासनासिमैत्रेय्येतावदरेखल्वमृतत्वमितिहोक्त्वाया
ज्ञवल्क्योविजहार॥१८॥पंचमंब्राह्मणं समाप्तं॥

त्यर्थः॥परिसमाप्ताब्रह्मविद्यासंन्यासपर्यवसानाएतावाननुपदेशएतद्वैदान
शासनमेषापरमानिष्ठाएषपुरुषार्थःकर्तव्यतांतइति॥१८॥१५॥इदानींविचार्यतेशास्त्रार्थ क्याह॥एषइति॥इतिशब्दोब्राह्मणसमाप्त्य
र्थः॥१५॥ससंन्यासमात्मज्ञानममृतत्वसाधनमित्युपपाद्यसंन्यासमधिकृत्यविचारमवतारयति॥इदानीमिति॥तत्रतत्रप्रागेवविचारितत्वात्किंपु

विरक्तस्य संन्यासो ज्ञानस्यांतरंगसाधनं ज्ञानं तु केवलममृतत्वस्येति शास्त्रार्थविवेकरूपा प्रतिपत्तिरपि प्रागेव सिद्धेति किं तदर्थेन विचारारंभेणेत्याशंक्याह॥ यत इति॥ अतो विचारः कर्त्तव्यो नान्यथा शास्त्रार्थविवेकः स्यादित्युपसंहारार्थो हिशब्दः॥ वाक्यानामाकुलत्वमेव दर्शयति॥ यावदिति॥ अग्निहोत्रमित्यादीनीत्यादिशब्दादेकाश्रम्यं त्वाचार्याः प्रत्यक्षविधानाद्गार्हस्थ्यस्येत्यादिस्मृतिवाक्यं गृह्यते॥ कथमेतावता वाक्यानि व्याकुलानीत्याशंक्याह॥ अन्यानि चेति॥ विदित्वा व्युत्थाय भिक्षाचर्यं चरंतीति वाक्यं पाठक्रमेण विद्वत्संन्यासपरं अर्थक्रमेण तु विविदिषासंन्या

विवेकप्रतिपत्तये यत्न आकुलानि हि वाक्यानि दृश्यंते यावज्जीवमग्निहोत्रं जुहुयाद्यावज्जीवं दर्शपूर्णमासाभ्यां यजेत॥ कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः एतद्वै जरामर्यं सत्रं यदग्निहोत्रमित्यादीन्यैकाश्रम्यज्ञापकानि अन्यानि च आश्रमांतरप्रतिपादकानि वाक्यानि विदित्वा व्युत्थाय प्रव्रजंति आत्मानमेव लोकमिच्छंतः प्रव्रजंति॥ ब्रह्मचर्यं समाप्य गृही भवेद्गृहाद्वनी भूत्वा प्रव्रजेत्॥ यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वनाद्वेति द्वावेव पंथानावनुनिष्क्रांततरौ भवतः॥ क्रियापथश्चैव पुरस्तात्संन्यासश्च तयोः संन्यास एवातिरेचयतीति न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुरित्यादीनि तथा स्मृतयश्च ब्रह्मचर्यवान् प्रव्रजति अविशीर्णब्रह्मचर्यो यमिच्छेत्तमावसे

सपरं॥ आत्मानमेव लोकमिच्छंतः प्रव्रजंतीति तु विविदिषासंन्यासपरमिति विभागः क्रमसंन्यासपरां श्रुतिमुदाहरति॥ ब्रह्मचर्यमिति॥ अक्रमसंन्यासविषयं वाक्यं पठति॥ यदि वेति॥ कर्मसंन्यासयोः संन्यासस्याधिक्यप्रदर्शनपरां श्रुतिं दर्शयति॥ द्वावेवेति॥ अनुनिष्क्रांततरौ शास्त्रक्रमेणाभ्युदयनिःश्रेयसोपायत्वेन पुनः पुनरुक्तावित्यर्थः॥ ज्ञानद्वारा संन्यासस्य मोक्षोपायत्वे श्रुत्यंतरमाह॥ न कर्मणेति॥ तानि वा एतान्यवराणि तपांसि न्यास एवात्यरेचयदित्यादिवाक्यमादिशब्दार्थः॥ यथा श्रुतयस्तथा स्मृतयोऽपि व्याकुला दृश्यंत इत्याह॥ तथेति॥ तत्राक्रमसंन्यासे स्मृतिमाद्यामुदाहरति॥ ब्रह्मचर्यवानिति॥ प

आश्रमविकल्पविषयांस्मृतिंपठति॥तस्येति॥ब्रह्मचारीषक्ष्यर्थः॥क्रमसंन्यासेप्रमाणमाह॥तथेति॥तत्रैववाक्यांतरंपठति॥प्राजापत्यामिति॥स
र्ववेदसंसर्वस्वंदक्षिणायस्यांतांनिर्वर्त्येत्यर्थः॥आदिपदेनमुंडानिस्तंतवश्चेत्यादिवाक्यंगृह्यतेइत्याद्यास्मृतयश्चेतिपूर्वेणसंबंधः॥व्याकुलानिवाक्या
निदर्शितान्युपसंहरति॥एवमिति॥इतश्चकर्तव्योविचारइतआह॥आचारश्चेति॥श्रुतिस्मृतिविदामाचारःसविरुद्धोलक्ष्यते॥केचिद्ब्रह्मचर्यादेवप्र
व्रजेति॥अपरेतसरिस्समाप्यगार्हस्थ्यमेवाचरंतिअन्येतुचतुरोप्याश्रमान्क्रमेणाश्रयंते॥तथाचविनाविचारंनिर्णयासिद्धिरित्यर्थः॥इतश्चास्ति

तस्याश्रमविकल्पमेकेब्रुवतेतथा॥वेदानधीत्यब्रह्मचर्येणपुत्रपौत्रानिच्छेत्पावनार्थंपितॄणां॥अग्नीनाधायविधिवच्चेष्टयज्ञोवनंप्र
विश्याथमुनिर्बुभूषेत्॥प्राजापत्यांनिरूप्येष्टिंसर्ववेदसदक्षिणां॥आत्मन्यग्नीन्समारोप्यब्राह्मणःप्रव्रजेद्गृहादित्याद्याः॥एवंव्युत्था
नविकल्पक्रमयथेष्टाश्रमप्रतिपत्तिपादकानिहिश्रुतिस्मृतिवाक्यानिशतशउपलभ्यंतेइतरेतरविरुद्धानि॥आचारश्चतद्विदांवि
प्रतिपत्तिश्चशास्त्रार्थप्रतिपत्तॄणांबहुविदामपिअतोनशक्यतेशास्त्रार्थोमंदबुद्धिभिर्विवेकेनप्रतिपत्तुंपरिनिष्ठितशास्त्रन्यायबु
द्धिभिरेवह्येषांवाक्यानांविषयविभागःशक्यतेऽवधारयितुंतस्मादेषांविषयविभागज्ञापनाययथाबुद्धिसामर्थ्यंविचारयिष्यामःयाव
ज्जीवश्रुत्यादिवाक्यानामन्यार्थासंभवात्क्रियावसानएववेदार्थः

विचारस्यकार्यतेत्याह॥विप्रतिपत्तिश्चेति॥यद्यपिबहुविदःशास्त्रार्थप्र
तिपत्तारोजैमिनिप्रभृतयस्तथापितेषांविप्रतिपत्तिरुपलभ्यते॥केचिदूर्द्ध्वरेतसआश्रमाःसंतीत्याहुर्नसंतीत्यपरेतत्कुतोविचारादृतेनिश्चय
सिद्धिरित्यर्थः॥अथकेषांचिदंतरेणापिविचारंशास्त्रार्थोविवेकेनप्रतिभास्यतितत्राह॥अतइति॥श्रुतिस्मृत्याचारविप्रतिपत्तेरितियावत्॥केस्तर्हि
शास्त्रार्थोविवेकेनज्ञातुंशक्यतेतत्राह॥परिनिष्ठितेति॥नानाश्रुतिदर्शनादिवशादुपपादितंविचारारंभमुपसंहरति॥तस्मादिति॥विचारकर्तव्यतामु

श्रुत्यादिशब्देनकुर्वन्नित्यादिमंत्रवादोगृह्यते॥ऐकाश्रम्येहेत्वंतरमाह॥तमिति॥एतद्वैजरामर्यंसत्रंयदग्निहोत्रमितिश्रुतेश्चपारिव्राज्यासि
द्धिरित्याह॥जरेति॥तत्रैवहेत्वंतरमाह॥लिंगाच्चेति॥पारिव्राज्यपक्षेपितदुपपत्तिमाशंक्याह॥नहीति॥इतश्चनास्तिपारिव्राज्यमित्याह॥स्मृ
तिश्चेति॥तस्यास्तात्पर्यमाह॥समंत्रकंहीति॥नान्यस्यकस्यचिदित्यत्रसूचितमर्थंकथयति॥स्मृत्यधिकारेति॥गृहस्थस्यपारिव्राज्याभावेहेत्वंत

तंयज्ञपात्रैर्दहंतीत्यंतकर्मश्रवणाज्जरामर्यश्रवणाच्चलिंगाच्चभस्मांतंशरीरमितिनहिपारिव्राज्यपक्षेभस्मांतताशरीरस्यस्यात्स्मृति
श्चनिषेकादिश्मशानांतोमंत्रैर्यस्योदितोविधिःतस्यशास्त्रेधिकारोस्मिन्ज्ञेयोनान्यस्यकस्यचिदिति॥समंत्रकंहियत्कर्मवेदेनेहविधी
यतेतस्यश्मशानांततांदर्शयतिस्मृत्यधिकाराभावप्रदर्शनाच्चास्यंतमेवश्रुत्यधिकाराभावोऽकर्मिणोगम्यतेअग्न्युद्वासनापवादाच्चवी
रहावाएषदेवानांयोग्निमुद्वासयतइति॥ननुव्युत्थानादिविधानाद्वैकल्पिकक्रियावसानत्वंवेदार्थस्यनान्यार्थत्वाद्व्युत्थानादिश्रुती
नांयावज्जीवमग्निहोत्रंजुहोतियावज्जीवंदर्शपूर्णमासाभ्यांयजेतेत्येवमादीनांश्रुतीनांजीवनमात्रनिमित्तत्वाद्युदानशक्यतेन्या
र्थताकल्पयितुंतदाव्युत्थानादिवाक्यानांकर्मानधिकृतविषयत्वसंभवात्कुर्वन्नेवेहकर्माणिजिजीविषेच्छतंसमाइतिचमंत्रवर्णाज्जर
यावाह्येवास्मान्मुच्यतेमृत्युनावेतिचजरामृत्युभ्यामन्यत्रकर्मवियोगच्छिद्रासंभवात्कर्मिणांश्मशानांतत्व रमाह॥अग्नीतिपूर्वपक्ष
माक्षिपति॥नन्विति॥उभयविधिदर्शनेषोडशीग्रहणाग्रहणवदधिकारिभेदेनविकल्पोयुक्तोनतुक्रियावसानएववेदार्थइतिपक्षपातेनिबंध
नमस्तीत्यर्थः॥तुल्यविधिद्वयदर्शनेहिविकल्पोभवत्यत्रतुसावकाशानवकाशत्वेनातुल्यत्वान्नैवमित्याह॥नान्यार्थत्वादिति॥तदेवस्फुटयति
॥यावज्जीवमित्यादिना॥कर्मानधिकृतविषयत्वान्नवैकल्पिकमितिसंबंधःक्रियावसानत्वंवेदार्थस्येतिशेषः॥तत्रैवहेत्वंतरमाह॥कुर्वन्नित्यादि

नैष्कल्पिकमित्यत्र पूर्ववदन्वयः॥ व्युत्थानादिवाक्यानां कथमनधिकृतविषयत्वमत आह॥ काणेति॥ अनधिकृतविषयत्वं तेषामशक्यं वक्तुं ब्र
ह्मचर्यसमाप्त्येत्यादावधिकृतविषयेक्रमदर्शनादिति शंकते॥ पारिव्राज्येति॥ गत्यंतरं दर्शयन्नुत्तरमाह॥ नविश्वजिदिति॥ यावज्जीवमग्निहोत्रं जु
होतीत्युत्सर्गः॥ तस्यापवादो विश्वजित्सर्वमेधौ तदनुष्ठाने सर्वस्वदानादेव साधनसंपद्विरहात्पारिव्राज्यस्यावश्यंभावित्वात्तत्स्तद्विषयं क्रमविधान
मित्यर्थः॥ तदेव स्फुटयति॥ यावज्जीवेति॥ कथं क्रमविधेरेवं विषयत्वं कल्पकाभावादित्याशंक्याह॥ विरोधानुपपत्तेरिति॥ गृहस्थस्यापि विरक्तस्य

नवैकल्पिकं काणकुब्जादयोपि कर्मण्यनधिकृता अनुग्राह्या एव श्रुत्येति व्युत्थानाद्याश्रमांतरविधानं नानुपपन्नं पारिव्राज्यक्रमवि
धानस्यानवकाशत्वमिति चेन्न॥ विश्वजित्सर्वमेधयोर्यावज्जीवविध्यपवादत्वात् यावज्जीवाग्निहोत्रादिविधेर्विश्वजित्सर्वमेधयोरेवाप
वादस्तत्र च क्रमप्रतिपत्तिसंभवात् ब्रह्मचर्यं समाप्य गृही भवेद्गृहाद्वनी भूत्वा प्रव्रजेदिति विरोधानुपपत्तेर्न ह्येवं विषयत्वे पारि
व्राज्यक्रमविधानवाक्यस्य कश्चिद्विरोधः क्रमप्रतिपत्तेरन्यविषयपरिकल्पनायां तु यावज्जीवविधानश्रुतिः स्वविषयात्संकोचि
ता स्यात् क्रमप्रतिपत्तेस्तु विश्वजित्सर्वमेधविषयत्वान्न कश्चिद्बाधः नात्मज्ञानस्यामृतत्वहेतुत्वाभ्युपगमाद्यत्तावदात्मेत्येवोपासीते
त्यारभ्य स एष नेति नेत्येतदंतेन ग्रंथेन यदुपसंहृतमात्मज्ञानं तदमृतत्वसाधनमित्यभ्युपगतं भवता॥ पारिव्राज्यमिति किमिति क्रम
विषयो नेष्यते तत्राह॥ अन्यविषयेति॥ क्रमविधेरपित्वपक्षे संकोचः स्यादित्याशंक्याह॥ क्रमप्रतिपत्तेस्त्विति॥ सति ज्ञाने कर्मत्यागो निषिध्यते
सत्यां वा विधेर्जिज्ञासायामिति विकल्प्याद्यं दूषयति सिद्धांती॥ नात्मज्ञानस्येति॥ विद्वत्संन्यासस्यावश्यंभावित्वान्न कर्मावसान एव वेदार्थ इति॥ सं
गृहीतं वस्तु विवृणोति॥ यत्तावदिति॥ विद्यासूत्रादारभ्य निषेधवाक्यांतेन ग्रंथेन यदात्मज्ञानमुपसंहृतं तत्तावन्मुक्तिसाधनमिति भवतापि यस्मा

अन्यज्ज्ञानं परस्यांगं=१

रू·र· ९७

दुपगतं परांगं चात्मविज्ञानादन्यत्रेत्यवधारणादिति न्यायात्तस्माज्ज्ञाने सति कर्मानुष्ठानं निरवकाशमित्यर्थः॥ अथात्मज्ञानं कर्मसहितममृतत्वसाधनमिष्यते न केवलं तथा च ज्ञानोत्तरकालमपि न कर्मत्यागसिद्धिरिति शंकते॥ तन्नेति॥ आत्मज्ञानस्यामृतत्वसाधनत्वे सत्यपीति यावत्॥ कर्मनिरपेक्षत्वं चेतदात्मज्ञानस्य भवान्न सहते किमिति तर्हि ज्ञानमेवोपगतमिति सिद्धांती पृच्छति॥ तन्नेति॥ तस्य कर्मानपेक्षत्वानंगीकारे सतीत्यर्थः॥ तत्र पूर्ववादी शास्त्रीयत्वादात्मज्ञानममृतत्वसाधनमभ्युपगतमिति शंकते॥ शृण्विति॥ ज्ञापयतिवेदइतिशेषः॥ शास्त्रानुसारेणात्मज्ञानांगीकारे कर्मनिरपेक्षमेवात्मज्ञा

तन्नैतावदमृतत्वसाधनमन्यनिरपेक्षमित्युक्तं तन्न मृष्यते तत्रभवं तं पृच्छामि किमर्थमात्मज्ञानं मर्षयति भवानिति शृणु तत्र कारणं यथा स्वर्गकामस्य स्वर्गप्राप्त्युपायमजानतोऽग्निहोत्रादि स्वर्गप्राप्तिसाधनं ज्ञापयति तथेहाप्यमृतत्वप्रतिपित्सोरमृतत्वप्राप्त्युपायमजानतो यदेव भगवान्वेत्थ तदेव मे विब्रूहीत्येवमाकांक्षितममृतत्वसाधनमेतावदरे इत्येवमादौ वेदेन ज्ञाप्यते इत्येवं तर्हि यथा ज्ञापितं अग्निहोत्रादि स्वर्गसाधनमभ्युपगम्यते तथेहाप्यात्मज्ञानं यथा ज्ञाप्यते तत्तथाभूतमेवामृतत्वसाधनमात्मज्ञानमभ्युपगंतुं युक्तं तुल्यप्रामाण्यादुभयत्र यद्येवं किं स्यात्॥ सर्वकर्महेतूपमर्दकत्वादात्मज्ञानस्य विरोधाद्धि वेकर्मनिवृत्तिः स्यात् द्वाराग्निसंबद्धानां तावदग्निहोत्रादिकर्मणां भेदबुद्धिविषयसंप्रदानकारकसाध्यत्वमन्यबुद्धिपरिच्छेद्याह्यग्निदेवतासंप्रदानकारकभूतामंतरेण न हि तत्कर्म निर्वर्त्यते यथाहि नेमोऽस्य साधनं सेत्स्यतीति परिहरति॥ एवं

तर्हीति॥ उभयत्र ज्ञाने कर्मणि चेत्यर्थः॥ यद्यप्येवं॥ ज्ञानस्यामृतत्वसाधनत्वे तस्य कर्मनिरपेक्षत्वे चेत्यर्थः॥ तुल्यप्रामाण्यात्प्रामाण्यस्य तुल्यत्वाद्वेदस्येति शेषः॥ यथा शास्त्रं ज्ञानाभ्युपगमेपि कथं तत्केवलं केवल्यकारणमिति पृच्छति॥ यद्येवमिति॥ शास्त्रानुसारेण ज्ञानमभ्युपगच्छं तं प्रत्याह॥ सर्वकर्मेति॥ आत्मज्ञानस्य तदुपमर्दकत्वं दर्शयितुं कर्महेतुं तावद्दर्शयति॥ द्वाराग्नीति॥ अग्निहोत्रादीनां संप्रदानकारकसाध्यत्वं व्यतिरेकद्वारा साधयति॥ अन्येति॥ तथापि कथमात्मज्ञानस्य

विद्यायाःश्रुतिजन्यत्वेनबलवत्त्वंदर्शयति॥अन्योसावित्यादिना॥ननुशुचौदेशेदिवसादौकालेशास्त्राचार्यादिवशादुत्पन्नंज्ञानंप्रमर्थ्यसाधनंशुचौदेशे
प्रतिष्ठाप्येत्यादिस्मृतेस्तथाचकथंतस्यभेदबुध्युपमर्दकत्वमतआह॥नचेति॥यत्रैकाग्रतातत्राविशेषादितिन्यायाज्ज्ञानसाधनस्यसमाधेरपिनदेशाद्यपे
क्षावृत्तस्तुकूटस्थवस्तुतंत्रज्ञानस्येतिभावः॥विमतंदेशाद्यपेक्षंशास्त्रार्थत्वाद्धर्मवदित्याशंक्यपुरुषतंत्रत्वमुपाधिरित्याह॥क्रियावस्त्विति॥सा
धनव्याप्तिंदूषयति॥ज्ञानंत्विति॥विमतंनदेशाद्यपेक्षंप्रमाणत्वादुत्साग्निज्ञानवदितिप्रत्यनुमानमित्याह॥यथेति॥आत्मज्ञानस्यसर्वकर्महेतूपमर्दक

संप्रदानकारकबुध्यासंप्रदानकारकंकर्मसाधनत्वेनोपदिश्यतेसेहविद्ययानिवर्त्यते॥अन्योसावन्योहमस्मीतिनसवेददेवास्तंपरादुर्योन्य
त्रात्मनोदेवान्वेदमृत्योःसमृत्युमाप्नोतियइहनानेवपश्यति॥एकधैवानुद्रष्टव्यंसर्वमात्मानंपश्यतीत्यादिश्रुतिभ्यः॥नचदेशकालनिमित्ता
द्यपेक्षत्वंव्यवस्थितात्मवस्तुविषयत्वादात्मज्ञानस्यक्रियायास्तुपुरुषतंत्रत्वात्स्याद्देशकालनिमित्तापेक्षत्वंज्ञानंतुवस्तुतंत्रत्वान्नदेशकालनि
मित्ताद्यपेक्षतेयथाग्निरुष्णआकाशोऽमूर्तइतितथात्मविज्ञानमपिनन्वेवंसतिप्रमाणभूतस्यकर्मविधेर्निरोधःस्यान्नचतुल्यप्रमाणयोरित
रेतरनिरोधोयुक्तःनस्वाभाविकभेदबुद्धिमात्रनिरोधकत्वात्॥नहिविध्यंतरनिरोधकमात्मज्ञानंस्वाभाविकभेदबुद्धिमात्रंनिरुणद्धितथापि
हेत्वपहारात्कर्मानुपपत्तेर्विधिनिरोधएवस्यादितिचेन्नकामप्रतिषेधात्काम्यप्रवृत्तिनिरोधवददोषा त्वेदोषमाशंकते॥नन्विति॥दृष्टापत्तिमाशं

क्याह॥नचेति॥कर्मकांडेनकांडांतरस्यापिविरोधसंभवादित्यर्थः॥साक्षादात्मज्ञानंकर्मविधिनिरोध्यर्थाद्वेतिविकल्प्याद्यंदूषयति॥नेत्यादिना॥तदेव
स्फोरयति॥नहिविध्यंतरेति॥द्वितीयंशंकते॥तथापीति॥यथानकामीत्यादिनिनिषेधात्कस्यचित्कामप्रवृत्तिर्नभवतीत्येतावतानसर्वान्प्रतिका
म्यविधिर्निरुध्यतेतथाकस्यचिदात्मज्ञानात्कर्मविधिनिरोधेपिनसर्वान्प्रतिअसौनिरुद्धोभविष्यतीतिपरिहरति॥नकामेति॥ ॥ ॥

दृष्टांतमेव स्पष्टयति॥ यथेत्यादिना॥ प्रतिषेधशास्त्रार्थानभिज्ञं प्रति तदुपपत्तेरिति भावः॥ अभिप्रायमविद्वानाशंकते॥ कामप्रतिषेधविधिनेति॥ अनर्थकत्वज्ञानं काम्यस्येति शेषः॥ प्रवृत्त्यनुपपत्तेः काम्येषु कर्मस्विति द्रष्टव्यं॥ निरुद्धः स्यात्काम्यविधिरित्यध्याहर्तव्यं॥ गूढाभिसंधिः सिद्धांती ब्रूते॥ भवतीति॥ पुनरभिप्रायमप्रतिपद्यमानश्चोदयति॥ यथेति॥ एवमिति ज्ञानेन कर्मविधिनिरोधे सतीति यावत्॥ तस्याप्रामाण्यानुपपत्तिरिति शेषः॥ तदेव चोद्यं विशदयति॥ अननुष्ठेयत्वइति॥ तेषामनुष्ठेयानामग्निहोत्रादीनां कर्मणां ये विधयस्तेषामिति यावत्॥ सिद्धांती स्वाभिसंधिमुद्घाटयन्नुत्तरमाह॥ ने

द्यथा स्वर्गकामो यजेतेति स्वर्गसाधने यागे प्रवृत्तस्य कामप्रतिषेधविधेः कामे विहते काम्ययागानुष्ठानप्रवृत्तिर्निरुध्यते न चैतावता काम्यविधिर्निरुद्धो भवति कामप्रतिषेधविधिना काम्यविधेरनर्थकत्वज्ञानात्प्रवृत्त्यनुपपत्तेर्निरुद्ध एव स्यादिति चेद्भवत्वेवं कर्मविधिनिरोधो यथा कामप्रतिषेधे काम्यविधेरेवं प्रामाण्यानुपपत्तिरिति चेदननुष्ठेयत्वेनुष्ठातुरभावात्तदनुष्ठानविध्यानर्थक्यादप्रामाण्यमेव कर्मविधीनामिति चेन्न प्रागात्मज्ञानात्प्रवृत्त्युपपत्तेः स्वाभाविकस्य क्रियाकारकफलभेदविज्ञानस्य प्रागात्मज्ञानात्कर्महेतुत्वमुपपद्यत एव यथा कामविषयदोषविज्ञानोत्पत्तेः प्राक्काम्यकर्मप्रवृत्तिहेतुत्वं स्यादेव स्वर्गादीच्छायाः स्वाभाविक्यास्तद्वत्॥ तथा सत्यनर्थार्थो वेद इति चेन्नार्थानर्थयोरभिप्रायतंत्रत्वान्मोक्षमेकं वर्जयित्वान्यस्याविद्याविषयत्वात्पुरुषाभिप्रायतंत्रो ह्यर्थानर्थौ मरणादिकाम्येष्टिदर्श

स्यादिना॥ उपपत्तिमेवोपदर्शयति॥ स्वाभाविकस्येति॥ तदेव दृष्टांतेन स्पष्टयति॥ यथेति॥ अज्ञानावस्थायामेव कर्मविधिप्रवृत्तिरित्यत्रानिष्टमाशंकते॥ तथा सतीति॥ कर्मविधेरपि पुरुषाभिप्रायवशात्पुरुषार्थोपयोगित्वसिद्धेर्नानिष्टापत्तिरित्युत्तरमाह॥ नार्थेति॥ अर्थस्य पुरुषाभिप्रायतंत्रत्वे मोक्षस्यापि वा स्वत्वं पुरुषार्थत्वं न स्यादित्याशंक्याह॥ मोक्षमिति॥ अर्थानर्थयोरभिप्रायतंत्रत्वं साधयति॥ पुरुषेति॥ मरणं महाप्रस्थानमित्यादिकाम्यं कृत्वा जीवदवस्था

कर्मविधीनामात्मज्ञानात् प्राचीनत्वं प्रतिपादितमुपसंहरति॥ तस्मादिति॥ तथापि प्रकृते किमायातं तदाह॥ तस्मान्नेति॥ तत्र प्रमाणमाह॥ इत्यत इति
॥ अतः शब्दार्थं स्फुटयति॥ कर्मेति॥ ज्ञानस्य कर्मविरोधित्वेन तन्निरपेक्षत्वे च सिद्धे फलितमाह॥ अत इति॥ आत्मज्ञानस्यामृतत्वहेतुत्वाभ्युपगमादित्यादेरु
क्तन्यायादात्मसाक्षात्कारस्य केवलस्य कैवल्यकारणत्वसिद्धेः सति तस्मिन् जीवन्मुक्तस्य कर्मानुष्ठानानवकाशात्तदुद्देशेन प्रवृत्तस्याधीतवेदस्य विदितपदप
दार्थस्यापरोक्षज्ञानवतस्तन्मात्रेण प्रमाणापेक्षामंतरेण सिद्धं सर्वकर्मत्यागलक्षणं पारिव्राज्यं एष एव विद्वत्संन्यासः॥ नन्वपरोक्षज्ञानवतः प्रारब्धफल

तस्माद्यावदात्मज्ञानविधेराभिमुख्यं तावदेव कर्मविधयस्तस्मान्नात्मज्ञानसहभावित्वं कर्मणामित्यतो युक्तमवधारणं सिद्धमात्मज्ञानमात्रमे
वामृतत्वसाधनमेतावदरे खल्वमृतत्वमिति कर्मनिरपेक्षताज्ज्ञानस्य अतो विदुषस्तावत्पारिव्राज्यं सिद्धं संप्रदानादिकर्मकारकजात्यादि
शून्यात्विक्रियब्रह्मात्मदृढप्रतिपत्तिमात्रेणाव चनमंतरेणाप्युक्तन्यायतः॥ तथा नव्यास्मात्तमेतत् येषां नोयमात्मायं लोक इति हेतुवचनेन पू
र्वे विद्वांसः प्रजामकामयमाना व्युत्तिष्ठंतीति पारिव्राज्यं विदुषामात्मलोकावबोधादेव तथा च विविदिषोरपि सिद्धं पारिव्राज्यमेतमेवात्मानं

प्राप्तिमंतरेणानुष्ठेयं किंचिदस्तीति भावः॥ विध्यविषयत्वाज्ज्ञानसाक्षात्कारस्य कथं पारिव्राज्यं तत्राह॥ वचनमिति॥ विधिं विनापि फलभूतं पारिव्राज्य
मित्यर्थः॥ उक्तन्यायः शांतादिवाक्यसूचितः॥ सत्यां जिज्ञासायां कर्मत्यागो न शक्यते निषेद्धुमिति वदन् विविदिषासंन्यासं साधयति॥ तथा चेत्यादिना॥
विदुषामात्मसाक्षात्कारार्थिनां तत्परोक्षनिश्चयवतामिति यावत्॥ आत्मलोकस्यावबोधोपि मुख्यानहेतुः परोक्षनिश्चय एव सतीतरस्मिन् फलावस्थस्य
मुख्यानाद्यनुष्ठानायोगात्तदंतरेण तत्प्राप्त्यभावाच्च॥ उक्तं हि॥ शमादिवदुपरतेरपि तत्त्वसाक्षात्कारे नियतसाधनत्वं तदाह॥ तथा चेति॥ एतत्पारिव्राज्यमि
तिसंबंधः॥ विविदिषर्नाम अधीतवेदो विचारप्रयोजकापातिकज्ञानवान्मुमुक्षुर्मोक्षसाधनं तत्त्वसाक्षात्कारमपेक्षमाणस्तस्मिन्परोक्षनिश्चयेनापि शून्यो वि

इतश्च विविदिषासंन्यासोऽस्तीत्याह॥ कर्मणां चेति॥ तथा चाविद्याविरुद्धां विद्यामिच्छन्नशेषाणि कर्माणि शरीरधारणमात्रकारणेतराणि त्यजेदिति शेषः॥ विविदिषासंन्यासे हेतुत्वं तदरं साधयति॥ अविद्याविषये चेति॥ चतुर्विधफलानि कर्माण्यविद्याविषये परं संभवंति न तु साध्ये वस्तुनि अस्ति अतो वस्तुजिज्ञासायां त्याज्यानि तानीत्यर्थः॥ कथं तर्हि कर्मणामुत्तमफलान्वय इत्यत्राह॥ आत्मेति॥ बुद्धिशुद्धिद्वारा ज्ञाने हेतुत्वात्कर्मणामस्ति प्रणाड्या परमपुरुषार्थान्वय इत्यर्थः॥ संन्यासः कर्मयोगश्च निःश्रेयसकरावुभाविति स्मृतेर्विविदिषूणां मुमुक्षूणां कथं पारिव्राज्यस्यैव कर्तव्यत्वमित्याशंक्याह॥ अथेति॥ यथा विद्वत्संन्यासस्तथा विवि दिषासंन्यासेऽपि यथोक्तरीत्या संभावितेऽस्तीति यावत्॥ आत्मज्ञानोत्पादनं प्रत्याश्रमधर्माणां बलाबलविचारणायामां

लोकमिच्छंतः प्रव्रजंतीति वचनात्कर्मणां चाविद्वद्विषयत्वमवोचाम अविद्याविषये चोत्पत्त्याप्तिविकारसंस्कारार्थानि कर्माणीत्यत्र आत्मसंस्कारद्वारेणात्मज्ञानसाधनत्वमपि कर्मणामवोचाम यज्ञादिभिर्विविदिषंतीति॥ अथैवं सत्यविद्वद्विषयाणामाश्रमकर्मणां बलाबलविचारणायामात्मज्ञानोत्पादनं प्रति यमप्रधानानाममानित्वादीनां मानसानां च ध्यानज्ञानवैराग्यादीनां संनिपत्योपकारकत्वं हिंसारागद्वेषादिबाहुल्याद्बहुक्लिष्टकर्मविमिश्रिताद् इतरे इत्यतः पारिव्राज्यं मुमुक्षूणां प्रशंसंति॥ त्याग एव हि सर्वेषामुक्तानामपि कर्मणां॥ वैराग्यं पुनरेतस्य मोक्षस्य परमो विधिः॥ तरंगत्वबहिरंगत्वचिंता तत्सांसत्यामित्यर्थः॥ अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः॥ वैराग्यादीनामित्यादिशब्देन शमादयो गृह्यंते॥ इतरे नियमप्रधाना आश्रमधर्मा बहुनाक्लिष्टेन पापेन कर्मणा संकीर्णा हिंसादिप्राचुर्याद्यमान्यत्नतस्त्यकुर्वाणो नियमान्केवलान्भजन्निति स्मृतेस्तस्मात्पूर्वेषामंतरंगत्वमुत्तरेषां बहिरंगत्वमित्याशयेनाह॥ हिंसेति॥ कर्मयोगापेक्षया तत्त्यागस्याधिकारिविशेषं प्रति प्रशस्तत्वमुपसंहरति॥ इत्यत इति॥ तत्प्रशंसाप्रकारमेवाभिनयति त्याग एवेति॥ उक्तानामाश्रमैरनुष्ठेयत्वेनेति शेषः॥ तत्त्यागे हेतुमाह॥ वैराग्यमिति॥ मोक्षस्य

विवेकात्

उत्तमपुमर्थार्थिनः संन्यासद्वारा श्रवणादिकर्त्तव्यमित्यत्र वाक्यांतरमुदाहरति॥ किंते धनेनेति॥ अथ पित्रादिभिर्गतं पंथानमन्वेषयामि नात्मानमित्याशंक्याह॥ पितामहा इति॥ विविदिषासंन्यासे सांख्यादिसंमतिमाह॥ एवमिति॥ यथाहुः सांख्याः ज्ञानेन चापवर्गो विपर्ययादिष्यते बंध इति विवेकख्यातिपर्यंतमज्ञानान्वितचेष्टितमिति चाविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानमिति च योगशास्त्रविदश्चाहुः॥ अभ्यासवैराग्याभ्यां तन्निरोध इति॥ तत्र वैराग्येण विषयस्रोतः परिखिलीक्रियते विवेकदर्शनाभ्यासेन कल्याणस्रोत उत्पाद्यत इति च॥ दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यमिति च॥ इतश्च संन्यासो ज्ञानं प्रति प्रत्यासन्न इत्याह॥ कामेति॥ संन्यासिनः कामप्रवृत्त्यभावेपि कथं संन्यास

किं ते धनेन किमु बंधुभिस्ते किं ते दारैर्ब्राह्मण यो मरिष्यसि॥ आत्मानमन्विच्छ गुहां प्रविष्टं पितामहास्ते क्व गताः पिता च॥ एवं सांख्ययोगशास्त्रेषु च संन्यासो ज्ञानं प्रति प्रत्यासन्न उच्यते॥ कामप्रवृत्त्यभावाच्च कामप्रवृत्तेर्हि ज्ञानप्रतिकूलता सर्वशास्त्रेषु प्रसिद्धा तस्माद्विरक्तस्य मुमुक्षोर्विनापि ज्ञानेन ब्रह्मचर्यादेव प्रव्रजेदित्यादि उपपन्नं न नु सावकाशत्वादनधिकृतविषयमेतदित्युक्तं यावज्जीवश्रुत्युपरोधात्॥ नैष दोषो नितरां सावकाशत्वाद्यावज्जीवश्रुतीनाम विदुषां कामिकर्तव्यतां ह्यवोचाम सर्वकर्मणां न तु निरपेक्षमेव जीवननिमित्तमेव कर्तव्यं क

स्य ज्ञानं प्रति प्रत्यासन्नत्वमित्याशंक्याह॥ कामप्रवृत्तेरिति॥ इति नु काममयमानः॥ काम एष क्रोध एष रजोगुणसमुद्भवः॥ महाशनो महापाप्मा विद्ध्येनमिह वैरिणमित्यादीनि शास्त्राणि विविदिषासंन्यासमुपसंहरति॥ तस्मादिति॥ यथोक्तस्याधिकारिणो दर्शितया विधया ज्ञानेन विनापि संन्यासस्य प्राप्तत्वाद्ब्रह्मचर्यादेवेत्यादि विधिवाक्यमुपपन्नमिति योजना॥ अथ पारिव्राज्यविधानमनधिकृतविषयमुचितं तथा सति सावकाशत्वादनधिकृतविषयं॥ यावज्जीवश्रुतिविरोधात्तस्या निरवकाशत्वात्सावकाशनिरवकाशयोश्च निरवकाशस्यैव बलवत्त्वादित्युक्तं शंकते॥ नन्विति॥ यावज्जीवश्रुतेर्निरवकाशत्वं दूषयति॥

जीवनमात्रंनिमित्तीकृत्यचोदितंकर्मकथंकामिनाकर्त्तव्यंतत्राह॥नत्विति॥प्रत्यवायपरिहारादेरिष्टत्वादित्यर्थः॥अनुष्ठातृस्वरूपनिरूपणायामपिन
जीवनमात्रंनिमित्तीकृत्यकर्त्तव्यमित्याह॥प्रायेणेति॥तथापिनित्येषुकर्मसुनकामनिमित्ताप्रवृत्तिस्तत्रकाम्यमानफलाभावादित्याशंक्याह॥कामश्चे
ति॥प्रत्यवायपरिहारादेरपिकामितत्वंयुक्तमितिभावः॥तथापिनित्येकर्मणिकाम्यमानंफलंविध्युद्देशेकिंचिन्नश्रुतमित्याशंक्याह॥अनेकेति॥कर्म
भिरनेकैःसाधनैर्यद्दुरितनिबर्हणादिसाध्यंतदेवास्याश्रुतमपिविध्युद्देशेसाध्यंभवति यद्यद्धिकुरुतेजंतुस्तत्तत्कामस्यचेष्टितमितिस्मृतेस्तद्व्यतिरेकेण
प्रवृत्त्यनुपपत्तेरतोनित्येपिकामितंफलमस्तीत्यर्थः॥ननुवैदिकानांकर्मणांनियतफलत्वात्कामोपिनियतफलोयुक्तस्तथाचनित्येषुतदभावान्नकामितं

प्रायेणहिपुरुषाःकामबहुलाःकामश्चानेकविषयोनेककर्मसाधनसाध्यश्चानेकफलसाधनानिचवैदिकानिकर्माणिदाराग्निसंबंधपु
रुषकर्तव्यानिपुनःपुनश्चानुष्ठीयमानानिबहुफलानिकृष्यादिवद्वर्षशतसमाप्तानिचगार्हस्थ्येवारण्येवातस्तदपेक्षयायावज्जीवश्रुत
यःकुर्वन्नेवेहकर्माणीतिचमंत्रवर्णः॥तस्मिंश्चपक्षेविश्वजित्सर्वमेधयोःकर्मपरित्यागोयस्मिंश्चपक्षेयावज्जीवानुष्ठानंतदाश्रमानांतत्वंभ
स्मांततानाच्चशरीरस्येतरवर्णापेक्षयावायावज्जीवश्रुतिः फलंसेत्स्यतितत्राह॥अनेकफलेति॥अथतानिपुरुषमात्रकर्तव्यानीतिकुतोविवक्षित
संन्याससिद्धिस्तत्राह॥दारेति॥नन्वविरक्तेनापिगृहिणासकृदेवतान्यनुष्ठेयानितावताविधेश्चरितार्थत्वात्तथाचकथंफलबाहुल्यमित्याशंक्याह॥
पुनःपुनश्चेति॥यावज्जीवोपबंधादावृत्तिसिद्धिरितिभावः तर्हियावज्जीवश्रुतिवशादशेषाश्रमानुष्ठेयान्यनवरतमग्निहोत्रादीनिकुतोयथोक्त
संन्यासोपपत्तिरित्याशंक्याह॥वर्षशतेति॥अविरक्तगृहिविषयत्वंश्रुतिमंत्रयोरुपसंहरति॥अतइति॥यत्तुयावज्जीवश्रुतेरपवादोविश्वजित्स
र्वमेधयोरितितदपिकामिगृहिविषयत्वान्नब्रह्मचर्यादेवप्रव्रजेदितिविध्यपवादकमित्याह॥तस्मिंश्चेति॥परोक्तंलिंगमपितद्विषयत्वान्नसर्वस्यवेद

यावज्जीवश्रुतेर्गतिं तरमाह॥इतरेति॥कथं सा क्षत्रियवैश्यविषयत्वेन प्रवृत्तानैव र्णिकानामपि पारिव्राज्यपरिग्रहादिसा शंक्याह॥नहीति॥यावज्जीवश्रुतिव
दैकाश्रम्यप्रतिपादकस्मृतीनामपि क्षत्रियादिविषयत्वमाह॥तथेति॥श्रुतिस्मृतीनां कर्मतत्संन्यासार्थानां भिन्नविषयत्वे फलितमुपसंहरति॥तस्मादिति॥

नहि क्षत्रियवैश्ययोः पारिव्राज्यप्रतिपत्तिरस्ति तथा मंत्रैर्यस्योदितो विधिरैकाश्रम्यं त्वाचार्या इत्येवमादीनां क्षत्रियवैश्यापेक्षत्वं तस्मात्पुरु
षसामर्थ्यज्ञानवैराग्यकामाद्यपेक्षयाऽनुष्ठानविकल्पक्रम पारिव्राज्यप्रतिपत्तिप्रकाराः न विरुध्यंते नधिकृतानां च पृथग्विधानात्पारिव्रा

अथवंशः पौतिमाष्यो गौपवनाद्गौपवनः पौतिमाष्यात्पौतिमाष्यो गौपवनाद्गौपवनः कौशिकात्कौशिकः कौंडिन्यात्कौंडिन्यः शां
डिल्याच्छांडिल्यः कौशिकाच्च गौतमाच्च गौतमः॥८१॥आग्निवेश्यादाग्निवेश्यो गार्ग्याद्गार्ग्यो गार्ग्याद्गार्ग्यो गौतमाद्गौतमः सैतवा
त्सैतवः पाराशर्यायणात्पाराशर्यायणो गार्ग्यायणाद्गार्ग्यायण उद्दालकायनादुद्दालकायनो जाबालायनाज्जाबालायनो माध्यंदिनाय
नान्माध्यंदिनायनः सौकरायणात्सौकरायणः काषायणात्काषायणः सायकायनात्सायकायनः कौशिकायनेः कौशिकायनिः॥९०॥

ज्यस्य स्नातको वाऽस्नातको वोत्सन्नाग्निरनग्निको वेत्यादिना तस्मात्सिद्धान्याश्रमांतराण्यधिकृतानामेव॥८८॥इति श्रीबृहदारण्यके षष्ठे प्रपाठ
के पंचमं ब्राह्मणं भाष्यं॥ अथानंतरं याज्ञवल्कीयस्य कांडस्य वंश आरभ्यते यथा मधुकांडस्य वंशो व्याख्यानं तु पूर्ववत् ब्रह्म स्वयंभु इति ह ब्रह्मणे नमः॥

यत्तु काणकुब्जांधादयोऽपि कर्मण्यनधिकृता अनुग्राह्या एवमुसेतितत्राह॥अनधिकृतानां चेति॥सत्यामेव भार्यायां त्यक्ताग्निरुत्सन्नाग्निस्तस्यामसत्यां परित्यक्ता
ग्निरनग्निक इति भेदः॥आश्रमांतरविषयश्रुतिस्मृतीनामनधिकृतविषयत्वाभावे सिद्धमर्थं निगमयति॥तस्मादिति॥ इति काण्वे बृहदारण्यके मैत्रेयीब्राह्मणं पं

सांगोपांगस्य सफलस्यात्मविज्ञानस्य प्रवचनानंतर्यमस्य शब्दार्थमाह॥ अनंतरमिति॥ यथा प्रथमांतः शिष्यो गुरुस्तु पंचम्यंत इति चतुर्थांते व्याख्यातं त
थात्रापीत्याह॥ व्याख्यानं त्विति॥ इत्थमागमोपपत्तिभ्यां ससंन्यासेतिकर्त्तव्यताकमात्मज्ञानममृतत्वसाधनं सिद्धमित्युपसंहर्त्तुमिति शब्दः॥ परिसमाप्तौ मंग

ॐमिति॥ हरिः ॐ तत्सदिति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविंदभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवत्पूज्यपादकृतौ श्रीबृहदारण्य

घृतकौशिकाद्घृतकौशिकः पाराशर्यायणात्पाराशर्यायणः पाराशर्यात्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्य आसुरायणाच्च यास्का
च्चासुरायणस्त्रैवणेस्त्रैवणिरौपजंधनेरौपजंधनिरासुरेरासुरिर्भारद्वाजाद्भारद्वाज आत्रेयादात्रेयो माण्टेर्माण्टिर्गौतमाद्गौतमो गौतमा
द्गौतमो वात्स्याद्वात्स्यः शांडिल्याच्छांडिल्यः कैशोर्यात्काप्यात्कैशोर्यः काप्यः कुमारहारितात्कुमारहारितो गालवाद्गालवो विदर्भीकौंडि
न्याद्विदर्भीकौंडिन्यो वत्सनपातो बाभ्रवाद्वत्सनपाद्बाभ्रवः॥ ९१॥ पथः सौभरात्पंथाः सौभरोऽयास्यादांगिरसादयास्य आंगिरस आभूतेस्त्वा
ष्ट्रादाभूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामश्विनौ दधीच आथर्वणाद्दध्यङ्ङाथर्वणोऽथर्वणो दैवादथर्वा दैवो मृत्योः प्राध्वꣳ
सनान्मृत्युः प्राध्वꣳसनः प्रध्वꣳसनात्प्रध्वꣳसन एकर्षेरेकर्षिर्विप्रचित्तेर्विप्रचित्तिर्व्यष्टेर्व्यष्टिः सनारोः सनारुः सनातनात्सनातनः सनगात्
सनगः परमेष्ठिनः परमेष्ठी ब्रह्मणो ब्रह्म स्वयंभु ब्रह्मणे नमः॥ ९२॥ ॥इति श्रीबृहदारण्यके चतुर्थोध्यायः॥ ४॥ मूल ३०० भाष्य २१०० टीका

केभाष्ये षष्ठोध्यायः समाप्तः॥

लमाचरति॥ ब्रह्मेति॥ ॐ तत्सत्॥ ॥इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानंदभगवत्पूज्यपादशिष्यश्रीभ
गवदानंदज्ञानविरचितायां श्रीमद्बृहदारण्यकभाष्यटीकायां षष्ठे प्रपाठके पंचमं षष्ठं च ब्राह्मणं समाप्तम्॥ अयं षष्ठोध्यायः॥ ६॥ ॥ ॥ ॥

इतिसटीकबृहदारण्यभाष्यस्यषष्ठाध्यायःसमाप्तः

॥ श्रीकृष्णानंदरामसमर्थ ॥

अथ सटीकबृहदारण्यभाष्यस्य पंचमोध्यायः प्रारभ्यते

श्रीगणेशायनमः॥ॐ मधुकांडेत्वाष्ट्रंकक्ष्यंचेतिमधुहूयंव्याख्यातंसंप्रतिकांडांतरारंभंप्रतिजानीते॥जनकइति॥ननुपूर्वस्मिन्नध्यायेव्याख्यात
मेवतत्वंउत्तरत्रापिवक्ष्यतेतथाचपुनरुक्तेरलंमुनिकांडेनेतितत्राह॥उपपत्तीति॥तुल्यमुपपत्तिप्रधानत्वंमधुकांडस्यापीतिचेन्नेत्याह॥मधुकांडं
हीति॥ननुप्रमाणादागमादेव तत्वज्ञानमुत्पत्स्यतेकिमुपपत्यातत्प्रधानेनकांडेनचेतितत्राह॥आगमेति॥करणत्वेनागमस्तत्वज्ञानेहेतुरु
पपत्तिरुपकरणतयापदार्थपरिशोधनद्वारातद्धेतुरित्यत्रगमकमाह॥श्रोतव्यइति॥करणोपकरणयोरागमोपपत्योस्तत्वज्ञानहेतुत्वेसिद्धेफलितमु
पसंहरति॥तस्मादिति॥यथोक्तरीत्याकांडारंभेपिकिमित्याख्यायिकाप्रणीयतेतत्राह॥आख्यायिकात्विति॥विज्ञानवतांपूजात्रप्रयुज्यमानादृश्यतेतेन

हरिः ॐ जनकोहवैदेहइत्यादि याज्ञवल्कीयंकांडमारभ्यते उपपत्तिप्रधानत्वादतिक्रांतेनमधुकांडेनसमानार्थत्वेपिसतिनपुनरुक्त
तामधुकांडंह्यागमप्रधानमागमोपपत्तीह्यात्मैकत्वप्रकाशनायप्रवृत्तेशक्नुतः करतलगतबिल्वमिवदर्शयितुंश्रोतव्योमंतव्यइतिह्यु
क्तंतस्मादागमार्थस्यैवपरीक्षापूर्वकंनिर्धारणाययाज्ञवल्कीयंकांडमुपपत्तिप्रधानमारभ्यतेआख्यायिकातुविज्ञानस्तुत्यर्थोपायवि
धिपरावाप्रसिद्धोह्युपायोविद्वद्भिःशास्त्रेषुचदृष्टोदानं॥दानेनह्युपनमंतेप्राणिनः प्रभूतंहिरण्यंगोसहस्रंदानंचेहउपलभ्यते
याचविज्ञानं

महाभागधेयमितिस्तुतिरत्रविवक्षितेत्यर्थः॥विद्याग्रहणेदानाख्योपायप्रकारज्ञापनपरावाख्यायिकेत्यर्थांतरमाह॥उपायेति॥कथंपुनर्दानस्यविद्या
ग्रहणोपायत्वंतत्राह॥प्रसिद्धोहीति॥गुरुशुश्रूषयाविद्यापुष्कलेनधनेनवेत्यादौदानाख्योविद्याग्रहणोपायोयस्मात्प्रसिद्धस्तस्मात्तस्यतदुपायत्वेनास्ति
वक्तव्यमित्यर्थः॥दानेसर्वंप्रतिष्ठितमित्यादिश्रुतिषुविद्वद्भिरेषविद्याग्रहणोपायोदृष्टस्तस्मान्नतस्योपायत्वेविवदितव्यमित्याह॥विद्वद्भिरिति॥उप
पन्नंचदानस्यविद्याग्रहणोपायत्वमित्याह॥दानेनेति॥भवतुदानंविद्याग्रहणोपायस्तथापीयमाख्यायिकाकथंतत्प्रदर्शनपरेत्याशंक्याह॥प्रभूतमि

ननुसमुदितेषुब्राह्मणेषुब्रह्मिष्ठतमंनिर्धारयितुंराजाप्रवृत्तस्तत्कथमन्यपरेणग्रंथेनविद्याग्रहणोपायविधानायाख्यायिकारभ्यतेतत्राह॥तस्मादिति॥उपलंभोयथोक्तस्तच्छब्दार्थः॥इतश्चाख्यायिकाविद्याप्राप्त्युपायप्रदर्शनपरेत्याह॥अपिचेति॥तस्मिन्वेद्येऽर्थेविद्यायेषांतेतद्विद्यास्तैःसहसंबंधश्चतै रेवप्रश्नप्रतिवचनद्वारावादकरणंचविद्याप्राप्तावुपायइत्यत्रगमकमाह॥न्यायविद्यायामिति॥तत्त्वनिर्णयफलांहिवीतरागकथामिच्छंति॥तद्विद्य

तस्मादन्यपरेणापिशास्त्रेणविद्याप्राप्त्युपायदानप्रदर्शनार्थाख्यायिकारब्धा॥अपिचतद्विद्यसंयोगस्तैश्चसहवादकरणंविद्याप्राप्त्युपायोन्याय विद्यायांदृष्टस्तच्चास्मिन्नध्यायेप्राबल्येनप्रदर्श्यतेप्रत्यक्षाचविद्वत्संयोगेप्रज्ञावृद्धिस्तस्माद्विद्याप्राप्त्युपायप्रदर्शनार्थैवाख्यायिका॥जन

ॐ जनकोहवैदेहोबहुदक्षिणेनयज्ञेनेजेतत्रहकुरुपंचालानांब्राह्मणाअभिसमेताबभूवुस्तस्यहजनकस्यवैदेहस्यविजिज्ञासा बभूवकःस्विदेषांब्राह्मणानामनूचानतमइतिसहगवांसहस्रमवरुरोधदशदशपादाएकैकस्याःशृंगयोराबद्धाबभूवुः॥१॥

कोनामहकिलसम्राड्राजाबभूवविदेहानांतत्रभवोवैदेहःसचबहुदक्षिणेनयज्ञेनशाखांतरप्रसिद्धोवाबहुदक्षिणोनामयज्ञःअश्वमेधोवा दक्षिणाबाहुल्याद्बहुदक्षिणइहोच्यतेतेनेजेअयजततत्रतस्मिन्यज्ञेनिमंत्रितादर्शनकामावाकुरूणांदेशानांपंचालानांचब्राह्मणाः॥तेषुहिवि दुषांबाहुल्यंप्रसिद्धमभिसमेताअभिसंगताबभूवुः संयोगादेर्विद्याप्राप्त्युपायत्वेपिकथंप्रकृतेतत्प्रदर्शनपरत्वमतआह॥तच्चेति॥तद्विद्यसंयोगादी तियावत्॥नकेवलंतर्कशास्त्रवशादेवतद्विद्यसंयोगेप्रज्ञावृद्धिःकिंतुस्वानुभववशादपीत्याह॥प्रत्यक्षाचेति॥आख्यायिकायास्तात्पर्यमुपसंहरति॥तस्मादिति॥राजसूयाभिषिक्तःसार्वभौमोराजासम्राडित्युच्यते॥बहुदक्षिणेनयज्ञेनायजदितिसंबंधः॥अश्वमेधेदक्षिणाबाहुल्यमश्वमेधप्रकरणेस्थितं॥ब्राह्मणा अभिसं

चत्वारिंशत्संचाशद्व्रामाषात्मकपलं=२

बृ॰ र॰ २ तत्र यज्ञशालायामिति यावत्॥ विजिज्ञासामेवाकांक्षापूर्वकं प्रस्तावयति॥ कथमित्यादिना॥ अनूचानत्वमनुवचनसमर्थत्वं॥ एषांमध्येतिशयेनानूचानो नूचानतमः सकः स्यादिति योजना॥ एकस्य पलस्य चत्वारो भागास्तेषामेको भागः पाद इत्युच्यते॥ प्रत्येकं शृंगयोर्दशदश पादाः संबध्येरन्निति शंकां निराकर्त्तुं

त त्र मह होता विदग्धः । स प्रथमं चतुर्विदधे तत्र ह किल जनकस्य वैदेहस्य यजमानस्य कोनु खल्वत्र ब्रह्मिष्ठ इति विशेषेण ज्ञातुमिच्छा विजिज्ञासा बभूव॥ कथं कःस्वित्कोनु खल्वेषां ब्राह्मणानां अनूचानतमः सर्व इमेनूचानाः कःस्विदेषामतिशयेनानूचान इति स ह अनूचानविषयो समन्वजिज्ञासः संस्तद्विज्ञानोपायार्थं गवां सहस्रं प्रथमवयसामवरुरोध गोष्ठेऽवरोधकारयामास किंविशिष्टास्ता गावोऽवरुद्धा इत्युच्यते पलचतुर्भागः पादः सुवर्णस्य

तान्होवाच ब्राह्मणा भगवंतो यो वो ब्रह्मिष्ठः स एता गा उदजतामिति ते ह ब्राह्मणा न दधृषुरथ ह याज्ञवल्क्यः स्वमेव ब्रह्मचारिणमुवाचैताः सोम्योदज सामश्रवा ३ इति ता होदाचकार ते ह ब्राह्मणाश्चुक्रुधुः कथं नो ब्रह्मिष्ठो ब्रुवीतेत्यथ ह दशदश पादाः एकैकस्या गोः शृंगयोराबद्धा बभूवुः पंचपंच पादा एकैकस्मिन्छृंगे॥ १॥ गा एवमवरुध्य ब्राह्मणांस्तान्ह उवाच हे ब्राह्मणा भगवंत इत्यामंत्र्य यो वो युष्माकं ब्रह्मिष्ठः सर्वे यूयं ब्राह्मणा अतिशयेन युष्माकं ब्रह्मिष्ठः स एता गाः उदजतां उत्कालयतु स्वगृहं प्रति ते ह ब्राह्मणा न दधृषुः ते ह किलेवमुक्ता ब्राह्मणाः ब्रह्मिष्ठतामात्मनः प्रतिज्ञातुं न दधृषुः न प्रगल्भाः संवृत्ताः अप्रगल्भभूतेषु ब्राह्मणेष्वथ ह याज्ञवल्क्यः विभजते॥ पंचेति॥ एकैकस्मिन्छृंगे आवद्धा बभूवुरिति पूर्वेण संबंधः॥ १॥ ब्राह्मणाः वेदाध्ययनसंपन्नास्तदर्थनिष्ठा इति यावत्॥ उत्कालयतु उद्गमयतु॥ यतो याज्ञवल्क्याद्यजुर्वेदविदः सकाशा द्ब्रह्मचारी सामविधिं शृणोति अतः सुचाध्यारूढं सामगीयते॥ त्रिष्वेव च वेदेष्वंतर्भूतो अथर्ववेदस्तस्मादर्थाद्यजुर्वेदिनो मुनेः शिष्यस्य सामवेदाध्ययनानुपपत्तेर्वेदच

अं॰ ५

रामः २

निमित्तनिवेदनपूर्वकं ब्राह्मणानां सभ्यानां क्रोधप्राप्तिं दर्शयति॥ याज्ञवल्क्येनेति॥ क्रोधानंतर्यमथशब्दार्थं कथयति॥ क्रुद्धेष्विति॥ अश्वलप्रश्नस्य प्राथ
म्ये हेतुः॥ राजेति॥ याज्ञवल्क्यमित्यनुवादोन्वयप्रदर्शनार्थः॥ प्रश्नमेव प्रश्नपूर्वकं विशदयति॥ कथमित्यादिना॥ अनौद्धत्यं ब्रह्मविदो लिंगमिति सूचयति॥

स्वमात्मीयमेव ब्रह्मचारिणमंतेवासिनमुवाच एता गा हे सोम्य उदज उद्गमय अस्मद्गृहान्प्रति हे सामश्रवः सामविधिं हि शृणोत्यतोर्थाच्चतुर्वेदो या
ज्ञवल्क्यस्ता गा ह उदाचकार उत्कालितवान् आचार्यगृहं प्रति याज्ञवल्क्येन ब्रह्मिष्ठपणस्वीकरणेनात्मनो ब्रह्मिष्ठता प्रतिज्ञातेति ह चुक्रुधुः क्रु
द्धवंतः ब्राह्मणाः तेषां क्रोधाभिप्रायमाचष्टे कथं नोस्माकमेकैकप्रधानानां ब्रह्मिष्ठोस्मीति ब्रुवीतेति अथ हैवं क्रुद्धेषु ब्राह्मणेषु जनकस्य यज

जनकस्य वैदेहस्य होताश्वलो बभूव स हैनं पप्रच्छ त्वं नु खलु नो याज्ञवल्क्य ब्रह्मिष्ठोसी ३ इति स होवाच नमो वयं ब्रह्मिष्ठाय कु
र्मो गोकामा एव वयं स्म इति तं ह तत एव प्रष्टुं दध्रे होताश्वलः॥ २॥

मानस्य होता ऋत्विक् अश्वलो नाम बभूवासीत् स एनं याज्ञवल्क्यं ब्रह्मि
ष्ठाभिमानी राजाश्रयत्वाच्च धृष्टो याज्ञवल्क्यं पप्रच्छ एकं वान्कथं याज्ञवल्क्येति होवाच त्वं नु खलु नो याज्ञवल्क्य ब्रह्मिष्ठोसी इति प्लुतिर्भर्त्सनार्थी
स होवाच याज्ञवल्क्यः नमस्कुर्मो वयं ब्रह्मिष्ठाय इदानीं गोकामाः स्मो वयमिति तं ब्रह्मिष्ठप्रतिज्ञं संतं तत एव ब्रह्मिष्ठपणस्वीकरणात्प्रष्टुं
दध्रे धृतवान्मनो होताश्वलः॥ २॥ याज्ञवल्क्येति होवाच तत्र मधुकांडे पांक्तेन कर्मणा दर्शनसमुच्चितेन यजमानस्य मृत्योरत्ययोभ्याख्यातः उद्गीथ
प्रकरणे संक्षेपतः

सहेति॥ किमिति तर्हि स्वगृहान्प्रति गावो ब्रह्मिष्ठपणभूता नीतास्तत्राह॥ इदानीमिति॥ न तस्य तादृशी प्रतिज्ञा प्रतिभातीत्या
शंक्याह॥ तत एवेति॥ २॥ तत्र प्रथमं मुनेराभिमुख्यमापादयितुं संबोधयति॥ याज्ञवल्क्येति॥ उक्तरीत्याश्वलप्रश्ने प्रस्तुते तस्योद्गीथाधिकारेण संगतिमाह॥

बृ०र०
३

मधुकांडेपूर्वंत्रव्याख्यातेयदुद्गीथप्रकरणंतस्मिन्नासंगपाप्मनोमृत्योरत्ययःसमुच्चितेनकर्मणासंक्षेपतोव्याख्यातइतिसंबंधः॥तस्यैवोद्गीथदर्शनस्येतिप
वत्॥परीक्षाविषयोविचारभूमिरयंप्रश्नप्रतिवचनरूपोग्रंथइत्यर्थः॥तदूर्ध्वं:समनंतरनिर्दिष्टग्रंथविषयः॥दर्शनमुद्गीथोपासनं॥तस्यविशेषोवा
गादेरग्न्याद्यात्मकत्वविज्ञानंतत्सिध्यर्थोयंक्रमः॥एवमवांतरसंगतिमुक्त्वाप्रश्नाक्षराणिव्याचष्टे॥यदिदमिति॥मृत्युनाप्तमित्यनेनमृत्युनाभिपन्नमित्य
स्यगतार्थत्वमाशंक्याह॥नकेवलमिति॥कर्मणोमृत्युत्वात्तेनमृत्योरत्ययायोगात्तदत्ययसाधनंकिंचिद्दर्शनमेववाच्यमित्याशयेनपृच्छति॥केनेति॥दर्शन

तस्यैवपरीक्षाविषयोयमितितद्भूतदर्शनविशेषार्थोयंविस्तरआरभ्यते॥यदिदंसाधनजातमस्यकर्मणऋत्विगग्न्यादिमृत्युनाकर्मलक्ष
णेनस्वाभाविकासंगसहितेनासंव्याप्तंनकेवलंव्याप्तमभिपन्नंचमृत्युनावशीकृतंच॥केनदर्शनलक्षणेनसाधनेनयजमानोमृत्योराप्ति

याज्ञवल्क्येतिहोवाचयदिदꣳसर्वंमृत्युनाप्तꣳसर्वंमृत्युनाभिपन्नंकेनयजमानोमृत्योराप्तिमतिमुच्यतइति ॥

मतीत्यमृत्युगोचरत्वमतिक्रम्यमुच्यतेस्वतंत्रोमृत्योरवशोभवतीत्यर्थः॥ननूद्गीथेएवाभिहितंयेनातिमुच्यतेमुख्यप्राणात्मदर्शनेनेतिबाढं
उक्तंयोऽनुक्तोविशेषस्तत्रतदर्थोयमारंभइत्यदोषः॥होत्रर्त्विजाग्निनावाचेत्याहयाज्ञवल्क्यः एतस्यार्थंव्याचष्टे विषयंप्रश्नमाक्षिपति॥नन्वि
ति॥येनमुख्यप्राणात्मदर्शनेनातिमुच्यतेतदुद्गीथप्रक्रियायामेवोक्तंतथाचमृत्योरत्ययोपायस्यविज्ञानस्यनिर्ज्ञातत्वात्केनेतिप्रश्नानुपपत्तिरितियोजना
।तस्यैवपरीक्षाविषयोयमित्यादावुक्तमादायपरिहरति॥बाढमिति॥उद्गीथप्रकरणेवागादेरग्न्याद्यात्मत्वदर्शनरूपोयोविशेषोवक्तव्योपिनोक्तस्तदु
क्त्यर्थोयंप्रश्नप्रतिवचनरूपोग्रंथइतिकृत्वाकेनेत्यादिप्रश्नोपपत्तिरित्यर्थः॥कीदृक्पुनर्दर्शनंमृत्युजयसाधनंहोत्रेत्यादावुक्तमित्याशंक्याह॥एतस्येति॥

अ०
५

राम:
३

व्याचष्टे वाग्वै यज्ञस्येत्यादिनेति शेषः व्याख्यानमेव विशदयितुं पृच्छति ॥ कः पुनरिति ॥ दर्शनविषयं दर्शयन्नुत्तरमाह ॥ उच्यत इति ॥ यज्ञशब्दस्य य
जमाने रूढप्रयोगो नास्तीत्याशंक्याह ॥ यज्ञ इति ॥ यजमानस्य या वागध्यात्मं सैवाधियज्ञे होतास्तु तथापि कथं तयोर्देवतात्मना दर्शनमित्याह ॥ कथ
मिति ॥ तयोरग्न्यात्मना दर्शनमुत्तरवाक्यावष्टंभेन व्याचष्टे ॥ तत्तत्रेति ॥ कथं पुनर्वागग्न्योरेकत्वं तदाह ॥ तदेतदिति ॥ तयोरेकत्वे पि कुतो होतुस्तदैक्यमि

कः पुनर्होता येन मृत्युमतिक्रामतीत्युच्यते वाग्वै यज्ञस्य यजमानस्य यज्ञो वै यजमान इति श्रुतेः यज्ञस्य यजमानस्य या वाक्सैव होताधियज्ञे
कथं तत्तत्र या इयं वाग्यज्ञस्य यजमानस्य सो यं प्रसिद्धो ग्निरधिदैवं तदेतन्मन्त्रप्रकरणे व्याख्यातं स चाग्निर्होताग्निर्वै होतेति श्रुतेः यदेत
द्यज्ञस्य साधनद्वयं होता चर्त्विगधियज्ञमध्यात्मं च वागेतदुभयं साधनद्वयं परिच्छिन्नं मृत्युनाप्तं स्वाभाविकाज्ञानासंगप्रयुक्तेन कर्मणा मृत्यु

होत्रर्त्विजाग्निना वाचा वाग्वै यज्ञस्य होता तद्येयं वाक्सो यमग्निः स होता ॥

नाप्रतिक्षणमन्यथात्वमापाद्यमानं वशीकृतं तदनेनाधिदैवतरूपेणाग्निना दृश्यमानं यजमानस्य यज्ञस्य मृत्योरतिमुक्तये भवति ॥ त
देतदाह स मुक्तिः स होताग्निर्मुक्तिरग्निस्वरूपदर्शनमेव मुक्तिर्यदैव साधनद्वयमग्निरूपेण पश्यति तदानीमेव हि स्वाभाविकादासंगा
न्मृत्योर्विमुच्यते आध्यात्मिकात्परिच्छिन्नरूपादाधिभौतिकाच्च

स्याशंक्याह ॥ स चेति ॥ स मुक्तिरित्येतदवतारयितुं भूमिकां करोति ॥ यदेतदिति ॥ न
केवलमेतदुभयं मृत्युनासंस्पृष्टमेव किंतु तेन वशीकृतं चेत्याह ॥ स्वाभाविकेति ॥ मृत्युनाप्तं मृत्युनाभिपन्नमित्यनयोरर्थमनूद्य होत्रेत्यादेरर्थमनुवदति ॥ तदनेनेति
॥ साधनद्वयं तच्छब्दार्थः ॥ यजमानग्रहणं होतुरुपलक्षणं उक्तेर्थे समनंतरवाक्यमवतार्य व्याकरोति ॥ तदेतदाहेति ॥ मुक्तिशब्दस्तु साधनविषयः ॥ पदार्थमुक्त्वा

बृ.र.
४

अग्निस्वरूपेतिवाचोहोतुश्चाग्निस्वरूपेणदर्शनमेवमुक्तिहेतुरितियावत्॥उक्तमर्थंप्रपंचयति॥यदेवेति॥समुक्तिरित्यस्यार्थमुपसंहरति॥तस्मादिति
॥वाक्यांतरमुत्थाप्यव्याचष्टे॥सातिमुक्तिरिति॥मुक्त्यतिमुक्त्योरसंकीर्णत्वंदर्शयति॥साधनद्वयस्येति॥प्राप्ति रतिमुक्तिरितिसंबंधःतामेवसंगृह्णाति
॥याफलभूतेति॥फलभूतायामग्न्यादिदेवताप्राप्तौकथमतिमुक्तिशब्दोपपत्तिरित्याशंक्याह॥तस्मादिति॥ननुवागादीनामग्न्यादिभावोत्रश्रूयतेयज

तस्मात्सहोताग्निरूपेणदृष्टोमुक्तिर्मुक्तिसाधनंयजमानस्यसातिमुक्तिर्यैवचमुक्तिःसातिमुक्तिरतिमुक्तिसाधनमित्यर्थः॥साधनद्वयस्य
परिच्छिन्नस्याधिदैवतरूपेणापरिच्छिन्नेनाग्निरूपेणदृष्टिःसामुक्तिर्यासौमुक्तिरधिदैवतादृष्टिःसैवाध्यात्माधिभूतपरिच्छेदविषयासं
गास्पदंमृत्युमतिक्रम्याधिदेवतात्वस्याग्निभावस्यप्राप्तिर्याफलभूतासातिमुक्तिरित्युच्यतेतस्याअतिमुक्तेर्मुक्तिरेवसाधनमितिकृत्वासा

समुक्तिःसातिमुक्तिः॥३॥

तिमुक्तिरित्याह॥यजमानस्यह्यतिमुक्तिर्वागादीनामग्न्यादिभावउद्गीथप्रकरणेव्याख्यातंतत्रसामान्येनमुख्यप्राणदर्शनमात्रंमुक्तिसा
धनमुक्तंनतद्विशेषोवागादीनामग्न्यादिदर्शनमिहविशेषोवर्ण्यतेमृत्युप्राप्यतिमुक्तिस्तुसैवफलभूतायोद्गीथब्राह्मणेनव्याख्याताऽमृत्युम
तिक्रांतोदीप्यतइत्याद्या॥३॥याज्ञवल्क्येतिहोवाचस्वाभाविकादज्ञानासंगप्रयुक्तात्कर्मलक्षणान्मृत्योरतिमुक्तिर्व्याख्याताऽतस्यकर्मणः
सासंगस्यमृत्योराश्रयभूतानांदर्शपूर्णमासादि मानस्यनकिंचिदुच्यतेतत्राह॥यजमानस्येति॥तर्हितेनैवगतार्थत्वादनर्थकमिदंब्राह्मणमित्या
शंक्यबाढमित्यादिनोक्तंस्मारयति॥तत्रेति॥दर्शनवत्फलेपिविशेषःस्यादित्याशंक्याह॥मृत्युप्राप्तीति॥प्रश्नांतरमवतार्यतात्पर्यमाह॥याज्ञवल्क्येति॥आ

अ.
५

रामः
४

प्रतिक्षणमन्यथात्वं विपरिणामः॥ अग्न्यादिसाधनान्याश्रित्य कार्म्यकर्ममृत्युशब्दितमुत्पद्यते तेषां साधनानां विपरिणामहेतुत्वात्कालो मृत्युस्ततो तिमुक्तिर्वक्तव्येत्युत्तरग्रंथारंभस्यार्थः॥ कर्मणो मुक्तिरुक्ता चेत्कालादपि सो तैवैतस्य कर्मांतर्भावेन मृत्युत्वादित्याशंक्याह॥ पृथगिति॥ कर्मनिरपे क्षतया कालस्य मृत्युत्वं प्रसादयति॥ क्रियेति॥ कालस्य पृथग्मृत्युत्वे सिद्धे फलितमाह॥ तस्मादिति॥ उत्तरग्रंथस्य प्रश्नयोर्विषयं भेत्तुं कालं भिनत्ति॥ सचे

कर्मसाधनानां यो विपरिणामहेतुः कालस्तस्मात्कालात्पृथगतिमुक्तिर्वक्तव्येतीदमारभ्यते क्रियानुष्ठानव्यतिरेकेणापि प्रागूर्ध्वं च क्रिया याः साधनविपरिणामहेतुत्वेन व्यापारदर्शनात्कालस्य तस्मात्पृथक्कालादतिमुक्तिर्वक्तव्येत्यत आह यदिदं सर्वमहोरात्राभ्यामाप्तं सच का

याज्ञवल्क्येति होवाच यदिदꣳ सर्व महोरात्राभ्यामाप्तꣳ सर्वमहोरात्राभ्यामभिपन्नं केन यजमानो होरात्रयोराप्तिमतिमुच्य त इत्यध्वर्युणर्त्विजा चक्षुषादित्येन चक्षुर्वै यज्ञस्याध्वर्युस्तद्यदिदं चक्षुः सोसावादित्यः सोध्वर्युः स मुक्तिः सातिमुक्तिः॥४॥ लोहितरूपो

होरात्रादिलक्षणस्तिथ्यादिलक्षणश्च तत्राहोरात्रलक्षणात्तावदतिमुक्तिमाह॥ अहोरात्राभ्यां हि सर्वं जायते वर्धते विनश्यति च तथा यज्ञसाध नं च यज्ञस्य यजमानस्य चक्षुरध्वर्युश्च शिष्टान्यक्षराणि पूर्ववन्नेयानि यजमानस्य चक्षुरध्वर्युश्च साधनद्वयमध्यात्माधिभूतपरिच्छेदं हित्वाधिदै वतात्मना दृष्टं यत्स मुक्तिः सोध्वर्युरादित्यभावेन दृष्टो मुक्तिः सैव मुक्तिरेवातिमुक्तिरिति पूर्ववत्॥ आदित्यश्चाद्रूश्चेति कर्तृभेदाद्वैविध्यमुन्नेयं॥

कालस्य द्वैरूप्ये सत्याद्यं कंडिकाविषयमाह॥ तत्रेति॥ अहोरात्रयोर्मृत्युत्वे सिद्धे ताभ्यामतिमुक्तिर्वक्तव्या तदेव कथमित्याशंक्याह॥ अहोरात्राभ्यामिति॥ यज्ञसाधनं च तथा ताभ्यां जायते वर्धते नश्यति चेति संबंधः॥ प्रतिवचनव्याख्याने यज्ञशब्दार्थमाह॥ यजमानस्येति॥ स मुक्तिरित्यस्य तात्पर्यार्थमाह॥ यजमा

बृ॰ र॰ ५

यथोक्तनीत्याऽदित्यात्मत्वेपि कथमहोरात्रलक्षणान्मृत्योरतिमुक्तिरत आह॥ आदित्येति॥ नोदेतानास्तमेतेत्यादिश्रुतेरादित्ये वस्तुतो नाहोरात्रे स्त
स्तथाच तदात्मनि विदुष्यपि तेन संभवतइत्यर्थः॥४॥ कंडिकांतरस्य तात्पर्यमाह॥ इदानीमिति॥ नन्वहोरात्रादिलक्षणे काले तिथ्यादिलक्षणस्य काल
स्यांतर्भावात्ततोतिमुक्तावुक्तायां तिथ्यादिलक्षणादपि कालात्साबुक्तैवेति कृतं पृथगारंभेणेति तत्राह॥ अहोरात्रयोरिति॥ अविशिष्टयोर्वृद्धिक्षयशून्य
योरिति यावत्॥ कथं तर्हि तिथ्यादिलक्षणात्कालादतिमुक्तिरत आह॥ अतस्तदापत्येति॥ चंद्रप्राप्त्या तिथ्याद्यसयोमाध्यंदिनश्रुत्योच्यते॥ काण्वश्रुत्यातु वा

दादित्यात्मभावमापन्नस्य हि नाहोरात्रे संभवतः॥४॥ इदानीं तिथ्यादिलक्षणादतिमुक्तिरुच्यते यदिदं सर्वमहोरात्रयोरविशिष्टयोरादित्यः कृ
तो न प्रतिपदादीनां तिथीनां तासां तु वृद्धिक्षयोपगमनेन प्रतिपत्प्रभृतीनां चंद्रमाः कर्ता अतस्तदापत्त्या पूर्वपक्षापरपक्षात्ययः॥ आदि

याज्ञवल्क्येति होवाच यदिदꣳ सर्वं पूर्वपक्षापरपक्षाभ्यामाप्तꣳ सर्वं पूर्वपक्षापरपक्षाभ्यामभिपन्नं केन यजमानः पूर्वपक्षा
परपक्षयोराप्तिमतिमुच्यत इत्युद्गात्रर्त्विजा वायुना प्राणेन प्राणो वै यज्ञस्योद्गाता तद्योयं प्राणः स वायुः स्यापत्त्याहोरात्रात्ययवत्॥
तत्र यजमानस्य प्राणो वायुः स एवोद्गातेत्युद्गीथब्राह्मणे वगतं वाचा चह्येव स प्राणेन चोदगायदिति च निर्धारितमथैतस्य प्राणस्याप
शरीरं ज्योतीरूपमसौ चंद्र इति च प्राण युभावापत्त्यात्तदत्यय उक्तस्तथाच श्रुत्योर्विरोधे कः समाधिरित्याशंक्याह॥ तत्रेति॥ काण्वश्रुताविति या
वत् उद्गातुरपि प्राणात्मकवायुरूपत्वं श्रुतिद्वयानुसारेण दर्शयति॥ स एवेति॥ न केवलमुद्गातुः प्राणत्वं प्रतिज्ञामात्रेण प्रतिपन्नं किंतु विचार्य निर्धारितं चे
त्याह॥ वाचेति॥ प्राणचंद्रमसोश्चैकत्वं सप्तान्नाधिकारे निर्धारितमित्याह॥ अथेति॥ उक्तया रीत्या प्राणादीनामेकत्वे श्रुत्योरविरोधं फलितमाह॥ प्राणेति॥

अ॰ ५

मनोब्रह्मणोश्चंद्रमसा प्राणोद्गात्रोश्च वायुनोपास्यत्वेनोपसंग्रहे मृत्युतरणे विशेषो नास्तीति श्रुत्योर्विकल्पेनोपपत्तिरित्यर्थः उपसंहरति प्राणं उद्गातारं
चतद्रूपेणोपास्यतयासंगृह्णातिकाण्वश्रुतिरित्यर्थः॥इतश्चकाण्वश्रुतिरुपपन्नेत्याह॥अपिचेतिवायुःसूत्रात्मातन्निमित्तौस्वावयवस्यचंद्रमसोवृद्धिह्रा
सौसूत्राधीनाहिचंद्रादेर्जगतश्चेष्टेत्यर्थः॥वृध्यादिहेतुत्वेफलितमाह॥तेनेति॥कर्त्तुश्चंद्रस्येत्यर्थः॥वायोश्चंद्रमसिकारयितृत्वेपिप्रकृतेकिमायातंतदा

वायुचंद्रमसामेकत्वाच्चंद्रमसावायुनाचोपसंहारेनकश्चिद्विशेषएवंमन्यमानाश्रुतिर्वायुनाधिदैवतरूपेणोपसंहरति॥अपिचवायुनिमि
त्तौहिवृद्धिक्षयौचंद्रमसस्तेनतिथ्यादिलक्षणस्यकालस्यकर्त्तुरपिकारयितावायुः॥अतोवायुरूपापन्नस्तिथ्यादिकालादतीतोभवती
त्युपपन्नतरंभवतितेनश्रुत्यंतरेचंद्ररूपेणादृष्टिर्मुक्तिरतिमुक्तिश्चइहतुकाण्वानांसाधनद्वयस्यतत्कारणरूपेणवाय्वात्मनादृष्टिर्मुक्ति

सउद्गातासमुक्तिःसातिमुक्तिः॥५॥याज्ञवल्क्येतिहोवाचयदिदमंतरिक्षमनारंबणमिवकेनाक्रमेणयजमानःस्वर्गंलोकमाक्र
मतइतिब्रह्मणर्त्विजामनसाचंद्रेण॥

रतिमुक्तिश्चेतिनश्रुत्योर्विरोधः॥५॥मृत्योःकालादतिमुक्तिर्व्याख्यातायजमानस्यसोतिमुच्यमानः
केनावष्टंभेनपरिच्छेदविषयंमृत्युमतीत्यफलंप्राप्नोत्यतिमुच्यतेइत्युच्यतेयदिदंप्रसिद्धमंतरिक्षमाकाशोऽनारंबणमनालंबनमिवशब्दादस्त्येव
तत्रालंबनंतत्तुनज्ञायतइत्यभिप्रायः॥
ह॥अतइति॥उदितानुदितहोमवद्विकल्पमुपेत्याविरोधमुपसंहरति॥तेनेति॥श्रुत्यंतरंमाध्यंदिनश्रुतिः॥
साधनद्वयस्येत्युभयत्रसंबध्यते॥तत्रादौमनसोब्रह्मणश्चेत्यर्थः॥उत्तरस्यप्राणस्योद्गातुश्चेत्यर्थः॥तच्छब्दश्चंद्रविषयः॥५॥यदिदमंतरिक्षमित्यादिप्रश्नां
तरंवृत्तानुवादपूर्वकमुपादत्ते॥मृत्योरिति॥व्याख्यानव्याख्येयभावेनक्रियापदेनेतव्येइत्येतत्स्वरूपमुच्यतेसमनंतरवाक्येनेतियावत्॥तद्व्याचष्टे॥य

बृ.र.
६

प्रश्नविषयंप्रपंचयति॥अन्यथेति॥आलंबनमंतरेणेतियावत्॥प्रश्नार्थंसंक्षिप्योपसंहरति॥केनेति॥अक्षरन्यासोऽक्षराणामर्थेष्वृत्तिरितियाव
त्॥मनोवैयज्ञस्येत्यादेरर्थमाह॥तत्रेति॥व्यवहारभूमिःसप्तम्यर्थः॥वाक्यार्थमाह॥तेनेति॥तृतीयातृतीयाभ्यांसंबध्यते॥दर्शनफलमाह॥तेनेति
॥वागादीनामग्न्यादिभावेनदर्शनमुक्तंत्वगादीनांतुवाय्वादिभावेनदर्शनंवक्तव्यंतत्कथंवक्तव्यशेषेसत्युपसंहारोपपत्तिरित्याशंक्याह॥सर्वाणीति॥

यत्त्विदमंतरिक्षमनारंबणमिवकेनाक्रमेणयजमानःस्वर्गंलोकमाक्रमतइति। ब्रह्मणैवोद्गात्रा वायुनावायुर्वैयज्ञस्योद्गाता तद्यदयंवायुः स उद्गाता स मुक्तिः सातिमुक्तिरित्यतिमोक्षाः...

अ.
५

यत्तुतदृश्यमानमालंबनंतत्सर्वनाम्नाकेनेतिपृच्छ्यतेअन्यथाफलप्राप्तेरसंभवाद्येनावष्टंभेनाक्रमेणयजमानःकर्मफलंप्रतिपद्यमा
नोतिमुच्यतेकिंतदितिप्रश्नविषयःकेनाक्रमेणयजमानःस्वर्गंलोकमाक्रमतेइतिस्वर्गंलोकंफलंप्राप्नोतिअतिमुच्यतइत्यर्थः॥ब्रह्मण
र्त्विजामनसाचंद्रेणेत्यक्षरन्यासःपूर्ववत्॥तत्राध्यात्मंयज्ञस्ययजमानस्ययदिदंप्रसिद्धंमनःसोसौचंद्रोधिदैवंमनोध्यात्मंचंद्रमाअधिदैवतमि

मनोवैयज्ञस्यब्रह्मातद्यदिदंमनःसोसौचंद्रःसब्रह्मासमुक्तिःसातिमुक्तिरित्यतिमोक्षाअथसंपदः॥६॥

तिहिप्रसिद्धंसएवचंद्रमाब्रह्मर्त्विक्तेनाधिभूतंब्रह्मणःपरिछिन्नंरूपमध्यात्मंचमनसएतद्द्वयमपरिछिन्नेनचंद्रमसोरूपेणपश्यतितेनचं
द्रमसामनसावलंबनेनकर्मफलंस्वर्गंलोकंप्राप्नोत्यतिमुच्यतेइत्यभिप्रायइतीत्युपसंहारार्थंवचनमित्येवंप्रकाराम्रत्योरतिमोक्षाःसर्वाणि
हिदर्शनप्रकाराणियज्ञांगविषयाण्यस्मिन्नवसरउक्तानीतिकृत्वोपसंहारइत्यतिमोक्षाएवंप्रकाराअतिमोक्षाइत्यर्थःअथसंपदःअथाधुना
संपदउच्यंतेसंपन्नामकेनचि

वागाद्यावुक्तन्यायस्यत्वगाद्यावतिदेशोत्रविवक्षितइत्याह॥एवंप्रकाराइति॥अथशब्दोदर्शनप्रभेदकथनानंत
र्यार्थः॥केयंसंपन्नामेतिपृच्छति॥संपन्नामेति॥उत्तरमाह॥केनचिदिति॥महतांफलवतामश्वमेधादिकर्मणांकर्मत्वादिनासामान्येनाल्पीयःसुकर्मसुविवक्षित

रामः
६

यथाशक्त्याग्निहोत्रादिनिर्वर्त्तनेनाश्वमेधादिमयानिर्वर्त्यं तद्रूतिध्यानं संपदित्यर्थः॥ यद्वा॥ फलस्यैव देवलोकादेरुज्ज्वलत्वादिसामान्येनाज्याद्याहुति
षु संपादनं संपदित्याह॥ फलस्येति॥ संपदनुष्ठानावसरमादर्शयति॥ सर्वैरित्याहेनेति॥ असंभवोऽनुष्ठानस्य यदेतिशेषः॥ कर्मिणामेव संपदनुष्ठानेऽधिका
र इति दर्शयितुमाहिताग्निः सन्नित्युक्तं॥ अग्निहोत्रादीनामिति निर्धारणे षष्ठी॥ यथासंभवं वर्णाश्रमानुरूपमिति यावत्॥ आदायेत्यस्य स्वाधारत्वेनमालंब
नीकृत्येति॥ न केवलं कर्मित्वमेव संपदनुष्ठातुरपेक्ष्यते किंतु तत्फलविद्यावत्त्वमपीत्याह॥ कर्मेति॥ तदेव कर्मफलमेवेत्यर्थः॥ कर्माण्येव फलवंति न संपदस्त
त्कथं तासां कार्यतेत्याशंक्याह॥ अन्यथेति॥ विहिताध्ययनस्यार्थज्ञानानुष्ठानादिपरंपरया फलवत्त्वमिष्टं न चाश्वमेधादिषु सर्वेषामनुष्ठानसंभवः कर्मस्वधि

त्सामान्ये नाग्निहोत्रादीनां कर्मणां फलवत्तां तत्फलाय संपादनं संपत्फलस्यैव वा॥ सर्वैरित्याहेन फलसाधनानुष्ठाने प्रयततां केनचिद्वैगु
ण्येनासंभवः तदिदानीं आहिताग्निः सन्यत्किंचित्कर्माग्निहोत्रादीनां यथासंभवमादायालंबनीकृत्य कर्मफलविद्वत्तायां सत्यां यत्कर्मफलका
मो भवति तदेव संपादयति अन्यथा राजसूयाश्वमेधपुरुषमेधसर्वमेधलक्षणानामनधिकृतानां त्रैवर्णिकानां केषामप्यसंभवस्तेषां तत्पाठः
स्वाध्यायार्थ एव केवलः स्यात्॥ यदि तत्फलप्राप्त्युपायः कश्चन न स्यात्तस्मात्तेषां संपदैव तत्फलप्राप्तिः तस्मात्संपदामपि फलवत्त्वमतः संपद
आरभ्यंते॥ ६॥

कृतानामपि त्रैवर्णिकानां केषांचिदनुष्ठानासंभवात्तस्तेषां तदध्ययनार्थवत्त्वानुपपत्त्या संपदामपि फलवत्त्वमेष्टव्यमित्यर्थः॥
महतोऽश्वमेधादिफलस्य कथमल्पीयस्या संपदा प्राप्तिरित्याशंक्य शास्त्रप्रामाण्यादित्यभिप्रेत्याह॥ यदीति॥ तदा तत्पाठः स्वाध्यायार्थ एवेति पूर्वेण
संबंधः॥ अध्ययनस्य फलवत्त्वे वक्तव्ये फलितमाह॥ तस्मादिति॥ तेषां राजसूयादीनामिति यावत्॥ ब्राह्मणादीनां राजसूयाद्यध्ययनसामर्थ्यात्तेषां
संपदैव तत्फलप्राप्तावपि किं सिध्यतीति तदाह॥ तस्मात्संपदामिति॥ कर्मणामिवेति दृष्टांतार्थोऽपिशब्दः॥ तासां फलवत्त्वे फलितमाह॥ अत इति॥ ६॥

संपदामारंभमुपपाद्यप्रश्नवाक्यमुत्थापयति॥ याज्ञवल्क्येतीति॥ प्रतीकमादायव्याचष्टे॥ कतिभिरित्यादिनाः कतिभिः कतमाइतिप्रश्नयोर्विषयभेदं
दर्शयति॥ संख्येयेति॥ स्तोत्रियानामान्यापिकाचिदृग्जातिरस्तीत्याशंक्याह॥ सर्वास्त्विति॥ अन्यावेतिशस्त्रजातिग्रहः॥ विधेयभेदात्सर्वशब्दात्पुनरु

याज्ञवल्क्येतिहोवाचाभिमुखीकरणायकतिभिरयमद्यास्मिन्यज्ञेकतिभि ऋग्भिः कतिसंख्याभिर्ऋग्जातिभिरयंहोतर्त्विगस्मिन्यज्ञेक
रिष्यतिशस्त्रंशंसत्याहेतरस्तिसृभिः ऋग्जातिभिरित्युक्तवंतंप्रत्याहेतरः कतमास्तास्तिस्रइतिसंख्येयविषयोयंप्रश्नः पूर्वस्तुसंख्याविषयः
पुरोनुवाक्याचप्राक्प्रयोगकालाद्याः प्रयुज्यंतेऋचः सर्ज्जातिः पुरोनुवाक्येत्युच्यतेयागार्थायाः प्रयुज्यंतेऋचः सर्ज्जातिर्याज्या॥ शस्त्रार्थायाः
प्रयुज्यंतेऋचः सर्ज्जातिः शस्यासर्वास्तुयाः काश्चनर्चः तास्तोत्रियावाअन्यावासर्वाएतास्वेवतिसृषुऋग्जातिष्वंतर्भवंतिकिंताभिर्जयतीति

याज्ञवल्क्येतिहोवाचकतिभिरयमद्यग्भिर्होतास्मिन्यज्ञेकरिष्यतीतितिसृभिरितिकतमास्तास्तिस्रइतिपुरोनुवाक्याचया
ज्याचशस्येवतृतीयाकिंताभिर्जयतीतियत्किंचेदंप्राणभृदिति॥ ७॥ यत्किंचेदंप्राणभृदितिअतश्चसंख्यासामान्याद्यत्किंचित्प्राण
भृज्जातंतत्सर्वंजयतितत्सर्वंफलजातंसंपादयतिसंख्यादिसामान्येन॥ ७॥ याज्ञवल्केतिहोवाचेतिपूर्ववत्कत्ययमद्याध्वर्युरस्मिन्य
ज्ञआहुतीर्होष्यतीतिकत्याहुतिप्रकारास्तिस्रइतिकतमास्तास्तिस्रइतिपूर्ववदितरआहयाहुताउज्ज्वलंतिसमिदाज्याहुतयः याहुता
अतिनेदंतेअतीवशब्दंकुर्वंतिमांसाद्याहुतयः याहुताअधिशेरतेअधिअधोगत्वाभूमेः क्तिः॥ अतश्चसंपत्तिकारणादित्यर्थः॥ संख्यासामा
न्यात्रित्वाविशेषादिनियावत्॥ प्राणभृज्जातंलोकत्रयंविवक्षितं॥ ७॥ प्रथमः संख्याविषयोद्वितीयस्तुसंख्येयविषयः प्रश्नइतिविभागंलक्षयति॥ पू

तेन सामान्येनोज्वलत्वेनेति यावत्॥ उक्तमर्थं संक्षिप्याह॥ देवलोकाख्यमिति कथं मांसाद्याहुतीनां पितृलोके न सह यथोक्तं सामान्यमत आह॥ पितृ

अधिशेरते पयः सोमाहुत्यः किं ताभिर्जयतीति ताभिरेवं निर्वर्तिताभिराहुतिभिः किं जयतीति या आहुतयो हुता उज्ज्वलंतीति उज्ज्वलनयुक्ता आ हुतयो निर्वर्तिताः फलं च देवलोकाख्यं उज्ज्वलमेव तेन सामान्येन या उज्ज्वलंत्य आहुतयो निर्वर्त्यमानास्ता एनाः साक्षाद्देवलोक स्य कर्मफलस्य रूपं देवलोकाख्यं फलमेव मया निर्वर्त्यत इत्येवं संपादयति या हुता अतिनेदंते आहुतयः पितृलोकमेव

याज्ञवल्क्येति होवाच कत्ययमद्याध्वर्युरस्मिन्यज्ञ आहुतीर्होष्यतीति तिस्र इति कतमास्तास्तिस्र इति या हुता उज्ज्वलंति या हुता अतिनेदंते या हुता अधिशेरते किं ताभिर्जयतीति या हुता उज्ज्वलंति देवलोकमेव ताभिर्जयति दीप्यत इव हि देवलोको या हुता अतिनेदंते पितृलोकमेव ताभिर्जयत्यतीव हि पितृलोको या हुता अधिशेरते मनुष्यलोकमेव ताभिर्जयत्यध इव हि मनु ष्यलोकः॥ ८॥

ताभिर्जयति कुत्सितशब्दकर्तृत्वसामान्येन पितृलोकसंबद्धायां हि संयमिन्यां पुर्यां वैवस्वतेन यात्यमानानां हा हताः स्म मुंच मुंचेति शब्दो भवति तथाः वदानाहुतयः तेन पितृलोकसामान्यात्पितृलोक एव मया निर्वर्त्यत इति संपादयति या हुता अधिशेरते मनुष्यलोकमेव ताभिर्जयति भूम्युपरिसंबंधसामान्यादध इव हि अध एव मनुष्यलोकः उपरितनान्साध्याँल्लोकानपेक्ष्याथवा धोगमनमपेक्ष्यातो मनुष्यलोक एव मया निर्वर्त्यत इति संपादयति पयः सोमाहुतिनिर्वर्तनकाले॥ ८॥ लोक इति॥ अधोगमनमपेक्ष्येति

अस्ति हि सोमाद्याहुतीनामधस्ताद्गमनमस्ति च मनुष्यलोकस्य पापप्रचुरस्य ताद्दग्गमनं तदपेक्ष्येत्यर्थः॥ अतः सामान्यादिति यावत्॥ ८ ॥ ॥

दक्षिणतआहवनीयस्येतिशेषः प्रासंगिकंबहुवचनमित्युक्तंप्रकटयति॥एकयाहीति॥जल्पकथाप्रस्तुतेतिहृदिनिधायबहूक्तेर्गस्यतरमाह॥अ
थवेति॥मनसोदेवतात्वंसाधयति॥मनसेति॥वर्तनीवर्त्मनीतयोर्वाङ्मनसयोर्वर्त्मनोरन्यतरांवाचंमनसामौनेनब्रह्मासंस्करोतिवाग्विसर्गेप्रायश्चि

याज्ञवल्क्येतिहोवाचेतिपूर्ववदयमग्निर्ब्रह्मादक्षिणतोब्रह्मासनेस्थित्वायज्ञंगोपायति॥कतिभिर्देवताभिर्गोपायतीतिप्रासंगिकमेतद्बहुवच
नंएकयाहिदेवतयागोपायत्यसौएवंज्ञातेबहुवचनेनप्रश्नोनोपपद्यतेस्वयंजानतःतस्मात्पूर्वयोःकंडिकयोःप्रश्नप्रतिवचनेषुकतिभिःति
सभिस्तिस्रइतिप्रसंगंदृष्ट्वेहापिबहुवचनेनैवप्रश्नोपक्रमःक्रियते अथवात्रप्रतिवादिव्यामोहार्थंबहुवचनमितरआहएकयेत्येकासादेव
तायथादक्षिणतःस्थित्वाब्रह्मासनेयज्ञंगोपायतिकतमासेकेतिमनएवेतिमनःसादेवतामनसाहिब्रह्माव्याप्रियतेध्यानेनैवतस्ययज्ञस्यम

याज्ञवल्क्येतिहोवाचकतिभिरयमद्यब्रह्मायज्ञंदक्षिणतोदेवताभिर्गोपायतीत्येकयेतिकतमासैकेतिमनएवेत्यनंतंवैमनोनंता
विश्वेदेवाअनंतमेवसतेनलोकंजयति॥९॥ नन्ववाक्वर्तनीतयोरन्यतरांमनसासंस्करोतिब्रह्मेतिश्रुत्यंतरात्तेनमनएवदेवतातया
मनसाहिगोपायतिब्रह्मायज्ञंतत्रमनोवृत्तिभेदेनानंतं वैशब्दःप्रसिद्धावद्योतकःप्रसिद्धंमनसःआनंत्यंतदानंत्यात्तदानंत्याभिमानिनोदे
वाःअनंतावैविश्वेदेवाःसर्वेदेवायत्रैकंभवंतीतिश्रुत्यंतरात्तेनानंत्यसामान्यादनंतमेवसतेनलोकंजयति॥९॥ तद्विधानादितिश्रुत्यंतरस्यार्थःत
थापिकथंसंपदःसिद्धिस्तत्राह॥तत्रेति॥देवाःसर्वेयस्मिन्मनस्येकंभवंति॥अभिन्नत्वंप्रतिपद्यंतेतस्मिन्विश्वेदेवदृष्ट्याभवत्यनंतलोकप्राप्तिरितिश्रु
त्यंतरस्यार्थः॥अनंतमेवेत्यादिव्याचष्टे॥तेनेति॥उक्तेनप्रकारेणेतियावत्॥तेनमनसिविश्वेदेवदृष्ट्यध्यासेनेत्यर्थः॥सद्गुपासकोक्तिः ॥ ९ ॥

पूर्ववदित्यभिमुखीकरणायेत्यर्थः॥ प्रतिवचनमुपादत्ते॥ स्तोत्रियाभेति॥ प्रगीतं मन्त्रजातं स्तोत्रं अप्रगीतं शस्त्रं॥ कतमास्तास्तिस्र इत्यादेस्तात्पर्यमाह॥ ताश्चेति॥ प्रश्नांतरं वृत्तमनूद्योपादत्ते॥ तत्रेति॥ यज्ञाधिकारः सप्तम्यर्थः॥ पुरोनुवाक्यादित्रिलोकत्रयजयलक्षणं फलं केन सामान्येनेत्यपेक्षायां संख्याविशेषेणेत्युक्तं स्मारयति॥ तदिति॥ अधियज्ञे त्रयमुक्तं स्मारयित्वाध्यात्मविशेषं दर्शयितुमुत्तरो ग्रंथ इत्याह॥ उच्यत इति॥ प्राणादौ पुरोनुवाक्यादौ च दृष्टि

याज्ञवल्क्येति होवाच पूर्ववत् कति स्तोत्रियाः स्तोष्यतीति अयमुद्गाता स्तोत्रियानाम ऋक्सामसमुदायः कतिपयानामृचां स्तोत्रिया वा शस्या वा याः काश्चन ऋचस्ताः सर्वास्तिस्र एवेत्याह ताश्च व्याख्याताः पुरोनुवाक्या च याज्या च शस्यैव तृतीयेति तत्र पूर्वमुक्तं यत्किंचेदं प्राणभृत्तत्सर्वं जयतीति॥ तत्केन सामान्येनेत्युच्यते कतमास्तास्तिस्र ऋचो या अध्यात्मं भवंतीति प्राण एव पुरोनुवाक्या प्रशब्दसामान्यादपानो याज्यानंतर्याद्पा

याज्ञवल्क्येति होवाच कत्ययमद्योद्गातास्मिन्यज्ञे स्तोत्रियाः स्तोष्यतीति तिस्र इति कतमास्तास्तिस्र इति पुरोनुवाक्या च याज्या च शस्यैव तृतीया कतमास्ता या अध्यात्ममिति प्राण एव पुरोनुवाक्यापानो याज्या॥ नेन हि प्रत्तं हविर्देवता ग्रसंति यागश्च प्रदानं॥ व्यानः शस्या अप्राणन्ननपानन्नृचमभिव्याहरतीति श्रुत्यंतरात् किं ताभिर्जयतीति व्याख्यातं तत्र विशेषसंबंधसामान्यमनुक्तमिहोच्यते सर्वमन्यद्व्याख्यातं लोकसंबंधसामान्येन पृथिवीलोकमेव पुरोनुवाक्यया जयत्यंतरिक्षलोकं याज्यया मध्यत्वसामान्यात् व्यादिलोकदृष्टिरिति प्रश्नपूर्वकमाह॥ कतमा इति॥ अपाने याज्यादृष्टौ हेत्वंतरमाह॥ अपानेन हीति॥ हस्तादानव्यापारेणेति यावत्॥ प्राणापानव्यापारव्यतिरेकेण शस्त्रप्रयोगस्य श्रुत्यंतरे सिद्धत्वाद्व्याने शस्यादृष्टिरित्याह॥ अप्राणन्निति॥ तत्र पुरोनुवाक्यादिषु चेति यावत्॥ इहेत्यनंतरवाक्योक्तिः॥ सर्वमन्यदिति संख्यासामान्यो

बृ.र.
९

पृथिवीलक्षणेनलोकेनसहप्रथमत्वेनसंबंधसामान्यंपुरोनुवाक्यायामस्तितेनतयापृथिवीलोकमेवप्राप्नोतीत्यर्थः॥अश्वलस्तूष्णींभावंभजतोभिप्रा
यमाह॥नायमितेि॥१०॥इत्यश्वलस्यप्रथमब्राह्मणं॥१ ॥ब्राह्मणांतरमवतारयन्नाख्यायिकाकिमर्थेतिशंकमानंप्रत्याह॥आख्यायिकेति॥याज्ञव
ल्क्योहिविद्याप्रकर्षवशादत्रपूजाभागीलक्ष्यतेनार्तभागस्तथाविद्यामांद्यादतोविद्यास्तुत्यर्थेयमाख्यायिकेत्यर्थः॥इदानींब्राह्मणार्थंवक्तुंवृत्तंकी
र्तयति॥मृत्योरिति॥मृत्युस्वरूपंपृच्छति॥कःपुनरसाविति॥तत्स्वरूपनिरूपणार्थंब्राह्मणमुत्थापयति॥सचेति॥मृत्युरितिसंबंधः॥स्वाभाविकंने

द्युलोकंशस्ययोर्ध्वत्वसामान्यात्ततोहतस्मादात्मनःप्रश्ननिर्णयाद्सौहोताश्वलउपरराममनायमस्माद्वोचरइति॥१०॥इतिश्रीमद्बृहदा
रण्यकेपंचमप्रपाठकेप्रथमब्राह्मणभाष्यंसमाप्तं॥१॥आख्यायिकासंबंधःप्रसिद्धएवमृत्योरतिमुक्तिर्व्याख्याताकाललक्षणात्कर्मलक्ष

णात्॥कःपुनरसौमृत्युर्यस्मादतिमुक्तिर्व्याख्यातासचस्वाभाविकाज्ञानासंगास्पदोध्यात्माधिभूतवि
षयपरिछिन्नोग्रहातिग्रहलक्षणोमृत्युस्तस्मात्परिछिन्नरूपान्मृत्योरतिमुक्तस्वरूपाण्यग्न्यादित्यादीन्युद्गीथप्रकरणेव्याख्यातान्यश्वलप्रश्ने
चतद्गतोविशेषःकश्चित्तच्चैतत्कर्मणांज्ञानसहितानांफलं सर्गिकमनादिसिद्धमज्ञानंतस्मादासंगस्तस्यास्पदमिवास्पदंयस्यसतथेतिविग्रहः॥तस्य
विषयमुक्त्वाव्याप्तिमाह॥अध्यात्मेति॥तस्यस्वरूपमाह॥ग्रहेति॥यथोक्तमृत्युव्याप्तिमग्न्यादीनांकथयति॥तस्मादिति॥तान्यपिग्रहातिग्रहगृहीतान्येवार्थे
न्द्रियसंसर्गित्वादित्यर्थः॥तद्गतोविशेषोग्न्यादिगतोदृष्टिभेदइतियावत्॥कश्चिद्व्याख्यातइतिसंबंधः॥सूत्रस्यापिमृत्युग्रस्तत्वमभिप्रेत्याह॥तच्चेति॥अग्न्यादित्या

व्यानःशस्याकिंताभिर्जयतीतिपृथिवीलोकमेवपुरोनुवाक्ययाजयत्यंतरिक्षलोकंयाज्ययाद्युलोकंशस्ययाततोहहोताश्वल
उपरराम॥१०॥प्रथमब्राह्मणं॥१॥

अ.
५

द्यालोकंसोत्रंपदमितियावत्॥फलंयथो
क्तमृत्युग्रस्तमितिशेषः॥

रामः
९

किमितिमृत्योर्बंधनरूपस्यस्वरूपमुच्यतेतत्राह॥ एतस्मादिति॥ ननुमोक्षेकर्त्तव्येबंधरूपोपवर्णनमनुपयुक्तमित्याशंक्याह॥ बद्धस्यहीति॥ अग्न्या
दीनांयथोक्तमृत्युव्याप्तिंउक्तांव्यक्तीकरोति॥ यद्पीति॥ अविनिर्मुक्तएवातिमुक्तोपीतिशेषः॥ तथापिकथंसूत्रस्ययथोक्तमृत्युव्याप्तिस्तत्राह॥ तथा
चेति॥ तथापिकथमग्न्यादीनांमृत्युव्याप्तिर्नहितत्रप्रमाणमस्तितत्राह॥ एकइति॥ बहवाइतिकांदसंतथापिविदुषोमृत्योरतिमुक्तस्यनतदा
प्तिरित्याशंक्याह॥ तदात्मेति॥ सौत्रेपदेमृत्युव्याप्तिंप्रकारांतरेणप्रकटयति॥ नचेति॥ मनसिकार्यकरणरूपेणदिवश्चादित्यस्यचैक्यमस्तुतथा

एतस्मात्साध्यसाधनरूपात्संसारान्मोक्षः कर्त्तव्यइत्यतोबंधनरूपस्यमृत्योः स्वरूपमुच्यतेबद्धस्यहिमोक्षः कर्त्तव्यः॥ यदप्यतिमुक्तस्यस
रूपमुक्तंतत्रापिग्रहातिग्रहाभ्यामविनिर्मुक्तएवमृत्युरूपाभ्यां तथाचोक्तमशनायामृत्युरेषएवमृत्युरित्यादित्यस्थंपुरुषमंगीकृत्याह
एकोमृत्युर्बहवाइतिच तदात्मभावापन्नोहिमृत्योराप्तिमतिमुच्यतेइत्युच्यतेनचतत्रग्रहातिग्रहौमृत्युरूपौनस्तः अथैतस्यमनसोद्यौः
शरीरंज्योतीरूपमसावादित्यः मनश्चग्रहः सकामेनातिग्राहेणगृहीतइतिवक्ष्यतिप्राणोवैग्रहः सोपानेनातिग्राहेणेतिवाग्वैग्रहः सना
म्नातिग्राहेणेतिचतथाध्यात्मविभागेव्याख्यातमस्माभिः सुविचारितंचैतद्यदेवप्रवृत्तिकारणंतदेवनिवृत्तिकारणंनभवतीति केचित्तुस
र्वमेवनिवृत्तिकारणंमन्यंते॥ पिकथंग्रहातिग्रहगृहीतत्वंसूत्रस्येत्याशंक्याह॥ मनश्चेति॥ वागादेर्वक्तव्यादेश्चग्रहत्वेतिग्रहत्वेचहिरण्यगर्भेकि
मायातमित्याशंक्याह॥ तथेति॥ कर्मफलस्यसंसारत्वाच्चतत्फलंसौत्रंपदंमृत्युग्रस्तमेवेत्याह॥ सुविचारितंचेति॥ यदेवकर्मबंधप्रवृत्तिप्रयोजकंत
देवबंधनिवृत्तेर्नकारणमतः कर्मफलंहैरण्यगर्भपदंबंधनमेवेत्यर्थः॥ स्वमतमुक्त्वामतांतरमाह॥ केचित्विति॥ सर्वमेवकर्मेतिशेषः॥ स्वर्गकामवाक्ये
देहात्मत्वनिवृत्तिर्गोदोहनवाक्येस्वतंत्राधिकारनिवृत्तिर्नित्यनैमित्तिकविधिषुवर्थांतरोपदेशेनस्वाभाविकप्रवृत्तिनिरोधोनिषेधेषुसाक्षादेवनैसर्गिकप्र

बृ॰भा॰ १०

अ॰ ५

ननु शास्त्रीयात्कर्मणो हेतोरुत्तरमुत्तरं कार्यकरणसंघातमतिशयवंतमाग्रजात्प्रतिपद्यमानः संघातात्पूर्वस्मान्मुच्यते ततः कुतो निवृत्तिपरत्वं कर्मकांड
स्येत्याशंक्याह॥ अतः कारणादिति॥ यद्यपीदमुत्तरमुत्तरं सातिशयं फलं प्राजापत्यं पदं तदपि प्रासादारोहणक्रमेण व्यावृत्तिद्वारा मोक्षमवतारयितु
मेव न तु तन्नैव प्राजापत्ये पदे श्रुतेस्तात्पर्यं तस्यापि निरतिशयफलत्वाभावादित्यर्थः॥ फलितमाह॥ इत्यत इति॥ यस्मात्पूर्वं पूर्वं परित्यज्योत्तरमुत्तरं
प्रतिपद्यमानस्तत्तन्निवृत्तिद्वारा मुक्त्यर्थमेव तत्तत्प्रतिपद्यते न तु तत्तत्पद्प्राप्त्यर्थमेव वाक्यं पर्यवसितं तत्स्यानित्यत्वेनाफलत्वात्तस्मान्नद्वैतस्य पर्यंतं
सर्वोऽपि फलविशेषो मृत्युग्रस्तत्वात्प्रासादारोहणन्यायेन मोक्षार्थो वतिष्ठते हिरण्यगर्भपदप्राप्त्याद्वैतस्य येन तु वस्तुतो मृत्योराप्तिमतीत्य परमात्मरूपेण स्थि

अतः कारणात्पूर्वस्मात्पूर्वस्मान्मृत्योर्मुच्यते उत्तरमुत्तरं प्रतिपद्यमानो व्यावृत्त्यर्थमेव प्रतिपद्यते न तु तादर्थ्यमित्यत आह द्वैतस्य यात्सर्वं मृत्युर्द्वैतस्य
येन तु परमार्थतो मृत्योराप्तिमतिमुच्यते अतश्चापेक्षिकी गौणी मुक्तिरंतराले सर्वमेतदेवमबार्हदारण्यकं॥ ननु सर्वैकत्वं मोक्षस्तस्मात्तत्सर्वमभ
वदिति श्रुतेर्बाढं भवत्येतदपि॥ ननु ग्रामकामो यजेत पशुकामो यजेतेत्यादिश्रुतीनां तादर्थ्यं परिहृत्य द्वैतार्थत्वमेवासां ग्रामपशुस्वर्गाद्यर्थत्वं नास्तीति
ग्रामपशुस्वर्गादयो न गह्येरन्नाह्यं ते न तु कर्मफलवैचित्र्यविशेषाः॥

तो मुक्तो भवति तथा च मनुष्यभावादूर्ध्वमर्वाक्परमात्मभावान्मध्ये यावत्तत्तत्पद
प्राप्तिः सा खल्वापेक्षिकी सती गौणी मुक्तिर्मुख्यात्तु पूर्वोक्तैवेत्यर्थः॥ सर्वमेतदुत्प्रेक्षामात्रेण रचितं न तु बृहदारण्यकस्य श्रुतं तरस्य चार्थ इति दूषयति॥ स
र्वमेतदिति॥ सर्वैकत्वलक्षणो मोक्षो बृहदारण्यकार्थ एवास्माभिरुच्यते तत्कथमस्मदुक्तमबार्हदारण्यकमिति शंकते॥ नन्विति॥ अंगीकरोति॥ बाढमि
ति॥ अंगीकृतमंशं विशदयति भवतीति॥ एतत्सर्वैकत्वमारण्यकार्थो भवत्यपीति योजना॥ कथं तर्हि सर्वमेतदबार्हदारण्यकमित्युक्तं तत्राह॥ नत्विति॥ तदुक्त
रीत्या कर्मश्रुतीनां यथोक्तमोक्षार्थत्वं न घटते तेन सर्वमेतदौत्प्रेक्षिकं न श्रौतमित्युक्तमित्यर्थः॥ कर्मश्रुतीनां मोक्षार्थत्वाभावं समर्थयति॥ पदिहीति॥ तस्मात्ता

राम: १०

संसारस्तावद्धर्माधर्महेतुकस्तौ च विधिनिषेधाधीनौ तयोश्चत्वदुक्तरीत्या मोक्षार्थत्वं तदा हेत्वभावात्संसार एव न स्यादित्याह॥ यदि चेति॥ विधिनिषेधयो
र्निवृत्तिद्वारामुक्त्यर्थत्वेपि विध्यादिज्ञानादनुनिष्पादितो यः कर्मपदार्थः तस्यायं स्वभावो यदुत कर्तारमनर्थेन संयुनक्तीति चोदयति॥ अथेति॥ मोक्षार्थम
पि कर्मकांडं संसारार्थं भवतीति सदृष्टांतमाह॥ यथेति॥ प्रमाणाभावेन परिहरति॥ नेति॥ तदेव व्यनक्ति॥ अद्वैतार्थत्व इति॥ अन्यस्य बंधस्येति यावत्॥
अनुपपत्तिं स्फोरयति॥ न प्रत्यक्षमिति॥ कर्मश्रुतिवाक्यस्यावांतरं तात्पर्यं यथाश्रुतेऽर्थे गृह्यते निवृत्तिद्वारा मुक्तौ तु महातात्पर्यमित्यंगीकृत्य शं
कते॥ उभयमिति॥ कृत्रिमाः क्षुद्राः सरितः कुल्यास्तासां प्रणयनं शाल्यर्थं पानीयार्थमाचमनीयार्थं च प्रदीपश्च प्रासादशोभार्थं कृतो गमनादिहेतुर

यदि च वैदिकानां कर्मणां तादर्थ्यमेव संसार एव नाभविष्यदथ स्वादर्थेप्यनुनिष्पादितपदार्थस्वभावः संसार इति चेद्यथा च रूपदर्शनार्थ
आलोके सर्वोपि तत्रस्थः प्रकाश्यत एव न प्रमाणानुपपत्तेः॥ अद्वैतार्थत्वे वैदिकानां कर्मणां विद्यासहितानामन्यस्यानुनिष्पादितत्वे प्रमा
णानुपपत्तिः॥ न प्रत्यक्षं नानुमानं मत एव च नागमः उभयमेकेन वाक्येन प्रदर्श्यत इति चेत्॥ कुल्याप्रणयनालोकादिवत् तन्नैवं वाक्यध
र्मानुपपत्तेः न चैकवाक्यगतस्यार्थस्य प्रवृत्तिनिवृत्तिसाधनत्वमवगंतुं शक्यं कुल्याप्रणयनालोकादावर्थस्य प्रत्यक्षत्वाददोषः यद्यप्युच्यते म
न्त्रा अस्मिन्नर्थे दृष्टा इति

पि भवति॥ वृक्षमूले च सेचनमनेकार्थं॥ तथा कर्मकांडमनेकार्थमित्युपपादयति॥ कुल्येति॥ एकस्य वाक्यस्य यथाश्रुतेनार्थे
नार्थबलेसंभवति नान्यत्र तात्पर्यं कल्प्यं कल्पकाभावात्॥ न च त्वदुक्तयारीत्यानेकार्थत्वलक्षणो धर्मो वाक्यस्यैकस्योपपद्यते॥ अर्थैकत्वादेकं वाक्यमिति न्या
यादिति परिहरति॥ तन्नैवमिति॥ वाक्यस्यानेकार्थत्वाभावेपि तदर्थस्य कर्मणो बंधमोक्षाख्यानेकार्थत्वं स्यादित्याशंक्याह॥ न चेति॥ परोक्तं दृष्टांतं विघटय
ति॥ कुल्येति॥ विद्यां चाविद्यां चेत्यादयो मंत्राः समुच्चयपरा दृष्टाः समुच्चयश्च कर्मकांडस्य निवृत्तिद्वारा मोक्षार्थत्वमित्यस्मिन्नर्थे सिध्यतीति शंकते॥ यद

मृत्युमे ५

कर्मकांडस्योक्तरीत्यामोक्षार्थत्वेनास्तिप्रमाणमितिपरिहरति॥अयमेवेति॥मंत्राणांसमुच्चयपरत्वान्नस्वचयथोक्तार्थाक्षेपकत्वात्कुतोस्यार्थस्यप्रमाण
गम्यतेस्याशंक्याह॥मंत्राःपुनरिति॥तेषांनसमुच्चयपरतेत्यग्रेव्यक्तीभविष्यतीत्यर्थः॥परमतासंभवेस्वमतमुपसंहरति॥तस्मादिति॥बंधनिरू
पणमनुपयोगीत्याशंक्याह॥तस्मान्मोक्षइति॥यत्तुकर्मकांडंबंधायमुक्तयेवानभवतिकिंत्वंतरावस्थानकारणमितितत्दूषयति॥नचेति॥य
थानजागर्त्तिनस्वपितीतिविषयग्रहणंक्लिद्रूंतरालेवस्थानंदुर्घटंयथाचार्धकुक्कुट्याःपाकार्थमर्धंचप्रसवायेतिकौशलंनोपलभ्यतेतथाकर्मकांडंनबं

अयमेवतुतावदर्थःप्रमाणागम्योमंत्राःपुनःकिमस्मिन्नर्थेआहोस्विदन्यस्मिन्नर्थइतिनगम्यंतेतस्माद्ग्रहातिग्रहलक्षणोमृत्युर्बंधस्तस्मान्मोक्षो
वक्तव्यइत्यतइदमारभ्यतेनचजानीमोविषयसंधाविवांतरालेवस्थानमर्धजरतीयंकौशलं॥यत्तुमृत्योरतिमुच्यतइत्युक्त्वाग्रहातिग्रहाव

अथहैनंजारत्कारवआर्त्तभागःपप्रच्छयाज्ञवल्क्येतिहोवाचकतिग्रहाःकत्यतिग्रहाइत्य

च्येतेतत्वर्थसंबंधात्सर्वोयंसाध्यसाधनलक्षणोबंधोग्रहातिग्रहाविनिर्मोकान्निगडेहिनिर्ज्ञातेनिगडितस्यमोक्षाययत्नःकर्त्तव्योभवतितस्मा
त्तादर्थ्येनारंभःअथहैनंहशब्दऐतिह्यार्थोथानंतरमश्वलेउपरतेप्रकृतंयाज्ञवल्क्यंजरत्कारुगोत्रोजारत्कारवःऋतभागस्यापत्यमार्तभागःपप्र
च्छयाज्ञवल्क्येतिहोवाचेत्संभिमुखीकरणाय धायनापिसाक्षान्मोक्षायेतिव्याख्यानंकर्तुंनजानीमइत्यर्थः॥यत्तुश्रुतिरेवोत्तरोत्तरपदप्राप्त्यभिधानव्याजेन
मोक्षेपुरुषमवतारयतीतितत्राह॥यत्त्विति॥मृत्योराप्तिमतीत्यमुच्यतइत्युक्त्वायदेतद्ग्रहातिग्रहवचनंतद्यंसर्वःसाध्यसाधनलक्षणोबंधइत्यनेनाभिप्राये
णोच्यतेतस्यार्थेनान्वयदर्शनादितियोजना॥अर्थसंबंधादित्युक्तंस्फुटयति॥ग्रहातिग्रहाविनिर्मोकादिति॥एषाहिश्रुतिर्बंधमेवप्रतिपादयतिनतुमोक्षेपुरुषमव

ननु पुरुषस्यापेक्षितो मोक्षः प्रतिपाद्यतां किमित्यनर्थात्मको बंधः प्रतिपाद्यते तत्राह ॥ निगडेहीति ॥ बंधज्ञानं विना ततो विश्लेषायोगान्मुमुक्षोः सप्रयोजक बंधज्ञानार्थत्वेनानंतरब्राह्मणप्रवृत्तिरित्युपसंहरति ॥ तस्मादिति ॥ कतिग्रहाइत्यादिः प्रथमः संख्याविषयः प्रश्नः कतमेतइति द्वितीयः संख्येयवि षयइत्याह ॥ पूर्ववदिति ॥ संप्रति प्रश्नमाक्षिपति ॥ तत्रेत्यादिना ॥ आद्यं प्रश्नमाक्षिप्य द्वितीयमाक्षिपति ॥ अपिचेति ॥ विशेषतश्चाज्ञातेष्विति चशब्दा

पूर्ववत्प्रश्नः कतिग्रहाः कत्यतिग्रहाइति इतिशब्दो वाक्यपरिसमाप्त्यर्थस्तत्र निर्ज्ञातेषु वा ग्रहातिग्रहेषु प्रश्नः स्यादनिर्ज्ञातेषु वा यदि ताव द्ग्रहा अतिग्रहाश्च निर्ज्ञातास्तदा तद्गतस्यापि गुणस्य संख्याया निर्ज्ञातत्वात्कति ग्रहाः कत्यतिग्रहाइति संख्याविषयः प्रश्नो नोपपद्यते अथा निर्ज्ञातास्तथा संख्येयविषयः प्रश्न इति के ग्रहाः केतिग्रहाइति प्रष्टव्यं न तु कति ग्रहाः कत्यतिग्रहाइति प्रश्नः अपिच निर्ज्ञातसामान्यकेषु

ऽष्टौ ग्रहा अष्टावतिग्रहाइति ये तेऽष्टौ ग्रहा अष्टावतिग्रहाः कतमेतइति ॥ १ ॥

विशेषविज्ञानाय प्रश्नो भवति ॥ यथा कतमेऽत्र कठाः कतमेऽत्र कालापाइति न चात्र ग्रहातिग्रहा नाम पदार्थाः केचन लोके प्रसिद्धा येन विशेषार्थः प्रश्नः स्यात्ननु चातिमुच्यतइत्युक्तं ग्रहगृहीतस्य हि मोक्षः समुक्तिः सातिमुक्तिरिति हि द्विरुक्तं तस्मात्प्राप्ता ग्रहा अतिग्रहाश्च ननु तत्रापि च त्वारो ग्रहा अतिग्रहाश्च निर्ज्ञाता वाक्चक्षुः प्राणमनांसि तत्र कतीति प्रश्नो नोपपद्यते निर्ज्ञातत्वान्नानवधारणार्थत्वात् र्थः ॥ मुक्त्यतिमुक्तिपदार्थद्वय प्रतियोगिनौ बंधनाख्यौ ग्रहातिग्रहौ सामान्येन प्राप्तौ प्रश्नस्तु विशेषबुभुत्सायामिति प्रष्टा चोदयति ॥ ननु चेति ॥ तथापि प्रश्नद्वयमनुपपन्नमित्याक्षे पं ब्रूते ॥ ननु तत्रेति ॥ वाग्वै यज्ञस्य होतेत्यादावितियावत् ॥ निर्ज्ञातत्वाद्विशेषस्येति शेषः ॥ अतिमोक्षोपदेशेन त्वगादेरपि सूचितत्वात्तेषु चतुष्कस्यानि

बुभुत्सायां संख्यादिविषयत्वेन प्रश्नस्योपपन्नार्थत्वान्नाक्षेपोपपत्तिरिति समाधत्ते॥ नानवधारणार्थत्वादिति॥ तदेव स्पष्टयति॥ नहीति॥ तत्र पूर्वब्राह्मणे वागादिष्विति यावत्॥ फलितं प्रथमप्रश्नोपपत्तिं कथयति॥ इहत्विति॥ ननु ग्रहाणामेव पूर्वत्रोपदेशातिदेशाभ्यां प्रतिपन्नत्वात्तेषु विशेषबुभुत्सायां कति ग्रहा इति प्रश्नेप्यतिग्रहाणामप्रतिपन्नत्वात्कथं कत्यतिग्रहा इति प्रश्नः स्यादत आह॥ तस्मादिति॥ पूर्वस्माद्ब्राह्मणादिति यावत्॥ वागादयो वक्तव्या यच्च चत्वारो ग्रहाश्चातिग्रहाश्च यद्यपि विशेषतो निर्ज्ञातास्तथाप्यतिदेशप्राप्ताश्चत्वारो विशेषतो नज्ञायंते तेन तेषु विशेषतोज्ञान

नहि चतुष्टयं तत्र विवक्षितमिहतु ग्रहातिग्रहदर्शने ऽष्टत्वगुणविवक्षया कतीति प्रश्न उपपद्यत एव तस्मात्समुक्तिः सातिमुक्तिरितिमु
त्यतिमुक्तौ हि रुक्ते ग्रहातिग्रहा अपि सिद्धाः अतः कतिसंख्याका ग्रहाः कति वा अतिग्रहा इति पृष्टवति इतर आह अष्टौ ग्रहा अष्टावतिग्र

प्राणो वै ग्रहः सोपानेनातिग्राहेण गृहीतोपानेन हि गंधान् जिघ्रति॥ १२॥ वाग्वै ग्रहः स नाम्नातिग्राहेण गृहीतो वाचा हि नामा
न्यभिवदति॥ १३॥

हा इति ये तेऽष्टौ ग्रहा अभिहिताः कतमे ते नियमेन गृहीतव्या इति तत्राह॥ ११॥ प्राणो वै ग्रहः प्राण इति घ्राणं उच्यते
प्रकरणाद्वायुसहितः सोपानेनेति गंधेनेत्येतदपानसचिवत्वादपानो गंध इत्युच्यते अपानोपहृतं हि गंधं घ्राणेन सर्वो लोको जिघ्रति तदेत
दुच्यते अपानेन हि गंधान् जिघ्रतीति॥ २॥

सिद्धये प्रश्नद्वयमभिप्रेत्य विशिनष्टि॥ नियमेनेति॥ १॥ द्वितीये प्रश्ने परिहारमुत्थापयति॥ तत्राहेति॥ प्राणशब्दस्य घ्राणविषयत्वे पूर्वोत्तरग्रंथयोर्वागादीनां प्रकृतत्वं हेतुमाह॥ प्रकरणादिति॥ तस्य गंधेन गृहीतत्वं सिध्यर्थं विशिनष्टि॥ वायुसहित इति॥ अपानशब्दस्य गंधविषयत्वे गंधस्यापानेनाविनाभावं हेतुमाह॥ अपानेति॥ तत्रैव हेत्वंतरमाह॥ अपानोपहृतं हीति॥ अपानश्वासोत्रापान

वाक्षोग्रहत्वमुपपादयति॥ वाचाहीति॥ आसंगस्य विषयः शब्दादिरेवास्पदं यस्या वाचस्तयेति विग्रहः॥ तस्मिध्यर्थमध्यात्मपरिच्छिन्नयेति विशेषणं
असत्यं परपीडाकरं मिथ्यावचनं तदेव सदृष्टमात्रविरोध्यनृतं विपरीतं वा॥ आदिपदेनेष्टानिष्टोक्ति ग्रहः॥ वाचि प्रकृतायां सनाम्नेति कथमुच्यते तत्राह॥
वागाख्यइति॥ वक्तव्येन वाचो वशीकृतत्वं साधयति॥ वक्तव्यार्थेति॥ तादर्थ्येन वचनकरणत्वेनेति यावत्॥ वचनार्थं वाचो वक्तव्येन वशीकृतत्वे फलितमा

वाग्वै ग्रहो वाचा ह्यध्यात्मपरिच्छिन्नया आसंगविषयासद्याः सत्याः नृताः सभ्यबीभत्सादिवचनेष्वाप्टतया गृहीतो लोको पहृतः तेन वाग्ग्र
हः सनाम्नातिग्राहेण गृहीतः स वागाख्यो ग्रहो नाम्ना वक्तव्येन विषयेणातिग्रहेणातिग्राह्येणेति दैर्घ्यं छान्दसं नामवक्तव्यार्था हि वाक्तेन व

जिव्हा वै ग्रहः स रसेनातिग्राहेण गृहीतो जिव्हया हि रसान् विजानाति॥ १४॥ चक्षुर्वै ग्रहः स रूपेणातिग्राहेण गृहीतश्चक्षुषा हि रू
पाणि पश्यति॥ १५॥ श्रोत्रं वै ग्रहः स शब्देनातिग्राहेण गृहीतः श्रोत्रेण हि शब्दाञ्छृणोति॥ १६॥ मनो वै ग्रहः स कामेनाऽतिग्राहेण गृ
हीतो मनसा हि कामान्कामयते॥ १७॥ हस्तौ वै ग्रहः स कर्मणातिग्राहेण गृहीतो हस्ताभ्यां हि कर्म करोति॥ १८॥ त्वग्वै ग्रहः स स्पर्शे
नातिग्राहेण गृहीतस्त्वचा हि स्पर्शान्वेदयत इत्येतेऽष्टौ ग्रहा अष्टावतिग्रहाः॥ १९॥ क्तव्येनार्थेन प्रयुक्ता वाक्तेन वशीकृता तेन तत्कार्यमकृत्वा

नैव तस्या मोक्षोतो नाम्नातिग्रहेण गृहीता वागित्युच्यते वक्तव्यासंगेन हि प्रवृत्ता सर्वा नैर्थैर्युज्यते॥ ३॥ समानमन्यदित्येतेत्वक्पर्यंता अष्टौ ग्रहाः

ह॥ तेनेति॥ तत्कार्यं वचनं मोक्षश्चासाधारणे देवतात्मनि पर्यवसानं॥ वक्तव्यार्थोक्तिं विना वाचोपर्यवसाने सिद्धमर्थमाह॥ अतइति॥ वाचोतिग्रहगृहीत
त्वमनुभवेन साधयति॥ वक्तव्येति॥ ३॥ वाचा हीत्यादेरपानेन हीत्यादिना तुल्यार्थत्वाद्व्याख्येयत्वमाह॥ समानमिति॥ घ्राणं वाग्जिह्वा चक्षुः श्रोत्रं मनो हस्तौ त

गंधोनामरसोरूपंशब्दः कामः कर्मस्पर्शइत्यतिग्रहानपिनिगमयति॥ स्पर्शपर्यंतान्वेति॥ १८॥ प्रतीकमादायव्याचष्टे यदिदमिति॥ यदिदंव्याकृतंज
गत्सर्वंमृत्योरन्नमितियोजना॥ तस्यतदन्नत्वंसाधयति॥ सर्वमिति॥ मृत्योरन्नत्वसंभावनायांश्रुत्यंतरंसंवादयति॥ मृत्युरिति॥ मृत्योर्मृत्युमधिकृत्यप्र
श्नस्यकरदंतनिरूपणवदप्रयोजनत्वमाशंक्याह॥ अयमिति॥ सत्येवग्रहातिग्रहलक्षणेमृत्यौमोक्षोभविष्यतीतिचेन्नेत्याह॥ ग्रहेति॥ अस्तुनर्हि

स्पर्शपर्यंतान्नएतेष्टावतिग्रहाइति॥ १९॥ उपसंहृतेषुग्रहातिग्रहेषुआहपुनर्याज्ञवल्क्येतिहोवाचयदिदंसर्वंमृत्योरन्नंयदि
दंव्याकृतंसर्वंमृत्योरन्नंसर्वंजायतेविपद्यतेचग्रहातिग्रहलक्षणेनमृत्युनाग्रस्तंकास्वित्कानुस्यात्सादेवतायस्यादेवतायामृत्यु
रप्यन्नंभवेन्मृत्युर्यस्योपसेचनमितिश्रुत्यंतरादयमभिप्रायःप्रष्टुः॥ यदिमृत्योर्मृत्युर्वक्ष्यत्यनवस्थास्यादथनवक्ष्यत्यस्माद्ग्रहातिग्रहल

याज्ञवल्क्येतिहोवाचयदिदꣳसर्वंमृत्योरन्नं॥ कास्वित्सादेवतायस्यामृत्युरन्नमित्यग्निर्वैमृत्युःसोपामन्नमपपुनर्मृत्युंज
यति॥ २०॥ क्षणान्मृत्योर्मोक्षोनोपपद्यतेग्रहातिग्रहमृत्युविनाशेहिमोक्षःस्यात्सयदिमृत्योरपिमृत्युःस्याद्भवेद्ग्रहातिग्रहलक्ष
णस्यमृत्योर्विनाशःअतोदुर्वचनंप्रश्नंमन्वानःपृच्छतिकास्वित्सादेवतेत्यस्तितावन्मृत्योर्मृत्युर्नन्वनवस्थास्यात्तस्याप्यन्योमृत्युरि
तिनानवस्थासर्वमृत्योर्मृत्युत्वंतरानुपपत्तेः ग्रहातिग्रहनाशेमुक्तिरित्यतआह॥ सयदीति॥ नचमृत्योर्मृत्युरस्त्यनवस्थानादित्युक्तमिति
भावः पक्षेनवस्थानात्पक्षेचामुक्तेरित्यतःशब्दार्थःअस्तिपक्षंपरिगृह्णाति॥ अस्तितावदिति॥ मृत्योर्मृत्युर्ब्रह्मात्मसाक्षात्कारोविवक्षितस्तस्याप्यन्यो
मृत्युरस्तिचेदनवस्था॥ नास्तिचेत्तद्धेतुज्ञानस्यापिस्थितेरमुक्तिरितिशंकते॥ नन्विति॥ तत्रास्तिपक्षंपरिगृह्यपरिहरति॥ नानवस्थेति॥ यथोक्तस्यमृ

उक्तंपक्षंप्रश्नद्वाराप्रमाणारूढंकरोति॥कथमिति॥दृष्टत्वंस्पष्टयति॥अग्निस्तावदिति॥दृष्टफलमाचष्टे॥गृह्णाणेति॥तस्यकार्यंकथयति॥तेनेति
॥अपपुनर्मृत्युंजयतीत्यस्यपातनिकांकरोति॥तस्मिन्निति॥उक्तमेवव्यक्तीकरोति॥बंधनंहीति॥प्रसाधितंमृत्योरपिमृत्युरस्तीतिप्रदर्शनेनेतिशे
षः॥मोक्षोपपत्तौफलितमाह॥अतइति॥पुरुषप्रयासःशमादिपूर्वकश्रवणादिः॥तत्फलस्यज्ञानस्यफलंदर्शयन्वाक्यंयोजयति॥अतइति॥ज्ञानंपं

कथंपुनरवगम्यतेस्तिमृत्योर्मृत्युरितिदृष्टत्वादग्निस्तावत्सर्वस्यदृष्टोमृत्युर्विनाशकत्वात्सोद्भिर्भक्ष्यतेसोग्निरपामन्नंगृह्णाणतर्ह्यस्तिमृ
त्योर्मृत्युरितितेनसर्वंग्रहातिग्रहजातंभक्ष्यतेमृत्योर्मृत्युनातस्मिन्बंधनेनाशितेमृत्युनाभक्षितेसंसारान्मोक्षउपपन्नोभवतिबंधनंहिग्रहा
तिग्रहलक्षणमुक्तंतस्माच्चमोक्षउपपद्यतइतिएतस्त्वसाधितमतोबंधमोक्षायपुरुषप्रयासःसफलोभवत्यतोपजयतिपुनर्मृत्युं॥२०॥परेण

याज्ञवल्क्येतिहोवाचयत्रायंपुरुषोम्रियतउदस्मात्प्राणाःक्रामंत्याहो३नेतिनेतिहोवाचयाज्ञवल्क्योत्रैवसमवनीयंते॥

मृत्युनामृत्यैभक्षितेपरमात्मदर्शनेनयोसौमुक्तोविद्वान्सोयंपुरुषोयत्रयस्मिन्कालेम्रियतेउदूर्ध्वमस्माद्ब्रह्मविदोम्रियमाणात्प्राणावागाद
योग्रहाःनामादयश्चातिग्रहाःवासनारूपाःअंतस्थाःसप्रयोजकाःक्रामंत्यूर्ध्वंउत्क्रामंतिआहोस्विन्नेतिनेतीतिहोवाचयाज्ञवल्क्योनोत्क्रा
मंत्यत्रैवास्मिन्नेवपरेणात्मना चमर्थः॥२०॥सम्यक्ज्ञानस्यापपुनर्मृत्युंजयतीत्युक्तंफलंविशदीकर्तुंप्रश्नांतरमुत्थापयति॥परेणेति॥परेणमृत्युना
परमात्मदर्शनेनेतिसंबंधः॥ग्रहातिग्रहलक्षणोबंधःसप्तम्यर्थः॥ग्रहशब्देनप्रयोज्यराशिर्गृहीतःनामादीनांस्थूलानांबहिष्ठत्वेनस्वरसतस्त्यक्तत्वात्कथंतदु
त्क्रांतिःप्रष्टव्यतेतत्राह॥वासनारूपाइतितेषामनुत्क्रांतौमुक्त्यसंभवंसूचयति॥सप्रयोजकाइति॥उत्क्रांतिपक्षेध्रुवंजन्मम्रतस्यचेतिन्यायात्पुनरुत्पत्तिःस्याद

उत्क्रांतिपक्षेमरणमितिद्विजेषुऋचेतेतिभावः॥

बृ॰र॰
१४

द्वितीयंपक्षंपरिगृह्यपरिहरति॥नेतिहोवाचेत्यादिना॥कार्याणिकरणानिवासर्वाणिपरेणात्मनासहाविभागंगच्छंतिसत्यस्मिन्नेवविदुषिसमवनी
यंतइतिसंबंधः॥तेषांविदुषिविलयेहेतुमाह॥स्वयोनाविति॥विद्वानेवहिपूर्वमविद्ययातेषांयोनिरासीत्तस्मिन्विद्यादशायांतद्बलाद्विद्यायामपनी
तायांपरिपूर्णतत्वेतेषांपर्यवसानंसंभवतीत्यर्थः॥कारणेकार्याणांप्रविलयेदृष्टांतमाह॥ऊर्मयइति॥प्राणादीनांकारणसंसर्गाख्योलयःसूक्ष्मेपुनरुत्त

ऽविभागंगच्छंतिविदुषिकरणानिस्वयोनौपरब्रह्मसतत्वेसमवनीयंतेएकीभावेनसमवसृज्यंतेप्रलीयंतइत्यर्थः॥ऊर्मयइवसमुद्रेतथा
चश्रुत्यंतरंकलाशब्दवाच्यानांप्राणानांपरस्मिन्नात्मनिप्रलयंदर्शयतिएवमेवास्यपरिद्रष्टुरिमाःषोडशकलाःपुरुषायणाः॥पुरुषंप्रा
प्यास्तंगच्छंतीतिपरेणात्मनाऽविभागंगच्छंतीतिदर्शितंनतर्हिमृतोनहिमृतश्चायंयस्मात्सउच्छ्वयत्युच्छूनतांप्रतिपद्यतेआध्मायतिबा

सउच्छ्वयत्याध्मायत्याध्मातोमृतःशेते॥२१॥याज्ञवल्क्येतिहोवाचयत्रायंपुरुषोम्रियतेकिमेनंनजहातीतिनामे

ह्येनवायुनापूर्यतेदृतिवदाध्मातोमृतःशेतेनिश्चेष्टोबंधननाशेमुक्तस्यनक्वचिद्गमनमितिवाक्यार्थः॥२१॥मुक्तस्यकिंप्राणाएव
समवनीयंतेआहोस्वित्तत्प्रयोजकमपिसर्व त्तिःस्यादित्याशंक्याज्ञानेसत्यज्ञानध्वंसान्नैवमित्यभिप्रेत्याह॥तथाचेति॥स्वविषयाण्येका
दशेंद्रियाणिवायवश्चपंचेतिषोडशकलास्तासांस्वातंत्र्यमाश्रयांतरंचवारयति॥पुरुषायणाइति॥तासांनिवृत्तिश्चपुरुषव्यतिरेकेणनास्ती
तिसूचयति॥पुरुषंप्राप्येति॥प्राणाश्चेन्नोत्क्रामंतितर्हिमृतोनभवतीतिप्रतीतिविरोधंशंकितेपरिहरति॥नतर्हीत्यादिना॥दृतिशब्दोभ
स्त्राविषयः॥प्रकृतंवाक्यंप्रत्यक्षसिद्धदेहमरणानुवादकमित्यभिप्रेत्याह॥बंधनेति॥२१॥प्राणानोत्क्रामंतीतिविशेषणमाश्रित्यप्रश्नांतरमादत्ते॥स

अ॰
५

॥श्रीः॥
रामः
१४

पक्षद्वयेपिप्रयोजनंकथयति॥अथेत्यादिना॥यत्तुत्रक्षेत्राद्यभूत्तदधुनानाममात्रावशेषमित्युक्तेनावशिष्टंकिंचिदितियथावगम्यतेतथात्रापिनाम
मात्रंम्रियमाणंविद्वांसंनजहातीत्युक्तेनकिंचिदवशिष्टमितिदृष्टिःस्यादितिप्रत्युक्तितात्पर्यमाह॥सर्वमिति॥यथाश्रुतमर्थमाश्रित्यप्रत्युक्तिंव्या
चष्टे॥नाममात्रंत्विति॥विदुषोनामनित्यत्वेहेतुंतत्तरमुत्तरवाक्यावष्टंभेनदर्शयति॥नित्यंहीति॥अनंतशब्दान्नाम्नोव्यक्तिप्राचुर्यंप्रतिभातिकुतोनित्य

मथप्राणाएवनतत्प्रयोजकंसर्वप्रयोजकेविद्यमानेपुनःप्राणानांप्रसंगोऽथसर्वमेवकामकर्मादिततोमोक्षउपपद्यतइत्येवमर्थः।उ
त्तरःप्रश्नः॥याज्ञवल्क्येतिहोवाचयत्रायंपुरुषोम्रियतेकिमेनंनजहातीतिआहेतरःनामेतिसर्वंसमवनीयतइत्यर्थः॥नाममात्रंतु
नलीयतेआकृतिसंबंधान्नित्यंहिनामानंतंवैनामनित्यत्वमेवानंत्यंनाम्नःतदानंत्याधिकृताअनंतावैविश्वेदेवाअनंतमेवसतेनलोकं

स्यनंतंवैनामानंताविश्वेदेवाअनंतमेवसतेनलोकंजयति॥२२॥

जयतितन्नामानंत्याधिकृतान्विश्वान्देवानात्मत्वेनोपेत्यतेनानंत्यदर्शनेनानंतमेवलोकंजयति॥२२॥१२॥ग्रहातिग्रहरूपंबंधनमुक्तं
मृत्युरूपंतस्यचमृत्योर्मृत्युसद्भावान्मोक्षश्चोपपद्यतेसचमोक्षोग्रहातिग्रहरूपाणामिहैवप्रलयःप्रदीपनिर्वाणव
नेत्याशंक्याह॥नि
त्यत्वमेवेति॥व्यक्तिभेदस्यप्रसिद्धत्वान्नतद्वक्तव्यं॥ब्रह्मविदःस्वदृष्ट्यानामापिनशिष्यतेपरदृष्ट्यातदवशेषोक्तिःशुकोमुक्तइत्यादिव्यपदेशदर्श
नात्ततोनामनित्यत्वंव्यावहारिकमितिभावः॥ब्रह्मास्मीतिदर्शनेनविश्वेदेवानात्मत्वेनोपगम्यानंतंलोकंजयतीतिसिद्धानुवादोब्रह्मविद्यास्तोतुमित्यभि
प्रेत्यानंतरवाक्यमादत्ते॥तदानंत्येति॥तद्व्याचष्टे॥तन्नामेति॥२२॥१२॥यत्रास्येत्यादेस्तात्पर्यंवृत्तानुवादपूर्वकंकथयति॥ग्रहातिग्रहरूपमित्यादिना॥

किमेनमित्यादिवाक्यस्य व्याख्यामुक्त्वा यत्रेत्यादेस्तात्पर्यं चोक्तं ॥ इदानीं भर्तृप्रपंचप्रस्थानमुत्थापयति ॥ अत्रेति ॥ किमेनमित्यादाविति यावत् ॥ समु
च्चयानुष्ठानाद्देहयोः सप्रयोजकयोर्नाशेऽपि पुंसो मुक्तिर्न चेत्तर्हि तस्य बद्धत्वायोगात्कामसौदशामवलंबतामित्याशंक्याह ॥ नामावशिष्ट इति ॥ स्थि
तेरूखरवदवस्थितात्मा विद्यया परस्मात् परिच्छिन्नश्चेदात्मा तर्हि बंधपक्षस्यैव स्यात्तनुभोज्याज्जगतो व्यावृत्तिरित्याशंक्याह ॥ उच्छिन्नेति ॥ सर्वस्य
कर्मादिफलस्य सूत्रात्मनः समुच्चयासादितस्य भोगादप्राप्तार्थाभावात्कामासिध्या कर्माभावात्सप्रयोजकराशेरुच्छित्तिरित्यर्थः ॥ किमेनमित्यादावंत

यत्तद्ग्रहातिग्रहाख्यं बंधनं मृत्युरूपं तस्य यत्प्रयोजकं तत्स्वरूपनिर्धारणार्थमिदमारभ्यते याज्ञवल्क्येति होवाच ॥ अत्र केचिद्वर्णयंति
ग्रहातिग्रहस्य सप्रयोजकस्य विनाशेऽपि किल न मुच्यते नामावशिष्टो विद्ययोषरस्थानीयया स्वात्मप्रभवया परमात्मनः परिच्छिन्नो
भोज्याच्च जगतो व्यावृत्त उच्छिन्नकामकर्मा तरालेऽवतिष्ठते तस्य परमात्मैकत्वदर्शनेन नष्टे तद्दर्शनमपनेतव्यमित्यतः परं परमात्मदर्श
नमारब्धव्यमित्येवमपवर्गाख्यामंतरालावस्थां परिकल्प्योत्तरग्रंथसंबंधं कुर्वंति तन्न वक्तव्यं ॥ विशीर्णेषु करणेषु विदेहस्य परमात्मद
र्शनश्रवणमनननिदिध्यासनानि कथमिति समवनीतप्राणस्य हि नाममात्रावशिष्टस्येति तैरुच्यते मृतः शेत इति ह्युक्तं न मनोरथेनाप्य
तदुपपादयितुं शक्यते

रालावस्थस्य विद्याधिकारिणो निर्धारणात्तदपेक्षितविद्याशेषत्वेनोषस्तप्रश्नादेरारंभं संभावयति ॥ तस्येति इति शब्दो व
र्णयंतीत्यनेन संबध्यते तर्हि यत्रोषस्तप्रश्नादौ ब्रह्मविद्योच्यते तस्यैवारंभो युक्तो यत्रास्येत्यादिस्तु वृथेत्याशंक्य फलवद्विद्याप्राप्तिशेषत्वेन निवर्त्यमृत्यु
प्रयोजकनिर्धारणार्थो यत्रेत्यादिरित्यभिप्रेत्याह ॥ एवमिति ॥ हिरण्यगर्भादन्यो नान्यो वा विद्याधिकारी प्रथमेऽपि मृतस्य जीवतो वा विद्याधिकारो विवक्षि
तस्त्वये तिष्ठत्विति ॥ तत्रेति ॥ तत्राद्यमाक्षिपति ॥ विशीर्णेष्विति ॥ आक्षेपं स्फुटयितुं तदीयामुक्तिमनुवदति ॥ समवनीतेति ॥ नाममात्रावशिष्टस्याधि

समवनीतप्राणस्येत्यत्रश्रुतिंसंवादयति॥मृतइति॥कथमेतावतायथोक्ताक्षेपसिद्धिस्तत्राह॥नमनोरथेनेति॥उपसंहृतप्राणस्यश्रवणाद्यधिकारि
त्वमेतत्कुब्दार्थः॥द्वितीयंशंकते॥अथेति॥अपावृत्तोविद्याधिकारीतिशेषः॥जीवतोभोग्याद्व्यावर्तनंसम्यग्धियंविनादुःशकमितिमत्वाएकइति॥नेति
ति॥अप्राप्तेकामोभवतिप्राप्तेनिवर्ततइतिप्रसिद्धेः अपरविद्ययाकर्मसमुच्चितयाहैरण्यगर्भपदप्राप्तिरेवनिवृत्तिकारणमितिशंकते॥समस्तेति॥अ

अथजीवन्नेवाविद्यामात्रावशिष्टोभोज्यादपावृत्तइतिपरिकल्प्यतेतत्तुकिंनिमित्तंइतिवक्तव्यंसमस्तद्वैतैकत्वात्मप्राप्तिनिमित्तमितियद्युच्येत
तत्पूर्वमेवनिराकृतंकर्मसहितेनद्वैतैकत्वात्मदर्शनेनसंपन्नोविद्वान्मृतःसमवनीतप्राणोजगदात्मत्वंहिरण्यगर्भस्वरूपंवाप्राप्नुयादसम
वनीतप्राणोभोज्याज्जीवन्नेववाव्यावृत्तोविरक्तःपरमात्मदर्शनाभिमुखःस्यान्नचोभयमेकप्रयत्ननिष्पाद्येनसाधनेनलभ्यंहिरण्यगर्भप्रा
प्तिसाधनंचेन्नततोव्यावृत्तिसाधनंपरमात्माभिमुखीकरणस्यभोज्याद्व्यावृत्तेःसाधनंचेन्नहिरण्यगर्भप्राप्तिसाधनंनहियद्गतिसाधनंतद्ग
तिनिवृत्तेरपि॥अथमृत्वाहिरण्यगर्भंप्राप्यततःसमवनीतप्राणोनामावशिष्टःपरमात्मज्ञानेऽधिक्रियतेततोस्मदाद्यर्थंपरमात्मज्ञानोपदेशो
नर्थकःस्यात्सर्वेषांहिब्रह्मविद्यापुरुषार्थायोपदेश्यतेतद्योयोदेवानामित्याद्ययाश्रुत्या

परविद्यासमुच्चितंकर्महैरण्यगर्भभोगप्रापकंनभोग्यान्निवृ
त्तिसाधनमितितृतीयेव्युत्पादितमितिपरिहरति॥तत्पूर्वमेवेति॥उक्तमेवव्यक्तीकुर्वन्विभजते॥कर्मसहितेनेति॥अथैकमेवसमुच्चितंकर्मोभयार्थंकिंन
स्यादतआह॥नचेति॥उभयार्थत्वाभावंसमर्थयति॥हिरण्यगर्भेत्यादिना॥समुच्चितंकर्मनोभयार्थमित्यत्रदृष्टांतमाह॥नहीति॥हिरण्यगर्भोविद्याधिकारी
तिपक्षंनिक्षिपति॥अथेति॥दूषयति॥तत इति॥ननुमहानुभावानामस्मद्विशिष्टानामेवब्रह्मविद्योपदिश्यमानामोक्षफलयतिनास्माकमित्याशंक्याह॥सर्वेषांहीति॥न
१= नन्वसर्वज्ञात्मनएकत्वात्कस्मिंश्चिच्छरीरेश्रवणादिनाविद्योदयेतयैवविद्ययातस्यैकस्यात्मनोमुक्तिसिद्धेरात्मांतरस्यवद्धस्याभावाद्देहांतरेश्रवणादिनाविद्योदयस्यनिष्फलत्वंप्राप्त
मेतदस्त्विति चेन्नविद्योदयानां योयोदेवानामित्यत्रबहुत्वश्रवणाद्देवमनुष्यादिदेहोपाधिभेदादुपहितभेदेस्वस्वकाल्पनिकविद्योदयबहुत्वस्यायमज्ञोयमज्ञोयंविज्ञोयंविज्ञइतियथाप्र
तीत्याव्यवस्थोपपत्तेश्च वस्तुगत्यातुनिर्विशेषचिन्मात्रेऽविद्यादीनामसंभवएव तथाचननिरोधोनचोत्पत्तिरित्यादिश्रुतिभ्याशंकानिरासात्= १

द्वारैव चिदात्मनो मुक्तिसिद्धौ कृतमितरत्रश्रवणादिनेति वाच्यं द्वारभेदस्यानुष्ठातृविभागाधीनप्रवृत्तिप्रयुक्तप्रयोजनवद्विद्योदयस्य च काल्पनिकत्वेन यथाप्रतीतिव्यवस्थोपपत्तेर्वस्तुतो निर्विशेषे चिन्मात्रे नाविद्याविद्ये बंधमुक्ती चेत्यभिप्रेत्य परपक्षनिराकरणमुपसंहृत्य श्रुतिव्याख्यानं प्रस्तौति ॥तस्मादिति॥ कर्त्तव्ये श्रुतिव्याख्याने पदैस्त्याद्याकांक्षापूर्वकमवतारयति॥ तत्रेति॥ तत्र पुरुषशब्देन विद्वानुक्तोऽनंतरवाक्ये तस्य सन्निधेरित्याशंक्य वस्तुमा

तस्माद्यं तर्कदृष्टशास्त्रबाह्यैवेयं कल्पना प्रकृतं तु वर्त्तयिष्यामः तत्र केन प्रयुक्तं ग्रहातिग्रहलक्षणं बंधनमित्येतन्निर्दिधारयिषयाह यत्रास्य पुरुषस्य असम्यग्दर्शिनः शिरः पाण्यादिमतां तस्य वागग्निमप्येति वातं प्राणोऽप्येति चक्षुरादित्यमप्येतीति सर्वत्र संबध्यते मनश्चं

याज्ञवल्क्येति होवाच यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यं मनश्चंद्रं दिशः श्रोत्रं पृथिवीं शरीरमाकाशमात्मौषधीर्लोमानि वनस्पतीन्केशा अप्सु लोहितं च रेतश्च निधीयते॥

द्रं दिशः श्रोत्रं पृथिवीं शरीरमाकाशमात्मेत्यत्रात्माधिष्ठानं हृदयाकाशमुच्यते स आकाशमप्येति ओषधीरपियंति लोमानि वनस्पतीनपियंति केशाः अप्सु लोहितं रेतश्च निधीयते निधीयत इति पुनरादानलिंगं॥ सर्वत्र हि वागादिशब्देन देवताः परिगृह्यंते न तु करणान्येतान्यपक्रामंति प्राङ्मोक्षात्तत्र

णकर्माश्रयत्वलिंगेन बाध्यः सन्निधिरित्यभिप्रेत्याह॥ असम्यग्दर्शिन इति॥ सन्निधिबाधे लिंगांतरमाह॥ निधीयत इति॥ तस्य हि पुनरादानयोग्यद्रव्यनिधाने प्रयोगदर्शनादिहापि पुनरादानं लोहितादेराभाति अतः प्रसिद्धसंसारिगोचर एवायं प्रश्न इत्यर्थः॥ आविदुषो वागादिलयाभावाद्वाङ्मनसि दर्शनादिन्यायात्तस्य चात्र श्रुतेर्विद्वानेव पुरुषस्तदीयकलाविलयस्य श्रुतिप्रसिद्धत्वादित्याशंक्याह॥ सर्वत्र हीति॥ अग्न्याद्यंशानां वागादिशब्दितानामपक्रमणेऽपि करणानां तदभावे तदधिष्ठानस्य देहस्यापि भावेन

क्रिंडारव्यतिरेकपुरुषवतः ४

देवतांशेषूपसंहृतेष्विति यावत्॥ तेषां ताभिरनधिष्ठितत्वे सत्यर्थक्रियाऽक्षमत्वं फलतीत्याह॥ न्यस्तेति॥ करणानामधिष्ठातृहीनानां भोगहेतुत्वाभावेपि कथमाश्रयप्रश्नो भोक्तुः स्यादित्याशंक्याह॥ विदेहश्चेति॥ प्रश्नं विवृणोति॥ यमाश्रयमिति॥ आहरेत्यादि परिहारमवतारयति॥ अत्रेति॥ मीमांसकालोकायताज्योतिर्विदो वैदिका देवताकांडीया विज्ञानवादिनो माध्यमिकाश्चेत्यनेके विप्रतिपत्तारो जल्पन्यायेन परस्परप्रचलितमात्रपर्यंतेन विचारेणेति यावत्॥

देवताभिरनधिष्ठितानि करणानि न्यस्तदात्राद्युपमानानि विदेहश्च कर्तापुरुषोऽस्वतंत्रः किमाश्रितो भवतीति पृष्ट्व्यतेऽकार्यं तदा पुरुषो भवतीति किमाश्रितस्तदा पुरुषो भवतीति यमाश्रयमाश्रित्य पुनः कार्यकरणसंघातमुपादत्ते येन ग्रहातिग्रहलक्षणं बंधनं प्रयुज्यते तत्किमिति प्रश्नः अत्रोच्यते स्वभावयदृच्छाकालकर्मदैवविज्ञानमात्रशून्यानि वादिभिः परिकल्पितान्यतोऽनेकविप्रतिपत्तिस्थानत्वान्नैव जल्पन्यायेन

कार्यं तदा पुरुषो भवतीत्याहर सोम्य हस्तमार्त्तभागावामेवैतस्य वेदिष्यावो न नावेतत्सजन इति ॥

वस्तुनिर्णयोऽत्र वस्तुनिर्णयं चेदिच्छसि आहर सोम्य हस्तमार्त्तभाग हे आवामेवैतस्य त्वत्पृष्टस्य वेदितव्यं यत्तद्वेदिष्यावो निरूपयिष्यावः कस्मान्न नौ आवयोरेतद्वस्तु सजने जनसमुदाये निर्णेतुं शक्यतेऽ तस्मादेकांतं गमिष्यावो विचारणाय॥ तौ हेत्यादि श्रुतिवचनं तौ याज्ञवल्क्यार्तभागावेकांतं गत्वा किं चक्रतुरित्युच्यते तौ ह उत्क्रम्य सजनाद्देशान्मंत्रयांचक्राते आदौ लौकिकवादिपक्षाणामेकैकं परिगृह्य विचारितवंतौ तौ ह विचार्य यदूचतुरपोह्य पूर्वपक्षान्सर्वानेव तच्छृणु कर्म हैवाश्रयं पुनः पुनः कार्यकरणोपादानहेतुं तत्तत्रोचतुरुक्तवंतौ॥ अत्रेति प्रश्नोक्तिः॥ ननु प्रष्टार्त्तभागो याज्ञवल्क्यश्च प्रतिवक्तेति द्वाविहोपलभ्येते तथा च तौ हेत्यादिवचनमयुक्तं तृतीयस्यात्राभावादत आह॥ तौ हेत्यादीति॥ तत्रैसेकांते स्थि

नकेवलंकर्मकारणमूचतुः किंतुतदेवकालादिषुहेतुष्वभ्युपगतेषुसत्सुप्रशशंसतुरतः प्रशंसावचनात्कर्मणः प्राधान्यंगम्यतेनतुकालादीनामहेतुत्वं तेषांकर्मस्वरूपनिष्पत्तौकारकतयागुणभावदर्शनात्फलकालेपितत्प्राधान्येनैवतद्धेतुत्वसंभवादित्याह॥ नकेवलमिति॥ पुण्योवैपुण्येनेत्यादिव्याचष्टे॥ यस्मादित्यादिना॥ १३॥ इत्यार्तभागब्राह्मणंद्वितीयं॥ २॥ ब्राह्मणांतरमवतार्यवृत्तंकीर्तयति॥ अथेत्यादिना॥ उक्तमेवतत्स्पष्टत्वंव्यक्तीकरोति

नकेवलंकालकर्मदैवेश्वरेष्वभ्युपगतेषुहेतुषुयत्प्रशशंसतुस्तौकर्महैवतत्प्रशशंसतुर्यस्मान्निर्धारितमेतत्कर्मप्रयुक्तंग्रहातिग्रहादि कार्यकरणोपादानंपुनःपुनस्तस्मात्पुण्योवैशास्त्रविहितेनपुण्येनकर्मणाभवतितद्विपरीतेनविपरीतोभवतिपापःपापेनेत्येवंया ज्ञवल्क्येनप्रश्नेषुनिर्णीतेषुततोऽशक्यप्रकंप्यत्वाद्याज्ञवल्क्यस्यहजारत्कारवआर्तभागउपरराम॥ १३॥ इतिश्रीमद्बृहदारण्यपंचमेप्रपाठ

तौहोत्क्रम्यमंत्रयांचक्रातेतौहयदूचतुःकर्महैवतदूचतुरथयत्प्रशशꣳसतुःकर्महैवतत्प्रशशꣳसतुःपुण्योवैपुण्येनकर्मणा भवतिपापःपापेनेतिततोहजारत्कारवआर्तभागउपरराम॥ २३॥ द्वितीयंब्राह्मणं॥ २॥ केद्वितीयंब्राह्मणं॥ २॥ अथहैनंभुज्युर्लाह्याय

निःपप्रच्छग्रहातिग्रहलक्षणंबंधनमुक्तंयस्मात्सप्रयोजकान्मुक्तोमुच्यतेयेनवाबद्धःसंसरतिसमृत्युस्तस्माच्चमोक्षउपपद्यतेयस्मान्मृत्योर्मृत्युर स्तिमुक्तस्यचनगतिः क्वचित्सर्वोत्सादोनाममात्रावशेषःप्रदीपनिर्वाणवदितिचावधृतंतत्रसंसरतांमुच्यमानानांचकार्यकरणानांस्वकारणसंसर्गे समानेमुक्तानामत्यंतमेवपुनरनुपादानंसंसरतांतुपुनःपुनरुपादानंयेनप्रयुक्तानांभवतितत्कर्मेत्यवधारितंविचारणपूर्वकं ॥ यस्मादिति॥ अग्निर्वैमृ त्युरित्यादावुक्तंस्मारयति॥ तस्मादिति॥ यत्रायमित्यादावुक्तमनुद्रवति॥ मुक्तस्यचेति॥ यत्रास्येत्यादौनिर्णीतमनुभाषते॥ तत्रेति॥ पूर्वब्राह्मणस्योग्रंथःसप्तम्यर्थः॥

संसरतांमुच्यमानानांचयानिकार्यकरणानितेषामितिवैयधिकरण्यमुपादानमनुपादानमित्युभयत्रकार्यकरणानामितिसंबंधः॥कर्मणोभावाभावाभ्यां
बंधमोक्षावुक्तौतत्राभावद्वाराकर्मणोमोक्षहेतुत्वंस्फुटयति॥तस्ययेचेति॥तस्यभावद्वाराबंधहेतुत्वंप्रकटयति॥तत्रेति॥पुण्यपापयोरुभयोरपिसंसा
रफलत्वाविशेषात्पुण्यफलत्वंपापफलमित्यत्रवक्तव्यं॥अन्यथाततोविरागायोगादित्याशंक्यवर्तिष्यमाणस्यतात्पर्यंवक्तुंभूमिकांकरोति॥तत्रेति॥पुण्ये
षपुण्येषुचनिर्धारणार्थासप्तमी॥स्वभावदुःखबहुलेष्वित्युभयतःसंबध्यते॥तर्हिपुण्यफलमपिसर्वलोकप्रसिद्धत्वान्नात्रवक्तव्यमित्याशंक्याह॥यस्त्वि

तस्ययेचनामावशेषेणसर्वोत्साहोमोक्षस्तत्रपुण्यपापाख्यंकर्मपुण्योवैपुण्येनकर्मणाभवतिपापःपापेनेत्यवधारितत्वादेतत्कृतःसंसारस्त
त्रापुण्येनस्थावरजंगमेषुस्वभावदुःखबहुलेषुनरकतिर्यक्प्रेतादिषुचदुःखमनुभवतिपुनःपुनर्जायमानोम्रियमाणश्चेत्येतद्राजवर्त्मव
त्सर्वलोकप्रसिद्धं॥यस्तुशास्त्रीयःपुण्योवैपुण्येनकर्मणाभवतितत्रैवादरःक्रियतइहश्रुत्यापुण्यमेवचकर्मसर्वपुरुषार्थसाधनमि
तिसर्वेश्रुतिस्मृतिवादाःमोक्षस्यापिपुरुषार्थत्वात्तत्साध्यताप्राप्तायावद्यावत्पुण्योत्कर्षस्तावत्तावत्फलोत्कर्षप्राप्तिस्तस्मादुत्तमेनपु
ण्योत्कर्षेणमोक्षोभविष्यतीत्याशंकास्यात्सानिवर्तयितव्याज्ञानसहितस्यचप्रकृष्टस्यकर्मणएतावतीगतिःव्याकृतनामरूपास्पदत्वात्क
र्मणस्तत्फलस्यचनत्वकार्येनित्येऽव्याकृतधर्मिण्यनामरूपात्मके

ति॥शास्त्रीयःसुखानुभवहेतुविशेषः॥इहेतिब्राह्मणोक्तिःशास्त्रीयंकर्मसर्व
मपिसंसारफलमेवेतिवक्तुंब्राह्मणमित्युक्त्वाशंकोत्तरत्वेनापितदवतारयति॥पुण्यमेवेत्यादिना॥मोक्षस्यपुण्यसाध्यत्वंविधांतरेणसाधयति॥याव
द्यावदिति॥कथंतस्यानिवर्तनमित्याशंक्याह॥ज्ञानसहितस्येति॥समुच्चितमपिकर्मसंसारफलमेवेत्यत्रहेतुमाह॥व्याकृतेति॥मोक्षेपिस्वर्गादाविवपुरु
षार्थत्वाविशेषात्कर्मणोव्यापारःस्यादित्याशंक्याह॥नत्विति॥अकार्यत्वमुत्पत्तिहीनत्वंनित्यत्वंनाशशून्यत्वंअव्याकृतधर्मित्वंव्याकृतनामरूपराहित्यं॥अ

वृ.र.
१८

उत्पाद्य आप्य संस्कार्य विकार्य=१

निष्कलंनिष्क्रियमित्यादिश्रुतिमाश्रित्याह॥क्रियेति॥चतुर्विधक्रियाफलविलक्षणेमोक्षेकर्मणोव्यापारोनसंभवतीतिभावः॥नन्वास्याणोराचप्रजापतेः सर्वत्रकर्मव्यापारात्कथंमोक्षेप्रजापतिभावलक्षणेतत्व्यापारोनास्तितत्राह॥यत्रचेति॥कर्मफलस्यसर्वस्यसंसारत्वमेवेतिकुतःसिध्यतितत्राह॥ इत्यस्येति॥विद्यासहितमपिकर्मसंसारफलंविद्यैवमोक्षार्थेतिस्वपक्षशुध्यर्थंविचारयन्पूर्वपक्षयति॥यत्त्विति॥यथाकेवलंविषदध्यादिमरणज्वरादि कारणमपिमंत्रशर्करादियुक्तंजीवनपुष्ट्याद्यारभतेतथास्वतोबंधफलमपिकर्मफलाभिलाषमंतरेणानुष्ठितंविद्यासमुच्चितंमोक्षायक्षममित्यर्थः॥ मुक्तेःसाध्यत्वांगीकारेसमुच्चितकर्मसाध्यत्वंस्यान्नतुतस्याःसाध्यत्वंधीमात्रायत्तत्वादित्युत्तरमाह॥तन्नेति॥हेतुमेवसाधयति॥बंधनेति॥किंतद्बंधनं

क्रियाकारकफलस्वभाववर्जितेकर्मणोव्यापारोस्ति॥यत्रचव्यापारःससंसारएवेत्यस्यार्थस्यप्रदर्शनायब्राह्मणमारभ्यतेयत्तुकेश्चिदुच्य तेविद्यासहितंकर्मनिरभिसंधिविषदध्यादिवत्कार्यांतरमारभतइतितन्नानारभ्यत्वान्मोक्षस्यबंधननाशएवहिमोक्षःनकार्यभूतोबंधनं चाविद्येत्यवोचामअविद्यायाश्चनकर्मणानाशउपपद्यतेदृष्टविषयत्वाच्चकर्मसामर्थ्यस्यउत्पत्याप्तिविकारसंस्कारहिकर्मसामर्थ्यस्यविष याःउत्पादयितुंआप्तुंविकर्तुंसंस्कर्तुंसामर्थ्यंचकर्मणोनातोव्यतिरिक्तोविषयोस्तिकर्मसामर्थ्यस्यलोकेऽप्रसिद्धत्वान्नचमोक्षएषांपदार्थो नामन्यतमोऽविद्यामात्रव्यवहितइत्यवोचाम॥ तदाह॥बंधनंचेति॥अविद्यानाशोपिकर्मारभ्योभविष्यतीतिचेन्नेत्याह॥अविद्यायाश्चेति॥मोक्षो नकर्मसाध्योऽविद्यास्तमयत्वाद्रज्ज्वविद्यास्तमयवदित्यर्थः॥तत्रैवहेत्वंतरमाह॥दृष्टविषयत्वाच्चेति॥नकर्मसाध्यामुक्तिरितिशेषः॥तदेवस्पष्टयति॥उ त्पत्तीति॥उक्तमेवकर्मसामर्थ्यविषयमन्वयव्यतिरेकाभ्यांसाधयति॥उत्पादयितुमिति॥अप्रसिद्धत्वादितिच्छेदः॥उत्पत्यादीनामन्यतमत्वान्मोक्षस्यापिकर्म सामर्थ्यविषयतास्यादितिचेन्नेत्याह॥नचेति॥नित्यत्वादात्मत्वात्कूटस्थत्वान्नित्यशुद्धत्वान्निर्गुणत्वाच्चेत्यर्थः॥आत्मभूतोयथोक्तोमोक्षस्तर्हिकिमितिसर्वेषांनप्र

अ.
५

रामः
१८

वादमिति॥ अंगीकारमेवस्फोरयति॥ भवत्विति॥ एवंस्वभावतोत्पादनादौसमर्थता॥ कातर्हि विप्रतिपत्तिस्तत्राह॥ विद्यासंयुक्तस्येति॥ अन्यथास्वभा
वश्चतुर्विधक्रियाफलविलक्षणेपिमोक्षेसमर्थतेतियावत्॥ उत्पत्त्यादौसमर्थस्यकर्मणोविद्यासंयुक्तस्यतद्विलक्षणेपिमोक्षेसामर्थ्यमस्तीत्यत्रदृष्टांतमा
ह॥ दृष्टंहीति॥ उक्तदृष्टांतवशात्कर्मणोपिकेवलस्यसंसारफलस्यविद्यासंयोगान्मुक्तिफलत्वमपिस्यादित्याह॥ तथेति॥ समाधत्ते॥ नेत्यादिना॥ अतींद्रि
यत्वात्कर्मणोमुक्तिसाधनत्वेप्रत्यक्षाद्यसंभवेप्यर्थापत्तिरस्तीतिशंकते॥ नन्विति॥ नित्येषुकर्मसुमोक्षातिरिक्तस्यफलस्याश्रुतत्वाभावेसतितदुपलभ्यमा
नचोदनायामोक्षफलत्वंविनानुपपत्तिस्तेषांतत्साधनत्वेमानमित्यर्थः॥ ननुविश्वजितायजेतेत्यत्रयागकर्तव्यतारूपोनियोगोवगम्यतेतस्यनियोज्यसा

वादंभवतुकेवलस्यैवकर्मणएवंस्वभावताविद्यासंयुक्तस्यतुनिरभिसंधेर्भवत्यन्यथास्वभावोदृष्टंह्यन्यशक्तित्वेननिर्ज्ञातानामपिपदा
र्थानांविषदध्यादीनांविद्यामंत्रशर्करादिसंयुक्तानामन्यविषयेसामर्थ्यंतथाकर्मणोप्यस्त्विति चेन्नप्रमाणाभावात्तत्रहिकर्मणउक्तवि
षयव्यतिरेकेणविषयांतरेसामर्थ्यास्तित्वेप्रमाणंनप्रत्यक्षंनानुमानंनोपमानंनार्थापत्तिर्नशब्दोस्तिननुफलांतराभावेचोदनान्यथानु
पपत्तिःप्रमाणमितिनहिनित्यानांकर्मणांविश्वजिन्न्यायेनफलंकल्प्यतेनापिश्रुतंफलमस्तिचोद्यंतेचतानिपारिशेष्यान्मोक्षस्तेषांफ
लमितिगम्यते॥ पेक्षत्वात्सस्वर्गःस्यात्सर्वान्प्रत्यविशिष्टत्वादितिन्यायेनस्वर्गकामोनियोज्योंगीकृतस्तथानित्येष्वपिकर्मसुभविष्यतिस्व
र्गोनियोज्यविशेषणमतआह॥ नहीति॥ जीवन्जुहुयादितिजीवनविशिष्टस्यनियोज्यस्यलाभान्ननित्येषुस्वर्गोनियोज्यविशेषणमित्यर्थः॥ ननुजीवन
विशिष्टेपिफलाभावेननियोज्यःस्यात्तथाचकर्मणापितृलोकइतिश्रुतंफलंतेषुकल्पयिष्यतेनेत्याह॥ नापीति॥ नित्यविधिप्रकरणेपितृलोकवाक्यस्या
श्रवणादित्यर्थः॥ तर्हिफलाभावीचोदनैवमाभूदितिचेन्नेत्याह॥ चोद्यंतेचेति॥ तथापिफलांतरंकल्प्यतामित्याशंक्यकल्पकाभावान्नैवमित्यभिप्रेत्याह॥ पा

मुक्तेर्यत्कल्पकं तदेव फलांतरस्यापि किं न स्यादित्याशंक्य तस्य निरतिशयफलविषयत्वान्मुक्तिकल्पकमेवेत्यभिप्रेत्याह॥ अन्यथेति॥ अनुपपत्त्या चेन्नि
योज्यलाभाय नित्येषु फलं कल्प्यते कथं तर्हि विश्वजिन्न्यायो न प्राप्नोतीति सिद्धांती प्रत्याह॥ नन्विति॥ उक्तमेव विवृणोति॥ मोक्षे वेति॥ अकल्पिते सतीति
च्छेदः॥ श्रुतार्थापत्त्या विधेः श्रुतस्य प्रवर्त्तकत्वानुपपत्त्येति यावत् विश्वजितीव नित्येषु मोक्षे फले कल्प्यमाने सतीति फलितमाह॥ नन्वेवमिति॥ कथमित्युक्तामं
नुपपत्तिमेव स्फुटयति॥ फलं चेति॥ फलकल्पनायां विश्वजिन्न्यायोवतरति मोक्षस्तु स्वरूपस्थितित्वेनानुत्पाद्यत्वात् फलमेव न भवतीति शंकते॥ मोक्ष इ

अन्यथा हि पुरुषा न प्रवर्त्तेरन्ननु विश्वजिन्न्याय एवायातो मोक्षस्य कल्पितत्वान्मोक्षे वान्यस्मिन्वा फलेऽकल्पिते पुरुषा न प्रवर्त्तेरन्निति मोक्षः
फलं कल्प्यते श्रुतार्थापत्त्या यथा विश्वजिति नन्वेवं सति कथमुच्यते विश्वजिन्न्यायो न भवतीति फलं च कल्प्यते विश्वजिन्न्यायश्च न भवती
ति विप्रतिषिद्धमभिधीयते मोक्षः फलमेव न भवतीति चेन्न प्रतिज्ञाहानात्कर्मकार्यात्तरं विषदध्यादिवदारभत इति हि प्रतिज्ञातं स चे
न्मोक्षः कर्मणः कार्यं फलमेव न भवति सा प्रतिज्ञा हीयेत कर्मकार्यत्वे च मोक्षस्य स्वर्गादिफलेभ्यो विशेषो वक्तव्यः अथ कर्मकार्यं न भव
ति नित्यानां कर्मणां फलं मोक्ष इत्यस्याः वचनव्यक्तेः कोर्थ इति वक्तव्यं न च कार्यफलशब्दभेदमात्रेण विशेषः शक्यः कल्पयितुं अफलं
च मोक्षो नित्यैश्च कर्मभिः क्रियते॥ नित्यानां कर्मणां फलं न कार्यमिति चेत् एषोर्थो विप्रतिषिद्धोभिधीयते यथाग्निः शीत इति

ति॥ निग्रहमुद्भावय
न्नुत्तरमाह॥ नेति॥ प्रतिज्ञाहानिं प्रकटयति॥ कर्मेत्यादिना॥ कर्मकार्यत्वं मुक्तेरुपेत्योक्तं तदेवायुक्तमित्याह॥ कर्मकार्यत्वे चेति॥ फलत्वेपि कर्मकार्य
त्वं न मुक्तेरस्तीत्युक्तं दोषं परिहर्त्तुं चोदयति॥ अथेति॥ प्रतिज्ञाविरोधेन प्रतिविधत्ते॥ नित्यानामिति॥ फलत्वमंगीकृत्य कार्यत्वेऽनंगीकृते कथं व्याघात इत्या
शंक्याह॥ न चेति॥ विशेषार्थगत इति शेषः॥ फलत्वमंगीकृत्य कार्यत्वानंगीकारे व्याघातमुक्त्वा वैपरीत्येपि तत्॥ प्रसादयति॥ अफलं चेति॥ आद्यं व्याघातं दृष्टां

तिमसष्टपति॥नित्यानामिति॥

दृष्टांतेन व्याघातं परिहरन्नाशंकते॥ज्ञानवदिति चेदिति॥तदेव स्फुटयति॥यथेति॥दृष्टांतं विघटयति॥नेति॥ज्ञानस्य मोक्षस्य व्यवधिभूताज्ञाननिवर्त्ति
कत्वान्मोक्षस्तेनाक्रियमाणोपि तत्कार्यमिति व्यपदेशभाग्भवतीत्यर्थः॥तदेव स्फुटयति॥अज्ञानेति॥दार्ष्टांतिकं निराचष्टे॥नत्विति॥यत्कर्मणा निर्वर्त्य
तेन मोक्षस्य व्यवधानांतरं कल्पयितुं न शक्यमिति संबंधः॥व्यवधानध्वंसे कर्मणोऽप्रवेशेपि मुक्तावेव तस्य प्रवेशः स्यादिति चेन्नेत्याह॥ ॥ ॥ नि
त्यत्वादिति॥नित्यकर्मनिवर्त्यं व्यवधानांतरं माभूदज्ञानमेव तन्निवर्त्यं भविष्यति तथा च मोक्षस्य कर्मकार्यत्वं शक्यमुपचरितुमिति शंकते॥अज्ञान

ज्ञानवदिति चेद्यथाज्ञानस्य कार्यं मोक्षो ज्ञानेनाक्रियमाणोप्युच्यते तद्वत्कर्मकार्यत्वमिति चेन्नाज्ञाननिवर्त्तकत्वाज्ज्ञानस्य अज्ञानव्यव
धाननिवर्तकत्वात्ज्ञानस्य मोक्षो ज्ञानकार्यमित्युपचर्यते नतु कर्मणा निवर्तयितव्यमज्ञानं न चाज्ञानव्यतिरेकेण मोक्षस्य व्यवधानां
तरं कल्पयितुं शक्यं नित्यत्वान्मोक्षस्य साधकस्वरूपाव्यतिरेकाच्च यत्कर्मणा निवर्त्येत अज्ञानमेव निवर्तयतीति चेन्न विलक्षणत्वाद
नभिव्यक्तिरज्ञानमभिव्यक्तिलक्षणेन ज्ञानेन विरुध्यते कर्म तु नाज्ञानेन विरुध्यते तेन ज्ञानविलक्षणं कर्म यदि ज्ञानाभावो यदि संशयज्ञा
नं यदि विपरीतज्ञानं चोच्यते ज्ञानमेव निसर्वं हि तज्ज्ञानेनैव निवर्त्यते न तु कर्मणान्यतमेनापि विरोधाभावात्॥अथादृष्टं कर्मणामज्ञाननि
वर्तकत्वं कल्प्यमिति चेन्न ज्ञानेनाज्ञाननिवृत्तौ गम्यमानायामदृष्टं निवृत्तिकल्पनानुपपत्तेः यथा मेवेति॥कर्मणो ज्ञानाद्विलक्षणत्वान्नाज्ञान
निवर्तकत्वमित्युत्तरमाह॥नविलक्षणत्वादिति॥वैलक्षण्यमेव प्रकटयति॥अनभिव्यक्तिरिति॥इतश्च ज्ञाननिवर्त्यमेवाज्ञानमित्याह॥यदीति॥अन्यत
मेन नित्यादिना व्यस्तेन समस्तेन वा श्रौतेन स्मार्तेन चेत्यर्थः॥कर्माज्ञानयोरविरोधो हेत्वर्थः॥अज्ञाननिवर्तकत्वं कर्मणो नान्वयव्यतिरेकसिद्धं किंत्वदृष्टमे
व कल्प्यमिति शंकते॥अथेति॥दृष्टे सत्यदृष्टकल्पनानान्याय्येति परिहरति॥न ज्ञानेनेति॥उक्तमर्थं दृष्टांतेन बुद्धावारोपयति॥यथेत्यादिना॥अदृष्टेति

१८

अस्तु ज्ञानादज्ञानध्वस्तिः किंतु कर्मसमुच्चितादित्याशंक्याह ॥ ज्ञानेनेति ॥ ननु कर्मभिरविरुद्धमपि हिरण्यगर्भादिविज्ञानमस्ति तथा च समुच्चितं ज्ञा
नमज्ञानध्वंसि भविष्यतिनेत्याह ॥ यदविरुद्धमिति ॥ नित्यानां कर्मणां समुच्चितानामसमुच्चितानां च स्वरूपस्थितानां मोक्षे तत्प्रतिबंधकाज्ञानध्व
स्तौ वा नादृष्टं सामर्थ्यं कल्प्यमित्युक्तमिदानीं तत्कल्पनामंगीकृत्यापि दूषयति ॥ किंचेति ॥ कर्मणोस्ति मोक्षे सामर्थ्यमित्येतदुक्तादेव कारणान्न भवति
किंत्वन्यच्च कारणं तत्रास्तीत्यर्थः ॥ तदेव दर्शयितुं विचारयति ॥ कल्प्येचेति ॥ विरोधमभिनयति ॥ द्रव्येति ॥ कार्यत्वाभावं समर्थयते ॥ यस्मिन्निति ॥ पसां

ऽवघातेन व्रीहीणां तुषनिवृत्तौ गम्यमानायामग्निहोत्रादिनित्यकर्मकार्यांऽदृष्टं न कल्प्यते तुषनिवृत्तिस्तद्वदज्ञाननिवृत्तिरपि नित्य
कर्मकार्यांऽदृष्टं न कल्प्यते ज्ञानेन विरुद्धत्वं चासकृत्कर्मणामवोचाम यदविरुद्धं ज्ञानं कर्मभिस्तद्देवलोकप्राप्तिनिमित्तमित्युक्तं विद्यया
देवलोक इति श्रुतेः किं चान्यत्कल्प्ये च फले नित्यानां कर्मणां श्रुतानां यत्कर्मभिर्न विरुध्यते तत्कल्प्यतां न मोक्षफलं तन्मोक्षफलं द्रव्य
गुणकर्मणां कार्यमेव न भवति किं तत्कल्प्यतां यस्मिन्कर्मणः सामर्थ्यमेव न दृष्टं किं वा यस्मिन्दृष्टं सामर्थ्यं यच्च कर्मणां फलमविरुद्धं तत्क
ल्प्यतामिति ॥ पुरुषप्रवृत्तिजननायावश्यं चेत्कर्मफलं कल्पयितव्यं कर्माविरुद्धविषय एव श्रुतार्थापत्तेः क्षीणत्वान्नित्यो मोक्षः फलं क
ल्पयितुं न शक्यस्तद्व्यवधानाज्ञाननिवृत्तिर्वाऽविरुद्धत्वात् दृष्टसामर्थ्यविषयत्वाच्चेति

तरमाह ॥ किंचेति ॥ सामर्थ्यविषयं विशदयति ॥ यच्चेति ॥
कथमिह निर्णयस्तत्राह ॥ पुरुषेति ॥ कल्पयितव्यं फलमिति संबंधः ॥ उत्पत्त्यादीनामन्यतमो हि कर्मभिरविरुद्धो विषयस्तत्रैव नित्यकर्मचोदनानुपपत्ते
रुपक्षीणत्वान्नित्यकर्मफलत्वेन मोक्षस्तद्व्यवधानाज्ञाननिवृत्तिर्वा न शक्यते कल्पयितुं कर्मज्ञानयोर्विरोधाभावाद्दृष्टसामर्थ्ये यस्मिन्नुत्पत्त्यादौ तद्विष
यत्वाच्च कर्मणस्तद्विलक्षणे मोक्षे न व्यापारस्तथा च नित्यकर्मविधिवशात्पुरुषप्रवृत्तिसंपादनाय फलं चेत्कल्पयितव्यं तर्हि तदुत्पत्त्यादीनामन्यतमदेव तद

विरुद्धं कल्प्यमित्यर्थः ॥ इति शब्दः श्रुतार्थापत्तिपरिहारसमाप्त्यर्थः ॥ मोक्ष एव नित्यानां कर्मणां फलत्वेन कल्पयितव्यः पारिशेष्यन्यायादिति शंकते ॥ पारिशेष्येति ॥ पारिशेष्यन्यायमेव विशदयति ॥ सर्वेषामिति ॥ सर्वं च स्वर्गपशुपुत्रादीति यावत् ॥ तथापि मोक्षादन्यदेव नित्यकर्मफलं किं न स्यात्तत्राह ॥ न चेति ॥ मोक्षस्यापीतरकर्मफलविशेषमाशंक्याह ॥ परिशिष्टश्चेति ॥ तस्य फलत्वमेव कथं सिद्धं तत्राह ॥ स चेति ॥ परिशेषायातमर्थं निगमयति ॥ तस्मादिति ॥ पारिशेष्यासिध्या दूषयति ॥ नेति ॥ कर्मफलत्वस्यानंत्यमुक्तं व्यनक्ति ॥ नहीति ॥ फलवत्फलसाधनानां फलविषयेच्छानां चानंत्यं कथयति ॥ त

पारिशेष्यन्यायान्मोक्ष एव कल्पयितव्य इति चेत्सर्वेषां हि कर्मणां सर्वं फलं न चान्यदितरकर्मफलव्यतिरेकेण फलं कल्पनायोग्यमस्ति प
रिशिष्टश्च मोक्षः स चैवंवेदविदां फलं तस्मात्स एव कल्पयितव्य इति चेन्न कर्मफलव्यक्तीनामानंत्यात्पारिशेष्यन्यायानुपपत्तेः न हि पुरु
षेच्छाविषयाणां कर्मफलानामेतावत्त्वं नाम केनचित्सर्वज्ञेनावधृतं तत्साधनानां वा पुरुषेच्छानां वा ॥ नियतदेशकालनिमित्तत्वात्पुरुषेच्छा
विषयसाधनानां च पुरुषेष्टफलप्रयुक्तत्वात् ॥ प्रतिप्राणि चेच्छावैचित्र्यात्फलानां तत्साधनानां चानंत्यसिद्धिस्तदानंत्याच्चाशक्यमेताव
त्त्वं पुरुषैर्ज्ञातुम् अज्ञाते च साधनफलैतावत्त्वे कथं मोक्षस्य परिशेषसिद्धिरिति ॥ कर्मफलजातिपारिशेष्यमिति चेत्सत्यपीच्छाविषयाणां
तत्साधनानां चानंत्ये कर्मफलजातित्वं नाम सर्वेषां तुल्यं मोक्षस्त्वकर्मफलत्वात्परिशिष्टः स्यात् ॥ त्साधनानामिति ॥ तदानंत्ये हेतुमाह ॥ अनिय
तेति ॥ इच्छाद्यानंत्ये हेत्वंतरमाह ॥ पुरुषेति ॥ एतावत्त्वं नाम नास्तीत्युभयत्र संबंधः ॥ पुरुषस्येष्टं फलं शोभनाध्यासविषयभूतं तत्र विषयिणां शोभनाध्या
सेन प्रयुक्तत्वादिति हेत्वर्थः ॥ इच्छाद्यानंत्यं प्राणिभेदेषु दर्शयित्वा तदानंत्यमेकैकस्मिन्नपि प्राणिनि दर्शयति ॥ प्रतिप्राणि चेति ॥ इच्छाद्यानंत्ये फलितमाह ॥
तदानंत्याच्चेति ॥ साधनादिष्वेतावत्त्वाज्ञानेऽपि किं स्यात्तदाह ॥ अज्ञाते चेति ॥ इति शब्दः पारिशेष्यानुपपत्तिसमाप्त्यर्थः ॥ प्रकारांतरेण पारिशेष्यं शंकते ॥ कर्म

तथापि कथं मोक्षस्य परिशिष्टत्वं तदाह॥ मोक्षस्त्विति॥ परिशेषफलमाह॥ तस्मादिति॥ शंकितं परिशेषं दूषयति॥ नेत्यादिना॥ अर्थापत्तिपरिशेषौ पराकृत्यार्थापत्तिपराकरणं प्रपंचयितुं प्रस्तौति॥ तस्मादिति॥ अन्यथाप्युपपत्तिं प्रकटयति॥ उत्पत्तीति॥ नित्यानामुत्पत्त्यादिफलत्वेपि मोक्षस्य तत्फलत्वं सिध्यतीति शंकते॥ चतुर्णामिति॥ तत्र मोक्षस्योत्पाद्यत्वं दूषयति॥ न तावदिति॥ उभयत्रातःशब्दो नित्यत्वपरामर्शी॥ असंस्कार्यत्वे हेत्वंतरमाह॥ असाधनेति॥ तदेव व्यतिरेकमुखेन विवृणोति॥ साधनात्मकं हीति॥ इतश्च मोक्षस्यासंस्क्रियमाणत्वमित्याह॥ न चेति॥ यथा यूपस्तस

तस्मात्परिशेषात्मस एव युक्तः कल्पयितुमिति चेन्न तस्यापि नित्यकर्मफलत्वाभ्युपगमे कर्मफलसमानजातीयत्वोपपत्तेः परिशेषानुपपत्तिः तस्मादन्यथाप्युपपत्तेः क्षीणाश्रुतार्थापत्तिरुत्पत्त्याप्तिविकारसंस्काराणामन्यतमदपि नित्यानां कर्मणां फलमुपपद्यत इति क्षीणाश्रुतार्थापत्तिः चतुर्णामन्यतम एव मोक्ष इति चेन्न तावदुत्पाद्यो नित्यत्वात्॥ अत एवाविकार्यः संस्कार्यश्चात एवासाधनद्रव्यात्मकत्वाच्च साधनात्मकं हि द्रव्यं संस्क्रियते यथा पात्राज्यादि प्रोक्षणादिना न च संस्क्रियमाणः संस्कारनिर्वर्त्यो वा यूपादिवत्परिशेष्यादाप्यः स्यान्नाप्यो प्याप्त्वस्वभावत्वादेकत्वाच्च॥ इतरैः कर्मभिर्वैलक्षण्यान्नित्यानां कर्मणां तत्फलेनापि विलक्षणेन भवितव्यमिति चेन्न कर्मत्वसालक्षण्यात्सलक्षणं कस्मात्फलं न भवतीतरकर्मफलैर्निमित्तवैलक्षण्यादिति चेन्न क्षामवत्यादिभिः समानत्वात् णाष्टाश्लीकरणाभ्यंजनादिनासंस्क्रियते यथा चाहवनीयः संस्कारेण निष्पाद्यते न तथा मोक्षो नित्यशुद्धत्वान्निर्गुणत्वाच्चेत्यर्थः॥ पक्षांतरमनुभाष्य दूषयति॥ पारिशेष्यादित्यादिना॥ एकत्वं पूर्णत्वं साधनवैलक्षण्यं फलवैलक्षण्यं कल्पयतीति शंकते॥ इतरैरिति॥ हेतुवैलक्षण्यासिद्धौ कल्पकाभावात्फलवैलक्षण्यासिद्धिरिति दूषयति॥ न कर्मत्वेति॥ निमित्तकृतहेतुवैलक्षण्यवशात्फलवैलक्षण्यसिद्धिरितिशंकते॥ निमित्तेति॥ निमित्तवैलक्षण्यं फलवैलक्षण्यस्यानिमित्तमिति परिहरति॥

तदेव प्रपंचयति॥ यथाहीति॥ यस्याहिताग्नेरग्निर्गृहान् दहेदग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेदित्यत्र दहेदिति विधिविभक्त्याप्रसिद्धार्थ यद्रु
द्धोपहितया गृहदाहाख्यनिमित्तपरामर्शे नाग्नये क्षामवते पुरोडाशमित्यादिना क्षामवती विधीयते यस्योभयं हविरार्तिमार्छेत्सर्वं द्रू पंचशरावमो
दनं निर्वपेदित्यत्र चार्छेदिति विधिविभक्त्या निर्वपेदिति विधास्यमाननिर्वापनिमित्तं हविरार्त्तिमनूद्य निर्वापो विधीयते भिन्ने जुहोति स्कन्ने जुहोत
ययस्य पुरोडाशो क्षीयेत तस्त यज्ञं वरुणो गृह्णाति यदा तद्धविस्तिष्ठेतां यत्तदेव हविर्निर्वपेद्यज्ञो हि यज्ञस्य प्रायश्चित्तमिति च भेदनादि निमित्तं प्रायश्चि
त्तमुक्तं न च तत्तन्मुक्तिफलं॥ तथा निमित्तभेदेपि न नित्यं कर्ममुक्तिफलमित्यर्थः॥ क्षामवत्यादि तुल्यत्वं नित्यकर्मणां कुतो लब्धमित्याशंक्याह॥ नैश्चेति

यथाहि गृहदाहादौ निमित्ते क्षामवत्यादीष्टिर्यथा भिन्ने जुहोति स्कन्ने जुहोतीत्येवमादौ नैमित्तिके षु कर्मसु न मोक्षः फलं कल्प्यते तेनाऽवि
शेषान्नैमित्तिकत्वेन जीवनादि निमित्ते च श्रवणात्॥ तथा नित्यानामपि न मोक्षः फलं॥ आलोकस्य सर्वेषां रूपदर्शनसाधनत्वे उलूका
दय आलोकेन रूपं न पश्यंतीति उलूकादिचक्षुषो वैलक्षण्यादितरलोकचक्षुर्भिर्न रसादिविषयत्वं परिकल्प्यते रसादि विषये सामर्थ्यात्
र्थ्यस्यादृष्टत्वात्सुदूरमपि गत्वा यद्विषये दृष्टं सामर्थ्यं तत्रैव कश्चिद्विशेषः कल्प्यितव्यो यस्तु नरुक्तं विद्या मंत्रशर्करादि संसक्तविषद्ध्या
दिवन्नित्यानि कार्यांतरमारभंत इति आरभ्यतां विशिष्टं कार्यं तद्दृष्टत्वाद्विरोधो ॥ क्षामवत्यादिभिरिति यावत्॥ अविशेषे हेतुः नैमित्तिकत्वे
नेति॥ तदेव कथमिति चेत्तत्राह॥ जीवनादीति॥ दार्ष्टांतिकं स्पष्टयति॥ तथेति॥ नित्यं कर्मकर्मांतराद्विलक्षणमपि न मोक्षफलमित्यत्र दृष्टांतमाह॥
आलोकस्येति॥ चक्षुरंतरैरुलूकादिचक्षुषो वैलक्षण्येपि न रसादिविषयत्वमित्यत्र हेतुमाह॥ रसादीति॥ वैलक्षण्यं तर्हि कुत्रोपयुज्यते तत्राह॥ सुदूर
मपीति॥ मनुष्यान्विहाय योलूकादीन् गत्वापीति यावत्॥ यद्विषये रूपादावित्यर्थः॥ विशेषो दूरसूक्ष्मादिरतिशयः॥ दार्ष्टांतिकं पूर्ववादानुवाद पूर्वकमाचष्टे॥ य

ई॰उ॰
२२

तद्देव विवृणोति॥ निरभिसंधेरिति॥ विद्यासंयुक्तं कर्म विशिष्टकार्यकरमित्यत्र शतपथश्रुतिं प्रमाणयति॥ देवयाजीति॥ तदाहुरित्युपक्रम्य देवया
जीश्रेयानित्यादौ काम्यकर्तुर्देवयाजिनः सकाशादात्मशुध्यर्थं कर्म कुर्वन्नात्मयाजी श्रेयानित्यात्मयाजिनो देवयाजिनो विशेषश्रवणात्सर्वं कर्मक्र
तुयाजिनामात्मयाजी विशिष्यत इति स्मृतेश्च विशिष्टस्य कर्मणो विशिष्टकार्यारंभकत्वमविरुद्धमित्यर्थः॥ क्वांदोग्येपि विद्यासंयुक्तस्य कर्मणो विशि
ष्टकार्यारंभकत्वं दृष्टमित्याह॥ यदेवेति॥ नन्वात्मयाजीशब्दो नित्यकर्मानुष्ठायिविषयो न भवति॥ सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि॥ संपश्यन्ना
त्मयाजी वै स्वाराज्यमधिगच्छतीत्यत्र परात्मदर्शनविषये तस्य प्रयुक्तत्वाद्दत आह॥ यस्त्विति॥ यदि समं पश्यन्भवेत्तदा परेणात्मनैकीभूतः स्वराड्भवती

निरभिसंधेः कर्मणो विद्यासंयुक्तस्य विशिष्टकार्यान्तरारंभेन कश्चिद्विरोधो देवयाज्यात्मयाजिनोरात्मयाजिनो विशेषश्रवणाद्देवयाजि
नः श्रेयानात्मयाजीत्यादौ यदेव विद्यया करोतीत्यादौ च यस्तु परमार्थदर्शनविषये मनुनोक्त आत्मयाजीशब्दः स संपश्यन्नात्मयाजी
त्यत्र समं पश्यन्नात्मयाजी भवतीत्यर्थः॥ अथवा भूतपूर्वगत्यात्मयाज्यात्मसंस्कारार्थं हि नित्यानि कर्माणि करोतीदं मे ऽनेनांगं संस्क्रि
यत इति श्रुतेस्तथा गार्भैर्होमैरित्यादिप्रकरणे कार्यकरणसंस्कारार्थत्वं नित्यानां कर्मणां दर्शयति संस्कृतश्च य आत्मयाजी तैः कर्मभिः
सम्यग्द्रष्टुं समर्थो भवति सात्मज्ञानस्तुतिरत्र विवक्षिता महतीहीयं ब्रह्मविद्या यद् ब्रह्मविदेवात्मयाजी भवति न हितस्य तदनुष्ठानं पृथगपेक्षते ब्रह्म
वित्सुण्यकृदिति च वक्ष्यतीत्यर्थः पर दर्शनवत्यात्मयाजीशब्दस्य गत्यंतरमाह॥ अथवेति॥ भूतायाः पूर्वस्थितिस्तामपेक्ष्यात्मयाजिशब्दो विदुषीत्य
र्थः॥ तदेव प्रपंचयति॥ आत्मेति॥ तेषां तत्संस्कारार्थत्वे प्रमाणमाह॥ इदमिति॥ तत्रैव स्मृतिं प्रमाणयति॥ तथेति॥ गर्भसंबंधिभिर्होमैर्मौंजीनिबं
धनादिभिश्च वैदिकमेवैनः शमयतीत्यस्मिन्प्रकरणे नित्यकर्मणां संस्कारार्थत्वं निश्चितमित्यर्थः॥ संस्कारोपि कुत्रोपयुज्यते तत्राह॥ संस्कृतश्चेति॥ ॥

भ॰
५

लं

राम:
२२

योहिनित्यकर्मानुष्ठायीसतदनुष्ठानजनितापूर्ववशात्परिशुद्धबुद्धिःसम्यग्धीयोग्योभवति महायज्ञैश्चयज्ञैश्चब्राह्मीयंक्रियतेतनुरितिमनुस्मृतेरि
त्यर्थः॥कदापुनरेषासम्यग्धीरुत्पद्यतेतत्राह॥तस्येति॥उत्पन्नस्यसम्यग्ज्ञानस्यफलमाह॥सममिति॥कथंपुनःसम्यग्ज्ञानवत्यात्मयाजिशब्दइत्याशं
क्यपूर्वोक्तंस्मारयति॥आत्मेति॥किमितीहभूतपूर्वगतिराश्रितेतितत्राह॥ज्ञानयुक्तानामिति॥ऐहिकैरामुष्मिकैर्वाकर्मभिःशुद्धबुद्धेःश्रवणादिवशा
दैक्यज्ञानंमुक्तिफलमुदेति॥कर्मतुविद्यासंयुक्तमपिसंसारफलमेवेतिभावः॥तत्रैवहेत्वंतरमाह॥किंचेति॥विद्यायुक्तमपिकर्मबंधायैवेत्यत्रनकेवल
मुक्तमेवकारणंकिंत्वन्यच्चतदुपपादकमस्तीत्यर्थः तदेवदर्शयति॥ब्रह्मेति॥सात्विकींसत्वगुणप्रसूतज्ञानसमुच्चितकर्मफलभूतामितियाव

तस्येहवाजन्मांतरेवासममात्मदर्शनमुत्पद्यते सम्यं पश्यन्स्वाराज्यमधिगच्छतीत्येषोर्थः आत्मयाजीशब्दस्तुभूतपूर्वगत्याप्रयु
ज्यतेज्ञानप्रयुक्तानांनित्यानांकर्मणांज्ञानोत्पत्तिसाधनत्वप्रदर्शनार्थं॥किंचअन्यत्ब्रह्माविश्वसृजोधर्मोमहानव्यक्तमेवच॥उत्तमां
सात्विकीमेतांगतिमाहुर्मनीषिणइतिचदेवसार्ष्टिव्यतिरेकेणभूताप्ययंदर्शयतिभूतान्यप्येतिपंचवैभूतान्यत्येतीतिपाठंयेकुर्वंति
तेषांवेदविषयेपरिखिन्नबुद्धित्वाददोषः॥

तु॥अत्रहिविद्यायुक्तमपिकर्मसंसारफलमेवेतिसूच्यते॥एषसर्वःसमुद्दिष्टस्त्रिःप्रकारस्यक
र्मणःत्रिविधःत्रिविधःकर्मसंसारःसार्वभौतिकइत्युपसंहारादितिचकारार्थः॥किंचप्रवृत्तंकर्मसंसेव्यदेवानामेतिसार्ष्टितामितिकर्मफलभूतदेवता
सदृशैश्वर्यप्राप्तिमुक्त्वातदतिरेकेणनिवृत्तंसेवमानस्तुभूतान्यप्येतिपंचचेतिभूतेष्वप्ययवचनान्नसमुच्चयस्यमुक्तिफलत्वेत्याह॥देवसार्ष्टीति॥निवृ
त्तंसेवमानस्तुभूतान्यत्येतिपंचचेतिपाठान्मुक्तिरेवसमुच्चयानुष्ठानाद्विवक्षितेतिचेन्नेत्याह॥भूतानीति॥ज्ञानमेवमुक्तिहेतुरितिप्रतिपादकोपनिषद्वि
रोधान्नायंपाठःसाधीयानित्यर्थः॥ननुविग्रहवतीदेवतैवनास्तिमंत्रमयीहिसादेवताशब्दप्रत्ययालंबनंअतोब्रह्माविश्वसृजइत्यादेरर्थवादत्वान्नतत्

बलेननित्यकर्मणांमुक्तिसाधनत्वंनिराकर्तुंशक्यमतआह॥नचेति॥ज्ञानार्थस्यसंपश्यन्नात्मयाजीत्यादेरितिशेषः॥किंच॥अकुर्वन्विहितंकर्मनिंदि-
तंचसमाचरन्॥प्रसज्जंश्चेंद्रियार्थेषुनरःपतनमृच्छति॥शरीरजैःकर्मदोषैर्यातिस्थावरतांनरः॥वाचिकैःपक्षिमृगतांमानसैरंत्यजातितां॥श्वसूकर-
खरोष्ट्राणांगोजाविमृगपक्षिणां॥चंडालपुल्कसानांचब्रह्महायोनिमृच्छतीत्यादिवाक्यैःप्रतिपादितफलानांप्रत्यक्षेणापिदर्शनाद्यथातत्रनाभूतार्थ-
वादत्वंतथायथोक्ताध्यायस्यापिनाभूतार्थवादतेत्याह॥विहितेति॥किंच॥बंगादिदेशेष्वर्दिताश्यादिप्रेतानांप्रत्यक्षत्वादध्ययनरहितानामपि
स्त्रीशूद्रादीनांवेदोच्चारणदर्शनेनब्रह्मग्रहसद्भावावगमाच्चनब्रह्मादिवाक्यस्यार्थवादतेत्याह॥वांतेति॥ननुस्थावरादीनांश्रौतस्मार्तकर्मफलत्वा-

नचार्थवादत्वमध्यायस्यब्रह्मांतकर्मविपाकार्थस्यतद्व्यतिरिक्तात्मज्ञानार्थस्यचकर्मकांडोपनिषद्भ्यांतुल्यार्थत्वदर्शना द्विहिताकरणप्र-
तिषिद्धकर्मणांचस्थावरश्वसूकरादिफलदर्शनात्॥वांताश्यादिप्रेतदर्शनाच्चनचश्रुतिस्मृतिविहितप्रतिषिद्धव्यतिरेकेणविहितानिवाप्र-
तिषिद्धानिवाकर्माणिकेनचिदवगंतुंशक्यंतेषामकरणादनुष्ठानाच्चप्रेतश्वसूकरस्थावरादीनिकर्मफलानिप्रत्यक्षानुमानाभ्यामुपलभ्य-
तेननैषामकर्मफलत्वंकेनचिदभ्युपगम्यतेतस्माद्विहिताकरणप्रतिषिद्धसेवानांयथैतेकर्मविपाकाःप्रेततिर्यक्स्थावरादयस्तथोत्कृष्टत्वपिब्र-
ह्मांतेषुकर्मविपाकत्वंवेदितव्यं

भावान्नतद्दर्शनेनवचनानामभूतार्थत्वंशक्यंकल्पयितुमतआह॥नचेति॥सेवादिदृष्टकारणसाम्येपिफलवैषम्योपलंभा-
दवश्यमतींद्रियंकारणंवाच्यं॥नचतत्रश्रुतिस्मृतीविहायान्यन्मानमस्तितथाचश्रौतस्मार्तकर्मकृतान्येवस्थावरादीनिफलानीत्यर्थः॥सन्निहितासन्निहि-
तेषुस्थावरादिषुप्रत्यक्षानुमानयोर्यथायोगंप्रवृत्तिरुन्नेया॥स्थावराणांजीवशून्यत्वादकर्मफलत्वमितिकेचित्तान्प्रत्याह॥नचैषामिति॥अस्मदादिवदेव
रक्षादीनांवृध्यादिदर्शनात्सजीवत्वप्रसिद्धेस्तस्मासर्पप्रतिपादपाइत्यादिप्रयोगाच्चतेषांकर्मफलत्वसिद्धिरित्यर्थः॥स्थावरादीनांकर्मफलत्वेसिद्धेफलितमा-

ब्रह्मादीनां पुण्यकर्मफलत्वेपि प्रकृते किं स्यात्तदाह॥ तस्मादिति॥ कर्मविपाकप्रकरणस्याभूतार्थवादत्वाभावे दृष्टांतेपि तन्न स्यादिति शंकते॥ तत्रापीति॥
अंगीकरोति॥ भवत्विति॥ कथं तर्हि वैधर्म्यदृष्टांतसिद्धिरत आह॥ न चेति॥ वैधर्म्यदृष्टांताभावमात्रेण कर्मविपाकाध्यायस्यानाभूतार्थवादत्वे तस्य
स्वन्यायस्यैव बाधः॥ साधर्म्यदृष्टांतादपि तत्सिद्धेरित्यर्थः॥ ननु प्रजापतिरात्मनो वपामुदखिददित्यादीनामभूतार्थवादत्वाभावे कथमर्थवादा
धिकरणं घटिष्यते तत्राह॥ न चेति॥ तदघटनायामपि नास्मत्पक्षक्षतिस्तत्रैव तदभूतार्थवादत्वस्य जनतस्तद्विरोधादित्यर्थः॥ ननु कर्मविपाकप्रकरण
स्यार्थवादत्वाभावेपि ब्रह्मादीनां काम्यकर्मफलत्वान्न ज्ञानसंयुक्तनित्यकर्मफलत्वं ततो मोक्ष एव तत्फलमित्यत आह॥ न चेति॥ तेषां काम्यानां कर्मणा

तस्मात्स आत्मनो वपामुदखिदत्सोरोदीदित्यादिवन्नाभूतार्थवादत्वं तत्राप्यभूतार्थवादत्वं माभूदिति चेद्भवत्वेवं न चैतावता स्वन्यायस्य
बाधो भवति॥ न चास्मत्पक्षो वा दुष्यति न च ब्रह्मा विश्वसृजइत्यादीनां काम्यकर्मफलत्वं शक्यं वक्तुं तेषां देवसार्ष्टिता याः फलस्योक्तत्वात्तस्मा
त्साभिसंधीनां नित्यानां कर्मणां सर्वमेधाश्वमेधादीनां च ब्रह्मत्वादीनि फलानि येषां पुनर्नित्यानि निरभिसंधीन्यात्मसंस्कारार्थानि क्रियंते ते
षां ज्ञानोत्पत्त्यर्थानि तानि ब्राह्मीयं क्रियते तनुरित्यादिस्मरणात्॥ तेषामारादुपकारकत्वान्मोक्षसाधनान्यपि कर्माणि भवंतीति न विरुध्यते

मिति यावत्॥ देवसार्ष्टिता याः देवैरिंद्रादिभिः समानैश्वर्यप्राप्तेरित्यर्थः॥ उक्तत्वात्स्ववृत्तं कर्मसंसेव्य देवानामेति सार्ष्टितामित्यत्रेति शेषः ननु विद्यासं
युक्तानां नित्यानां कर्मणां फलं ब्रह्मादिभावश्चेत्कथं तानि ज्ञानोत्पत्त्यर्थान्यास्थीयंते तत्राह॥ तस्मादिति॥ कर्मणां मुक्तिफलत्वाभावस्तच्छब्दार्थः॥ साभि
संधीनां देवताभावे फलेनुरागवतामिति यावत्॥ नित्यानि कर्माणि श्रौतानि स्मार्तानि चाग्निहोत्रसंध्योपासनप्रभृतीनि निरभिसंधीनि फलाभिलाष
विकलानि परमेश्वरार्पणबुध्या क्रियमाणानि॥ आत्मशब्दो मनो विषयः कर्मणां चित्तशुद्धिद्वारा ज्ञानोत्पत्त्यर्थत्वे प्रमाणमाह॥ ब्राह्मीति॥ कथं तर्हि कर्मणां

मोक्षसाधनत्वं केचिदाचक्षते तत्राह॥ तेषामिति॥ सं
स्कृतबुद्धीनामिति यावत्॥

अँसत्यं २

वृ.र. २४

कर्मणांपरंपरयामोक्षसाधनत्वंकथंसिद्धवदुच्यतेतत्राह॥ यथाचेति॥ अयमर्थस्तथेतिशेषः॥ निरस्तमप्यधिकविवक्षयापुनरनुवदति॥ यत्त्विति॥ वि
षादेर्मंत्रादिसहितस्यस्त्रीजीवनादिहेतुत्वंप्रत्यक्षादिसिद्धमतोदृष्टांतेकार्यारंभकत्वेविरोधोनास्तीत्याह॥ तत्रेति॥ कर्मणोविद्यासंयुक्तस्यकार्यां
तरारंभकत्वलक्षणोर्थःशब्देनैवगम्यतेनचतत्रमानांतरमस्तिनचसमुच्चितस्यकर्मणोमोक्षारंभकत्वप्रतिपादकंवाक्यमुपलभ्यतेतदभावे
कर्मणिविद्यायुक्तेपिविषदध्यादिसाधर्म्यंकल्पयितुंनशक्यमित्याह॥ यत्त्विति॥ कर्मसाध्यत्वेचमोक्षस्यानित्यतास्यादितिभावः॥ अपाम
सोमममृताअभूमेत्यादिश्रुतेर्मोक्षस्यकर्मसाध्यस्यापिनित्यत्वमितिचेन्नेत्याह॥ नचेति॥ यत्कृतकंतदनित्यमित्यनुमानानुगृहीतंतद्यथेहेत्यादि

यथाचायमर्थःषष्ठेजनकाख्यायिकासमाप्तौवक्ष्यामोयत्तुविषदध्यादिवदित्युक्तंतत्रप्रत्यक्षानुमानविषयत्वाद्विरोधः॥ यस्त्वयंत
शब्दगम्योर्थस्तत्रवाक्यस्याभावेतदर्थप्रतिपादकस्यनशक्यंकल्पयितुंविषदध्यादिसाधर्म्यंनचप्रमाणांतरविरुद्धार्थविषयेश्रुतेः
प्रामाण्यंकल्प्यते॥ यथाशीतोग्निःक्लेदयतीतिश्रुतेस्तुतादर्थ्येवाक्यस्यप्रमाणांतरस्याभासत्वंयथाखद्योतोग्निरितितलमलिनमंतरि
क्षमितिबालानांप्रत्यक्षमपितद्विषयप्रमाणांतरस्ययथार्थत्वेनिश्चितेनिश्चितार्थमपिबालप्रत्यक्षमाभासीभवति वाक्यंतद्विरोधेनार्थ
वादश्रुतेः॥ स्वार्थेप्रामाण्यमित्यर्थःप्रामाणांतरविरुद्धेर्थेप्रामाण्यंश्रुतेर्नोच्यतेचेदद्वैतश्रुतेरपिकथंप्रत्यक्षादिविरुद्धेस्वार्थेप्रामाण्यमित्याशंक्याह॥
श्रुतेस्त्विति॥ तत्त्वमस्यादिवाक्यस्यषड्विधतात्पर्यलिंगैःसदद्वैतपरत्वेनिर्धारितेसद्भेदविषयस्यप्रत्यक्षादेराभासत्वंभवतीत्यर्थः॥ तदेवदृष्टांतेनसाध
यति॥ यथेत्यादिना॥ यदविवेकिनांयथोक्तंप्रत्यक्षंतद्यद्यपिप्रथमभावित्वेनप्रबलंनिश्चितार्थंचतथापितस्मिन्नेवाकाशादौविषयेप्रवृत्तस्याप्तवा
क्यादेर्मानांतरस्ययथार्थत्वेसतितद्विरुद्धंपूर्वोक्तमविवेकिप्रत्यक्षमप्याभासीभवतितथेदंद्वैतविषयंप्रत्यक्षाद्यद्वैतागमविरोधेभवत्याभासद्रूप

ननु तात्पर्यं नाम पुरुषस्य मनोधर्मस्तद्दूषणाच्चेद्वेदे तच्छ्रुतेर्यथार्थत्वं तर्हि प्रतिपुरुषमन्यथैव तात्पर्यदर्शनात्तद्दूषणादन्यथैव श्रुत्यर्थः स्यादित्याशंक्य
दार्ष्टीतिकं निगमयन्नुत्तरमाह॥ तस्मादित्यादिना॥ तादर्थ्यमर्थपरत्वं तथात्वं याथार्थ्यं शब्दधर्मः तात्पर्यं तच्च षड्विधलिंगगम्यं तथा च शब्दस्य पुरु
षाभिप्रायवशान्नान्यथार्थत्वमित्यर्थः॥ उक्तमर्थं दृष्टांते नस्पष्टयति॥ नहीति॥ विचारार्थमुपसंहरति॥ तस्मादिति॥ विद्यासंयुक्तस्यापि कर्मणो मोक्षा
रंभकत्वासंभवस्तच्छब्दार्थः॥ मा भूत्कर्मणां मोक्षार्थत्वं किं तावतेत्याशंक्य ब्राह्मणारंभं निगमयति॥ अत इति॥ ब्राह्मणारंभमेवं प्रतिपाद्य तदक्षराणि

तस्माद्वेदप्रामाण्यस्याव्यभिचारात्तादर्थ्ये सति वाक्यस्य तथात्वं स्यान्न तु पुरुषमतिकौशलं न हि पुरुषमतिकौशलात्सविता रूपं न प्रका
शयति तथा वेदवाक्यान्यपि नान्यार्थानि भवंति तस्मान्न मोक्षार्थानि कर्माणीति सिद्धमतः कर्मफलानां संसारत्वप्रदर्शनायैव ब्राह्मणमा

अथ हैनं भुज्युर्लाह्यायनिः पप्रच्छ याज्ञवल्क्येति होवाच॥

रभ्यते॥ अथानंतरमुपरते जारत्कारवे भुज्युरिति नामतो लह्यस्यापत्यं लाह्यस्तदपत्यं लाह्यायनिः पप्रच्छ याज्ञवल्क्येति होवाच आदावु
क्तमश्वमेधदर्शनं समष्टिव्यष्टिफलश्चाश्वमेधः क्रतुर्ज्ञानसमुच्चितो वा केवलज्ञानसंपादितो वा सर्वकर्मणां परा काष्ठा भ्रूणहत्याश्वमेधा
भ्यां न परं पुण्यपापयोरिति हि स्मरंति तेन हि समष्टिं व्यष्टीश्च प्राप्नोति व्याकरोति॥ अथेति॥ याज्ञवल्क्यमभिमुखीकृत्य भुज्युः स्वस्य पूर्ववृत्तांतं क
थां कथयन् तामवतारयितुमश्वमेधस्वरूपं तत्फलं च विभज्य दर्शयति॥ आदाविति॥ क्रतुरुक्त इति पूर्वेण संबंधः॥ क्रतोर्द्वैविध्यमाह॥ ज्ञानेति॥
अश्वमेधस्य द्विधा विभक्तस्य सर्वकर्मोत्कर्षमुदिरति॥ सर्वकर्मणामिति॥ तस्य पुण्यश्रेष्ठत्वे मानमाह॥ भ्रूणहत्येति॥ समष्टिमष्टिफलश्चेत्युक्तं स्पष्ट

बृ॰र॰
२५

अश्वमेधेनसहकारिकामनाभेदेनसमष्टिंसमनुगतरूपांव्यष्टिश्चव्यावृत्तरूपादेवताःप्राप्नोतीत्यर्थः॥काप्रनर्व्यष्टयोविवक्ष्यंतेतत्राह॥तत्रेति॥अग्नि
रादित्योवायुरित्याद्याव्यष्टयोदेवताः॥सोग्निरभवदित्याद्यावेडांतवर्तिन्योश्वमेधफलभूतादृष्टितादृश्यर्थः॥कातर्हिसमष्टिर्देवतेत्युक्तेतत्रेवोक्तंस्मा
रयति॥मृत्युरिति॥तामेवसमष्टिरूपांदेवतांप्रपंचयितुमिदंब्राह्मणमितिवक्तुंपातनिकांकरोति॥मृत्युश्चेति॥प्राणात्मकबुद्धिधर्मोशनायाक
थंमृत्योर्लक्षणंतत्राह॥बुध्यात्मेति॥तर्हिबुद्धेर्व्यष्टित्वान्मृत्युरपितथास्यादित्याशंक्याह॥समष्टिरिति॥प्रागेवव्यष्ट्युत्पत्तेरुत्पन्नत्वेनसमष्टित्वंसाध
यति॥प्रथमजइति॥सर्वाश्रयत्वंदर्शयति॥सूत्रमिति॥तत्रवायुर्वैगौतमेत्यादिवाक्यंप्रमाणमितिसूचयति॥वायुरिति॥तथापिकथंप्रथमजत्वंभू

तत्रव्यष्टयोनिर्ज्ञाताअंडांतरविषयाःअश्वमेधयागफलभूताःमृत्युरस्यात्माभवत्येतासांदेवतानामेकोभवतीत्युक्तंमृत्युश्चाशना
यालक्षणोबुध्यात्मा॥समष्टिःप्रथमजोवायुःसूत्रंसत्यंहिरण्यगर्भस्तस्यव्याकृतोविषयोयदात्मकंसर्वंद्वैतैकत्वंयःसर्वभूतांतरात्मा
लिंगममूर्तरसोयदाश्रितानिसर्वभूतकर्माणियःकर्मणांकर्मसंबंधिनांचविज्ञानानांपरागतिःपरंफलंतस्यक्रियानुगोचरःकिय
तीव्याप्तिःसर्वतःपरिमंडलीभूतासावक्तव्या

तानांप्रथममुत्पत्तेरित्याशंक्याह॥सत्यमिति॥हिरण्यगर्भस्योक्तलक्षणत्वेपिकिमायातंमृत्यो
रित्याशंक्याह॥हिरण्यगर्भइति॥जगदेवसमष्टिव्यष्टिरूपंनसूत्रमित्याशंक्याह॥यदात्मकमिति॥द्वैतंव्यष्टिरूपमेकत्वंसमष्टिरूपंतत्सर्वंयदा
त्मकंतस्येतिसंबंधः॥तस्योक्तप्रमाणत्वंप्रकटयति॥यःसर्वेति॥विज्ञानात्मानंव्यावर्तयतिलिंगमिति॥त्यस्यह्येषरसइतिश्रुतिमनुसृत्याह॥अ
मूर्तेति॥तस्यसाधनाश्रयत्वंदर्शयति॥यदाश्रितानीति॥तस्यैवफलाश्रयत्वमाह॥यःकर्मणामिति॥परागतिरित्यस्यैवव्याख्यानं॥परंफलमिति
॥एवंभूमिकामारचय्यानंतरंब्राह्मणमवतारयति॥तस्येति॥प्रश्नमेवप्रकटयति॥कियतीति॥सर्वतःपरितोमंडलभावमासाद्यस्थितेतिया

अ॰
५

श्री
राम॰
२५

हंपिष्यामीं ४ पैंगुः शाखाध्यायिनः ४

ननु किमिति सा वक्तव्या तस्यामुक्तायामपि वक्तव्य संसारावशेषाद्याकांक्षाविश्रांत्यभावादत आह॥ तस्यामिति॥ इयानेवं बंधो नाधिको न्यूनो वेत्यस्य व्यवच्छेदेन बंधपरिमाणपरिच्छेदार्थं कर्मफलव्याप्तिरत्रोच्यते तत्परिच्छेदश्च वैराग्यद्वारा मुक्तिहेतुरिति भावः॥ ब्राह्मणस्यैवं प्रवृत्तावपि किमिति भु

तस्यामुक्तायां सर्वसंसारो बंधगोचर उक्तो भवति तस्य च समष्टिव्यष्ट्यात्मदर्शनस्यालौकिकत्वप्रदर्शनार्थमाख्यायिकामात्मनो वृत्तां प्रकुरुते तेन च प्रतिवादिबुद्धिं व्यामोहयिष्यामीति मन्यते॥ मद्रेषु मद्रा नाम जनपदास्तेषु चरका अध्ययनार्थं व्रतचरणाच्चरका अध्वर्यवो वा पर्यव्रजाम पर्यटितवंतस्ते पतंचलस्य तेवयं पर्यटंतः पतंचलस्य नामतः काप्यस्य कपिगोत्रस्य गृहानैम गतवंतस्तस्यासीद्दु

मद्रेषु चरकाः पर्यव्रजाम ते पतंचलस्य काप्यस्य गृहानैम तस्यासीत् दुहिता गंधर्वगृहीता तमपृच्छाम कोऽसीति सोऽब्रवीत्सुधन्वांगिरस इति तं यदा लोकानामंतानपृच्छामाथैनमब्रूम क्व पारिक्षिता अभवन्निति क्व पारिक्षिता अभवन्स त्वा पृच्छामि याज्ञवल्क्य क्व पारिक्षिता अभवन्निति॥२४॥ हिता गंधर्वगृहीता गंधर्वेणामानुषेण सत्वेन केनचिदाविष्टा गंधर्वो वा धिष्ण्योऽग्निः ऋत्विग्देवताविशिष्टविज्ञानत्वादवसीयते न हि सत्वमात्रस्येदृशं विज्ञानमुपपद्यते तं सर्वे वयं परिवारिताः संतोऽपृच्छाम कोऽसीति कुस्त्वमसि किंनामा किंसतत्वः सोऽब्रवीद्गंधर्वः सुधन्वा नामतः आंगिरसो गोत्रतस्तं यदा यस्मिन्काले लोकानामंतान्पर्यवसानान्यपृच्छामाथैनं गंधर्वम

ज्युः स्वस्य पूर्वं निर्वृत्तां कथामाहेत्याशंक्याह॥ तस्य चेति॥ समष्टिव्यष्ट्यात्मदर्शनस्यालौकिकत्वप्रदर्शनेन वा किं स्यात्तदाह॥ तेन चेति॥ इति मन्यते भुज्युरिति शेषः॥ जल्पे परपराजयेनात्मजयस्येष्टत्वादित्यर्थः॥ धिष्ण्यत्वं अग्नेरुपास्यत्वं॥ अग्निर्वै देवानां होतेति श्रुतिमाश्रित्याह॥ ऋत्विगिति॥ यथोक्तगंधर्व सोमादिषु तस्यां तस्यां दिशि मंडलेषु स्थापितोऽग्निः धिष्ण्योऽग्निः ८५

अथैनमित्यादेरर्थं विवृणोति॥ भुवनेति॥ भवत्स्वेवं गंधर्वं प्रतिभवतः प्रश्नस्तथापि किमायातं तदाह॥ स चेति॥ तेन गंधर्वेण वचनेनेति यावत्॥ दिव्येभ्यो
गंधर्वेभ्यः सकाशादित्येतत्॥ एतत्ज्ञानाभावे बलज्ञानमप्रतिभा ब्रह्मिष्ठत्वप्रतिज्ञाहानिश्चेत्याह॥ अतइति॥ प्रष्टुरभिप्रायमुक्त्वा प्रश्नाक्षराणि व्याचष्टे॥
सोहमिति॥ प्रथमाला वल्क पारिक्षिता अभवन्नित्युक्तिर्गंधर्वप्रश्नार्था द्वितीया तदनुरूप प्रतिवचनार्था यो हि क्व पारिक्षिता अभवन्निति प्रश्नो गंधर्वप्र

भुवनकोशपरिमाणज्ञानाय प्रवृत्तेषु सर्वेषात्मानं श्लाघयंतः पृष्टवंतो वयं कथं क्व पारिक्षिता अभवन्निति स च गंधर्वः सर्वमस्म
भ्यमब्रवीत्तेन दिव्येभ्यो मया लब्धं ज्ञानं तव नास्त्यतो निगृहीतोसीत्यभिप्रायः सोहं विद्यासंपन्नो लब्धागमो गंधर्वात्त्वां त्वां पृच्छामि या
ज्ञवल्क्य क्व पारिक्षिता अभवन्त्वं किं जानासि हे याज्ञवल्क्य कथय पृच्छामि क्व पारिक्षिता अभवन्निति॥ २४॥ स होवाच याज्ञवल्क्यः उ

स होवाचोवाच वै सोगच्छन्वै ते तद्यत्राश्वमेधयाजिनो गच्छंतीति क्व न्वश्वमेधयाजिनो गच्छंतीति द्वात्रिंशतं वै देवरथा
ह्न्यान्ययं लोकस्तं समंतं पृथिवी द्विस्तावत्पर्येति ताꣳ

वाच वै सः वै शब्दः स्मरणार्थ उवाच वै स गंधर्वस्तुभ्यमगच्छन्वै ते पा
रिक्षितास्तत्र क्व यत्र यस्मिन्नश्वमेधयाजिनो गच्छंतीति निर्णीते प्रश्न आह क्व नु कस्मिन्नश्वमेधयाजिनो गच्छंतीति तेषां गति विव
क्षया भुवनकोशपरिमाणमाह॥ तिकृतस्तस्य प्रत्युक्तिं सर्वा सोस्मभ्यमब्रवीदिति तत्र विवक्ष्यते तत्तीपातुमुनिं प्रतिप्रश्नार्थेति विभागः॥
॥१॥ अज्ञानादिनिग्रहं परिहरन्नुत्तरमाह॥ स होवाचेति॥ स्मरणार्थो गंधर्वाल्लब्धस्य ज्ञानस्येति शेषः॥ किमुवाचेत्यपेक्षायामाह॥ अगच्छन्निति
॥ अहोरात्रमादित्यरथगत्या यावान्संस्थामितस्तावान्देशो द्वात्रिंशद्गुणितस्तत्किरणव्याप्तः स च चंद्ररश्मिव्याप्तेन देशेन साकं पृथिवीस्थ तेषु च्यते रवि चं

ससमुद्रसरिद्वेला तावती पृथिवी स्मृतेति स्मृतेरित्याह॥ द्वात्रिंशतमित्यादिना॥ अयंलोक इत्यस्यार्थमाह॥ तावदिति॥ तत्र लोकभागं विभजते॥ यत्रे
ति॥ उक्तं लोकमनूद्य अवशिष्टस्यालोकत्वमाह॥ एतावानिति॥ प्रतीकमादाय व्याचष्टे॥ लोकमित्यादिना॥ अन्वयं दर्शयितुं तं लोकमिति पुनरुक्तिः
॥ तत्र पौराणिकसंमतिमाह॥ यं घनोदमिति॥ उक्तं हि॥ अंडस्यास्य समंतात्तु सन्निविष्टो घनोदधिः॥ समंताद्घनतोयेन धार्यमाणः स तिष्ठतीति तद्या

द्वात्रिंशत्वं वै द्वे अधिके त्रिंशतं वै देवरथाह्न्यानि देव आदित्यस्तस्य रथो देवरथस्तस्य रथस्य गत्या अन्हा यावत्परिच्छिद्यते देशपरिमाणं तद्देवर
थाह्न्यं तद्द्वात्रिंशद्गुणितं देवरथाह्न्यानि तावत्परिमाणो यं लोको लोकालोकगिरिणा परिक्षिप्तः यत्र वैराजं शरीरं यत्र च कर्मफलोपभोगः प्रा
णिनां स एष लोक एतावांल्लोकोऽतः परमलोकस्तं लोकं समंतं समंततो लोकविस्ताराद्द्विगुणपरिमाणविस्तारेण परिमाणेन तं लोकं परि

समंतं पृथिवी द्विस्तावत्समुद्रः पर्येति तद्यावती क्षुरस्य धारा यावद्वा मक्षिकायाः पत्रं॥ तावानंतरेणाकाशस्तानिंद्रः सुपर्णो भू
त्वा वायवे प्रायच्छत्तान्वायुरात्मनि धित्वा तत्रागमयद्यत्राश्वमेधयाजिनो भवन्नित्येवमिव वै स वायुमेव प्रशशंस

क्षिप्तां पर्येति पृथि
वीं तां पृथिवीं तथैव समंतं द्विस्तावद्द्विगुणेन परिमाणेन समुद्रः पर्येति यं घनोदमाचक्षते पौराणिकास्तत्रांडकपालयोर्विवरपरिमाणमुच्य
ते येन विवरेण मार्गेण बहिर्निर्गच्छंतोऽश्वमेधयाजिनस्तत्र यावती यावत्परिमाणा क्षुरस्य धाराग्रं यावद्वा सौक्ष्म्येण युक्तं मक्षिका
याः पत्रं॥ तावांस्तावत्परिमाणोंतरेण मध्ये अंडकपालयोराकाशः छिद्रं तेनाकाशेनेत्येतत्तान्पारिक्षितानश्वमेधयाजिनः प्राप्तानिंद्रः परमेश्व

वतीत्या देत्यासर्यमाह॥ तत्रेति॥ लोकादिपरिमाणे यथोक्तरीत्यास्थिते सतीति यावत्॥ कपालविवरस्यानुपयुक्तत्वात्किं तत्परिमाणचिंतयेत्याशंक्याह॥ येने

बृ·र·
२७

सुपर्णशब्दस्य श्येनसादृश्यमाश्रित्य विशेषणैर्गत्योऽप्रवृत्तिं दर्शयति॥ यंद्विषयमिति॥ उक्तार्थं पदमनुवदति सुपर्णइति॥ भूत्वेत्यस्यार्थमाह॥ पक्षेति॥
ननु चित्सोऽग्निरंडाद्बहिरश्वमेधयाजिनो गृहीत्वा स्वयमेव गच्छतु किमिति तान्वायवे प्रयच्छतीति तत्राह॥ मूर्त्तत्वादिति॥ आत्मनश्रित्वस्याग्नेरिति यावत्॥

श्रितः सुपर्णो यद्विषयं दर्शनमुक्तं तस्य प्राचीदिक्शिर इत्यादिना सुपर्णः पक्षीभूत्वा पक्षपुच्छाद्यात्मकः सुपर्णो भूत्वा वायवे प्रायच्छत् अमूर्त
त्वान्नास्यात्मनो गतिस्तत्रेति तान्पारिक्षितान्वायुरात्मनि धित्वा स्थापयित्वा स्वात्मभूतान्कृत्वा तत्र तस्मिन्नगमयत् क्व यत्र पूर्वे तिक्रां
ताः पारिक्षिता अश्वमेधयाजिनोऽभवन्निति एवमिव वै एवमेव स गंधर्वो वायुमेव प्रशशंस पारिक्षितानां गतिं समाप्ताख्यायिका तन्नि

स तस्माद्वायुरेव व्यष्टिर्वायुः समष्टिरप पुनर्मृत्युं जयति य एवं वेद ततो ह भुज्युर्लाह्यायनिरुपरराम॥२५॥ तृतीयं ब्राह्मणं॥३॥

इत्त्वमर्थमाख्यायिकातोपसृत्य स्वेन श्रुतिरूपेणैवाचष्टे स्मभ्यं यस्माद्वायुः स्थावरजंगमानां भूतानामंतरात्मा बहिश्च स एव तस्माद्ध्यात्माधिभूताधिदैवभावेन विविधा याव्यष्टिर्व्याप्तिः स वायुरेव तथा समष्टिः केवलेन सूत्रात्मना वायुरेव स एवं वायुमात्मानं समष्टिव्यष्टिरूपात्मकत्वेनोपगच्छति य एवं वेद तस्य किं फलमित्याह अप पुनर्मृत्युं जयति सकृन्मृत्वा पुनर्न म्रियते ततआत्मनः प्रश्ननिर्णयाद्भुज्युर्लाह्यायनिरुपरराम॥२५॥ ॥इति श्रीमद्बृहदारण्यके पंचमे प्रपाठके तृतीयं ब्राह्मणं॥३॥ तत्रैसंडाद्बाह्यदेशोक्तिः॥ इतियुक्तं वायवे प्रदानमिति शेषः॥

आख्यायिका समाप्ताविति शब्दः॥ परितो दुरितं क्षीयते येन स परीक्षिदश्वमेधस्तद्याजिनः पारिक्षितास्तेषां गतिं वायुमिति संबंधः॥ मुनिवचने वर्त्तमाने कथमा
ख्यायिका समाप्तिस्तत्राह॥ समाप्तेति॥ वायुप्रशंसायां हेतुमाह॥ यस्मादिति॥ किं पुनर्यथोक्तवायुतत्त्वविज्ञानफलं तदाह॥ एवमिति॥२॥ इति बृहदारण्यके भु

अ·
५

राम:
२७

ब्राह्मणांतरमवतारयति॥ अथेति॥ तस्यापुनरुक्तमर्थं वक्तुमार्तभागप्रश्ने वृत्तं कीर्तयति॥ पुण्येति॥ भुज्युप्रश्नांते सिद्धमर्थमनुद्रवति॥ पुण्यस्य
चेति॥ नामरूपाभ्यां व्याकृतं जगद्धिरण्यगर्भात्मकं तद्विषयमुत्कर्षं विशिनष्टि॥ समष्टीति॥ कथं यथोक्तोत्कर्षस्य पुण्यकर्मफलत्वं तत्राह॥ हेत्विति॥
संप्रत्यनंतरब्राह्मणस्य विषयं दर्शयति॥ यस्त्विति॥ माध्यमिकानामन्येषां चोद्यो विवादः किंलक्षणो देहादीनामन्यतमस्तेभ्यो विलक्षणो वेति यावत्॥
इत्येवं विमृश्यात्मनो देहादिभ्यो विवेकेनाधिगमायेदं ब्राह्मणमित्याह॥ इत्यात्मन इति॥ विवेकाधिगमस्य भेदज्ञानत्वेनानर्थकरत्वमाशंक्याह कहोलप्रश्ने

अथ हैनमुषस्तश्चाक्रायणः पप्रच्छ पुण्यपापप्रयुक्तैर्ग्रहातिग्रहैर्गृहीतः पुनः पुनर्ग्रहातिग्रहांस्त्यजन्नुपाददत्संसरतीत्युक्तं पुण्यस्य च पर
उत्कर्षो व्याख्यातो व्याकृतविषयः समष्टिव्यष्टिरूपो द्वैतैकत्वात्मप्राप्तिर्यस्तु ग्रहातिग्रहैर्ग्रस्तः संसरति सोऽस्ति वा नास्ति अस्तित्वे च किंल
क्षण इत्यात्मन एव विवेकावगमायोषस्तप्रश्न आरभ्यते॥ तस्य निरुपाधिस्वरूपस्य क्रियाकारकविनिर्मुक्तस्वभावस्याधिगमाद्यथोक्ता
द्बंधनात्प्रमुच्यते सप्रयोजका आख्यायिकासंबंधस्तु प्रसिद्धः॥ अथ ह एनं प्रकृतं याज्ञवल्क्यं उषस्तो नामतश्चक्रस्यापत्यं चाक्रायणः
पप्रच्छ यद्ब्रह्म साक्षादव्यवहितं केनचित् द्रष्टुरपरोक्षाद्गौणं न श्रोत्रं ब्रह्मादिवत्किं तद्यः आत्मात्मशब्देन प्रत्यगात्मोच्यते तत्रात्मशब्द
स्य प्रसिद्धत्वात्सर्वस्या

तात्पर्यं संगृह्णाति॥ तस्य चेति॥ ब्राह्मणसंबंधमुक्त्वाख्यायिकासंबंधमाह॥ आख्यायिकेति॥ विद्यास्तुत्यर्था सुखावबो
धार्था चाख्यायिकेत्यर्थः॥ भुज्युप्रश्ननिर्णयानंतर्यमथशब्दार्थः॥ संबोधनमभिमुखीकरणार्थं॥ द्रष्टुरव्यवहितमित्युक्ते घटादिवद्व्यवधानं गौणमि
त्याशंक्य तन्निराकर्तुं अपरोक्षादित्युक्तं॥ मुख्यमेव द्रष्टुरव्यवहितं स्वरूपं ब्रह्म तथा च द्रष्ट्रधीनसिद्धत्वाभावात्ततोऽपरोक्षमित्यर्थः॥ श्रोत्रं ब्रह्म मनो ब्रह्मे
त्यादि यथा गौणं न तथा गौणं द्रष्टुरव्यवहितं ब्रह्माद्वितीयत्वादित्याह॥ न श्रोत्रेति॥ उक्तमव्यवधानमाकांक्षाद्वारानंतरवाक्येन साधयति॥ किं तदित्यादि

ना॥ तस्य परिच्छिन्नत्वशंकां वारयति॥ सर्वस्येति॥

सर्वनामभ्यांप्रत्यग्ब्रह्मविशेष्यंसमर्प्यते॥इतरैस्तुशब्दैर्विशेषणानीतिविभागमभिप्रेत्याह॥यद्यःशब्दाभ्यामितिइतिउच्यतेइत्यनेनसंबध्यते॥इ
तिशब्दोद्वितीयप्रश्नसमाप्त्यर्थः॥तमेवप्रश्नंविवृणोति॥विस्पष्टमिति॥त्वमर्थवाक्यार्थान्वययोग्येपृष्टेतस्यदर्शनार्थंप्रत्युक्तिमवतारयति॥एवमुक्त
इतिसर्वांतरइतिविशेषोक्त्याप्रश्नस्यविशेषणांतराणामनास्थामाशंक्याह॥सर्वविशेषणेति॥एषसर्वांतरइतिभागस्यार्थंविवृणोति॥यत्साक्षादि

भ्यंतरःसर्वांतरोयद्यःशब्दाभ्यांप्रसिद्धआत्माब्रह्मेतितमात्मानंमेमह्यंव्याचक्ष्वेतिविस्पष्टंगंगरहीलायथागांदर्शयतितथाच
क्ष्वसोयमित्येवंकथयस्वेत्यर्थःइत्येवमुक्तःप्रत्याहयाज्ञवल्क्यःएषतेतवआत्मासर्वांतरःसर्वस्याभ्यंतरःसर्वविशेषणोपलक्ष
णार्थंसर्वांतरग्रहणंयत्साक्षादव्यवहितंअपरोक्षाद्गौणंब्रह्मबृहत्तममात्मासर्वस्याभ्यंतरःएतैर्गुणैःसमस्तैर्युक्तएषःकोसौत

अथहैनमुषस्तश्चाक्रायणःपप्रच्छयाज्ञवल्क्येतिहोवाचयत्साक्षादपरोक्षाद्ब्रह्मयआत्मासर्वांतरस्तंमेव्याचक्ष्वेत्येषत
आत्मासर्वांतरःकतमोयाज्ञवल्क्यसर्वांतरो

वात्मायोयंकार्यकरणसंघातस्तवात्मायेनात्मनात्मवान्सएषतवात्मातव
कार्यकरणसंघातस्येत्यर्थः॥तत्रपिंडस्तस्याभ्यंतरेलिंगात्माकरणसंघातस्तृतीयोयश्चसंदिह्यमानस्तेषुकतमोमेममात्मासर्वां
तरस्त्वयाविवक्षितइत्युक्तःइतरआह॥यःप्राणेनमुखनासिकासंचारिणाप्राणितिप्राणचेष्टांकरोतियेनप्राणःप्रणीयतइत्यर्थःसते
तवकार्यकरणसंघातस्यात्माविज्ञानमयःसमानमन्यद्योपानेनापानितिव्यानेनव्यानीतीतिछांदसंदैर्घ्यं ति॥एषशब्दार्थंप्रश्नपूर्वकमाह
॥कोसाविति॥आत्मशब्दार्थंविवृणोति॥योयमिति॥येनेत्यत्रसशब्दोद्रष्टव्यः॥षष्ठ्यर्थंस्पष्टयति॥तवेति॥प्रश्नांतरमुत्थाप्यप्रतिवक्ति॥तत्रेत्यादिना॥सर्वांत

तृतीयोमातृसाक्षीप्रणीयतेप्राणेन विशिष्टः क्रियतेइतियावत्॥ कथमेतावृतासंदेहोपाकृतइत्याशंक्यविवक्षितमनुमानंवक्तुंव्याप्तिमाह॥ सर्वेइति॥
याखल्वचेतनप्रवृत्तिः साचेतनाधिष्ठानपूर्विकायथारथादिप्रवृत्तिरित्यर्थः॥ येनक्रियंतेसोस्तीतिसंबंधः॥ दृष्टांतस्यसाध्यवैकल्यंपरिहरति॥ नहीति॥ संप्रत्यनुमानमारचयति॥ तस्मादिति॥ विमताचेष्टाचेतनाधिष्ठानपूर्विकाऽचेतनप्रवृत्तित्वाद्रथादिचेष्टावदित्यर्थः॥ प्रतिपद्यतेप्राणादीतिशेषः

सर्वाः कार्यकरणसंघातगताः प्राणनादिचेष्टादारुयंत्रस्येवयेनक्रियंतेनहिचेतनावदनधिष्ठितस्यदारुयंत्रस्येवप्राणनादिचेष्टा
विद्यंतेतस्माद्विज्ञानमयेनाधिष्ठितंविलक्षणेनदारुयंत्रवत्प्राणनादिचेष्टांप्रतिपद्यतेतस्मात्सोस्तिकार्यकरणसंघातविलक्षणो
यश्चेष्टयति॥ २६॥ १॥ सहोवाचोषस्तश्चाक्रायणोयथाकश्चिदन्यथाप्रतिज्ञायपूर्वंपुनर्विप्रतिपन्नोब्रूयादन्यथासौगौरसावश्वोयश्चलति

यः प्राणेनप्राणितिसतआत्मासर्वांतरोयोपानेनापानितिसतआत्मासर्वांतरोयोव्यानेनव्यानीतिसतआत्मासर्वांतरोयउदा
नेनोदानितिसतआत्मासर्वांतरएषतआत्मासर्वांतरः॥ २६॥ धावतीतिवापूर्वंप्रत्यक्षंदर्शयामीतिप्रतिज्ञायपश्चाच्चलनादिलिंगै
र्व्यपदिशत्येवमेवैतद्ब्रह्मप्राणनादिलिंगैर्व्यपदिष्टंभवतित्वया॥ किंबहुनात्यक्त्वागोतृत्वानिमित्तंव्याजंयदेवसाक्षादपरोक्षात्ब्रह्मयआ
त्मासर्वांतरस्तंमेव्याचक्ष्वेतीतरआह ॥ अनुमानफलमाह॥ तस्मात्सोस्तीति॥ चेष्टयतिकार्यकरणसंघातमितिशेषः॥ २६॥ प्रश्नप्रतिवचनयोरननु
रूपत्वमाशंकते॥ सहोवाचेति॥ दृष्टांतमेवस्पष्टयति॥ असावित्यादिना॥ प्रत्यक्षंगामश्वंवादर्शयामीतिपूर्वंप्रतिज्ञायपश्चाद्यश्चलत्यसौगौर्योवाधावतिसोश्व
इतिचलनादिलिंगैर्यथागवादिव्यपदिशतिएवमेवब्रह्मप्रत्यक्षंदर्शयामीतिमत्प्रश्नानुसारेणप्रतिज्ञायप्राणनादिलिंगैस्तद्व्यपदिशतस्तेप्रतिज्ञाहानिरनव

६४

प्रयुक्तितात्पर्यमाह॥ यथेति॥ प्रतिज्ञानुवर्तनमेवाभिनयति॥ तत्तथेति॥ कतमो याज्ञवल्क्येत्यादिप्रश्नस्य तात्पर्यमाह॥ यत्पुनरिति॥ न दृष्टेरित्यादि
वाक्यस्य तात्पर्यं वदन्नुत्तरमाह॥ न दशक्यत्वादिति॥ आत्मनो वस्तुत्वाद्घटादिवद्विषयीकरणं नाशक्यमिति शंकते॥ कस्मादिति॥ वस्तुस्वरूपमनुस
त्यपरिहरति॥ आहेति॥ घटादेरपि तर्हि वस्तुस्वाभाव्यान्मा भूद्विषयीकरणमिति मन्वानः शंकते॥ किंपुनरिति॥ दृष्ट्यादिसाक्षित्वं वस्तुस्वाभाव्यं तत्रा

यथा मया प्रथमं प्रतिज्ञातस्तव आत्मा एवंलक्षण इति तां प्रतिज्ञामनुवर्त एव तत्तथैव यथोक्तं मया यत्पुनरुक्तं तमात्मानं घटादिवद्विषयी
कुर्विति न तदशक्यत्वान्न क्रियते कस्मात्पुनस्तदशक्यमित्याह वस्तुस्वाभाव्यात्॥ किंपुनस्तद्वस्तुस्वाभाव्यं दृष्ट्यादिद्रष्टृत्वं दृष्टेर्द्रष्टा ह्या
त्मा दृष्टिरिति हि द्विविधा भवति॥ लौकिकी पारमार्थिकी चेति तत्र लौकिकी चक्षुःसंयुक्तान्तःकरणवृत्तिः सा क्रियत इति जायते विनश्यति

स होवाचोषस्तश्चाक्रायणो यथा विब्रूयादसौ गौरसावश्व इत्येवमेवैतद्व्यपदिष्टं भवति यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा
सर्वान्तरस्तं मे व्याचक्ष्वेत्येष त आत्मा सर्वान्तरः कतमो याज्ञवल्क्य

यात्वात्मनो दृष्टिरग्न्युष्णत्वप्रकाशादिवत्सा च द्रष्टुः स्वरूप
त्वान्न जायते न विनश्यति च॥ सा क्रियमाणयोपाधिभूतया संसृष्टेवेति व्यपदिश्यते द्रष्टेति भेदवच्च द्रष्टा दृष्टिरिति च

विषयत्वं न चैवं वस्तु
स्वाभाव्यं घटादेरस्तीत्युत्तरमाह॥ दृष्ट्यादीति॥ दृष्ट्यादिसाक्षिणोऽपि दृष्टिविषयत्वं किं न स्यादित्याशंक्याह॥ दृष्टेरिति॥ यथा प्रदीपो लौकिकज्ञानेन प्रका
श्यो न स्वप्रकाशकं ज्ञानं प्रकाशयति तथा दृष्टिसाक्षी दृष्ट्या न प्रकाश्यत इत्यर्थः॥ दृष्टेर्द्रष्टैव नास्तीति सौगतास्तान्प्रत्याह॥ दृष्टिरितीति॥ लौकिकीं व्याचष्टे॥
तत्रेति॥ पारमार्थिकीं दृष्टिं व्याकरोति॥ यात्विति॥ नन्वात्मा नित्यदृष्टिस्वभावश्चेत्कथं द्रष्टेत्यादिव्यपदेशः सिध्यति तत्राह॥ सा क्रियमाणेति॥ सा स्वबुद्धितद्वृत्तिगतं

आत्मनो नित्यदृष्टिस्वभावत्वे कथं पश्यति न पश्यति चेति क्तादिविक्लोऽव्यवहार इत्याशंक्याह ॥ यासाविति ॥ या बहुविशेषणा लौकिकी दृष्टिरसौ तस्य ति
क्तायेति संबंधः ॥ तथा तस्य तिक्ता याव्याप्तैवेति यावत् ॥ किमिति सोपचारिकोऽयं व्यपदेशो मुख्यस्तु किं न स्यादित्याशंक्याह ॥ न त्विति ॥ दृष्टेर्वस्तुतो न विक्रियाव
त्वं इत्यत्र वाक्यशेषमनुकूलयति ॥ तथा चेति ॥ उक्तेऽर्थे न दृष्टेरित्यादिश्रुतिमवतार्य व्याचष्टे ॥ तमिममित्यादिना ॥ उक्तमेव प्रपंचयति ॥ यासाविति ॥ न दृष्टेरि

यासौ लौकिकी दृष्टिश्चक्षुर्द्वारा रूपोपरक्ता जायमानेव नित्यया आत्मदृष्ट्या संसृष्टेव तस्य तिक्ता याव्याप्तैव जायते तथा विनश्यति च तेनो
पचर्यते द्रष्टा सदा पश्यन्नपि पश्यति न पश्यति चेति न तु पुनर्द्रष्टुर्दृष्टेः कदाचिदपि अन्यथात्वं तथा च वक्ष्यति षष्ठे ध्यायतीव लेलायतीव न
हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते इति च तमिममर्थमाह लौकिक्या दृष्टेः कर्मभूताया द्रष्टारं स्वकीयया नित्यया दृष्ट्या व्याप्तारं न पश्येः यासौ

सर्वांतरो न दृष्टेर्द्रष्टारं पश्येर्न श्रुतेः श्रोतारꣳ शृणुया न मतेर्मन्तारं मन्वीथा न विज्ञातेर्विज्ञातारं विजानीया

लौकिकी दृष्टिः कर्मभूता सा रूपोपरक्ता रूपाभिव्यंजिका नात्मानं स्वात्मनो व्याप्तारं प्रत्यंचं व्याप्नोति ॥ तस्मात्तं प्रत्यगात्मानं दृष्टेर्द्रष्टारं
न पश्येः तथा श्रुतेः श्रोतारं न शृणुयाः तथा मतेर्मनोवृत्तेः केवलायाः व्याप्तारं न मन्वीथाः तथा विज्ञातेः केवलाया बुद्धिवृत्तेर्व्याप्तारं न विजा
नीयाः एष वस्तुनः स्वभावोऽतो नैव दर्शयितुं शक्यते गवादिवन्न दृष्टेर्द्रष्टारमित्यत्राक्षराण्यन्यथा व्याचक्षते केचित् ॥ न दृष्टेर्द्रष्टारं दृष्टेः

त्वादिवाक्यार्थं निगमयति ॥ तस्मादिति ॥ उक्तन्यायमुत्तरवाक्येष्वतिदिशति ॥ तथेति ॥ उक्तं वस्तुस्वाभाव्यमुपसंहृत्य फलितमाह ॥ एष इति ॥ न दृ
ष्टेरित्यत्र स्वपक्षमुक्त्वा भर्तृप्रपंचपक्षमाह ॥ न दृष्टेरिति ॥ कथमक्षराणामन्यथा व्याख्येत्याशंक्य तदिष्टमक्षरार्थमाह ॥ दृष्टेरिति ॥ इति शब्दो व्या

वृ॰ र॰ २०

एवं व्याकुर्वतामभिप्रायमाह॥ द्रष्टेरिति॥ कर्मणि षष्ठीमेव स्फुटयति॥ सा दृष्टिरिति॥ षष्ठीं व्याख्याय द्वितीयां व्याचष्टे॥ द्रष्टारमितीति पदार्थमु
क्त्वा वाक्यार्थमाह॥ तेनेति॥ उक्तां परकीयव्याख्यां दूषयति॥ तत्रेति॥ दृष्टिकर्तृत्वविवक्षायां तृजं तेनैव तत्सिद्धेः षष्ठी निरर्थिकेत्यर्थः॥ कथं पुन
र्व्याख्यातारो यथोक्तं दोषं न पश्यंतीति तत्राह॥ पश्यतां चेति॥ षष्ठीनैरर्थक्यं प्रागुक्तमाकांक्षाद्वारा समर्थयते॥ कथमित्यादिना॥ किं यत्तर्हि द्रष्टार्थवदि
त्याशंक्याह॥ तदेति॥ तत्र हेतुमाह॥ यस्मादिति॥ क्रियाधात्वर्थः कर्त्ता प्रत्ययार्थस्तथा चैकेनैव पदेनोभयलाभात्स्थक्रियाग्रहणमनर्थकमित्यर्थः॥

कर्तारं दृष्टिभेदमकृत्वा दृष्टिमात्रस्य कर्तारं न पश्येरिति — द्रष्टेरिति कर्मणि षष्ठी सा दृष्टिः क्रियमाणा घटवत्कर्म भवति द्रष्टारमि
ति तृजं तेन द्रष्टुर्दृष्टिकर्तृत्वमाचष्टे तेनासौ द्रष्टेर्द्रष्टा दृष्टेः कर्तेति व्याख्यातॄणामभिप्रायः तत्र द्रष्टेरिति षष्ठ्यंतेन दृष्टिग्रहणं निरर्थक
मिति दोषं न पश्यंति पश्यतां वा पुनरुक्तमसारः प्रमादपाठ इति वानादरः कथं पुनरानर्थक्यं तृजं तेनैव दृष्टिकर्तृत्वस्य सिद्धत्वाद्द्रष्टेरिति
निरर्थकं तदा द्रष्टारं न पश्येरित्येतावदेव वक्तव्यं यस्माद्धातोः परस्तृच् श्रूयते तद्धात्वर्थकर्तरि हि तृच् स्मर्यते॥ गंतारं भेत्तारं वा न यतोऽत्येता
वानेव हि शब्दः प्रयुज्यते न तु गतेर्गंतारं भिदेर्भेत्तारमित्यसत्यर्थविशेषे प्रयोक्तव्यः न चार्थवादत्वेन हातव्यं सत्यागतेनानन्च प्रमादपाठः स
र्वेषामविगानात्तस्माद्व्याख्यातॄणामेव बुद्धिदौर्बल्यं नाध्येतृप्रमादो यथा तस्मात्भिन्नव्याख्यातं लौकिकदृष्टेर्विविच्य नित्यदृष्टिविशिष्ट दृष्टेरित्य

स्यानर्थकत्वं दृष्टांतेन साधयति॥ गंतारमित्यादिना॥ अर्थवादत्वेन तर्हीदमुपात्तमित्याशंक्याह॥ नचेति॥ विधिशेषत्वाभावादस्मदुक्तगत्या वार्थवत्त्वसंभ
वादित्यर्थः॥ अथ परपक्षे निरर्थकमेवेदं पदं प्रमादात्सठितमिति चेन्नेत्याह॥ न चेति॥ सर्वेषां काण्वमाध्यंदिनानामिति यावत्॥ कथं तर्हीदं पदमनर्थकमि
ति परेषां प्रतीतिस्तत्राह॥ तस्मादिति॥ कथं पुनर्भवतामपि दृशेर्हि रूपादानमुपपद्यते तत्राह॥ यथात्विति॥ प्रदर्शयितव्यपदादुपरिष्टादिति शब्दो द्रष्टव्यः॥

अ॰ ५ रामः ३०

कर्तृकर्मविशेषणत्वेनसाक्षिसाक्ष्यसमर्पकत्वेनेतियावत्॥समर्पणमपिकुत्रोपयुज्यतेतत्राह॥आत्मेति॥दृष्ट्यादिसाक्ष्यात्मानतद्विषयद्वितितत्स्वरूपनि
श्चयार्थंसाक्ष्यादिसमर्पणमित्यर्थः आत्मानित्यदृष्टिस्वभावोनदृश्यायादृष्टेर्विषयद्वत्येवचेन्नदृष्टेरित्यादिवाक्यस्यार्थस्तदानहीत्यादिनाऽस्यैक
वाक्यत्वंसिध्यतितस्माद्यथोक्तार्थत्वमेवनदृष्टेरित्यादिवाक्यस्येत्याह॥नहीति॥आत्माकूटस्थदृष्टिरित्यत्रतलवकारश्रुतिंसंवादयति॥तथाचेति॥

आत्माप्रदर्शयितव्यःतथाकर्मकर्तृविशेषणत्वेनदृष्टिशब्दस्यद्विःप्रयोगउपपद्यतेआत्मस्वरूपनिर्धारणायनहिद्रष्टुर्दृष्टेरितिच
प्रदेशांतरवाक्येनैकवाक्यतोपपन्नाभवति॥तथाचचक्षुषिपश्यतिश्रोत्रमिदंश्रुतमितिश्रुत्यंतरेणैकवाक्यतोपपन्नान्यायाच्चैवमेव
ह्यात्मनोनित्यत्वमुपपद्यतेविक्रियाभावेविक्रियावत्त्वंनित्यमितिचविप्रतिषिद्धंध्यायतीवलेलायतीवनहिद्रष्टुर्दृष्टेर्विपरिलोपोविद्यते

एषतआत्मासर्वांतरोतोन्यदार्तंततोहोषस्तश्चाक्रायणउपरराम॥२७॥चतुर्थंब्राह्मणं॥४॥

एषनित्योमहिमाब्राह्मणस्येतिचश्रुत्यक्षराण्यन्यथानगच्छंतिननुद्रष्टाश्रोतामंताविज्ञातेत्येवमादीन्यक्षराण्यात्मनोऽविक्रियत्वेन
गच्छंतीतिनयथाप्राप्तलौकिकवाक्यानुवादित्वात्तेषांनात्मतत्त्वनिर्धारणार्थानितानिनदृष्टेर्द्रष्टारमित्येवमादीनामन्यार्थासंभवाद्यथो
क्तस्यकूटस्थदृष्टित्वेहेत्वंतरमाह॥न्यायाच्चेति॥तमेवन्यायंविशदयति॥एवमेवेति॥विपक्षेदोषमाह॥विक्रियावत्त्वेति॥इतश्चात्मनोनास्तिविक्रियावत्त्व
मित्याह॥ध्यायतीवेति॥अन्यथाक्रियावत्त्वेसतीतियावत्॥अविक्रियत्वेपिश्रुत्यक्षराण्यनुपपन्नानीतिशंकते॥नन्विति॥नतेषांविरोधोदृष्टंदृष्ट्यादिक
र्तृत्वमनूद्यप्रवृत्तेलौकिकेवाक्येतदर्थानुवादित्वादुक्तश्रुत्यक्षराणांस्वार्थेप्रामाण्याभावादितिपरिहरति॥नेत्यादिना॥नदृष्टेरित्यादीन्यपितर्हिश्रुत्यक्षरा

अन्यार्थोदृष्ट्यादिकर्तायथोक्तोर्थोदृष्ट्यादिसाक्षीद्रष्टृपदस्यसाक्षिविषयत्वेसिद्धेदृष्टेरितिसाक्ष्यसमर्पणात्तदर्थवत्वोपपत्तिरित्युपसंहरति॥तस्मादि
ति॥पक्षांतरंनिराकृत्यस्वपक्षमुपपाद्यानंतरंवाक्यंविभजते॥एषइति॥अन्यदार्त्तमितिविशेषणसामर्थ्यसिद्धमर्थमाह॥एतदेवेति॥इतिबृहदार
ण्यकेउषस्तब्राह्मणंचतुर्थं॥४॥ब्राह्मणत्रयार्थसंगतिंवक्तुमञ्जवदति॥बंधनमिति॥चतुर्थब्राह्मणार्थंसंक्षिपति॥यश्चेति॥उत्तरब्राह्मणतात्पर्यमा

तस्मादनवबोधादेवहिविशेषणंपरित्यक्तंदृष्टेरितिएषतेतवआत्मासर्वैरुक्तैर्विशेषणैर्विशिष्टः।तस्मात्तस्मादात्मनअन्यदार्तंकार्यंवा
शरीरंकरणात्मकंवालिंगमेतदेवैकमनार्तमविनाशिकूटस्थंततोहोषस्तश्चाक्रायणउपरराम॥इतिश्रीमद्बृहदारण्यकेपंचमेप्रपाठ
केचतुर्थंब्राह्मणभाष्यं॥४॥बंधनंसप्रयोजकमुक्तंयश्चबद्धस्तस्याप्यस्तित्वमधिगतंव्यतिरिक्तत्वंचतस्येदानींबंधमोक्षसाधनंसस

अथहैनंकहोलःकौषीतकेयःपप्रच्छयाज्ञवल्क्येतिहोवाचयदेवसाक्षादपरोक्षाद्ब्रह्मयआत्मासर्वांतरस्तंमेव्याचक्ष्वे
त्येषतआत्मासर्वांतरःकतमोयाज्ञवल्क्य

न्यासमात्मज्ञानंवक्तव्यमितिकहोलप्रश्नआरभ्यतेअथहएनंकहोलोनामतःकु
षीतकस्यापत्यंकौषीतकेयःपप्रच्छयाज्ञवल्क्येतिहोवाचेतिपूर्ववद्यदेवसाक्षादपरोक्षाद्ब्रह्मयआत्मासर्वांतरस्तंमेव्याचक्ष्वेतियं
विदित्वाबंधनात्प्रमुच्यतेयाज्ञवल्क्यआहएषतेतवात्माकिमुषस्तकहोलाभ्यामेकआत्मापृष्टःकिंवाभिन्नावात्मानौतुल्यलक्षणाविति

ह॥तस्येति॥उषस्तप्रश्नानंतर्यमथशब्दः॥पूर्ववदित्यभिमुखीकरणार्थंसंबोधितवानित्यर्थः॥बंधध्वंसिज्ञानप्रश्नोनात्रप्रतिभाति॥किंत्वनुवादमा
त्रमित्याशंक्याह॥यंविदित्वेति॥तंव्याचक्ष्वेतिपूर्वेणसंबंधः॥प्रश्नयोरवांतरविशेषप्रदर्शनार्थंपरामृशति॥किमुषस्तेति॥तत्रपूर्वपक्षंगृह्णाति॥

उक्तमर्थंव्यतिरेकद्वाराविवृणोति॥ यदिह्रीत्यादिना॥ अथैकंवाक्यंवस्तुपरंतस्यार्थवादोद्वितीयंवाक्यंनेत्याह॥ नचेति॥ द्वयोर्वाक्ययोस्तुल्यलक्षण
त्वेफलितमाह॥ तस्मादिति॥ तत्राद्यंवाक्यंक्षेत्रज्ञमधिकरोतिद्वितीयंपरमात्मानमित्यभिप्रेत्याह॥ क्षेत्रज्ञेति॥ ब्राह्मणद्वयेनार्थद्वयंविवक्षितमिति
भर्तृप्रपंचप्रस्थानंप्रत्याह॥ तन्नेतिप्रश्नप्रतिवचनयोरेकरूपत्वान्नार्थभेदोस्तीत्युक्तमुपपादयति॥ एषतइति॥ तथाप्यर्थभेदेकानुपपत्तिस्तत्राह॥ न
चेति॥ तदेवोपपादयति॥ एकोहीति॥ कार्यकरणसंघातभेदादात्मभेदमाशंक्याह॥ नचेति॥ जातितःस्वभावतोहमहमित्येकाकारस्फुरणादि
त्युक्तंप्रश्नयोरपुनरुक्तत्वोपपत्तेर्यदिह्येकआत्माउषस्तकहोलप्रश्नयोर्विवक्षितस्तत्रैकेनैवप्रश्नेनाधिगतत्वात्तद्विषयोद्वितीयः
प्रश्नोःनर्थकःस्यान्नचार्थवादरूपत्वंवाक्यस्यतस्माद्भिन्नावेतावात्मानौक्षेत्रज्ञपरमात्माख्याविति केचिद्व्याचक्षते॥ तन्न॥ नचेति
प्रतिज्ञानादेषतआत्मेतिहिप्रतिवचनेप्रतिज्ञानादेषतआत्मैषतआत्मेतिहिप्रतिवचनेप्रतिज्ञातंनचैकस्यकार्यकरणसंघातस्य
द्वावात्मानावुपपद्येते एकोहिकार्यकरणसंघातएकेनात्मनात्मवान्नचोषस्तस्यान्यःकहोलस्यान्योजातितोभिन्नआत्माभवतिद्वयो
र्गौणत्वात्मत्वसर्वांतरत्वानुपपत्तेर्यद्येकमगौणंब्रह्मद्वयोरितरेणावश्यंगौणेनभवितव्यंतथात्मत्वंसर्वांतरत्वंच विरुद्धत्वात्पदार्था
नांयद्येकंसर्वांतरंब्रह्मात्मामुख्यःइतरेणात्मनाऽमुख्येनावश्यंभवितव्यंतस्मादेकस्यैवद्विःश्रवणंविशेषविवक्षयापत्त्य र्थः॥ इतश्चनतद्भे
दइत्याह॥ द्वयोरिति॥ तदेवस्फुटयति॥ यदीति॥ द्वयोर्मध्येयद्येकंब्रह्मागौणंतदेतरेणगौणेनावश्यंभवितव्यंतथात्मत्वादियद्येकस्येष्टंतदेतरस्यानात्म
त्वादिकुतःस्यादितिचेत्तत्राह॥ विरुद्धत्वादिति॥ उक्तोपपादनपूर्वकंद्विःश्रवणस्याभिप्रायमाह॥ यदीत्यादिना॥ अनेकमुख्यत्वासंभवाद्वस्तुतःपरिच्छि
न्नस्यघटवदब्रह्मत्वादनात्मत्वाच्चैकमेवमुख्यंप्रत्यग्भूतंब्रह्मेत्यर्थः॥ यदिजीवेश्वरभेदाभावात्प्रश्नयोर्नार्थभेदस्तर्हिपुनरुक्तिरनर्थिकेत्याशंक्याह॥ तस्मादिति॥

तर्हि समस्तविषयो बाह्यःकोऽभिन्नःपृथक्किंरूपंवेति
त्याशंक्याह॥ यतीति॥

अनुक्तविशेषकथनार्थमुक्तपरिमाणंनिर्णेतुमुक्तानुवादश्चेदनुक्तोविशेषस्तर्हि प्रदर्श्यतामितिशङ्कति॥कः पुनरिति॥बुभुक्षितंविशेषंदर्शयति॥उ
च्यतइति॥इतिशब्दः क्रियापदेनसंबध्यते॥किमित्येषविशेषोनिर्दिश्यतेतत्राह॥यद्विशेषेति॥अर्थभेदासंभवेफलितमाह॥तस्मादिति॥योशना
येत्यादिनातुविवक्षितविशेषोक्तिरितिशेषः॥एकमेवात्मतत्वमधिकृत्यप्रश्नावित्यत्रचोदयति॥नन्विति॥विरुद्धधर्मवत्वान्मिथोभिन्नौप्रश्ना
र्थावित्येतद्दूषयति॥नेति॥परिहृतत्वमेवप्रकटयति॥नामरूपेति॥तयोर्विकारः कार्यकरणलक्षणः संघातः सएवोपाधिभेदस्तेनसंपर्क

पूर्वोक्तेनसमानंद्वितीयेप्रश्नोत्तरेउक्तंतावन्मात्रंपूर्वस्यैवानुवादस्तस्यैवानुक्तः कश्चिद्विशेषोवक्तव्यइतिकः पुनरसौविशेषइत्यु
च्यतेपूर्वस्मिन्प्रश्नेअस्तिव्यतिरिक्तआत्मायस्यायंसंप्रयोजकोबंधउक्तइतिद्वितीयेतुतस्यैवात्मनोशनायादिसंसारधर्मातीत
त्वंविशेषउच्यते॥यद्विशेषपरिज्ञानात्संन्याससहितात्पूर्वोक्ताद्बंधनाद्विमुच्यतेतस्मात्प्रश्नप्रतिवचनयोरेषतआत्मेत्येवमंतयो
स्तुल्यार्थतैवननुकथमेकस्यैवात्मनोऽशनायाद्यतीतत्वंतद्वत्वंचेतिविरुद्धधर्मसमवायित्वमितिनपरिहृतत्वान्नामरूपविकारका
र्यकरणलक्षणसंघातोपाधिभेदसंपर्कजनितभ्रांतिमात्रंहिसंसारित्वंइत्यसकृद्वोचामविरुद्धश्रुतिव्याख्यानप्रसंगेनचयथारज्जु
शुक्तिकागगनादयः सर्परजतमलिनाभवंतिपराध्यारोपितधर्मविशिष्टाः स्वत श्चकेवलाएवरज्जुशुक्तिकागगनादयः नैवंविरुद्धध
र्मसमवायित्वेपदार्थानांकश्चनविरोधो स्तस्मिन्नहंममाध्यासस्तेनजनिताभ्रांतिरहंकर्तेत्याद्यातावन्मात्रंसंसारित्वमित्यनेकशोऽभ्युसादितंतस्मान्ना
स्तिवस्तुतोविरुद्धधर्मवत्वमित्यर्थः॥किंच॥सविशेषत्वनिर्विशेषत्वश्रुत्योर्विषयविभागोक्तिप्रसंगेनसंसारित्वस्यमिथ्यात्वंमधुब्राह्मणांतेऽवोचामेत्याह
॥विरुद्धेति॥कथंतर्हिविरुद्धधर्मवत्वप्रतीतिरित्याशंक्याह॥यथेति॥परेणपुरुषेणाज्ञानेनवाध्यारोपितैःसर्पादिभिर्धर्मैर्विशिष्टाइतियावत्॥स्वतस्त्वाध्या

प्रतिभासतो विरुद्धधर्मवत्त्वेपि क्षेत्रज्ञेश्वरयोर्भिन्नत्वाद्भिन्नार्थावेव प्रश्नाविति चेन्नेत्याह॥ नचैवमिति॥ निरुपाधिकरूपेणासंसारित्वं सोपाधिरूपेण संसारित्वमित्यविरोध उक्तः॥ इदानीमुपाध्यभ्युपगमे सद्वयत्वं सतश्चैव घटादेरुपाधित्वदृष्टेरिति शंकते॥ नामेति॥ सलिलातिरेकेण न संति फेनाद्यो विकारा नापि मृदाद्यतिरेकेण तद्विकाराः शरावादयः संतीति दृष्टांताख्ययुक्तिबलादविद्यनामरूपरचितकार्यकरणसंघातस्याविद्यामात्रत्वं तस्याश्चविद्यया निरासान्नैवमिति परिहरति॥ नेत्यादिना॥ कार्यसत्वमभ्युपगम्योक्तमिदानीं तदपि निरूप्यमाणे नास्तीत्याह॥ यदात्विति॥ नेह नानामरूपोपाध्यस्तित्वे एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किंचनेति श्रुतयो विरुध्येरन्निति चेन्न सलिलफेनदृष्टांतेन परिहृतत्वान्मृदादिदृष्टांतैश्च यदा तु परमात्मदृष्ट्या परमात्मतत्वानुसारिभिरन्यत्वेनानिरूप्यमाणे नामरूपे मृदादिविकारवद्वस्त्वंतरे तत्वतो न स्तः सलिलफेनघटादिविकारवदेव तदा तदपेक्ष्यैकमेवाद्वितीयं नेह नानास्ति किंचनेत्यादि परमार्थदर्शनगोचरत्वं प्रतिपद्यते यदा तु स्वाभाविक्याऽविद्यया ब्रह्मस्वरूपं रज्जुशुक्तिकागगनस्वरूपवदेव स्वेनैव रूपेण वर्तमानं केनचिदस्पृष्टस्वभावमपि सन्नामरूपकृतकार्यकरणोपाधिभ्यो विवेकेनानावधार्यते नामरूपोपाधिदृष्टिरेव च भवति स्वाभाविकी तदा सर्वोऽयं वस्त्वंतरास्तित्वव्यवहारोस्ति चायं भेदकृतो मिथ्याव्यवहारो येषां ब्रह्मतत्वादन्यत्वेन वस्तु विद्यते येषां च नास्ति॥ नास्ति किंचनेत्यादिश्रुत्यनुसारिभिर्वस्तुदृष्ट्या निरूप्यमाणे नामरूपे परमात्मतत्वादन्यत्वेनानन्यत्वेन वा निरूप्यमाणे तत्वतो वस्त्वंतरे यदा तु न स्त इति संबंधः॥ मृदादिविकारवदित्युक्तं प्रकटयति॥ सलिलेति॥ तदा तत्परमात्मतत्वमपेक्ष्येति योजनीयं॥ कदा तर्हि लौकिकोऽव्यवहारस्तत्राह॥ यदात्विति॥ अविद्यया स्वाभाविक्या ब्रह्म यदोपाधिभ्यो विवेकेनानावधार्यते तदा लौकिकोऽव्यवहारश्चेत्तर्हि विवेकिनां नासौ स्यादित्याशंक्याह॥ अस्ति चेति॥ भेदभानप्रयुक्तोऽव्यवहारो विवेकिनां अविवेकिनां च तुल्य एव वस्त्वंतरा

ननु यथाप्रतिभासं वस्त्वंतरं पारमार्थिकमेव किं न स्यात्तत्राह॥ परमेति॥ किं द्वितीयं वस्तु तत्त्वतोस्ति किं वा नास्तीति वस्तुनि निरूप्यमाणे सति श्रुत्यनु
सारेण तत्त्वदर्शिभिरेकमेवाद्वितीयं ब्रह्माव्यवहार्यमिति निर्धार्यते॥ तेन व्यवहारदृष्ट्याश्रयणेन भेदकृतो मिथ्याव्यवहारस्तत्त्वदृष्ट्याश्रयणे न च तत्
द्भावविषयः शास्त्रीयो व्यवहार इत्युभयविधव्यवहारसिद्धिरित्यर्थः॥ तत्र शास्त्रीयव्यवहारोपपत्तिं प्रपंचयति। नहीति॥ तथा चाविद्यावस्थायां शा
स्त्रीयोः भेदव्यवहारस्तदितरव्यवहारस्त्वाभासमात्रमिति शेषः॥ अविद्यावस्थायां लौकिकव्यवहारोपपत्तिं विवृणोति॥ न चनामेति॥ उभयविधव्य

परमार्थवादिभिस्तु श्रुत्यनुसारेण निरूप्यमाणे वस्तुनि किं तत्त्वतोस्ति किं वा नास्तीति ब्रह्मैकमेवाद्वितीयं अनंतरमवाह्यं सर्वसंव्यव
हारशून्यमिति निर्धार्यते तेन न कश्चिद्विरोधः न हि परमार्थावधारणनिष्ठायां वस्त्वंतरास्तित्वं प्रतिपद्यामहे एकमेवाद्वितीयमनंत
रमबाह्यमिति श्रुतेर्न च नामरूपव्यवहारकालेत्वविवेकिनां क्रियाकारकफलादिसंव्यवहारो नास्तीति प्रतिषिध्यते तस्मात् ज्ञाना
ज्ञाने अपेक्ष्य सर्वः संव्यवहारः शास्त्रीयो लौकिकश्चातो न काचन विरोधशंका॥ सर्ववादिनामप्यपरिहार्यः परमार्थसंव्यवहारकृतो व्य
वहारस्तत्र परमार्थात्मस्वरूपमपेक्ष्य प्रश्नः॥ पुनः कतमो याज्ञवल्क्य सर्वांतर इति प्रत्याह नरो योः शनायापिपासे अशितुमिच्छा अशना
या पातुमिच्छा पिपासा ते अशनायापिपासे योत्येतीति वक्ष्यमाणेन संबंधः॥
वहारोपपत्तिमुपसंहरति॥ तस्मादिति॥ उक्तरीत्या व्यवहारद्वयोपप
त्तौ फलितमाह॥ अत इति॥ प्रत्यक्षादिषु वेदांतेषु चेति शेषः॥ ज्ञानाज्ञाने पुरस्कृत्य व्यवहारः शास्त्रीयो लौकिकश्चेति नास्माभिरेवोच्यते किंतु सर्वेषामपि परी
क्षकाणामेतत्संमतं संसारदशायां क्रियाकारकव्यवहारस्य मोक्षावस्थायां च तदभावस्येष्टत्वादित्याह॥ सर्ववादिनामिति निरुपाधिके परस्मिन्नात्मनि विद्या
ता वनाद्यविद्याकल्पितोपाधिकृतमशनायादिमत्त्वं वस्तुतस्तु तद्राहित्यमित्युपपाद्यानंतरप्रश्नमुत्थाप्य प्रतिवक्ति॥ तत्रेत्यादिना॥ कल्पिताकल्पितयोरात्मरू

ननु परेणाशनायादिमानप्रसिद्धेर्नापि जीवस्तथा तस्य परस्माद्व्यतिरेकाद्त आह॥ अविवेकिभिरिति॥ परमार्थतइत्युभयतः संबध्यते ब्रह्मैवाखंडस
च्चिदानंदमनाद्यविद्यातत्कार्यबुध्यादिसंबद्धमाभासद्वारा स्वानुभवाद्शनायादिमद्गम्यते॥ तच्च वस्तुतोऽविद्याद्यसंबंधाद्शनायाद्यतीतं नित्यमुक्तं
तिष्ठतीत्यर्थः॥ अशनायापिपासादिमद्ब्रह्मगम्यमानमिति वदन्नाचार्यो नानाजीववादस्यानिष्टत्वं सूचयति॥ परमार्थतो ब्रह्मण्यशनायाद्यसंबंधे मा
नमाह॥ नलिप्यतइति॥ बाह्यत्वमसंगत्वं॥ लोकदुःखेनेत्युक्तं लोकस्यानात्मनो दुःखसंबंधानभ्युपगमादित्याशंक्याह॥ अविद्वदिति॥ अशनायापि

अविवेकिभिस्तलमलवदिव गगनं गम्यमानमेव तलमलेअत्येतिपरमार्थतस्ताभ्यामसंस्पृष्टस्वभावत्वात्तथा मूढैरशनायापिपा
सादिमद्ब्रह्मगम्यमानमपिक्षुधितोहं पिपासितोहमिति ते अत्येत्येव परमार्थतस्ताभ्यामसंस्पृष्टस्वभावत्वान्नलिप्यते लोकदुःखे

सर्वांतरो योऽशनायापिपासे

नबाह्यइतिश्रुतेरविद्वल्लोकाध्यारोपितदुःखेनेत्यर्थः॥ प्राणैकधर्मत्वात्क्रमासकरणं अशनायापिपासयोः शोकं मोहं शोक इति काम
इष्टं वस्तूद्दिश्य चिंतयतो यदरमणं तत्तृ साभिभूतस्य काम बीजं तेन हि कामो दीप्यते मोहस्तु विपरीतप्रत्ययप्रभवो पासयोः समस्यो

पादाने हेतुमाह॥ प्राणेति॥ अरतिवाची शोकशब्दो न कामविषय इत्याशंक्याह॥ इष्टमिति॥ कामबीजत्वमरतेरनुभवेनाभिव्यनक्ति तेन हीति॥
कामस्य शोको बीजमिति स कामतया व्याख्यातः अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिर्विपरीतप्रत्ययस्तस्मात्प्रभवति कर्त
व्याकर्तव्याविवेकः स लौकिकः सम्यग्ज्ञानविरोधान्मोहो विद्येत्युच्यते तस्याः सर्वानर्थोत्पत्तौ निमित्तत्वं मूलाविद्यायास्तूपादानत्वं तदेतदाह॥ मोहस्त्विति॥

कामस्य शोको मोहो दुःखस्य हेतुरिति भिन्नकार्यत्वं तद्धि केदइत्यत्र कार्यकरणसंघातस्तच्छब्दार्थः॥ संसाराद्विरक्तस्य पारिव्राज्यं वक्तुमुत्तरं वा
क्यमित्यभिप्रेत्य संक्षेपतः संसारस्वरूपमाह॥ एतइत्यादिना॥ तेषामात्मधर्मत्वं व्यावर्तयितुं विशिनष्टि॥ प्राणेति॥ तेषां स्वरसतो विच्छेदशंकां वा
रयति॥ प्राणिषिति॥ प्रवाहरूपेण नैरंतर्ये दृष्टांतमाह॥ अहोरात्रादिवदिति॥ तेषामपि चपलत्वे दृष्टांतः॥ समुद्रोर्मिवदिति॥ तेषां हेयत्वं द्योतयति

ऽविवेको भ्रमः स चाविद्या सर्वस्यानर्थस्य प्रसवबीजं भिन्नकार्यत्वात्तयोः शोकमोहयोरसमासकरणं तौ मनोधिकरणौ तथा शरीराधिक
रणौ जरां मृत्युं चात्येति जरेति कार्यकरणसंघातविपरिणामो वलीपलितादिलिंगो मृत्युरिति तद्धि केदो विपरिणामावसानस्तौ जरामृ
त्यू शरीराधिकरणावत्येति एतेऽशनायादयः प्राणमनःशरीराधिकरणाः प्राणिषु नवरतं वर्त्तमानाः अहोरात्रादिवत्समुद्रोर्मिवच्च॥ प्रा

शोकं मोहं जरां मृत्युमत्येत्येतं वै

णिषु संसार इत्युच्यंते योसौ दृष्टेर्द्रष्टेत्यादिलक्षणः साक्षादव्यवहितोऽपरोक्षाद्गौणः सर्वांतर आत्मा ब्रह्मादिस्तंबपर्यंतानां भू
तानामशनायापिपासादिभिः संसारधर्मैः सदा नस्पृश्यते आकाशइव घनादिमलैस्तमेतं वै आत्मानं स्वतत्वं विदित्वा ज्ञात्वाऽय
महमस्मि परं ब्रह्म सदा सर्वसंसारविनिर्मुक्तं नित्यतृप्तमिति ब्राह्मणाः ॥ प्राणिष्विति॥ येयथोक्ताः प्राणिष्वशनायादयस्तेतेषु संसार
इत्युच्यंते इति योजना॥ एतं वैतमित्यत्र तच्छब्दार्थमुषस्तप्रश्नोक्तं त्वंपदार्थं कथयति॥ योसाविति॥ एतच्छब्दार्थं कहोलप्र ४ क्तं तत्पदार्थं दर्शय
ति॥ अशनायेति॥ तयोरैक्यं सामानाधिकरण्येन सूचितमित्याह॥ तमेतमिति॥ ज्ञानमेव विशदयति॥ अयमित्यादिना श्रो ॥ ॥

ज्ञात्वाब्राह्मणाव्युत्थायभिक्षाचर्यंचरंतीतिसंबंधः॥ संन्यासविधायकेवाक्येकिमित्यधिकारिणिब्राह्मणपदंतत्राह॥ ब्राह्मणानामेति॥ पुत्रार्थमे
षणामेवविवृणोति॥ पुत्रेणेति॥ ततोव्युत्थानंसंगृह्णाति॥ दारसंग्रहमिति॥ वित्तैषणायाश्चव्युत्थानंकर्तव्यमित्याह॥ वित्तेति॥ वित्तंहिद्विधंमा
नुषंदैवंचमानुषंगवादितस्यकर्मसाधनस्योपादानमुपार्जनंतेनकर्मकृत्वाकेवलेनकर्मणापितृलोकंजेष्यामिदैवंवित्तंविद्यातत्संयुक्तेनकर्म

ब्राह्मणानामेवाधिकारोव्युत्थाने ऽतोब्राह्मणग्रहणंव्युत्थायवैपरीत्येनोत्थानंकृत्वाकिंतदित्याह॥ पुत्रैषणायाः पुत्रार्थएषणापुत्रैष
णापुत्रेणेमंलोकंजयेयमितिलोकजयसाधनंपुत्रंप्रतीच्छाएषणादारसंग्रहमकृत्वेत्यर्थः॥ वित्तैषणायाश्चकर्मसाधनस्यगवादे
रुपादानंअनेनकर्मकृत्वापितृलोकंजेष्यामीतिविद्यासंयुक्तेनवादेवलोकंकेवलयावाहिरण्यगर्भविद्ययादैवेनवित्तेनदेवलोकंदे

तमात्मानंविदित्वाब्राह्मणाः पुत्रैषणायाश्चवित्तैषणायाश्चलोकैषणायाश्च॥

वाद्वित्ताद्व्युत्थानमेवनास्तीतिकेचिद्यस्मात्तद्बलेनहिकिलव्युत्थानमिति॥ तदसदेतावान्वैकामइतिपठितत्वादेषणामध्येदैवस्य
वित्तस्यहिरण्यगर्भादिदेवताविषयैवविद्याविद्येत्युच्यतेदेवलोकहेतुत्वान्नहिनिरुपाधिकप्रज्ञानघनविषयाब्रह्मविद्यादेवलोकप्रा
प्तिहेतुः

णादेवलोकंकेवलयाचविद्ययातमेवजेष्यामीतिइच्छावित्तैषणाततश्चव्युत्थानंकर्तव्यमितिव्याचष्टे॥ कर्मसाधनस्येति॥ एतेनलोकैषणा
याश्चव्युत्थानमुक्तंवेदितव्यं॥ दैवाद्वित्ताद्व्युत्थानमाक्षिपति॥ दैवादिति॥ तस्यापिकामत्वात्ततोव्युत्थातव्यमितिपरिहरति॥ तदसदिति॥ तर्हिब्रह्मविद्यायाः
सकाशादपिव्युत्थानात्तन्मूलध्वंसेतद्व्याघातःस्यादित्याशंक्याह॥ हिरण्यगर्भादीति॥ देवतोपासनयावित्तशब्दितविद्यात्वेहेतुमाह॥ देवलोकेति॥ तस्मात्प्तिहे

तत्रफलांतरश्रवणंहेतूकरोति॥ तस्मादिति॥ इतश्चब्रह्मविद्यादैवाहिताहहिरेवेत्याह॥ तद्बलेनेति॥ प्रागेववेदनंसिद्धंचेत्किंपुनर्व्युत्थानेनेत्या
शंक्यप्रयोजकज्ञानंतत्प्रयोजकमुद्देश्यंतुतत्त्वसाक्षात्करणमितिविवक्षित्वाह॥ तस्मादिति॥ प्रयोजकंज्ञानंपंचम्यर्थः॥ व्युत्थायभिक्षाच
र्यंचरंतीतिसंबंधः॥ व्युत्थानस्वरूपप्रदर्शनार्थमेषणास्वरूपमाह॥ एषणेति॥ किमेतावत्तेत्याशंक्यव्युत्थानस्वरूपमाह॥ एतस्मिन्निति॥

तस्मात्तत्सर्वमभवदात्माह्येषांसभवतीतिश्रुतेस्तद्बलेनहिव्युत्थानमेतंवैतमात्मानंविदित्वेतिविशेषवचनात्तस्मात्त्रिभ्योप्येते
भ्योऽनात्मलोकप्राप्तिसाधनेभ्यः एषणाविषयेभ्योव्युत्थायएषणाकामः एतावान्वैकामइतिश्रुतेरेतस्मिंस्त्रिविधेऽनात्मलोकप्राप्ति
साधनेतत्साधनकृत्वेत्यर्थः सर्वाहिसाधनेच्छाफलेच्छैवातोव्याचष्टेश्रुतिरेकैवैषणेति॥ कथंयाह्येषपुत्रैषणासावित्तैषणादृष्टफलसाधन

व्युत्थायाथभिक्षाचर्यंचरंति॥

त्वतुल्यत्वाद्यावित्तैषणाकर्मभूतासालोकैषणाफलार्थैवसासर्वःफलार्थप्रयुक्तएवहिसर्वंसाधनमुपादत्तेअतएकैवैषणालोकैष
णायासासाधनमंतरेणसंपादयितुंनशक्यतइतिसाध्यसाधनभेदेनोभेहियस्मादेतेएषणेएवभवतस्तस्माद्ब्रह्मविदोनास्तिकर्मकर्म
साधनंवाऽतोये संबंधस्तुपूर्ववत्॥ योह्येवेत्यादिश्रुतेस्तात्पर्यमाह॥ सर्वाहीति॥ फलंनेच्छतिसाधनंचिकीर्षतीतिव्याघातात्फलेच्छांतर्भूतैव
साधनेच्छातद्युक्तमेषणेकमित्यर्थः॥ श्रुतेस्तदैक्यव्युत्पादकत्वंप्रश्नपूर्वकंव्युत्पादयति॥ कथमित्यादिना॥ फलैषणांतर्भावंसाधनैषणायाःसमर्थयते॥
सर्वइति॥ उभेहीत्यादिश्रुतिमवतार्यव्याचष्टे॥ लोकैषणेति॥ प्रयोजकज्ञानवतःसाध्यसाधनरूपात्संसाराद्विरक्तस्यकर्मतत्साधनयोरसंभवेसाक्षात्कार

अतिक्रांता ब्राह्मणाः किं प्रजयेत्यादि प्रकाशितास्तेषां कर्म कर्मसाधनं च यज्ञोपवीतादि नास्तीति पूर्वेण संबंधः॥ देवपितृमानुषनिमित्तमिति वि
शेषणं विशदयति॥ तेन हीति॥ प्राचीनावीतं पितृणां उपवीतं देवानामित्यादिशब्दार्थः॥ यस्मात्पूर्वे विचारप्रयोजकज्ञानवंतो ब्राह्मणा विरक्ताः
संन्यस्यंतस्तद्युक्तं धर्ममन्वतिष्ठंस्तस्मादधुनातनोपि प्रयोजकज्ञानो विरक्तो ब्राह्मणस्तथा कुर्यादित्याह॥ तस्मादिति॥ त्रिदंडेन यतिश्चैवेत्यादिस्मृतेर्नप

ऽतिक्रांता ब्राह्मणाः सर्वकर्मसाधनं च सर्वं देवपितृमानुषनिमित्तं यज्ञोपवीतादि तेन हि दैवं पित्र्यं मानुषं च कर्म क्रियते निवीतं मनुष्याणामि
त्यादिश्रुतेस्तस्मात्पूर्वे ब्राह्मणा वेदविदो व्युत्थाय कर्मभ्यः कर्मसाधनेभ्यश्च यज्ञोपवीतादिभ्यः परमहंसपारिव्राज्यं प्रतिपद्य भिक्षाचर्यं चरंति
भिक्षार्थं चरणं भिक्षाचरणं चरंति यत्त्वाश्रमिलिंगं केवलमाश्रममात्रशरणानां जीवनसाधनं पारिव्राज्यव्यंजकं विद्वान्लिंगवर्जितः तस्माद

याह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लोकैषणोभे ह्येते एषणे एव भवत

लिंगो धर्मज्ञोऽव्यक्तलिंगोऽव्यक्ताचार इति स्मृतिभ्यः अथ परिव्राड्विवर्णवासा मुंडोऽपरिग्रह इत्यादिश्रुतेः सशिखान्केशान्निकृत्य विसृ
ज्य यज्ञोपवीतमिति च लिंगत्यागः ननु व्युत्थायाथ भिक्षाचर्यं चरंतीति वर्तमानापदेशादर्थवादोयं न विधायकः प्रत्ययः कश्चिच्छ्रूयते लिङ्लो
ड्तव्यानामन्यतमोपि तस्मादर्थवादमात्रेण श्रुतिस्मृतिविहितानां यज्ञोपवीतादीनां साधनानां न शक्यते परित्यागः कारयितुं रमहंसपारिव्राज्यमत्र वि
वक्षितमित्याशंक्याह॥ तद्धेति॥ तस्य दृष्टार्थत्वान्मुमुक्षुभिस्त्याज्यत्वं सूचयति॥ केवलमिति॥ अमुख्यत्वाद्व्रतस्य त्याज्यतेत्याह॥ पारिव्राज्येति॥ तथापि तद्दिष्टः स
न्यासो न स्मृतिकारैर्निर्वहद् इति चेन्नेत्याह॥ विद्वानिति॥ प्रत्यक्षश्रुतिविरोधाच्च स्मार्तसंन्यासो मुख्यो न भवतीत्याह॥ अथेति॥ एतं वै तमित्यादिवाक्यस्य विधायकत्वमु

इतश्च यज्ञोपवीतमपरित्याज्यमित्याह॥ यज्ञोपवीत्येवेति॥ याजनादिसमभिव्याहाराद्संन्यासिविषयमेतदित्याशंक्याह॥ पारिव्राज्ये तावदिति॥ वेदत्यागे दोषश्रुतेस्तद्त्यागेपि कथं पारिव्राज्ये यज्ञोपवीतित्वमित्याशंक्याह॥ उपासन इति॥ इत्यनेन वाक्येन गुर्वाद्युपासनांगत्वेन यज्ञोपवीतस्य विहितत्वात्परिव्राजकधर्मेषु गुरूपासनादीनां कर्तव्यतया श्रुतिस्मृतिषु चोदितत्वाद्यज्ञोपवीतपरित्यागो वगंतुं नैव शक्यत इत्यन्वयः॥

यज्ञोपवीत्येवाधीयीत याजयेद्यजेत वा पारिव्राज्ये तावदध्ययनं विहितं वेदसंन्यसनात्क्षूद्रस्तस्मादेदं न संन्यसेदिति स्वाध्याय एवोत्सृज्यमानो वाचमिति चापस्तंबः ब्रह्मोझ्य वेदनिंदा च कौटसाक्ष्यं सुहृद्वधः॥ गर्हितान्नाद्ययोर्जग्धिः सुरापानसमानि षडिति वेदपरित्यागे दोषश्रवणादुपासने गुरूणां वृद्धानां अतिथीनां होमे जप्यकर्मणि भोजने आचमने स्वाध्याये च यज्ञोपवीती स्यादिति परिव्राजकधर्मेषु च गुरूपासनस्वाध्यायभोजनाचमनादीनां कर्मणां श्रुतिस्मृतिषु कर्तव्यतया चोदितत्वाद्गुर्वाद्युपासनांगत्वेन यज्ञोपवीतस्य विहितत्वात्तत्परित्यागो नैवावगंतुं शक्यते ननु च ये षणाभ्यो व्युत्थानं विधीयत एव तथापि पुत्राद्येषणाभ्य स्तिसृभ्य एव व्युत्थानं न तु सर्वस्मात्कर्मणः कर्मसाधनाच्च व्युत्थानं सर्वपरित्यागे चाश्रुतं कृतं स्यात्कृतं च यज्ञोपवीतादिहापितं स्यात्॥ तथा च महानपराधो विहिताकरणप्रतिषिद्धाचरणनिमित्तः कृतः स्यात्तस्माद्यज्ञोपवीतादिलिंगपरित्यागो धपरंपरेवन यज्ञोपवीतं वेदांश्च सर्वं तद्वर्जयेद्यति

संप्रति प्रौढिमारूढो व्युत्थाने विधिमंगीकृत्यापि दूषयति॥ यद्यपीत्यादिना॥ एषणाभ्यो व्युत्थाने सति एषणात्वाविशेषात्कर्मणस्तत्साधनाच्च व्युत्थानं सेत्स्यतीत्याशंक्य यज्ञोपवीतादेरेषणात्वमसिद्धमित्याशयेनाह॥ सर्वेति॥ अश्रुतकरणे श्रुतत्यागे चाकुर्वन्विहितं कर्मेत्यादिस्मृतिसाश्रितं दूषणमाह॥ तथा चेति॥ ननु दृश्यते यज्ञोपवीतादिलिंगत्यागः स कस्मान्निराक्रियते तत्राह॥ तस्मादिति॥ नेयमंधपरंपरेति परिहरति॥ नेत्यादिना॥ ॥ ॥

ब्रह्मचर्यादेव प्रव्रजेदित्यादिविध्युपलंभेपि प्रौढवादेनात्मज्ञानविधिबलादेव संन्यासं साधयितुमात्मज्ञानपरत्वं तावदुपनिषदामुपन्यस्यति॥ अपि
चेति॥ इतश्चास्ति संन्यासे विधिरिति यावत् तद्विधिबलादेव संन्याससिद्धिरिति शेषः॥ कथं सर्वोपनिषदात्मज्ञानपरेष्यते कर्मस्तुतिद्वारा कर्मवि
धिशेषत्वेनार्थवादत्वादित्याशंक्याह॥ आत्मेत्यादिना॥ अस्तु यथोक्तं वस्तु विज्ञेयं तथापि प्रस्तुते किं जातं तदाह॥ सर्वा हीति॥ ननु तस्य कर्तव्यत्वेपि कथं
कर्मतत्साधनत्यागसिद्धिरत आह॥ आत्मा चेति॥ विपक्षे दोषमाह॥ अत इति॥ साधनफलांतर्भूतत्वेनात्मनो ज्ञानमविद्येत्यत्र प्रमाणमाह॥ अन्योसावित्या

रपि चात्मज्ञानपरत्वात्सर्वस्या उपनिषदः आत्मा द्रष्टव्यः श्रोतव्यो मंतव्य इति हि प्रस्तुतं स चात्मैव साक्षादपरोक्षात्सर्वांतरोऽशनायादि
संसारधर्मवर्जित इत्येवं विज्ञेयं इति तावत्सिद्धं सर्वा हीयमुपनिषदेवंपरेति विध्यंतरशेषत्वं तावन्नास्त्यतो नार्थवादः आत्मज्ञान
स्य कर्तव्यत्वादात्मा चाशनायादिधर्मवान्न भवतीति साधनफलविलक्षणो ज्ञातव्योऽतो व्यतिरेकेणात्मनो ज्ञानमविद्यान्योसावन्योहम
स्मीति न स वेद मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यत्येकधैवानुद्रष्टव्यमेकमेवाद्वितीयं तत्त्वमसीत्यादिश्रुतिभ्यः क्रियाकारकफलं
साधनं वाशनायादिसंसारधर्मातीतादात्मनोन्यदविद्याविषयं यत्र हि द्वैतमिव भवति अन्योसावन्योहमस्मीति न स वेदाथ येन्यथातो वि
दुरित्यादिवाक्यशतेभ्यः न च विद्याविद्ये एकस्य पुरुषस्य सह भवतो विरोधात्तमःप्रकाशाविव॥ तस्मादात्मविदोऽविद्याविषयोधिकारो न द्र
ष्टव्यः क्रियाकारकफलभेदरूपो मृत्योः स मृत्युमाप्नोतीत्यादिनिंदितत्वात्

दिना॥ क्रियाकारकफलविलक्षणस्यात्मज्ञो ज्ञानं कर्तव्यं तत्सामर्थ्यात्साध्य
साधनत्यागः सिध्यतीत्युक्तं॥ संप्रत्यविद्याविषयत्वाच्च साध्यसाधनयोर्विद्यावतास्त्याज्यतेत्याह॥ क्रियेति॥ तस्याविद्याविषयत्वे श्रुतीरुदाहरति॥ यत्रेति
॥ अविद्याविषयत्वेपि साधनादि विद्यावत एव भविष्यति विद्याविद्ययोरस्मदादिषु साहित्योपलंभादित्याशंक्याह॥ नचेति॥ विद्याविद्ययोः साहित्यासंभवे

इत्यत्र प्रयोजकज्ञानवत्तासाध्यसाधनभेदो न दृष्टव्यो विवक्षिततत्त्वसाक्षात्कारविरोधित्वादित्याह॥ सर्वेति॥ भवत्वविद्याविषयाणां विद्यावतां त्याग
स्तथापि कुतो यज्ञोपवीतादीनां त्यागस्तत्राह॥ यज्ञोपवीतादीति॥ तद्विषयत्वादित्यत्र तच्छब्दोऽविद्याविषयः एषणात्वाच्च यज्ञोपवीतादीनां त्या
ज्यतेत्याह॥ तस्मादिति॥ ज्ञेयत्वेन प्रस्तुतादित्यावत्॥ साध्यसाधनविषयात्तदात्मिकैषणात्याज्येति तत्र हेतुमाह॥ विलक्षणेति॥ पुरुषार्थरूपा
द्विपरीतात्साहेयेत्यर्थः॥ साध्यसाधनयोरेषणात्वं साधयति॥ उभे हीति॥ तथापि यज्ञोपवीतादीनां कर्मणां च कथमेषणात्वमित्याशंक्य साधनां तर्भावा

सर्वक्रियासाधनफलानां चाविद्याविषयाणां तद्विपरीतात्मविद्याया हानव्यत्वेनेष्टत्वाद्यज्ञोपवीतादिसाधनानां च तद्विषयत्वात्तस्मा
त्साधनफलस्वभावादात्मनोऽन्यविषयाद्विलक्षणा उभे ह्येते साधनफले एषणे एव भवतो यज्ञोपवीतादेस्तत्साध्यकर्मणां च साधन
त्वादुभे ह्येते एषणे एवेति हेतुवचनेनावधारणात्तद्यज्ञोपवीतादिसाधनात्तत्साध्येभ्यश्च कर्मभ्योऽविद्याविषयत्वादेषणारूपत्वा
च्च जिहासितत्वरूपत्वाच्च व्युत्थानं विधित्सितमेव न नूपनिषदः आत्मज्ञानपरत्वाद्व्युत्थानश्रुतिस्तत्स्तुत्यर्था न विधिः॥ न विधित्सि
तविज्ञानेन समानकर्तृत्वश्रवणान्न ह्यकर्तव्यत्वेन कर्तव्यस्य समानकर्तृकत्वेन वेदे कदाचिदपि श्रवणं संभवति॥ कर्तव्यानामेव ह्य
भिषवहोमभक्षणानां यथा श्रवणमभिषुत्य हुत्वा भक्षयन्तीति तद्वदात्मज्ञानैषणाव्युत्थानभिक्षाचर्याणां कर्तव्यानामेव समानकर्तृकत्व

दित्याह॥ यज्ञोपवीतादेरिति॥ तयोरेषणात्वं कथं प्रतिज्ञामात्रेण सेत्स्यतीत्याशंक्याह॥ उभे हीति॥ तयोरेषणात्वे सिद्धे फलितमाह॥ यज्ञोपवीतादीति॥
आत्मज्ञानविधिरेव संन्यासविधिरित्युक्तत्वाद्व्युत्थाये त्यस्य नास्ति विधित्वमिति शंकते॥ नन्विति॥ व्युत्थाय विदित्वेति पाठक्रममतिक्रम्य व्याख्यानेऽभवत्येवा
यं विविदिषोर्विधिरिति परिहरति॥ न विधित्सितेति॥ पाठक्रमेऽपि प्रयोजकज्ञानवतो विरक्तस्य भवत्येवायं विधिरित्यभिप्रेत्याह॥ न हीति॥ उक्तमेवान्वयमुखे

अभिषुत्यसोमस्यकंडनंकृत्वारसमादायेत्यर्थः॥पाठक्रममेवमाश्रित्यशंकते॥अविद्येति॥प्रयोजकज्ञानवतोविरक्तस्यात्मज्ञानविधिसामर्थ्येल
ब्धस्ययज्ञोपवीतादित्यागस्यकर्तव्यात्मज्ञानेनसमानकर्तृकत्वश्रवणादतिशयेनावश्यकत्वसिद्धिरित्युत्तरमाह॥नसुतरामिति॥व्युत्थानेदर्शित
न्यायंभिक्षाचर्येप्यतिदिशति॥तयेति॥भिक्षाचर्यस्यचात्मज्ञानविधिनैकवाक्यस्यतथैवदार्ढ्योपपत्तिरितिसंबंधः॥व्युत्थानादिवाक्यस्यार्थवाद
त्वमुक्तमनूद्यदूषयति॥यस्तुनरित्यादिना॥औदुंबरोयूपोभवतीत्यादौलेट्परिग्रहेणविधिस्वीकारवदत्रापिपंचमलकारेणविधिसिद्धेर्नार्थ

दविद्याविषयत्वाच्चार्थप्राप्तएवआत्मज्ञानविधेरेवयज्ञोपवीतादिपरित्यागोनतुविधातव्यइतिचेन्नसुतरामात्मज्ञानविधिनैव
विहितस्यसमानकर्तृकत्वश्रवणेनतत्रदार्ढ्योपपत्तिस्तथाभिक्षाचर्यस्यपसुनरुक्तंवर्तमानापदेशादर्थवादमात्रमितिनऔदुं
बरयूपादिविधिसमानत्वाददोषः॥व्युत्थायभिक्षाचर्यंचरंतीत्यनेनपारिव्राज्यंविधीयतेपारिव्राज्याश्रमेचयज्ञोपवीतादिसाधनानिलिं
गंचश्रुतिभिःस्मृतिभिश्चातस्तद्वर्जयित्वान्यस्माद्व्युत्थानमेषणात्वेपीतिचेत्॥नविज्ञानसमानकर्तृकात्पारिव्राज्यादेषणाव्युत्थानलक्ष
णात्पारिव्राज्यांतरोपपत्तेः॥यद्धितदेषणाभ्योव्युत्थानलक्षणंपारिव्राज्यंतदात्मज्ञानांगमात्मज्ञानविरोध्येषणापरित्यागरूप
त्वादविद्याविषयत्वाच्चैषणाया

वादत्वशंकेत्यर्थः॥संप्रतिप्रकृतेवाक्येपारिव्राज्यविधिमंगीकृत्यस्वयूथ्यःशंकते॥व्युत्थायेति॥कान
र्हिविप्रतिपत्तिस्तत्राह॥पारिव्राज्येति॥लिंगंत्रिदंडित्वादि॥पुराणेयज्ञोपवीतेविसृज्यनवमुपादायाश्रमंप्रविशेत्त्रिदंडीकमंडलुमानित्याद्याःश्रु
तयःस्मृतयश्चैषणात्वाद्यज्ञोपवीतादीनामपित्याज्यत्वमुक्तमित्याशंक्यश्रुतिस्मृतिवशाद्व्युत्थानेसंकोचमभिप्रेत्याह॥अतइति॥उदाहृतश्रुतिस्मृ
तीनांविषयांतरंदर्शयन्नुत्तरमाह॥नेत्यादिना॥तदेवविवृणोति॥यद्धीत्यादिना॥तस्यात्मज्ञानांगत्वेहेतुमाह॥आत्मज्ञानेति॥एषणायास्तद्विरोधित्व

तर्हि यथोक्तानां श्रुतिस्मृतीनां किमालंबनं तदाह॥ तद्व्यतिरेकेणेति॥ आश्रमत्वेन निरूप्यते वस्तुतस्तु नाश्रमस्तदाभास इति यावत्॥ तस्यात्मज्ञानांगत्वं वारयति॥ ब्रह्मेति॥ अथ व्युत्थान वाक्योक्त मुख्यपारिव्राज्य विषयत्वमेव लिंगादि विधानस्य किं न स्यात्तत्राह॥ न चेति॥ एषणारूपाणि साधनानि यज्ञोपवीतादीनि तेषामुपादानमनुष्ठानं तस्याश्रमधर्ममात्रेणोक्तस्य यथोक्ते संन्यासाभासे विषये सति प्रधानबाधेन मुख्यपारिव्राज्य विषयत्वमयुक्तमित्यर्थः॥ कथं पुनर्मुख्यपारिव्राज्य विषयत्वे यज्ञोपवीतादेरिष्टप्रधानबाधनं तदाह॥ यज्ञोपवीतादीति॥ साध्यसाधनयोरासंगे तद्विलक्ष

तद्व्यतिरेकेण चास्त्याश्रमरूपं पारिव्राज्यं ब्रह्मलोकादि फलप्राप्तिसाधनं यद्विषयं यज्ञोपवीतादि साधन विधानं लिंगविधानं च न चैषणारूपसाधनोपादानस्याश्रमधर्ममात्रे पारिव्राज्यांतरे विषये संभवति सति सर्वोपनिषद्विहितस्यात्मज्ञानस्य बाधनं युक्तं यज्ञोपवीताद्यविद्याविषये षणारूपसाधनोपादित्सायां चावश्यमसाधन फलरूपस्याशनायादि संसारधर्म वर्जितस्याहं ब्रह्मास्मीति विज्ञानं बाध्यते॥ न च तद्बाधनं युक्तं सर्वोपनिषदां तदर्थपरत्वाद्भिक्षाचर्यं चरंतीत्येषणां ग्राहयंतीश्रुतिः स्वयमेव बाधत इति चेद्भिक्षादेषणाभ्यो व्युत्थानं विधाय पुनरेषणैकदेशं भिक्षाचर्यं ग्राहयंतीतत्संबंधमन्यदपि ग्राहयतीतिचेन्न भिक्षाचर्यास्याप्रयोजकत्वात् हुतोत्तरकालभक्षणवच्छेषप्रतिपत्तिकर्मत्वादप्रयोजकं हि त णस्यात्मनोज्ञानं बाध्यते चेत्कानो हानिरित्याशंक्याह॥ न चेति॥ भिक्षाचर्यं तावद्विहितं विहितानुष्ठानं च यज्ञोपवीतादि विना न संभवतीति श्रुत्यैवात्मज्ञानं यज्ञोपवीतादि विरोधि बाधितमिति शंकते॥ भिक्षाचर्यमिति॥ शंकामेव विशदयति॥ अथापीत्यादिना॥ यथा हुतशेषस्य भक्षणं विहितमपि न द्रव्याक्षेपकं परिशिष्टद्रव्योपादानेन प्रवृत्तेस्तथा सर्वसंत्यागे विहिते परिशिष्टभिक्षोपादानेन विहितमपि भिक्षाचरणमुपवीताद्यनाक्षेपकमित्युत्तरमाह॥ नेत्यादिना॥ दृष्टांतमेव स्पष्टयति॥ शेषेति॥ त

अप्रयोजकं द्रव्यविशेषस्यानाक्षेपकमिति यावत्॥ यद्वा दार्ष्टांतिकमेव स्फुटयति॥ शेषेति॥ सर्वस्वत्यागे विहिते शेषस्य कालस्य शरीरापातांतस्य प्रतिपत्तिकर्ममात्रं भिक्षाचर्यमतो न तदुपवीतादिप्रापकमित्यर्थः॥ किंच॥ भिक्षाचर्यस्य शरीरस्थित्यै वाक्षिप्तत्वान्न तत्रापि विधिर्दूरे तद्वशादुपवीतादिसिद्धिरित्याह॥ असंस्कारत्वाच्चेति॥ तदेव स्फुट्यते॥ भक्षणमिति॥ एककालं चरेद्भैक्ष्यमित्यादिनियमवशाददृष्टं सिध्यदुपवीतादिकमप्याक्षिपतीति चेन्नेत्याह॥ नियमेति विविदिषोस्तदृष्टमपि नोपवीताद्याक्षेपकं ज्ञानोत्पादकश्रवणाद्युपयोगिदेहस्थित्यर्थत्वेनैव चरितार्थत्वादिति भावः॥ तर्हि यथाकथंचिदुपनतेनान्नेन शरीरस्थितिसंभवाद्भिक्षाचर्यं चरंतीति वाक्यमनर्थमिति शंकते॥ नियमादृष्टस्येति॥ भिक्षाचर्यानुवादेन प्रतिग्रहादिनिवृत्त्या

दसंस्कारकत्वाच्च भक्षणं पुरुषसंस्कारार्थमपि स्यान्नतु भिक्षाचर्येनियमादृष्टस्यापि ब्रह्मविदोऽनिष्टत्वान्नियमादृष्टस्यानिष्टत्वे किं भिक्षाचर्येणेति चेत्॥ नान्यसाधनाद्युत्थानस्य विहितत्वात्तथापि किं तेनेति चेद्यदिस्याद्दृढमभ्युपगम्यते हि तत्॥ यानि पारिव्राज्येऽभिहितानि वचनानि यज्ञोपवीतस्येवाधीयीतेत्यादीनि तान्यविद्वत्पारिव्राज्यमात्रविषयाणीति परिहृतानि इतरथात्मज्ञानबाधः स्यादिति ह्युक्तं॥ निराशिषमनारंभं निर्नमस्कारमस्तुतिं॥ अक्षीणं क्षीणकर्माणं तं देवा ब्राह्मणं विदुरिति सर्वकर्माभावं दर्शयति स्मृतिर्विदुषः॥ विद्वान्‌ लिंगविवर्जितस्तस्मादलिंगो धर्मज्ञ इति च

र्थत्वाद्वाक्यस्यानानर्थक्यमित्युत्तरमाह॥ नान्येति॥ निवृत्त्युपदेशेन वाक्यस्यार्थवत्त्वेऽपि तदुपदेशस्यानार्थक्यं कूटस्थात्मज्ञानेनैव सर्वनिवृत्तेः सिद्धेरिति शंकते॥ तथापीति॥ यदि निष्क्रियात्मज्ञानादशेषनिवृत्तिः स्यात्तर्हि तदस्माभिरपीष्टा क्रियते सत्यमिसंगीकरोति॥ यदीति॥ यदि तु क्षुधादिदोषप्राबल्यादात्मानं निष्क्रियमपि विस्मृत्य प्रार्थनादिपरो भवति तदा निवृत्त्युपदेशोऽपि भवत्यर्थवानिति भावः॥ प्रागुक्तवाक्यविरोधान्निवृत्त्युपदेशोऽशक्य इति चेत्तत्राह॥ यानीति॥ मुख्यपरिव्राड्विषयत्वे दोषं स्मारयति॥ इतरथेति॥ निवृत्त्युपदेशानुग्राहकत्वेन स्मृतीरु

अमुख्यसंन्यासिविषयत्वासंभवान्मुख्यपरिव्राड्विषयं व्युत्थानवाक्यमित्युपसंहरति॥ तस्मादिति॥ इति शब्दो व्युत्थानवाक्यव्याख्यानसमा
प्त्यर्थः॥ तस्मादित्यादिवाक्यमवतार्य व्याचष्टे॥ यस्मादित्यादिना॥ उक्तमेव व्युत्थानं स्पष्टयति॥ दृष्टेति॥ विवेकवैराग्याभ्यामेषणाभ्यो व्युत्थायश्रु
त्याचार्याभ्यां कर्तव्यं ज्ञानं निःशेषं कृत्वा बाल्येन तिष्ठासेदिति व्यवहितेन संबंधः पांडित्यं निर्विद्येत्यत्रैनैव व्युत्थानं विहितमित्याह॥ एषणेति॥

तस्मात्परमहंसपारिव्राज्यमेव व्युत्थानलक्षणं प्रतिपद्येतात्मवित्सर्वकर्मसाधनपरित्यागरूपमिति यस्मात्पूर्वे ब्राह्मणा एतमात्मा
नमसाधनफलस्वभावं विदित्वा सर्वस्मात्साधनफलस्वरूपादेषणालक्षणाद्व्युत्थाय भिक्षाचर्यं चरंति स्म॥ दृष्टादृष्टार्थं कर्म तत्साध
नं च हित्वा तस्मादद्यत्वेपि ब्राह्मणः ब्रह्मवित्पांडित्यं पंडितभावमेतदात्मविज्ञानं पांडित्यं तन्निर्विद्य निःशेषं विदित्वात्मविज्ञानं निरव

स्तस्माद्ब्राह्मणः पांडित्यं निर्विद्य

शेषं कृत्वेत्यर्थः आचार्यत आगमतश्च एषणाभ्यो व्युत्थाय एषणाव्युत्थानावसानमेव हि पांडित्यमेषणातिरस्कारोद्भवत्वादेषणाविरु
द्धत्वादेषणामतिरस्कृत्य न ह्यात्मविषयस्य पांडित्यस्योद्भवः स्यादात्मज्ञानेनैव विहितमेषणाव्युत्थानमात्मज्ञानसमानकर्तृकत्वे क्त्वाप्र
त्ययोपादानलिंगश्रुत्या दृढीकृतं॥ तद्धि पांडित्यमेषणाभ्यो व्युत्थानस्यावसाने संभवति॥ तदत्र व्युत्थानविधिरित्यर्थः॥ तदेव स्फुटयति॥ एषणेत्या
दिना॥ तासां तिरस्कारेण पांडित्यमुद्भवति तस्यैषणाभ्यो विरुद्धत्वात्तथा च पांडित्यं निर्विद्येत्यत्र ताभ्यो व्युत्थानविधानमुचितमित्यर्थः॥ विनापि व्युत्थानं पां
डित्यमुद्भविष्यतीति चेन्नेत्याह॥ नहीति॥ पांडित्यं निर्विद्येत्यत्र व्युत्थानविधिमुक्तमुपसंहरति॥ इत्यात्मज्ञानेनेति॥ तर्हि किमिति विदित्वा व्युत्थायेत्यत्र

तेनव्युत्थानस्यसमानकर्तृत्वेक्त्वाप्रत्ययस्योपादानमेवलिंगभूताश्रुतिस्तयादृढीकृतंनियमेनप्रापितंव्युत्थानमित्यर्थः॥बाल्येनेत्यादिवाक्यमुत्था
प्यव्याकरोति॥तस्मादिति॥विवेकादिवशादेषणाभ्योव्युत्थायपांडित्यंसंपाद्यतस्मात्पांडित्यात्ज्ञानबलभावेनस्थातुमिच्छेदितियोजना।केयंज्ञान
बलभावेनस्थितिरित्याशंक्यतांव्युत्पादयति॥साधनेत्यादिनाविद्वानितिविवेकित्वोक्तिः॥यथोक्तबलभावावष्टंभेकरणानांविषयपारवश्यनिवृ

तस्मादेषणाभ्योव्युत्थायज्ञानबलभावेनबाल्येनतिष्ठासेत्स्थातुमिच्छेत्साधनफलाश्रयणंहिबलमितरेषामनात्मविदांतद्बलंहित्वावि
द्वान्साधनफलस्वरूपात्मविज्ञानमेवबलंतद्भावमेवकेवलमाश्रयेत्तदाश्रयणेनहिकरणान्येषणाविषयेएनंहृत्वास्थापयितुमुत्स
हंतेज्ञानबलहीनंहिमूढंदृष्टादृष्टविषयायामेषणायामेवैनंकरणानियोजयंतिबलंनामात्मविद्ययाअशेषविषयदृष्टितिरस्करणमत

बाल्येनतिष्ठासेद्बाल्यंचपांडित्यंचनिर्विद्याथमुनिरमौनंचमौनंचनिर्विद्याथब्राह्मणः॥

स्तद्भावेनबाल्येनतिष्ठासेत्तथात्मनाविंदतेवीर्यमितिश्रुत्यंतरान्नायमात्माबलहीनेनलभ्यइतिचबाल्यंचपांडित्यंचनिर्विद्यनिःशेषंकृ
त्वाअथमननान्मुनिर्योगीभवतिएतावद्धिब्राह्मणेनकर्तव्यंयदुतसर्वानात्मप्रत्ययतिरस्कारःएतत्कृत्वाकृतकृत्योयोगीभवति॥स्वापुरुष

स्यापितत्पारवश्यनिवृत्तिःफलतीत्याह॥नहीति॥उक्तमेवार्थंव्यतिरेकमुखेनविशदयति॥ज्ञानबलेनेति॥नन्वद्यापिज्ञानस्यबलंकीदृगितिनज्ञाय
तेतत्राह॥बलंनामेति॥बाल्यवाक्यार्थमुपसंहरति॥अतइति॥यथाज्ञानबलेनविषयाभिमुखीदृष्टिस्तिरस्क्रियतेतथेतियावत्आत्मनातद्धिज्ञाना
तिशयेनेत्यर्थः॥वीर्यंविषयदृष्टितिरस्करणसामर्थ्यमित्येतत्बलहीनेनविषयदृष्टितिरस्करणसामर्थ्यरहितेनायमात्मानलभ्योनशक्यःसाक्षात्कर्तुमि

बृ॰र॰
४०

पूर्वोक्तयोरुत्तरत्रहेतुत्वद्योतनार्थोऽथशब्दः॥ तदेवोपपादयति॥ एतावद्धीति॥ वाक्यांतरमुत्थाप्यव्याकरोति॥ अमौनंचेत्यादिना॥ मौनामौनपो ब्रा
ह्मण्यंप्रतिसामग्रीत्वद्योतकोऽथशब्दः॥ ब्राह्मण्यमुपपादयति॥ ब्रह्मैवेति॥ आचार्यपरिचर्यापूर्वकंवेदांतानांतात्पर्यावधारणंपांडित्यंयुक्तितो
ऽनात्मदृष्टितिरस्कारोबाल्यं॥ अहमात्मापरंब्रह्मनमत्तोन्यदस्तिकिंचनेतिमननसेवानुसंधानंमौनंमहावाक्यार्थावगतिर्ब्राह्मण्यमितिविभागः॥ प्रा

अमौनंचात्मज्ञानानात्मप्रत्ययतिरस्कारौपांडित्यबाल्यसंज्ञकौनिःशेषंकृत्वामौनंनामानात्मप्रत्ययतिरस्करणस्यपर्यवसानंफ
लंतच्चनिर्विद्याथब्राह्मणःकृतकृत्योभवति॥ ब्रह्मैवसर्वमितिप्रत्ययउपजायतेसब्राह्मणःकृतकृत्योतोब्राह्मणोनिरुपचरितं
हितदातस्यब्राह्मण्यंप्राप्तमतआहसब्राह्मणःकेनस्यात्केनचरणेनभवेद्येनस्याद्येनचरणेनभवेत्तेनेदृशएवायंयेनकेनचिच्चर.

सब्राह्मणःकेनस्याद्येनस्यात्तेनेदृशएवातोन्यदार्त्तंततोहकहोलःकौषीतकेयउपरराम॥ २८॥ पंचमंब्राह्मणं॥ ५॥

णेनभवेत्तेनेदृशएवउक्तलक्षणएवब्राह्मणोभवति॥ येनकेनचिच्चरणेनेतिस्तुत्यर्थंयेयंब्राह्मण्यावस्थासाद्दुःप्राप्यत्वाततेनतुचरणेऽ
नादरोऽतएतस्माद्ब्राह्मण्यावस्थानादशनायाद्यतीतात्मस्वरूपान्नित्यतृप्तादन्यदविद्याविषयमेषणालक्षणंवस्त्वंतरमार्तंविनाश्या

गपिप्रसिद्धंब्राह्मण्यमितिचेत्तत्राह॥ निरुपचरितमिति॥ ब्रह्मविदःसमाचारंदृष्टेति॥ सदितिअनियतंतस्यचरणमित्युत्तरमाह॥ येनेति॥ उक्तलक्ष
णत्वंकृतकृत्यत्वंअव्यवस्थितंचरणमित्युक्ताब्रह्मविदोयथेष्टचेष्टाऽभीष्टास्यात्तथाचयद्यदाचरतिश्रेष्ठइतिस्मृतेरितरेषामप्याचारेऽनादरःस्यादित्या
शंक्याह॥ येनकेनचिदिति॥ विहितमाचरतोनिषिद्धंचत्यजतःशुद्धबुद्धेःश्रुताद्वाक्यात्सम्यग्धीरुत्पद्यतेतस्यचवासनावशाद्व्यवस्थितैवचेष्टानाम्यव

अ॰ ५
रामः
४०

अतोन्यदित्यादिव्याकरोति॥अतइति॥स्वप्नेस्यादिबहुदृष्टांतोपादानंदार्ष्टांतिकस्यबहुरूपत्वद्योतनार्थं॥अतोन्यदितिकुतोविशेषणमित्याशं
क्याह॥आत्मैवेति॥२८॥इतिश्रीमद्बृहदारण्यकेपंचमप्रपाठकेकहोलब्राह्मणंपंचमं॥५॥पूर्वब्राह्मणयोरात्मनःसर्वांतरत्वमुक्तंतन्निर्णयार्थ
मुत्तरंब्राह्मणत्रयमितिसंगतिमाह॥यत्साक्षादिति॥उक्तमेवसंबंधंविवृणोति॥पृथिव्यादीनीति॥अंतर्बहिर्भावेनसूक्ष्मस्थूलतारतम्यक्रमेणव्य

स्वप्नमायामरीच्युदकसममसारमात्मैवैकःकेवलोनित्यमुक्तइतितत्तोकहोलःकौषीतकेयउपरराम॥१॥बृहदारण्यकेपंचमप्रपाठ
केकहोलब्राह्मणंपंचमं॥५॥यत्साक्षादपरोक्षाद्ब्रह्मसर्वांतरआत्मेत्युक्तंतस्यसर्वांतरस्यस्वरूपाधिगमायाशाकल्यब्राह्मणादूर्ध्वमा
रभ्यते॥पृथिव्यादीनिआकाशांतानिभूतान्यंतर्बहिर्भावेनव्यवस्थितानितेषांयद्बाह्यंबाह्यमधिगम्याधिगम्यनिराकुर्वन्द्रष्टुःसाक्षा

अथहैनंगार्गीवाचक्नवीपप्रच्छयाज्ञवल्क्येतिहोवाचयदिदंसर्वमप्स्वोतंचप्रोतंच॥

त्सर्वांतरोऽगौणःआत्मासर्वसंसारधर्मविनिर्मुक्तोदर्शयितव्यइत्यारंभः॥अथहएनंगार्गीनामतोवाचक्नवीवचक्नोर्दुहितापप्रच्छयाज्ञ
वल्क्येतिहोवाचयदिदंसर्वंपार्थिवंधातुजातमप्सूदकेओतंचदीर्घपटतंतुवत्प्रोतंतिर्यक्तंतुवद्विपरीतंवाअद्भिःसर्वतोंतर्बहिर्भूताभि
र्व्याप्तमित्यर्थः॥अन्यथासक्तुमुष्टिवद्विशीर्येतइदंतावदनुमानमुपन्यस्तं

र्थः॥बाह्यंबाह्यमितिवीप्सोपरिष्टात्तद्बोद्धृष्टव्योपत्तदोर्नित्यसंबंधा
त्॥निराकुर्वन्यथामुमुक्षुःसर्वांतरमात्मानंप्रतिपद्यतेतथासयथोक्तविशेषणोदर्शयितव्यइत्युत्तरग्रंथारंभइतियोजना॥कहोलप्रश्ननिर्णयानंतर्य
मथशब्दार्थः॥यत्सार्थिवंधातुजातंतदिदंसर्वमप्स्वित्यादियोजनीयं॥पदार्थमुक्त्वावाक्यार्थमाह॥अद्भिरिति॥पार्थिवस्यधातुजातस्याद्भिर्व्याप्त्यभावेदोषमाह

॥उ॥अत्वकेति॥किमत्रगार्गीत्वक्षितमितततद॥२८
नावादिति॥

तदेवदर्शयितुं व्याप्तिमाह॥ यत्कार्यमिति॥ कारणेन व्यापकेनेति शेषः॥ यत्कार्यं तत्कारणेन व्याप्तं यत्परिच्छिन्नं तद्व्यापकेन व्याप्तं यच्च स्थूलं तत्सूक्ष्मे
ण व्याप्तमिति त्रिः प्रकारा व्याप्तिः॥ इति शब्दस्तत्समाप्त्यर्थः॥ व्याप्तिभूमिमाह॥ यथेति॥ संप्रत्यनुमानमाह॥ तथेति॥ पूर्वं पूर्वमित्यबादेर्धर्मिणो निर्देशः
॥ उत्तरेणोत्तरेन वाय्वादिकारणेनापरिच्छिन्नेन सूक्ष्मेण व्याप्तमिति शेषः॥ विमतं कारणेन व्यापकेन सूक्ष्मेण व्याप्तं कार्यत्वात्परिच्छिन्नत्वात्स्थूलत्वा
च्च पृथिवीवदित्यर्थः॥ सर्वांतरादात्मनोर्वाग्युक्तन्यायं सर्वत्र संचारयति॥ इत्येवमिति॥ ननु तथापि भूतपंचकव्यतिरिक्तानां गंधर्वलोकादीनामप्यंत

यत्कार्यं परिच्छिन्नं स्थूलं कारणेनापरिच्छिन्नेन सूक्ष्मेण व्याप्तमिति दृष्टं यथा पृथिव्यद्भिः॥ तथा पूर्वं पूर्वमुत्तरेणोत्तरेण व्यापिना भवितव्य
मित्येष आ सर्वांतरादात्मनः प्रश्नार्थः तत्र भूतानि पंच संहतान्येवोत्तरोत्तरेण सूक्ष्मभावेन व्यापकेन कारणरूपेण च व्यवतिष्ठंते न

कस्मिन्नु खल्वाप ओताश्च प्रोताश्चेति॥

च परमात्मनोऽर्वाक् तद्व्यतिरेकेणावस्त्वंतरमस्ति सत्यस्य सत्यमिति श्रुतेः सत्यं च भूतपंचकं स सत्यस्य सत्यं स च पर आत्मा कस्मिन्नु ख
ल्वाप ओताश्च प्रोताश्चेति तासामपि कार्यत्वात्स्थूलत्वात्परिच्छिन्नत्वाच्च क्वचिद्धोत प्रोतभावेन भवितव्यं तत्र क्व तासामोतप्रोतभा
व इत्येवमुत्तरोत्तरं प्रश्नप्रसंगो योजितव्यः वा पैगार्गीति॥ एतेनोपदेशात्कथं भूतपंचकव्युदासेन सर्वांतरप्रतिपत्तिर्विवक्ष्यते तत्राह॥ त
त्रेति॥ उक्तरीत्या प्रश्नार्थे स्थिते सतीति यावत्॥ भूतात्मस्थितिनिर्धारणे वा सप्तमी॥ अथ परमात्मानं भूतानि च हित्वा पृथगेव गंधर्वलोकादीनि
वस्त्वंतराणि भविष्यंतिनेत्याह॥ न चेति॥ गंधर्वलोकादीन्यपि भूतानामेवावस्थाविशेषास्ततः सत्यं भूतपंचकं तस्य सत्यं परं ब्रह्म ज्ञानान्यदंतरालेप्रति

तात्पर्यमुक्त्वा प्रश्नमुत्थाप्य तदक्षराणि व्याकरोति ॥ कस्मिन्नित्यादिना कस्मिन्नु खलु वायुरित्यादावुक्तन्यायमतिदिशति ॥ एवमिति ॥ वायाविव्यु
क्ताप्रयुक्तिरपामग्निकार्यत्वादग्नाविति वक्तव्यत्वादिति शंकते ॥ नन्विति ॥ अग्नेरुदकव्यापकत्वेपि काष्ठविद्युदादिपारतंत्र्यात्स्वतंत्रेण केन

नन्वग्नाविति वक्तव्यं नैष दोषोऽग्नेः पार्थिवं वाऽप्यं वा धातुमनाश्रित्येतरभूतवत्स्वातंत्र्येणात्मलाभो नास्तीति तस्मिन्नोतप्रोतभावोनो
पदिश्यते कस्मिन्नु खलु वायुरोतश्च प्रोतश्चेत्यंतरिक्षलोकेषु गार्गीति तान्येव भूतानि संहतान्यंतरिक्षलोकास्तान्यपि गंधर्वलोकेषु

वायो गार्गीति कस्मिन्नु खलु वायुरोतश्च प्रोतश्चेत्यंतरिक्षलोकेषु गार्गीति कस्मिन्नु खल्वंतरिक्षलोका ओताश्च प्रोताश्चेति
गंधर्वलोकेषु गार्गीति कस्मिन्नु खलु गंधर्वलोका ओताश्च प्रोताश्चेत्यादित्यलोकेषु गार्गीति कस्मिन्नु खल्वादित्यलोका ओ
ताश्च प्रोताश्चेति चंद्रलोकेषु गार्गीति कस्मिन्नु खलु चंद्रलोका ओताश्च प्रोताश्चेति नक्षत्रलोकेषु गार्गीति कस्मिन्नु खलु नक्ष
त्रलोका ओताश्च प्रोताश्चेति देवलोकेषु गार्गीति कस्मिन्नु खलु देवलोका ओताश्च प्रोताश्चेतींद्रलोकेषु गार्गीति कस्मिन्नु ख
ल्विंद्रलोका ओताश्च प्रोताश्चेति प्रजापतिलोकेषु गार्गीति कस्मिन्नु खलु प्रजापतिलोका ओताश्च प्रोताश्चेति ब्रह्मलोकेषु गार्गीति ॥

गंधर्वलोका आदित्यलोकेष्वादित्यलोकाश्चंद्रलोकेषु चंद्रलोका नक्षत्रलोकेषु नक्षत्रलोका देवलोकेषु देवलोका इंद्रलोकेष्विंद्रलोका
विराट्शरीरारंभकेषु भूतेषु प्रजापतिलोकेषु प्रजापतिलोकाः ब्रह्मलोकेषु ब्रह्मलोका नामांडारंभकाणि भूतानि ॥ विरट्पांग्यासिर्वक्तव्यस्य
स्मिंहि त्वात तत्कारणे वायाविव्युक्तं ॥ वायोश्च सकारणतंत्रत्वेपि नोदकतंत्रतेति तद्व्यापकत्वसिद्धिरित्युत्तरमाह ॥ नैष दोष इत्यादिना ॥ अंतरिक्षलोक

शब्दार्थमाह ॥ तान्येवेति ॥ प्रजापतिलोकशब्दार्थं
कथयति ॥ विराडिति ॥

अंतरिक्षलोकादीनां प्रत्येकमेकत्वात्कुतो बहुवचनमित्याशंक्याह॥ सर्वत्र हीति॥ पूर्ववदनुमानेन सूत्रं पृच्छंतीं गार्गीं प्रतिषेधति॥ सहोवा
चेत्यादिना॥ उक्तमेव स्पष्टयन्वाक्यार्थमाह॥ आगमेनेति॥ प्रतिषेधातिक्रमे दोषमाह॥ पृच्छंत्याश्चेति॥ मूर्धपातप्रसंगं प्रकटयन्प्रतिषेधमु

सर्वत्र हि सूक्ष्मतारतम्यक्रमेण प्राण्युपभोगाश्रयाकारपरिणतानि भूतानि संहतानि तान्येव पंचेति बहुवचनभांजि कस्मिन्नु
खलु ब्रह्मलोका ओताश्च प्रोताश्चेति स होवाच याज्ञवल्क्यो हे गार्गि मातिप्राक्षीः स्वप्रश्नन्यायप्रकारमतीत्यागमेन प्रष्टव्यां देव
तामनुमानेन मा प्राक्षीरित्यर्थः॥ पृच्छंत्याश्च मा ते तव मूर्धा शिरो व्यपप्तद्विस्पष्टं मा पतेद्देवतायाः स्वप्रश्न आगमविषयस्तं प्रश्नवि

कस्मिन्नु खलु ब्रह्मलोका ओताश्च प्रोताश्चेति स होवाच गार्गि मातिप्राक्षीर्मा ते मूर्धा व्यपप्तदनतिप्रश्न्यां वै देवतामतिपृ
च्छसि गार्गि मातिप्राक्षीरिति ततो ह गार्गी वाचक्नव्युपरराम॥ २९॥ षष्ठं ब्राह्मणं॥ ६॥ षयमतिक्रांतो गार्ग्याः प्रश्न आनुमानिकत्वात्स

यस्या देवतायाः प्रश्नः सातिप्रश्न्या न अतिप्रश्न्या अनतिप्रश्न्या स्वप्रश्नविषयैव केवलागमगम्येत्यर्थः॥ तामनतिप्रश्न्यां वै देवतामतिपृ
च्छसि अतो गार्गि मातिप्राक्षीर्मर्तुं चेन्नेच्छसि ततो ह गार्गी वाचक्नव्युपरराम॥ इति श्रीमद्बृहदारण्यके भाष्ये पंचमप्रपाठके षष्ठं ब्राह्म
णं॥ ६॥ इदानीं ब्रह्मलोकानामंतरतमं सूत्रं च वक्तव्यमिति तदर्थ आरंभः तच्चागमेनैव प्रष्टव्यमितीतिहासेनागमोपन्यासः क्रियते

पसंहरति॥ देवताया इत्यादिना॥ २९॥ इति श्रीमद्बृहदारण्यके पंचमप्रपाठके षष्ठं ब्राह्मणं॥ ६॥ पूर्वस्मिन्ब्राह्मणे सूत्राद्वर्वाक्तनं व्यापकमुक्तमिदानीं सू
त्रं तदंतर्गतमंतर्यामिणं च निर्वक्तुमुत्तरं ब्राह्मणमिति संगतिमाह॥ इदानीमिति॥ ब्राह्मणतात्पर्यमुक्त्वा ऽऽख्यायिकातात्पर्यमाह॥ तच्चागमेनैवेति॥ आ

गार्ग्या मूर्द्धपातभयादुपरतेरनंतरमथशब्दार्थः॥ सोब्रवीदितिप्रतीकोपादानं॥ तस्यार्थमाह॥ सूत्रमिति॥ इतिशब्दार्थमाह॥ एवमिति॥

अथहैनमुद्दालकोनामतोरुणस्यापत्यमारुणिः पप्रच्छयाज्ञवल्क्येतिहोवाचमद्रेषुदेशेषुवसामोषितवंतः पतंचलस्यपतंचलो नामतस्तस्यैवकपिगोत्रस्यकाप्यस्यगृहेषुयज्ञमधीयानाः यज्ञशास्त्राध्ययनंकुर्वाणास्तस्यासीद्भार्यागंधर्वगृहीतातमपृच्छाम कोसीतिसोब्रवीत्कबंधोनामतोथर्वणोपत्यमाथर्वणइतिसोब्रवीद्गंधर्वः पतंचलंकाप्यंयाज्ञिकांश्चतच्छिष्यांश्चास्मांश्चवेत्थनुत्वं

अथहैनमुद्दालकआरुणिःपप्रच्छयाज्ञवल्क्येतिहोवाचमद्रेष्ववसामपतंचलस्यकाप्यस्यगृहेषुयज्ञमधीयानास्तस्या सीद्भार्यागंधर्वगृहीतातमपृच्छामकोसीतिसोब्रवीत्कबंधआथर्वणइतिसोब्रवीत्पतंचलंकाप्यंयाज्ञिकांश्चवेत्थनुत्वं काप्यतत्सूत्रंयेनायंचलोकःपरश्चलोकःसर्वाणिचभूतानिसंदृब्धानिभवंतीतिसोब्रवीत्पतंचलःकाप्योनाहंतद्भग वन्वेदेतिसोब्रवीत्पतंचलंकाप्यंयाज्ञिकांश्चवेत्थनुत्वंकाप्यतमंतर्यामिणंयइमंचलोकंपरंचलोकंसर्वाणिचभूतानियों तरोयमयतीति॥

हेकाप्यजानीषेतत्सूत्रं॥ किंतद्येनसूत्रेणायंचलोकःइदंचजन्मपरश्चलोकःपरंचप्रतिपत्तव्यंजन्मसर्वाणिचभूतानि ब्रह्मादिस्तंबपर्यंतानिसंदृब्धानिसंग्रथितानिस्रगिवसूत्रेणविष्टब्धानिभवंतियेनतत्किंसूत्रंवेत्थसोब्रवीदेवंपृष्टःकाप्योनाहंतद्भगव न्वेदेतितत्सूत्रंनाहंजानेहेभगवन्नितिसंपूजयन्नाहसोब्रवीत्पुनर्गंधर्वउपाध्यायमस्मांश्चवेत्थनुत्वंकाप्यतमंतर्यामिणमंतर्यामीतिविशि ष्यतेयइमंचलोकंपरंचलोकंसर्वाणिचभूतानियोंतरोभ्यंतरःसन्यमयतिनियमयतिदारुयंत्रमिवभ्रामयतिस्वंस्वमुचितंव्यापारंकारयतीति॥

येनायं चेत्यादिरुक्तः प्रकारः स सर्वलोकांश्च वेत्तीति संबंधः॥ विशेषणोक्तिपूर्वकं तानेव लोकाननुवदति॥ भूरादीनिति॥ स ब्रह्मविदित्यादिनोक्तं सं

सोऽब्रवीदेवमुक्तः पतंचलः काप्योनाहं तं जाने भगवन्निति संपूजयन्नाह सोऽब्रवीत्पुनर्गंधर्वः सूत्रतदंतर्गतांतर्यामिणोर्विज्ञानं स्तूयते यः
कश्चिद्वै तत्सूत्रं हे काप्य विद्याद्विजानीयात्तं चांतर्यामिणं सूत्रांतर्गतं तस्यैव सूत्रस्य नियंतारं विद्याद्य इत्येवमुक्तेन प्रकारेण स हि ब्रह्म
वित्परमात्मवित्स लोकांश्च भूरादीनंतर्यामिणा नियम्यमानाँल्लोकान्वेत्ति स देवांश्चाग्न्यादीन्लोकिनो जानाति वेदांश्च सर्वप्रमाणभू
तान्वेत्ति भूतानि च ब्रह्मादीनि सूत्रेण ध्रियमाणानि तदंतर्गतेनांतर्यामिणा नियम्यमानानि वेत्ति स आत्मानं च कर्तृत्वभोक्तृत्वविशिष्टं ते

सोऽब्रवीत्पतंचलः काप्यो नाहं तं भगवन्वेदेति सोऽब्रवीत्पतंचलं काप्यं याज्ञिकाँश्च यो वै तत्काप्य सूत्रं विद्यात्तं चांतर्या
मिणमिति स ब्रह्मवित्स लोकवित्स देववित्स वेदवित्स भूतवित्स आत्मवित्स सर्वविदिति तेभ्योऽब्रवीत्तदहं वेद तच्चेत्त्वं या
ज्ञवल्क्य सूत्रमविद्वाँस्तं चांतर्यामिणं ब्रह्मगवीरुदजसे मूर्धा ते विपतिष्यतीति वेद वा अहं गौतम तत्सूत्रं तं चांतर्यामि
णमिति यो वा इदं कश्चिद्ब्रूयाद्वेद वेदेति यथा वेत्थ तथा ब्रूहीति॥ ३०॥ नैवांतर्यामिणा नियम्यमानं वेत्ति सर्वं च जगत्तथाभूतं वेत्ती ये
वं स्तुते सूत्रांतर्यामिविज्ञाने प्रलुब्धः काप्योऽभिमुखीभूतो वयं च तेभ्योऽब्रवीद्गंधर्वः सूत्रमंतर्यामिणं च तदहं सूत्रांतर्यामिविज्ञानं वेद गंध
र्वाल्लब्धागमः संस्त्वं चेद्याज्ञवल्क्य सूत्रं तं चांतर्यामिणमविद्वाँश्चेद्ब्रह्मवित्स्वन्यदि ब्रह्मगवीरुदजसे ब्रह्मविदां स्वभूता गा उदजसे उन्न
यसि तत्त्वमन्यायेन ततो मच्छापदग्धस्य मूर्धा शिरस्ते तव विस्पष्टं पतिष्यति क्षिपति॥ सर्वं चेति॥ तथाभूतं सूत्रेण विधृतमंतर्यामिणा च नियम्यमा

भवत्वेवं तथस्त्वाद्वज्ञानममकिमायातमित्याशंक्याह ॥ तच्चेदिति ॥ किंतेनेत्यत्र तस्येत्यध्याहारः ॥ कार्येण दर्शयेत्युक्तं विवृणोति ॥ यथेति ॥ ३० ॥
याज्ञवल्क्योक्तेस्तात्पर्यमाह ॥ ब्रह्मलोकादिति ॥ इत्यभीष्टमागमविद्यामित्यध्याहृत्याद्यस्येतिशब्दस्य योजना ॥ प्रश्नांतरं सूत्रविषयं गौतमवाक्यं ॥ वेद

एवमुक्तो याज्ञवल्क्य आह वेद जानाम्यहं हे गौतमेति गोत्रतः तत्सूत्रं यत् गंधर्वस्तुभ्यमुक्तवान्यं चांतर्यामिणं गंधर्वाद्विदितवंतो यूयं तं चां
तर्यामिणं वेदाहमित्येवमुक्ते प्रत्याह गौतमो यः कश्चित्प्राकृत इदं यत्त्वयोक्तं ब्रूयात्कथं वेद वेदेत्यात्मानं श्लाघयन्किं तेन गर्जितेन कार्येण द
र्शय यथा वेत्थ तथा ब्रूहीति ॥ ३० ॥ १ ॥ सहोवाच याज्ञवल्क्यो ब्रह्मलोका यस्मिन्नोताश्च प्रोताश्च वर्त्तमानकाले यथा पृथिव्यप्सु तत्सूत्रमागम

सहोवाच वायुर्वै गौतम तत्सूत्रं वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवंति तस्माद्वै
गौतम पुरुषं प्रेतमाहुर्व्यस्रंसिषतास्यांगानीति वायुना हि गौतम सूत्रेण संदृब्धानि भवंतीत्येवमेवैतद्याज्ञवल्क्यांतर्यामिणं
ब्रूहीति ॥ ३१ ॥

गम्यं वक्तव्यमिति तदर्थं प्रश्नांतरमुत्थापितं अतस्तन्निर्णयायाह वायुर्वै गौतम तत्सूत्रं नान्यद्वायुरिति सूक्ष्ममाकाशव
द्विष्टंभकं पृथिव्यादीनां यदात्मकं सप्तदशविधं लिंगं कर्मवासनासमवायि प्राणिनां यत्तत्समष्टिव्यष्ट्यात्मकं यस्य बाह्या भेदाः सप्त सप्त मरु
द्गणाः समुद्रस्येवोर्मयस्तदेतद्वायव्यं तत्त्वं सूत्रमित्यभिधीयते वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भ
वंति संग्रथितानि भवंतीति

ब्र्यर्थमाह ॥ नान्यदिति ॥ सूक्ष्मत्वे दृष्टांतमाह ॥ आकाशवदिति ॥ वायुमेव विशिनष्टि ॥ यदात्मकमिति ॥ पंचभूतानि दशबाह्यानींद्रियाणि पंच वृत्तिः प्राणश्चतु
र्विधमंतःकरणमिति सप्तदशविधत्वं ॥ कर्मणां वासनानां चोत्तरसृष्टिहेतूनां प्राणिभिरर्जितानामाश्रयत्वादपेक्षितमेव लिंगमित्याह ॥ कर्मेति ॥ तस्यैव सा
मान्यविशेषात्मना बहुरूपत्वमाह ॥ यत्तदिति ॥ तस्यैव
लोकप्रसिद्धत्वमाह ॥ यस्येति ॥

तस्यसूत्रत्वंसाधयति॥ वायुनेति॥ प्रसिद्धमेतत्सूत्रविदामितिशेषः॥ लौकिकीं प्रसिद्धिमेव प्रश्नपूर्वकमनंतरश्रुत्यवष्टंभेनस्पष्टयति॥ कथमित्या
दिना॥ उक्तमेवदृष्टांतेनव्यनक्ति॥ सूत्रेत्यादिना॥ वायोःसूत्रत्वेसिद्धेफलितमाह॥ अतइति॥ नियंतुरीश्वरस्यलौकिकनियंतृवत्कार्यकरणवत्त्वमा

प्रसिद्धमेतदस्तिचलोकेप्रसिद्धिः कथंयस्माद्वायुःसूत्रंवायुनाविधृतंसर्वंतस्माद्धैगोतमपुरुषंप्रेतमाहुः कथयंतिव्यस्रंसिषतवि
स्रस्तान्यस्यपुरुषस्यांगानीतिसूत्रापगमेहिमण्यादीनांप्रोतानामवस्रंसनंदृष्टमेवंवायुःसूत्रंतस्मिन्मणिवत्प्रोतानियद्यस्यांगानि
स्युस्ततोयुक्तमेतद्वाय्वपगमेविस्रंसनमंगानामतोवायुनाहिगोतमसूत्रेणसंदृब्धानिभवंतीतिनिगमयत्येवमेवैतद्याज्ञवल्क्यसम्य
गुक्तंसूत्रंतदंतर्गतंत्विदानींतस्यैवसूत्रस्यनियंतारमंतर्यामिणंब्रूहीत्युक्तआह॥ ३१॥ यःपृथिव्यांतिष्ठन्भवतिसोंतर्यामीसर्वःपृथिव्यां

यःपृथिव्यांतिष्ठन्पृथिव्याअंतरोयंपृथिवीनवेदयस्यपृथिवीशरीरंयःपृथिवीमंतरोयमयत्येषतआत्मांतर्याम्यमृतः॥ ३२॥

तिष्ठतीतिसर्वत्रप्रसंगोमाभूदितिविशिनष्टिपृथिव्याअंतरोभ्यंतरस्तत्रैतत्स्यात्पृथिवीदेवतैवांतर्यामीत्यतआहयमंतर्यामिणंपृथिवी
देवतापिनवेदमय्यन्यः कश्चिद्वर्ततइतियस्यपृथिवीशरीरंयस्यचपृथिव्येवशरीरंनान्यत्पृथिवीदेवतायायच्छरीरंतदेवशरीरंयस्यशरीर १८
ग्रहणंचोपलक्षणार्थंकरणंचपृथिव्यास्तस्याःस्वकर्मप्रयुक्तंहिकार्यकरणंचपृथिवीदेवतायास्तदस्यस्वकर्माभावादंतर्यामिणोनित्यमुक्तत्वा

शंक्याह॥ यस्यचेति॥ पृथिव्याःशरीरत्वमेवनतुशरीरवत्त्वमित्याशंक्याह॥ पृथिवीति॥ पृथिव्यायत्करणंतदेवतस्यकरणंचेतियोजना॥ कथंपृथिव्याः
शरीरेंद्रियवत्त्वंतदाह॥ स्वकर्मेति॥ अंतर्यामिणोपितथाकिंनस्यात्तत्राह॥ तदस्येति॥ अस्यांतर्यामिणस्तदेवकार्यकरणंचनान्यदित्यत्रहेतुमाह॥ स्वकर्मेति॥

तदेवहेत्वंतरेण स्फोरयति॥ परार्थेति॥ यः पृथिवीमित्यादिवाक्यस्य तात्पर्यमाह॥ देवतेति॥ तत्रवाक्यमवतार्यव्याचष्टे॥ यईदृशइति॥ यस्य पृथिवीदेव

परार्थकर्तव्यतास्वभावत्वात्परस्ययत्कार्यकरणंचतदेवास्यनस्वतस्तदाहयस्यपृथिवीशरीरमितिदेवताकार्यकरणस्येश्वरसाक्षिमात्र

सांनिध्येनहिनियमेनप्रवृत्तिनिवृत्तीस्यातां यदीदृगीश्वरोनारायणाख्यः पृथिवींपृथिवीदेवतांयमयतिनियमयतिस्वव्यापारेंतरोभ्यंत

योप्सुतिष्ठन्नद्भ्योंतरोयमापोनविदुर्यस्यापः शरीरंयोपोंतरोयमयत्येषतआत्मांतर्याम्यमृतः॥३३॥ योग्नौतिष्ठन्नग्नेरंतरोयम

ग्निर्नवेदयस्याग्निः शरीरंयोग्निमंतरोयमयत्येषतआत्मांतर्याम्यमृतः॥३४॥ योंतरिक्षेतिष्ठन्नंतरिक्षादंतरोयमंतरिक्षंन

वेदयस्यांतरिक्षंशरीरंयोंतरिक्षमंतरोयमयत्येषतआत्मांतर्याम्यमृतः॥३५॥ योवायौतिष्ठन्वायोरंतरोयंवायुर्नवेदयस्यवा

युः शरीरंयोवायुमंतरोयमयत्येषतआत्मांतर्याम्यमृतः॥३६॥ योदिवितिष्ठन्दिवोंतरोयंद्यौर्नवेदयस्यद्यौः शरीरंयोदिवमं

तरोयमयत्येषतआत्मांतर्याम्यमृतः॥३७॥ यआदित्येतिष्ठन्नादित्यादंतरोयमादित्योनवेदयस्यादित्यः शरीरंयआदित्यमंत

रोयमयत्येषतआत्मांतर्याम्यमृतः॥३८॥ योदिक्षुतिष्ठन्दिग्भ्योंतरोयंदिशोनविदुर्यस्यदिशः शरीरंयोदिशोंतरोयमयत्येषत

आत्मांतर्याम्यमृतः॥३९॥ यश्चंद्रतारकेतिष्ठंश्चंद्रतारकादंतरोयंचंद्रतारकंनवेदयस्यचंद्रतारकंशरीरंयश्चंद्रतारकमंतरो

यमयत्येषतआत्मांतर्याम्यमृतः॥४०॥ यआकाशेतिष्ठन्नाकाशादंतरोयमाकाशोनवेदयस्याकाशः शरीरंयआकाशमंतरोयमय

त्येषतआत्मांतर्याम्यमृतः॥४१॥

रक्तिष्ठन्नेषतआत्मातेतवममचसर्वभूतानांचेत्युपलक्षणार्थमेतदंतर्यामीयः त्वयापृष्टोऽमृतः सर्वसंसारधर्मवर्जितइत्येतत्॥३२॥३॥

ताकार्यक

[illegible]

पृथिव्यादिपर्यायेदर्शितन्यायंपर्यायांतरेषतिदिशति॥समानमिति॥सर्वत्रप्राणादेतिष्ठन्नंतर्यामीत्वात्मेतिसंबंधः॥४३॥वाक्यांतरंप्रश्नपूर्वकमुत्थाप्य

समानमन्यद्योप्सुतिष्ठन्नग्नावंतरिक्षेवायौदिव्यादित्येदिक्षुचंद्रतारकेआकाशेयस्तमसिआवरणात्मकेबाह्येतमसितेजसितद्विपरीते

यस्तमसितिष्ठंस्तमसोंतरोयंतमोनवेदयस्यतमःशरीरंयस्तमोंतरोयमयत्येषतआत्मांतर्याम्यमृतः॥४२॥यस्तेजसितिष्ठंस्तेजसोंतरोयंतेजोनवेदयस्यतेजःशरीरंयस्तेजोंतरोयमयत्येषतआत्मांतर्याम्यमृतइत्यधिदैवतमथाधिभूतं॥४३॥यःसर्वेषुभूतेषुतिष्ठन्सर्वेभ्योभूतेभ्योंतरोयंसर्वाणिभूतानिनविदुर्यस्यसर्वाणिभूतानिशरीरंयःसर्वाणिभूतान्यंतरोयमयत्येषतआत्मांतर्याम्यमृतइत्यधिभूतमथाध्यात्मं॥४४॥यःप्राणेतिष्ठन्प्राणादंतरोयंप्राणोनवेदयस्यप्राणःशरीरंयःप्राणमंतरोयमयत्येषतआत्मांतर्याम्यमृतः॥४५॥योवाचितिष्ठन्वाचोंतरोयंवाङ्नवेदयस्यवाक्शरीरंयोवाचमंतरोयमयत्येषतआत्मांतर्याम्यमृतः॥४६॥यश्चक्षुषितिष्ठंश्चक्षुषोंतरोयंचक्षुर्नवेदयस्यचक्षुःशरीरंयश्चक्षुरंतरोयमयत्येषतआत्मांतर्याम्यमृतः॥४७॥यःश्रोत्रेतिष्ठन्श्रोत्रादंतरोयंश्रोत्रंनवेदयस्यश्रोत्रंशरीरंयःश्रोत्रमंतरोयमयत्येषतआत्मांतर्याम्यमृतः॥४८॥योमनसितिष्ठन्मनसोंतरोयंमनोनवेदयस्यमनःशरीरंयोमनोंतरोयमयत्येषतआत्मांतर्याम्यमृतः॥४९॥यस्त्वचितिष्ठंस्त्वचोंतरोयंत्वङ्नवेदयस्यत्वक्शरीरंयस्त्वचमंतरोयमयत्येषतआत्मांतर्याम्यमृतः॥५०॥

प्रकाशसामान्यदृष्ट्येदमधिदैवतमंतर्यामिविषयंदर्शनंदेवतासु

॥४३॥अथाधिभूतंभूतेषुब्रह्मादिस्तंबपर्यंतेषंतर्यामिदर्शनमधिभूत॥४४॥ व्याचष्टे॥कस्मादित्यादिना॥यथामनसितथाबुद्धावपिसन्निधानात्ततते

तत्रेति पूर्वसंदर्भोक्तिः ॥ अन्वयमुपलक्षयितुमतोन्य इत्युक्तं ॥ पदार्थान्व्याकरोति ॥ अत इति ॥ अन्योद्रष्टानास्तीति संबंधः ॥ एषतइत्यादिवा

अथाध्यात्मंयः प्राणेप्राणवायुसहितेघ्राणेयोवाचिचक्षुषिश्रोत्रेमनसित्वचिविज्ञानेबुद्धौ ॥ ५१ ॥ रेतसिप्रजननेकस्मात्पुनः कारणात्पृ
थिव्यादिदेवतामहाभागाः सत्योमनुष्यादिवदात्मनितिष्ठंतमात्मनोनियंतारमंतर्यामिणंनविदुरित्यतआह अदृष्टोनदृष्टोनविषयी
भूतश्चक्षुर्दर्शनस्यकस्यचित्स्वयंतुचक्षुषिसन्निहितत्वाद्दृशिस्वरूपइति द्रष्टातथाऽश्रुतः श्रोत्रगोचरत्वमनापन्नः कस्यचित्स्वयंत्वलुप्त

योविज्ञानेतिष्ठन्विज्ञानादंतरोयंविज्ञानंनवेदयस्यविज्ञानꣳ शरीरंयोविज्ञानमंतरोयमयत्येषतआत्मांतर्याम्यमृतः ॥ ५१ ॥
योरेतसितिष्ठन्रेतसोंतरोयꣳरेतोनवेदयस्यरेतः शरीरंयोरेतोंतरोयमयत्येषतआत्मांतर्याम्यमृतोऽदृष्टोद्रष्टाऽश्रुतः श्रोताऽम
तोमंताविज्ञातोविज्ञातानान्योतोस्तिद्रष्टानान्योतोस्तिश्रोतानान्योतोस्तिमंतानान्योतोस्तिविज्ञातैषतआत्मांतर्याम्यमृतोऽतो
न्यदार्त्तंततोहोद्दालकआरुणिरुपरराम ॥ ५२ ॥ सप्तमंब्राह्मणं ॥ ७ ॥

श्रवणशक्तिः सर्वश्रोत्रेषुसंनिहितत्वाच्छ्रोतातथाअमतोमनः सं
कल्पविषयमनापन्नः दृष्टश्रुतेष्वेवहिसर्वः संकल्पयत्यदृष्टत्वादश्रुतत्वादेवामतोऽलुप्तमननशक्तित्वात्सर्वमनः सुसंनिहितत्वाच्चमंता
तथाऽविज्ञातोनिश्चयगोचरमनापन्नोरूपादिवत्सुखादिवद्वास्वयंत्वलुप्तविज्ञानशक्तित्वात्तत्सन्निधानाच्चविज्ञातातत्रयंपृथिवीनवे
दयंसर्वाणिभूतानिनविदुरितिचान्येनियंतव्याविज्ञातारोन्योनियंतांतर्यामीतिप्राप्तंतदन्यत्वाशंकानिवृत्त्यर्थमुच्यतेनान्योतोनअन्यः अतः
अस्मादंतर्यामिणोनान्योस्तिद्रष्टातथानान्योतोस्तिश्रोतानान्योतोस्तिमंतानान्योतोस्तिविज्ञाता कस्यार्थमाह ॥ ॥ ॥ ॥
तो

यस्मादित्यादिना ॥ २३ ॥ ॥ इत्यंतर्यामिब्राह्मणं सप्तमं ॥ ७ ॥ पूर्वस्मिन्ब्राह्मणे सूत्रांतर्यामिणो प्रश्नप्रयुक्तिभ्यां निर्धारितौ संप्रत्युत्तरब्राह्मणतात्पर्यमाह ॥ अतः परमिति ॥ सोपाधिकवस्तुनिर्धारणानंतर्यमथशब्दार्थः ननु यस्माद्भयाद्गार्गी पूर्वमुपरता तस्य तद्वस्थत्वात्कथं पुनः सा प्रष्टुं प्रवर्तते तत्राह ॥

यस्मात्परो नास्ति द्रष्टा श्रोता मंता विज्ञाता यो ऽदृष्टो द्रष्टा ऽश्रुतः श्रोता ऽमतो मंता ऽविज्ञातो विज्ञाता ऽमृतः सर्वसंसारधर्मवर्जितः सर्वसंसारिणां कर्मफलविभागकर्तैष त आत्मांतर्याम्यमृतो ऽतो ऽस्मादीश्वरादात्मनो ऽन्यदार्तं ततो होद्दालक आरुणिरुपरराम ॥ ५२ ॥ ॥ इति श्रीमद्बृहदारण्यके पंचमप्रपाठके भाष्ये सप्तमं ब्राह्मणं ॥ ७ ॥ अतः परमशनायादिविनिर्मुक्तं निरुपाधिकं साक्षादपरोक्षात्सर्वांतरं ब्रह्म वक्तव्यमित्यत आरंभः ॥ अथ ह वाचक्नव्युवाच पूर्वं याज्ञवल्क्येन निषिद्धा मूर्धपातभयादुपरता सती पुनः प्रष्टुं ब्राह्मणानुज्ञां प्रार्थयते हे ब्राह्म

अथ ह वाचक्नव्युवाच ब्राह्मणा भगवंतो हंताहमिमं द्वौ प्रश्नौ प्रक्ष्यामि तौ चेन्मे वक्ष्यति न वै जातु युष्माकमिमं कश्चिद्ब्रह्मोद्यं जेतेति पृच्छ गार्गीति ॥ ५३ ॥ णा भगवंतः पूजावंतः शृणुत मम वचो हंत अहमिमं याज्ञवल्क्यं पुनर्द्वौ प्रश्नौ प्रक्ष्यामि यद्यनुमतिर्भवतामस्ति तौ प्रश्नौ चेद्यदि वक्ष्यति कथयिष्यति मे कथंचिन्न वै जातु कदाचिद्युष्माकं मध्य इमं याज्ञवल्क्यं कश्चिद्ब्रह्मोद्यं ब्रह्मवादिनं प्रति जेता न वै कश्चिद्भवेदित्येवमुक्ता ब्राह्मणाश्चानुज्ञां प्रददुः पृच्छ गार्गीति लब्धानुज्ञा ह याज्ञवल्क्यं ॥ ५३ ॥ सा होवाचाहं वै त्वा द्वौ प्रश्नौ पृच्छामीत्यनुषज्जते कौ ताविति जिज्ञासायां तयोर्दुरुत्तरत्वं द्योतयितुं दृष्टांतपूर्वकं तावाह ॥ हे याज्ञवल्क्य यथा लोके काश्यः काशिषु भवः प्रसिद्धः शौर्यं काश्ये वैदेहो वा विदेहानां वा राजा उग्रपुत्रः शूरान्वय इत्यर्थः ॥ पूर्वमिति ॥ हंतेत्यस्यार्थमाह ॥ यदीति ॥ न वै जात्विति प्रतीकमादाय व्याचष्टे ॥

संधीयतेसउच्यतइतिशेषः॥प्रश्नयोरवश्यंप्रत्युत्तरणीयत्वेब्रह्मिष्ठत्वांगीकारोहेतुरित्याह॥ब्रह्मविच्चेति॥५४॥सूत्रस्याधारेप्रष्टव्येकिमितिसर्वंजगदन्

उज्यमवतारितज्याकंधनुःपुनरधिज्यमारोपितज्याकंकृत्वाद्वौबाणवंतौवाणशब्देनशराग्रेयोवंशखंडःसंधीयतेतेनविनापिशरोभवती
त्यतोविशिनष्टिबाणवंताविितितौद्वौबाणवंतौशरौतयोरेवविशेषणंसपत्नातिव्याधिनोशत्रोःपीडाकरावतिशयेनहस्तेकृत्वोपोत्तिष्ठे
त्समीपतआत्मानंदर्शयेदेवमेवाहंत्वात्वांशरस्थानीयाभ्यांप्रश्नाभ्यांद्वाभ्यामुपोदस्थामुत्थितवत्यस्मितत्समीपेतौमेब्रूहीतिब्रह्मविच्चे

साहोवाचाहंवैत्वायाज्ञवल्क्ययथाकाश्योवावैदेहोवोग्रपुत्रउज्ज्यंधनुरधिज्यंकृत्वाद्वौबाणवंतौसपत्नातिव्याधिनौहस्तेकृ
त्वोपोत्तिष्ठेदेवमेवाहंत्वाद्वाभ्यांप्रश्नाभ्यामुपोदस्थांतौमेब्रूहीतिपृच्छगार्गीति॥५४॥साहोवाचयदूर्ध्वंयाज्ञवल्क्यदिवोयदवाक्
पृथिव्यायदंतराद्यावापृथिवीइमेयद्भूतंचभवच्चभविष्यच्चेत्याचक्षतेकस्मिंस्तदोतंप्रोतंचेति॥५५॥सहोवाचयदूर्ध्वंगार्गिदि
वोयदवाक्पृथिव्यायदंतराद्यावापृथिवीइमेयद्भूतंचभवच्चभविष्यच्चेत्याचक्षतआकाशेतदोतंचप्रोतंचेति॥५६॥ दाहेतरःपृच्छगार्गी

ति॥५४॥साहोवाचयदूस्त्वूर्ध्वमुपरिदिवोंडकपालाद्यच्चावागधःपृथिव्याअधोंडकपालाद्यच्चांतरामध्येद्यावापृथिवीद्यावापृथिव्योरंडकपाल
योरिमेचद्यावापृथिवीयद्भूतंयच्चातीतंभवच्चवर्तमानंस्वव्यापारस्थंभविष्यच्चवर्तमानादूर्ध्वकालभाविलिंगगम्यंयत्सर्वमेतदाचक्षतेकथ
यंत्यागमतस्तत्सर्वंद्वैतजातंयस्मिन्नेकीभवतीत्यर्थः॥तत्सूत्रसंज्ञंपूर्वोक्तंकस्मिन्नोतंचपृथिवीधातुरिवाप्सु॥५५॥सहोवाचेतरोहेगार्गियत्व
योक्तमूर्ध्वंदिवइत्यादितत्सर्वंयत्सूत्रमाचक्षतेतत्सूत्रमाकाशेतदोतंचप्रोतंच यतेतत्राह॥तत्सर्वमिति॥पूर्वोक्तंसर्वंजगदात्मकमितियावत्॥५५

णोपाकृतवानसि२

यज्जगत् अव्याकृतं सूत्रात्मकमेतद्व्याकृताकाशे वर्तत इति संबंधः॥ त्रिष्वपि कालेष्विति यदुक्तं तद्व्यनक्ति॥ उत्पत्ताविति॥ ५६॥ वक्ष्यमाणं वाक्य

पदेन व्याकृतं सूत्रात्मकं जगदव्याकृताकाशे ऽव्विव पृथिवी धातुस्त्रिष्वपि कालेषु वर्तते उत्पत्तौ स्थितौ लये च॥ ५६॥ पुनः साहोवाच नमस्तेऽस्त्वित्यादि प्रश्नस्य दुर्वचत्वप्रदर्शनार्थं यो मे ममैतं प्रश्नं व्यवोचो विशेषेणोक्तवानसि एतद्दस्य दुर्वचत्वे कारणं सूत्रमेव तावदग म्यमितरैर्दुर्वाच्यं किमुत तद्यस्मिन्नोतं च प्रोतं चेत्यतो नमोऽस्तु ते तुभ्यमपरस्मै द्वितीयाय प्रश्नाय धारयस्व दृढीकुर्वात्मानमित्यर्थः॥ पृच्छ गार्गी

साहोवाच नमस्तेऽस्तु याज्ञवल्क्य यो म एतं व्यवोचोऽपरस्मै धारयस्वेति पृच्छ गार्गीति॥ ५७॥ साहोवाच यदूर्ध्वं याज्ञवल्क्य दिवो यद वाक्पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते कस्मिंस्तदोतं च प्रोतं चेति॥ ५८॥ स होवाच यदूर्ध्वं गार्गि दिवो यदवाक्पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षत आकाश एव तदोतं च प्रोतं चेति कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति॥ ५९॥

तीतर आह॥ ५७॥ व्याख्यातमन्यत्साहोवाच यदूर्ध्वं याज्ञवल्क्येत्यादिप्रश्नः प्रतिवचनं चोक्तस्यै वार्थस्यावधारणार्थं पुनरुच्यते न किंचिदपूर्वमर्थांतरमुच्यते सर्वं यथोक्तं गार्ग्या प्रत्युच्चार्यतमेव पूर्वोक्तमर्थमवधारितवानाकाश एवेति याज्ञवल्क्यः गार्ग्याह कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति आकाशमेव तावत्कालत्रयातीतत्वाद्दुर्वाच्यं ततोऽपि कष्टतरमक्षरं यस्मिन्ना काशमोतं च प्रोतं चातोऽवाच्यमिति कृत्वा न प्रतिपद्यते साऽप्रतिपत्तिर्नाम निग्रहस्थानं तार्किकसमये मन्यदित्युच्यते॥ तदेव प्रश्नप्रतिवचनरूप मनुवदति॥ साहेति॥ ५८॥ पुनरुक्तेरकिंचित्करत्वं व्यावर्तयति॥ उक्तस्यैवेति॥ प्रतिवचनानुवादतात्पर्यमाह॥ गार्ग्येति॥ प्रश्नाभिप्रायं प्रकटयति॥ आकाशं

अप्रतिपत्तिर्विप्रतिपत्तिश्चेत्तिदोषद्वयं सामान्येनोक्तं विशेषतो ज्ञातुं पृच्छति॥ किं तदिति॥ अस्थूलादिवाक्यमवतार्य व्याकरोति॥ एवमित्यादिना॥ य

ऽथावाच्यमपि वदति तथापि विप्रतिपत्तिर्नाम निग्रहस्थानं विरुद्धा प्रतिपत्तिर्हि सा पदवाच्यस्य वदनमतो दुर्वचनं प्रश्नं मन्यते गार्गीति
दोषद्वयमपि परिजिहीर्षन्नाह॥ ५८॥ स होवाच याज्ञवल्क्यः एतद्वै तद्यत्पृष्टवत्यसि कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति किं तदक्षरं य
न्न क्षीयते न क्षरतीति वाक्षरं तदक्षरं हे गार्गि ब्राह्मणा ब्रह्मविदो ऽभिवदंति ब्राह्मणाभिवदनकथनेन नाहमवाच्यं वक्ष्यामि न च प्रतिपद्ये य
मित्येवं दोषद्वयं परिहरत्येवमपाकृते प्रश्ने पुनर्गार्ग्याः प्रतिवचनं द्रष्टव्यं ब्रूहि किं तदक्षरं यद्ब्राह्मणा अभिवदंति इत्युक्त आह अस्थूलं तत्स्थू
लादन्यदेवं तर्हि अणु अनणु अस्तु तर्हि ह्रस्वमह्रस्वमेवं तर्हि दीर्घमदीर्घमेतैश्चतुर्भिः परिमाणप्रतिषेधैर्द्रव्यधर्मः प्रतिषिद्धो न द्रव्यं तदक्ष

स होवाचैतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदंत्यस्थूलमनण्वह्रस्वमदीर्घ

रमित्यर्थः॥ अस्तु तर्हि लोहितो गुणस्ततो ऽप्यन्यदलोहितं आग्नेयो गुणो लोहितो भवतु तर्ह्यपां स्नेहनं न अस्नेहमस्तु तर्हि छाया सर्वथाप्य
निर्देश्यत्वाच्छायाया अप्यन्यदच्छायमस्तु तर्हि तमोऽतमो भवतु वायुस्तर्ह्यवायुर्भवेत्तर्ह्याकाशमनाकाशं भवतु तर्हि संगात्मकं
जतुवदसंगं रसोऽस्तु तर्ह्यरसं तथागंधमस्त्वगंधमस्तु तर्हि चक्षुष्कं न हि चक्षुरस्य करणं विद्यतेऽतो ऽचक्षुष्कं पश्यत्यचक्षुरिति मंत्रव
र्णात्तथाऽश्रोत्रं स शृणोत्यकर्ण इति भवतु तर्हि वाग्वाक्तथाऽमनस्तथाऽतेजस्कमविद्यमानं तेजोऽस्य तदतेजस्कं न हि तेजोऽग्न्यादिप्रका
शवदस्य विद्यते अप्राणं आध्यात्मिको वायुः प्रतिषिध्यते

दग्नेरोहितं रूपमित्यादिश्रुतिमाश्रित्याह॥ आग्नेय इति॥ अवायुविशेषणेनाप्राणवि

आमात्रमितिमानमेयान्वयोनिराक्रियते॥ तस्ये स्यात्मोक्तिः॥ संपिंडितमर्थमाह॥ सर्वेति॥ तदुपपादमति॥ एकमिति॥ ६॥ ८॥ अथयथोक्त
यारीत्याश्रुत्यैवास्यास्तित्वेज्ञापितेवक्तव्याभावादुत्तरोग्रंथोवृथेतितत्राह॥ अनेकेति॥ यदस्तितत्तविशेषणमेवेतिलौकिकीबुद्धिराशंक्यते
नास्त्यक्षरं निर्विशेषणमितिशेषः॥ अंतर्यामिणिजगत्कारणेपरस्मिन्ननुमानसिद्धेविवक्षितंनिरुपाध्यक्षरंसेत्स्यति॥ जगत्कारणत्वसोपलक्ष

ऽप्राणमितिमुखंतर्हिद्वारंतद्मुखंअमात्रंमीयतेयेनतन्मात्रंअमात्रंमात्रारूपंतन्नभवतिनतेनकिंचिन्मीयतेअस्तुतर्हिछिद्रवदं
तरवदनंतरंनास्यांतरमस्तिसंभवेत्तर्हिबहिस्तस्याबाह्यमस्तुतर्हिभक्षयितृतन्नतदश्नातिकिंचनभवेत्तर्हिभक्ष्यंकस्यचिन्नतदश्ना
तिकश्चनसर्वविशेषणरहितमित्यर्थः॥ एकमेवाद्वितीयंहितत्केनकिंविशिष्यते॥ ६॥ ८॥ अनेकविशेषणप्रतिषेधप्रयासाद्स्तित्वं

मलोहितमस्नेहमच्छायमतमोवाय्वनाकाशमसंगमरसमगंधमचक्षुष्कमश्रोत्रमवागमनोतेजस्कमप्राणममुखममात्र
मनंतरमबाह्यंनतदश्नातिकिंचननतदश्नातिकश्चन॥ ६॥ तावदक्षरस्योपगमितंश्रुत्यातथापिलोकबुद्धिमपेक्ष्याशंक्यते
यतोऽतोस्तित्वायानुमानंप्रमाणमुपन्यस्यस्येतस्यवाअक्षरस्यपदेतद्धिगतमक्षरंसर्वांतरंसाक्षादपरोक्षाद्ब्रह्मयआत्माशनायादिध
र्मातीतःएतस्यवैअक्षरस्यप्रशासनेयथाराज्ञःप्रशासनेराज्यमस्फुटितंनियतंवर्ततेएवमेतस्यअक्षरस्यप्रशासनेहेगार्गिसूर्याचंद्रमसौ

णतयाजन्मादिसूत्रेस्थितत्वादुपलक्षणद्वाराब्रह्मणिस्वरूपलक्षणप्रवृत्तेरंतर्यामिण्यनुमानंप्रकृतोपयुक्तमितिभावः अनुमानश्रुत्यक्षराणिव्याकरोति
॥ यदेतदिति॥ प्रशासनेसूर्याचंद्रमसौविधृतौस्यातामितिसंबंधः॥ उक्तमर्थंदृष्टांतेनस्फोरयति॥ यथेति॥ अत्रापिपूर्ववदन्वयःजगत्व्यवस्थाप्रशासि

सूर्याचंद्रमसाविस्यादेर्विवक्षितमनुमानमाह॥ सूर्यश्चेत्यादिना॥ तादर्थ्येन लोकप्रकाशार्थत्वेन प्रशासित्रा निर्मितावितिसंबंधः॥ निर्मातु
र्विशिष्टविज्ञानवत्त्वमाचष्टे॥ तन्निर्वर्त्यमानेति॥ सूर्याचंद्रमसौ तच्छब्दवाच्यौ॥ विमतौ विशिष्टविज्ञानवता निर्मितौ प्रकाशत्वात्प्रदीपवदित्य
र्थः॥ विमतौ नियंतृपूर्वकौ विशिष्टचेष्टावत्त्वाद्भृत्यादिवदित्यभिप्रेत्याह॥ विधृतावितिं॥ प्रकाशोपकारकत्वं तज्जनकत्वं॥ निर्मातुर्विशिष्टविज्ञाने संभा
वनार्थं साधारणेति विशेषणं॥ साधारणः सर्वेषां प्राणिनां यः प्रकाशस्तस्य जनकत्वादितियावत्॥ दृष्टांते लौकिकविशेषणं प्रासादादिविशिष्टदेशनिविष्ट

सूर्यश्च चंद्रमाश्च सूर्याचंद्रमसौ अहोरात्रयोर्लोकप्रदीपौ तादर्थ्येन प्रशासित्रा तन्निर्वर्त्यमानलोकप्रयोजनविज्ञानवता निर्मितौ विधृतौ
च स्यातां साधारणसर्वप्राणिप्रकाशोपकारकत्वाल्लौकिकप्रदीपवत्॥ तस्मादस्ति तद्येन विधृतावीश्वरौ सन्तं त्रौ संतौ निर्मितौ तिष्ठतः नियं

एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचंद्रमसौ विधृतौ तिष्ठत॥

तद्देशकालनिमित्तोदयास्तमयवृद्धिक्षयाभ्यां वर्तेते तदस्यैवमेतयोः प्रशासितृ अक्षरं प्रदीपकर्तृ विधारयितृ वदेतस्य वा अक्षरस्य प्रशा
सने गार्गि द्यावापृथिव्यौ द्यौश्च पृथिवी च सावयवत्वात्स्फुटनस्वभावे अपि सत्यौ गुरुत्वात्पतनस्वभावे संयुक्तत्वाद्वियोगस्वभावे चेतनावदभिमा
निदेवताधिष्ठितत्वात्स्वतंत्रे अप्येतस्याक्षरस्य प्रशासने वर्तेते विधृते तिष्ठत त्वसिध्यर्थं॥ अनुमानफलमुपसंहरति॥ तस्मादिति॥ विशिष्टचेष्टावत्त्वा
दिमुपदिष्टं हेतुं स्पष्टयति॥ नियतेति॥ नियतौ देशकालौ नियतं च निमित्तं प्राण्यदृष्टं तद्वंतौ सूर्याचंद्रमसावुद्यंतावस्तं यंतौ च येन विधृतावुदयास्तम
याभ्यां वृद्धिक्षयाभ्यां च वर्तेते॥ उदयश्चास्तमयश्चोदयास्तमयं॥ वृद्धिश्च क्षयश्च वृद्धिक्षयमिति द्वंद्वं गृहीत्वा द्विवचनं॥ एवं कर्तृत्वेन विधायितृत्वेन चे

विमते प्रयत्नवताधृते सावयवत्वे सत्यस्फुटितत्वाद्गुरुत्वे सत्यपातित्वात्संयुक्तत्वे सत्यस्वतंत्रत्वाच्च हस्तन्यस्तपाषाणादिवदिति द्वितीयपर्यायस्य तात्पर्यमाह॥ सावयवत्वादिना॥ किमित्येतस्य प्रशासने द्यावापृथिव्यौ वर्तेते तत्राह॥ एतद्धीति॥ पृथिव्यादिव्यवस्थानियंतारं विनानुपपन्ना तत्कल्पिके त्यर्थः॥ तथापि किमित्येतेन विधृते द्यावापृथिव्याविति तत्राह॥ सर्वमर्यादेति॥ एष सेतुर्विधरण इति श्रुत्यंतरमाश्रित्य फलितमाह॥ अतोनास्येति॥ द्वितीयपर्यायार्थमुपसंहरति॥ तस्मादिति॥ तच्छब्दोपात्तमर्थं स्फोरयति॥ अव्यभिचारीति॥ अव्यभिचारित्वं प्रकटयति॥ चेतनावंतमिति पृथिव्यादे

एतद्ध्यक्षरं सर्वव्यवस्थासेतुः सर्वमर्यादाविधरणं अतो नास्याक्षरस्य प्रशासनं द्यावापृथिव्यौ अतिक्रामतस्तस्मात्सिद्धमस्यास्तित्वमक्षरस्य अव्यभिचारि हि तल्लिंगं यत् द्यावापृथिव्यौ नियते वर्त्तेते चेतनावंतं प्रशासितारमसंसारिणमंतरेण नैतद्युक्तं॥ येन द्यौरुग्रा पृथिवी च दृ

एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठत ॥

ढेति च मंत्रवर्णात् एतस्य वा अक्षरस्य निमेषा मुहूर्त्ता इत्येते कालावयवाः सर्वस्यातीतानागतवर्त्तमानस्य जनिमतः कलयितारो यथा लोके प्रभुणा नियतो गणकः सर्वमायं व्ययं चाप्रमत्तो गणयति तथा प्रभुस्थानीय एषां कालावयवानां नियंता

नियंतृत्वमेतच्छब्दार्थः॥ नियंतृसिद्धावपि कथमीश्वरस्य सिद्धिरित्याशंक्याह॥ येनेति॥ उग्रत्वं पृथिव्यादेश्चेतनावदभिमानिदेवतावत्त्वेन स्वातंत्र्यं॥ येन स्वः स्तभितं येन नाकः॥ यो अंतरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेमेत्यत्र हिरण्यगर्भाधिष्ठाता ईश्वरः पृथिव्यादेर्नियंतोच्यते॥ न हि हिरण्यगर्भमात्रस्यास्मिन्प्रकरणे पूर्वापरग्रंथयोरुच्यमानं निरंकुशं सर्वनियंतृत्वं संभवतीति भावः॥ एते कालावयवा विधृतास्तिष्ठंतीति संबंधः॥ तत्रानुमानं वक्तुं हेतुमाह॥ सर्वस्ये

दार्ष्टांतिकंदर्शयन्ननुमानमाह॥तथेति॥निमेषाद्यो नियंतृपूर्वकाःकलयितृत्वात्त्वंप्रतिप्रपन्नवदित्यर्थः॥कास्तानद्यइत्यपेक्षायामाह॥गंगाद्याइति
॥अन्यथाप्रवर्त्तितुमुत्सहमानत्वेतत्तद्देवतानांचेतनत्वेनस्वातंत्र्यं॥विमतानियंतृपूर्विकानियतप्रवृत्तित्वाद्रथादिप्रवृत्तिवदितिचतुर्थपर्यायार्थः
॥नियतप्रवृत्तिमत्त्वंतद्देतदित्युच्यते॥तच्चेत्यव्यभिचारितोक्तिः॥विमतंविशिष्टज्ञानवद्दातृकंकर्मफलत्वात्सेवाफलवदित्यभिप्रेत्यपंचमंपर्यायमुत्था

तथाप्राच्यःप्रागंचनाःपूर्वदिग्गमनानद्यःस्यंदंतेस्रवंतिश्वेतेभ्योहिमवदादिभ्यःपर्वतेभ्योगिरिभ्यःगंगाद्यानद्यःताश्चयथाप्रवर्तिता
एवनियताःप्रवर्तंतेनान्यथापिप्रवर्तितुमुत्सहंतेत्यस्तदेतल्लिंगंप्रशास्तुःप्रतीच्योन्याःप्रतीचींदिशमंचंतिसिंध्वाद्यानद्यःअन्याश्चयां

एतस्यवाअक्षरस्यप्रशासनेगार्गिनिमेषामुहूर्ताअहोरात्राण्यर्द्धमासामासाऋतवःसंवत्सराइतिविधृतास्तिष्ठंत्येतस्यवा
अक्षरस्यप्रशासनेगार्गिप्राच्योन्यानद्यःस्यंदंतेश्वेतेभ्यःपर्वतेभ्यःप्रतीच्योन्यायांयांचदिशमन्वेतस्यवाअक्षरस्यप्रशासनेगा
र्गिददतोमनुष्याःप्रशंसंति॥

यांदिशमनुप्रवृत्तास्तांतांनव्यभिचरंतितच्चलिंगंएतस्यवाअक्षरस्यकिंचददतोहिरण्यादीन्स्वप
कृतःस्वात्मपीडांकुर्वतोपिप्रमाणज्ञाअपिमनुष्याःप्रशंसंतितत्रयच्चदीयतेयेचददतिप्रतिगृह्णंतितेषामिहैवसमागमोविलयश्चान्व
क्षोदृश्यतेअदृष्टस्तुपरःसमागमः॥तथापिमनुष्याःददतांदानफलेनसंयोगंपश्यंतः पयति॥किंचेति॥दाताप्रतिगृहीतादानंदेयंफलंदास
तिकिमीश्वरेणेत्याशंक्याह॥तत्रेति॥दात्रादीनामिहैवप्रत्यक्षोनाशोदृश्यतेतेनतत्प्रयुक्तोऽदृष्टःपुरुषार्थोनकश्चिदस्तीत्यर्थः॥अदृष्टंपुरुषार्थंप्रत्याह॥अ
दृष्टस्त्विति॥समागमःफलप्रतिलंभःसखल्वैहिकोनभवतिकिंतुपारलौकिकस्तथाचनासाविहैवनष्टदात्रादिप्रयुक्तःसंभवतीत्यर्थः॥तर्हिफलदातुरभा

वात्स्वार्थभ्रंशोहिमूर्खतेतिन्यायाद्दातृप्रशंसैवमाभूदित्याशंक्याह॥तथापीति॥

फलसंयोगदर्शी हेतुमाह॥ प्रमाणज्ञतयेति॥ हिरण्यदा अमृतत्वं भजंत इत्यादि प्रमाणं॥ तथापि कथमीश्वरसिद्धिस्तत्राह॥ कर्तुरिति॥ तद्विदा
त् प्रशंसनं विशिष्टे नियंतरि असत्यनुपपन्नं तत्कल्पकमित्यर्थः॥ दानक्रियावशादेव तत्फलसिद्धौ कृतं नियंत्रेति चेन्नेत्याह॥ दानेति॥ कर्मणः
क्षणिकत्वात्फलस्य च कालांतरभावित्वान्न साधनत्वोपपत्तिरित्यर्थः॥ अनुमानार्थापत्तिभ्यां सिद्धमर्थमुपसंहरति॥ तस्मादिति॥ अपूर्वस्यैव फलदा
तृत्वात्कृतमीश्वरेणेति शंकते॥ अपूर्वमिति चेदिति॥ स्वयमचेतनं चेतनानधिष्ठितं वाऽपूर्वं फलदातृ न कल्प्यमप्रामाणिकत्वादिति परिहरति॥ नेति॥
ईश्वरद्वेषी शंकते॥ प्रशास्तुरिति॥ सद्भावे प्रमाणानुपपत्तिरिति शेषः॥ परिहरति॥ नागमेति॥ कथं कार्यपरस्यागमस्य वस्तुपरत्वमित्याशंक्याह॥ अ

प्रमाणज्ञतया प्रशंसंति तत्र तत्र कर्मफलेन संयोजयितरि कर्तुः कर्मफलविभागज्ञे प्रशास्तर्यसति न स्याद्दानक्रियायाः प्रत्यक्षवि
नाशित्वात्तस्मादस्ति दानकर्तॄणां फलेन संयोजयिता अपूर्वमिति चेन्न तत्सद्भावे प्रमाणानुपपत्तेः॥ प्रशास्तुरपीति चेन्नागमतात्प
र्यसिद्धत्वादवोचाम ह्यागमस्य वस्तुपरत्वं किं चान्यत् अपूर्वकल्पनायां चार्थापत्तेः क्षयोऽन्यथैवोपपत्तेः सेवाफलस्य सेव्यात्प्राप्तिद
र्शनात्सेवायाश्च क्रियात्वात्तत्सामान्याच्च यागदानहोमादीनां सेव्यादीश्वरादेः फलप्राप्तिरुपपद्यते॥

वोचामेति॥ कर्मविधिर्हि फलदा
त्रतिरेकेणानोपपद्यते॥ नच कर्माशुतरविनाशिकालांतरभाविफलानुकूलं॥ तदर्थापत्तिसिद्धेऽपूर्वे कथं मानासिद्धिरित्याशंक्याह॥ किंचे
ति॥ न केवलं सद्भावे प्रमाणासत्वमेवापूर्वे दूषणं किंत्वन्यच्च किंचिदस्तीति यावत्॥ तदेव प्रकटयति॥ अपूर्वेति॥ अपूर्वस्य कल्पनायां यार्था
पत्तिः शंक्यते तस्याः कल्पितमपूर्वमंतरेणाप्युपपत्तेः क्षयः स्यादिति योजना॥ अन्यथाप्युपपत्तिं विवृणोति॥ सेवेति॥ यागादिफलमपीश्वरात्सं
भवतीति शेषः॥ कथमीश्वराधीना यागादिफलप्राप्तिस्तत्राह॥ सेवायाश्चेति॥ आदिपदेनेंद्रादिदेवता गृह्यंते॥ विमता विशिष्टज्ञानवतो दीयमानफ

इतश्चापूर्वकल्पनानयुक्तेत्याह॥ दृष्टेति॥ दृष्टं सेवायाधर्मत्वेनसामर्थ्यंसेव्यात्फलप्रापकत्वंतदनुसत्यदानादौफलप्राप्तिसंभवेतन्निरासेनापूर्व
तत्कल्पनानन्याय्यादृष्टानुसारिण्याकल्पनायांतद्विरोधिकल्पनायोगादित्यर्थः॥ अपूर्वस्यफलहेतुत्वेदोषांतरमाह॥ कल्पनेति॥ तदाधिक्यंव
क्तुंपरामृशति॥ ईश्वरइति॥ नापूर्वकल्प्यंक्लृप्तत्वात्तत्रकल्पनाधिक्यमित्याशंक्याह॥ तत्रेति॥ व्यवहारभूमिः सप्तम्यर्थः॥ भूमिकांकृत्वाकल्पनाधि

दृष्टक्रियाधर्मसामर्थ्यमपरित्यज्यैवफलप्राप्तिकल्पनोपपत्तौदृष्टक्रियाधर्मसामर्थ्यपरित्यागोनन्याय्यः कल्पनाधिक्याच्चईश्वरःक
ल्प्यःपूर्वत्वात्तत्क्रियायाश्चस्वभावःसेव्यात्फलप्राप्तिर्दृष्टानत्वपूर्वान्नचापूर्वंदृष्टंतत्रापूर्वमदृष्टंकल्पयितव्यंतस्यचफलदातृत्वेसाम
र्थ्यंसामर्थ्येचसतिदानंचाभ्यधिकमितिइहत्वीश्वरस्यसेव्यस्यसद्भावमात्रंकल्प्यंनतुफलदानसामर्थ्यंदातृत्वंचसेव्यात्फलप्राप्तिदर्श

यजमानंदेवाद्वीपितरोन्वायत्ताः॥६२॥

नादनुमानंचदर्शितंद्यावापृथिव्यौविधृतेतिष्ठतइत्यादितथाचयजमानंदेवाईश्वराःसंतोजीवनार्थेनुगताश्चरुपुरोडाशाद्युप
जीवनप्रयोजनेनान्यथापिजीवितुमुत्सहंतःकृपणांहीनांवृत्तिमाश्रित्यस्थितास्तच्चप्रशास्तुःप्रशासनात्स्यात्तथापितरः॥ कंस्फुटय
ति॥ तत्रेत्यादिना॥ अपूर्वस्यादृष्टत्वेसतीतियावत्॥ इतिकल्पनाधिक्यमितिशेषः नन्वन्यत्रापितुल्याकल्पनेत्याशंक्याह॥ इहत्विति॥ स्वपक्षे
धर्मिमात्रंकल्प्यंपरपक्षेधर्मिधर्मश्चेत्याधिक्यंतस्मात्फलमतउपपत्तेरितिन्यायेनपरस्यैवफलदातृतेतिभावः॥ धर्मिणोपिप्रामाणिकत्वंनकल्प्य
त्वमित्यभिप्रेत्याह॥ अनुमानंचेति॥ ईश्वरास्तित्वेहेत्वंतरमाह॥ तथाचेति॥ देवायजमानमन्वायत्ताइतिसंबंधः॥ जीवनार्थेजीवननिमित्तीकृत्येतियावत्दे

चानीकप्रमाणाभिष्टत्वेसमक्ष्यत्वात्
दीतव्यमितिकल्पनंप्रतिष्ठितमर्थः॥

योनकस्यचित्स्वकृतित्वेनविकृतित्वेनवावर्त्ततेसदर्विहोमः॥६१॥ईश्वरास्तित्वेहेत्वंतरमाह॥इतश्चेति॥मोक्षहेतुज्ञानविषयत्वेनापितदस्ति
त्याह॥भवितव्यमिति॥यदज्ञानात्प्रवृत्तिर्यातत्ज्ञानात्सानिवर्त्ततइतिन्यायः॥कर्त्तवशादेवमोक्षसिद्धेस्तद्धेतुज्ञानविषयत्वेनाक्षरंनाभ्युपे

पितरोपितदर्थदर्वीदर्विहोममन्वायत्ताअनुगताइत्यर्थः॥समानंसर्वमन्यत्॥६१॥९॥ईतश्चास्तितदक्षरंयस्मात्तदज्ञानेनियतासं
सारोपपत्तिर्भवितव्यंतुतेनयद्विज्ञानात्तद्विच्छेदोन्यायोपपत्तेर्नतुक्रियातएवतद्विच्छित्तिःस्यादितिचेन्नयोवाएतदक्षरंहेगार्ग्यविदि
ताःविज्ञायास्मिन्लोकेजुहोतियजतेतपस्तप्यतेयद्यपिबहूनिवर्षसहस्राण्यंतवदेवास्यतत्फलंभवतितत्फलोपभोगांतेक्षीयंतएवा

योवाएतदक्षरंगार्ग्यविदित्वास्मिंल्लोकेजुहोतियजतेतपस्तप्यतेबहूनिवर्षसहस्राण्यंतवदेवास्यतद्भवतियोवाएतदक्षरंगा
र्ग्यविदित्वास्माल्लोकात्प्रैतिसकृपणोथयएतदक्षरंगार्गिविदित्वास्माल्लोकात्प्रैतिसब्राह्मणः॥६२॥

स्यकर्माणिअपिचयद्विज्ञाना
त्कार्पण्यास्ययःसंसारविच्छेदोयद्विज्ञानाभावाच्चकर्मकृत्कृपणःकृतफलस्यैवोपभोक्ताजननमरणप्रबंधारूढःसंसरतितदस्यस
रंप्रशासितृतदेतदुच्यतेयोवाएतदक्षरंगार्ग्यविदित्वास्माल्लोकात्प्रैतिसकृपणःपणक्रीतइवदासादिःअथयएतदक्षरंगार्गिविदित्वास्मा
ल्लोकात्प्रैतिसब्राह्मणः॥६२॥ यमितिशंकते॥नन्विति॥उत्तरवाक्येनोत्तरमाह॥नेत्यादियस्याज्ञानात्सकृदनुष्ठितानिविशिष्टफलान्यपि
सर्वाणिकर्माणिसंसारमेवफलयंतितद्ज्ञातमक्षरंनास्तीत्ययुक्तंसंसाराभावप्रसंगादितिभावः॥अक्षरास्तित्वेहेत्वंतरमाह॥अपिचेति॥पू
र्ववाक्यंजीवदवस्यपुरुषविषयमिदंतुपरलोकविषयमितिविशेषंमत्वोत्तरवाक्यमवतार्यव्याचष्टे॥तदेतदित्यादिना ॥ ६२ ॥ ॥ ॥

प्रधानवादिनः शंकामनूद्योत्तरवाक्येननिराकरोति॥ अग्नेरित्यादिना॥ इतश्चाक्षरस्यनाचेतनत्वमित्याह॥ किंचेति॥ नास्तीत्यन्वयप्रदर्शनं अतोऽन्य
दितिविशेषणसिद्धमर्थमाह॥ एतदिति॥ अन्यद्वा पूर्वोक्तमव्याकृतादि पृथिव्यंतं निगमनवाक्यमुदाहृत्य तस्य तात्पर्यमाह॥ एतस्मिन्निति परा का

अग्नेर्दहनप्रकाशकत्ववत्स्वाभाविकमस्य प्रशास्तृत्वमचेतनस्यैवेत्यत आह तद्वा एतदक्षरं गार्ग्यदृष्टं न केनचित् दृष्टमविषयत्वात् स्व
यं तु द्रष्टृ दृष्टिस्वरूपत्वात् तथाऽश्रुतं श्रोत्राद्यविषयत्वात् स्वयं श्रोतृ श्रुतिस्वरूपत्वात् तथाऽमतं मनसोऽविषयत्वात् स्वयं मंतृ मतिस्व
रूपत्वात् तथाऽविज्ञातं बुद्धेरविषयत्वात् स्वयं विज्ञातृ विज्ञानस्वरूपत्वात्॥ किंच॥ न॥ अन्यदतोऽस्मादक्षरादस्ति नास्ति किंचित् द्र

तद्वा एतदक्षरं गार्ग्यदृष्टं द्रष्टृ श्रुतं श्रोत्रमतं मंत्रविज्ञातं विज्ञातृ नान्यदतोऽस्ति द्रष्टृ नान्यदतोऽस्ति श्रोतृ नान्यदतोऽस्ति
मंतृ नान्यदतोऽस्ति विज्ञात्रेतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेति॥ ६३॥ ष्टृ दर्शनक्रियाकर्तृ एतदेवाक्षरं दर्शनक्रि
याकर्तृ सर्वत्र तथा नान्यदतोऽस्ति श्रोतृ तदेवाक्षरं श्रोतृ सर्वत्र नान्यदतोऽस्ति मंतृ तदेवाक्षरं मंतृ सर्वत्र सर्वमनोद्वारेण नान्यदतो
ऽस्ति विज्ञातृ विज्ञानक्रियाकर्तृ तदेवाक्षरं सर्वबुद्धिद्वारेण विज्ञानक्रियाकर्तृ नाचेतनं प्रधानमन्यद्वा एतस्मिन्नु खल्वक्षरे गार्ग्याका
श ओतश्च प्रोतश्चेति यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वांतरोऽशनायादिसंसारधर्मातीतो यस्मिन्नाकाश ओतश्च प्रोतश्चैषा परा काष्ठै
षा परा गतिरेतत्परं ब्रह्मैतत्पृथिव्यादेराकाशांतस्य सत्यस्य सत्यं॥ ६३॥ ष्ठा परं पर्यवसानं नास्मादुपरिष्टादधिष्ठानं किंचिदस्तीत्यर्थः॥ तस्यैव परम
पुरुषार्थत्वमाह॥ एषेति॥ पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरिति हि श्रुत्यंतरं॥ ब्रह्मास्मादक्षरादन्यदस्तीति चेन्नेत्याह॥ एतदिति॥ ननु चतुर्थे

सत्यस्य सत्यं ब्रह्म व्याख्यातमक्षरं तु नैवमिति चेत्तत्राह॥ एतत्पृथिव्यादेरिति॥ ६३॥ ११॥

किंतद्वचनंतदाह॥तदेवेति॥बहुमानविषयभूतंवस्तुष्टच्छति॥किंतदिति॥यदादौमदीयंवचनंतदेवबहुमानयोग्यमित्याह॥यदिति॥तद्व्याकरोति॥अस्मादिति॥नमस्कारंकृत्वास्मादनुज्ञांप्राप्येतिशेषः॥तदेवेति॥प्राथमिकवचनोक्तिः॥किमितित्वदीयंपूर्ववचोबहुमन्यामहेजेतुंपुनरिममाशास्महेनेत्याह॥जयस्त्विति॥तत्रप्रश्नपूर्वकंपूर्वोक्तमेवबहुमानविषयभूतंवाक्यमवतार्यव्याचष्टे॥कस्मादित्यादिना॥पराजितायागार्ग्यावचोनो

साहोवाचहेब्राह्मणाभगवंतः शृणुतमदीयंवचस्तदेवबहुमन्येध्वंमन्यध्वंकिंतद्यदस्माद्याज्ञवल्क्यान्नमस्कारेणमुच्येध्वमस्मैनमस्कारंकृत्वातदेवबहुमन्यध्वमित्यर्थः॥जयस्त्वस्यमनसापिनाशंकनीयः॥किमुतकार्यंतः कस्मान्नवैयुष्माकंमध्येजातुकदाचिदपीमंयाज्ञ

साहोवाचब्राह्मणाभगवंतस्तदेवबहुमन्येध्वंयदस्मान्नमस्कारेणमुच्येध्वंनवैजातुयुष्माकमिमंकश्चिद्ब्रह्मोद्यंजेतेतितितोहवाचक्नव्युपरराम॥६४॥अष्टमंब्राह्मणं॥८॥

वल्क्यंब्रह्मोद्यंप्रतिजेताप्रश्नोचेन्मह्यंवक्ष्यतिनवैजेताभवितेतिपूर्वमेवमयाप्रतिज्ञातंअद्यापिममायमेवनिश्चयोब्रह्मोद्यंप्रत्येतत्तुल्योनकश्चिद्विद्यतइतिततोहवाचक्नव्युपरराम॥अत्रांतर्यामिब्राह्मणएतदुक्तंयंपृथिवीनवेदयंसर्वाणिभूतानिनविदुरितिचयमंतर्यामिणंनविदुर्येचनविदुर्यच्चतदक्षरंदर्शनादिक्रियाकर्तृत्वेनसर्वेषांचेतनाधातु

पादेयमित्याशंक्याह॥प्रश्नोचेदिति॥ततश्चप्रश्ननिर्णयाद्याज्ञवल्क्यस्याप्रकंप्यत्वंप्रतिपाद्यब्राह्मणान्प्रतिहितंचोक्तमित्यर्थः॥अंतर्यामीसेत्रज्ञोक्षरमित्येतेषामवांतरविशेषप्रदर्शनार्थंप्रकृतत्वंदर्शयति॥अंतर्यामीति॥तत्रांतर्यामिणःप्रकृतत्वंप्रकटयति॥यमिति॥क्षेत्रज्ञस्यप्रकृतत्वंस्फुटयति॥येचेति॥अक्षरस्यप्रस्तुतत्वंप्रत्यापयति॥यच्चेति॥सर्वेषांविषयाणांदर्शनश्रवणादिक्रियाकर्तृत्वेनचेतनाधातुरितियत्तदक्षरम

तेषु विचारमवतारयति॥ कस्त्विति॥ तस्मिन्विचारे स्वयूथ्यमतमुत्थापयति॥ तत्रेति॥ सेत्रज्ञस्याप्रस्तुतत्वशंकां वारयति॥ पक्षमिति॥ यथाप
रस्यात्मनों तर्यामी जीवश्चेत्यवस्थेद्वे कल्प्येते तथा तस्यैवान्याः पंचावस्थाः पिंडो जातिर्विराडूत्रं दैवमित्येवं लक्षणा महाभूतसंस्थानभेदेन कल्प्यं
तीत्याह॥ तथेति॥ उक्तरीत्या कल्पनायां पिंडो जातिर्विराडूत्रं दैवमव्याकृतं साक्षी सेत्रज्ञश्चेत्यष्टावस्थाः ब्रह्मणो भवंतीति वदंतः कल्पयंतीति संबं
धः॥ अवस्थापक्षमुक्त्वा शक्तिपक्षमाह॥ अन्य इति॥ तुशब्देनावयवपक्षं दर्शयन्विकारपक्षं निक्षिपति॥ अन्येत्विति॥ तत्रपक्षद्वयं प्रत्याह॥ अव

कृत्स्नेषां विशेषः किं वा सामान्यमिति तत्र केचिदाचक्षते परस्य महासमुद्रस्थानीयस्य ब्रह्मणोक्षरस्याप्रचलितस्वरूपस्येषत्प्रचलितावस्थान्तर्यामी अत्यंतप्रचलितावस्था सेत्रज्ञो यस्तं न वेदांतर्यामिणं तथान्याः पंचावस्थाः परिकल्पयंति तथाष्टावस्था ब्रह्मणो भवंतीति वदंति अन्ये त्वक्षरस्य शक्तय एता इति वदंति अनंतशक्तिमदक्षरं इति चान्ये त्वक्षरस्य विकारा इति वदंत्यवस्थाशक्ती तावन्नोपपद्येते अक्षरस्याशनायादिसंसारधर्मातीतत्वश्रुतेः॥ न ह्यशनायाद्यतीतत्वमशनायादिधर्मवदवस्थावत्त्वं चैकस्य युगपदुपपद्यते तथा शक्तिमत्त्वं च विकारावयवत्वे च दोषाः प्रदर्शिताश्चतुर्थे तस्मादेता असत्याः सर्वाः कल्पनाः कस्तर्हि भेद एषामुपाधिकृत इति ब्रूमो न स्वत एषां भेदो भेदो वा सैंधवघनवत्प्रज्ञानघनैकरसस्वाभाव्यादपूर्वमनपरमबाह्यमयमात्मा ब्रह्मेति च श्रुतेः सबाह्याभ्यंतरो ह्यज इति चाथर्वणे

स्येति॥ अंतर्यामिप्रभृतीनामिति शेषः॥ तस्य सांसारिकधर्मातीतत्वश्रुतावपि कथमवस्थावत्त्वं शक्तिमत्त्वं वा न सिध्यतीत्याशंक्याह॥ न हीति॥ अवशि
ष्टपक्षद्वयनिराकरणं प्रागेव प्रवृत्तं स्मारयति॥ विकारेति॥ परपक्षनिराकरणमुपसंहरति॥ तस्मादिति॥ परकीयकल्पनासंभवे पृच्छति॥ कस्तर्ही
ति॥ उत्तरमाह॥ उपाधीति॥ आत्मनि स्वतो विशेषाभावे हेतुमाह॥ सैंधवेति॥ तत्रैव हेत्वंतरमाह॥ अपूर्वमिति॥ ॥

बाह्यंकार्यमाभ्यंतरंकारणंताभ्यांकल्पिताभ्यांसहाधिष्ठानत्वेनसत्तास्फूर्त्तिप्रदत्तयावर्त्तते ब्रह्मस्वभावतस्तुजन्मादिसर्वक्रियाशून्यंकूटस्थंतदि
त्याथर्वणश्रुतेरर्थः॥आत्मनिस्वतोविशेषानवगमेफलितमाह॥तस्मादिति॥निरुपाख्यत्वंवाचांमनसांचागोचरत्वंतत्रनिर्विशेषत्वमेकत्वंचहेतुः
॥निरुपाधिकस्येतिनिर्विशेषत्वंसाधयितुमुक्तंतत्रचवीप्सावाक्यंप्रमाणंकृतं॥कथंपुनरेवंविधस्यवस्तुनःसंसारित्वंतदाह॥अविद्येति
॥तैर्विशिष्टंयत्कार्यकरणंतेनोपाधिनोपहितःपरमात्माजीवःसंसारीतिचव्यपदेशभाग्भवतीत्यर्थः तथापिकथंतस्यांतर्यामित्वंतदाह
॥नित्येति॥नित्यंनिरतिशयंसर्वत्राप्रतिबद्धंज्ञानंतस्मिन्सत्वपरिणामेसत्त्वप्रधानामायाशक्तिरुपाधिस्तेनविशिष्टःसन्नात्माईश्वरोंतर्यामी

तस्मान्निरुपाधिकस्यात्मनोनिरुपाख्यत्वान्निर्विशेषत्वादेकत्वाच्चनेतिनेतीतिव्यपदेशोभवत्यविद्याकामकर्मविशिष्टकार्यक
रणोपाधिरात्मासंसारीजीवउच्यतेनित्यनिरतिशयज्ञानशक्त्युपाधिरात्मांतर्यामीश्वरउच्यतेसएवनिरुपाधिःकेवलःशुद्धः
स्वेनस्वभावेनाक्षरंपरउच्यते॥तथाहिरण्यगर्भोऽव्याकृतदेवताजातिपिंडमनुष्यतिर्यक्प्रेतादिकार्यकरणोपाधिभिर्विशिष्ट
स्तदाख्यस्तद्रूपोभवतितथातदेजतितन्नैजतीतिव्याख्यातंतथैषआत्मैषसर्वभूतांतरात्मैषसर्वेषुभूतेषुगूढस्तत्त्वमस्यह
मेवेदंसर्वमात्मैवेदंसर्वंनान्योतोस्तिद्रष्टेत्यादिश्रुतयोनविरुध्यंतेकल्पनांतरेष्वेताःश्रुतयोनगच्छंति तिचोच्यतेइत्यर्थः॥कथंत
र्हितस्मिन्नक्षरशब्दप्रवृत्तिस्तत्राह॥सएवेति॥निरुपाधित्वंशुद्धत्वेहेतुःकेवलत्वमद्वयत्वं॥तथापिकथंतत्रहिरण्यगर्भादिशब्दप्रत्ययाविति
शंक्याह॥तथेति॥यथैकस्मिन्नेवपरस्मिन्नात्मनिकल्पितोपाधिप्रयुक्तंनानात्वंतथातदेजतितन्नैजतीत्यादिवाक्यमाश्रित्यप्रागेवोक्तमि
त्याह॥तथेति॥कल्पनयापरस्यनानात्वंवस्तुतस्त्वेकरस्यमित्यत्रश्रुतीरुदाहरति॥तथेत्यादिना॥अवस्थाशक्तिविकारावयवपक्षेष्वपियथोक्तश्रुती

औपाधिकोंतर्याम्यादिभेदोनस्वाभाविकइत्युपसंहरति॥ तस्मादिति॥ स्वतोवस्तुनिनास्तिभेदः किंत्वेकरसमेवेत्यत्र हेतुमाह॥ एकमेवेति॥
इत्यक्षरब्राह्मणमष्टमं॥ ८॥ ब्राह्मणांतरमुत्थापयति॥ अथेति॥ गार्गिप्रश्नेनिर्णीतेतयाब्रह्मवदनंप्रत्येतत्तुल्योनास्तीतिसर्वान्प्रतिकृथनानंतर
मथशब्दार्थः॥ संगतिंवक्तुंवृत्तंकीर्तयति॥ पृथिव्यादीनामिति॥ यत्साक्षादितिप्रस्तुत्यसर्वांतरत्वनिरूपणद्वारासाक्षात्वादिकमार्थिकंब्राह्मणत्र
येनिर्धारितमित्यर्थः॥ अंतर्यामिब्राह्मणेमुखतोनिर्दिष्टमर्थमनुद्रवति॥ तस्यचेति॥ नामरूपाभ्यांव्याकृतोविषयोद्वैतप्रपंचस्तत्रसूत्रस्यभेदायै

तस्मादुपाधिभेदेनैवैषांभेदोनान्यथैकमेवाद्वितीयमित्यवधारणात्सर्वोपनिषत्सु॥ ९४॥ इतिश्रीमद्बृहदारण्यके पंचमेप्रपाठकेअष्ट
मब्राह्मणभाष्यं॥ ८॥ ॐ॥ अथहैनंविदग्धःशाकल्यःपप्रच्छ पृथिव्यादीनांसूक्ष्मतारतम्यक्रमेणपूर्वपूर्वस्योत्तरोत्तरस्मिन्नोतप्रो
तभावंकथयन्सर्वांतरंब्रह्मप्रकाशितवान्॥ तस्यचब्रह्मणोव्याकृतविषयेसूत्रभेदेषुनियंतृत्वमुक्तंव्याकृतविषयेव्यक्ततरंलिंग
मितितस्यैवब्रह्मणःसाक्षादपरोक्षत्वेनियंतव्यदेवताभेदसंकोचद्वारेणाधिगंतव्यइतितदर्थंशाकल्यब्राह्मणमारभ्यते॥ अथहैनं
विदग्धइतिनामतःशकलस्यापत्यंशाकल्यःपप्रच्छकतिसंख्याकादेवाहेयाज्ञवल्क्येतिसयाज्ञवल्क्योहकिलएतयैववक्ष्यमाणयानि
विदाप्रतिपेदेसंख्यांयांपृष्टवांश्छाकल्योयावंतोयावत्संख्याकादेवावैश्वदेवस्यशस्त्रेनिविदि पृथिव्यादयस्तेषुनियम्येषुनियंतृत्वंतस्योक्त
मितियोजना॥ किमितिव्याकृतविषयेनियंतृत्वमुक्तमितितत्राह॥ व्याकृतेति॥ तत्रहिपरतंत्रस्यपृथिव्यादेर्ग्रहणंनियम्यतेस्पष्टतरंलिंगमिति
तत्रैवनियंतृत्वमुक्तमित्यर्थः॥ वृत्तमनूद्य उत्तरब्राह्मणस्यतात्पर्यमाह॥ तस्यैवेति॥ नियंतव्यानांदेवताभेदानांप्राणांतःसंकोचोविकासश्चानंत्यपर्यं
तस्तद्द्वाराप्रकृतस्यैवब्रह्मणःसाक्षात्त्वापरोक्षत्वेसएषनेतिनेत्यात्मेत्यादिनाधिगंतव्यइतिकृत्वाप्रथमंदेवतासंकोचविकासोक्तिरनंतरंवस्तुनिर्दे

ब्राह्मणारंभमेवमुक्त्वातदक्षराणिव्याकरोति॥अथेत्यादिना॥निविदिश्रूयंतेतावंतोदेवाइत्युत्तरत्रसंबंधः॥केयंनिविदितिपृच्छति॥निविन्नामेतिउ
त्तरमाह॥देवतेति॥पदार्थमुक्त्वावाक्यार्थंकथयति॥तस्यामिति॥यद्यपिभाष्येनिविद्व्याख्यातातथापिप्रश्नद्वारासम्यक्त्वात्तांव्याख्याति॥कापुनरित्या

निविन्नामदेवतासंख्यावाचकानिमंत्रपदानिकानिचिद्वैश्वदेवेशस्त्रेशस्यंतेतानिनिवित्संज्ञकानिस्युः॥तस्यांनिविदियावंतोदेवाःश्रू
यंतेतावंतोदेवाइतिकापुनःसानिविदितितानिनिवित्पदानिप्रदर्श्यंतेत्रयश्चत्रीचशतात्रयश्चदेवानांत्रीणिचशतानिपुनरप्येवंत्र

अथहैनंविदग्धःशाकल्यःपप्रच्छकतिदेवायाज्ञवल्क्येतिसहैतयैवनिविदाप्रतिपेदेयावंतोवैश्वदेवस्यनिविद्युच्यंतेत्रयश्च
त्रीचशतात्रयश्चत्रीचसहस्रेत्योमितिहोवाचकत्येवदेवायाज्ञवल्क्येतित्रयस्त्रिंशदित्योमितिहोवाचकत्येवदेवायाज्ञव
ल्क्येतिषडित्योमितिहोवाचकत्येवदेवायाज्ञवल्क्येतित्रयइत्योमितिहोवाचकत्येवदेवायाज्ञवल्क्येतिद्वावित्योमितिहोवा
चकत्येवदेवायाज्ञवल्क्येत्यध्यर्धइत्योमितिहोवाचकत्येवदेवायाज्ञवल्क्येत्येकइत्योमितिहोवाचकतमेतेत्रयश्चत्रीचश
तात्रयश्चत्रीचसहस्रेति॥६५॥ यश्चत्रीचसहस्रासहस्राण्येतावंतोदेवाइतिशाकल्याप्योमितिहोवाचएवमेषांमध्यमासंख्यास
म्यक्तयाज्ञातापुनस्तेषामेवदेवानांसंकोचविषयांसंख्यांपृच्छतिकत्येवदेवायाज्ञवल्क्येतित्रयस्त्रिंशत्षट्त्रयोद्वावध्यर्धएकइतिदेवता
संकोचविकासविषयांसंख्यांपृष्ट्वापुनःसंख्येयस्वरूपंपृच्छतिकतमेतेत्रयश्चत्रीचशतात्रयश्चत्रीचसहस्रेति॥६५॥ दिना॥अनुज्ञावाक्यंव्या
करोति॥एवमिति॥मध्यमासंख्याषडधिकत्रिंशताधिकत्रिसहस्रलक्षणा॥कत्येवेत्यादिप्रश्नानांपूर्वप्रश्नेनपौनरुक्त्यमाशंक्यपरिहरति॥पुनरित्या

कतमेतेत्रयेस्यादिप्रश्नस्यविषयभेदंदर्शयति॥ देवतेति॥ ६५॥ कतितर्हिंदेवानिविदिभवंतितत्राह॥ परमार्थतस्त्विति॥ त्रयस्त्रिंशत्तो
देवानांस्वरूपंप्रश्नद्वारानिर्धारयति॥ कतमइति॥ ६६॥ उत्तरप्रश्नप्रपंचप्रतीकंगृहीत्वातस्यतात्पर्यमाह॥ कतमइति॥ तेषांवस्वादीनां
प्रत्येकंवस्वादित्रयेप्रतिगणंइंद्रप्रजापतीचैकैकस्येत्यर्थः॥ तेषांवसुत्वमेतेषुहीत्यादिवाक्यावष्टंभेनस्पष्टयति॥ प्राणिनामिति॥ तेषांकर्मण

सहोवाचैतरोमहिमानोविभूतयःएषांत्रयस्त्रिंशत्तांदेवानामेतेत्रयश्चत्रीचशतेत्यादयः परमार्थतस्तुत्रयस्त्रिंशत्त्वेवदेवा
इतिकतमेतेत्रयस्त्रिंशदित्युच्यते अष्टौवसवएकादशरुद्राद्वादशादित्यास्तएकत्रिंशदिंद्रश्चैवप्रजापतिश्चत्रयस्त्रिंशाविति

सहोवाचमहिमानएवैषामेतेत्रयस्त्रिंशत्त्वेवदेवाइतिकतमेतेत्रयस्त्रिंशदित्यष्टौवसवएकादशरुद्राद्वादशादि
त्यास्तएकत्रिंशदिंद्रश्चैवप्रजापतिश्चत्रयस्त्रिंशाविति॥ ६६॥ कतमेवसवइत्यग्निश्चपृथिवीचवायुश्चांतरिक्षंचा
दित्यश्चद्यौश्चचंद्रमाश्चनक्षत्राणिचैतेवसवएतेषुहीदंवसुसर्वंहितमितितस्माद्वसवइति॥ ६७॥ कतमेरुद्राइतिदशे
मेपुरुषेप्राणाआत्मैकादशस्तेयदास्माच्छरीरान्मर्त्यादुत्क्रामंत्यथरोदयंतितद्यद्रोदयंतितस्माद्रुद्राइति॥ ६८॥ तित्रयस्त्रिंश

तांपूरणौ॥ ६६॥ कतमेवसवइतितेषांस्वरूपंप्रत्येकंपृच्छ्यतेअग्निश्चपृथिवीचेत्यग्न्याद्यानक्षत्रांताएतेवसवः॥ प्राणिनांकर्मफ
लाश्रयत्वेनकार्यकरणसंघातरूपेणतन्निवासत्वेनचविपरिणमंतोजगदिदंसर्वंवासयंतिवसंतिचतेयस्माद्वासयंतितस्माद्वसवइति

त्स्फलस्यचाश्रयत्वेनतेषामेवनिवासत्वेनचशरीरेंद्रियसमुदायाकारेणविपरिणमंतोग्न्यादयोजगदेतदाश्रयंतिस्वयंचतत्रवसंतितस्माद्युक्तंतेषां

प्राणशब्दार्थमाह॥ कर्मेति॥ ते यदास्मादित्यादिवाक्यमनुसत्यते षां रुद्रत्वमुपपादयति॥ त एते प्राणा इति मरणकालः सप्तम्यर्थः॥ ६८॥ ते षा मादित्यत्वमप्रसिद्धमिति शंकते॥ कथमिति॥ एते हीत्यादिवाक्येनोत्तरमाह॥ एते हीति॥ ६९॥ प्रसिद्धं वज्रं व्यावर्तयति॥ वीर्यमिति॥ तदेव संघा

कतमे रुद्रा इति दशेमे पुरुषे कर्मबुद्धींद्रियाणि प्राणाः आत्मा मनः एकादशः एकादशानां पूरणः त एते प्राणाः यदा अस्माच्छरीरान्मर्त्यात्प्रा णिनां कर्मफलोपभोगक्षये उत्क्रामंति अथ तदा रोदयंति तत्र यस्माद्रोदयंति संबंधिनस्तस्माद्रुद्रा इति॥ ६८॥ कतम आदित्या इति द्वादश वै मासाः संवत्सरस्य कालस्यावयवाः प्रसिद्धा एत आदित्याः कथमेते हि यस्मात्पुनः पुनः परिवर्तमानाः प्राणिनामपि आयुंषि कर्मफलं चाददा

कतम आदित्या इति द्वादश वै मासाः संवत्सरस्यैत आदित्या एते हीदꣳ सर्वमाददाना यंति ते यदिदꣳ सर्वमाददाना यंति तस्मा दादित्या इति॥ ६९॥ कतम इंद्रः कतमः प्रजापतिरिति स्तनयित्नुरेवेंद्रो यज्ञः प्रजापतिरिति कतमः स्तनयित्नुरित्यशनिरि ति कतमो यज्ञ इति पशव इति॥ ७०॥ कतमे षडित्यग्निश्च पृथिवी च वायुश्चांतरिक्षं चादित्यश्च द्यौश्चैते षडेते हीदꣳ सर्वꣳ ष ड्ढिति॥ ७१॥

नाः गृह्णंत उपाददतो यंति गच्छंति ते यद्यस्मादेवमिदं सर्वमाददाना यंति यस्माच्चैवं तस्मादादित्या इति॥ ६९॥ कतम इंद्रः कतमः प्रजापतिरिति स्तनयित्नुरेवेंद्रो यज्ञः प्रजापतिरिति कतमः स्तनयित्नुरिति अशनिर्वज्रं वीर्यं बलं यत्प्राणिनः प्रमापयति स इंद्रः इंद्रस्य हि तत्कर्म कतमो यज्ञ इति पशव इति यज्ञस्य हि साधनानि पशवः यज्ञस्यारूपत्वात्पशुसाधनाश्रयत्वाच्च पशवो यज्ञ इत्युच्य

ते निविष्टत्वेन स्फुटयति॥ बलमिति॥ किं तदिति चेत्तदाह॥ यत्प्राणिन इति॥ प्रमापणं हिंसनं॥ कथं तस्येंद्रत्वमुपचारादित्याह॥ इंद्रस्य हीति॥ पशू

रव्या ४

अमूर्त्तत्वात्साधनव्यतिरिक्तरूपाभावाद्यज्ञस्य पश्वाश्रयत्वाच्च पशवो यज्ञ इत्युच्यत इत्यर्थः॥७०॥ एते हीति प्रतीकमादाय व्याचष्टे॥ यस्मादि
ति॥ त्रयस्त्रिंशदाद्युक्तं तत्सर्वमेत एव यस्मादेते षड्भवंतीति योजना॥ अक्षरार्थमुक्त्वा वाक्यार्थमाह॥ सर्वोहीति॥७१॥ प्रतिज्ञासमाप्ताविति श
ब्दः॥ तत्र हेतुः॥ एषु हीति॥ वेदलक्षणकृतां केषांचिद्देषपक्षोद्दर्शितो न्येषां तु त्रयो लोका इत्यस्य यथाश्रुतोर्थ इत्याह॥ इमे षड् इति॥७२॥ एकस्या

कतमे षडिति त एवाग्न्याद्यो वसुत्वेन पठितास्ते चंद्रमसं नक्षत्राणि च वर्जयित्वा षड्भवंति षड्ंसंख्याविशिष्टा एते हि यस्मात्त्रयस्त्रिंश
दादि यदुक्तमिदं सर्वमेत एव षड्भवंति सर्वो हि वस्वादिविस्तरः एतेष्वेव षट्सु तद्भवतीत्यर्थः॥७१॥ कतमे ते त्रयो देवा इतीम एव त्र
यो लोका इति पृथिवीमग्निं चैकीकृत्यैको देवोंतरिक्षं वायुं चैकीकृत्य द्वितीयो दिवमादित्यं चैकीकृत्य तृतीयस्त एव त्रयो देवा इत्येषु

कतमे ते त्रयो देवा इतीम एव त्रयो लोका एषु हीमे सर्वे देवा इति कतमौ तौ द्वौ देवाविस्यन्नं चैव प्राणश्चेति कतमोध्यर्द्ध
इति योयं पवत इति॥७२॥

हि यस्मात्त्रिषु देवेषु सर्वे देवा अंतर्भवंतीति तेन त एव देवास्त्रय इत्येषु नैरुक्तानां केषांचित्पक्षः क
तमौ तौ द्वौ देवौ इति अन्नं चैव प्राणश्चेतौ द्वौ देवावनयोः सर्वेषामुक्तानामंतर्भावः कतमोध्यर्द्ध इति योयं पवते वायुः॥७२॥ तत्तत्राहुः
चोदयंति यदयं वायुरेक इवैक एव पवतेथ कथमध्यर्ध इति यदस्मिन्निदं सर्वमध्यार्ध्नोदस्मिन्वायौ सतीदं सर्वमधि आर्ध्नोद् धिवृद्धिं प्रा
प्नोति तेनाध्यर्ध इति कतम एको देव इति प्राण इति स प्राणो ब्रह्म सर्वदेवात्मकत्वान्महद्ब्रह्म तेन स ब्रह्म त्यदित्याचक्षते त्यदिति ध्यर्धत्वमाप्नि
पति॥ तत्रेति इव शब्दस्तु कथमित्यत्र संबध्यते॥ परिहरति॥ यदस्मिन्निति॥ प्राणस्य ब्रह्मत्वं साधयति॥ सर्वेति॥ तेन महत्वेनेति यावत्॥ तस्य परोक्ष

उक्तमर्थं प्रतिपत्तिसौकर्यार्थं संगृह्णाति॥ देवानामिति॥ एकत्वं प्राणे पर्यवसानं॥ नानात्वमानंत्यं॥ षडधिकत्रिशताधिकत्रिसहस्रसंख्याकाना
मेव देवानाम नोक्तत्वात्कथं तदानंत्यमित्याशंक्य शतसहस्रशब्दाभ्यामनंततापि उक्तैवेत्याशयेनाह॥ अनंतानामिति॥ एकस्मिन्प्राणे पर्यवसा
नं यावद्भवति तावत्पर्यंतमुत्तरोत्तरेषु त्रयस्त्रिंशदादिषु तेषामप्यंतर्भावइत्याह॥ तेषामपीति॥ प्राणस्यैकस्मिन्नंतर्भावस्तत्राह॥ प्राणस्यैवेति॥

तद्ब्रह्माचक्षते परोक्षाभिधायकेन शब्देन देवानामेतदेकत्वं नानात्वं चानंतानां देवानां निविद्संख्याविशिष्टेष्वंतर्भावस्तेषामपि त्रय-
स्त्रिंशदादिषूत्तरोत्तरेषु यावदेकस्मिन्प्राणे प्राणस्यैवैकस्य सर्वानंतसंख्यातो विस्तर एवमेकश्चानंतश्चावांतरसंख्याविशिष्टश्च प्राण ए
व॥ तत्र च देवस्यैकस्य नामरूपकर्मगुणशक्तिभेदोऽधिकारभेदात्॥ ९३॥ इदानीं तस्यैव प्राणस्य ब्रह्मणः पुनरष्टधा भेद उपदिश्यते पृ

तदाहुर्यदयमेक इवैव पवतेऽथ कथमध्यर्ध इति यदस्मिन्निदं सर्वमध्यार्ध्नोत्तेनाध्यर्ध इति कतम एको देव इति प्राण
इति स ब्रह्म त्यदित्याचक्षते॥ ९३॥ थिवीएव यस्य देवस्यायतनमाश्रयः अग्निर्लोको यस्य लोकयत्यनेनेति लोकः पश्यतीत्यग्नि
ना पश्यतीत्यर्थः मनोज्योतिर्मनसा ज्योतिषा संकल्पादिकार्यं करोति यः सोऽयं मनोज्योतिः पृथिवीशरीरोऽग्निदर्शनो मनसा संकल्प
यिता पृथिव्यभिमानी कार्यकरणसंघातवान्देव इत्यर्थः य एवं विशिष्टं वै संगृहीतमर्थमुपसंहरति॥ एवमिति॥ एकस्यानेकधाभावे किंनिमित्त
मित्याशंक्याह॥ तत्रेति॥ उक्तरीत्या प्राणस्वरूपे स्थिते सतीति यावत्॥ देवस्यैकस्य प्रकृतस्य प्राणस्यैवेत्यर्थः॥ प्राणिनां ज्ञानेकर्मणि चाधिकारस्तस्याभि
त्सभेदोऽधिकारभेदस्तन्निमित्तत्वेन देवस्यानेकसंस्थानपरिणामसिद्धिः॥ प्राणिनो हि ज्ञानं कर्म चानुष्ठायस्वाश्रमगम्यादिरूपमापद्यंते तद्युक्तो यथोक्तो

उपदिश्यतेध्यानार्थमितिशेषः॥अवयवशोवाक्यंयोजयति॥पृथिवीति॥संपिंडितंवाक्यंत्र्यार्थंकथयति॥पृथिवीत्यादिनावैशब्दोवधारणार्थः॥तं
परायणंयएवविजानीयात्सएववेदितास्यादितिसंबंधः॥अथकेनरूपेणपृथिवीदेवस्यकार्यकरणसंघातंप्रत्याश्रयत्वंतदाह॥मातृजेनेति॥पृ
थिव्यामातृशब्दवाच्यतायएवदेवोहंपृथिव्यस्मीतिमन्यतेसएवशरीरारंभकमातृजकोशत्रयाभिमानितयावर्तते तथाच तस्यतेनरूपेणपितृजत्रि

तंपुरुषंयोविद्याद्विजानीयात्सर्वस्यात्मनःआध्यात्मिकस्यकार्यकरणसंघातस्यात्मनः परमयनंपरःआश्रयस्तंपरायणंमातृजेनत्व
ङ्मांसरुधिररूपेणक्षेत्रस्थानीयेनवीजस्थानीयस्यपितृजस्यास्थिमज्जाशुक्ररूपस्यपरमयनंकरणात्मनश्चसवैवेदितास्याद्यएतं
देवंवेत्तिसवैवेदितापंडितःस्यादित्यभिप्रायः॥याज्ञवल्क्यत्वंतमजानन्नेवपंडिताभिमानीत्यभिप्रायोयदितद्विज्ञानेनपांडित्यंलभ्य

पृथिव्येवयस्यायतनमग्निर्लोकोमनोज्योतिर्योवैतंपुरुषंविद्यात्सर्वस्यात्मनःपरायणꣳसवैवेदितास्या

त्वेवेद्वाअहंतंपुरुषंसर्वस्यात्मनःपरायणंयमात्थयंकथयसितमहंवेदतत्रशाकल्यस्यवचनंद्रष्टव्यंयदित्वंवेत्थतंपुरुषंब्रूहिकिं
विशेषणोसौशृणुयद्विशेषणःसयएवायंशारीरःपार्थिवांशःशरीरेभवःशारीरोमातृजकोशत्रयरूपइत्यर्थःसएषदेवोयस्त्वयापृ
ष्टोहेशाकल्यकिंत्वस्तितत्रवक्तव्यंविशेषणांतरंतद्वदेव तयंकार्यलिंगंचकरणंप्रत्याश्रयत्वंसंभवतीत्यर्थः॥पृथिवीदेवस्यपरायणत्वमुपपा
द्यानंतरंवाक्यमुत्थाप्यव्याचष्टे॥सवैवेदितेति॥तथापिममकिमायातमित्याशंक्याह॥याज्ञवल्क्येति॥सपुरुषोयेनविशेषणेनविशिष्टस्तद्विशे
षणमुच्यमानंशृणिवसुत्क्वातदेवाह॥यएवेति॥शरीरंहिपंचभूतात्मकंतत्रपार्थिवांशेनजनकत्वेनस्थितःशारीरइतियावत्॥तस्यजीवत्ववा

याज्ञवल्क्यो वक्तासन्प्रष्टारं शाकल्यं प्रतिकथं वदेवेति कथयति तत्राह॥ एकेति॥ क्षोभितस्यामर्षवशगत्वे दृष्टांतः तोत्रेति॥ प्राकरिणि कं देवताशब्दार्थमाह॥ यस्मादिति॥ पुरुषो निष्पत्तिकर्त्ता षष्ठ्योच्यते लोहितनिष्पत्तिहेतुत्वमन्नरसस्यानुभवेन साधयति॥ तस्माद्धीति॥ तस्य कार्यमाह॥ ततश्चेति॥ लोहितात् द्वितीयपदार्थनिष्ठात्तत्कार्यं तद्गम्यासरुधिररूपं बीजस्यास्थिमज्जाशुक्रात्मकस्याश्रयभूतं भवतीत्य

एकैवेत्यर्थः हे शाकल्य सस्वं क्षोभितो मर्षवशगः आहतोत्रार्दितद्वगजस्तस्य देवस्य शारीरस्य कादेवता यस्मान्निष्पद्यते यः सा तस्य देवते तस्मिन्प्रकरणे विवक्षितं अमृतमिति होवाच॥ अमृतमिति योभुक्तस्यान्नस्य रसो मातृजस्य लोहितस्य निष्पत्तिहेतुस्त

द्याज्ञवल्क्य वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं यमात्थ य एवायꣳ शारीरः पुरुषः स एष वदैव शाकल्य तस्य कादेवतेत्यमृतमिति होवाच॥ ७४॥ काम एव यस्यायतनꣳ हृदयं लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳ स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं यमात्थ य एवायं काममयः पुरुषः स एष वदैव शाकल्य तस्य कादेवतेति स्त्रिय इति होवाच॥ ७५॥

स्मात्स्यन्नरसाल्लोहितं निष्पद्यते स्त्रियां ततश्च लोहितमयं शरीरं बीजाश्रयं॥ ७४॥ समानमन्यत्॥ काम एव यस्यायतनं स्त्रीव्यतिकराभिलाषः कामः कामशरीर इत्यर्थः हृदयं लोको हृदयेन बुध्यापश्यति॥ य एवायं काममयः पुरुषो ध्यात्ममपि काममय एवार्थः॥ ७४॥ पर्यायसप्तकमाद्यपर्यायेण तुल्यार्थत्वान्न पृथग्व्याख्यानापेक्षमित्याह॥ समानमिति॥ उत्तरपर्यायेषु येषां पदानामर्थभेदस्तेषां तत्कलनार्थं प्रतीकं गृह्णाति॥ काम इति॥ वाक्यार्थमाह॥ कामशरीर इत्यर्थ इति स च हृदय

आध्यात्मिकस्य काममयस्य पुरुषस्य कारणं एकं इति ॥ तस्येति ॥ तस्यास्तत्कारणत्वमनुभवेन व्यनक्ति ॥ स्त्रीतो हीति ॥ ७५ ॥ रूपशरीरस्य च
क्षुर्दर्शनस्य मनसा संकल्पयितुर्देवस्य कथमादित्ये पुरुषो विशेषणमित्याशंक्याह ॥ सर्वेषां हीति ॥ रूपमात्राभिमानिनो देवस्यादित्ये पुरु
षो विशेषावच्छेदः स च सर्वरूपप्रकाशकत्वात्सर्वैरूपैः स्वप्रकाशनायारब्धस्तस्माद्युक्तं यथोक्तं विशेषणमित्यर्थः ॥ कथं चक्षुषः सकाशा

तस्य का देवतेति स्त्रिय इति होवाच स्त्रीतो हि कामस्य दीप्तिर्जायते रूपाण्येव यस्यायतनं रूपाणि शुक्लकृष्णादीनि य एवासावादित्ये
पुरुषः सर्वेषां हि रूपाणां विशिष्टकार्यमादित्ये पुरुषस्तस्य का देवतेति सत्यमिति होवाच सत्यमिति चक्षुरुच्यते चक्षुषो ह्यध्यात्मनः

रूपाण्येव यस्यायतनं चक्षुर्लोको मनो ज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳ स वै वेदिता स्याद्याज्ञवल्क्य वेद वा
अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं यमात्थ य एवासावादित्ये पुरुषः स एष वदैव शाकल्य तस्य का देवतेति सत्यमिति होवा
च ॥ ७६ ॥ आकाश एव यस्यायतनꣳ श्रोत्रं लोको मनो ज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳ स वै वेदिता स्याद्याज्ञ
वल्क्य वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं यमात्थ य एवायꣳ श्रौत्रः प्रातिश्रुत्कः पुरुषः स एष वदैव शाकल्य तस्य का दे
वतेति दिश इति होवाच ॥ ७७ ॥

आदित्यस्याधिदैवस्य निष्पत्तिः ॥ ७६ ॥ आकाश एव यस्यायतनं य एवायं श्रोत्रे भवः श्रौत्रस्तत्रापि प्रतिश्र
वणवेलायां विशेषतो भवतीति प्रातिश्रुत्कः तस्य का देवतेति दिश इति होवाच ॥ दिग्भ्यो ह्य दादित्यस्योत्पत्तिरित्याशंक्य चक्षोः सूर्यो अजायतेति श्रु
तिमाश्रित्याह ॥ चक्षुषो हीति ॥ ७६ ॥ तत्रापीति श्रोत्रोक्तिः श्रतिश्रवणं संवादः ॥ प्रति विषयं श्रवणं वा सर्वाणि श्रवणानि वा ॥ तद्ग्रणायामितियावत् ॥ दिशस्त

अधिदैवतंमृत्युरीश्वरः॥मृत्युनैवेदमावृतमासीदितिश्रुतेः॥सचतस्याज्ञानमयस्याध्यात्मिकस्यपुरुषस्योत्पत्तिकारणमविवेकिप्रवृत्तेरीश्वराधीन
त्वादीश्वरप्रेरितोगच्छेत्स्वर्गंवाश्वभ्रमेववेतिहिपठंतितदाह॥मृत्युरिति॥१८॥पुनरुक्तिंप्रत्याह॥पूर्वमिति॥आधारशब्दोभावप्रधानः॥तथाचप्र
सावाध्यात्मिकोनिष्पद्यतेतमेवयस्यायतनंतमइतिशार्वराद्यंधकारःपरिगृह्यतेआध्यात्मंछायामयोऽज्ञानमयःपुरुषस्तस्यका
देवतेतिमृत्युरितिहोवाचमृत्युरधिदैवतंतस्यनिष्पत्तिकारणं॥१८॥रूपाण्येवयस्यायतनंपूर्वंसाधारणानिरूपाण्युक्तानिइहतुप्र

तमेवयस्यायतनंहृदयंलोकोमनोज्योतिर्योवैतंपुरुषंविद्यात्सर्वस्यात्मनःपरायणंसवैवेदितास्याद्याज्ञवल्क्यवे
दवाअहंतंपुरुषंसर्वस्यात्मनःपरायणंयमात्थयएवायंछायामयःपुरुषःसएषदेवशाकल्यतस्यकादेवतेतिमृत्यु
रितिहोवाच॥१८॥रूपाण्येवयस्यायतनंचक्षुर्लोकोमनोज्योतिर्योवैतंपुरुषंविद्यात्सर्वस्यात्मनःपरायणंसवैवेदि
तास्याद्याज्ञवल्क्यवेदवाअहंतंपुरुषंसर्वस्यात्मनःपरायणंयमात्थयएवायमादर्शेपुरुषःसएषदेवशाकल्यतस्य
कादेवतेत्यसुरितिहोवाच॥१९॥

काशकानिविशिष्टानिरूपाणिगृह्यंतेरूपायतनस्यदेवस्यविशेषायतनंप्रतिबिंबाधारमाद
र्शादितस्यकादेवतेत्यसुरितिहोवाचतस्यप्रतिबिंबाख्यस्यपुरुषस्यनिष्पत्तिरसोःप्राणात्॥१९॥आपएवयस्यायतनं
तिबिंबस्याधारत्वंयत्रतदित्युक्तंभवति॥आदिशब्देनस्वच्छस्वभावंखड्गादिगृह्यते॥प्राणेनहिघृष्यमाणेदर्पणादौप्रतिबिंबाभिव्यक्तियोग्यरू
पविशेषोनिष्पद्यतेततोयुक्तंप्राणस्यप्रतिबिंबकारणत्वमित्यभिप्रेत्याह॥तस्येति॥१९॥आपएवयस्यायतनंपएवायमप्सुपुरुषद्वत्युभयत्रसामान्यवि

साधारणइति॥ कथंपुनर्वापीकूपविशेषायतनस्यवरुणोदेवतानहिदेवतात्मनोवरुणस्यतदधिष्ठातुस्तत्कारणत्वंतत्राह॥ वरुणादिति॥ आपोवापी
कूपाद्याः पीताःसत्योध्यात्मंशरीरेमूत्रादिसंघातंकुर्वंतिताश्चवरुणाद्भवंतिवरुणशब्देनापएववरुश्मिद्वाराभूमिंपतंत्योभिधीयंतेतथाचताएववरु
रुणात्मिकावाप्याद्यपांपीयमानानामुत्पत्तिकारणमितियुक्तंवरुणस्यवापीतडागाद्यायतनंपुरुषंप्रतिकारणत्वमित्यर्थः॥ ८० ॥ वाक्यद्वयंगृहीत्वा

साधारणाःसर्वाआपःआयतनंवापीकूपतडागाद्याश्रयास्वप्सुविशेषावस्थानंतस्यकादेवतेतिवरुणइतिवरुणात्संघातकर्त्र्योध्यात्म
मापएववाप्याद्यपांनिष्पत्तिकारणं॥ ८० ॥ रेतएवयस्यायतनंयएवायंपुत्रमयोविशेषायतनंरेतआयतनस्यपुत्रमयइतिचास्थिमज्जा

आपएवयस्यायतनꣳहृदयंलोकोमनोज्योतिर्योवैतंपुरुषंविद्यात्सर्वस्यात्मनःपरायणꣳसवैवेदितास्याद्याज्ञवल्क्यवे
दवाअहंतंपुरुषꣳसर्वस्यात्मनःपरायणंयमात्थयएवायमप्सुपुरुषःसएषवदैवशाकल्यतस्यकादेवतेतिवरुणइतिहोवा
च॥ ८० ॥ रेतएवयस्यायतनꣳहृदयंलोकोमनोज्योतिर्योवैतंपुरुषंविद्यात्सर्वस्यात्मनःपरायणꣳसवैवेदितास्याद्याज्ञवल्क्य
वेदवाअहंतंपुरुषꣳसर्वस्यात्मनःपरायणंयमात्थयएवायंपुत्रमयःपुरुषःसएषवदैवशाकल्यतस्यकादेवतेतिप्रजापतिरिति
होवाच॥ ८१ ॥

शुक्राणिपितुर्जातानितस्यकादेवतेतिप्रजापतिरितिहोवाचप्रजापतिःपितोच्यतेपितृतोहिपुत्रस्योत्पत्तिः॥ ८१ ॥ अ
थधादेवलोकपुरुषभेदेनत्रिधात्रिधात्मानंविभज्यावस्थितःएकैकोदेवः॥ तात्पर्यमाह॥ विशेषेति॥ पुत्रमयशब्दार्थंव्याचष्टे॥ पुत्रमयइति॥ ८१
॥ शाकल्येतिहोवाचेत्यादिग्रंथस्यतात्पर्यंवक्तुंवृत्तंकीर्तयति॥ अष्टधेति॥ लोकःसामान्याकारःपुरुषोविशेषावच्छेदोदेवस्तत्कारणमनेनप्रकारेणत्रिधा

स प्राण एव सूत्रात्मा तद्भेदत्वात्पूर्वोक्तस्य सर्वस्य सचोपासनार्थमष्टधोपदिष्टोऽस्मादित्यर्थः॥ उत्तरस्य तात्पर्यं दर्शयति॥ अधुनेति॥ प्रविभक्तस्य जगतः सर्वस्येति शेषः॥ आत्मशब्दो हृदयविषयः॥ याज्ञवल्क्यवाक्यस्य शाकल्ये प्रश्र्यबुद्धिपूर्वकारित्वाद्कृत्वं दर्शयति॥ ग्रहेणेति॥ १८॥ सर्वेषामेव ब्राह्मणानां प्रायेणाहं तत्वेन सम्मतो भवानिति मुनेरभिसंहितं शाकल्यस्य कालचोदितत्वात्तदनुरोधिनीमन्यथाप्रतिपत्तिमेवादाय चोदयति॥

प्राणभेदस्यैवोपासनार्थं व्यपदिष्टोऽधुना दिग्विभागेन पंचधा प्रविभक्तस्यात्मन्युपसंहारार्थमाह तूष्णींभूतं शाकल्यं याज्ञवल्क्यो ग्रहेणावेशयन्नाह॥ शाकल्येति होवाच याज्ञवल्क्यस्त्वांस्विदिति वितर्के इमे नूनं ब्राह्मणाः अंगारावक्षयणमंगारा अवक्षीयंते यस्मिन्संदेशादौ तदंगारावक्षयणं तन्नूनं त्वामकृता कृतवंतो ब्राह्मणास्त्वं तु तन्न बुध्यसे आत्मानं मयादह्यमानमित्यभिप्रायः॥ १८॥

शाकल्येति होवाच याज्ञवल्क्यस्त्वाꣳस्विदिमे ब्राह्मणा अंगारावक्षयणमक्रता३ इति॥ १८॥ याज्ञवल्क्येति होवाच शाकल्यो यदिदं कुरुपंचालानां ब्राह्मणानत्यवादीः किं ब्रह्म विद्वानिति दिशो वेद सदेवाः सप्रतिष्ठा इति यद्दिशो वेत्थ सदेवाः सप्रतिष्ठाः॥ १९॥ किंदेवतोस्यां

याज्ञवल्क्येति होवाच शाकल्यो यदिदं कुरुपंचालानां ब्राह्मणानत्यवादीरत्युक्तवानसि स्वयं भीतास्त्वामंगारावक्षयणं कृतवंत इति किं ब्रह्म विद्वान्सन्नेवमधिक्षिपसि ब्राह्मणान्याज्ञवल्क्य आह ब्रह्मविज्ञानं तावदिदं मम किं तद्दिशो वेद दिग्विषयं विज्ञानं जाने तच्च न केवलं दिश एव सदेवा देवैः सह दिगधिष्ठातृभिः किंच सप्रतिष्ठाभिश्च सह इतर आह यद्यदि दिशो वेत्थ सदेवाः स सप्रतिष्ठाः त्याह॥ यदिदमिति॥ दिग्विषयं विज्ञानं जाने तन्ममास्तीत्यर्थः॥ तच्च विज्ञानं केवलं दिङ्मात्रस्य न भवति किंतु देवैः सह प्रतिष्ठाभिश्च सहितादिशो वेदेत्याह॥

अवतारितस्यवाक्यस्यार्थंसंक्षिपति॥ सफलमिति॥ प्राच्यांदिशिकादेवतेतिवक्तव्येकथमन्यथापृच्छ्यतेतत्राह॥ अस्मीति॥ आत्मानमात्मीयमितिया
वत्॥ यथोक्तंहृदयमात्मत्वेनोपगम्येतिसंबंधः॥ तथापिप्रथमंप्राचींदिशमधिकृत्यप्रश्नेकोहेतुरितिचेत्तत्राह॥ पूर्वाभिमुखइति॥ यद्यपिदिगात्मा
हमस्मीतिस्थितस्तथापिकथंसर्वंजगदात्मत्वेनोपगम्यतिष्ठतीत्यवगम्यतेतत्राह॥ सप्रतिष्ठेति॥ सप्रतिष्ठादिशोवेदेतिवचनात्सर्वमपिहृदयद्वारा

सफलंयदिविज्ञानंत्वयाप्रतिज्ञातं॥ किंदेवतःकादेवताअस्यतवदिग्भूतस्यासौहियाज्ञवल्क्योहृदयमात्मानंदिक्षुपंचधाविभक्तंदिगात्म
भूतंतत्तद्द्वारेणसर्वंजगदात्मत्वेनोपगम्याहमस्मिदिगात्मेतिव्यवस्थितः॥ पूर्वाभिमुखःसप्रतिष्ठावचनात्यथायाज्ञवल्क्यस्यप्रतिज्ञातथै
वपृच्छतिकिंदेवतस्त्वमस्यांप्राच्यांदिश्यसीतिसर्वत्रहिवेदेयांयांदेवतामुपास्तेइहैवतद्भूतस्तांतांप्रतिपद्यतइति॥ तथाचवक्ष्यतिदेवोभूत्वा

प्राच्यांदिश्यसीत्यादित्यदेवतइतिसआदित्यःकस्मिन्प्रतिष्ठितइतिचक्षुषीतिकस्मिन्नुचक्षुःप्रतिष्ठितमितिरूपेष्वितिचक्षुषा
हिरूपाणिपश्यतिकस्मिन्नुरूपाणिप्रतिष्ठितानीतिहृदयइतिहोवाच॥

देवानप्येतीत्यस्यांकादेवतादिगात्मनस्तवाधिष्ठात्रीकयादे
वतयात्वंप्राचीदिग्रूपेणसंपन्नइत्यर्थःइतरआहादित्यदेवतइतिप्राच्यांदिशिममादित्योदेवतासोऽहमादित्यदेवतःसदेवाइत्येतदुक्तंसप्र
तिष्ठाइतितुवक्तव्यमित्याह॥ सआदित्यःकस्मिन्प्रतिष्ठितइतिचक्षुषीति जगदात्मत्वेनोपगम्यस्थितोमुनिरितिप्रतिभातीत्यर्थःप्रतिज्ञानुसारि
त्वाच्चायंप्रश्नोयुक्तिमानित्याह॥ यथेति॥ अहमस्मिदिगात्मेतिप्रतिज्ञानुसारिण्यपिप्रश्नेदेहपातोत्तरभावीदेवताभावःपृच्छ्यतेसतिदेहेस्यात्तुतद्भावोमाभू
दित्याशंक्याह॥ सर्वत्रहीति॥ इतिनभाविदेवताभावःप्रश्नगोचरइतिशेषः॥ उक्तेऽर्थेवाक्यशेषमनुकूलयति॥ तथाचेति॥ प्रश्नार्थमुपसंहरति॥ अस्यामिति॥

आदित्यस्य चक्षुषि प्रतिष्ठितत्वं प्रकटयितुं कार्यकारणभावं तयोरादर्शयति॥ अध्यात्मनश्चक्षुष इति॥ चक्षोः सूर्यो अजायतेत्यादयो मंत्रवादास्तदनुसारिणश्च ब्राह्मणवादाः॥ भवतु कार्यकारणभावस्तथापि कथं चक्षुष्यादित्यस्य प्रतिष्ठितत्वं तत्राह॥ कार्यं हीति॥ कथं चक्षुषो रूपेषु प्रतिष्ठितत्वं तत्राह॥ रूपग्रहणायेति॥ तथापि कथं यथोक्तमाधाराधेयत्वमत आह॥ येहीति॥ चक्षुषो रूपाधारत्वे फलितमाह॥ तस्मादिति॥ उ

अध्यात्मनश्चक्षुष आदित्यो निष्पन्न इति हि मंत्रब्राह्मणवादाः चक्षोः सूर्यो अजायत चक्षुष आदित्य इत्यादयः कार्यं हि कारणे प्रतिष्ठितं भवति कस्मिन्नु चक्षुः प्रतिष्ठितमिति रूपेषु प्रतिष्ठितं रूपग्रहणाय हि रूपात्मकं चक्षुः रूपेण प्रयुक्तं येहि रूपैः प्रयुक्तं तेरात्मग्रहणायारब्धं चक्षुः तस्मात्सादित्यं चक्षुः सह प्राच्या दिशा सह तत्स्थैः सर्वै रूपेषु प्रतिष्ठितं चक्षुषा सह प्राचीदिक्सर्वा रूपभू

हृदयेन हि रूपाणि जानाति हृदये ह्येव रूपाणि प्रतिष्ठितानि भवंतीत्येवमेवैतद्याज्ञवल्क्य॥ ८४॥

ता तानि च कस्मिन्नु रूपाणि प्रतिष्ठितानीति हृदय इति होवाच॥ हृदयारब्धानि रूपाणि रूपाकारेण हि हृदयं परिणतं यस्माद्धृदयेन हि रूपाणि सर्वो लोको जानाति हृदयमिति बुद्धिमनसी एकीकृत्य निर्देशः तस्माद्धृदये ह्येव रूपाणि प्रतिष्ठितानि हृदयेन हि यस्मात्स्मरणं भवति रूपाणां वासनात्मना तस्मात् हृदये रूपाणि प्रतिष्ठितानीत्यर्थः॥ एवमेवैतद्याज्ञवल्क्य॥ ८४॥ पसंहृतमर्थं संगृह्णाति॥ चक्षुषेति॥ हृदयारब्धत्वं रूपाणां स्फुटयति॥ रूपाकारेणेति॥ हृदये रूपाणां प्रतिष्ठितत्वे हेत्वंतरमाह॥ यस्मादिति॥ हृदयशब्दस्य मांसखंडविषयत्वं व्यावर्तयति॥ हृदयमिति॥ कथं पुनर्बहिर्मुखानि रूपाणि अंतर्हृदये स्यातुं पारयंति तत्राह॥ हृदयेनहीति॥ तथापि कथं ते षां हृदये प्रतिष्ठि

पूर्ववदित्युक्तमेवव्यनक्ति॥ दक्षिणायामिति॥ यमस्ययज्ञकार्यत्वमप्रसिद्धमितिशंकित्वाचुत्पादयति॥ कथमित्यादिना॥ तस्ययज्ञकार्यत्वेफलितमाह॥ तेनेति॥ यज्ञस्यदक्षिणायांप्रतिष्ठितत्वंसाधयति॥ दक्षिणयेति॥ कार्यंचकारणेप्रतिष्ठितमितिशेषः॥ दक्षिणायाः श्रद्धायांप्रतिष्ठितत्वंप्र

किंदेवतोस्यांदक्षिणायांदिश्यसीतिपूर्ववद्दक्षिणायांदिशिकादेवतात्वयमदेवतेतियमोदेवताममदक्षिणादिग्भूतस्ससयमःकस्मिन्प्रतिष्ठितइतियज्ञेइतियज्ञेकारणेप्रतिष्ठितोयमःसहदिशाकथंपुनर्यज्ञस्यकार्यंयमइत्युच्यतेऋत्विग्भिर्निष्पादितोयज्ञोदक्षिणयायजमानस्तेभ्यो यज्ञंनिष्क्रीयतेनयज्ञेनदक्षिणांदिशंसहयमेनाभिजयतितेनयज्ञेयमःकार्यत्वात्प्रतिष्ठितःसहदक्षिणयादिशा

किंदेवतोस्यांदक्षिणायांदिश्यसीतियमदेवतइतिसयमःकस्मिन्प्रतिष्ठितइतियज्ञइतिकस्मिन्नुयज्ञःप्रतिष्ठितइतिदक्षिणायामितिकस्मिन्नुदक्षिणाप्रतिष्ठितेतिश्रद्धायामितियदाह्येवश्रद्धत्तेथदक्षिणांददातिश्रद्धायांह्येवदक्षिणाप्रतिष्ठितेतिकस्मिन्नुश्रद्धाप्रतिष्ठितेतिहृदयइतिहोवाचहृदयेनहिश्रद्धांजानातिहृदयेह्येवश्रद्धाप्रतिष्ठिताभवतीत्येवमेवैतद्याज्ञवल्क्य

कस्मिन्नुयज्ञःप्रतिष्ठितइतिदक्षिणायामितिदक्षिणयासनिष्क्रीयतेतेनदक्षिणाकार्यंयज्ञःकस्मिन्नुदक्षिणाप्रतिष्ठितेतिश्रद्धायामितिश्रद्धानामदित्सुत्वमास्तिक्यबुद्धिर्भक्तिसहिताकथंतस्यांप्रतिष्ठितादक्षिणायस्माद्यदाह्येवश्रद्धत्तेथदक्षिणांददातिनाश्रद्दधद्दक्षिणांददातितस्माच्छ्रद्धायांह्येवदक्षिणाप्रतिष्ठितेतिकस्मिन्नुश्रद्धाप्रतिष्ठितेतिहृदयइतिहोवाचहृदयस्यहिवृत्तिःश्रद्धायस्माद्धृदयेनहि

करयति॥ यस्मादिति॥ हृदयेसाप्रतिष्ठितेत्यत्रहेतुमाह॥ हृदयस्येति॥ हृदयव्याप्यत्वाच्छ्रद्धायास्तत्प्रतिष्ठितत्वमित्याह॥ हृदये

हृदयस्यश्रद्धावृत्तिरस्तुतथापिप्रकृतेकिमायातंतत्राह॥वृत्तिश्चेति॥८५॥रेतसोहृदयकार्यत्वंसाधयति॥कामइति॥तथापिकथंरेतोहृदय

श्रद्धांजानातिवृत्तिश्चवृत्तिमतिप्रतिष्ठिताभवतितस्माद्धृदयेह्येवश्रद्धाप्रतिष्ठिताभवतीत्येवमेवैतद्याज्ञवल्क्य॥८५॥किंदेवतोऽस्यांप्रतीच्यांदिश्यसीतितस्यांवरुणोदेवताममसवरुणःकस्मिन्प्रतिष्ठितइत्यप्स्वित्यपांहिवरुणःकार्यमश्रद्धावाआपःश्रद्धातोवरुणमसृजतेतिश्रुतेःकस्मिन्न्वापःप्रतिष्ठिताइतिरेतसीतिरेतसोह्यापःसृष्टाइतिश्रुतेःकस्मिन्नुरेतःप्रतिष्ठितमितिहृदयइतियस्माद्धृदयस्यकार्यंरेतःकामोहृदयस्यवृत्तिःकामिनोहिहृदयाद्रेतोधिस्कंदतितस्मादपिप्रतिरूपमनुरूपंपुत्रंजातमाहुर्लौकिकाःअस्यपितुर्हृ

किंदेवतोऽस्यांप्रतीच्यांदिश्यसीतिवरुणदेवतइतिसवरुणःकस्मिन्प्रतिष्ठितइत्यप्स्वितिकस्मिन्न्वापःप्रतिष्ठिताइतिरेतसीतिकस्मिन्नुरेतःप्रतिष्ठितमितिहृदयइतितस्मादपिप्रतिरूपंजातमाहुर्हृदयादिवसृप्तोहृदयादिवनिर्मितइतिहृदयेह्येवरेतःप्रतिष्ठितंभवतीत्येवमेवैतद्याज्ञवल्क्य॥८६॥

दयादिवायंपुत्रःसृप्तोविनिःसृतोहृदयादिवनिर्मितोयथासुवर्णेननिर्मितःकुंडलस्तस्माद्धृदयेह्येवरेतःप्रतिष्ठितंभवतीत्येवमेवैतद्याज्ञवल्क्य॥८६॥किंदेवतोऽस्यामुदीच्यांदिश्यसीतिसोमदेवतइतिसोमइतिलतांसोमदेवतांचैकीकृत्यनिर्देशःससोमःकस्मिन्प्रतिष्ठितइतिदीक्षायामितिदीक्षितोहियजमानःसोमंक्रीणातिसोमेनेष्ट्वाज्ञानवानुत्तरांदिशंप्रतिपद्यतेसोमदेवताधिष्ठितांसौम्यांकस्मिन्नुदीक्षाप्रतिष्ठितेतिसत्यइति सत्कार्यंतत्राह॥कामिनोहीति॥तत्रैवलोकप्रसिद्धिंप्रमाणयति॥तस्मादिति॥अपिशब्दःसंभावनार्थः॥अवधारणार्थोवा॥८६॥दीक्षायांसोमस्यप्रतिष्ठितत्वंसाधयति॥दीक्षितोहीत्यादिना ॥ ॥

दीक्षायाः सत्ये प्रतिष्ठितत्वमसिद्धमिति शंकितां समाधत्ते॥ कथमित्यादिना॥ अपिशब्दोवधारणार्थः सत्यंवदेति वदतामभिप्रायमाह॥ कारणेति॥
भ्रेषोभ्रंशो नाशः इति तेषामभिप्राय इति शेषः॥ प्रकृतोपसंहारः॥ सत्ये हीति॥ ८॥ २३॥ कथं पुनरूर्ध्वा दिगवस्थिता ध्रुवेत्युच्यते तत्राह॥ मेरोरि

कस्थंयस्मात्सत्येदीक्षाप्रतिष्ठितातस्मादपिदीक्षितमाहुःसत्यंवदेति॥कारणभ्रेषेकार्यभ्रेषोमाभूदितिसत्येह्येवदीक्षाप्रतिष्ठितेति
कस्मिन्नुसत्यंप्रतिष्ठितमितिहृदयइतिहोवाचहृदयेनहिसत्यंजानातितस्माद्धृदयेह्येवसत्यंप्रतिष्ठितंभवतीत्येवमेवैतद्याज्ञवल्क्य
॥ ८७॥ किंदेवतोस्यांध्रुवायांदिश्यसीतिमेरोःसमंततोवसतामव्यभिचारादूर्ध्वादिग्ध्रुवेत्युच्यते॥ अग्निदेवतइत्यूर्ध्वायांहिप्रकाशभूय

किंदेवतोस्यामुदीच्यांदिश्यसीतिसोमदेवतइतिससोमःकस्मिन्प्रतिष्ठितइतिदीक्षायामितिकस्मिन्नुदीक्षाप्रतिष्ठितेति
सत्यइतितस्मादपिदीक्षितमाहुःसत्यंवदेतिसत्येह्येवदीक्षाप्रतिष्ठितेतिकस्मिन्नुसत्यंप्रतिष्ठितमितिहृदयइतिहोवाच
हृदयेनहिसत्यंजानातिहृदयेह्येवसत्यंप्रतिष्ठितंभवतीत्येवमेवैतद्याज्ञवल्क्य॥ ८७॥ स्त्वंप्रकाशश्चाग्निःसोग्निःकस्मिन्प्रति
ष्ठितइतिवाचीतिकस्मिन्नुवाक्प्रतिष्ठितेतिहृदयइति॥ तत्रयाज्ञवल्क्यःसर्वासुदिक्षुविप्रसृतेनहृदयेनसर्वादिशआत्मत्वेनाभि
संपन्नःसदेवाःसप्रतिष्ठादिशआत्मभूतास्तस्यनामरूपकर्मात्मभूतस्ययाज्ञवल्क्यस्ययद्रूपंतत्प्राच्यादिशासहहृदयभूतंयाज्ञ

ति॥ तत्राग्नेर्देवतात्वंप्रकटयति॥ ऊर्ध्वायांहीति दिशो देदेत्यादिश्रुत्या जगतो विभागेन पंचधात्वं ध्यानार्थमुक्तं॥ इदानीं विभागवादिन्याः श्रुतेर
भिप्रायमाह॥ तत्रेति॥ यथोक्ते विभागे सतीति यावत्॥ उक्तमर्थं संक्षिपति॥ सदेवा इति तत्रावांतरविभागमाह॥ यद्रूपमिति॥ आद्यपर्याये हृदये रूपप्र

बृ॰ र॰ ६२

दक्षिणायामित्यादिपर्यायत्रयेणतत्रैवकर्मोपसंहारउक्तइत्याह॥यत्केवलमिति॥यद्धिकेवलंकर्मतत्फलादिभिःसहदक्षिणदिगात्मकंहृद्युपसंह्रि
यतेयज्ञस्यदक्षिणादिद्वाराहृदयेप्रतिष्ठितत्वोक्तेर्दक्षिणस्यादिशस्तत्फलत्वात्पुत्रजन्मारब्धकर्मप्रतीच्यात्मकंतत्रैवोपसंहृतंहृदयेह्येववरेतःप्रतिष्ठि
तमितिश्रुतेःपुत्रजन्मनश्चतत्कार्यत्वात्॥ज्ञानसहितमपिकर्मफलप्रतिष्ठादेवताभिःसहोदीच्यात्मकंतत्रैवोपसंहृतंसोमदेवतायादीक्षादिद्वारा

यत्केवलंकर्मपुत्रोत्पादनलक्षणंचज्ञानसहितंचसहफलेनाधिष्ठात्रीभिश्चदेवताभिर्दक्षिणाप्रतीच्युदीच्यःकर्मफलात्मिकाहृदयमे
वापन्नास्तस्यध्रुवयादिशासहनामसर्ववाग्द्वारेणहृदयमेवापन्नमेतावद्धीदंसर्वंयदुतरूपंवाकर्मवानामवेतितत्सर्वंहृदयमेवत

किंदेवतोस्यांध्रुवायांदिश्यसीत्यग्निदेवतइतिसोग्निःकस्मिन्प्रतिष्ठितइतिवाचीतिकस्मिन्नुवाक्प्रतिष्ठितेतिहृदयइति
कस्मिन्नुहृदयंप्रतिष्ठितमिति॥२०॥अहल्लिकेतिहोवाचयाज्ञवल्क्योयत्रैतदन्यत्रास्मन्मन्यासैयद्ध्येतदन्यत्रास्मत्स्या
च्छ्वानोवैनद्युर्वयांसिवैनद्विमथ्नीरन्निति॥२१॥

सर्वात्मकंहृदयंदृष्ट्वापृच्छतेकस्मिन्नुहृदयंप्रतिष्ठितमिति॥२०॥अहल्लिकेतिहोवा
चयाज्ञवल्क्योनामांतरेणसंबोधनंकृतवान्॥यत्रयस्मिन्कालेएतत्हृदयमात्मासशरीरस्यान्यत्रक्वचिद्देशांतरेअस्मदस्मत्तोवर्ततइ
तिमन्यासैमन्यसेएतदेवविशदयति

तत्प्रतिष्ठितत्वश्रुतेरेवंदिक्त्रयेसर्वकर्महृदिसंहृतमित्यर्थः॥पंचमपर्यायस्यतात्पर्यमाह॥ध्रुवयेति॥
नामरूपकर्मसूपसंहृतेष्वपिकिंचिदुपसंहर्तव्यांतरमवशिष्टमस्तीत्याशंक्यनिराकरोति॥एतावद्धीति॥प्रश्नांतरमुत्थापयति॥तत्सर्वात्मकमिति
॥२०॥हृदयपदेननामाद्याधारवद्हल्लिकशब्देनापिहृदयाधिकरणंविवक्ष्यतेवाक्यच्छायासामान्यादित्याशंक्याह॥नामांतरेणेति॥अहनिलीयत

अ॰ ५

रामः ६२

देहेहृदयंप्रतिष्ठितमितिव्युत्पादयति॥यत्रेत्यादिना॥तस्मिन्कालेशरीरंमृतंस्यादितिशेषः॥शरीरस्यहृदयाश्रयत्वंविशदयति॥यद्धीत्या
दिना॥देहादन्यत्रहृदयस्यावस्थानेयथोक्तंदोषमितिशब्देनपरामृश्यफलितमाह॥इतीत्यादिना॥देहस्तर्हिकुत्रप्रतिष्ठितइत्यतआह॥श

यद्धियदिह्येतहृदयमन्यत्रास्मतस्माद्वेक्कानोवाएतच्छरीरंतदाद्युर्वयांसिवापक्षिणोवाएतद्धिमथ्नीरन्विलोडयेयुर्विकर्षेरन्नितित
स्मान्मयिशरीरेहृदयंप्रतिष्ठितमित्यर्थःशरीरस्यापिनामरूपकर्मात्मकत्वाद्धृदयेप्रतिष्ठितत्वं॥७९॥हृदयशरीरयोरेवमन्योन्यप्रतिष्ठे
त्याकार्यकरणयोरतत्त्वात्पृच्छामिकस्मिन्नुत्वंचशरीरमात्माचतवहृदयंप्रतिष्ठितौस्थइतिप्राणइतिदेहात्मानौप्राणेप्रतिष्ठितौस्यातांप्रा

कस्मिन्नुत्वंचात्माचप्रतिष्ठितौस्थइतिप्राणइतिकस्मिन्नुप्राणःप्रतिष्ठितइत्यपानइति॥कस्मिन्नपानःप्रतिष्ठितइतिव्यानइ
तिकस्मिन्नुव्यानःप्रतिष्ठितइत्युदानइतिकस्मिन्नूदानःप्रतिष्ठितइतिसमानइतिसएषनेतिनेत्या॥ णवृत्तौकस्मिन्नुप्राणःप्रति
ष्ठितइतिअपानइतिसापिप्राणवृत्तिःप्रागेवप्रेयादपानवृत्त्याचेन्ननिगृह्यते॥कस्मिन्नपानःप्रतिष्ठितइतिव्यानइतिसाप्यपानवृत्तिरधए
वयायात्प्राणवृत्तिश्चप्रागेवमध्यस्थयाचेद्व्यानवृत्त्याननिगृह्यतेकस्मिन्नुव्यानःप्रतिष्ठितइतिउदानइतिसर्वास्तिस्रोपिवृत्तयःउदाने
कीलस्थानीयेचेन्ननिबद्धाविषड्डेवेयुःकस्मिन्नूदानःप्रतिष्ठितइतिसमानइतिसमानप्रतिष्ठाह्येताःसर्वावृत्तयःएतदुक्तं रीरस्येति॥८०
॥वृत्तमनूद्यप्रश्नांतरमुपादत्ते॥हृदयेति॥प्राणशब्दस्यसूत्रविषयत्वंमवदच्छेत्तुंवृत्तिविशेषणं॥प्राणस्यापानेप्रतिष्ठितत्वंव्यतिरेकद्वाराएस्फोरयति॥सापी
ति॥प्राणापानयोरुभयोरपिव्यानाधीनत्वंसाधयति॥साप्यपानेति॥तिसृणांवृत्तीनामुक्तानामुदानेनिबद्धत्वंदर्शयति॥सर्वाइति॥विषड्डेतिनानागति

तेषां प्रवर्त्तकं दर्शयति॥ विज्ञानमयेति॥ स एष इत्यादेस्तात्पर्यमाह॥ सर्वमिति॥ यस्य कूटस्थदृष्टिमात्रस्यांतर्यामित्वकल्पनाधिष्ठानस्याज्ञानवशात्स्व
शासने द्यावापृथिव्यादि स्थितं स परमात्मैष प्रसंगात्मैवेति पदयोरर्थं विवक्षित्वाह॥ स एष इति॥ निषेधद्वयं मूर्तामूर्त्तब्राह्मणे व्याख्यातमित्याह॥
स योनेति॥ यो मधुकांडे चतुर्थे नेति नेतीति निषेधमुखेन निर्दिष्टः स एष कूर्चब्राह्मणे तन्मुखेनैव वक्ष्यत इति योजना॥ निषेधद्वारा निर्दिष्टमेव स्पष्ट
भवति शरीरहृदयवायवोन्योन्यप्रतिष्ठाः संघातेन नियता वर्तंते विज्ञानमयार्थे प्रयुक्ता इति॥ सर्वमेतद्येन नियतं यस्मिन्प्रतिष्ठितमाकाशां
तमोतं च प्रोतं च तस्य निरुपाधिकस्य साक्षादपरोक्षाद्ब्रह्मणो निर्देशः कर्तव्य इत्ययमारंभः स एष इति॥ स योनेति नेतीति निर्दिष्टो मधुकांडे स
एष सोयमात्माऽगृह्यो न गृह्यः कथं यस्मात्सर्वकार्यधर्मातीतस्तस्मादगृह्यः कुतो यस्मान्न हि गृह्यते यद्धि करणगोचरं व्याकृतं वस्तु तद्ग्र
त्माऽगृह्यो न हि गृह्यते शीर्यो न हि शीर्यते संगो न हि सज्जते सितो न व्यथते न रिष्यत्येतान्यष्टावायतनान्यष्टौ लोका अष्टौ देवा
अष्टौ पुरुषाः॥
हणगोचरमिदं तु तद्विपरीतमात्मतत्त्वं तथाऽशीर्यो यद्धि मूर्तं संहतं शरीरादि तच्छीर्यतेऽयं तु तद्विपरीतोऽतो न हि
शीर्यते तथाऽसंगो मूर्तो मूर्तांतरेण संबध्यमानः सज्जतेऽयं च तद्विपरीतोऽतो न हि सज्जते तथाऽसितः अबद्धो यद्धि मूर्तं संहतं तद्बध्य
ते इदं तु तद्विपरीतत्वादसितोऽबद्धत्वान्न व्यथतेऽतो न रिष्यति ग्रहणविशरणसंगबंधकार्यधर्मरहितत्वान्न रिष्यति न हिंसामापद्य
पति॥ सोयमिति॥ कार्यधर्माः शब्दादयोऽशनायादयश्च श्रुत्युक्तं हेतुमवतार्य व्याचष्टे॥ कुत इत्यादिना॥ तद्विपरीतत्वं करणगोचरत्वं न चक्षुषेत्या
दिश्रुतेः॥ तद्विपरीतत्वादमूर्तत्वादिति यावत्॥ पूर्वत्राप्युभयत्र तद्विपरीत्यमेतदेवातः शब्दार्थस्फुटयन्नुक्तमुपपादयति॥ ग्रहणेति॥ कार्यधर्माः

ननु शाकल्ययाज्ञवल्क्ययोः संवादात्मिकेयमाख्यायिका तत्र कथं शाकल्येनाऽदृष्टमात्मानं याज्ञवल्क्यो व्याचष्टे तत्राह ॥ क्रममिति ॥ विज्ञा
नादिवाक्ये वक्ष्यमाणत्वात्किमित्यत्र निर्देश इत्याशंक्याह ॥ त्वरयेति ॥ एतान्यष्टावित्यादिवाक्यस्य पूर्वेणा संगतिमाशंक्याह ॥ ततः पुनरि
क्रममतिक्रम्यौपनिषदस्य पुरुषस्याख्यायिकातोऽपसृत्य श्रुत्या स्वेन रूपेण त्वरया निर्देशः कृतः ततः पुनराख्यायिकामेवाश्रि
त्याह एतानि यान्युक्तानि अष्टावायतनानि पृथिव्येव यस्यायतनमित्येवमादीन्यष्टौ लोका अग्निलोकादयोऽष्टौ देवा अमृतमिति हो
वाचेत्येवमादयः अष्टौ पुरुषाः शारीरः पुरुष इत्यादयः ॥ स यः कश्चित्तान्पुरुषाञ्छारीरप्रभृतीन्निरुह्य निश्चयेनोह्य गमयित्वा
ऽष्टचतुष्कभेदेन लोकस्थितिमुपपाद्य पुनः प्राचीदिगादिद्वारेण प्रत्युह्य उपसंहृत्य स्वात्मनि हृदये यस्त्वक्रामदतिक्रान्तवानुपाधिधर्मं
स यस्तान्पुरुषान्निरुह्य प्रत्युह्यात्यक्रामत्तं त्वौपनिषदं पुरुषं पृच्छामि तं चेन्मे न विवक्ष्यसि मूर्धा ते विपतिष्यतीति तं
ह न मेने शाकल्यस्तस्य ह मूर्धा विपपातापि हास्य परिमोषिणोऽस्थीन्यपजह्रुरन्यन्मन्यमानाः ॥ २६ ॥ हृदयाद्यात्मत्वं स्वेनैवात्म
नाऽव्यवस्थितो यः स औपनिषदः पुरुषोऽशनायादिवर्जितः उपनिषत्स्वेव विज्ञेयो नान्यप्रमाणगम्यस्तं त्वां विद्याभिमानिनं पुरुषं पृ
च्छामि तं चेद्यदि मे न विवक्ष्यसि विस्पष्टं न कथयिष्यसि मूर्धा ते विपतिष्यतीत्याह याज्ञवल्क्यः तं त्वौपनिषदं पुरुषं शाकल्यो न मेने
ह न विज्ञातवान्किल तस्य ह मूर्धा विपपात विपतितः ति ॥ निश्चयेन गमयित्वेत्येतदेव स्पष्टयति ॥ अष्टेति ॥ प्रत्युह्योपसंहृत्येति यावत् ॥ औ
पनिषदत्वं पुरुषस्य व्युत्पादयति ॥ उपनिषत्स्वेवेति ॥ तं हेत्यादि याज्ञवल्क्यस्य वामध्यमस्य वा वाक्यमिति शंकां वारयति ॥ समाप्तेति ॥ ब्रह्मवि

मूर्धा ते विपतिष्यतीति मूर्ध्नि पतिते शापेन किमित्यग्निहोत्राग्निसंस्कारमपि शाकल्यो न प्राप्तवानित्याशंक्याह ॥ पूर्ववदेति ॥ तामेवाख्यायि
कामनुक्रामति ॥ अष्टाध्याय्यामिति ॥ अष्टाध्यायी बृहदारण्यकात्प्राचीनाकर्मविषया पुरे पुण्यक्षेत्रातिरिक्ते देशेऽतिथ्ये पुण्यतिथिशून्ये काले
अस्थीनि चनेति च नशब्दोप्यर्थः ॥ उपवादी परिभवकर्ता तच्छब्दार्थमाह ॥ उतहीति ॥ किमितीयमाख्यायिकात्र विद्याप्रकरणे सूचितेत्याशंक्या

समाम्नाख्यायिकाश्रुतेर्वचनं तं ह न मेने इत्यादि किंचापि हास्य परिमोषिणस्तस्कराः अस्थीन्यपि संस्कारार्थं शिष्यैर्नीयमानानि गृहा
न्प्रति अपजह्रुरपहृतवंतः किंनिमित्तमन्यद्धनं नीयमानं मन्यमानाः पूर्ववदेत्ताख्यायिके ह सूचिता ष्टाध्याय्यां किल शाकल्येन याज्ञ
वल्क्यस्य समानां तस्यैव किल संवादो निर्वृत्तस्तत्र याज्ञवल्क्येन शापो दत्तः पुरेऽतिथ्ये मरिष्यसि न तेऽस्थीनि चन गृहान्प्राप्स्यंतीति स

अथ होवाच ब्राह्मणा भगवंतो यो वः कामयते स मा पृच्छतु सर्वे वा मा पृच्छत यो वः कामयते तं वः पृच्छामि सर्वान्वा वः पृच्छामी
ति ते ह ब्राह्मणा न दधृषुः ॥ २१ ॥

ह तथैव ममार तस्य हाप्यन्यन्मन्यमानाः परिमोषिणोऽस्थीन्यपजह्रुस्तस्मान्नोपवादी स्यादुत ह्येवंवित्प
रो भवतीति ॥ सैषाख्यायिकाचारार्थं सूचिता विद्यास्तुतये चेह ॥ २० ॥ यस्य नेति नेतीत्यन्यप्रतिषेधद्वारेण ब्रह्मणो निर्देशः कृतस्तस्य विधि
मुखेन कथं निर्देशः कर्तव्य इति पुनराख्यायिकामेवाश्रित्याह मूलं च जगतो वक्तव्यमिति आख्यायिकासंबंधस्तु ब्रह्मविदो ब्राह्मणान्जित्वा
गाधनं हर्तव्यमिति न्यायमताह ॥ ह ॥ सैषेति ॥ ब्रह्मविदि विनीतेन भवितव्यमित्याचारः ॥ महतीयं ब्रह्मविद्या यत्तन्निष्ठावज्ञायामैहिकामुष्मि
कविरोधः स्यादिति विद्यास्तुतिः ॥ २० ॥ अथ हेत्यादि उत्तरग्रंथमवतारयति ॥ यस्येत्यादिना ॥ जगतो मूलं च वक्तव्यमित्याख्यायिकामेवाश्रित्याहेति संबं

आख्यायिकाकिमर्थेत्यत आह॥ आख्यायिकेति॥ इति शब्दः संबंधसमाप्त्यर्थः॥ ननु ब्राह्मणेषु तूष्णींभूतेषु प्रतिषेद्धुरभावाद्बोधनं हर्तव्यं किमिति तान्प्रति याज्ञवल्क्यो वदतीत्यत आह॥ न्यायं मत्वेति॥ ब्रह्मस्वं हि ब्राह्मणानुमितिमनापाद्य नीयमानमनर्थायस्यादिति न्यायः॥ संबोध्यो वा चेति सं

अथ होवाच अथानंतरं तूष्णींभूतेषु ब्राह्मणेषु ह उवाच हे ब्राह्मणाः भगवंत इत्येवं संबोध्य यो वो युष्माकं मध्ये कामयते इच्छति याज्ञवल्क्यं पृच्छामीति स मामामागत्य पृच्छतु सर्वे वा मा पृच्छत सर्वे वा यूयं मां मां पृच्छत यो वः कामयते याज्ञवल्क्यो मां पृच्छत्विति तं वः पृच्छामि सर्वान्वा वो युष्मानहं पृच्छामि ते ह ब्राह्मणा न दधृषुस्ते ब्राह्मणा एवमुक्ता अपि न प्रगल्भाः संवृत्ताः किंचिदपि प्रत्युत्तरं वक्तुं॥ ९१॥ तेषु प्रगल्भ

तान्हैतैः श्लोकैः पप्रच्छ यथा वृक्षो वनस्पतिस्तथैव पुरुषोऽमृषा॥ तस्य लोमानि पर्णानि त्वगस्योत्पाटिका बहिः॥ त्वच एवास्य रुधिरं प्रस्यंदि त्वच उत्पटः॥ तस्मात्तदातृण्णात्प्रैति रसो वृक्षादिवाहतात्॥ मांसान्यस्य शकराणि किनाटं स्नाव तत्स्थिरं॥ अस्थीन्यंतरतो दारूणि मज्जा मज्जोपमा कृता॥ भूतेषु ब्राह्मणेषु तान्ह एतैर्वक्ष्यमाणैः श्लोकैः पप्रच्छ पृष्टवान्यथा लोके वृक्षो वनस्पतिर्वृक्षस्य विशेषणं वनस्पतिरिति तथैव पुरुषोऽमृषाऽमृषा सत्यमेतत्तस्य लोमानि तस्य पुरुषस्य लोमानीतरस्य वनस्पतेः पर्णानि त्वगस्योत्पाटिका बहिस्त्वगस्य पुरुषस्येतरस्योत्पाटिका वनस्पतेस्त्वच एव सकाशादस्य पुरुषस्य रुधिरं प्रस्यंदि वनस्पतेस्त्वचः

बंधः॥ यो व इति प्रतीकमादाय व्याचष्टे॥ युष्माकमिति॥ व्याख्यातभागमनूद्य व्याख्येयमादाय व्याकरोति॥ यो व इत्यादिना॥ यथोक्तप्रश्नांतरं ब्राह्मणानामप्रतिभां दर्शयति ते हेति॥ ९१॥ २७॥ स्वकीयज्ञानप्रकर्षप्रकटनार्थमेव प्रश्नांतरमवतारयति॥ तेष्विति॥ वृक्षो वनस्पतिरिति पर्यायत्वात्पुनरु

पुरुषस्य वृक्षसाधर्म्यमेतदित्युच्यते॥ साधर्म्यमेव स्पष्टयति॥ तस्येत्यादिना॥ नीरसा त्वगुत्पाटिके त्युच्यते॥ उत्पटो वृक्षनिर्यासः॥ विशेषाभावमेवा

उत्पटस्त्वचएवोत्स्फुरतियस्मादेवं सर्वं समानमेव वनस्पतेः पुरुषस्य च तस्मात्तदा तृण्णाद्भिं सितात्स्रैतितद्रुधिरं निर्गच्छतिवृक्षादिवा

हतात्छिन्नाद्रसइवएवं मांसानि अस्य पुरुषस्य वनस्पतेस्तानि शकराणिशकलानीत्यर्थः कीनाटं वृक्षस्य कीनाटं नाम शकलेभ्योभ्यं

तरं वल्कलरूपं काष्ठसंलग्नं तत्स्नाववत् पुरुषस्य तत्स्थिरं तच्च कीनाटं स्नाववद्दृढं हि तदस्थीनि पुरुषस्य स्नावभ्यंतरतोस्थीनि भवं

ति तथा कीनाटस्याभ्यंतरतो दारूणि काष्ठानि मज्जा मज्जैव वनस्पतेः पुरुषस्य मज्जोपमा कृता मज्जायाउपमा मज्जोपमानान्यो वि

यद्वृक्षो वृक्णो रोहति मूलान्नवतरः पुनः मर्त्यः स्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति रेतस इति मावोचत जीवतस्त

त्प्रजायते धानारुह इव वैवृक्षो जसा प्रेत्य संभवः यत्समूलमावृहेयुर्वृक्षं न पुनराभवेत् मर्त्यः स्विन्मृत्युना वृक्णः क

स्मान्मूलात्प्ररोहति॥ शेषोस्तित्वस्यार्थः॥ यथा वनस्पतेर्मज्जा तथा पुरुषस्य यथा पुरुषस्य तथा वनस्पतेर्यद्यदि वृक्षो वृक्णाश्छि

न्नो रोहति पुनः प्ररोहति प्रादुर्भवति मूलात्पुनर्नवतरः पूर्वस्मादभिनवतरो यदेतस्माद्विशेषणात्प्राग्वनस्पतेः पुरुषस्य च सर्वं

सामान्यमवगतमयं तु वनस्पतौ विशेषो दृश्यते यश्छिन्नस्य प्ररोहणं न तु पुरुषे मृत्युना वृक्णे पुनः प्ररोहणं दृश्यते भवितव्यं च

भिनयति॥ यथेति॥ साधर्म्ये सति वैधर्म्यं वक्तुमशक्यमित्याशयेनाह॥ यद्यदीति॥ इदमपि साधर्म्यमेव किं न स्यादित्याशंक्याह॥ यदेतस्मादि

ति॥ एतस्माद्विशेषणात्प्राग्यद्विशेषणमुक्तं तत्सर्वमुभयोः सामान्यमवगतमिति संबंधः॥ वृक्णस्यागस्येति शेषः॥ मा भूत्तस्य प्ररोहणमिति चेन्ने

२= अयंभावः नचात्रमृतपुरुषशब्देनैकःशरीरीअभिधीयतेकिंतुप्रलयकालेविलीनंसर्वमेवशरीरजातंजगदभिधीयते=२

ध्रुवंजन्ममृतस्यचेतिस्मृतिरित्यर्थः॥जीवतोहिरेतोजायतेसएवकुतोभवतीतिविचार्यतेनचासिद्धेनासिद्धस्यसाधनंननचपुरुषांतरादितिवा च्यमेकासिद्धावन्यतरप्रयोगानुपपत्तेरितिमन्वानोहेतुमाह॥यस्मादिति॥वैधर्म्यांतरमाह॥अपिचेति॥कांडरुहोपीत्यपेरर्थोवेशब्दःप्रसिद्धिद्यो तकइत्यभिप्रेत्याह॥वैवृक्षइति॥अंजसेत्यादेरर्थमुक्त्वावाक्यार्थमाह॥धानातोपीति॥तथापिकथंवैधर्म्यमित्याशंक्याह॥यद्यदीति॥पुरुषस्यापि

कृतश्चित्प्ररोहणेनतस्माद्धःएकामिमर्त्योमनुष्यःछिन्नःमृत्युनावृक्णःकस्मान्मूलात्प्ररोहतिमृतस्यपुरुषस्यकुतःप्ररोहणमित्यर्थःयदि चेदेवंवदथरेतसःप्ररोहतीतिमावोचतमैवंवक्तुमर्हथकस्माद्यस्माज्जीवतःपुरुषात्तद्रेतःप्रजायतेनमृतादपिचधानारुहोधानाबीजे बीजरुहोपिवृक्षोभवतिनकेवलंकांडरुहएवद्वशब्दोनर्थकःवैवृक्षोंजसासासाक्षात्प्रेत्यमृत्वासंभवोधानातोपिप्रेत्यसंभवोभवेदंजसा

जातएवनजायतेकोन्वेनंजनयेत्पुनः॥विज्ञानमानंदंब्रह्मरातिर्दातुःपरायणं॥तिष्ठमानस्यतद्विदइति॥इतिबृहदारण्य केतृतीयोऽध्यायः॥३॥नवमंब्राह्मणं॥९॥ पुनर्वनस्पतेःयद्यदिसहमूलेनधानयावावृहेयुरुद्यच्छेयुरुत्पाटयेयुर्वृक्षंनपुनराभवे सुनरागत्यनभवेत्तस्माद्धःएकामिसर्वस्यैवजगतोमूलंमर्त्यःछिन्नःमृत्युनावृक्णःकस्मान्मूलात्प्ररोहति॥जातएवेतिमन्यध्वंयदिकिमत्रप्र ष्टव्यमितिजनिष्यतोहिसंभवःप्रष्टव्योनजातस्यायंतुजातएवातोस्मिन्विषयेप्रश्नएवनोपपद्यतइतिचेतन्नकिंतर्हिमृतःपुनरपिजाय तएवान्यथाऽकृताभ्यागमकृतविप्रनाशप्रसंगादतोवःएकामिकोन्वेनंमृतंपुनर्जनयेत्तन्नविजज्ञुर्ब्राह्मणायतोमृतःपुनःप्ररोहति पुनरुत्प तिर्माभूदित्याशंक्यपूर्वोक्तंनिगमयति॥तस्मादिति॥स्वभाववादमुत्थापयति॥जातइति॥इतिशब्दश्चाद्यसमाप्त्यर्थः॥तदेवस्फुटयति॥जनिष्यतोहि

यदिप्रपंचोजातएवेतिकिमत्रप्रष्टव्यमितिभोब्राह्मणायूयंमन्यध्वं=४

सभावासंभवेफलितमाह॥अतइति॥उक्तमेवस्फुटयति॥जगतइति॥ब्रह्मविदांश्रेष्ठत्वेयाज्ञवल्क्यस्यसिद्धेफलितमाह॥अतइति॥समाप्ताख्या
यिकेति॥ब्राह्मणाश्चसर्वेयथायथंजग्मुरित्यर्थः॥विज्ञानादिवाक्यमुत्थापयति॥यज्जगतइत्यादिना॥विज्ञानशब्दस्यकरणादिविषयत्वंवारय
ति॥विज्ञप्तिरिति॥आनंदविशेषणस्यकृत्यंदर्शयति॥नेत्यादिना॥प्रसन्नंदुःखहेतुनाकामक्रोधादिनासंबंधरहितंशिवंकामादिकारणेनाज्ञाने
नापिसंबंधशून्यंसातिशयत्वंप्रयुक्तदुःखराहित्यमाह॥अतुलमिति॥साधनसाध्यत्वाधीनदुःखवैधुर्यमाह॥अनायासमिति॥दुःखनिवृत्तिमात्रं

जगतोमूलंनविज्ञातंब्राह्मणैरतोब्रह्मिष्ठत्वाद्धृतागावोयाज्ञवल्क्येनजिताब्राह्मणाःसमाप्ताख्यायिकायज्जगतोमूलंयेनचशब्देनसाक्षाद्व्य
पदिश्यतेब्रह्मयद्याज्ञवल्क्योब्राह्मणान्पृष्टवांस्तत्स्वेनरूपेणाश्रुतिरस्मभ्यमाह॥विज्ञानंविज्ञप्तिर्विज्ञानंनच्चानंदंनविषयविज्ञानवद्दुः
खानुविद्धंकिंतर्हिप्रसन्नंशिवमतुलमनायासंनित्यतृप्त मेकरसमित्यर्थः किंतद्ब्रह्मोभयविशेषणवद्रातिःरातेःषष्ठ्यर्थेप्रथमाधन
स्येत्यर्थोधनस्यदातुःकर्मकृतोयजमानस्यपरायणंपरागतिःकर्मफलस्यप्रदात्॥किंच॥व्युत्थायैषणाभ्यस्तस्मिन्नेवब्रह्मणितिष्ठत्य
कर्मकृत्तद्ब्रह्मवेत्तीतितद्विज्ञतस्यतिष्ठमानस्यतद्विदोब्रह्मविदइत्यर्थः॥परायणमिति॥९२॥अत्रेदंविचार्यते॥आनंदशब्दोलोकेसुख
वाचीप्रसिद्धोऽत्रचब्रह्मणोविशेषणत्वेनानंदशब्दःश्रूयतेआनंदंब्रह्मेतिश्रुत्यंतरे सुखमितिपरंप्रतिक्षिपति॥नित्यतृप्तंइति॥आनंदोज्ञा

नमितिब्रह्मण्याकारभेदमाशंक्याह॥एकरसमिति॥फलमतउपपत्तेरितिन्यायेनब्रह्मणोजगन्मूलत्वमाह॥रातेरित्यादिना॥ब्रह्मसंस्थोमृतत्वमेती
तिश्रुत्यंतरमाश्रित्यतस्यैवमुक्तोपसृप्यत्वमुपदिशति॥किंचेति॥अक्षरव्याख्यासमाप्ताविति शब्दः॥९६॥सच्चिदानंदात्मकंब्रह्मविद्याविद्याभ्यांबंध
मोक्षास्पदमित्युक्तं॥इदानींब्रह्मानंदेविचारमवतारयन्नविगीतमर्थमाह॥अत्रेति॥तथापिप्रकृतेवाक्येकिमायातमितितदाह॥अत्रेति॥ ॥

नचकेवलमत्रैवानंदशब्दोब्रह्मविशेषणार्थकत्वेनश्रुतः किंतुतैत्तिरीयकादावपीत्याह॥श्रुत्यंतरेचेति॥ब्रह्मविशेषणत्वेनानंदशब्दःश्रूयतइति
संबंधः॥अन्याःश्रुतीरेवोदाहरति॥आनंदइत्यादिना॥एवमाद्याःश्रुतयइतिशेषः॥तथापिकथंविचारसिद्धिस्तत्राह॥संवेद्येति॥लोकप्रसिद्धे
रद्वैतश्रुतेश्चब्रह्मण्यानंदःसंवेद्योऽसंवेद्योवेतिविचारःकर्तव्यइत्यर्थः॥उभयत्रफलंदर्शयति॥ब्रह्मानंदश्चेति॥अन्यथालोकवेदयोःशब्दार्थ
भेदादविशिष्टस्तुवाक्यार्थइतिन्यायविरोधःसंवेद्यत्वेपुनरद्वैतश्रुतिरविरुद्धेतिभावः॥विचारमाक्षिपति॥नन्विति॥विरुद्धश्रुत्यर्थनिर्णयार्थं

चानंदोब्रह्मेतिव्यजानादानंदंब्रह्मणोविद्वान्यदेषआकाशआनंदोयोवैभूमातत्सुखमितिचएषोस्यपरमआनंदइत्येवमाद्याः॥
संवेद्येचसुखेआनंदशब्दःप्रसिद्धो ब्रह्मानंदश्चयदिसंवेद्यःस्यात्तदुक्ताएतेब्रह्मण्यानंदशब्दाःननुचश्रुतिप्रामाण्यात्संवेद्यानंदस्व
रूपमेवब्रह्मकिंतत्रविचार्यमितिन विरुद्धश्रुतिवाक्यदर्शनात्सत्यमानंदशब्दोब्रह्मणिश्रूयतेविज्ञानप्रतिषेधश्चैकत्वेयत्रत्वस्यसर्व
मात्मैवाभूत्तत्केनकंपश्येद्विजानीयाद्यत्रनान्यत्पश्यतिनान्यद्विजानातिप्राज्ञेनात्मनासंपरिष्वक्तोनबाह्यंकिंचनवेदेत्यादिविरुद्धश्रुति
वाक्यदर्शनात्तेनकर्तव्योविचारस्तस्मात्तदुक्तंवेदवाक्यार्थनिर्णयायविचारयितुं॥मोक्षवादिविप्रतिपत्तेश्चसांख्यावैशेषिकाश्चमोक्षवादि
नोनास्तिमोक्षेसुखंसंवेद्यमित्येवंप्रतिपन्नाअन्येनिरतिशयसुखंस्वसंवेद्यमितिएवंविप्रतिपत्तौकिंतावद्युक्तमानंदादिश्रवणा

विचारकर्तव्यतांदर्शयति॥नेति॥संग्रहवाक्यंविवृणोति॥सत्यमित्यादिना॥एकत्वेसतिविज्ञानप्रतिषेधश्रुतिमेवोदाहरति॥यत्रेत्यादिना॥इ
त्यादिश्रवणमितिविशेषः॥फलितमाह॥विरुद्धश्रुतीति॥श्रुतिविप्रतिपत्तेर्विचारकर्तव्यतामुपसंहरति॥तस्मादिति॥तत्रैवहेत्वंतरमाह॥मोक्षे
ति॥तामेवविप्रतिपत्तिंविवृणोति॥सांख्याइति॥विमर्शपूर्वकंपूर्वपक्षंगृह्णाति॥किंतावदित्यादिना॥आनंदादिश्रवणाद्विज्ञानमानंदंब्रह्मेतिश्रुतेर्मोक्षेसु

तत्रैवावाक्यांतराण्युदाहरति॥जक्षन्नित्यादिना॥पूर्वपक्षमाक्षिपति॥नन्विति॥मोक्षेचेदिष्यतेसुखज्ञानंतर्हितदानेककारकसाध्यंवाच्यंक्रियात्वा
त्पाकादिवत्तस्यैकत्वेचमोक्षेकारकविभागाभावान्नसुखसंवेदनंसंभवतीत्यर्थः॥जन्यस्यकारकापेक्षायामपिसुखज्ञानस्याजन्यत्वान्नतदपेक्षेत्या
शंक्याह॥क्रियायाश्चेति॥याक्रियानेककारकसाध्येतिव्याप्तेर्गमनादाववगतत्वात्॥ज्ञानस्यापिधात्वर्थत्वेनक्रियात्वादनेककारकसाध्यतासि
द्धैवेत्यर्थः॥श्रुतिप्रामाण्यमाश्रित्यपूर्ववादीपरिहरति॥नैषदोषइति॥तदेवस्फुटयति॥विज्ञानमिति॥अद्वये ब्रह्मणिश्रुतिप्रामाण्यादानंदज्ञानमु

ज्जक्षन्क्रीडन्रममाणःसयदिपितृलोककामोभवतिसर्वज्ञःसर्वविल्सर्वान्कामान्समश्नुतइत्यादिश्रुतिभ्योमोक्षेसुखंसंवेद्यमि
तिनन्वेकत्वेकारकविभागाभावाद्विज्ञानानुपपत्तिः॥क्रियायाश्चानेककारकसाध्यत्वाद्विज्ञानस्यचक्रियात्वान्नैषदोषःशब्द
प्रामाण्याद्वेदेहिज्ञानमानंदविषयेविज्ञानमानंदमित्यादीन्यानंदस्वरूपस्यासंवेद्यत्वेऽनुपपन्नानिवचनानीत्यवोचामननुव
चनेनाप्यग्नेःशैत्यमुदकस्यचौष्ण्यंनक्रियतएव॥ज्ञापकत्वाद्वचनानां॥नचदेशांतरेऽग्निःशीतइतिशक्यतेज्ञापयितुमगम्येवा
देशांतरेउष्णमुदकमिति॥प्रत्यगात्मन्यानंदविज्ञानदर्शनात्॥नविज्ञानमानंदमित्येवमादीनांवचनानांशीतोऽग्निरित्यादिवाक्य
वत्प्रत्यक्षादिविरुद्धार्थप्रतिपादकत्व

क्रमाक्षिपति॥नन्विति॥अद्वैतश्रुतिविरोधाद्ब्रह्मणिविज्ञानक्रियाकारकविभागापेक्षानोपपद्यते॥न
हिविज्ञानमानंदमित्यादिवचनानिमानांतरविरोधेनविज्ञानक्रियांब्रह्मण्युत्पादयंतितेषांज्ञापकत्वाज्ज्ञापकस्यचाविरोधापेक्षत्वादन्यथातिप्रसं
गादित्यर्थः॥लौकिकज्ञानस्यक्रियात्वेपिमोक्षेसुखज्ञानंक्रियैवनभवतितन्नविज्ञानादिवाक्यस्याद्वैतश्रुतिविरोधोस्तीत्याशंक्याह॥नचेति॥पयःपावकयोः
सर्वत्रैकरूपत्ववद्विज्ञानस्यापिलोकवेदयोरेकरूपत्वमेवेतिभावः॥मानांतरविरोधादात्मन्यानंदज्ञानस्यसत्वमेववानिषिध्यतेतस्यक्रियात्वंवानिराक्रिय
वचनानामुत्पादकत्वांगीकारेकर्तव्यैतिप्रसंगात्॥३

अ· ५ ष्ठतेनत्रायंदूषयति॥नेत्यादिना॥तदेवस्फु
टयति॥नविज्ञानमिति॥

आनंदज्ञानस्य गुणत्वांगीकारेण=२ २ब्रह्मकृतगुणनिषेधत्वेन=२ २=सगुणागमस्य यः सर्वज्ञः सर्वविदित्यादेः=२ नैकेनकंपश्येत् १

सुखज्ञानस्य गुणत्वांगीकाराक्रियात्वनिराकरणमिष्टमेवेतिमत्वाह॥ अनुभूयते त्विति॥ अनुभवमेवाभिनयति॥ सुख्यहमिति॥ तथापि श्रुतिविरोधः स्यादित्याशंक्य प्रत्यक्षानुसारेण सापि नेतव्येत्याशयेनाह॥ तस्मादिति॥ आत्मन्यानंदज्ञानस्य क्रियात्वानंगीकारात्कारकभेदापेक्षाभावादित्यर्थः॥ गुणत्वपक्षे च प्रत्यक्षानुगुणत्वादागमविरोधिनस्तदनुसारेण नेयत्वाद विरुद्धागमस्य भूयस्त्वादित्यतिशयः॥ अविरुद्धार्थत्वा विज्ञानादिश्रुतेरितिशेषः गुणगुणिभावेपि नाद्वैतश्रुतिः शक्या नेतुमित्याशंक्य स्ववेद्यत्वपक्षमाश्रित्याह॥ तस्मादानंदमिति॥ यथाकथंचिद्ब्रह्मण्यानंदस्य वेद्यत्वे श्रुतीनामा

२क्वचापि प्रत्यक्षे गुणस्य कारकापेक्षा नास्ति=२ निर्गुण श्रुतेः २

मनुभूयते त्वविरुद्धार्थता सुख्यहमिति सुखात्मकमात्मानं स्वयमेव वेदयते तस्मात्सुतरां प्रत्यक्षाद्यविरुद्धार्थत्वात्तस्मादानंदं ब्रह्म विज्ञानात्मकं सत्स्वयमेव वेदयते तथानंदप्रतिपादिकाः श्रुतयः समंजसाः स्युर्जक्षन्क्रीडन्रममाणइत्येवमाद्याः पूर्वोक्ताः न कार्यकरणाभावेनुपपत्तेर्विज्ञानस्य शरीरवियोगो हि मोक्ष आत्यंतिकः शरीराभावे च करणानुपपत्तिराश्रयाभावात्ततश्च विज्ञानानुपपत्तिरकार्यकरणत्वाद्देहाद्यभावे च विज्ञानोत्पत्तौ सर्वेषां कार्यकरणोपादानानर्थक्यप्रसंगः एकत्वविरोधाच्च॥ परं चेद्ब्रह्मानंदात्मकमात्मानं नित्यविज्ञानत्वान्नित्यमेव विजानीयात्॥ तन्न॥ नुगुण्यमस्तीत्याह॥ तथेति॥ आनंदो वेद्यो ब्रह्मणीति चोदिते सिद्धांतमाह॥ नेति॥ आगंतुकमनागंतुकं वा ज्ञानं मुक्तावानंदं गोचरयति नाद्य इत्याह॥ कार्येति॥ अनुपपत्तिमेव स्फोरयति॥ शरीरेति॥ कार्यकरणयोरभावेपि मोक्षे ब्रह्मानंदज्ञानं जनिष्यते संसारे हि हेत्वपेक्षेत्याशंक्याह॥ देहादीति॥ द्वितीयं दूषयति॥ एकत्वेति॥ न हि ब्रह्मस्वरूपज्ञानेनैव वेद्यानंदस्वरूपं भवितुमुत्सहते विषयविषयिणोरेकत्वविरोधात्ततश्चानागंतुकमपि ज्ञानं मुक्तौ नानंदमधिकरोतीत्यर्थः॥ किंच॥ ब्रह्म वा मुक्तो वा संसारी वा ब्रह्मानंदगोचरयेत्तत्राद्यमनुवदति॥ परं चेदिति॥ तस्मिन्पक्षेन ब्रह्मस्वरूपानंदं वेत्ति तेनैक्यादेकत्र विषयविषयित्वानुपपत्तेरुक्तत्वादिति दूषयति॥ न

टि

बृ.र.
६९

नापिसंसारीब्रह्मानंदंगोचरयतिसखल्वनिवृत्तेसंसारेसंसारिणमात्मानमभिमन्यमानोनब्रह्मानंदमाकलयितुमलंसंसारेनिवृत्तेतुततोविनिर्मु
क्तोब्रह्मस्वाभाव्यंप्रतिपद्यमानस्तदानंदंतद्वदेवविषयीकर्तुंनार्हतीतितत्तीयंप्रस्याह॥संसार्यपीति॥मुक्तोपिब्रह्मणोभिन्नोऽभिन्नोवेतिविक
ल्प्याभेदपक्षमनुभाषतेजलेति॥ब्रह्माभिन्नस्यमुक्तस्यतदानंदविषयीकरणमुक्तन्यायेननिरस्यति॥तदेति॥भेदपक्षमनुवदति॥अथेति॥ब्र
ह्मानंदंप्रत्यगात्मानमितिसंबंधः॥वेदनप्रकारमभिनयति॥अहमिति॥तत्वमस्यादिश्रुतिविरोधेननिराकरोति॥तदेति॥मुक्तोब्रह्मणःसकाशा

संसार्यपिसंसारविनिर्मुक्तःतत्स्वाभाव्यंप्रतिपद्यतेजलाशयइवोदकांजलिःक्षिप्तोनपृथक्त्वेनव्यवतिष्ठतेआनंदात्मकब्रह्मविज्ञाना
यतदामुक्तआनंदात्मकमात्मानंवेदयतइत्येतदनर्थकंवाक्यमथब्रह्मानंदमन्यःसन्मुक्तोवेदयतेप्रत्यगात्मानंवाहमस्म्यानंदस्वरूपइ
तितदैकत्वविरोधस्तथाचसतिसर्वश्रुतिविरोधस्तत्तीयात्रकल्पनानोपपद्यतेकिंचान्यद्ब्रह्मणश्चनिरंतरात्मानंदविज्ञानेविज्ञानाविज्ञा
नकल्पनानर्थक्यं॥निरंतरंचेदात्मानंदविषयंब्रह्मणोविज्ञानंतदेवतस्यस्वभावइत्यात्मानंदंविजानातीतिकल्पनानुपपन्नाअतद्वि
ज्ञानप्रसंगेहिकल्पनायाअर्थवत्वंयथात्मानंपरंचवेत्तीति॥नहीषाद्यासक्तमनसोनैरंतर्येणोपज्ञानकल्पनायाअर्थवत्वमथविच्छिन्न
=विजानातीतितिङंतप्रयोगस्य=
मात्मानंदंविजानातीति
द्भिन्नोऽभिन्नोवामाभूद्भिन्नाभिन्नस्तुस्यादित्याशंक्याह॥तत्तीयेति॥सर्वत्रभेदाभेदवादस्यदूषितत्वादित्यर्थः॥ब्रह्मणः
स्वानंदस्यावेद्यत्वेहेत्वंतरमाह॥किंचान्यदिति॥तदेवोपपादयति॥निरंतरंचेदिति॥आख्यातप्रयोगस्यतर्हिकुत्रार्थवत्वंतत्राह॥अतद्विज्ञानेति॥दे
वदत्तोहिअबुद्धिपूर्वकारित्वावस्थायांस्वात्मानमन्यंचविविच्यजानातिनान्यदेत्युभयपश्चात्तदर्शनात्तत्राख्यातप्रयोगोयुज्यतेनैवंब्रह्मण्यज्ञानप्रसंगो
स्तिनित्यज्ञानस्वभावत्वात्तथाचतत्राख्यातप्रयोगोनार्थवानित्यर्थः॥ब्रह्मण्याख्यातप्रयोगानर्थक्यंदृष्टांतेनस्पष्टयति॥नहीति॥प्रत्यगात्मनिनित्यज्ञान
=२आख्यातप्रयोगस्याभावप्रयुक्तत्वांगीकारेआख्यातप्रयोगवैयर्थ्यादभावप्रयुक्तत्वदर्शनात्=२

अ.
५

रामः
६९

विच्छिन्नमितिक्रियाविशेषणं॥परिहरति॥विज्ञानस्येति॥आत्मनोविज्ञानस्यछिद्रमंतरालमसत्तावस्थातदापिविज्ञानमस्तिचेत्तस्यान्यविषयत्व
प्रसंगस्तथाचयत्रान्यत्पश्यतीत्यादिश्रुतेरात्मनोमर्त्यत्वापत्तेर्नचेत्तदाविज्ञानंतदापाषाणवदचेतनत्वंविज्ञप्तिरूपत्वानंगीकारादित्यर्थः॥आ
त्मनोनित्यज्ञानवत्वेदोषांतरमाह॥आत्मनश्चेति॥आनंदज्ञानेब्रह्मणिविषयविषयित्वाप्रयोगश्चेत्कथंविज्ञानादिवाक्यमित्याशंक्योप
संहरति॥तस्मादिति॥ब्रह्मण्यानंदस्यावेद्यत्वेश्रुतिविरोधमुक्तंस्मारयति॥जक्षदिति॥सर्वत्रात्मनोमुक्तस्यैक्येसतियोग्यादिषुयथाज
क्षणादिप्राप्तंतथैवतदनुवादित्वादस्याःश्रुतेर्नविरोधोस्तीतिपरिहरति॥नेत्यादिना॥तदेवप्रपंचयति॥मुक्तस्येति॥किमनुवादेफलमिति

विज्ञानस्यात्मविज्ञानच्छिद्रेऽन्यविषयत्वप्रसंगःआत्मनश्चविक्रियावत्वंततश्चानित्यत्वप्रसंगस्तस्माद्विज्ञानमानंदमितिस्वरूपा
न्वाख्यानपरैवश्रुतिर्नात्मानंदसंवेद्यत्वार्था॥जक्षत्क्रीडन्नित्यादिश्रुतिविरोधःसंवेद्यत्वइतिचेन्नसर्वात्मैकत्वेयथाप्राप्तानुवा
दित्वान्मुक्तस्यसर्वात्मभावेसतियत्रक्वचिद्योगिषुदेवेषुवाजक्षणादिप्राप्तंतद्यथाप्राप्तमनूद्यतेतत्तस्यैवसर्वात्मभावादितिस
र्वात्मभावमोक्षस्तुतयेयथाप्राप्तानुवादित्वेदुःखित्वमपीतिचेद्योग्यादिषुयथाप्राप्तजक्षणादिवत्स्थावरादिषुयथाप्राप्तदुःखि
त्वमपीतिचेत्॥न॥

चेत्तदाह॥तत्तस्येति॥मुक्तस्ययोग्यादिषुसर्वत्रात्मभावादेवतत्रप्राप्तंजक्षणाद्यत्रमुक्तिस्तुतयेनूद्यतेतन्नानुवादवैय
र्थ्यमित्यर्थः॥विदुषःसार्वात्म्येनयोग्यादिषुप्राप्तजक्षणाद्यनुवादेस्यादितिप्रसक्तिरितिशंकते॥यथाप्राप्तेति॥अतिप्रसंगमेवप्रकटयति॥यो
ग्यादिष्विति॥अविद्यात्मकनामरूपविरचितोपाधिद्वयसंबंधनिबंधनमिथ्याज्ञानाधीनत्वादात्मनिदुःखित्वादिप्रतीतेर्नतत्रवस्तुतोदुःखित्वं
नजक्षणाद्यपिवास्तवमाविद्यस्यैवमुक्तिस्तुतयेनुवादात्दुःखित्वस्यहिनानुवादइतिहीनत्वप्राप्तेरितिपरिहरति॥नेत्यादिना॥ ॥ ॥ ॥

यत्तु विरुद्धश्रुतिदृष्टेर्नागमार्थो निर्णीतो भवतीति तत्राह ॥ विरुद्धेति ॥ वेद्यत्वावेद्यत्वादिश्रुतीनां सोपाधिकनिरुपाधिकविषयत्वेन मधुकांडे
व्यवस्थोक्तेरित्यर्थः ॥ ब्राह्मणार्थमुपसंहरति ॥ तस्मादिति ॥ ब्रह्मण्यानंदवेद्यतायादुर्निरूपत्वं तच्छब्दार्थः ॥ यथैषो ऽस्येत्यत्र भेदो न विवक्षितः स
र्वात्मभावस्य प्रकृतत्वात्तथा विज्ञानादिवाक्येष्वानंदस्य वेद्यता न विवक्षितोक्तरीत्यात द्वेद्यतायाः दुष्प्रतिपादकत्वात्तस्मादनतिशयानंदं चि

नामरूपकृतकार्यकरणोपाधिसंपर्कजनितभ्रांत्यध्यारोपितत्वात्सुखित्वदुःखित्वादिविशेषस्येति परिहृतमेतत्स
र्वं विरुद्धश्रुतीनां च विषयमवोचाम ॥ तस्मादेषो ऽस्य परम आनंद इति यत्सर्वाण्यानंदवाक्यानि द्रष्टव्यानि ॥ १२ ॥
हरिः ॐ तत्सदिति श्रीमद्गोविंदभगवत्पूज्यपादशिष्यश्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवत्पूज्य
कृतौ बृहदारण्यके पंचमप्रपाठके नवमब्राह्मणभाष्यं ॥ ९ ॥ समाप्तोयं पंचमः प्रपाठकः ॥ मूल २२५ भाष्य १२००
टीका १५००

देकतानंदं वस्तु सिद्धमित्यर्थः ॥ १२ ॥ ९ ॥ हरिः ॐ तत्सदिति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानंदपूज्यपादशिष्यश्रीमदानंदज्ञानं
दज्ञानकृतायां श्रीमद्बृहदारण्यकभाष्यटीकायां पंचमे प्रपाठके नवमं ब्राह्मणं ॥ ९ ॥ समाप्तश्चायमध्यायः ॥ ॥ ॥ ॥ ॥

॥ ॐ नमस्तु ॥

इतिसटीकबृहदारण्योपनिषद्भाष्यस्यपंचमोध्यायःसमाप्तः

॥श्रीकृष्णानंदरामसमर्थ॥

अथसटीकबृहदारण्यभाष्यस्यचतुर्थोध्यायः प्रारभ्यते॥

बृ·र·
१

श्रीगणेशायनमः॥तृतीयेध्यायेसूत्रितविद्याविद्ययोरविद्याप्रपंचितासंप्रतिविद्यांप्रपंचयितुंचतुर्थमध्यायमारभमाणोवृत्तंकीर्त्तयत्यात्मेति॥
किमित्यर्थांतरेषुसत्स्वात्मतत्वमेवानुसंधातव्यंतत्राह॥तदन्वेषणेति॥तस्यैवान्वेष्टव्यत्वेपरमप्रेमास्पदत्वेनपरमानंदत्वंहेतुत्वंतरमाह॥तदेवेति॥
आत्मतत्वज्ञानस्यसर्वाप्तिफलत्वाच्चतदेवान्वेष्टव्यमित्याहात्मानमिति॥उक्तयापरिपाट्यासिद्धमर्थंसंगृह्णात्यात्मतत्वमिति॥उक्तमर्थांतरमनुवदति
॥यस्त्विति॥सोऽविद्याविषयइतिसंबंधः॥कथंभेददृष्टिविषयस्याविद्याविषयत्वंतत्राहान्योसाविति॥योभेददृष्टिपरःसनवेदेत्यविद्यातदृष्टिमूलंस

श्रीगणेशायनमः॥आत्मेत्येवोपासीत॥तदन्वेषणेचसर्वमन्विष्टंस्यात्॥तदेवचात्मतत्वंसर्वस्मात्प्रेयस्त्वादन्वेष्टव्यमात्मानमेवावेदहं
ब्रह्मास्मीत्यात्मतत्वमेकंविद्याविषयः॥यस्तुभेददृष्टिविषयःसोऽन्योसावन्योहमस्मीतिनसवेदेत्यविद्याविषयः॥एकधैवानुद्रष्टव्यम्
त्योःसमृत्युमाप्नोतियइहनानेवपश्यतीत्येवमादिभिःप्रविभक्तौविद्याऽविद्याविषयौसर्वोपनिषत्सु॥तत्रचाविद्याविषयःसर्वएवसाध्य
साधनादिभेदविशेषविनियोगेनव्याख्यातआतृतीयाध्यायपरिसमाप्तेः॥सचव्याख्यातोऽविद्याविषयःसर्वएवद्विःप्रकारांतःप्राणउपष्टंभ
कोगृहस्येवस्तंभादिलक्षणःप्रकाशकोऽमृतो

त्रितातेनतद्विषयोभेददृष्टिविषयइत्यर्थः॥कथंयथोक्तौविद्याविद्याविषयावसंकीर्णावन्वसातुंश
क्येतेतत्राहैकधेति॥सप्तान्नब्राह्मणेवृत्तमर्थंकथयति॥तत्रचेति॥विद्याविद्याविषययोरितियावत्॥आदिपदंसाध्यसाधनावांतरभेदसंग्रहार्थं
॥यथोक्तोभेदएवविशेषः॥तस्मिन्विनियोगोव्यवस्थापनंतेनेत्यर्थः॥उपसंहारब्राह्मणांतेवृत्तमनुभाषते॥सचेति॥अथवाउक्तौविद्याविद्याविष
यौकथमसंकीर्णौमंतव्यावित्याशंक्याहैकधेति॥तत्रोत्तरग्रंथस्यविषयपरिशेषार्थंपुरुषविधब्राह्मणशेषमारभ्योक्तंदर्शयति॥तत्रचेति॥तर्हिंस
मासत्वादविद्याविषयस्यकथमविदुषोगार्ग्यस्यप्रवृत्तिरित्याशंक्यतदर्थमवांतरविभागमनुवदति॥सचेति॥तावेवप्रकारौदर्शयन्नादौसूक्ष्मंशरीरमुप

अ·
४

रामः
१

तस्यबाह्यकरणद्वारास्थूलेषुविषयेषुप्रकाशकत्वममृतत्वंचव्युत्पादितंद्वितीयंप्रकारमाचक्षाणःस्थूलंशरीरंदर्शयति॥बाह्यश्चेति॥तस्यकयापिविध
यासूक्ष्मदेहंप्रत्यप्रकाशकत्वादप्रकाशकत्वं॥आगमापायित्वेनावहेयत्वंसूचयत्युपजनेति॥यथागृहस्यतृणादिःबहिरंगंतथासूक्ष्मस्यदेहस्यस्थूल
देहस्तथापितृणादिविनागृहस्यव्यवहारायोग्यत्ववत्तस्यापिस्थूलदेहंविनानतद्योग्यत्वमितिमत्वाह॥तृणेति॥तस्यपूर्वब्राह्मणोतेनामरूपेसत्यमि
त्यत्रप्रस्तुतत्वंअस्तीत्याह॥सत्येति॥सर्वथाबाधवैधुर्य्यंसत्यत्वमितिशंकांनिरसितुंविशिनष्टिमर्त्यंइति॥तस्यकार्यंदर्शयति॥तेनेति॥वृत्तम
नूद्याजातशत्रुब्राह्मणमवतारयतिसएवेति॥आदित्यचंद्रादयोबाह्याधारभेदाः॥अनेकधात्वमतिष्ठामूर्द्धेत्यादिवस्यमाणगुणवशात्द्रष्टव्यं॥

बाह्यश्चकार्यलक्षणोऽप्रकाशकःउपजनापायधर्मकस्तृणकुशमृत्तिकासमोगृहस्येवसत्यशब्दवाच्योमर्त्यस्तेनामृतशब्दवाच्यःप्रा
णश्छन्नइतिचोपसंहृतं॥सएवचप्राणोबाह्याधारभेदेष्वनेकधाविस्तृतःप्राणएकोदेवइत्युच्यते॥तस्यैवबाह्यःपिंडएकःसाधार
णोविराड्वैश्वानरआत्मापुरुषविधःप्रजापतिःकोहिरण्यगर्भइत्यादिभिःपिंडप्रधानशब्दैराख्यायते॥सूर्यादिप्रविभक्तकरणः॥एकंचा
नेकंचब्रह्मैतावदेवनातःपरमस्ति॥प्रत्येकंचशरीरभेदेषुपरिसमाप्तंचेतनावत्कर्तृभोक्तृचेत्यविद्याविषयमेवात्मत्वेनोपगतोगार्ग्यो
ब्राह्मणोवक्तोपस्थाप्यते॥

कथंतर्हितस्यैकत्वंतत्राहप्राणइति॥प्राणस्यनानात्वमेकत्वंचोक्तंतत्रैकत्वंविवृणोति॥तस्यैवेति॥प्राणस्यैवस्वभावभू
तोनात्मलक्षणःपिंडःसमष्टिरूपोहिरण्यगर्भादिशब्दैरुपाधिविषयैस्तत्रतत्रश्रुतिस्मृत्योरुच्यते॥सचाग्निर्मूर्द्धाचक्षुषीचंद्रसूर्यावित्यादिश्रुतेःसूर्या
दिभिःप्रविभक्तैःकरणैरुपेतोभवतीत्यर्थः॥यद्ब्रह्मसमस्तंव्यस्तंचतदिदंहिरण्यगर्भमात्रमेवनतस्मादधिकमस्तीतिहिरण्यगर्भस्तोत्येकंचेति॥एक
त्वंविशदीकृत्यप्राणस्यनानात्वंविशदयतिप्रत्येकंचेति॥गोत्वादिसामान्यतुल्यत्वंव्यावर्त्तयतिचेतनावदिति॥केवलभोक्तृत्वपक्षंवारयतिकर्त्रिति॥व

तस्मादमुख्यात्ब्रह्मणोविपरीतंमुख्यंब्रह्मतस्मिन्नात्मदर्शीराजाश्रोतासिद्धांतवादीत्यर्थः॥किमितिवक्तृश्रोतृरूपाख्यायिकाप्रणीयतेतत्राहएवंही
ति॥एवंशब्दार्थमेवस्फुटयतिपूर्वपक्षेति॥अतोभवितव्यमाख्यायिकयेतिशेषः॥आख्यायिकानंगीकारेदोषमाहविपर्ययेहीति॥यथातर्कशास्त्रे
णसमर्प्यमाणोर्थोज्ञातुंनशक्यतेऔत्प्रेक्षिकतर्काणांनिरंकुशत्वात्तथाकेवलमर्थोनुगम्यतेप्रश्नप्रतिवचनभावरहितैर्वाक्यैस्तैःसमर्प्यमाणोपिदु
र्विज्ञेयोर्थःस्याद्यद्याख्यायिकानानुश्रीयतेऽतःसासुखप्रतिपत्त्यर्थमनुसर्त्तव्येत्यर्थः॥कुतोदुर्विज्ञेयत्वंतत्राहात्यंतेति॥यथोक्तस्यवस्तुनोदुर्विज्ञेयत्वेश्रु

तद्विपरीतात्मदृग्राजातच्छत्रुःश्रोता॥एवंहियतःपूर्वपक्षसिद्धांताख्यायिकारूपेणसमर्प्यमाणोर्थःश्रोतुश्चित्तस्यवशमेतिविपर्ययेहि
तर्कशास्त्रवत्केवलार्थानुगमवाक्यैःसमर्प्यमाणोदुर्विज्ञेयःस्यात्॥अत्यंतसूक्ष्मत्वाद्वस्तुनः॥तथाचकाठके॥श्रवणायापिबहुभिर्योन
लभ्यइत्यादिवाक्यैःसुसंस्कृतदेवबुद्धिगम्यत्वंसामान्यमात्रबुध्यगम्यत्वंचसप्रपंचंप्रदर्शितं॥आचार्यवानाचार्याद्धैवविद्येतिचच्छांदोग्ये
उपदेक्ष्यंतितेज्ञानंज्ञानिनस्तत्वदर्शिनइतिचगीतासुइहापिचशाकल्ययाज्ञवल्क्यसंवादेनातिगह्वरत्वंमहतासंरंभेणब्रह्मणोवक्ष्यति॥
तस्मात्श्लिष्टएवाख्यायिकारूपेणपूर्वपक्षसिद्धांतरूपमापाद्यवस्तुसमर्पणार्थआरंभः॥आचारविद्युपदेशार्थश्च॥एवमाचारवतोर्वक्तृश्रो
त्रोराख्यायिकानुगतोर्थोवगम्यते॥

तिस्मृतिसंवादंदर्शयति॥तथाचेति॥सुसंस्कृतापरिशुद्धादेवबुद्धिःसात्विकीबुद्धिः॥सामान्यमात्रबुद्धिस्ताम
सीराजसीच॥अतिगह्वरत्वमत्यंतगंभीरत्वं॥संरंभस्तात्पर्यंब्रह्मणोदुर्विज्ञेयत्वेफलितमाहतस्मादिति॥आख्यायिकायाःसुखप्रतिपत्त्यर्थत्वमुक्त्वार्थांत
रमाहाचारेति॥उत्तमादधमेनप्रणिपातोपसदनादिद्वाराविद्याग्राह्याऽधमात्तूत्तमेनतद्व्यतिरेकेणश्रद्धादिमात्रेणसालभ्येत्याचारप्रकारज्ञापनार्थश्चाय
मारंभइत्यर्थः॥आख्यायिकायाःयथोक्तेर्थेन्वितत्वंकथयत्येवमिति॥वक्तृश्रोत्रोर्मध्येयथोक्ताचारवताश्रोत्राविद्यालब्धव्यावक्त्राचतादृशेनसोपदेष्टव्येत्येषो

तस्मादाचारविशेषंदर्शयितुमेषाख्यायिकायुक्तेत्यर्थः॥आगमानुसारिगुरुसंप्रदायादेवतत्वधीर्लभ्यते॥यस्तुकेवलस्तर्कस्तद्दृशान्नैषाबुद्धिःसि
द्ध्यति॥तथाचकेवलतर्कप्रयुक्तातत्वबुद्धिरितिसंभावनानिषेधार्थाख्यायिकेतिपक्षांतरमाहकेवलेति॥केवलेनतर्केणतत्वबुद्धिर्नसिद्ध्यतीत्य
त्रश्रुतिस्मृतीदर्शयतिनैषेति॥मतिंदद्यादितिशेषः॥प्रकारांतरेणाख्यायिकामवतार्यतत्राख्यायिकानुगुण्यंदर्शयतितथाहीति॥श्रद्धाब्रह्मज्ञानेप

केवलतर्कबुद्धिनिषेधार्थाचाख्यायिका॥नैषातर्केणमतिरापनेयानतर्कशास्त्रदग्धायेतिचश्रुतिस्मृतिभ्यांश्रद्धाचब्रह्मविज्ञानेपरमंसाध
नमित्याख्यायिकार्थः॥तथाहिगार्ग्याजातशत्रोरतीवश्रद्धालुतादृश्यतेआख्यायिकायां॥श्रद्धावांल्लभतेज्ञानमितिचस्मृतिः॥तत्रपूर्वपक्षवा
द्यविद्याविषयब्रह्मवित्॥दृप्तबालाकिर्दृप्तोगर्वितोऽसम्यक्ब्रह्मवित्वादेव॥बलाकायाअपत्यंबालाकिर्दृप्तश्चासौबालाकिश्चेतिदृप्तबाला

ॐ दृप्तबालाकिर्हानूचानोगार्ग्यआससहोवाचाजातशत्रुंकाश्यंब्रह्मतेब्रवाणीतिसहोवाचाजातशत्रुःसहस्रमेतस्यांवाचि
दद्मः॥

किः॥हशब्दऐतिह्यार्थआख्यायिकायाःअनूचानोऽनुवचनसमर्थःवक्तावाङ्मीगार्ग्योगोत्रतआसबभूवकस्मिंश्चित्कालविशेषे॥सह
उवाचाऽजातशत्रुमजातशत्रुनामानंकाश्यंकाशिराजमभिगम्यब्रह्मतेब्रवाणीति॥ब्रह्मतेतुभ्यंब्रवाणिकथयानि॥सएवमुक्तोऽजातशत्रु
रुवाचसहस्रंगवांदद्मएतस्यांवाचियोमांप्रत्यवोचोब्रह्मतेब्रवाणीतितावन्मात्रमेवगोसहस्रप्रदानेनिमित्तमित्यभिप्रायः॥साक्षाद्ब्रह्म
कथनमेवनिमित्तंकस्मान्नापेक्ष्यतेसहस्रदानेब्रह्मतेब्रवाणीतीयमेवतुवाग्निमित्तमपेक्ष्यतइत्युच्यते॥

रमंसाधनमित्यत्रभगवतोपिसंमतिमा
हश्रद्धावानिति॥आख्यायिकार्थेबहुधास्थितेतदक्षराणिव्याचष्टेतत्रेत्यादिना॥पूर्वपक्षवादित्वेहेतुमाहाविद्याविषयेति॥गर्वितत्वेहेतुमाहासम्यगिति॥इयमे

वत्ताकृतिमित्याख्यायिकमाहिस्पष्टप्रकृते॥

बृ.स.
३

अतोब्रह्मब्रवाणीतिवागेवसहस्रदानेनिमित्तमितिशेषः॥ श्रुतिंव्याचष्टेजनकइति॥ प्रसिद्धंजनकस्यदातृत्वादितद्वद्योतकोनिपातइतियावत्॥ वाक्यार्थमाहजनकोदित्सुरित्यादिनासंभावितवानसीतिप्रागुक्तंवाङ्मात्रेसहस्रदानेनिमित्तमितिशेषः॥ तस्मान्मुग्धप्रसिद्ध्यतिक्रमणादितियावत्॥ तत्त्ववेदातृत्वादिकमित्यर्थः॥ इतिशब्दोभिप्रायसमाप्त्यर्थः॥ १॥ हृदिप्रविष्टोभोक्ताहमित्यादिप्रत्यक्षंप्रमाणयसहमिति॥ दृष्टिफलेनैरंतर्याभ्यासंदर्श

यतः श्रुतिरेवराज्ञोभिप्रायमाह॥ जनकोदाताजनकःश्रोतेतिचैतस्मिन्वाक्यद्वयेपदद्वयमभ्यस्यतेजनकोजनकइतिवैशब्दः प्रसिद्धावद्योतनार्थोजनकोदित्सुर्जनकःशुश्रूषुरितिब्रह्मशुश्रूषवोविवक्षवः प्रतिजिघृक्षवश्चजनाधावंत्यभिगच्छंतितस्मात्त्वमप्येवंभिसंभावितवानसीति॥ १॥ एवंराजानंशुश्रूषुमभिमुखीभूतंसहउवाचगार्ग्यःयएवासौआदित्येचक्षुषिचैकोभिमानीचक्षुर्द्वारेणहृहृ

जनकोजनकइतिवैजनाधावंतीति॥ १॥ सहोवाचगार्ग्योयएवासावादित्येपुरुषएतमेवाहंब्रह्मोपासइतिसहोवाच। जातशत्रुर्मामैतस्मिन्संवदिष्ठाः॥ दिप्रविष्टोहंभोक्ताहंकर्त्ताचेत्यवस्थितःएतमेवाहंब्रह्मपश्याम्यस्मिन्कार्यकरणसंघातेउपासे॥ तस्मात्तमहंपुरुषंतुभ्यंब्रवीम्युपास्वेति॥ सएवमुक्तःप्रत्युवाचाजातशत्रुर्मामेतिहस्तेनविनिवारयन्नेतस्मिन्ब्रह्मणिविज्ञेयेमासंवदिष्ठाःमामेत्याबाधनार्थंद्विर्वचनमेवंसमानेविज्ञानविषयआवयोरस्मानविज्ञातवतइवदर्शयताबाधिताःस्यामो

यत्युपासइति॥ तावतामम किमायातंतदाह तस्मादिति॥ मामेतिप्रतीकमादायाभ्यासस्यार्थमाहमामेतीति॥ विनिवारयन्प्रत्युवाचेतिसंबंधः॥ एकस्माङ्गोनिवारकत्वमपरस्यसंवादेनसंगतिरितिविभागेसंभवतिकुतोद्विर्वचनमित्याशंक्याहमामेत्याबाधनार्थमिति ॥

रामः
३

तदेवस्फुटयत्येवमिति॥त्वदुक्तेनप्रकारेणयोविज्ञानविषयोर्थस्तस्मिन्नावयोर्विज्ञानसाम्यादेवसमानेपिविज्ञानवत्वेसत्यस्मानविज्ञानवतइवस्वीकृत्य
तमेवार्थमस्मान्प्रत्युपदेशेनज्ञापयताभवतावयंबाधिताःस्यामइतियोजनातथापिगार्ग्यस्यकथमीषत्बाधनंतत्राहातइति॥अतिष्ठाःसर्वेषामित्या
दिवाक्यंशंकाद्वाराऽवतार्यव्याकरोत्यथेत्यादिना॥एतंपुरुषमितिशेषः॥इतिशब्दोगुणोपास्तिसमाप्त्यर्थः॥पूर्वोक्तरीत्यात्रिभिर्गुणैर्विशिष्टंब्रह्मतदुपा

ऽतोमासंवदिष्ठाःमासंवादंकार्षीरस्मिन्ब्रह्मण्यन्यच्चेज्ज्ञानासितद्ब्रह्मवक्तुमर्हसिनतुयन्मयाज्ञायतएव॥अथचेन्मन्यसेजानीषेत्वं
ब्रह्ममात्रंनतुतद्विशेषणोपासनफलानीतितन्नमंतव्यंयतःसर्वमेतदहंजानेयद्ब्रवीषिकथमतिष्ठाअतीत्यसर्वाणिभूतानितिष्ठती
त्यतिष्ठाःसर्वेषांचभूतानांमूर्द्धाशिरोराजेतिवैराजादीप्तिगुणोपेतत्वादेतैर्विशेषणैर्विशिष्टमेतद्ब्रह्मास्मिन्कार्यकरणसंघातेकर्तृभो

अतिष्ठाःसर्वेषांभूतानांमूर्द्धाराजेतिवाअहमेतमुपासइतिसयएतमेवमुपास्तेतिष्ठाःसर्वेषांभूतानांमूर्द्धाराजाभवति॥२॥

क्तृचेत्यहमेतमुपासइति॥फलमप्येवंविशिष्टोपासकस्यसयएतमेवमुपास्तेअतिष्ठाःसर्वेषांभूतानांमूर्द्धाराजाभवति॥यथागुणोपास
नमेवहिफलंतंयथायथोपासतेतदेवभवतीतिश्रुतेः॥२॥संवादेनादित्यब्रह्मणिप्रत्याख्यातेऽजातशत्रुणाचंद्रमसिब्रह्मांतरंप्रतिपेदेगा
र्ग्योयएवासौचंद्रेमनसिचैकःपुरुषोभोक्ताकर्त्ताचेतिपूर्ववद्विशेषणं॥बृहन्महान्पांडरंशुक्लंवासोयस्यसोयंपांडरवासाअप्कशरीरत्वात्स्मा
णस्ययश्चान्नभूतो सकस्यफलमपिजानामीत्युक्त्वाफलवाक्यमुपादत्तेसयइति॥किमितियथोक्तंफलमुच्यतेतत्राहयथेति॥२॥म[illegible]सिचेतिचकारात्बु
द्धौचेत्यर्थः॥यएकःपुरुषस्तमेवाहंब्रह्मोपासेत्वंवेत्यमुपास्वेत्युक्तेमामेत्यादिनाप्रत्युवाचेत्याहइतिपूर्ववदिति॥भानुमंडलतोद्विगुणंचंद्रमंडलमितिप्रसिद्धि

कथं पांडरवासस्त्वं द्राभिमानिनः प्राणस्य संभवतीत्याशंक्याहापूशरीरत्वादिति॥ पुरुषो हि शरीरेण वाससेव वेष्टितो भवति॥ पांडरत्वं चापां प्रसिद्ध
मापो वासः प्राणस्येति च श्रुतिः॥ अतो युक्तं प्राणस्य पांडरवासस्त्वमित्यर्थः॥ न केवलं सोमशब्देन चंद्रमा गृह्यते किंतु लतापि समाननामधर्मत्वादित्या
ह यथेति॥ तं चंद्रमसं लतात्मकं बुद्धिनिष्ठं च पुरुषमेकीकृत्याहंग्रहेणोपास्तिरित्यर्थः॥ संप्रत्युपास्तिफलमाह यथोक्तेति॥ यज्ञशब्देन प्रकृतिरुक्ता वि

ऽभिषूयते लतात्मको यज्ञे तमेकीकृत्य एतमेवाहं ब्रह्मोपासे यथोक्तगुणं य उपास्ते तस्याहरहः सोमोऽभिषुतो यज्ञे प्रसुतश्च विकारेषन्नं चा

स होवाच गार्ग्यो य एवासौ चंद्रे पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा बृहत्पांडरवासाः सोमो
राजेति वा अहमेतमुपास इति स य एतमेवमुपास्तेऽहरहर्ह सुतः प्रसुतो भवति नास्यान्नं क्षीयते॥ ३॥ स होवाच गार्ग्यो य एवा
सौ विद्युति पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठास्तेजस्वीति वा अहमेतमुपास इति स
य एतमेवमुपास्ते तेजस्वी ह भवति तेजस्विनी हास्य प्रजा भवति॥ ४॥ स होवाच गार्ग्यो य एवायमाकाशे पुरुष एतमेवाहं ब्रह्मोपा
स इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठाः पूर्णमप्रवर्तीति वा अहमेतमुपास इति स य एतमेवमुपास्ते पूर्यते प्रजया पशुभि
र्नास्यास्माल्लोकात्प्रजोद्वर्तते॥ ५॥

स्य न क्षीयते ऽन्नात्मकोपासकस्य॥ ३॥ तथा विद्युति त्वचि हृदये चैका देवता तेजस्वीति विशेषणं तस्याः
तत्फलं तेजस्वी ह भवति तेजस्विनी हास्य प्रजा भवति विद्युतां बहुत्वस्यांगीकरणादात्मनि प्रजायां च फलबाहुल्यं॥ ४॥ कारशब्देन विकृतयोगृह्यंते य
थोक्तोपासकस्य प्रकृतिविकृत्यनुष्ठानसामर्थ्यं लीलालभ्यमित्यर्थः॥ अन्नाशयस्योपासनानुसारित्वादुपपन्नत्वमभिप्रेत्योपासकं विशिनष्टि अन्नात्मेति॥ ३॥ संवा

कथमेकमुपासनमनेकफलमित्याशंक्याह विपुतामिति॥४॥अप्रवर्तित्वमप्रवर्तकत्वमक्रियावत्वं वा॥५॥कथमेकस्मिन् वायाव पराजितासेनेतिगुणः
संभवतितत्राह मरुतामिति॥विशेषणत्रयस्य फलत्रयं क्रमेणव्युत्पादयतिजिष्णुरित्यादिना॥अन्यतस्त्यानामन्यतोमातृतोजातानां॥६॥यद्वविर्विष्य

तथाकाशेह दयाकाशेह दयेचैका पूर्णमप्रवर्त्तिचेतिविशेषणद्वयंपूर्णत्वविशेषणफलमिदंपूर्यतेहप्रजयापशुभिरप्रवर्त्तिविशेषणफलं
नास्यास्माल्लोकात्प्रजोद्वर्त्ततेद् तिप्रजासंतानाविच्छित्तिः॥५॥तथावायौप्राणेहृदिचैकाविशेषणमिंद्रःपरमेश्वरोवैकुंठोऽप्रसह्योनपरैर्जि

सहोवाचगार्ग्यो यएवायं वायौपुरुषएतमेवाहंब्रह्मोपासइतिसहोवाचाजातशत्रुर्मामैतस्मिन्संवदिष्ठाइंद्रोवैकुंठोऽपराजि
तासेनेतिवाअहमेतमुपासइतिसयएतमेवमुपास्तेजिष्णुर्हापराजिष्णुर्भवत्यन्यतस्त्यजायी॥६॥सहोवाचगार्ग्योयएवाय
मग्नौपुरुषएतमेवाहंब्रह्मोपासइतिसहोवाचाजातशत्रुर्मामैतस्मिन्संवदिष्ठाःविषासहिरितिवाअहमेतमुपासइतिसयए
तमुपास्तेविषासहिर्हभवतिविषासहिर्हास्यप्रजाभवति॥७॥ तपूर्वापराजितासेनामरुतांगणत्वप्रसिद्धेरुपासनफलमपिजिष्णुर्ह

जयनशीलोऽपराजिष्णुर्नचपरैर्जितस्वभावोभवत्यन्यतस्त्यजायीअन्यतस्त्यानांसपत्नानांजयनशीलोभवति॥६॥अग्नौवाचिहृदिचैकावि
शेषणंविषासहिर्मर्षयितापरेषामग्निबाहुल्यात्फलबाहुल्यंपूर्ववत्॥७॥अप्सुरेतसिहृदिचैकाविशेषणंप्रतिरूपःअनुरूपःश्रुतिस्मृत्यप्रतिकू
लइत्यर्थः॥ तेषांप्यतेतत्सर्वंभस्मीकरणेनसहतेतेनाग्निर्विषासहिः॥यथापूर्वंविपुतांबाहुल्यादात्मनिप्रजायांचफलबाहुल्यमुक्तंतथात्राप्यग्नीनां
बहुलत्वादुपासकस्यात्मनिप्रजायांचदीप्ताग्नित्वंसिद्धमितीत्याहाग्नीति॥७॥प्रतिरूपत्वंप्रतिकूलत्वमित्येतद्व्यावर्तयत्यनुरूपइति॥अन्यच्चफलमिति

तथाविधः श्रुतिस्मृत्यनुकूल इति यावत्॥ ८॥ हार्दे चेत्येतदेवस्पष्टयति॥ सत्त्वेति॥ सर्वत्रैकेति विशेषणस्य देवतेति विशेष्यतया संबध्यते॥ तदेवरो

फलं प्रतिरूपं श्रुतिस्मृतिशासनानुरूपमेवैनमुपगच्छति प्राप्नोति न विपरीतमन्यच्चास्मात्तथाविध एवोपजायते॥ ८॥ आदर्शे प्रसाद
स्वभावे चान्यत्र खड्गादौ हार्दे च सत्त्वशुद्धिसाभाव्ये चैकाविशेषणं॥ रोचिष्णुर्दीप्तिस्वभावः॥ फलं च तदेव रोचनाधारबाहुल्यात्फलबाहुल्यं

स होवाच गार्ग्यो य एवायमप्सु पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठाः प्रतिरूप इति वा
अहमेतमुपास इति स य एतमेवमुपास्ते प्रतिरूपꣳ हैवैनमुपगच्छति नाप्रतिरूपमथो प्रतिरूपोऽस्माज्जायते॥ ८॥ स होवाच
गार्ग्यो य एवायमादर्शे पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा रोचिष्णुरिति वा अहमेतमु
पास इति स य एतमेवमुपास्ते रोचिष्णुर्ह भवति रोचिष्णुर्हास्य प्रजा भवत्यथो यैः संनिगच्छति सर्वाꣳस्तानतिरोचते॥ ९॥ स हो
वाच गार्ग्यो य एवायं यन्तं पश्चाच्छब्दोऽनूदेत्येतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा असुरिति वा अ
हमेतमुपास इति स य एतमेवमुपास्ते सर्वꣳ हैवास्मिंल्लोक आयुरेति नैनं पुरा कालात्प्राणो जहाति ॥ १० ॥

॥ ९॥ यन्तं गच्छन्तं य एवायं शब्दः पृष्ठतोऽनूदेति अध्यात्मं च जीवनहेतुः प्राणस्तमेकीकृत्याहासुः प्राणो जीवनहेतुरिति गुणस्तस्य फलं सर्व
मायुरस्मिंल्लोक एतीति॥ यथोपात्तं कर्मणायुः कर्मफलपरिच्छिन्नकालात्पुरा पूर्वं रोगादिभिः पीड्यमानमप्येनं प्राणो न जहाति ॥ १० ॥

चिष्णुत्वमित्यर्थः॥ ९॥ आहैतमेवाहमित्यादीति शेषः॥ तस्य गुणवदुपासनस्येत्यर्थः॥ सर्वमायुरित्येतद्व्याचष्टे यथोपात्तमिति ॥ १० ॥ ७ ॥

क्कापुनरसावेकादेवतातत्राहाश्विनाविति॥तस्यदेवस्येतियावत्॥यथोक्तंगुणद्वयंउपपादयतिदिशामिति॥द्वितीयवत्वंसाधुभृत्यादिपरिवृतत्वं॥११

दिसुकर्णयोर्हृ.दि.चैकाश्विनौदेवावियुक्तस्वभावोगुणस्तस्यद्वितीयवत्वमनपगतत्वमवियुक्ततावान्योन्यंदिशामश्विनोश्चैवंधर्मित्वात्तदेव
चफलमुपासकस्यगणाविच्छेदोद्वितीयत्त्वंच॥११॥छायायांबाह्येतमस्यध्यात्मेचावरणात्मकेऽज्ञानेहृ.दि.चैकादेवताविशेषणंमृत्युःफलंस

सहोवाचगार्ग्योयएवायंदिक्षुपुरुषएतमेवाहंब्रह्मोपासइतिसहोवाचाजातशत्रुर्मामैतस्मिन्संवदिष्ठाद्वितीयोनपग
इतिवाअहमेतमुपासइतिसयएतमेवमुपास्तेद्वितीयवान्हभवतिनास्माद्गणश्छिद्यते॥११॥सहोवाचगार्ग्योयएवायं
छायामयःपुरुषएतमेवाहंब्रह्मोपासइतिसहोवाचाजातशत्रुर्मामैतस्मिन्संवदिष्ठामृत्युरितिवाअहमेतमुपासइतिसय
एतमेवमुपास्तेसर्वꣳहैवास्मिंल्लोकआयुरेतिनैनंपुराकालान्मृत्युरागच्छति॥१२॥सहोवाचगार्ग्योयएवायमात्मनिपुरु
षएतमेवाहंब्रह्मोपासइतिसहोवाचाजातशत्रुर्मामैतस्मिन्संवदिष्ठाआत्मन्वीतिवाअहमेतमुपासइतिसयएतमेवमु
पास्तआत्मन्वीहभवत्यात्मन्विनीहास्यप्रजाभवतिसहतूष्णीमाससगार्ग्यः॥१३॥ वंपूर्ववत्॥मृत्योरनागमनेनरोगादिपीडाऽ

भावोविशेषः॥१२॥आत्मनिप्रजापतौबुद्धौचहृ.दि.चैका॥आत्मन्वीहआत्मवानितिविशेषणंफलमात्मन्वीहभवत्यात्मवान्भवत्यात्म
न्विनीहास्यप्रजाभवतिबुद्धिवहुलत्वात्प्रजायांसंपादनं॥ शब्दब्रह्मोपासकस्यैवतमोब्रह्मोपासकस्यापिफलमित्याहफलमिति॥फलभे
दाभावेकथमुपासनभेदःस्यादित्याशंक्याहमृत्योरिति॥१२॥व्यस्तानिब्रह्माण्युपन्यस्यसमस्तंब्रह्मोपदिशतिप्रजापताविति॥आत्मवत्त्वंवश्यात्म

हि

थैं१

फलस्यात्मगामित्वान्नप्रजायां तदभिधानमुचितमित्याशंक्याह बह्वीति ॥ १३ ॥ विचारार्थीप्लुतिरिति कल्पयति किमेतावदिति ॥ वाक्यार्थचोद्यसमाधिभ्यां स्फुटयति किमित्यादिना ॥ आदित्यादेरविदितत्वनिषेधं प्रतिज्ञाय हेतुमाह न फलवदिति ॥ नैतानि वाक्यानि फलवद्विज्ञानपराणि अर्थवादत्वादित्याशंक्याह न चेति ॥ फलवत्वाच्चापूर्वविधिपराण्येतानि वाक्यानीत्याह तदनुरूपाणीति ॥ अर्थवादत्वेपि तेषामपूर्वार्थत्वं किं न स्यादित्याशंक्याहार्थ

स्वयं परिज्ञातत्वेनैवं क्रमेण प्रत्याख्यातेषु ब्रह्मसु स गार्ग्यः क्षीणब्रह्मविज्ञानोऽप्रतिभासमानोत्तरस्तूष्णीमवाक्शिरा आस तथाभूतमालक्ष्य गार्ग्यं ॥ १३ ॥ स होवाचाजातशत्रुरेतावन्नू३ इति किमेतावद्ब्रह्म निर्ज्ञातमाहोस्विदधिकमप्यस्तीतीतर आह ॥ एतावद्धीति ॥ नैतावता विदितेन ब्रह्म विदितं भवतीत्याहाजातशत्रुः किमर्थं गर्वितोसि ब्रवाणीति ॥ किमेतावद्धि दितं विदितमेव न भवतीत्युच्यते न फल

स होवाचाजातशत्रुरेतावन्नू३ इत्येतावद्धीति नैतावता विदितं भवतीति ॥

वद्विज्ञानश्रवणान्न चार्थवादत्वमेव वाक्यानामवगंतुं शक्यमपूर्वविधानपराणि हि वाक्यानि प्रत्युपासनोपदेशं लक्ष्यंते ऽतिष्ठाः सर्वेषां भूतानामित्यादीनि ॥ तदनुरूपाणि च फलानि सर्वत्र श्रूयंते विभक्तान्यऽर्थवादत्वे एतदसमंजसं ॥ कथं तर्हि नैतावता विदितं भवतीति ॥ नैष दोषः ॥ अधिकृतापेसत्वाद्ब्रह्मोपदेशार्थं हि शुश्रूषवेऽजातशत्रवे अमुख्यब्रह्मवित् गार्ग्यः प्रवृत्तः स युक्त एव मुख्यब्रह्मविदाजातशत्रुणाऽमुख्यब्रह्मविद्गार्ग्यो वक्तुं यन्मुख्यं ब्रह्म वक्तुं प्रवृत्तस्त्वं तन्न जानीष इति ॥

वादत्वइति ॥ वाक्यानां फलवद्विज्ञानपरत्वमुपेत्य निषेधवाक्यस्य गतिं पृच्छति कथं तर्हीति ॥ तस्यानर्थक्यं परिहरति नैष दोष इति ॥ अधिकृतापेसत्वादेदन प्रतिषेधस्येत्युक्तं स्फुटयति ब्रह्मेति ॥

नैतावतेत्यविशेषेणामुख्यब्रह्मज्ञानमपिनिषिद्धमितिचेन्नेत्याहयदीति॥किंचनिष्कामेनचेदेतानिउपासनानिअनुष्ठीयंतेतदैतेषांब्रह्मज्ञानार्थत्वाद
मुख्यब्रह्मज्ञाननिषेधमंतरेणनिषेधोपपत्तेरित्याहेतद्विज्ञानेति॥आदित्यादिकमेवमुख्यंब्रह्मेतिनिषेधानर्थक्यंतदवस्थमित्याशंक्याहाविद्येति॥

यद्यमुख्यब्रह्मविज्ञानमपिप्रत्याख्यायेततदैतावतेतिनब्रूयान्नकिंचितज्ज्ञातंत्वयेत्येवंब्रूयात्तस्माद्वंत्वयैतावंत्यविद्याविषयेब्रह्माण्येत
द्विज्ञानद्वारत्वाच्चपरब्रह्मविज्ञानस्ययुक्तमेववक्तुंनैतावताविदितंभवतीति॥अविद्याविषयेविज्ञेयत्वंनामरूपकर्मात्मकत्वंचैषांतृतीये
ध्यायेप्रदर्शितं॥तस्मान्नैतावताविदितंभवतीतिब्रुवताधिकंब्रह्मज्ञातव्यमस्तीतिदर्शितंभवति॥तत्रानुपसन्नायनवक्तव्यमित्याचारविधिरो

सहोवाचगार्ग्यउपत्वायानीति॥१४॥सहोवाचाजातशत्रुःप्रतिलोमंवैतद्यद्ब्राह्मणःक्षत्रियमुपेयाद्ब्रह्ममेवक्ष्यतीतिव्येवत्वाज्ञ
पयिष्यामीतितंपाणावादायोत्तस्थौतौहपुरुषंसुप्तमाजग्मतुस्तमेतैर्नामभिरामंत्रयांचक्रेबृहन्पांडरवासःसोमराजन्निति स
नोत्तस्थौतंपाणिनापेषंबोधयांचकारसहोत्तस्थौ॥१५॥ गार्ग्यःस्वयमेवाहोपत्वायानीत्युपगच्छानित्वांयथान्यःशिष्योगुरुं॥१४॥सहोवा
चाजातशत्रुःप्रतिलोमंविपरीतंवैतत्॥किंतत्॥यद्ब्राह्मणःउत्तमवर्णःआचार्यत्वेधिकृतःसन्क्षत्रियमनाचार्यस्वभावमुपेयादुपगच्छेद्ब्रि
ह्मवृत्याब्रह्ममेमवक्ष्यतीत्येतदाचारविधिशास्त्रेषुनिषिद्धं॥तस्मात्तिष्ठत्वमाचार्यएवसन्विज्ञापयिष्याम्येवत्वामहं॥यस्मिन्विदितेब्रह्मवि
दितंभवतियत्तन्मुख्यंब्रह्मवेद्यं॥ आदित्यादेर्मुख्यब्रह्मत्वासंभवान्निषेधस्योपपन्नत्वात्तत्सामर्थ्यसिद्धमर्थमुपन्यस्यतितस्मादिति॥उपगमनवाक्यमु
त्साप्यव्याचष्टेतद्वेति॥अब्राह्मणादध्ययनमापत्काले विधीयते॥अनुव्रज्याचशुश्रूषायावदध्ययनंगुरोः॥नाब्राह्मणेगुरौशिष्योवासमात्यंतिकंवसेदित्यादीन्याचा

प्राणस्याप्रियमाणस्यैवसंबोधनार्थंप्रयुक्तनामाऽश्रवणादपेषणाच्चोत्थानात्तस्याभोक्तृत्वंसिद्ध्यतीतिफलितमाह तस्मादिति॥ तौहसुप्तमित्यादिसुप्तपुरुषगत्युक्तिमाक्षिपति कथमिति॥ गार्ग्यकाश्याभिमतयोरुभयोरपिजागरितेकरणेषुसंनिधानाविशेषात्तत्रैवकिमितिविवेकोनदर्शितइत्यर्थः॥ जागरितेकरणेषुद्वयोःसन्निधानेपिसांकर्यात्तदुष्करंविवेचनमितिपरिहरतिजागरितेति॥ ब्रह्मशब्दाद्दूर्द्ध्वंसशब्दमध्याहृत्ययोजनातर्हिसा

तंगार्ग्यंसलज्जमालक्ष्यविस्रंभजननायपाणौहस्तआदायगृहीत्वोत्तस्थौउत्थितवान्॥ तौहगार्ग्यजातशत्रूपुरुषंसुप्तंराजगृहप्रदेशेक्वचिदाजग्मतुरागतौतंचपुरुषंसुप्तंप्राप्यैतैर्नामभिर्बृहन्पांडरवासःसोमराजन्नित्येतैरामंत्रयांचक्रेएवमामंत्र्यमाणोपिससुप्तोनोत्तस्थौतमप्रतिबुध्यमानंपाणिनापेषमापिष्यापिष्यबोधयांचकारप्रतिबोधितवान्तेनसहोत्तस्थौतस्मात्योगार्ग्येणाभिप्रेतोनासावस्मिन्शरीरेकर्त्ताभोक्ताब्रह्मेति॥१५॥ कथंपुनरिदमवगम्यतेसुप्तपुरुषागमनतत्संबोधनानुत्थानैर्गार्ग्याभिमतस्यब्रह्मणोऽब्रह्मत्वंज्ञापितमिति॥ जागरितकालेयोगार्ग्याभिप्रेतःपुरुषःकर्त्ताभोक्ताचब्रह्मसन्निहितःकरणेषुयथातथाऽजातशत्रुअभिप्रेतोपितत्स्वामीभृत्येष्विवराजासन्निहितएव॥ किंतुभृत्यस्वामिनोर्गार्ग्यजातशत्रुअभिप्रेतयोर्यद्विवेकावधारणकारणंतत्संकीर्णत्वादनवधारितविशेषंयद्दृष्टत्वमेवभोक्तुर्नदृश्यत्वं —— यच्चाभोक्तुर्दृश्यत्वमेवनतुद्रष्टत्वंतच्चोभयमिहसंकीर्णत्वाद्विविच्यदर्शयितुमशक्यमितिसुप्तपुरुषगमनं॥ मिभृत्यन्यायेनतयोर्विवेकोपिसुकरःस्यादित्याशंक्याह किंत्विति॥ किंतद्विवेकावधारणकारणंतदाह यद्दृष्टत्वमिति॥ कथंतदनवधारितविशेषमितितदाहतच्चेति॥ इहेतिजागरितोक्तिः॥ यद्यपिजागरितंहित्वासुषुप्तेपुरुषेविवेकार्थंतयोरुपगतिस्तत्रचभोक्तैवसंबोधितःस्वनामभिस्तच्छब्दंश्रोष्यतिनाचेतनस्तथापिनेष्टविवेकसिद्धिर्गार्ग्यकाश्याभीष्टात्मनोरुत्थितिसंशयादितिशंकतेनन्विति॥

संशयंनिराकरोति॥नेत्यादिना॥विशेषावधारणमेवविशदयति॥योहीत्यादिना॥सव्यापारस्तुमुलशब्दादिःयथानिर्ज्ञातोयथोक्तैर्विशेषणैरुपलब्धं रूपमनतिक्रम्यवर्त्तमानः॥प्राणस्योक्तविशेषणवतःस्वापेवस्थानेपितस्यतदाभोगाभावस्तत्रभोक्तृंतराभ्युपगमादित्याशंक्याहनचेति॥तस्यैवभो क्तृत्वेफलितमाहतस्मादिति॥अस्तुतस्यप्राप्तशब्दश्रवणंतत्राहनचेति॥परिशेषसिद्धमर्थमाहतस्मादिति॥प्राणस्याभोक्तृत्वंव्यतिरेकद्वारासाधयति

ननुसुप्तेपिपुरुषेविशिष्टैर्नामभिरामंत्रितोभोक्तैवप्रतिपत्स्यतेनाभोक्तेतिनैवनिर्णयःस्यादितिचेत्॥ननिर्द्धारितविशेषत्वाद्गार्ग्याभि प्रेतस्य॥योहिसत्येनकृत्स्नःप्राणआत्माऽमृतोवागादिष्वनस्तमितोनिम्लोचत्सुयस्यापःशरीरंपांडरवासायश्चासपत्नत्वाद्बृहन्यश्चसो मोराजाषोडशकलःससव्यापारारूढोयथानिर्ज्ञातएवानस्तमितस्वभावआस्तेनचान्यस्यकस्यचिद्व्यापारस्तस्मिन्कालेगार्ग्येणाभिप्रे यतेतद्विरोधिनः॥तस्मात्त्वनामभिरामंत्रितेनप्रतिबोद्धव्यंनचप्रत्यबुध्यततस्मात्पारिशेष्याद्गार्ग्याभिप्रेतस्याभोक्तृत्वंब्रह्मणः ॥

भोक्तृस्वभावश्चेद्बुंजीतैवस्वंविषयंप्राप्तंनहिदग्धृस्वभावःसन्वन्हिस्तृणोलपादिदाह्यंस्वविषयंप्राप्तंनदहतिप्रकाश्यंवान प्रकाशयति॥नचेद्दहतिप्रकाशयतिवाप्राप्तंविषयंनासौवन्हिर्दग्धाप्रकाशयिताचेतिनिश्चीयते॥तथाऽसौप्राप्तशब्दादिविषयोप लब्धस्वभावश्चेद्गार्ग्याभिप्रेतःप्राणोबृहन्पांडरवासइत्येवमादिशब्दंस्वविषयमालभेत् यथाप्राप्तंतृणोलपादिवन्हिर्दहेत्प्रकाश येद्वाऽव्यभिचारेणतद्वत्॥तस्मात्प्राप्तानांशब्दादीनामप्रतिबोधादभोक्तृस्वभावइतिनिश्चीयते॥नहियस्ययःस्वभावोनिश्चितःसतंव्यभिचरति कदाचिदप्य

भोक्तृस्वभावश्चेदिति॥नचभुंक्तेतस्मादभोक्तेतिशेषः॥उक्तमर्थंदृष्टांतेनस्पष्टयतिनहीत्यादिना॥उलपंबालतृणं॥विपक्षेदोषमाहनचेदिति॥ उक्तमर्थंसंक्षिप्याहयथेत्यादिना॥प्राणस्याभोक्तृत्वमुक्तमुपसंहरति॥तस्मादिति॥यद्यपिप्राणःस्वापेशब्दादीन्नप्रतिबुध्यतेतथापिभोक्तृस्वभावोभविष्यति

नैवाहनचेति॥

संबोधनशब्दाश्रवणमतः शब्दार्थः तस्यस्वनामाग्रहणंसंबंधाग्रहणकृतंनानात्मत्वकृतमितिशंकतेसंबोधनार्थेति॥शंकामेवविशदयतिस्यादेतदित्यादि
ना॥देवतायाःसंबंधाग्रहणमयुक्तंसर्वज्ञत्वादित्युत्तरमाह नदेवतेति॥तदेवप्रपंचयतियस्यहीत्यादिना॥तयेतिग्रहणकर्तृनिर्देशः॥अवश्यमितिसू
चितामनुपपत्तिमाहान्यथेति॥आदिपदेनयागस्तुतिनमस्कारादिगृह्यते संव्यवहारोभिक्षाभोगप्रसादादिः॥संबोधननामाग्रहस्तत्कृतानात्मत्वदोष
श्चत्वदिष्टात्मनोपितुल्यइतिशंकतेव्यतिरिक्तेति॥संगृहीतंचोद्यंविवृणोतियस्यचेति॥तदासुषुप्तिदशायांप्रतिपत्तिर्युक्तेतिसंबंधः॥तद्विषयत्वादति
तःसिद्धंप्राणस्याभोक्तृत्वंसंबोधनार्थनामविशेषेसंबंधाग्रहणादप्रतिबोधइतिचेत्॥स्यादेतद्यथाबहुषासीनेषुस्वनामविशेषेणसंबंधा
ग्रहणात्मामयंबोधयतीतिशृण्वन्नपिसंबोध्यमानोविशेषतोनप्रतिपद्येततथेमानिबृहन्नित्येवमादीनिममनामानीत्यगृहीतसंबंध
त्वात्प्राणोनगृह्णातिसंबोधनार्थंशब्दंनत्वविज्ञातृत्वादेवेतिचेत्॥नदेवताभ्युपगमेऽग्रहणानुपपत्तेः॥यस्यहिचंद्रोभिमानिनीदेवताध्या
त्मंप्राणोभोक्ताभ्युपगम्यतेतस्यतयासंव्यवहारायविशेषनाम्नासंबंधोवश्यंगृहीतव्योऽन्यथाह्वानादिविषयेसंव्यवहारोनुपपन्नःस्यात्॥व्य
तिरिक्तपक्षेप्यप्रतिपत्तिरयुक्तमितिचेद्यस्यचप्राणव्यतिरिक्तोभोक्तातस्यापिबृहन्नित्यादिनामभिःसंबोधनेबृहत्त्वादिनाम्नांतदातद्विषय
त्वात्प्रतिपत्तिर्युक्तानचकदाचिदपिबृहत्त्वादिशब्दैःसंबोधितःप्रतिपद्यमानोदृश्यते॥तस्मादकारणमभोक्तृत्वेसंबोधनाप्रतिपत्तिरिति
चेत् नतद्धृतस्तावन्मात्राभिमानानुपपत्तेः॥ रिक्तात्मविषयत्वादितियावत्॥अस्त्येवातिरिक्तस्यात्मनःसंबोधनशब्दश्रवणमितिचेन्नेत्याहनच
कदाचिदिति॥त्वदिष्टात्मनःसंबोधनशब्दाप्रतिपत्तावपिभोक्तृत्वांगीकारस्तच्छब्दार्थः॥अभोक्तृत्वेप्राणस्येतिशेषः यथाहस्तःपादोंगुलिरित्यादिनामोक्तो
मैत्रोनोत्तिष्ठतिसर्वदेहाभिमानित्वेनतन्मात्रानभिमानित्वादेवंकाश्यपेष्टात्मनःसर्वकार्यकरणाभिमानित्वादंगुलिस्थानीयप्राणमात्रेतदभावात्तन्नामाग्रहणं

आत्मनः १ प्राणस्य २

तदेवस्फुटयतियस्येति॥ प्राणमात्रेप्राणादिकरणवतोभिमानाभावेफलितमाहतस्मादिति॥ चंद्रस्यापिप्राणैकदेशत्वात्तन्नामभिःसंबोधनेकृत्स्नाभिमा
नीसनोत्तिष्ठत्यत्राप्यंगुल्यादिदृष्टांतोपपत्तेरित्याशंक्याहनत्विति॥ गोत्ववत्तस्यसर्ववस्तुषुसमाप्तेरहमितिसर्वत्राभिमानसंभवाच्चंद्रनामोक्तावपिना
प्रतिपत्तिर्युक्तेत्यर्थः॥ प्राणवच्चिदात्मनोपिपूर्णतयासर्वात्माभिमानसिद्धेर्बोधाबोधौतुल्यावित्याशंक्याहदेवतेति॥ विशिष्टस्यात्मनोदेवतायामात्म
त्वाभिमानाभावादितरस्यचकूटस्थस्यज्ञप्तिमात्रत्वेनतदयोगान्नतुल्यतेत्यर्थः॥ प्रकारांतरेणप्राणस्याभोक्तृत्वंवारयन्नाशंकतेस्वनामेति॥ अयुक्तंप्राणेतर

यस्यप्राणव्यतिरिक्तोभोक्तासप्राणादिकरणवान्प्राणीतस्यनप्राणदेवतामात्रेभिमानोयथाहस्तेतस्मात्प्राणनामसंबोधनेकृत्स्नाभिमा
निनोयुक्तैवाप्रतिपत्तिः॥ नतुप्राणस्यासाधारणनामसंयोगेदेवतात्मत्वानभिमानाच्चात्मनः॥ स्वनामप्रयोगेप्यप्रतिपत्तिदर्शनादयुक्तमि
तिचेत्सुषुप्तस्ययल्लौकिकंदेवदत्तादिनामतेनापिसंबोध्यमानःकदाचिन्नप्रतिपद्यतेसुषुप्तस्तथाभोक्तापिसन्प्राणोनप्रतिपद्यतइति
चेत्नात्मप्राणयोःसुप्तासुप्तत्वविशेषोपपत्तेःसुप्तत्वात्प्राणग्रस्ततयोपरतकरणआत्मास्वनामप्रयुज्यमानमपिनप्रतिपद्यतेनतुतद्सु
प्तस्यप्राणस्यभोक्तृत्वेउपरतकरणत्वंसंबोधनाग्रहणंवायुक्तं॥ अप्रसिद्धनामभिःसंबोधनमयुक्तमितिचेत्संतिहिप्राणविषयाणिप्र
सिद्धानिप्राणादिनामानितान्यपोह्याप्रसिद्धैर्बृहत्वादिनामभिःसंबोधनमयुक्तंलौकिकन्यायापोहात्तस्माद्रोक्तुरेवसतःप्राणस्याप्रति
पत्तिरितिचेत्॥ सभोक्तृत्त्वमितिशेषः॥ तदेवविवृणोतिसुषुप्तस्येति॥ विशेषंदर्शयन्नुत्तरमाहनात्मेति॥ काश्याभीष्टात्मनःसुप्तत्वप्रयुक्तंफलमाह
सुप्तत्वादिति॥ प्राणस्यापिसंहृतकरणत्वात्स्वनामाग्रहणमित्याशंक्यतस्यासुप्तत्वकृतंकार्यंकथयतिनत्विति॥ नहिकरणस्वामिनिव्याप्रियमाणेकरणो
परमःसंभवतितस्यचानुपरतकरणस्यस्वनामाग्रहणमयुक्तमित्यर्थः॥ प्राणनामत्वेनाप्रसिद्धनामभिःसंबोधनात्तदनुत्थानंनानात्मत्वादितिशंकतेअप्र

वृ॰र॰
१

तद्देवसद्दृश्यतिसंनिहितेति॥प्रसिद्धमनूद्याप्रसिद्धं विधेयमितिलौकिकोन्यायः॥अप्रसिद्धसंज्ञाभिः संबोधनस्यायुक्तत्वे फलितमाह तस्मादिति॥ चं
द्रदेवतास्मिन्देहे कर्त्री भोक्त्री चात्मेति गार्ग्याभिप्रायनिषेधे देवतानामग्रहणस्य तात्पर्यात्तद्ग्रहोर्थवानिति परिहरति नदेवतेति॥ तदेवप्रपंचय
तिकेवलेति॥प्राणादिनामभिः संबोधनेपितन्निराकर्तुं शक्यमित्याशंक्याह नहीति॥ लौकिकनाम्नोदेवताविषयत्वाभावादित्यर्थः॥प्राणस्या
भोक्तृत्वेपींद्रियाणां भोक्तृत्वमिति केचित्तान्प्रत्याह प्राणेति॥प्राणकरणचंद्रदेवतानामभोक्तृत्वेपि देवतांतरमत्रभोक्तृ स्यादित्याशंक्याह देवतांतराभा

नदेवताप्रत्याख्यानार्थत्वात्केवलसंबोधनमात्राप्रतिपत्त्यैवासुप्तस्याध्यात्मिकस्य प्राणस्याभोक्तृत्वे सिद्धे यच्चंद्रदेवताविषयैर्नामभिः सं
बोधनं तच्चंद्रदेवताप्राणोस्मिन्शरीरे भोक्तेति गार्ग्यस्य विशेषप्रतिपत्तिनिराकरणार्थं॥ नहितल्लौकिकनाम्नासंबोधने शक्यं निराकर्तुं
॥प्राणप्रत्याख्यानेनैव प्राणग्रस्तत्वात्करणांतराणां प्रवृत्त्यनुपपत्तेर्भोक्तृत्वाशंकानुपपत्तिः॥ देवतांतराभावाच्च॥ नन्वतिष्ठाद्द्याद्यात्मनो
त्वं तेन गुणवद्देवताभेदस्य दर्शितत्वादिति चेन्न तस्य प्राणएवैकत्वाभ्युपगमात्सर्वश्रुतिष्वरनाभिनिदर्शनेन॥ सत्येन कृत्स्नः प्राणो वामृत
मिति च प्राणबाह्यस्यान्यस्यानभ्युपगमात् भोक्तुरेष उह्येव सर्वे देवाः कतम एको देव इति प्राण इति च॥ सर्वदेवानां प्राणएवैकत्वोपपादना
च्च॥

वाच्चेति॥ भोक्तृत्वाशंकानुपपत्तिरिति पूर्वेण संबंधः॥ तत्रोपक्रमविरोधं शंकते नन्विति॥ दर्शितत्वाद्देवतांतराभावोनास्तीति शेषः॥ स्वतंत्रो
देवताभेदोनास्तीति समाधत्ते नतस्येति॥ प्राणे देवताभेदस्यैक्ययुक्तिमाहारनाभीति॥ नदेवतांतरस्य भोक्तृत्वं गार्ग्यस्य स्वपक्षविरोधादिति शेषः॥ सर्वश्रु
तिष्वित्युक्तं ताः संक्षेपतो दर्शयत्येष इति॥ कतिदेवा याज्ञवल्क्येत्यादिना संक्षेपविस्ताराभ्यां सर्वेषां देवानां प्राणात्मन्येवैकत्वमुपपाद्यते अतो न देवताभे
दोस्तीत्याह सर्वदेवानामिति॥ प्राणात्पृथक्भूतस्य देवस्यात्मातिरेकसत्यसत्वापत्तेश्च प्राणांतर्भावः सर्वदेवताभेदस्येति वक्तुं चशब्दः॥

अ॰
४

रामः
९

करणानामभोक्तृत्वेहेत्वंतरमाहतथेति॥देवताभेदेष्विवेतियावत्॥अनाशंकाभोक्तृत्वस्येतिशेषः॥तत्रोदाहरणांतरमाहदेहभेदेष्विवेति॥नहि
हस्तादिषुप्रत्येकंभोक्तृत्वंशंक्यतेतथाश्रोत्रनेत्रादिष्वपिनभोक्तृत्वाशंकायुक्तातेषुस्मृतिरूपज्ञानस्येच्छायाः योहंरूपमद्राक्षंसशब्दंशृणोमीत्या
दिप्रतिसंधानस्यचायोगादित्यर्थः॥अनुपपत्तिमेवस्फुटयतिनहीति॥क्षणिकविज्ञानस्यनिराश्रयस्यभोक्तृत्वाशंकापिप्रतिसंधानासंभवादेवप्र
त्युक्तेत्याहविज्ञानेति॥प्राणादीनामनात्मत्वमुक्त्वास्थूलदेहस्यतदुक्तुंपूर्वपक्षयतिनन्विति॥संघातोभूतचतुष्टयसमाहारःस्थूलोदेहइतियावत्॥

तथाकरणभेदेष्वनाशंकादेहभेदेष्विवस्मृतिज्ञानेच्छाप्रतिसंधानानुपपत्तेः॥नह्यन्यदृष्टमन्यःस्मरतिजानातीच्छतिप्रतिसंदधातिवा॥त
स्मान्नकरणभेदविषयेभोक्तृत्वाशंकाविज्ञानमात्रविषयावाकदाचिदुपपद्यते॥ननुसंघातएवास्तुभोक्ताकिंव्यतिरिक्तकल्पनयेतिना
पेषणेविशेषदर्शनात्॥यदिहिप्राणशरीरसंघातमात्रोभोक्तास्यात्संघातमात्राविशेषात्तदाआपिष्टस्यानापिष्टस्यचप्रतिबोधेविशेषो
नस्यात्॥संघातव्यतिरिक्तेतुपुनर्भोक्तरिसंघातसंबंधविशेषानेकत्वात्पेषणापेषणकृतवेदनायाःसुखदुःखमोहमध्यमाधमोत्तम
कर्मफलभेदोपपत्तेश्चविशेषोयुक्तः॥

गौरोहंपश्यामीत्यादिप्रत्यक्षेणतस्यात्मत्वदृष्टेरितिभावः॥प्रमाणाभावादतिरिक्तकल्पनानयुक्तेत्या
ह॥किंव्यतिरिक्तेति॥संघातस्यात्मत्वंदूषयतिनापेषणइति॥विशेषदर्शनंव्यतिरेकद्वाराविशदयतियदिहीति॥प्राणेनसहितंस्थूलंशरीरमे
वसंघातस्तन्मात्रोयदिभोक्तास्यादितियोजना॥त्वत्पक्षेपिकथंपेषणापेषणयोरुत्थानेविशेषःस्यादित्याशंक्याहसंघातेति॥तस्यसंघातेनसंबं
धविशेषाःस्वकर्मारभ्यत्वात्मीयत्वस्वप्राणपरिपाल्यत्वादयस्तेषामनेकत्वात्पेषणापेषणयोरिंद्रियोद्भवाभिभवकृतवेदनायाःसुटत्वास्फुटत्वात्म
कोविशेषोयुक्तः॥सुखदुःखमोहानामुत्तममध्यमाधमकर्मफलानांकर्मोद्भवाभिभवकृतविशेषसंभवाच्चयथोक्तोविशेषःसंभवतीत्यर्थः ॥

बृ.र.
१०

अ.
४

परपक्षेपितथैवविशेषःस्यादित्याशंक्याहनत्विति॥नहितत्रस्वकर्मारभ्यत्वादयःसंबंधविशेषाःकर्मफलभेदोवायुज्यतेसंघातवादिनाऽतींद्रियकर्मा
नंगीकारादतःसंघातमात्रेभोक्तरिप्रतिबोधेविशेषासिद्धिरित्यर्थः॥शब्दस्पर्शादीनांपटुत्वमतिपटुत्वंमांद्यमतिमांद्यमित्येवमादिनाकृतोविशेषोबो
धेदृश्यतेसोपिसंघातवादेनसिद्ध्यतीत्याहतथेति॥अयुक्तइतियावत्॥चकारोविशेषानुकर्षणार्थः॥मातर्हिप्रतिबोधेविशेषोभूदित्याशंक्याहास्ति

नतुसंघातमात्रेसंबंधकर्मफलभेदानुपपत्तेर्विशेषोयुक्तः॥तथाशब्दादिपटुमांद्यादिकृतश्चास्तिचायंविशेषोयस्मात्स्पर्शमात्रेणाप्रति
बुध्यमानंपुरुषंसुप्तंपाणिनापेषमापिष्यापिष्यबोधयांचकाराजातशत्रुः॥तस्माद्यआपेषणेनप्रतिबुबुधेज्वलन्निवस्फुरन्निवकुतश्चिदा
गतइवपिंडंचपूर्वविपरीतंबोधचेष्टाकारविशेषादिमत्वेरापादयन्सोन्योस्तिगार्ग्याभिमतब्रह्मभ्योव्यतिरिक्तइतिसिद्धं॥संहतत्वाच्च
पारार्थ्योपपत्तिःप्राणस्यगृहस्यस्तंभादिवच्छरीरस्यांतरुपष्टंभकःप्राणःशरीरादिभिःसंहतइत्यवोचाम॥अरनेमिवच्चनाभिस्थानीयएत
स्मिन्सर्वमितिच॥तस्माद्गृहादिवत्स्वावयवसमुदायात्मजातीयव्यतिरिक्तार्थंसंहन्यतइत्येवमवगच्छेमहि॥स्तंभकुड्यतृणकाष्ठादि
गृहावयवानांस्वात्मजन्मोपचयापक्षयविनाशनामाकृतिकार्यधर्मनिरपेक्षलब्धसत्तादितद्विषयद्रष्टृश्रोतृमंतृविज्ञात्रर्थत्वंदृष्टमन्या
महेतत्संघातस्यच

चेति॥विशेषदर्शनफलमाहतस्मादिति॥आदिशब्देनगुणादिर्गृह्यते॥अन्यःसंघातादितिशेषः॥देहादेरनात्मत्वमुक्त्वाप्राण
स्यानात्मत्वेहेत्वंतरमाहसंहतत्वाच्चेति॥हेतुंसाधयतिगृहस्येति॥यथानेमिरराश्चमिथःसंहन्यंतेतथैवप्राणस्यसंहतिरित्याहारनेमिवच्चेति॥किंचप्राणे
नाभिस्थानीयेसर्वंचसमर्पितमितिश्रूयतेतद्युक्तंतस्यसंहतत्वमित्याहनाभीति॥संहतत्वफलमाहतस्मादिति॥प्राणस्यगृहादिवत्पारार्थ्येपिसंहतशेषित्व
मेषितव्यंगृहादेस्तथादर्शनादित्याशंक्याहस्तंभेति॥स्वात्मनांस्तंभादीनांजन्मचोपचयश्चापक्षयश्चविनाशश्चनामचाकृतिश्चकार्यंचेत्येतेधर्मास्तन्निरपेक्ष

चै५

राम:
१०

तयालब्धासत्तास्फुरणंचयेनसचतेषुस्तंभादिषुविषयेषुद्रष्टाचश्रोताचमंताचविज्ञाताचतदर्थत्वंतेषांतत्संघातस्यचदृष्टप्राणादीनामपितथात्वंभ
वितुमर्हतीतिमन्यामहइतिसंबंधः॥प्राणादिःस्वातिरिक्तद्रष्टृशेषः॥संहतत्वात्गृहादिवदित्यनुमानात्तत्तायांतत्त्वतीतौचप्राणादिविक्रियानपेक्ष
तयासिद्धोद्रष्टानिर्विकारोयुक्तस्तस्यविकारवत्वेहेत्वभावादितिभावः॥प्राणदेवतापारार्थ्यानुमानंव्याप्त्यंतरविरुद्धमितिशंकतेदेवतेति॥प्राणदेव
तायाश्चेतनत्वमेवकथमभ्युपगतंतत्राहप्राणस्येति॥तथापिप्रकृतेनुमानेकथंव्याप्त्यंतरविरोधस्तत्राहचेतनावत्वेचेति॥योहियेनसमःसतच्छेषोन

तथाप्राणाद्यवयवानांतत्संघातस्यचस्वात्मजन्मोपचयापक्षयविनाशनामाकृतिकार्यधर्मनिरपेक्षलब्धसत्तादितद्विषयद्रष्टृश्रोतृमं
तृविज्ञात्रर्थत्वंभवितुमर्हतीति॥देवताचेतनावत्वेसमत्वात्तद्गुणभावानुपगमइतिचेत्प्राणस्यविशिष्टैर्नामभिरामंत्रणदर्शनाच्चेतना
वत्वमभ्युपगतंचेतनावत्वेचपारार्थ्योपगमःसमत्वादनुपपन्नइतिचेत्॥ननिरुपाधिकस्यकेवलस्यविजिज्ञापयिषितत्वात्॥क्रियाका
रकफलात्मकताह्यात्मनोनामरूपोपाधिजनिताऽविद्याध्यारोपितातन्निमित्तोलोकस्यक्रियाकारकफलाभिमानलक्षणःसंसारःसनिरु
पाधिकात्मस्वरूपविद्ययानिवर्तयितव्यइतितत्स्वरूपविजिज्ञापयिषयोपनिषदारंभः॥ब्रह्मतेब्रवाणीतिनैतावताविदितंभवतीत्युप
क्रम्यैतावदरेखल्वमृतत्वमितिचोपसंहारात्॥नचातोन्यदंतरालेविवक्षितमुक्तंवास्ति॥ भवतियथादीपोदीपांतरेणतुल्योनतच्छेषइति

व्याप्तिविरोधःस्यादित्यर्थः॥नायंविरोधःसमाधातव्यःशेषशेषिभावस्यात्राप्रतिपाद्यत्वादितिपरिहरतिनिरुपाधिकस्येति॥तदेवस्फुटयतिक्रियेत्या
दिना॥उपनिषदारंभोनिरुपाधिकंस्वरूपंज्ञापयितुमित्यत्रगमकमाहब्रह्मेति॥द्वेवावब्रह्मणोरूपेमूर्तंचैवामूर्तंचेत्यादिदर्शनादस्यामुपनिषदिसोपा
धिकमपिब्रह्मविवक्षितमित्याशंक्याह॥नचेति॥द्वित्ववादस्यकल्पितविषयत्वान्नेतिनेतीतिनिर्विशेषवस्तुसमर्पणादतोन्यदार्तमितिचोक्तेरत्रनिरुपा

विकल्पेष्वप्रतिपाद्यमितिभावः॥

शेषशेषिभावस्याप्रतिपाद्यत्वे फलितमाह तस्मादिति॥ किमर्थं तर्हि शेषशेषिभावस्तत्र तत्रोक्तस्तत्राह विशेषवतो हीति॥ सोपाधिकस्य शेषशेषिभावो वि-
वक्षितस्तत्र च स्वामिभृत्यन्यायेन विशेषसंभवादसिद्धं समत्वमित्यर्थः न च विपरीतस्य निरुपाधिकस्य शेषशेषित्वमस्तीत्यत्र हेतुमाह निरुपाख्यो ही-
ति॥ शेषशेषित्वाद्यशेषविशेषशून्य इत्यर्थः॥ पाणिपेषवाक्यविचारार्थं संक्षिप्योपसंहरत्यादित्यादीति॥ वृत्तमनूद्यानंतरग्रंथमवतार्य व्याचष्टे स
एवमित्यादिना॥ एतत्स्वपनं यथा भवति तथेति यावत्॥ यत्रैत्युक्तं कालं विशिनष्टि प्रागिति॥ तदा क्वाभूदिति संबंधः॥ विज्ञानमय इत्यत्र विज्ञानं

तस्मादनवसरः समत्वाद्गुणभावानुपगम इति चोद्यस्य॥ विशेषवतो हि सोपाख्यस्य संव्यवहारार्थो गुणगुणिभावो न विपरीतस्य निरुपा-
ख्यो हि विजिज्ञापयिषितः सर्वस्यामुपनिषदि स एष नेति नेतीत्युपसंहारात्॥ तस्मादादित्यादिब्रह्मभ्य एतेभ्यो विज्ञानमयेभ्यो विलक्षणो
न्योऽस्ति विज्ञानमय इति एतत्सिद्धं॥ स एवमजातशत्रुर्व्यतिरिक्तात्मास्तित्वं प्रतिपाद्य गार्ग्यमुवाच यत्र यस्मिन्काल एष विज्ञानमयः पुरुष ए-
तत्स्वपनं सुप्तो भूत्वा वाक्पाणिपेषप्रतिबोधाद्विज्ञानं विज्ञायतेऽनेनेत्यंतःकरणं बुद्धिरुच्यते तन्मयस्तत्प्रायो विज्ञानमयः किं पुनस्तत्प्रा-
यत्वं॥ तस्मिन्नुपलभ्यत्वं तेन चोपलभ्यत्वमुपलब्धृत्वं च॥ कथं पुनर्मयटोऽनेकार्थत्वे प्रायार्थतैवावगम्यते॥ स वा अयमात्मा ब्रह्म विज्ञानम-
यो मनोमय इत्येवमादौ प्रायार्थ एव प्रयोगदर्शनात्॥ पर परं ब्रह्म तद्विकारो जीवस्तेन विकारार्थे मयडिति केचित्तं निराकरोति विज्ञानमिति॥ अं-
तःकरणप्रायत्वमात्मनो न कल्पते तस्यासंगस्य तेनासंबंधादित्याक्षिपति किं पुनरिति॥ असंगस्याप्याविद्यं बुद्ध्यादिसंबंधमुपेत्य परिहरति तस्मि-
न्निति॥ तत्त्वासित्वाच्च तत्प्रायत्वमित्याहोपलब्धृत्वं चेति॥ नियामकाभावं शंकित्वा परिहरति कथमित्यादिना॥ एकस्मिन्नेव वाक्ये पृथिवीमय इत्यादौ
प्रायार्थत्वोपलंभाद्विज्ञानमय इत्यत्रापि तदर्थत्वमेव मयटो निश्चितमित्युक्तमिदानीं जीवस्य परमात्मरूपविज्ञानविकारत्वस्य श्रुतिस्मृत्योरप्रसिद्धत्वाच्च प्रा-

अप्रसिद्धमपि विज्ञानविकारत्वं श्रुतिवशाद्दिष्यतामित्याशंक्याह य एष इति॥ य एष विज्ञानमय इत्यत्र विज्ञानमयस्यैषेति प्रसिद्धवदनुवादादप्रसिद्ध
विज्ञानविकारत्वं सर्वनामश्रुतिविरुद्धमित्यर्थः॥ जीवो ब्रह्मावयवस्तत्सदृशो वा तदर्थो मयडित्याशंक्याहावयवेति॥ ब्रह्मणो निरवयवत्वश्रुतेः तस्यैव जी
वरूपेण प्रवेशश्रवणाच्च प्रकृते वाक्ये मयटोऽवयवार्थायोगान्निर्विषयत्वासंभवाच्च पारिशेष्यात्सूत्रोक्ता प्रायार्थतैवेत तस्य प्रत्येतव्येत्यर्थः॥ विज्ञानम

विज्ञानविकारत्वस्याप्रसिद्धत्वाद्य एष विज्ञानमय इति च प्रसिद्धवदनुवादात् अवयवोपमार्थयोश्चात्रासंभवात्पारिशेष्यात्प्रायार्थतैव॥
तस्मात्संकल्पविकल्पाद्यात्मकमन्तःकरणं तन्मय इत्येतत् पुरुषः पुरिशयनात्॥ क्वैष तदाभूदिति प्रश्नः स्वभावविजिज्ञापयिषया॥ प्राक्प्र
तिबोधात्क्रियाकारकफलविपरीतस्वभाव आत्मेति कार्याभावेन दिदर्शयिषितं॥ न हि प्राक्प्रतिबोधात्कर्मादिकार्यं सुखादि किंचन गृह्यते॥

सहोवाचाजातशत्रुर्यत्रैष एतत्सुप्तोऽभूद्य एष विज्ञानमयः पुरुषः॥ क्वैष तदाभूत्कुत एतदागादिति तदु ह न मेने गार्ग्यः॥ १६॥

तस्मात्कर्मप्रयुक्तत्वात्तथा स्वाभाव्यमेवात्मनोऽवगम्यते॥ यस्मिन्स्वाभाव्ये भूद्यतश्च स्वाभाव्यात्प्रच्युतः स संसारीस्वभावविलक्षण
इत्येतद्विवक्षया पृच्छति गार्ग्यं प्रतिभानरहितं बुद्धिव्युत्पादनाय॥ क्वैष तदाभूत्कुत एतदागादित्येतदुभयं गार्ग्येणैव प्रष्टव्यमासीत्त
थापि गार्ग्येण न दृष्टमिति नोदास्ते जातशत्रुर्बोधयितव्य एवेति प्रवर्त्तते

यपदार्थमुपसंहरति तस्मादिति॥ यत्रेत्यादिव्याख्यायवाक्यशेषमव
तार्य तात्पर्यमाह क्वैष इति॥ स्वरूपज्ञापनार्थं प्रश्नप्रवृत्तिरित्येतत्प्रकटयति प्रागिति॥ कार्याभावेनेत्युक्तं व्यनक्ति न हीति॥ तस्मादित्यस्यैवार्थमाह कर्म
प्रयुक्तत्वादिति॥ किं तथा स्वाभाव्यमिति तदाह यस्मिन्निति॥ द्वितीयप्रश्नार्थं संक्षिपति यतश्चेति॥ उक्तेऽर्थे प्रश्नद्वयमुत्थापयत्येतदिति॥ तथा स्वाभाव्यमेवे

बृ·र· १२

एतदित्यधिकरणमपादानंचगृह्यतेकिमितितंप्रत्युभयंपृच्छ्यते॥स्वकीयप्रतिज्ञांनिर्वोढुमित्यभिप्रेत्याहबुद्धीति॥ननुशिष्यत्वात्गार्ग्येणैवप्रष्टव्यंसचे
दृप्तत्वान्नपृच्छतितर्हिराज्ञस्तस्मिन्नौदासीन्यमेवयुक्तंतत्राहइत्येतदुभयमिति॥तदुहेत्यादिव्याकरोत्येवमिति॥एतदागमनंयथाभवतितथेतियावत्
तत्रक्रियापदयोर्यथाक्रमंवक्तुंप्रष्टुंचेत्याभ्यांसंबंधः॥१६॥कूटस्थचिदेकरसोयमात्मातत्रक्रियाकारकफलव्यवहारोवस्तुतोनास्तीतिविवक्षितार्थस्त

ज्ञापयिष्याम्येवेतिप्रतिज्ञातत्वादेवमसौसूत्पाद्यमानोपिगार्ग्योयत्रैषआत्माभूत्प्राक्प्रबोधाद्यतश्चैतदागमनमागात्तदुभयंनव्युत्सेदेव
क्तुंप्रष्टुंवागार्ग्योहनमेनेनज्ञातवान्॥१६॥सहोवाचाजातशत्रुर्विवक्षितार्थसमर्पणाय॥यत्रैषएतत्सुप्तोभूद्यएषविज्ञानमयःपुरुषःक्वै
षतदाभूत्कुतएतदागादितिपदद्वयंक्रमतश्शृणुउच्यमानं॥यत्रैषएतत्सुप्तोभूत्तदातस्मिन्कालएषांवागादीनांप्राणानांविज्ञानेनांतः

सहोवाचाजातशत्रुर्यत्रैषएतत्सुप्तोभूद्यएषविज्ञानमयःपुरुषस्तदेषांप्राणानांविज्ञानेनविज्ञानमादाययएषोंतर्हृदयआ
काशस्तस्मिंछेतेतानियदागृह्णात्यथहैतत्पुरुषःस्वपितिनाम॥ करणगताभिव्यक्तविशेषविज्ञानेनोपाधिस्वभावजनितेनादाय
विज्ञानंवागादीनांस्वविषयगतसामर्थ्यंगृहीत्वायएषोंतर्मध्येहृदयेहृदयस्याकाशोयःआकाशशब्देनपरएवस्वआत्मोच्यतेतस्मिन्स्व
आत्मन्याकाशेशेतेस्वाभाविके स्पष्टीकरणार्थंप्रस्तुतंप्रश्नद्वयमनुवदतियत्रेति॥उपाधिरंतःकरणंतस्यस्वभावस्तदुपादानमज्ञानं॥तेनजनि
तमंतःकरणगतमभिव्यक्तंविशेषविज्ञानंचैतन्याभासलक्षणंतेनकरणेनेत्यर्थः॥वागादीनांस्वंस्वंविषयगतंप्रतिनियतंप्रकाशनसामर्थ्यंविज्ञानमि
त्यर्थः॥यएषोंतरितिप्रतीकमादायव्याचष्टेमध्यइति॥आकाशशब्दस्यभूताकाशविषयत्वमाशंक्याआकाशोर्थांतरत्वादिव्यपदेशादितिन्यायेनाहाकाश

अ· ४

॥श्रीः॥ रामः १२

हस्तिदेहगतस्यभल्लबाणविछिन्नस्याकाशस्यहस्तिदेहावछिन्नाकाशेनसहैकतांगतस्यलोहयोगादयस्कांतेनोद्धरणवत्कारणयोगात्कर्मभिरुद्धरणं॥तथाचश्रुतिःपुनश्चजन्मांतरकर्मयोगात्स्वा
सद्रूपेब्रह्मण्येवसुषुप्तस्यशयनंभूताकाशेतुनभवतीत्यत्रछांदोग्यश्रुतिसंमतिमाहश्रुत्यंतरेति॥कीदृगत्रस्वपनंविवक्षितमित्याशंक्याहलिंगेति॥
स्वापाधिकारेस्वाभाविकत्वमविद्यामात्रसंमिश्रत्वंसतिसंपद्यनविदुरित्यादिश्रुतेरितिद्रष्टव्यं॥तानियदेत्यादिवाक्यमाकांक्षापूर्वकमादत्तेयदेत्यादि
ना॥विज्ञानानितत्साधनानीत्येतत्॥पुरुषइतिप्रथमाषष्ठ्यर्थेऽतोवस्यत्यस्यपुरुषस्येति॥अश्वकर्णादिनाम्नोविशेषमाहगौणमेवेति॥गौणत्वंत्वसा

ऽसंसारिकेनकेवलआकाशएवश्रुत्यंतरसामर्थ्यात्सतासोम्यतदासंपन्नोभवतीति॥लिंगोपाधिसंबंधकृतंविशेषात्मस्वरूपमुत्सृज्या
विशेषेस्वाभाविकआत्मन्येवकेवलेवर्ततइत्यभिप्रायः॥यदाशरीरेंद्रियाध्यक्षतामुत्सृजतितदासोस्वात्मनिवर्त्ततइतिकथमवगम्यते
नामप्रसिध्याकासौनामप्रसिद्धिरित्याहतानिवागादिविज्ञानानियदायस्मिन्कालेगृह्णात्यादत्तेऽथतदाहएतत्पुरुषःस्वपितिनामसतत्ना

तद्गृहीतएवप्राणोभवतिगृहीतावाग्गृहीतंचक्षुर्गृहीतंश्रोत्रंगृहीतंमनः॥१७॥

मास्यपुरुषस्यतदाप्रसिद्धंभवति॥गौणमेवास्यनामभवतिस्वमेवात्मानमपीत्यपिगच्छतीतिस्वपितीत्युच्यते॥सत्यंस्वपितीतिना
मप्रसिध्यात्मनःसंसारधर्मविलक्षणंरूपमवगम्यतेनत्वत्रयुक्तिरस्तीत्याशंक्याह॥तत्तत्रस्वापकालेगृहीतएवप्राणोभवतिप्राणइ
तिघ्राणेंद्रियंवागादिप्रकरणात्वागादिसंबंधेहिसतितदुपाधित्वादस्यसंसारधर्मित्वंलक्ष्यते॥वागादयश्चोपसंहृताएवतदातेन॥कथं॥

दयतिस्वमेवेति॥नाम्नोर्थव्यभिचारस्यापिदृष्टत्वात्तद्वशान्नस्वापेस्वरूपावस्थानमितिशंकामनूद्यतत्गृहीतएवेत्यादिवाक्यमुत्थाप्यव्याचष्टे॥सत्यमि
त्यादिना॥कापुनरात्मनःस्वापावस्थायामसंसारिस्वरूपेवस्थानमित्यत्रयुक्तिरिहोक्ताभवतितत्राहवागादीति॥तदासुषुप्त्यवस्थायांतेनात्मनाचैतन्या

यथा घटतीति घट इत्यादिषु २ पुरुषे १

स्यापेक्षकरणोपसंहारं विवृणोति कथमित्यादिना॥ तदुपसंहारफलं कथयति तस्मादिति॥ १७॥ अन्वयव्यतिरेकाभ्यां वागाद्युपाधिकमात्मनः संसारित्वमु
क्तं तत्र व्यतिरेकासिद्धिमाशंकते नन्विति॥ व्यतिरेकासिद्धौ फलितमाह तस्मादिति॥ स्वप्नस्य रज्जुसर्पादिवन्मिथ्यात्वेन वस्तुधर्मत्वाभावान्नात्म

गृहीता वाक् गृहीतं चक्षुर्गृहीतं श्रोत्रं गृहीतं मनः॥ तस्मादुपसंहृतेषु वागादिषु क्रियाकारकफलात्मताभावात् स्वात्मस्थ एवात्मा भव
तीत्यवगम्यते॥ १७॥ ननु दर्शनलक्षणायां स्वप्नावस्थायां कार्यकरणवियोगेऽपि संसारधर्मित्वमस्य दृश्यते यथा च जागरिते सुखी दुःखी
बंधुवियुक्तः शोचति मुह्यते च तस्माच्छोकमोहधर्मवानेवायं नास्य शोकमोहादयः सुखदुःखादयश्च कार्यकरणसंयोगजनिता आत्याध्यारो
पिता इति॥ न मृषात्वात्॥ स प्रकृत आत्मा यत्र यस्मिन्काले दर्शनलक्षणया स्वप्न्यया स्वप्नवृत्त्या चरति वर्तते तदा तेहास्य लोकाः कर्मफलानि

सयत्रैतत्स्वप्न्यया चरति तेहास्य लोकास्तदुतेव महाराजो भवत्युतेव महाब्राह्मण उतेवोच्चावचं निगच्छति ॥

के ते तत्र उत अपि महाराज इव भवति सोऽयं महाराजत्वमिवास्य लोको न महाराजत्वमेव जागरित इव तथा महाब्राह्मण इव उत अपि उच्चाव
चं उच्चं देवत्वाद्यवचं च तिर्यक्त्वादि उच्चमिवावचमिव च निगच्छति॥ मृषैव महाराजत्वादयोऽस्य लोका इवशब्दप्रयोगाद्व्यभिचारदर्शनाच्च॥ त
स्मान्न बंधुवियोगादिजनितशोकमोहादिभिः स्वप्ने संबध्यत एव॥ ननु च यथा जागरिते जाग्रत्काला नः संसारित्वं इत्युत्तरमाह न मृषात्वादि
ति॥ तदुपपादयन्नादौ स यत्रेत्यादीन्यक्षराणि योजयति स प्रकृत इत्यादिना॥ अथात्र स्वप्नस्वभावो निर्दिश्यते न तस्य मिथ्यात्वं कथ्यते तत्राह मृषैवेति॥
स्वप्ने दृष्टानां महाराजत्वादीनां जाग्रत्यनुवृत्तिराहित्यं व्यभिचारदर्शनं स्वप्नस्य मिथ्यात्वे सिद्धमर्थमाह तस्मादिति॥ विमता लोका न मिथ्या तत्कालाव्यभिचा

२ देहद्वयात्मनोर्विवेचनमात्रेण गतार्थत्वात्साणिवाक्यगतस्य जाग्रत्स्वप्नसत्यत्वप्रतिवस्तुतोसंतमपि ३ | जगन्मिथ्यात्वेन पाणिपेषणवाक्ये २

साध्यवैकल्यं वक्तुं सिद्धांती पाणिपेषवाक्योक्तं स्मारयति नन्वचेति॥ जाग्रल्लोकस्य मिथ्यात्वे फलितमाह तत्कथमिति॥ प्रादुर्भावे जाग्रल्लोकस्य कर्तृत्वं प्राक्रणिकमेष्टव्यं तत्र पूर्ववादी दृष्टांतं साधयति सत्यमित्यादिना॥ अन्वयव्यतिरेकाख्यो न्यायः॥ देहद्वयस्यात्मनश्च विवेकमात्रं प्रागुक्तं न तु प्राधान्येनात्मनः शुद्धिरुक्तेति विभागमंगीकृत्य वस्तुतोऽसंतमपि दृष्टांतं संतं कृत्वा तेन स्वप्नसत्यत्वमाशंक्य तन्निरासेनात्यंतिकी शुद्धिरात्मनः स्वप्नवाक्येनोच्यते॥ तथा च

ऽव्यभिचारिणो लोका एवं स्वप्नेपि तेस्य महाराजत्वादयो लोकाः स्वप्नकालभाविनः स्वप्नकालाऽव्यभिचारिणः आत्मभूता एव न त्वविद्याध्यारोपिता इति॥ ननु च जाग्रत्कार्यकरणात्मकत्वं देवतात्मत्वं चाविद्याध्यारोपितं न परमार्थतः इति व्यतिरिक्तविज्ञानमयात्मप्रदर्शनेन प्रदर्शितं॥ तत्कथं दृष्टांतत्वेन स्वप्नलोकस्य मृतइवोज्जीविष्यन्प्रादुर्भविष्यति॥ सत्यं विज्ञानमये व्यतिरिक्ते कार्यकरणदेवतात्मत्वदर्शनमविद्याध्यारोपितं शुक्तिकायामिव रजतत्वदर्शनमित्येतत्सिध्यति व्यतिरिक्तात्मास्तित्वप्रदर्शनन्यायेनैव न तु तद्धि शुद्धिपरतयैव न्याय उक्त इत्यसन्नपि दृष्टांतो जाग्रत्कार्यकरणदेवतात्मत्वदर्शनलक्षणः पुनरुद्भाव्यते॥ सर्वो हि न्यायः कंचिद्विशेषमपेक्षमाणोऽपुनरुक्तो भवति॥ न तावत्स्वप्ने अनुभूतमहाराजत्वादयो लोका आत्मभूता आत्मनोन्यस्य जाग्रत्स्वप्नेति बिंबभूतस्य लोकस्य दर्शनान्महाराज एव तावद्व्यस्तसुप्तासुप्रकृतिषु पर्यंके शयानः स्वप्नान्पश्यन्नुपसंहृतकरणः पुनरुपगतप्रकृतिं महाराजमिवात्मानं जागरितइव पश्यति॥

चैत्र ३   क्षेत्रज्ञात् २   संस्कारस्य २   स्वप्ने २

जाग्रतोपि तथा मिथ्यात्वादात्मैकरसः शुद्धः स्यादित्याशयवानाह इत्यसन्नपीति॥ पाणिपेषवाक्ये जाग्रन्मिथ्यात्वोक्त्यार्थादुक्ताशुद्धिरत्रापि सैवोच्यते चेत्पुनरुक्तिरित्याशंक्याह सर्वो हीति॥ यत्किंचित्साम्यात्पौनरुक्त्यं सर्वत्र तुल्यमवांतरभेदादपौनरुक्त्यं प्रकृतेपि समं पूर्वत्र शुद्धिद्वारस्यार्थिकत्वादिह वाचनिकत्वादिति भावः॥ जाग्रद्दृष्टांतेन स्वप्नसत्यत्वचोद्यसंभवाद्वा चैत्रस्य स्तमाधिरिति पूर्ववादिमुखेनोक्तासमाधिमधुनाकथयति न तावदिति॥ विमतान द्रष्टुरा

स्वप्नलोकस्य दृष्टांतत्वेन जाग्रल्लोकः कथं प्रादुर्भविष्यति तत्र दृष्टांतः मृतइवोज्जीविष्यन् १   रागेच्छासुखदुःखादि बुद्धौ सत्यां प्रवर्तन्ते सुषुप्तौ नास्ति तन्नाशेन तस्माद्बुद्धेस्तु नात्मन इति स्मरणं १

दर्शनात्१

किंचस्वप्नदृष्टानांजाग्रद्दृष्टादर्थांतरत्वेनदृष्टेर्मिथ्यात्वमित्याहमहाराजइति॥तेषांजाग्रद्दृष्टादर्थांतरत्वमसिद्धमित्याशंक्याहनचेति॥प्रमाणसामग्र्यभावा
च्चस्वप्नस्यमिथ्यात्वमित्याहनचेति॥योग्यदेशाभावाच्चतन्मिथ्यात्वमित्याहनचेति॥देहाद्बहिरेवस्वप्नदृष्ट्यंगीकाराद्योग्यदेशसिद्धिरित्याशंक्याहदे

यैत्रागतंभुंजानमिवचभोगान्॥नचतस्यमहाराजस्यपर्यंकेशयानात्द्वितीयोन्यःप्रकृत्युपेतोविषयेपर्यटन्नहनिलोकेप्रसिद्धोस्तिय
मसौसुप्तःपश्यति॥नचोपसंहृतकरणस्वरूपादिमतोदर्शनमुपपद्यतेनचदेहेदेहांतरस्यतत्तुल्यस्यसंभवोस्तिदेहस्यस्यैवहिस्वप्नद
र्शनं॥ननुपर्यंकेशयानःपथिप्रवृत्तमात्मानंपश्यति॥नबहिःस्वप्नान्पश्यतीत्येतदाह॥समहाराजोजानपदान्जनपदेभवान्राजो

सयथामहाराजोजानपदान्गृहीत्वास्वेजनपदेयथाकामंपरिवर्त्ततैवमेवैषएतत्प्राणान्गृहीत्वास्वेशरीरेयथाकामंप
रिवर्त्तते।१८॥ पकरणभूतान्भृत्यानन्यांश्चगृहीत्वोपादायस्वआत्मीयएवजयादिनोपार्जितेजनपदेयथाकामंयोयःकामोऽस्यय
थाकाममभिक्रांतोयथापरिवर्त्ततेत्यर्थः॥एवमेवएषविज्ञानमयःएतदितिक्रियाविशेषणंप्राणान्गृहीत्वाजागरितस्थानेभ्यःउपसंहृ
त्यस्वेशरीरेस्वएवदेहेनबहिर्यथाकामंपरिवर्त्तते॥कामकर्मभ्यामुद्भासिताःपूर्वानुभूतवस्तुसदृशीर्वासनाअनुभवतीत्यर्थः॥तस्मात्स्व
प्नेमृषाध्यारोपिताएवात्मभूतत्वेनलोकाअविद्यमानाएवसंतस्तथाजागरितेपीतिप्रत्येतव्यं॥ हस्यस्येति॥एतदेवसाधयितुंशंकतेनन्विति॥
तत्रसयथेत्यादिवाक्यमुत्तरत्वेनावतार्यव्याचष्टेनबहिरित्यादिना॥यथाकामंतंतमनतिक्रम्येत्यर्थः॥एतदितिक्रियायाःग्रहणस्यविशेषणमेतत्ग्रहणंय
थाभवतितथेत्यर्थः॥परिवर्त्तनमेवविवृणोतिकामेति॥योग्यदेशाभावेसिद्धेसिद्धमर्थंदर्शयतितस्मादिति॥स्वप्नस्यमिथ्यात्वेतद्दृष्टांतत्वेनजडत्वादिहेतुनाजाग

लौँकि४

द्वयोर्मिथ्यात्वे प्रतीचो विशुद्धिः सिद्धेत्युपसंहरति तस्मादिति॥ अक्रियाकारकफलात्मक इति विशेषणं समर्थयते यस्मादिति॥ जागरितं दृष्टांतीकृत्य दा
र्ष्टांतिकमाह॥ तथेति॥ द्रष्टृदृश्याभावे सिद्धे फलितमाह तस्मादिति॥ अन्यच्च फलं कथयति विशुद्ध इति॥१८॥ वृत्तानुवादपूर्वकं उत्तरश्रुतिनिरस्यामा

तस्माद्विशुद्धोऽक्रियाकारकफलात्मको विज्ञानमय इत्येतत्सिद्धं॥ यस्मात् दृश्यंते द्रष्टुर्विषयभूताः क्रियाकारकफलात्मकाः कार्यकरण
लक्षणा लोकाः तथा स्वप्नेपि तस्मादन्योसौ दृश्येभ्यः स्वप्नजागरितलोकेभ्यो द्रष्टा विज्ञानमयो विशुद्धः॥१८॥ दर्शनवृत्तौ स्वप्ने वासनारा
शेर्दृश्यत्वादतद्धर्मतेति विशुद्धतावगतात्मनः॥ तत्र यथाकामं परिवर्तत इति कामवशात्परिवर्तनमुक्तं॥ द्रष्टृदृश्यसंबंधश्चास्य स्वाभा

अथ यदा सुषुप्तो भवति यदा न कस्यचन वेद हिता नाम नाड्यो द्वासप्ततिसहस्राणि हृदयात्पुरीततमभिप्रतिष्ठंते ॥

विक इत्यशुद्धताशंक्यते अतस्तद्विशुद्ध्यर्थमाह॥ अथ यदा सुषुप्तो भवति॥ यदा स्वप्ने याचरति तदाप्ययं विशुद्ध एव॥ अथ पुनर्यदा हि
त्वा दर्शनवृत्तिं स्वप्नं यदा यस्मिन्काले सुषुप्तः संप्रसादं स्वाभाव्यं गतो भवति सलिलमिवान्यसंबंधकालुष्यं हित्वा स्वाभाव्येन प्रसीदति॥ क
दा सुषुप्तो भवति॥ यदा यस्मिन् काले न कस्यचन न किंचनेत्यर्थः वेद विजानाति कस्यचन वा शब्दादेः संबंधिवस्त्वंतरं किंचन न वेद
त्यध्याहार्यं॥ पूर्वं तु न्याय्यं विशेषज्ञानाभावस्य विवक्षितत्वात्॥ एवं तावद्विशेषविज्ञानाभावे सुषुप्तो भवतीत्युक्तं शंकामाह दर्शनवृत्ताविव्या
दिना॥ तत्रेति स्वप्नोक्तिः॥ कामादिसंबंधश्च कारार्थः॥ निवर्त्यशंकासद्भावान्निवर्तिकानंतरश्रुतिप्रवृत्तिं प्रतिजानीते॥ अत इति॥ स्वप्नेपि शुद्धिरुक्ता किं सुषु
प्तिग्रहणेनेत्याशंक्याह॥ यदेति॥ गतो भवति तदा सुतरामस्य शुद्धिः सिद्ध्यतीति शेषः॥ तमेव सुषुप्तिकालं प्रश्नपूर्वकं प्रकटयति कदेति॥ विकल्पं व्यावर्तयति पूर्वं
नकस्यचन इत्यस्य न किंचन वेद इत्येवं न्याय्य३ ५सुषुप्तः

त्विति॥ वृत्तमनूद्य प्रश्नपूर्वकं सुषुप्तगतिप्रकारं दर्शयत्येवं ता
वदिति॥

१ विस्तारतः संख्या नाडीनां ७२७२१०२०१ मध्यमतः संख्या ७२००० संक्षेपतः १०१ पूषालंबुषाहस्तिजिह्वागांधारीसारस्वतीइडापिंगलासुषुम्नापयस्विनीविश्वोदरीशुक्लाशंखिनीकुहूराकासिनी

हितफलप्राप्तिनिमित्तत्वान्नाड्यो हिता उच्यंते तासां देहसंबद्धानामन्वयव्यतिरेकाभ्यामन्नरसविकारत्वमाहान्नेति॥तासामेवमध्यमसंख्यां कथयति तावंत्यस्तीनि तासामिति॥तासां च हृदयसंबंधिनीनां ततो निर्गत्य देहव्याप्त्या बहिर्मुखत्वमाह हृदयादिति॥ताभिरित्यादिव्याकर्तुं भूमिकां करोति तत्रेति॥शरीरं सप्तम्यर्थः शरी

केन पुनः क्रमेण सुषुप्तो भवतीत्युच्यते हिता नाम हिता इत्येवं नाम्न्यो नाड्यः शिरा देहस्यान्नरसविपरिणामभूतास्ताश्च द्वासप्ततिसहस्राणि द्वे सहस्रे अधिके सप्ततिश्च सहस्राणि ताः द्वासप्ततिसहस्राणि नाडीनां हृदयात् हृदयं नाम मांसपिंडस्तस्मान्मांसपिंडात्पुंडरीकाकारात्पुरीततं हृदयपरिवेष्टनमाचक्षते तदुपलक्षितं शरीरमिह पुरीतच्छब्देनाभिप्रेतं पुरीततमभिप्रतिष्ठंत इति शरीरं कृत्स्नं व्याप्नुवंत्यो श्वत्थपर्णराजय इव बहिर्मुखाः प्रवृत्ता इत्यर्थः॥ तत्र बुद्धेरंतःकरणस्य हृदयं स्थानं तत्रस्थबुद्धितंत्राणि चेतराणि बाह्यानि करणानि

ताभिः प्रत्यवसृप्य पुरीतति शेते ॥

तेन बुद्धिः कर्मवशाच्छ्रोत्रादीनि ताभिर्नाडीभिर्मत्स्यजालवत्कर्णशष्कुल्यादिस्थानेभ्यः प्रसारयति प्रसार्य चाधितिष्ठति जागरितकाले तां विज्ञानमयोभिव्यक्तस्वात्मचैतन्यावभासतया व्याप्नोति संकोचनकाले च तस्या अनुसंकुचति सोस्य विज्ञानमयस्य स्वापो जाग्रद्विकाशानुभवो भोगो बुद्ध्युपाधिस्वभावानुविधायी हि सः चंद्रादिप्रतिबिंब इव जलाद्यनुविधायी तस्मात्तस्या बुद्धेः जाग्रद्विषयायास्ताभिर्नाडीभिः प्रत्यवसर्पणमनु प्रत्यवसृप्य पुरीतति शरीरे शेते तिष्ठति

रेकरणानां बुद्धितंत्रत्वे किं स्यादिति तदाह तेनेति॥तथापि जीवस्य किमायातमित्याशंक्याह तां विज्ञानमय इति॥भोगशब्दो जागरविषयः बुद्धिविकाशमनुभवन्नात्मा जागर्तीत्युच्यते तत्संकोचं चानुभवन्स्वपितीत्यत्र हेतु

वाली॥तासामपि इडापिंगलासुषुम्ना॥तासामपि सुषुम्ना १

अयं:पिंडोंऽग्निश्चैर

बुद्ध्यनुविधायित्वंपरामृश्यताभिरित्यादिव्याचष्टेतस्मादिति॥प्रत्यवसर्पणंव्यावर्त्तनंपदार्थमुक्त्वावाक्यार्थमाहतप्तमिवेति॥कर्मत्वे
देहस्यकर्तृत्वेचात्मनोदृष्टांतद्वयं॥हृदयाकाशेब्रह्मणिशेतेविज्ञानात्मेत्युक्त्वापुरीततिशयनमाचक्षाणस्यपूर्वापरविरोधःस्यादित्याशंक्याहस्वाभा

तप्तमिवलोहपिंडमविशेषेणसंव्याप्याग्निवत्पुरीतंसंव्याप्यवर्त्ततइत्यर्थः॥स्वाभाविकएवस्वात्मनिवर्त्तमानोपिकर्मानुगतबुद्ध्यनुवृत्ति
त्वात्पुरीततिशेतइत्युच्यते॥नहिसुषुप्तकालेशरीरसंबंधोस्तितीर्णोहितदासर्वान्शोकान्हृदयस्येतिहिवक्ष्यति॥सर्वसंसारदुःखवियु
क्तेयमवस्थेति॥अत्रदृष्टांतः॥सयथाकुमारोवात्यंतबालोवामहाराजोवात्यंतवश्यप्रकृतिर्यथोक्तकृन्महाब्राह्मणोवात्यंतपरिपक्वविद्या
विनयसंपन्नोतिघ्नीमतिशयेनदुःखंहंतीतिअतिघ्नीआनंदस्यावस्थासुखावस्थातांप्राप्यगत्वाशयीतावतिष्ठेत॥एषांचकुमारादीनांस्वभा

सयथाकुमारोवामहाराजोवामहाब्राम्हणोवातिघ्नीमानंदस्यगत्वाशयीतैवमेवैषएतच्छेते॥१९॥

वावस्थानांसुखंनिरतिशयंप्रसिद्धंलोके॥विक्रियमाणानांहितेषांदुःखंनस्वभावतस्तेनतेषांस्वाभाविक्यवस्थादृष्टांतत्वेनोपादीयते
प्रसिद्धत्वान्नतेषांस्वापएवाभिप्रेतःस्वापस्यदार्ष्टांतिकत्वेनविवक्षितत्वात्॥विशेषाभावाच्चविशेषेहिसतिदृष्टांतदार्ष्टांतिकभेदःस्यात्॥
तस्मान्नतेषांस्वापोदृष्टांतःएवमेवयथायंदृष्टांतःएषविज्ञानमयःएतच्छयनंशेतइत्येतच्छब्दःक्रियाविशेषणार्थः॥एवमयंस्वाभाविकेस्व
आत्मनिसर्वसंसारधर्मातीतोवर्त्ततेस्वापकालइति॥ विकइति॥औपचारिकमिदंवचनमित्यत्रहेतुमाहनहीति॥इयमवस्थेतिप्रकृतासुषुप्तिरु
च्यते॥उक्तेषुदृष्टांतेषुविवक्षितमंशंदर्शयत्येषांचेति॥दुःखमपितेषांप्रसिद्धमित्याशंक्याहविक्रियमाणानांहीति॥कुमारादिस्वापस्यैवदृष्टांतत्वंकिंनस्या

दित्याशंक्याहनेत्याभामीति॥

उत्तरार्थे ६

बृ.र. १६

तत्त्वापस्य दृष्टांतत्वमस्मत्त्वापस्य दार्ष्टांतिकत्वमिति विभागमाशंक्याह विशेषाभावादिति॥ क्वैष तदाभूदिति प्रश्नस्योत्तरमुपपादितमुपसंहरति एवमिति ॥स यथेत्यादिः संगतिं वक्तुं वृत्तं कीर्तयति क्वैष इति॥ किं पुनराद्यप्रश्ननिर्णयेन फलितमिति॥ त्वंपदार्थशुद्धिरित्याहानेनेति॥ शुद्धिद्वारा ब्रह्मत्वं च तस्योक्तमित्याहासंसारित्वं चेति॥ उत्तरग्रंथस्य तात्पर्यमाह कुत इति॥ पूर्वेणोत्तरस्य गतार्थत्वं शंकते नन्विति॥ स्थित्यवधेरेव निर्द्धारितत्वादागत्यवधेर्निर्दिधारयिषया प्रश्ने प्रतिवचनं सावकाशमित्याशंक्याह तथासतीति॥ अपौरुषेयी श्रुतिरशेषदोषशून्यत्वादनतिशंकनीयेति सिद्धांती गूढाभिसंधिराह किं श्रुतिरिति॥ नश्रु

क्वैष तदाभूदित्यस्य प्रश्नस्य प्रतिवचनमुक्तं॥ अनेन च प्रश्ननिर्णयेन विज्ञानमयस्य स्वभावतो विशुद्धिरसंसारित्वं चोक्तं॥ कुत एतदागादित्यस्य प्रश्नस्यापाकरणार्थ आरंभः॥ ननु यस्मिन्ग्रामे नगरे वा यो भवति सोऽन्यत्र गच्छन्नतत एव ग्रामान्नगराद्वागच्छति नान्यतः तथासति क्वैष तदाभूदित्येतावानेवास्तु प्रश्नो यत्राभूत्तत एवागमनं प्रसिद्धं स्यान्नान्यत इति कुत एतदागादिति प्रश्नो निरर्थक एव॥ किं श्रुतिरुपालभ्यते भवता न किं तर्हि द्वितीयस्य प्रश्नस्यार्थांतरं श्रोतुमिच्छाम्यत आनर्थक्यं चोदयामि॥ एवं तर्हि कुत इत्यपादानार्थता न गृह्यतेऽपादानार्थत्वे हि पुनरुक्तता नान्यार्थत्वे अस्तु तर्हि निमित्तार्थः प्रश्नः कुत एतदागात्किंनिमित्तमिहागमनमिति॥ न निमित्तार्थतापि प्रतिवचनवैरूप्यात्॥ आत्मनश्च सर्वस्य जगतोऽग्निविस्फुलिंगादिवदुत्पत्तिः प्रतिवचने श्रूयते॥ न हि विस्फुलिंगानां विद्रवणेऽग्निर्निमित्तमपादानमेव तु सः॥

तिराक्षिप्यते निर्दोषत्वादिति पूर्ववाद्याह नेति॥ श्रुतेरनाक्षेपत्वदीयं चोद्यं निरवकाशमित्याह किं तर्हीति॥ तस्य सावकाशत्वं पूर्ववादी साधयति द्वितीयस्येति॥ पूर्ववादिन्यपादानादर्थांतरे पंचम्याः शुश्रूषमाणे सत्येकदेशी ब्रवीत्येवं तर्हीति॥ कथमन्यार्थत्वं तदाहास्त्विति॥ तर्हि तस्यामपादानार्थत्वेन पुनरुक्तत्वावस्थापामित्यर्थः॥ एकदेशिनं पूर्ववादी दूषयति नेति॥ अपादानार्थतावदित्यपेरर्थः॥ तदेव स्फुटयत्यात्मनश्चेति॥ जगतः सर्वस्य चेतनस्याचेतनस्य वेति वक्तुं च

वेने २

अ. ४

॥श्रीः॥ रामः १६

तर्हि भवत्पादानामर्थापंचमीत्याशंक्य पूर्ववादी पूर्वोक्तं स्मारयतिनन्विति॥ सर्वाविद्यातज्ज निर्मुक्तं प्रत्यगद्वयंब्रह्म प्रश्नद्वयव्याजेन प्रतिपिपादयिषितमिति
नपुनरुक्तिरितिसिद्धांतीस्वाभिसंधिमुद्घाटयतिनैषदोषइति॥ यथोक्तंवस्तु प्रश्नाभ्यांविवक्षितमितिकुतोज्ञातमित्याशंक्यतदुक्तं तार्तीयमर्थमनुवद

तथापरमात्मविज्ञानमपस्यात्मनोपादानत्वेनश्रूयतेऽस्मादात्मनइत्येतस्मिन्वाक्येतस्मात्प्रतिवचनवैलोम्यात्कृतइति प्रश्नस्यनिमि
त्तार्थतानशक्यतेवर्णयितुं॥ नन्वपादानपक्षेपिपुनरुक्ततादोषोवस्थितएव॥ नैषदोषः॥ प्रश्नाभ्यामात्मनिक्रियाकारकफलात्मतापो
हस्यविवक्षितत्वात्॥ इहहिविद्याऽविद्याविषयावुपन्यस्तौ॥ आत्मेत्येवोपासीतात्मानमेवावेदात्मानमेवलोकमुपासीतेतिविद्याविषयः॥ तथाऽविद्याविषयश्चपांक्तंकर्मतत्फलंचान्नत्रयंनामरूपकर्मात्मकमिति॥ तत्राविद्याविषयेवक्तव्यंसर्वमुक्तंविद्याविषयस्त्वा
त्माकेवलउपन्यस्तोननिर्णीतः॥ तन्निर्णयायचब्रह्मतेब्रवाणीतिप्रक्रांतंज्ञपयिष्यामीतिचतद्ब्रह्मविद्याविषयभूतंज्ञापयितव्ययाथात्म्य
तः॥ तस्यचयाथात्म्यंक्रियाकारकफलभेदशून्यमसंतविशुद्धमद्वैतमित्येतद्विवक्षितमतस्तदनुरूपौप्रश्नावुत्थाप्यतेश्रुत्याकैषतदाभूकृ
तएतदागादिति॥ तत्रयत्रभवतितदधिकरणंयद्भवतितदधिकर्तव्यंतयोश्चाधिकरणाधिकर्तव्ययोर्भेदोदृष्टोलोके॥ तथायतआगच्छ
तितदपादानंयआगच्छतिसकर्त्तातस्मादन्योदृष्टस्तथात्माक्काप्यभूदन्यस्मिन्नन्यःकुतश्चिदागादन्यस्मादन्यःकेनचिद्भिन्नेनसाधनांतरे
णेत्येवंलोकवत्प्राप्ताबुद्धिः॥ साप्रतिवचनेननिवर्त्तयितव्येति॥ तिइहहीति॥ विद्याविषयनिर्णयस्यकर्त्तव्यत्वमत्रनप्रतिभातीत्याशंक्याहतन्नि
र्णयायचेति॥ अन्यथाप्रक्रमभंगःस्यादितिभावः॥ किंतद्याथात्म्यंतदाहतस्यचेति॥ कथंयथोक्तयाथात्म्यव्याख्यानोपयोगित्वंप्रश्नयोरित्याशंक्यतयोः
श्रौतमर्थमाहतत्रेति॥ प्रश्नप्रवृत्तिमुक्त्वाप्रतिवचनप्रवृत्तिमाहसेति॥ निवर्त्तयितव्येतितत्प्रवृत्तिरितिशेषः ॥

रैंकेणैं६

संप्रतिप्रतिवचनयोस्तात्पर्यमाहनायमिति॥स्वात्मन्येवाभूदित्यत्रप्रमाणमाहस्वमात्मानमिति॥सुषुप्तौस्वात्मन्येवस्थितिरतःशब्दार्थः॥प्रबोधदशायामा
त्मनएवागमनापादानत्वमित्यत्रमानत्वेनानंतरश्रुतिमुत्थापयतितदुक्तैवेति॥स्थित्यागत्योरात्मनएवावधित्वमित्यत्रोपपत्तिमाहात्मेति॥वस्त्वं
तराभावस्यासिद्धिंशंकित्वादूषयतिनन्वित्यादिना॥१८॥क्रियावतोमृदादेर्घटाद्युत्पत्तिदर्शनात्ब्रह्मणःक्रियत्वात्ततोनप्राणाद्युत्पत्तिरितिशंक

नायमात्माऽन्योऽन्यत्राभूदन्योवान्यस्मादागतःसाधनांतरंवात्मन्यस्तिकिंतर्हिस्वात्मन्येवाभूत्स्वमात्मानमपीतोभवतिसतासोम्यतदा
संपन्नोभवतिप्राज्ञेनात्मनासंपरिष्वक्तःपरेआत्मनिसंप्रतिष्ठितइत्यादिश्रुतिभ्यः॥अतएवनान्योन्यस्मादागच्छति॥तदुक्तैवप्रदर्श्यते
अस्मादात्मनइत्यात्मव्यतिरेकेणवस्त्वंतराभावात्॥नन्वस्तिप्राणाद्यात्मव्यतिरिक्तंवस्त्वंतरं॥नप्राणादेस्ततएवनिष्पत्तेः॥१९॥तत्कथमिमु

सयथोर्णनाभिस्तंतुनोच्चरेद्यथाग्नेःक्षुद्राविस्फुलिंगाव्युच्चरंत्येवमेवास्मादात्मनःसर्वेप्राणाःसर्वेलोकाःसर्वेदेवाःसर्वा
णिभूतानिव्युच्चरंतितस्योपनिषत्सत्यस्यसत्यमितिप्राणावैसत्यंतेषामेषसत्यं॥२०॥प्रथमंब्राह्मणं॥१॥ च्यते॥तत्रदृष्टांतः॥स
यथालोकेऊर्णनाभिः॥ऊर्णनाभिर्लूताकीटएकएवप्रसिद्धःसन्स्वात्माप्रविभक्तेनतंतुनाउच्चरेदुद्गच्छेन्नचास्तितस्योद्गमनेस्वतोतिरिक्तंकारकां
तरं॥यथाचैकरूपादेकस्मादग्नेःक्षुद्राअल्पाविस्फुलिंगास्त्रुटयोग्न्यवयवाव्युच्चरंतिविविधंनानावाव्युच्चरंति ॥ यथेमौदृष्टांतौकारकभेदाभा
वेपिप्रवृत्तिंदर्शयतःप्राक्प्रवृत्तेश्चस्वभावतएकत्वमेवमेवास्मादात्मनोविज्ञानमयस्यप्राक्प्रतिबोधात्यत्स्वरूपंतस्मादित्यर्थः॥ नेतत्कथमिति॥
सृष्टेर्मायामयत्वमाश्रित्यश्रुत्यापरिहरतिउच्यतइति॥स्वात्माःप्रविभक्तेनेत्युक्तमन्वयव्यतिरेकद्वारास्फोरयतिनचेति॥असहायस्यकारणत्वेदृष्टांतमुक्त्वाकू

प्राणावैसत्यमित्यादेः २

माध्यंदिनश्रुतिमाश्रित्याहसर्वएतइति॥तस्येत्याद्यवतार्यव्याचष्टेयस्मादित्यादिना॥ननुप्रत्यक्भूतस्यब्रह्मणोवाचकेषुशब्दांतरेष्वपिसत्सुकिमित्येत
छब्दविषयमादरणंक्रियतेतत्राहशास्त्रेति॥ब्राह्मणवाक्यार्थोपिकथंनिश्चीयतामित्याहैतस्येति॥२०॥उक्तमंगीकृत्यविशेषाऽदृष्ट्यासंशयानोविचारं

सर्वेप्राणावागादयः॥सर्वेलोकाभूरादयःसर्वाणिकर्मफलानिसर्वेदेवाःप्राणलोकाधिष्ठातारोऽग्न्यादयः॥सर्वाणिभूतानिब्रह्मादिस्तंब
पर्यंतानिप्राणिजातानि॥सर्वएतआत्मानइत्यस्मिन्पाठउपाधिसंपर्कजनितप्रबुध्यमानविशेषात्मानइत्यर्थोव्युच्चरंति॥यस्मादात्मनः
स्थावरंजंगमंजगदिदमग्निविस्फुलिंगवद्व्युच्चरतिअनिशंयस्मिन्नेवचप्रलीयतेजलबुद्बुदवद्यदात्मकंचवर्ततेस्थितिकालेतस्या
स्यआत्मनोब्रह्मणउपनिषदुपसमीपंनिगमयतीत्यभिधायकःशब्दउपनिषदित्युच्यतेशास्त्रप्रामाण्यादेतछब्दगतोविशेषोवसीयते
उपनिगमयितृत्वंनामकासावुपनिषदित्याह॥सत्यस्यसत्यमितिसाहिसर्वत्रचोपनिषद्लौकिकार्थत्वात्दुर्विज्ञेयार्थेतितदर्थमाचष्टे
प्राणावैसत्यंतेषामेषसत्यमितिएतस्यैववाक्यस्यव्याख्यानायोत्तरंब्राह्मणद्वयंभविष्यति॥२०॥प्रथमंब्राह्मणं॥१॥भवतुतावदुपनिष
द्व्याख्यानायोत्तरंब्राह्मणद्वयं॥तस्योपनिषदित्युक्तंतत्रनजानीमःकिंप्रकृतस्यात्मनोविज्ञानमयस्यपाणिपेषणोत्थितस्यसंसारिणः
शब्दादिभुजइयमुपनिषदाहोस्विदसंसारिणःकस्यचित्॥किंचातोयदिसंसारिणस्तदासंसार्येवविज्ञेयस्तद्विज्ञानादेवसर्वप्राप्तिः
सएवब्रह्मशब्दवाच्यस्तद्विद्यैवब्रह्मविद्येति ॥ प्रसक्तौतिभवत्विति॥संदिग्धंसप्रयोजनंचविचार्यमितिन्यायेनसंदेहमुक्त्वाविचारप्रयो
जनंपृच्छतिकिंचातइति॥कस्मिन्पक्षेकिंफलतीतिपृष्टेप्रथमपक्षमनूद्यतस्मिन्फलमाहयदीति॥यद्विज्ञानान्मुक्तिस्तस्यैवज्ञेयतानजीवस्ये
त्याशंक्याहतद्विज्ञानादिति॥ब्रह्मज्ञानादेवसानसंसारिज्ञानादित्याशंक्याहसएवेति॥यद्विद्याब्रह्मविद्यातदेवब्रह्मनसंसारीत्याशंक्याहतद्विद्येवेति॥

आनंदगिरीयटीकासमेतभाष्यविवरणं ४ ॥

पक्षांतरमनूद्यतस्मिन्फलमाहाथेत्यादिना॥ किमत्रनियामकमित्याशंक्यब्रह्मवाइदमित्यादिशास्त्रमित्याहसर्वमेतदिति॥ ब्रह्मोपनिषत्पक्षेशास्त्र
प्रामाण्यात्सर्वंसमंजसंचेत्तथैवास्तुकिंविचारेणेत्याशंक्यजीवब्रह्मणोर्भेदोऽभेदोवेतिविकल्प्याद्येदोषमाहकिंत्विति॥ अभेदपक्षंदूषयतिसंसारि
णश्चेति॥ उपदेशानर्थक्यादभेदपक्षानुपपत्तिरितिशेषः॥ विशेषानुपलंभस्यसंशयहेतुत्वमनुवदतियत्नइति॥ पक्षद्वयेफलप्रतीतिंपरामृशत्येव

अथासंसारिणस्तदात‌द्विषयाविद्यातस्माच्चब्रह्मविज्ञानात्सर्वभावापत्तिः सर्वमेतत्कारत्स्नप्रामाण्याद्भविष्यतिकिंत्वस्मिन्पक्षेआत्मेत्ये
वोपासीतात्मानमेवावेदहंब्रह्मास्मीतिपरब्रह्मैकत्वप्रतिपादिकाः श्रुतयः कुप्येरन्नसंसारिणश्चान्यस्याभावेउपदेशानर्थक्यात्॥ य
तएवंपंडितानामप्येतन्महामोहस्थानमनुक्तप्रतिवचनप्रश्नविषयं॥ अतोयथाशक्त्याब्रह्मविद्याप्रतिपादकवाक्येषुब्रह्मविजिज्ञा
सूनांबुद्धिव्युत्पादनायविचारयिष्यामः॥ नतावदसंसारीपरः पाणिपेषप्रतिबोधिताच्छब्दादिभुजोवस्थांतरविशिष्टादुत्पत्तिश्रुतेः
नप्रशासिताशनायादिविवर्जितः परोविद्यते॥ कस्माद्यस्माद्ब्रह्मज्ञपयिष्यामीतिप्रतिज्ञायसुप्तंपुरुषंपाणिपेषंबोधयित्वातंशब्दा
दिभोक्तृत्वविशिष्टंदर्शयित्वातस्यैवस्वप्नद्वारेणसुषुप्ताख्यमवस्थांतरमुन्नीयतस्मादेवात्मनःसुषुप्तावस्थाविशिष्टादग्निविस्फुलिं
गोर्णनाभिदृष्टांताभ्यामुत्पत्तिंदर्शयतिश्रुतिःएवमेवास्मादित्यादिना॥ मिति॥ अन्वयव्यतिरेककौशलंपांडित्यं॥ एतदित्यैकात्म्योक्तिर्महत्त्वं
मोहस्यविचारोस्यनिर्णयंविनानुच्छिन्नत्वं॥ तस्यस्थानमालंबनंकेनापिनोक्तंप्रतिवचनंयस्यकिंतदैकात्म्यमितिप्रश्नस्यतस्यविषयभूतमितियावत्॥ न
हियेनकेनचिदैकात्म्यंप्रष्टुंप्रतिवक्तुंवाशक्यते॥ श्रवणायापिबहुभिर्योनलभ्यइत्यादिश्रुतेरित्यर्थः॥ विचारेप्रयोजनमुक्त्वातत्कार्यंविचारमुपसंहरति॥
अतइति॥ संशयादिनाविचारकार्यतामवतार्यपूर्वपक्षयतिनतावदिति॥ जगत्कर्त्ताहीश्वरोविवक्ष्यतेप्रकृतेचसुषुप्तिविशिष्टाज्जीवाज्जगज्जन्मोच्यतेतस्मादी

तदेवप्रपंचयतिनेत्यादिना॥प्रकृतेपिजीवेजगत्कारणत्वमीश्वरस्यैवात्रश्रुतमित्याशंक्याहनचेति॥तत्रप्रकरणविरोधंहेतुमाहविज्ञानेति॥श्रुत्यंतरव
शादपिजीवएवात्रजगत्कर्त्तेत्याहसमानप्रकरणेचेति॥श्रुत्यंतरस्यचजीवविषयत्वंजगद्वाचित्वाधिकरणपूर्वपक्षन्यायेनद्रष्टव्यंवाक्यशेषवशादपि
जीवस्यैववेदितव्यत्वंवाक्यान्वयाधिकरणपूर्वपक्षन्यायेनदर्शयति॥तथाचेति॥जीवातिरिक्तस्यपरस्यवेदितव्यस्याभावेपूर्वोत्तरवाक्यानामानुकूल्यं

नचान्योजगदुत्पत्तिकारणंअंतरालेश्रुतोस्तिविज्ञानमयस्यैवहिप्रकरणं॥समानप्रकरणेचश्रुत्यंतरेकौषीतकिनामादित्यादिपुरुषान्प्र
स्तुत्यसहोवाचयोवैबालाकएतेषांपुरुषाणांकर्त्तायस्यवैतत्कर्मसवैवेदितव्यइतिप्रबुद्धस्यैवविज्ञानमयस्यवेदयितव्यतांदर्शयतिना
धीतरस्य॥तथाचात्मनस्तुकामायसर्वंप्रियंभवतीत्युक्त्वायएवात्माप्रियःप्रसिद्धस्तस्यैवद्रष्टव्यश्रोतव्यमंतव्यनिदिध्यासितव्यतांदर्शी
यति॥तथाचविद्योपन्यासकालआत्मेत्येवोपासीततदेतत्प्रेयःपुत्रात्प्रेयोवित्तात्तदात्मानमेवावेदहंब्रह्मास्मीत्येवमादिवाक्यानामानु
लोम्यंस्यात्पराऽभावे॥वक्ष्यतिचात्मानंचेद्विजानीयादयमस्मीतिपुरुषइति॥सर्ववेदांतेषुचप्रत्यगात्मवेद्यतैवप्रदर्श्यतेऽहमितिनबहिर्वेद्य
ताशब्दादिवत्प्रदर्श्यतेऽसोब्रह्मेतितयाकौषीतकिनामेवनवाचंविजिज्ञासीतवक्तारंविद्यादित्यादिनावागादिकरणैर्व्याएतस्यकर्त्तुरेववे
दितव्यतांदर्शयति॥अवस्थांतरविशिष्टोऽसंसारीतिचेत्अथापिस्याद्योजागरितेशब्दादिभुग्विज्ञानमयःसएवसुषुप्ताख्यमवस्थांतरंग
तोऽसंसारीतिपरःप्रशासितान्यःस्यादितिचेत्नादृष्टत्वान्नह्येवंधर्मकःपदार्थोदृष्टोऽन्यत्रवैनासिकसिद्धांतात्॥ हेत्वंतरमाहतथाचेत्यादिना॥इ
तश्चजीवस्यैववेद्यतेत्याहसर्वेति॥तत्रैवहेत्वंतरमाहतथेति॥सवैवेदितव्यइत्यत्रनस्पष्टंजीवस्यवेदितव्यत्वमिहतुस्पष्टमितिभेदः॥स्वापावस्थाज्जीवा
ज्जगज्जन्मश्रुतेस्तस्यैववेद्यत्वदृष्टेश्चजगद्धेतुरीश्वरोवेदांतवेद्योनास्तीत्युक्तेसेश्वरवादीचोदयत्यवस्थांतरेति॥चोद्यमेवविवृणोत्यथापीति॥उक्तोपप

नावस्थाभेदात् वस्तुभेदस्तथाऽननुभवादपराद्धांताच्चेतिपरिहरतिनादृष्टत्वादिति॥ अवस्थाभेदाद्वस्तुभेदाभावंदृष्टांतेनस्पष्टयतिनहीति॥ तत्रै
वहेत्वंतरमाह॥ न्यायाच्चेति॥ जागरादिविशिष्टस्यैवस्वापवैशिष्ट्यात्तस्यसंसारित्वान्नेश्वरोन्योस्तीतिउक्त्वातदभाववादिसंमतिमाहतथाचेति॥ आ
दिशब्दोलोकायतादिसमस्तनिरीश्वरवादिसंग्रहार्थः।युक्तिशतैरितितस्यदेहित्वेऽस्मदादितुल्यत्वात्तदभावेमुक्तवज्जगत्कर्तृत्वायोगात् जीवा

नहिलोकेगौःतिष्ठन्गच्छन्वागौर्भवतिशयानस्त्वश्वादिजात्यंतरमितिन्यायाच्चयद्धर्मकोयःपदार्थःप्रमाणेनावगतोभवतिसदेशका
लावस्थांतरेष्वपितद्धर्मकएवभवतिसचेत्तद्धर्मकत्वंव्यभिचरतिसर्वप्रमाणव्यवहारोलुप्येत॥ तथाचन्यायविदःसांख्यमीमांसका
दयोऽसंसारिणोऽभावंयुक्तिशतैःप्रतिपादयंति॥ संसारिणोपिजगदुत्पत्तिस्थितिलयक्रियाकर्तृत्वविज्ञानस्याभावादयुक्तमितिचेत्
यन्महताप्रपंचेनस्यापितंभवताशब्दादिभुक्संसार्येवावस्थांतरविशिष्टोजगतइहकर्तेतितदसद्यतोजगदुत्पत्तिस्थितिलयक्रिया
कर्तृत्वविज्ञानशक्तिसाधनाभावःसर्वलोकप्रत्यक्षःसंसारिणःसकथमस्मदादिवत्संसारीमनसापिचिंतयितुमशक्यंपृथिव्यादिविन्या
सविशिष्टंजगन्निर्मिमीयात्॥ अतोऽयुक्तमितिचेत्॥ नशास्त्रात्कात्स्न्र्यंसंसारिणएवमेवास्मादात्मनइतिजगदुत्पत्त्यादिदर्शयतितस्मात्सर्वं
श्रद्धेयमितिस्यादयमेकःपक्षः॥ यःसर्वज्ञःसर्ववित्योऽशनायापिपासेअत्येत्यसंगोनहिसज्यतेएतस्यवाऽक्षरस्यप्रशासने नामेवादृष्टद्रष्ट्रादितत्क

र्तृत्वसंभवात्तस्याकिंचित्करत्वमित्यादिभिरित्यर्थः॥ जीवोजगज्जन्मादिहेतुर्नभवतितत्रासमर्थत्वात्पाषाणवत्तच्चसंसारित्वादितिशंकतेसंसारिणोपी
ति॥ ईश्वरस्यैवेत्यपेरर्थः॥ अयुक्तंप्राणादिकर्तृत्वंइतिशेषः॥ संग्रहवाक्यंविवृणोतियन्महतेत्यादिना॥ कालात्ययापदेशेनदूषयतिनशास्त्रादिति॥
निरीश्वरवादमुपसंहरति॥ तस्मादिति॥ सेश्वरवादमुत्थापयति॥ यःसर्वज्ञइत्यादिना॥ तान्पृथिव्याद्यभिमानिनःपुरुषान्निरुह्योत्पाद्ययोतिक्रांतवान्स

उदाहृताः श्रुतयः स्मृतयश्चन्यायस्तु विचित्रं कार्यं विशिष्टज्ञानवत्पूर्वकं प्रासादादौ तथोपलंभादित्यादिः॥ प्रकरणमनुसृत्य जीवस्य प्राणादिकारणत्वमुक्तं स्मारयति नन्विति॥ नेदं जीवस्य प्रकरणमिति परिहरति नेत्यादिना॥ प्रतिवचनस्याकाशशब्दस्य परविषयत्वमसिद्धमित्याशंक्याह के षइति

यः सर्वभूतेषु तिष्ठन्नंतर्यामी अमृतः स यस्तान्पुरुषान्निरुह्यात्यक्रामत्स वा एष महानज आत्मा एष सेतुर्विधरणः सर्वस्य वशी सर्वस्येशानो य आत्मापहतपाप्मा विजरो विमृत्युः तत्तेजोऽसृजत आत्मा वा इदमेक एवाग्र आसीन्न लिप्यते लोकदुःखेन बाह्य इत्यादिश्रुतिशतेभ्यः स्मृतेश्च अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते इति परोऽस्त्यसंसारी श्रुतिस्मृतिन्यायेभ्यश्च स च कारणं जगतः॥ नन्वेवमेवास्मादात्मन इति संसारिण एवोत्पत्तिं दर्शयतीत्युक्तं॥ न य एषोंतर्हृदय आकाश इति परस्य प्रकृतत्वात् अस्मादात्मन इति युक्तः परस्यैव परामर्शः॥ के षतदाभूदित्यस्य प्रश्नस्य प्रतिवचनत्वेनाकाशशब्दवाच्यः पर आत्मोक्तः य एषोंतर्हृदय आकाशस्तस्मिन्शेत इति स तासोम्य तदा संपन्नो भवत्यहरहर्गच्छंत्य एतं ब्रह्मलोकं न विंदंति प्राज्ञेनात्मना संपरिष्वक्तः परे आत्मनि संप्रतिष्ठित इत्यादिश्रुतिभ्यः आकाशशब्दः पर आत्मेति निश्चीयते दहरोस्मिन्नंतराकाश इति प्रस्तुत्य तस्मिन्नेवात्मशब्दप्रयोगाच्च प्रकृत एव परमात्मा॥ तस्माद्युक्तमेवमेवास्मादात्मन इति परमात्मन एव सृष्टिरिति संसारिणः सृष्टिस्थितिसंहारज्ञानसामर्थ्याभावं चावोचाम॥ अत्र चात्मेत्येवोपासीतात्मानमेवावेदहं ब्रह्मास्मीति ब्रह्मविद्या प्रस्तुता ब्रह्मविषयं च ब्रह्मज्ञानमिति॥

इतश्चाकाशशब्दस्य परमात्मविषयत्वेत्याह दहरोस्मिन्निति॥ य आत्मापहतपाप्मेत्यात्मशब्दप्रयोगः॥ प्रतिवचने परस्याकाशशब्दवाच्यत्वे फलितमाह प्रकृत एवेति॥ तस्य प्रकृतत्वेलब्धमर्थमाह तस्मादिति॥ इतश्च परस्मादेव प्राणादिसृष्टिरित्याह संसारिण इति॥ यन्महताप्रपंचेनेत्यादावितिशेषः॥ अस्तीश्वरो जगत्कारणं ब्रह्म तदेव जीवस्य स्वरूपं तस्यैव मुपनिषदिति सिद्धांतमाशंक्य दूषयति अत्र चेति॥ ततीयोध्या

कापुनःसाब्रह्मविद्येतितत्राहब्रह्मविषयंचेति॥इतिब्रह्मविदांप्रसिद्धमितिशेषः॥चतुर्थेब्रह्मविद्याप्रस्तुतेत्याहब्रह्मेति॥सत्यमस्तिप्रस्तुताब्रह्मविद्या साजीवविद्यापिभवतिजीवब्रह्मणोरभेदादित्याशंक्याहतत्रेति॥ब्रह्मविद्यायांप्रस्तुतायामितियावत्॥इदानींनगृह्णीयादितिसंबंधः॥मिथोविरुद्ध त्वप्रतीत्यवस्थायामित्येतत्॥अन्योन्यविरुद्धत्वंतद्बुद्ध्यार्थः॥विपक्षेदोषमाहपरमिति॥कथंतर्हीश्वरेमतिंकुर्यादित्याशंक्यस्वामित्वेनेत्याहतस्मादि

ब्रह्मतेब्रवाणिब्रह्मज्ञपयिष्यामीतिप्रारब्धंतत्रेदानीमसंसारिब्रह्मजगतःकारणमशनायाद्यतीतंनित्यमुक्तबुद्धशुद्धस्वभावंतद्विपरी तश्चसंसारीतस्मादहंब्रह्मास्मीतिनगृह्णीयात्परंहिदेवमीशानंनिकृष्टसंसार्यात्मत्वेनस्मरन्कथंनदोषभाक्स्यात्॥तस्मान्नाहंब्रह्मास्मी तियुक्तं॥तस्मात्पुष्पोदकांजलिस्तुतिनमस्कारबल्युपहारस्वाध्यायाध्ययनयोगादिभिराराधयिषेत्आराधनेनविदित्वासर्वेशि त्वब्रह्मभवति॥नपुनरसंसारिब्रह्मसंसार्यात्मत्वेनचिंतयेदग्निमिवशीतत्वेनआकाशमिवमूर्त्तिमत्वेन॥ब्रह्मात्मत्वप्रतिपादकम पिशास्त्रमर्थवादोभविष्यति॥सर्वतर्कशास्त्रलोकन्यायैश्चैवमविरोधःस्यात्॥नमंत्रब्राह्मणवादेभ्यस्तस्यैवप्रवेशश्रवणात्पुरश्चक्र इतिप्रकृत्यपुरःपुरुषआविशदितिरूपंरूपंप्रतिरूपोबभूवतदस्यरूपंप्रतिचक्षणाय॥सर्वाणिरूपाणिविचित्यधीरोनामानिकृत्वा भिवदन्यआस्तेइतिसर्वशाखासुसहस्रशोमंत्रवादाःसृष्टिकर्त्तुरेवासंसारिणःशरीरप्रवेशंदर्शयंति॥तथाब्राह्मणवादाःतत्सृष्ट्वातदेवा नुप्राविशत्सएतमेवसीमानंविदार्यैतयाद्वाराप्रापद्यतसेयंदेवतेमास्तिस्रोदेवताअनेनजीवेनात्मनानुप्रविश्य ति॥आदिपदंप्रदक्षिणादि

संग्रहार्थं॥ऐकात्म्यशास्त्रादात्ममतिरेवब्रह्मणिकर्तव्येत्याशंक्याहनपुनरिति॥कातर्हिशास्त्रगतिस्तत्राहब्रह्मेति॥मुख्यार्थत्वसंभवेकिमित्यर्थवादतेत्याशं क्याहसर्वेति॥संसारित्वाऽसंसारित्वादिनामिथोविरुद्धयोर्जीवेश्वरयोःशीतोष्णवदैक्यानुपपत्तिर्न्यायः॥विज्ञानात्मविषयत्वंतटस्थेश्वरविषयत्वंचोपनिषदोनिवा

परस्यैवप्रवेशवादिमंत्रब्राह्मणवादानुदाहरतिपुरइत्यादिना॥यत्त्वहंब्रह्मेतिनगृह्णीयादितितत्राहसर्वश्रुतिषुचेति॥शास्त्रीयमप्येकत्वमनिष्टप्रसंगा
त्तन्नस्वीकर्तव्यमितिशंकतेयदेति॥परस्यसंसारित्वेतदसंसारित्वशास्त्रानर्थक्यंफलितमाहतथाचेति॥संसारिणोऽन्यस्यापिपरस्यासंसारित्वेसंसा
रित्वाभिमतोपिअसंसारीत्युपदेशानर्थक्यंतंविनैवमुक्तिसिद्धिरितिदोषांतरमाहासंसारित्वेचेति॥तत्राद्यंदोषंविवृणोतियदितावदिति॥नलिप्यते

एषसर्वेषुभूतेषुगूढोत्मानप्रकाशते॥सर्वश्रुतिषुचब्रह्मण्यात्मशब्दप्रयोगादात्मशब्दस्यचप्रत्यगात्माभिधायकत्वादेषसर्वभूतांतरा
त्मेतिचश्रुतेःपरमात्मव्यतिरेकेणसंसारिणोभावादेकमेवाद्वितीयंब्रह्मैवेदमात्मैवेदमित्यादिश्रुतिभ्योयुक्तमेवाहंब्रह्मास्मीत्यवधार
यितुं॥यदैवंस्थितःशास्त्रार्थस्तदापरमात्मनःसंसारित्वंतथाचसतिशास्त्रानर्थक्यंअसंसारित्वेचोपदेशानर्थक्यंस्पष्टोदोषःस्यात्॥य
दितावत्परमात्मासर्वभूतांतरात्मासर्वशरीरसंपर्कजनितदुःखान्यनुभवतीतिस्पष्टंपरस्यसंसारित्वंप्राप्तंतथाचपरस्यासंसारित्वप्र
तिपादकाःश्रुतयःकुप्येरन्स्मृतयश्चसर्वेचन्यायाः॥अथकथंचित्प्राणिशरीरसंबंधजैर्दुःखैर्नसंबध्यतइतिशक्यंप्रतिपादयितुंपर
मात्मनःसाध्यपरिहार्याभावादुपदेशानर्थक्यदोषोनशक्यतेनिवारयितुं॥अत्रकेचित्परिहारमाचक्षतेपरमात्मानसाक्षाद्भूतेष्वनुप्रविष्टः
स्वेनरूपेणकिंतर्हिविकारभावमापन्नोविज्ञानात्मत्वंप्रतिपेदेसचविज्ञानात्मापरस्मादन्योऽनन्यश्चयेनान्यस्तेनसंसारित्वसंबंधीयेनानन्यस्ते
नाहंब्रह्मेतिधारणार्हःएवंसर्वमविरुद्धंभविष्यतीति॥ लोकदुःखेनेत्याद्याःश्रुतयः॥यस्यनाहंकृतोभावोबुद्धिर्यस्यनलिप्यतइत्याद्याःस्मृतयः॥कूट
स्थत्वासंगत्वादयोन्यायाः॥द्वितीयदोषप्रसंगमापाद्यप्रकटयतिअथेत्यादिना॥दोषद्वयेस्वयूथ्यसमाधिमुत्थापयति॥अत्रेति॥कथंतर्हितस्यकार्येप्रविष्टस्य
जीवत्वंतत्राहकिंतर्हीति॥जीवस्यब्रह्मविकारत्वेपिततोभेदान्नाहंब्रह्मेतिधीरभेदेब्रह्मणोपिसंसारितेत्याशंक्याहसचेति॥तथापिकथंशंकितदोषाभावस्तत्राह

एवमितिभिन्नाभिन्नत्वपरामर्शः सर्वमित्युपदेशादिनिर्देशः॥एकदेशिमतंनिराकर्त्तुंविकल्पयतितत्रेति॥एतागतयइत्येतेपक्षावक्ष्यमाणाःसंभवंतिनग
त्यंतरमित्यर्थः॥यथापृथिवीशब्दितंद्रव्यमनेकावयवसमुदायस्तथाभूतभौतिकात्मकानेकद्रव्यसमुदायःसावयवःपरमात्मातस्यैकदेशश्चेतन्यल
क्षणोविकारोजीवःपृथिव्येकदेशमृद्विकारघटशरावादिवदित्येकःकल्पः॥यथाभूमेरूषरादिदेशोनखकेशादिर्वापुरुषस्यविकारस्तथाऽ
वयविनःपरस्यैकदेशविकारोजीवइतिद्वितीयःकल्पः॥यथाक्षीरंस्वर्णंवासर्वात्मनादधिरुचकादिरूपेणपरिणमतेतथाकृत्स्नएवपरोजीवभा

तत्रविज्ञानात्मनोविकारपक्षएतागतयःपृथिवीद्रव्यवदनेकद्रव्यसमाहारस्यसावयवस्यपरमात्मनःएकदेशविपरिणामोविज्ञानात्मा
घटादिवत्॥पूर्वसंस्थानावस्थस्यवापरस्यैकदेशोविक्रीयतेकेशोखरादिवत्॥सर्वएववापरःपरिणमेत्क्षीरादिवत्॥तत्रसमानजातीया
नेकद्रव्यसमुदायस्यकश्चित्द्रव्यविशेषोविज्ञानात्मत्वंप्रतिपद्यतेयदातदासमानजातीयत्वादेकत्वमुपचरितमेवनतुपरमार्थतः॥तथा
चसतिसिद्धांतविरोधः॥अथनित्यायुतसिद्धावयवानुगतोवयवीपरआत्मातस्यतदवस्थस्यैकदेशोविज्ञानात्मासंसारीतदापिस
र्वावयवानुगतत्वादवयविनएवावयवगतोदोषोगुणोवेतिविज्ञानात्मनःसंसारित्वदोषेणपरएवात्मासंबध्यतेइतीयमप्यनिष्टाक
ल्पना॥ वेनपरिणमेदितिकल्पांतरं॥तत्राद्यमनूद्यदूषयतितत्रेत्यादिना॥नानाद्रव्याणांसमाहारोवातानिवाऽन्योन्यापेक्षाणिपरश्चेन्नतस्यैकंस्यान्न
हिबहूनांमुख्यमेकत्वं॥समाहारस्यचसमुदायापरपर्यायस्यसमुदायिभ्योभेदाभेदाभ्यांदुर्भणत्वेनकल्पितत्वादित्यर्थः॥तर्हिब्रह्मणोमुख्यमेकत्वंमाभूत्त
त्राहतथाचेति॥नहितन्नानात्वंकस्यापिसंमतमितिभावः॥द्वितीयमनूद्यनिराकरोतियथेत्यादिना॥सर्वेषुवापृथगवस्थितेष्ववयवेषुजीवेष्वनुस्यूतश्चे
तनोवयवीपरश्चेत्तर्हियथाप्रत्यवयवंमलसंसर्गेदेहस्यमलिनत्वंतथापरस्यजीवगतैर्दुःखैर्महत्दुःखंस्यादितिप्रथमकल्पनावत्द्वितीयापिकल्पनानयु

तृतीयंप्रत्याहक्षीरवदिति॥नजायतेम्रियतेवाविपश्चिदित्याद्याःश्रुतयःनजायतेम्रियतेवाकदाचिदित्याद्याःस्मृतयः॥श्रुत्यादिकोपस्येष्टत्वमाशंक्यवै
दिकंप्रत्याहसचेति॥श्रुतिस्मृतीविवेचयन्पक्षत्रयसाधारणंदूषणमाहनिष्कलमित्यादिना॥कूटस्थस्यनिरवयवस्यकात्स्न्यैकदेशाभ्यांपरिणामासं
भवोन्यायः॥जीवस्यपरमात्मैकदेशत्वेदोषांतरमाहाचलस्येति॥एकदेशस्यैकदेशिव्यतिरेकेणाभावाज्जीवस्यस्वर्गादिषुगत्यनुपपत्तिरित्युक्तमन्य
थापरस्यापिगतिःस्यान्नहिपटावयवेषुचलत्सुपटोनचलतीत्याहपरस्येति॥उक्तंयदितावत्परमात्मेत्यादाविविशेषः॥जीवस्यसंसारित्वेपिपरस्यत

क्षीरवत्सर्वपरिणामपक्षेसर्वश्रुतिस्मृतिकोपः सचानिष्टःनिष्कलंनिष्क्रियंशांतंदिव्योह्यमूर्तःपुरुषःसबाह्याभ्यंतरोह्यजःआका
शवत्सर्वगतश्चनित्यःसवाएषमहानजआत्माजरोऽमृतोनजायतेम्रियतेवाकदाचिदव्यक्तोयमित्यादिश्रुतिस्मृतिन्यायविरुद्धाएए
तेसर्वपक्षाः॥अचलस्यपरमात्मनएकदेशपक्षेविज्ञानात्मनःकर्मफलदेशसंसरणानुपपत्तिःपरस्यचासंसारित्वमित्युक्तं॥परस्यैक
देशोग्निविस्फुलिंगवत्स्फुटितोविज्ञानात्मासंसरतीतिचेत्॥तथापिपरस्यावयवस्फुटनेनक्षतप्राप्तिस्तत्संसरणेचपरमात्मप्र
देशांतरावयवव्यूहेच्छिद्रताप्राप्तिः॥अव्रणत्ववाक्यविरोधश्च॥आत्मावयवभूतस्यविज्ञानात्मनःसंसरणेचपरमात्मशून्यप्रदेशाभा
वादवयवांतरनोदनव्यूहनाभ्यांहृदयशूलेनेवपरमात्मनोदुःखित्वप्राप्तिः॥ नास्तीतिशंकतेपरस्येति॥परस्यनिरवयवत्वश्रुतेःअवयवस्फुट

नानुपपत्तिरितिमन्वानोदूषयतितथापीति॥यत्रयस्यावयवःस्फुटतितत्रतस्यक्षतंप्राप्नोति॥तदीयावयवस्यसंसरणेचपरमात्मनःप्रदेशांतरे
वयवानांव्यूहेसत्युपचयःस्यात्तथाचपरस्यावयवायतोनिर्गच्छंतितत्रच्छिद्रताप्राप्तिःयत्रचगच्छंतितत्रोपचयःस्यादित्यकायमव्रणमस्थूलमनण्व
ह्रस्वमित्यादिवाक्यविरोधोभवेदित्यर्थः॥परस्यैकदेशोविज्ञानात्मेतिपक्षेदुःखित्वमपितस्यदुर्वारमापतेदितिदोषांतरमाहात्मावयवेति ॥

मृल्लोहविस्फुलिंगदृष्टांतश्रुतिवशात्परस्यावयवाजीवा स्सिद्धांतिअतोजीवानांपरैकदेशत्वेनोक्तोदोषोवतरतियुक्त्यपेक्षयाश्रुतेर्बलवत्त्वादि तिशंकते॥ अग्निविस्फुलिंगादीति॥ शास्त्रार्थोयुक्तिविरुद्धोनसिद्ध्यतीतिदूषयतिनश्रुतेरिति॥ नञर्थंविवृणोतिनशास्त्रमिति॥ हेतुभागमाकांक्षा पूर्वकंविभजतेकिंतर्हीति॥ स्मृत्यादिव्यावृत्त्यर्थमज्ञातानामित्युक्तमस्तुशास्त्रमज्ञातार्थज्ञापकंतथापिपरस्यनास्तिसावयवत्वमित्यत्रकिमायात मितिपृच्छतिकिंचातइति॥ शास्त्रस्ययथोक्तस्वभावत्वेयत्परस्यनिरवयवत्वंफलतितदुच्यमानंसमाहितेनश्रोतव्यमित्याहशृण्विति॥ तत्रप्रथमं

अग्निविस्फुलिंगादिदृष्टांतश्रुतेर्नदोषइतिचेत्॥ नश्रुतेर्ज्ञापकत्वात् नशास्त्रंपदार्थानन्यथाकर्तुंप्रवृत्तंकिंतर्हियथाभूतानामज्ञा तानांज्ञापनेकिंचातः शृणुअतोयद्भवति॥ यथाभूताःमूर्त्ताऽमूर्त्तादिपदार्थधर्मालोकेप्रसिद्धास्तद्दृष्टांतोपादानेनतदविरोध्येववस्त्वंत रंज्ञापयितुंप्रवृत्तंशास्त्रंनलौकिकवस्तुविरोधज्ञापनायलौकिकमेवदृष्टांतमुपादत्ते॥ उपादीयमानोपिदृष्टांतोऽनर्थकःस्यात्॥ दार्ष्टा तिकासंगतेर्नह्यग्निःशीतआदित्योनतपतीतिवादृष्टांतशतेनापिप्रतिपादयितुंशक्यंप्रमाणांतरेणान्यथाधिगतत्वात्वस्तुनः॥ नच प्रमाणंप्रमाणांतरेणविरुध्यतेप्रमाणांतराविषयमेवहिप्रमाणांतरंज्ञापयति॥

लोकाविरोधेनशास्त्रप्रवृत्तिंदर्शयतियथेति॥ आदिपदेन भावाभावादिगृह्यते॥ पदार्थेष्वेवभोक्तृपारतंत्र्याद्धर्मशब्दस्तेषांलोकसिद्धपदार्थानांदृष्टांतानामुपन्यासेनेतियावत्॥ तदविरोधिलोकप्रसिद्धप दार्थाविरोधीत्यर्थः॥ वस्त्वंतरंनिरवयवादिदार्ष्टांतिकंतदविरोद्ध्येवेत्येवकारस्यव्यावर्त्यमाहनलौकिकेति॥ विपक्षेदोषमाहोपादीयमानोपीति॥ सा मान्येनोक्तमर्थंदृष्टांतविशेषनिविष्टतयास्पष्टयतिनहीति॥ अग्नेरुष्णत्वमादित्यस्यतापकत्वमन्यथेत्युच्यते॥ ननुलौकिकंप्रमाणंलौकिकपदार्थाविरुद्ध मेवस्वार्थंसमर्पयतिवैदिकंपुनरपौरुषेयंतद्विरुद्धमपिस्वार्थंप्रमापयेदलौकिकविषयत्वादतआहनचेति॥ ननुश्रुतेरज्ञातज्ञापकत्वेनलोकानपेक्षत्वात्तद्विरो

लोकावगतसामर्थ्यः शब्दो वेदेपि बोधक इति न्यायात्तदनपेक्षा श्रुतिर्नाज्ञातं ज्ञापयितुमलमित्यर्थः॥ शास्त्रस्य लोकानुसारित्वे सिद्धे फलितमाह तस्मादिति॥
प्रसिद्धो न्यायो लौकिको दृष्टांतः॥ नहि नित्यस्याकाशादेः सावयवत्वं परैश्च नित्योभ्युपगतस्तन्नत स्य सावयवत्वेनांशांशित्वकल्पना वस्तुतः संभवति लो
कविरोधादित्यर्थः॥ जीवस्य परांशत्वानंगीकारे श्रुतिस्मृत्योर्गतिर्वक्तव्येति शंकते क्षुद्रा इति॥ तयोर्गतिमाह नेत्यादिना॥ विस्फुलिंगे दर्शितन्यायं सर्वत्रा

न च लौकिकपदपदार्थाश्रयणव्यतिरेकेणागमेन शक्यमज्ञातं वस्त्वंतरमवगमयितुं॥ तस्मात्प्रसिद्धन्यायमनुसरता न शक्या परमात्मनः
सावयवांशांशित्वकल्पना परमार्थतः प्रतिपादयितुं॥ क्षुद्रा विस्फुलिंगा ममैवांश इति च श्रूयते स्मर्यते चेति चेत्॥ नैकत्वप्रत्ययार्थपर
त्वात्॥ अग्नेर्हि विस्फुलिंगोग्निरेवेत्येकत्वप्रत्ययार्हो दृष्टो लोके तथा चांशांशिनैकत्वप्रत्ययार्हः॥ तत्रैवं सति विज्ञानात्मनः परमात्मविकारां
शत्ववाचकाः शब्दाः परमात्मैकत्वप्रत्ययाधित्सवः॥ उपक्रमोपसंहाराभ्यां च सर्वासु ह्युपनिषत्सु पूर्वमेकत्वं प्रतिज्ञाय दृष्टांतैर्हेतुभिश्च प
रमात्मनो विकारांशादित्वं जगतः प्रतिपाद्य पुनरेकत्वमुपसंहरति॥ तद्यथेहैव तावदिदं सर्वं यदयमात्मेति प्रतिज्ञायोत्पत्तिस्थितिलयहेतु
दृष्टांतैर्विकारविकारित्वाद्येकत्वप्रत्ययहेतून्प्रतिपाद्यानंतरमबाह्यमयमात्मा ब्रह्मेत्युपसंहरिष्यति॥ तस्मादुपक्रमोपसंहाराभ्यामयमर्थो
निश्चीयते परमात्मैकत्वप्रत्ययदृढिम्न उत्पत्तिस्थितिलयप्रतिपादकानि वाक्यानीति अन्यथा वाक्यभेदप्रसंगाच्च॥ शमात्रेति दिशति तथा चे

ति॥ दृष्टांते यथोक्तरीत्या स्थिते दार्ष्टांतिकमाह तत्रेति॥ परमात्मना सह जीवस्यैकत्वविषयं प्रत्ययमाधातुमिच्छंतीति तथोक्तास्तेषामेकत्वप्रत्ययाव
तारहेतुत्वे हेत्वंतरं संगृह्णात्युपक्रमेति॥ तदेव स्फुटयति सर्वासु हीति॥ उक्तमर्थमुदाहरणनिष्ठतया विभजते तद्यथेति॥ इहेति प्रकृतोपनिषदुक्तिरा
दिशब्देनांशांशित्वादिगृह्यते॥ विवरणसंग्रहवाक्यमुपसंहरति॥ तस्मादिति॥ तेषां स्वार्थनिष्ठत्वे दोषं वदन्नेकत्वप्रत्ययार्थत्वे हेत्वंतरमाहान्यथेति॥

बृ.र.
२३

अमृतत्वं १

संभवत्येकवाक्यत्वे वाक्यभेदश्च नेष्यत इति न्यायेनोक्तं प्रपंचयति सर्वोपनिषत्स्विति॥ किंच तेषां स्वार्थनिष्ठत्वे श्रुतफलाभावात् फलांतरं कल्पनीयं न चैकत्व
प्रत्ययविषयतया तत्फले निराकांक्षेषु तेषु तत्कल्पनायुक्ता दृष्टे सत्यदृष्टकल्पनानवकाशादित्याह॥ फलांतरं चेति॥ उत्पत्त्यादिश्रुतीनां स्वार्थनिष्ठत्वासं
भवे फलितमुपसंहरति तस्मादिति॥ तत्त्वमस्यादिवाक्यमैक्यपरं तच्छेषः सृष्ट्यादिवाक्यमित्युक्तेऽर्थे द्रविडाचार्यसंमतिमाहात्र चेति॥ तत्र दृष्टांतरूपामाख्या
यिकां प्रणयति कश्चित्किलेति॥ जातमात्रे प्रागवस्थायामेव राजास्मीत्यभिमानाभिव्यक्तेरित्यर्थः॥ ताभ्यां तत्परित्यागे निमित्तविशेषस्यानिश्चित

सर्वोपनिषत्सु हि विज्ञानात्मनः परमात्मनैकत्वप्रत्ययो विधीयत इत्यविप्रतिपत्तिः सर्वेषामुपनिषद्वादिनां तद्धि ह्येकवाक्ययोगे च सं
भवत्युत्पत्त्यादिवाक्यानां वाक्यांतरत्वकल्पनायां न प्रमाणमस्ति फलांतरं च कल्पयितव्यं स्यात्॥ तस्मादुत्पत्त्यादिश्रुतय आत्मैकत्वप्रतिपा
दनपराः॥ अत्र च संप्रदायविद आख्यायिकां संप्रचक्षते॥ कश्चित्किल राजपुत्रो जातमात्र एव मातापितृभ्यामपविद्धो व्याधगृहे संवर्द्धि
तः सोऽमुष्य वंश्यतामजानन् व्याधजातिप्रत्ययो व्याधजातिकर्माण्येवानुवर्त्तते न राजास्मीति राजजातिकर्माण्यनुवर्त्तते यदा पुनः कश्चि
त्परमकारुणिको राजपुत्रस्य राजश्रीप्राप्तियोग्यतां जानन् अमुष्य पुत्रतां बोधयति न त्वं व्याधः अमुष्य राज्ञः पुत्रः कथंचिद्व्याधगृहमनुप्रवि
ष्ट इति स एवं संबोधितस्त्यक्त्वा व्याधजातिप्रत्ययकर्माणि पितृपैतामहीमात्मनः पदवीमनुवर्त्तते राजाहमस्मीति ॥

त्वद्योतनार्थं किलेत्युक्तं॥ व्याधजातिप्रत्ययस्तत्प्रयुक्तो व्याधोऽस्मीत्यभिमानो यस्य स तथा व्याधजातिकर्माणि तत्प्रयुक्तानि मांसक्रयणादीनि रा
जास्मीत्यभिमानपूर्वकं तज्जातिप्रयुक्तानि परिपालनादीनि कर्माणि॥ अज्ञानं तत्कार्यं चोक्त्वा ज्ञानं तत्फलं च दर्शयति यदेत्यादिना॥ बोधप्रकारमभि
नयति न त्वमिति॥ कथं तर्हि शाबरवेश्मप्रवेशस्तत्राह कथंचिदिति॥ राजाहमस्मीत्यभिमानपूर्वकमात्मनः पितृपैतामहीं पदवीमनुवर्त्तत इति संबंधः॥

अ.
४

राम:
२३

दार्ष्टांतिकरूपामाख्यायिकामाचष्टे॥ तथेति॥ जीवस्य परस्माद्विभागे निमित्तमज्ञानं तत्कार्यं च प्रसिद्धमिति द्योतयितुं किलेत्युक्तं॥ तज्ज्ञातिस्तत्त्व
भावो वस्तुतः परमात्मैवेति यावत्॥ इहेत्यपरोक्षानुभवगम्यतोक्तिः॥ गहनं गंभीरं वनं॥ संसारधर्मानुवर्त्तने हेतुमाह परमात्मतामिति॥ उक्तावि
द्यातत्कार्यविरोधिनीं ब्रह्मात्मविद्यां लंभयति नत्वमिति॥ राजपुत्रस्य राजास्मीतिप्रत्ययवद्वाक्यादेवाधिकारिणि ब्रह्मास्मीतिप्रत्ययश्चेत् रुतं वि

तथा किलायं परस्मादग्निविस्फुलिंगादिवत्तज्ज्ञातिरेव विभक्तः इह देहेंद्रियादिगहने प्रविष्टोऽसंसारी सन् देहेंद्रियादिसंसारधर्म
मनुवर्त्तते देहेंद्रियसंघातोऽस्मि कृशः स्थूलः सुखी दुःखीति परमात्मतामजानन्नात्मनः॥ न त्वमेतदात्मकः परमेव ब्रह्मासि असंसारीति
प्रतिबोधित आचार्येण हित्वैषणात्रयानुवृत्तिं ब्रह्मैवास्मीति प्रतिपद्यते॥ अत्र राजपुत्रस्य राजप्रत्ययवत् ब्रह्मप्रत्ययो दृढो भवति॥ विस्फु
लिंगवदेव त्वं परस्माद्ब्रह्मणो भ्रष्ट इत्युक्ते॥ विस्फुलिंगस्य प्रागग्नेर्भ्रंशादग्न्येकत्वदर्शनात्॥ तस्मादेकत्वप्रत्ययदार्ढ्याय सुवर्णमणिलो
हाग्निविस्फुलिंगदृष्टांताः नोत्पत्त्यादिभेदप्रतिपादनपराः॥ सैंधवघनवत्त्वज्ञस्त्वेकरसनैरंतर्यत्वावधारणादेकधैवानुद्रष्टव्यमिति च॥ य
दि च ब्रह्मणश्चित्रपटवद्वृक्षसमुद्रादिवच्चोत्पत्त्याद्यनेकधर्मविचित्रताविजिग्राहयिषिताऽएकरसं सैंधवघनवदनंतरमबाह्यमिति नोप
समाहरिष्यदेकधैवानुद्रष्टव्यमिति च न प्रायोऽस्यत यइह नानेव पश्यतीति निंदावचनं च॥ तस्मादेकरूपैकत्वप्रत्ययदार्ढ्यायैव सर्ववेदांतेषू
त्पत्तिस्थितिलयादिकल्पना न तत्प्रत्ययकरणाय ॥
स्फुलिंगादिदृष्टांतश्रुत्येत्याशंक्याहात्रेति॥ तथापि कथं ब्रह्मप्रत्ययदार्ढ्यं तत्राह विस्फुलिं
गस्येति॥ दृष्टांतेष्वेकत्वदर्शनं तस्मादिति परामृष्टं उत्पत्त्यादिभेदे नास्ति शास्त्रतात्पर्यमित्यत्र हेत्वंतरमाह सैंधवेति॥ चकारोऽवधारणादिति पदमनुकर्षति॥
संगृहीतमर्थं विवृणोति यदि चेत्यादिना॥ निंदावचनं च न प्रायोऽस्यतेति संबंधः एकरस्यावधारणश्रवणफलमाह तस्मादिति॥ एकत्वस्य भेदसहत्वं वार

आदिशब्देन प्रवेशननियमनेग्रह्यते तेन तत्स्वस्वयकरणाय यत्र तच्छब्देनोक्तस्त्वादिभेदो विवक्षितः। किंच परस्यैकदेशो विज्ञानात्मेत्यत्र तदेकदेशः स्वाभाविको वा स्यादौपाधिको वेति विकल्प्याद्यं दूषयति नचेति॥ विपक्षे दोषमाह्हादेशस्येति॥ द्वितीयमुत्थापयति॥ अथेति॥ एकदेशस्यौपाधिकत्त्वपक्षे परस्मिन्विवेकवतां तदखंडत्वबुद्धिभाजां तदेकदेशो वस्तुतः पृथक्भूतो व्यवहारावलंबनमिति नैव बुद्धिर्जायते॥ औपाधिकस्य स्फटिकलौहित्यवन्मिथ्यात्वादित्युत्तरमाह न तदेति॥ ननु जीवे कर्त्ताहं भोक्ताहमिति परिछिन्नधीः सर्वेषामुपलभ्यते सा च तस्य वस्तुतोऽपरिछिन्नब्रह्ममात्रत्वान्म

नच निरवयवस्य परस्य परमात्मनोऽसंसारिणः संसार्येकदेशकल्पना न्याय्या॥ स्वतोऽदेशत्वात्परमात्मनः॥ अदेशस्य परस्यैकदेशसंसारित्वकल्पनायां पर एव संसारीति कल्पितं भवेत्॥ अथ परो पाधिकृतएकदेशः परस्य घटकरकाद्याकाशवत्॥ न तदा तत्र विवेकिनां परमात्मैकदेशः पृथक्संव्यवहारभागिति मतिरुत्पद्यते॥ अविवेकिनां विवेकिनां चोपचरिता बुद्धिर्दृष्टेति चेत् नाविवेकिनां मिथ्याबुद्धित्वात् विवेकिनां च संव्यवहारमात्रालंबनार्थत्वात् यथा कृष्णो रक्तश्चाकाश इति विवेकिनामपि कदाचित्कृष्णता रक्तता चाकाशस्य संव्यवहारमात्रालंबनार्थत्वं प्रतिपद्यत इति न परमार्थतः कृष्णो रक्तो वाकाशो भवितुमर्हति॥ चक्रोशनधीवदुपचरितात तस्मादुभयेषामुक्तात्मबुद्धिदर्शनात्परमात्मैकदेशत्वं जीवस्य दुर्वारमिति चोदयत्यविवेकिनामिति॥ तत्राविवेकिनां यथोक्ता बुद्धिरुपचरिता न भवत्यऽतस्मिंस्तद्बुद्धित्वेनाविद्यात्वादिति परिहरति नेत्यादिना॥ तथापि विवेकिनामीदृशी धीरुपचरितेति चेत्तत्राह विवेकिनांचेति॥ तेषां संव्यवहारो भिन्नाभिवदनात्मकस्तावन्मात्रस्यालंबनमाभासं भूतोर्थः तद्विषयत्वात्तद्बुद्धेरपि मिथ्याबुद्धित्वादुपचरितत्वासिद्धिरित्यर्थः॥ विवेकिनामविवेकिनां चात्मनि परिछिन्नधीरुपलब्धेत्येतावता न तस्य वस्तुतो ब्रह्मांशत्वादिसिद्ध्यतीत्येतदृष्टांतेन साधयति यथेति॥ अविवेकिनामित्यपेरर्थः॥

चिंत्रेग्निर्व्याघ्रसर्पाणांमुखेदत्वास्वतर्जनीं॥ बालंवदसरेबालपश्येदंदूरतोमुखं॥ एतावतानशब्दस्य सत्त्वं प्रत्ययस्य च॥ एवमेवमभिज्ञानां व्यवहारेत्रकाक्षतिः २

ब्रह्मणिवस्तुतोंशादिकल्पनानकर्त्तव्येतिदार्ष्टांतिकमुपसंहरतिअतइति॥अंशांशिनोर्विशदीकरणमेकदेशैकदेशीति॥अतःशब्दोपात्तमे
वहेतुंस्फुटयतिसर्वकल्पनेति॥सर्वासांकल्पनानामपनयनमेवार्थःसारत्वेनाभीष्टःतत्परत्वादुपनिषदांतदेकसमधिगम्येब्रह्मणिनकाचिदपि
कल्पनास्तीत्यर्थः॥उपनिषदांनिर्विकल्पकवस्तुपरत्वेफलितमाहातोहित्वेति॥ब्रह्मणोनिर्विशेषत्वेपिआत्मनस्तदेकदेशस्यसविशेषत्वंकिंनस्या
अतोनपंडितैर्ब्रह्मस्वरूपप्रतिपत्तिविषयेब्रह्मणोंशांश्येकदेशैकदेशिविकारविकारित्वकल्पनाकार्या॥सर्वकल्पनापनयनार्थसार
परत्वात्सर्वोपनिषदां॥अतोहित्वासर्वकल्पनामाकाशस्येवनिर्विशेषताप्रतिपत्तव्या॥आकाशवत्सर्वगतश्चनित्योनलिप्यतेलोकदुः
खेनबाह्यइत्यादिश्रुतिशतेभ्यः॥नात्मानंब्रह्मविलक्षणंकल्पयेदुष्णात्मकइवाग्नेर्नाशीतैकदेशंप्रकाशात्मकेवासवितरितमएकदेशंत
त्कल्पनाऽपनयनार्थसारपरत्वात्सर्वोपनिषदां॥तस्मान्नामरूपोपाधिनिमित्ताएवात्मन्यसंसारधर्मिणिसर्वेव्यवहाराः॥रूपंरूपंप्रति
रूपोबभूवसर्वाणिरूपाणिविचित्यधीरोनामानिकृत्वाभिवदन्यआस्तेइत्येवमादिमंत्रवर्णेभ्यः॥नस्वतआत्मनःसंसारित्वमलक्तका
द्युपाधिसंयोगजनितरक्तस्फटिकादिबुद्धिवद्भ्रांतमेवनपरमार्थतः॥ध्यायतीवलेलायतीवनकर्मणावर्द्धतेनोकनीयान्नकर्मणालि
प्यतेपापकेन॥समंसर्वेषुभूतेषुतिष्ठंतंशुनिचैवश्वपाकेचेत्यादिश्रुतिस्मृतिन्यायेभ्यःपरमात्मनोऽसंसारित्वेव॥अतएकदेशोविकारःश
क्तिर्वाविज्ञानात्मान्योवेतिविकल्पयितुंनिरवयवत्वाभ्युपगमेविशेषतोनशक्यते॥ दित्याशंक्याहनात्मानमिति॥आत्मानिर्विशेषश्चेत्कथंत
स्मिन्व्यवहारत्रैयमित्याशंक्याहतस्मादिति॥आत्मनिसर्वोव्यवहारोनामरूपोपाधिप्रयुक्तइत्यत्रप्रमाणमाहरूपंरूपमिति॥असंसारधर्मिणीत्युक्तं
विशेषणंविशदयतिनस्वतइति॥आत्मासंसारित्वमात्मनीत्यत्रमानमाहध्यायतीति॥कूटस्थत्वासंगत्वादिन्यायः॥परमात्मनःसांशत्वपक्षोनिराकृतः॥
श्रौतस्मार्तलौकिकंजाग्रत्स्वप्नसुषुप्तात्मकंनामरूपक्रियात्मकंवात्रैयं॥२

ननुतस्यनिरंशत्वेपिकुतोजीवस्यतन्मात्रत्वंतदेकदेशत्वादिसंभवादतआहएकदेशइति॥कथंतर्हिपादोस्यविश्वाभूतानिममैवांशोजीवलोके॥अंशो
नानाव्यपदेशात्॥सर्वएतआत्मनोव्युच्चरंतीतिश्रुतिस्मृतिवादास्तत्राह्यंशादीति॥न्यायागमाभ्यांजीवेश्वरयोरंशांशित्वादिकल्पनांनिराकृत्यवेदांतानामै
क्यपरत्वेस्थितेसतिद्वैतासिद्धिःफलतीत्याहसर्वोपनिषदामिति॥एकत्वज्ञानस्यसनिदानद्वैतध्वंसित्वमथशब्दार्थः॥प्रकृतंज्ञानंतसदेनपरामृश्यतेइ
त्यद्वैतमेवतत्त्वमितिशेषः॥किमर्थमितिप्रश्नमन्वानोद्वैतिनांमतमुत्थापयतिकर्मकांडेति॥वेदांतानामैक्यपरत्वेपिकथंतत्प्रामाण्यविरोधप्रसंगस्तत्रा

अंशादिश्रुतिस्मृतिवादाश्चैकत्वार्थानतुभेदप्रतिपादकाःविवक्षितार्थैकवाक्ययोगादित्यवोचाम॥सर्वोपनिषदांपरमात्मैकत्वज्ञापनप
रत्वेअथकिमर्थंतत्प्रतिकूलोर्थोविज्ञानात्मभेदःपरिकल्प्यतइति॥कर्मकांडप्रामाण्यविरोधपरिहारायेत्येके॥कर्मप्रतिपादकानिहि
वाक्यान्यनेकक्रियाकारकफलभोक्तृकर्त्राश्रयाणिविज्ञानात्मभेदाभावेह्यसंसारिणएवपरमात्मनएकत्वेकथमिष्टफलासुक्रियासुप्र
वर्त्तयेयुःपुनरनिष्टफलाभ्योवाक्रियाभ्योनिवर्त्तयेयुः॥कस्यवाबद्धस्यमोक्षायोपनिषदारभ्येत॥अपिचपरमात्मैकत्ववादिपक्षेकथंपर
मात्मैकत्वोपदेशःकथंवातदुपदेशग्रहणफलं॥बद्धस्यहिबंधनाशफलायोपदेशस्तदभावउपनिषच्छास्त्रंनिर्विषयमेव॥ हकर्मेति॥तथापिकथं

विरोधावकाशःस्यादित्याशंक्याहविज्ञानात्मेति॥केवलाद्वैतपक्षेकर्मकांडविरोधमुक्त्वातत्रैवज्ञानकांडविरोधमाहकस्यवेति॥परस्यनित्यमुक्तत्वादन्य
स्यस्वतःपरतोवाबद्धस्याभावान्मुक्तिर्व्याभावस्तथाचाधिकार्यभावादुपनिषदारंभासिद्धिरित्यर्थः॥कर्मकांडस्यकांडांतरस्यचप्रामाण्यानुपपत्तिर्विज्ञा
नात्मादिभेदंकल्पयतीत्यर्थापत्तिद्वयमुक्तं॥तत्रद्वितीयामर्थापत्तिंप्रपंचयतिअपिचेति॥कापुनरुपदेशस्यानुपपत्तिस्तत्राहबद्धस्येति॥तदभावइ
त्यत्रतच्छब्दोबद्धमधिकरोतिनिर्विषयंनिरधिकारंकिंचयद्यर्थापत्तिद्वयमुक्तयाविधयोत्तिष्ठतितर्हिभेदस्यदुर्निरूपत्वात्कथंकर्मकांडंप्रमाणमितिपद्धन्न

ब्रह्मवादेपिशिष्यशासित्रादिभेदाभावेकथमुपनिषत्प्रामाण्यमित्याक्षेपंसुकरत्वाद्यश्चोपनिषदांप्रतीयमानंशिष्यशासित्रादिभेदमाश्रित्यप्रामाण्यमि
तिपरिहारःसकर्मकांडस्यापिसमानस्तत्रापिप्रातीतिकंभेदमादायप्रामाण्यस्यसुप्रतिपन्नत्वान्न चभेदप्रतीतिर्भ्रांतिर्बाधाभावादित्यभिप्रे
त्याहएवंतर्हीति॥चोद्यसाम्यंविवृणोतियेनेति॥इतिचोद्यसाम्यात्परिहारस्यापिसाम्यमितिशेषः॥ननुकर्मकांडंभेदपरंब्रह्मकांडंत्वभेदपरंप्र
तिभातिनवस्तुनिविकल्पःसंभवत्यतोन्यतरस्याप्रामाण्यमतआहेवंतर्हीति॥तुल्यमुपनिषदामपिस्वार्थविघातकत्वमित्याशंक्याहोपनिषदामि

एवंतर्ह्युपनिषद्वादिपक्षस्यकर्मकांडवादिपक्षेणचोद्यपरिहारयोःसमानःपंथाः॥येनभेदाभावेकर्मकांडंनिरालंबनमात्मानंनलभ
तेप्रामाण्यंप्रतितथोपनिषदपि॥एवंतर्हियस्यप्रामाण्येस्वार्थविघातोनास्तितस्यैवकर्मकांडस्यास्तुप्रामाण्यंउपनिषदांतुप्रामाण्य
तितदाचरूपेएवेतिहिवचनमसमंजसंरूपाणीतिवासनाभिःसहबहुवचनंयुक्ततरंस्यात्तदेचमूर्त्तामूर्त्तेवासनाश्चतृतीयमिति॥अथ
मूर्त्तामूर्त्तेएवपरमात्मनोरूपेवासनास्तुविज्ञानात्मनइतिचेन्न॥तदाविज्ञानात्मद्वारेणविक्रियमाणस्यपरमात्मनइतीयंवाचोयुक्तिरन
र्थिकास्यात्॥वासनायाअपिविज्ञानात्मद्वारत्वस्याविशिष्टत्वात्॥नचवस्तुवस्त्वंतरद्वारेणविक्रियतइतिमुख्ययावृत्त्याशक्यंकल्प
यितुंनचविज्ञानात्मापरमात्मनोवस्त्वंतरंतथाकल्पनायांसिद्धांतहानात्॥तस्माद्वेदार्थमूढानांस्वचित्तप्रभवाएवमादिकल्पनाअस
त्वाह्यानह्यक्षरबाह्योवेदार्थोवेदार्थोपकारीवा॥निरपेक्षत्वाद्वेदस्यप्रामाण्यंप्रति॥तस्माद्राशित्रयकल्पनाऽसमंजसा॥योयंदक्षिणेऽक्ष
न्पुरुषइतिलिंगात्माप्रस्तुतःआध्यात्म मनात्यंतिकंवानाद्यइत्याहनचेति॥नद्वितीयोभेदाभेदनिरासादितिद्रष्टव्यं॥परपक्षदूषणमुपसं
हरतितस्मादिति॥एवमादिकल्पनाराशित्रयंजीवस्यकामाद्याश्रयत्वमित्याद्याः॥अक्षरबाह्यत्वेफलितमाहनहीति॥वेदार्थोपकारित्वाभावेहेतुमा
हनिरपेक्षत्वादिति॥वेदार्थत्वाद्यभावेसिद्धमर्थंकथयतितस्मादिति॥तस्यहेत्वन्तरपरकीयप्रक्रियांप्रत्याख्यायस्वमतेतच्छब्दार्थमाहयोयमिति॥

=ई यथाविज्ञानात्मद्वारापरमात्मनःमूर्त्तामूर्त्तेतथातद्द्वारावासनापिस्यात्

अ·
४

राम:
४०

=५ रूपितत्वेनेत्यपि पाठः

प्रकृतत्वाल्लिंगात्मग्रहे जीवस्यापि पाणिपेषवाक्ये तद्भावात्तस्यैवात्र तच्छब्देन ग्रहः स्यादिति शंकते नन्विति॥ प्रकृतत्वे पि तस्य निर्विशेषब्रह्मत्वेन ज्ञापयितु मिष्टत्वात् न वासनामयं संसाररूपं तत्त्वतो युक्तमिति परिहरति नैवमिति॥ इतश्च जीवस्य न वासनारूपिता किंतु चित्तस्येत्याह यदि हीति॥ निषेध्यकोटि प्रवेशादिति भावः॥ नायं जीवस्यादेशः किंतु ब्रह्मणस्तटस्थस्येति शंकयित्वा दूषयति नन्वित्यादिना॥ षष्ठावसाने विज्ञातारमरे केनेत्यात्मानमुपक्रम्य स

(ऽधिदैवे च य एष एतस्मिन्मंडले पुरुष इति तस्येति प्रकृतोपादानात् सर्वोपादीयते यो सौ त्यस्यामूर्तस्य रसो न तु विज्ञानमयः॥ ननु विज्ञानमयस्यैतानि रूपाणि कस्मान्न भवंति विज्ञानमयस्यापि प्रकृतत्वात्तस्येति च प्रकृताभ्यादानात्॥ नैवं विज्ञानमयस्यारूपत्वेन विजिज्ञापयिषितत्वात्॥ यदि हि तस्यैव विज्ञानमयस्यैतानि महारजनादीनि रूपाणि स्युः तस्यैव नेति नेतीत्यनाख्येयरूपतया ऽदेशो न स्यात्॥ ननु अन्यस्यैवासावादेशो न तु विज्ञानमयस्येति॥ न षष्ठांत उपसंहारात् विज्ञातारमरे केन विजानीयादिति विज्ञानमयं प्रस्तुत्य स एष नेति नेतीति ज्ञपयिष्यामीति च प्रतिज्ञाया अर्थवत्त्वात्॥ यदि च विज्ञानमयस्यैवासंव्यवहार्यमात्मस्वरूपं विज्ञापयितुमिष्टं स्यात् प्रध्वस्तसर्वोपाधिविशेषं तत इयं प्रतिज्ञार्थवती स्यात्॥ येनासौ ज्ञापितो जानात्यात्मानमेवाहं ब्रह्मास्मीति शास्त्रनिष्ठां प्राप्नोति न बिभेति कुतश्चन॥ अथ पुनरन्यो विज्ञानमयो ऽन्यो नेति नेतीति व्यपदिश्यते तदान्यदन्यो ब्रह्मान्योहमस्मीति विपर्ययगृहीतः स्यात्॥ नात्मानमेवावेदहं ब्रह्मास्मीति॥ तस्मात्तस्य हैतस्येति लिंगपुरुषस्यैवैतानि रूपाणि॥

एष नेति नेत्यात्मेत्यात्मशब्दात्तस्यैवादेशोपसंहारादिहापि तस्यैवादेशो न तटस्थस्येत्यर्थः॥ इतश्च प्रत्यगर्थस्यैवायमादेश इत्याह ज्ञपयिष्यामीति चेति॥ तदेव समर्थयते यदि चेति॥ कथमेतावता प्रतिज्ञार्थवत्त्वं तदाह येनेति॥ ज्ञानफलं कथयति शास्त्रेति॥ अन्वयमुखेनोक्तमर्थं व्यतिरेकमुखेन साधयस्तथेत्यादिना॥ विपर्ययेण गृहीते ब्रह्मकंडिकाविरोधं दर्शयति नात्मानमिति॥ तच्छब्देन जीवपरामर्शासंभवे फलितमाह तस्मादिति ॥

ननुलिंगस्यचेदेतानिरूपाणिकिमित्युपन्यस्यंतेपरमात्मस्वरूपस्यैववक्तव्यत्वादतआहसत्यस्यचेति॥इंद्रगोपोपमानेनकौसुंभस्यगतत्वान्महा
रजनंहरिद्रेतिव्याख्यातं॥तत्रलोकप्रसिद्धिंदर्शयतियेनेति॥ऊर्णादीत्यादिपदंकंबलादिग्रहार्थं॥मनसिवासनावैचित्र्येकिंकारणमितितदाहक

सत्यस्यचसत्येपरमात्मस्वरूपेवक्तव्येनिरवशेषंसत्यंवक्तव्यंसत्यस्यचविशेषरूपाणिवासनास्तासामिमानिरूपाण्युच्यंतेएतस्यपुरु
षस्यप्रकृतस्यलिंगात्मनएतानिरूपाणि॥कानितानीत्युच्यंतेयथालोकेमहारजनंहरिद्रातयारक्तंमाहारजनंयथावासोलोकेएवंस्त्र्या
दिविषयसंयोगेतादृशंवासनारूपंरंजनाकारमुत्पद्यतेचित्तस्ययेनासौपुरुषोरक्तइत्युच्यतेवस्त्रादिवद्यथाचलोकेपांड्वाविकमवेरिद
माविकंऊर्णादियथाचैतदापांडुरंभवति॥तथान्यद्वासनारूपं॥यथाचलोकेइंद्रगोपोऽत्यंतरक्तोभवत्येवमस्यवासनारूपंकचिद्विषयवि

यथामाहारजनंवासोयथापांड्वाविकंयथेंद्रगोपोयथाग्न्यर्चिर्यथापुंडरीकंयथासकृद्विद्युतं

शेषापेक्षयारागस्यतारतम्यंकचित्पुरुषचित्तवृत्त्यपेक्षया॥यथाचलोकेग्न्यर्चिर्भास्वरंभवतितथाकचित्कस्यचिद्वासनारूपंभवति॥य
थापुंडरीकंशुक्लंतद्वदपिचवासनारूपंकस्यचिद्भवति॥यथासकृद्विद्युतंयथालोकेसकृद्विद्योतनंसर्वतःप्रकाशकंभवतितथाज्ञानप्र
काशविवृद्ध्यपेक्षयाकस्यचिद्वासनारूपंउपजायते॥नैषांवासनारूपाणामादिरंतोमध्यंसंख्यावादेशःकालोनिमित्तंवावधार्यतेऽसंख्ये
यत्वाद्वासनायाःवासनाहेतूनांचानंत्यात्॥तथाचवक्ष्यतिषष्ठइदंमयोदोमयइत्यादि

विदिति॥चित्तवृत्तिशब्देनसत्वादिगुणपरिणामोवि
वक्षितः॥परिमितदृष्टांतोक्त्यावासनानामपिपरिमितत्वंदृष्टांतदार्ष्टांतिकयोःसाम्यादित्याशंक्याहनैषामिति॥तत्रवाक्यशेषंसंवादयतितथाचेति॥
=२कचिदाहारात्चित्तपरिणामःकचिद्विषयाभिमुख्यात्कचित्सदृशदर्शनात्कचिल्लिंगदर्शनात्कचित्स्मरणात्कचिद्योगादिप्रयत्नात्कचिन्मणिमंत्रौषधिदेशकालवरशापादिवशात् २

वासनानंत्यात्तदीयपरिमितिप्रदर्शनेपरिमितदृष्टांतपरिग्रहस्यातात्पर्येकुत्रतात्पर्यमित्याशंक्याह तस्मादिति प्रकारप्रदर्शनमेवाभिनयत्येवंप्रकाराणी
ति॥ अंत्यवास नाविशिष्टसूत्रोपास्तिंफलवतींतस्रकर्षाभिधानपूर्वकमभिदधातियत्विल्यादिना॥ व्यक्तिः सर्वस्यवस्तुजातस्येतिशेषः तदीयमित्यस्य

तस्मान्नस्वरूपसंख्यावधारणार्थादृष्टांताः यथामहारजनंवासइत्यादयः किंतर्हिप्रकारप्रदर्शनार्थाः॥ एवंप्रकाराणिहिवासनारूपाणीति
॥ यत्तुवासनारूपमभिहितमंतेसकृद्विद्योतनमिवेतितत्किलहिरण्यगर्भस्याव्याकृतात्प्रादुर्भवतस्तडिद्वत्सकृदेवव्यक्तिर्भवतीतितत्त
दीयंवासनारूपंहिरण्यगर्भस्ययोवेदतस्यसकृद्विद्युत्तावइवहवैइत्यवधारणार्थावेवमेवास्यश्रीःख्यातिर्भवतीत्यर्थः॥ यथाहिरण्यगर्भस्ये

सकृद्विद्युतेवहवाअस्यश्रीर्भवतियएवंवेद॥ अथातआदेशोनेतिनेति

वमेतद्यथोक्तंवासनारूपमंसंयोवेद॥ एवंनिरवशेषंसत्यस्वरूपमभिधाय य त्तत्सत्यस्यसत्यमवोचामतस्यैवस्वरूपावधारणार्थंब्र
ह्मणइदमारभ्यते॥ अथानंतरंसत्यस्वरूपनिर्देशानंतरंयत्सत्यस्यसत्यंतदेवावशिष्यतेयस्मादतस्तस्मात्सत्यस्यसत्यस्वरूपंनिर्दे
क्ष्यामः॥ आदेशोनिर्देशोब्रह्मणः कः पुनरसौनिर्देशउच्यते॥ नेतिनेतीतिएवंनिर्देशः॥ ननुकथमाभ्यांनेतिनेतीतिशब्दाभ्यांसत्यस्यसत्यं
निर्दिदिक्षितमिति॥ उच्यतेसर्वोपाधिविशेषापोहेनयस्मिन्नकश्चिद्विशेषोस्तिनामवारूपंवाकर्मवाभेदोवाजातिर्वागुणोवा व्यक्तीकरणंहिरण्यग
र्भस्येति॥ तदेवस्फुटयतियथेत्यादिना॥ वृत्तमनूद्यानंतरग्रंथमवतार्यव्याकरोत्येवमित्यादिना॥ तस्यैवब्रह्मणइतिसंबंधः॥ कस्मादनंतरमित्युक्तेतद्दर्शयन्न
तः शब्दंचापेक्षितंपूरयन्व्याकरोतिसत्यस्येति॥ यथोक्तादेशस्याभावपर्यवसायित्वंमन्वानः शंकतेनन्विति॥ निरवधिकनिषेधासिद्धेस्तदवधित्वेनसत्यस्यसत्यं

=रूनामादिद्वारेण

ब्रह्मणो विधिमुखेन निर्देशे संभाव्यमाने किमिति निषेधमुखेन तन्निर्दिश्यते तत्राह यस्मिन्निति॥ तद्विधिमुखेन निर्देष्टुमशक्यमिति शेषः नामरूपा द्यभावेपि ब्रह्मणि शब्दप्रवृत्तिमाशंक्याह तद्वारेणेति॥ जात्यादीनामन्यतमस्य ब्रह्मण्यपि संभवात् तद्द्वारा तत्र शब्दप्रवृत्तिः स्यादिति चेन्नेत्याह॥ न चेति॥ उक्तमर्थं वैधर्म्यदृष्टांतेन स्पष्टयति गौरिति॥ तथा जात्याद्यभावान्न ब्रह्मणि शब्दप्रवृत्तिरिति शेषः कथं तर्हि क्वचिद्विधिमुखेन ब्रह्मोपदिश्यते तत्राह अध्यारो पितेति॥ विज्ञानानंदादिवाक्येषु शबलेगृहीतशक्तिभिः शब्दैर्लक्ष्यते ब्रह्मेत्यर्थः॥ ननु लक्षणामुपेक्ष्य साक्षादेव ब्रह्म किमिति न विवक्ष्यते तत्राह यदा पुनरि

तत्तद्वारेण हि शब्दप्रवृत्तिर्भवति॥ न चैषां कश्चिद्विशेषो ब्रह्मण्यस्ति अतो न निर्देष्टुं शक्यते इदं तदिति गौरसौ स्पंदते शुक्लो विषाणीति यथा लो के निर्दिश्यते॥ तथा ऽध्यारोपितनामरूपकर्मद्वारेण ब्रह्म निर्दिश्यते विज्ञानमानंदं ब्रह्म विज्ञानघन एव ब्रह्मात्मेत्येवमादिशब्दैः॥ यदा पुनः स्व रूपमेव निर्दिदिक्षितं भवति निरस्तसर्वोपाधिविशेषं तदा न शक्यते केनचिदपि प्रकारेण निर्देष्टुं तदायमेवाभ्युपायो यदुत प्राप्तनिर्देशप्रति षेधद्वारेण नेति नेतीति निर्देशः॥ इदं च नकारद्वयं वीप्साव्याप्त्यर्थं यद्यत्प्राप्तं तत्तन्निषिध्यते तथा च सत्यनिर्दिष्टाशंका ब्रह्मणः परिहृता भवति ॥ अन्यथा हि नकारद्वयेन प्रकृतद्वयप्रतिषेधे यदन्यत्प्रकृतात्प्रतिषिद्धद्वयाद्ब्रह्म तन्न निर्दिष्टं कीदृशं तु खल्वित्याशंका न निवर्तिष्यते ॥

ति॥ निर्देष्टुं लक्षणामुपेक्ष्य साक्षादेव वक्तुमिति यावत् तत्र शब्दप्रवृत्तिनिमित्तानां जात्यादीनामभावस्योक्तत्वादित्यर्थः॥ विधिमुखेन निर्देशासंभवे फलितमाह तदेति॥ प्राप्ता निर्देशा यस्य विशेषस्य तत्प्रतिषेधमुखेनेति यावत्॥ एवं ब्रह्म निर्दिदिक्षितं चेदेकेनैव नञालंकृतं द्वितीयेनेत्याशंक्याहेदं चेति॥ वीप्सया व्याप्तिः स र्वविषयसंग्रहस्तदर्थं नकारद्वयमित्युक्तमेव व्यनक्ति यद्यदिति॥ विषयत्वेन प्राप्तं सर्वं न ब्रह्मेत्युक्ते सत्यविषयः प्रत्यगात्मा ब्रह्मेत्येकत्वे शास्त्रपर्यवसानान्नैराकां क्ष्यं श्रोतुः सिध्यतीत्याह तथा चेति॥ इति शब्दस्य प्रकृतपरामर्शित्वात् प्रकृतमूर्तामूर्तादेरन्यत्वे ब्रह्मणो नकारपर्यवसानं किमिति नेष्यते तत्राहान्यथेति॥ आशंका

अनर्थकश्चेतिचकारेणसमुच्चितंदोषांतरमाहब्रह्मेति॥उक्तमर्थमन्वयमुखेनसमर्थयतेयदात्विति॥सर्वोपाधिनिरासेनतत्रतत्रविषयेवेदनेच्छायदानि
वर्तितातदायथोक्तंप्रत्यक्ब्रह्माहमितिनिश्चित्याकांक्षासर्वतोव्यावर्त्ततेतेननिर्देशस्यसार्थकत्वंयदाचोक्तरीत्याब्रह्मात्मत्वेनैवप्रज्ञावस्थिताभवतितदा
प्रतिज्ञावाक्यमपिपरिसमाप्त्यर्थंस्यादितियोजना॥वीप्सापक्षमुपसंहरतितस्मादिति॥आदेशस्यप्रक्रमाननुगुणत्वमाशंक्यानंतरवाक्येनपरिहरतिन

तथाचानर्थकश्चसनिर्देशः पुरुषस्यविविदिषायाअनिवर्त्तकत्वात्॥ब्रह्मज्ञपयिष्यामीतिचवाक्यमपरिसमाप्त्यर्थंस्यात्॥यदातुसर्वदिक्का
लादिविविदिषानिवर्त्तितास्यात्सर्वोपाधिनिराकरणद्वारेणतदासैंधवघनवदेकरसंप्रज्ञानघनमनंतरमबाह्यंसत्यस्यसत्यमहंब्रह्मास्मी
तिसर्वतोनिवर्ततेविविदिषाऽऽत्मन्येवावस्थिताप्रज्ञाभवति॥तस्माद्वीप्सार्थनेतिनेतीतिनकारद्वयं॥ननुमहतायत्नेनपरिकरबंधंकृत्वाकिंयुक्त

नह्येतस्मादितिनेत्यन्यत्परमस्त्यथनामधेयꣳसत्यस्यसत्यमितिप्राणावैसत्यंतेषामेषसत्यं॥६॥तृतीयंब्राह्मणं ॥

मेवंनिर्देष्टुंब्रह्म॥बाढं॥कस्मात्नहीतियस्मादितिनेतिनेत्येतस्मादितीतिव्याप्तव्यप्रकारानकारद्वयविषयानिर्दिश्यंतेयथाग्रामोग्रामोरमणी
यइत्यन्यत्परंनिर्देशनंनास्तितस्मादयमेवनिर्देशोब्रह्मणः॥यदुक्तंतस्योपनिषत्सत्यस्यसत्यमित्येवंप्रकारेणसत्यस्यसत्यंतत्परंब्रह्मअतोप्र
कृतमुक्तंनामधेयंब्रह्मणोनामैवनामधेयंकिंतत्सत्यस्यसत्यंप्राणावैसत्यंतेषामेषसत्यमिति॥६॥तृतीयंब्राह्मणं॥ न्वियादिना॥नहीतिप्रतीकोपादानं॥य
स्मादित्यस्यहिशब्दार्थस्यतस्मादित्यनेनसंबंधः॥व्याप्तव्याःसंग्राह्याविषयीकर्त्तव्यायेप्रकारास्तेनकारद्वयस्यविषयाःसंतोनिर्दिश्यंतेइतिनेतिनेत्येतस्मादित्य
नेनभागेनेतियोजना॥इतिभ्यांव्याप्तव्यसर्वप्रकारसंग्रहेदृष्टांतमाहयथेति॥ग्रामोग्रामोरमणीयइत्युक्तेराष्ट्रनिविष्टरमणीयसर्वग्रामसंग्रहवत्प्रकृतेपीतिश

यथाविषयंसर्वप्रकारसंग्रहेनकारभागान्निषेध
सिद्धिरित्यर्थः॥

बृ·र·
४३

अ·

यथोक्तान्निषेधरूपान्निर्देशादन्यन्निर्देशनं यस्माद्ब्रह्मणो न परमस्ति तस्मादित्युपसंहारः॥ अथेत्यादिवाक्यं प्रकृतोपसंहारत्वेन व्याचष्टे यदुक्तमित्यादिना॥ ६॥ तृतीयं ब्राह्मणं॥ संबंधाभिधित्सया वृत्तं कीर्त्तयत्यात्मेत्येवेति॥ किमित्यात्मतत्वमेव ज्ञातव्यं तत्राह तदेवेति॥ इत्थं सूत्रितस्य विद्याविषयस्य वाक्यस्य व्याख्यानमेव विषयस्तत्र विद्या साधनं साध्या मुक्तिरिति संबंधो मुक्तिश्च फलमित्येतत्तदात्मानमित्यादिना दर्शितेत्याह इत्युपन्यस्तस्येति॥ विद्याविषयमुक्तं निगमयति एवमिति॥ उक्तमर्थांतरं स्मारयति अविद्यायाश्चेति॥ अन्यो सावित्याद्यारभ्याविद्याया विषयश्च संसार उपसंहृतः त्रयमित्यादिने

आत्मेत्येवोपासीत॥ तदेवैतस्मिन्सर्वस्मिन्पदनीयमात्मतत्वं यस्मात्प्रेयः पुत्रादेरित्युपन्यस्तस्य वाक्यस्य व्याख्यानविषये संबंधप्रयोजने अभिहिते॥ तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवदित्येवं प्रत्यगात्मा ब्रह्मविद्याया विषय इत्येतदुपन्यस्तं॥ अविद्यायाश्च विषयो न्यो सावन्यो हमस्मीति न स वेदेत्यारभ्य चातुर्वर्ण्यप्रविभागादिनिमित्तपांक्तकर्मसाध्यसाधनलक्षणो बीजांकुरवद्व्याकृताव्याकृतस्वभावो नामरूपकर्मात्मकः संसारः त्रयं वा इदं नामरूपं कर्मेत्युपसंहृतः॥ शास्त्रीय उत्कर्षलक्षणो ब्रह्मलोकांतो ऽधोभावश्च स्थावरांतो ऽशास्त्रीयः पूर्वमेव प्रदर्शितः॥ द्वया हेत्यादिना॥ एतस्माद्विद्याविषयाद्विरक्तस्य प्रत्यगात्मविषयब्रह्मविद्यायामेवाधिकारः कथं नाम स्यादिति तृतीये ध्याय उपसंहृतः समस्तो ऽविद्याविषयः॥

तिसंबंधः॥ संसारमेव विशिनष्टि चातुर्वर्ण्येति॥ चातुर्वर्ण्यं चातुराश्रम्यमिति प्रविभागादिनिमित्तं यस्य पांक्तस्य कर्मणस्तस्य साध्यसाधनमित्येवमात्मक इति यावत्॥ तस्यानादित्वं दर्शयति बीजांकुरवदिति॥ तमेव त्रिधा संक्षिपति नामेति॥ स चोत्कर्षापकर्षाभ्यां द्विधाभिद्यते तत्राद्यमुदाहरति शास्त्रीय इति॥ उत्कृष्टो हि संसारः त्वन्नात्मभावः शास्त्रीयज्ञानकर्मलभ्य इत्यर्थः॥ द्वितीयं कथयत्यधोभावश्चेति॥ निकृष्टः संसारः स्वाभाविकज्ञानकर्मसाध्य इत्यर्थः॥ किमित्यविद्याविषयो व्याख्यातो न हि स पुरुषस्योपयुज्यते तत्राहैतस्मादिति॥ प्रत्यगात्मैव विषयस्तस्मिन्या ब्रह्मेति विद्या तस्यामिति यावत्॥

विदेपि ५

राम:
४३

तार्तीयमर्थमनूद्य चातुर्थिकमर्थं कथयति चतुर्थेत्विति॥ एवं वृत्तमनूद्योत्तरब्राह्मणतात्पर्यमाहात्याद् इति॥ किमिति संन्यासो विधित्स्यते कर्मणैव विद्यालाभ
संभवादित्याशंक्याह जायेति॥ अविद्याया विषय एव विषयो यस्येति विग्रहः॥ तस्मात्संन्यासो विधित्सित इति पूर्वेण संबंधः॥ ननु प्रकृतं कर्माविद्याविष
यमपि किमित्यात्मज्ञानं तादर्थ्येनानुष्ठीयमानं न फलयति तत्राहान्येति॥ तदेव दृष्टांतेन स्पष्टयति नहीति॥ पांक्तस्य कर्मणोऽन्यसाधनत्वमेव कथमधिगत

चतुर्थे तु ब्रह्मविद्याविषयं प्रत्यगात्मानं ब्रह्म ते ब्रवाणि ब्रह्म ज्ञपयिष्यामीति च प्रस्तुत्य तद्ब्रह्मैकमद्वयं सर्वविशेषशून्यं क्रियाकारकफलस्वभाव
सत्यशब्दवाच्याशेषभूतधर्मप्रतिषेधद्वारेण नेति नेतीति ज्ञापितं॥ अस्या ब्रह्मविद्याया अंगत्वेन संन्यासो विधित्सितः॥ जायापुत्रवित्तादिलक्ष
णं पांक्तं कर्माविद्याविषयं यस्मान्नात्मप्राप्तिसाधनं॥ अन्यसाधनं ह्यन्यस्मै फलसाधनाय प्रयुज्यमानं प्रतिकूलं भवति॥ नहि बुभुक्षापिपासा
निवृत्त्यर्थं धावनं गमनं वा साधनं॥ मनुष्यलोकपितृलोकदेवलोकसाधनत्वेन हि पुत्रादिसाधनानि श्रुतानि नात्मप्राप्तिसाधनत्वेन विशेषित
त्वात्॥ न च ब्रह्मविदो विहितानि काम्यत्वश्रवणादेतावान्वै काम इति॥ ब्रह्मविदश्चाप्तकामत्वादाप्तकामस्य कामानुपपत्तेः॥ येषां नोऽयमात्मायं
लोक इति च श्रुतेः॥ केचित्तु ब्रह्मविदोऽप्येषणासंबंधं वर्णयंति तैर्बृहदारण्यकं न श्रुतं॥ पुत्राद्येषणानामविद्याविषयत्वं विद्याविषये च येषां नोऽयमा
त्मायं लोक इत्यतः किं प्रजया करिष्याम इत्येष विभागस्तैर्न श्रुतः श्रुत्याकृतः॥

मित्याशंक्याह मनुष्येति॥ सोऽयं मनुष्यलोकः पुत्रेणैव जय्यः कर्मणा
पितृलोको विद्यया देवलोक इति विशेषितत्वं॥ श्रुतत्वमेव विशेषितत्वोक्तिद्वारा स्फुटीकृतमिति चकारेण द्योत्यते॥ ननु ब्रह्मविद्या स्वफले विहितं कर्मापे
क्षते श्रौतसाधनत्वाद्दर्शादिवत्तथा च समुच्चयान्न कर्मसंन्याससिद्धिरत आह न चेति॥ कर्मणां काम्यत्वेऽपि ब्रह्मविदस्तानि किं न स्युरित्याशंक्याह ब्रह्मविदश्चे
ति॥ इतश्च तस्य पुत्रादिसाधनानुपपत्तिरित्याह येषामिति॥ समुच्चयपक्षमनुभाष्य श्रुतिविरोधेन दूषयति केचित्विति॥ श्रुतिविरोधमेव स्फोरयति पुत्रादीति॥

वैयर्थि ५ =५तद्वद्विद्वद्विषयं

अविद्वद्विषयत्वंश्रुतंतत्प्रकरणेतेषामुपदेशादितिशेषः॥ किंप्रजयाकरिष्यामइत्यत आरभ्ययेषांनोयमात्मायंलोकइतिचविद्याविषयेश्रुतमि
तियोजना॥ एषविभागःश्रुत्याकृतस्तैःसमुच्चयवादिभिर्नश्रुतइतिसंबंधः॥ नकेवलंश्रुतिविरोधादेवसमुच्चयासिद्धिः किंतुयुक्तिविरोधाच्चेत्याह
सर्वेति॥ द्वितीयश्चकारोवधारणार्थोनञासंबध्यते॥ स्मृतिविरोधाच्चसमुच्चयासिद्धिरित्याहव्यासेति॥ तत्रप्रथमंपूर्वोक्तंयुक्तिविरोधंस्फुटयतिक
र्मेति॥ प्रतिकूलवर्त्तनंनिवर्त्यनिवर्त्तकभावः॥ संप्रतिस्मृतिविरोधंस्फोरयति यदिदमिति॥ प्रसिद्धंवेदवचनंकुरुकर्मत्यजप्रतियदिदमुपलभ्यतेवि

सर्वक्रियाकारकफलोपमर्दस्वरूपायांचविद्यायांसत्यां सहकार्येणविद्यायाः अनुवृत्तिलक्षणश्चविरोधस्तैर्नविज्ञातः॥ व्यासवाक्यं
चतैर्नश्रुतं॥ कर्मविद्यास्वरूपयोर्विद्याविद्यात्मकयोःप्रतिकूलवर्त्तनंविरोधः॥ यदिदंवेदवचनंकुरुकर्मत्यजेतिच॥ कांगतिंविद्यया
यांतिकांचगच्छंतिकर्मणा॥ एतद्वेदितुमिच्छामितद्भवान्प्रब्रवीतुमे॥ एतावन्योन्यवैरूप्येवर्त्ततेप्रतिकूलतइत्येवंपृष्टस्यप्रतिवचनेन
॥ कर्मणाबध्यतेजंतुर्विद्ययातुविमुच्यते॥ तस्मात्कर्मनकुर्वंतियतयःपारदर्शिनइत्येवमादिविरोधःप्रदर्शितः॥ तस्मात्सर्वसाधनांतरसहि
ताब्रह्मविद्यापुरुषार्थसाधनं॥ सर्वविरोधात्तुसाधननिरपेक्षैवपुरुषार्थसाधनमितिपारिव्राज्यंसर्वसाधनसंन्यासलक्षणमंगत्वेनविधि
त्स्यते॥ वेकिंनंप्रतिचत्यजेति॥ तत्रकांगतिमित्यादिशिष्यस्यव्यासंप्रतिप्रश्नः तस्यबीजमाहैताविति॥ विद्याकर्मीख्यावुपायौपरस्परविरुद्धत्वेनवर्त्त
तेसाभिमानत्वनिरभिमानत्वादिपुरस्कारेणप्रातिकूल्यात्समुच्चयानुपपत्तेर्यथोक्तस्यप्रश्नस्यसावकाशत्वमित्यर्थः॥ इत्येवंपृष्टस्यभगवतोव्यासस्येतिशेषः
॥ विरोधेज्ञानकर्मणोःसमुच्चयस्येतिवक्तव्यं॥ समुच्चयानुपपत्तिमुपसंहरति॥ तस्मादिति॥ कथंतर्हिब्रह्मविद्यापुरुषार्थसाधनमितितत्राह सर्वविरोधादिति
॥ सर्वस्यक्रियाकारकफलभेदात्मकस्यद्वैतेंद्रजालस्यब्रह्मविद्यायाविरोधादितियावत्॥ एकाकिनीब्रह्मविद्यामुक्तिहेतुरितिस्थितेफलितमाहइतिपारि

नकेवलंसंन्यासस्यश्रवणादिपौष्कल्यदृष्टद्वारेणविद्यापरिपाकांगत्वंश्रुत्यादिवशादवगम्यतेकिंतुलिंगादपीत्याहैतावदेवेति॥तत्रैवलिंगांतरमाहषष्ठसमा
प्ताविति॥एतच्चोभयतःसंबध्यते॥यदिकर्मसहितंज्ञानंमुक्तिहेतुस्तदाकिमितिकर्मिणःसतोयाज्ञवल्क्यस्यपारिव्राज्यमुच्यतेतस्मात्तत्यागस्तदंगत्वेनवि
धित्सितइत्यर्थः॥तत्रैवलिंगांतरमाहमैत्रेय्यैचेति॥नहिमैत्रेयीभर्तरित्यक्तकर्मणिस्वयंकर्माधिकर्तुमर्हतिपतिद्वारमंतरेणभार्यायास्तदनधिकारात्तया
चतस्यैकर्मशून्यायैमुक्तेःसाधनत्वेनविद्योपदेशात्कर्मत्यागस्तदंगत्वेनध्वनितइत्यर्थः॥तत्रैवहेत्वंतरमाहवित्तेति॥किमहंतेनकुर्यामितिवित्तंनिंद्यतेअ

एतावदेवामृतत्वसाधनमित्यवधारणात्॥षष्ठसमाप्तौलिंगाच्चकर्मीसन्याज्ञवल्क्यःप्रवव्राजेति॥मैत्रेय्यैचकर्मसाधनरहितायैसाध
नत्वेनामृतत्वस्यब्रह्मविद्योपदेशात्॥वित्तनिंदावचनाच्च॥यदिह्यमृतत्वसाधनंकर्मस्याद्वित्तसाध्यंपात्तंकर्मेतितन्निंदावचनमनिष्टं
स्यात्॥यदितुपरितित्याजयिषितंकर्मततोयुक्तातत्साधननिंदाकर्माधिकारनिमित्तवर्णाश्रमादिप्रत्ययोपमर्दाच्चब्रह्मतंपरादात्क्षत्रंतंप
रादादित्यादिः॥नहिब्रह्मक्षत्राद्यात्मप्रत्ययोपमर्द्देब्राह्मणेनेदंकर्त्तव्यंक्षत्रियेणेदंकर्त्तव्यमितिविषयाभावादात्मानंलभतेविधिः॥यस्यैवपु
रुषस्योपमर्दितःप्रत्ययोब्रह्मक्षत्राद्यात्मविषयस्तस्यतत्प्रत्ययसंन्यासात्तत्कार्याणांकर्मणांकर्मसाधनानांचार्थप्राप्तश्चसंन्यासः॥

तश्चतत्साध्यंकर्मज्ञानसहायत्वेनमुक्तौनोपकरोतीत्यर्थः॥तदेवविवृणोतियदिहीति॥तन्निंदावचनमित्यत्रतच्छब्देनवित्तमुच्यते॥त्वत्पक्षेवाकथंनिंदा
वचनमितितत्राहयदितिति॥किंचब्राह्मणोहंक्षत्रियोहमित्याद्यभिमानस्यकर्मानुष्ठाननिमित्तस्यनिंदयासर्वमिदमात्मैवेतिप्रत्ययेश्रुतेस्तात्पर्यदर्शना
द्व्यंगत्वेनसंन्यासोविधित्सितइत्याहकर्माधिकारेति॥ननुजाग्रतिविधौकर्मानुष्ठानमशक्यमपहंस्तुंयितुमतआहनहीति॥ननुवर्णाश्रमाभिमानवतः
संन्यासोपीष्यतेसकथंतदभावेसंभवेत्तत्राहयस्यैवेति॥अर्थप्राप्तश्चेत्यवधारणार्थश्चकारःप्रयोजकज्ञानवतोवैधसंन्यासाभ्युपगमादविरोधइतिभावः॥
=१ब्राह्मणःपरिव्रजेदितिश्रुत्वाब्राह्मणोहमितिप्रयोजकज्ञानवान्विधितःप्रव्रजेद्गलिताभिमानस्त्वर्थान्नविधितः। १   हौरै२

=७किंतेनामृतास्यां

आत्मज्ञानांगत्वंसंन्यासस्यश्रुतिस्मृतिन्यायसिद्धंचेत्किमर्थमियमाख्यायिकाप्रणीयतेतत्राहतस्मादिति॥विद्यापेक्षितार्थवादसिद्ध्यर्थमाख्यायिकेति
भावः॥भार्यामामंत्र्यकिंकृतवानितितदाहोद्यास्यन्निति॥वैशब्दोवधारणार्थः॥आश्रमांतरंयास्यन्नेवाहमस्मीतिसंबंधः॥यथोक्तेकृानंतरंभार्यायाः

तस्मादात्मज्ञानांगत्वेनसंन्यासविधित्सयैवाख्यायिकेयमारभ्यते॥मैत्रेयीतिहोवाचयाज्ञवल्क्यः मैत्रेयींस्वभार्यामामंत्रितवान् याज्ञव
ल्क्योनामऋषिः॥उद्यास्यन्नूर्द्धंयास्यन्पारिव्राज्याख्यमाश्रमांतरंवैअरेइतिसंबोधनमहमस्मात्स्थानादाश्रमादूर्ध्वंगंतुमिच्छन्न
स्मिभवामिअतोहंतेतामनुमतिंप्रार्थयामितेतव॥किंचान्यत्तेतवानयाद्वितीययाभार्ययाकात्यायन्याअंतंविच्छेदंकरवाणिपतिद्वारेणयुव

मैत्रेयीतिहोवाचयाज्ञवल्क्यउद्यास्यन्वाअरेहमस्मात्स्थानादस्मिहंततेनयाकात्यायन्यांतंकरवाणीति॥१॥साहोवाचमैत्रेयी
यन्नुमइयंभगोःसर्वापृथिवीवित्तेनपूर्णास्यात्कथंतेनामृतास्यामितिनेतिहोवाचयाज्ञवल्क्योयथैवोपकरणवतांजीवितं
तथैवतेजीवितंस्यादमृतत्वस्यतुनाशास्तिवित्तेनेति॥२॥ योर्मयासंबध्यमानयोः यः संबंधआसीत्तस्यसंबंधस्यविच्छेदंकरवा
णिद्रव्यविभागंकृत्वावित्तेनसंविभज्ययुवांगमिष्यामि॥१॥सैवमुक्ताहउवाच॥यद्यदिनुइतिवितर्केमेममइयंपृथिवीभगोभगवन्सर्वासाग
रपरिक्षिप्तावित्तेनधनेनपूर्णास्यात्कथंकथंचनेतिआक्षेपार्थः कर्तव्यंदर्शयत्यतइति॥सतिभार्याद्वैसन्यासस्यतदनुज्ञापूर्वकत्वनियमादितिभावः॥क
र्तव्यांतरंकथयतिकिंचेति॥आवयोर्विच्छेदःस्वाभाविकोस्तिकिंतत्रकर्त्तव्यमित्याशंक्याहपतिद्वारेणेति॥त्वयिप्रव्रजितेस्वयमेवावयोर्विच्छेदोभविष्यतीत्याशं
क्याहद्रव्येति॥वित्तेतुनस्त्रीस्वातंत्र्यमितिभावः॥मैत्रेयीमोक्षमेवापेक्ष्यमाणाभर्त्तारंप्रत्यानुकूल्यमात्मनोदर्शयतिसेवमिति॥कर्मसाध्यस्यगृहप्रासादादिवन्नित्यत्वानु

=१ ननु कथंशब्देन किंशब्देन किंशब्दादानं किमर्थं क्रियते यतः प्रकारार्थत्वमपि तत्र संभवति तत्राह वित्तेति

कथं तेनेत्यत्र कथंशब्देन किमहं तेनेत्यत्रस्थं किंशब्दमुपादाय वाक्यं योजनीयं॥ वित्तसाध्यस्य कर्मणोऽमृतत्वसाधनत्वमात्रासिद्धौ तत्प्रकारप्रश्नस्य निरवका
शत्वादित्यर्थः॥ मुनिरपि भार्याहृदयाभिज्ञः संतुष्टः सन्नाक्षेपं प्रश्नं च प्रतिवदतीत्याह प्रत्युवाचेति॥ वित्तेन ममामृतत्वाभावे तदर्किंचित्करमवसेयमित्याशंक्या

प्रश्नार्थो वा तेन पृथिवी पूर्णवित्तसाध्येन कर्मणाऽग्निहोत्रादिनाऽमृता किं स्यामिति व्यवहितेन संबंधः॥ प्रत्युवाच याज्ञवल्क्यः कथमिति यदि
आक्षेपार्थमनुमोदनं नेति होवाच याज्ञवल्क्य इति प्रश्नश्चेत्प्रतिवचनार्थं नैव स्याः अमृता किं तर्हि यथैव लोके उपकरणवतां साधनवतां जीवि
तं सुखोपायभोगसंपन्नं तथैव तद्वदेव तव जीवितं स्यादमृतत्वस्य तु नाशा मनसाप्यस्ति वित्तेन वित्तसाध्येन कर्मणेति॥२॥ साहोवाच मैत्रेयी एव

साहोवाच मैत्रेयी येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भगवान्वेद तदेव मे ब्रूहीति॥३॥ स होवाच याज्ञवल्क्यः प्रिया बतारे
नः सती प्रियं भाषस एह्यास्स्व व्याख्यास्यामि ते व्याचक्षाणस्य तु मे निदिध्यासस्वेति॥४॥ मुक्ता सत्युवाच मैत्रेयी यद्येवं नाहं येनामृता स्यां
किमहं तेन वित्तेन वित्तसाध्येन कर्मणा कुर्यां यदेव भगवान्केवलममृतत्वसाधनं वेद तदेवामृतत्वसाधनं मे मह्यं ब्रूहि॥३॥ स होवाच याज्ञवल्क्यः एवं
वित्तसाध्येऽमृतत्वसाधने प्रत्याख्याते याज्ञवल्क्यः स्वाभिप्रायसंपत्तौ तुष्ट आह स होवाच प्रिये इष्टा बत ते त्वमनुकंप्याह अरे मैत्रेयि नोऽस्माकं पूर्वम
पि प्रिया सती भवती इदानीं प्रियमेव चित्तानुकूलं भाषसेऽतः एह्यास्स्व उपविश व्याख्यास्यामि यत्ते तवेष्टममृतत्वसाधनमात्मज्ञानं कथयिष्यामि
व्याचक्षाणस्य तु मे मम व्याख्यानं कुर्वतो निदिध्यासस्व वाक्यान्यर्थतो निश्चयेन ध्यातुमिच्छेति॥४॥ हृ किं तर्हीति॥२॥ वित्तस्यामृतत्वसाधनत्वाभावमधि
गम्य तस्मिन्नाशां त्यक्त्वा मुक्तिसाधनमेवात्मज्ञानमात्मार्थं दातुं पतिं नियुंजाना ब्रूते साहेति॥३॥ भार्या पेक्षितं मोक्षोपायं विवक्षुस्तामादौ स्तौति स होवाचेत्यादिना॥

वित्तेन साध्यं कर्म तस्मिन्नमृतत्वसाधने शंकिते किमहं तेन कुर्यामिति भार्ययापि प्रत्याख्याते सतीति यावत्॥ स्वाभिप्रायो न कर्म मुक्तिहेतुरिति तस्य
भार्याद्वारापि संपत्तौ सत्यामित्यर्थः॥४॥ अमृतत्वसाधनमात्मज्ञानं विवक्षितं चेदात्मा वा अरे द्रष्टव्य इत्यादि वक्तव्यं किमिति न वा अरे पत्युरित्यादिवाक्य

सहोवाचामृतत्वसाधनं वैराग्यमुपदिदिक्षुः जायापतिपुत्रादिभ्यो विरागमुत्पादयति तत्संन्यासाय न वै वै शब्दः प्रसिद्धस्मरणार्थः प्रसिद्धमे
तल्लोके पत्युर्भर्तुः कामाय प्रयोजनाय जायायाः पतिः प्रियो न भवति किं तर्ह्यात्मनस्तु कामाय प्रयोजनायैव भार्यायाः पतिः प्रियो भवति तथा

सहोवाच न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति न वा अरे जायायै कामाय जाया प्रिया भ
वत्यात्मनस्तु कामाय जाया प्रिया भवति न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवंत्यात्मनस्तु कामाय पुत्राः प्रिया भवंति न वा
अरे वित्तस्य कामाय वित्तं प्रियं भवत्यात्मनस्तु कामाय वित्तं प्रियं भवति न वा अरे ब्रह्मणः कामाय ब्रह्म प्रियं भवत्यात्मनस्तु का
माय ब्रह्म प्रियं भवति न वा अरे क्षत्रस्य कामाय क्षत्रं प्रियं भवत्यात्मनस्तु कामाय क्षत्रं प्रियं भवति न वा अरे लोकानां कामाय लोकाः

न वा अरे जायायै इत्यादि समानमन्यन्न वा अरे पुत्राणां न वा अरे वित्तस्य न वा अरे ब्रह्मणः न वा अरे क्षत्रस्य न वा अरे लोकानां न वा अरे देवानां न वा
अरे भूतानां न वा अरे सर्वस्य पूर्वं पूर्वं यथासन्ने प्रीतिसाधने वचनं तन्न तत्रेष्टतरत्वाद्वैराग्यस्य ॥ मित्याशंक्याह॥ जायेति॥ उवाच जायादीनामात्मार्थ
त्वेन प्रियत्वमात्मनस्त्वानौपाधिकप्रियत्वेन परमानंदत्वमिति शेषः॥ प्रतीकमादाय व्याचष्टे॥ न वा इति॥ किं तन्निपातेन स्मार्यते तदाह॥ प्रसिद्धमिति॥ यथोक्ते
क्रमे नियामकमाह॥ पूर्वं पूर्वमिति॥ यद्यदासन्नं प्रीतिसाधनं तत्तदनतिक्रम्य तस्मिन्विषये पूर्वं पूर्वं वचनमिति योजना॥ तत्र हेतुमाह॥ तत्रेति ॥
निकटेत्यादौ ३

नवाअरेसर्वस्येत्ययुक्तंपत्न्यादीनामुक्तत्वादंशेनपुनरुक्तिप्रसंगादित्याशंक्याह॥सर्वग्रहणमिति॥उक्तवदनुक्तानामपिग्रहणंकर्तव्यंनचसर्वैर्विशेषतोग्रही
तुंशक्यंतेतेनसामान्यार्थंसर्वपदमित्यर्थः॥सर्वपर्यायेषुसिद्धमर्थमुपसंहरति॥तस्मादिति॥ननुतृतीयेप्रियत्वमात्मनआख्यातंतदेवात्रापिकथ्यतेचेत्सनरु

सर्वग्रहणमुक्तानुक्तार्थंतस्माल्लोकप्रसिद्धमेतदात्मैवप्रियोनान्यत्तदेतत्प्रेयःपुत्रादित्युपन्यस्तंतस्यैतद्वृत्तिस्थानीयंप्रपंचितंतस्मादात्मप्रीति
साधनत्वाद्गौण्यन्यत्रप्रीतिरात्मन्येवमुख्यातस्मादात्मावाअरेद्रष्टव्योदर्शनार्हःदर्शनविषयमापादयितव्यःश्रोतव्यःपूर्वमाचार्यतःआग

प्रियाभवंत्यात्मनस्तुकामायलोकाःप्रियाभवंतिनवाअरेदेवानांकामायदेवाःप्रियाभवंत्यात्मनस्तुकामायदेवाःप्रियाभ
वंतिनवाअरेभूतानांकामायभूतानिप्रियाणिभवंत्यात्मनस्तुकामायभूतानिप्रियाणिभवंतिनवाअरेसर्वस्यकामायसर्वं
प्रियंभव त्यात्मनस्तुकामायसर्वंप्रियंभवत्यात्मावाअरेद्रष्टव्यःश्रोतव्योमंतव्योनिदिध्यासितव्योमैत्रेय्या मतश्चपश्चान्मं

तव्यःतर्कतस्ततोनिदिध्यासितव्योनिश्चयेनध्यातव्यः॥एवंह्यसौदृष्टोभवतिश्रवणमनननिदिध्यासनसाधनैर्निर्वर्तितैः॥यदेकत्व
मेतान्युपगतानितदासम्यग्दर्शनंब्रह्मैकत्वविषयंप्रसीदतिनान्यथाश्रवणमात्रेणयद्ब्रह्म क्तिःस्यात्तत्राह॥तदेतदिति॥अथोपन्यासविवर
णाभ्यांप्रीतिरात्मन्येवेत्ययुक्तंपुत्रादावपितद्दर्शनादतआहतस्मादिति॥आत्मनोनिरतिशयप्रीत्यास्पदत्वेनपरमानंदत्वमभिधायोत्तरंवाक्यमादायव्या
चष्टे॥तस्मादित्यादिना॥कथंपुनरिदंदर्शनमुत्पद्यतेतत्राहश्रोतव्यइति॥श्रवणादीनामन्यतमेनात्मज्ञानलाभात्किमितिसर्वेषामध्ययनमित्याशंक्याह॥ए
वंहीति॥विध्यनुसारित्वमेवंशब्दार्थः॥श्रुतत्वाविशेषाद्विकल्पहेत्वभावाच्चसर्वैरेवात्मज्ञानंजायतेचेत्तेषांसमप्रधानत्वमाग्नेयादिवदापत्तेदित्याशंक्याह॥यदेति॥

१ यथाब्राह्मणपाठादादावग्नीषोमीयानुष्ठानंमंत्रपाठादादावाग्नेयानुष्ठानंततःसमप्रधानत्वं

प्रज्ञामांद्यकुतर्कसंशयादयः=२

श्रवणस्यप्रमाणविचारत्वेनप्रधानत्वादंगित्वंमनननिदिध्यासनयोस्तुतत्कार्यप्रतिबंधप्रध्वंसित्वादंगत्वमित्यङ्गाङ्गिभावेनयदाश्रवणादीन्यसकृदनुष्ठाने नसमुच्चितानितदासामग्रीपौष्कल्यात्तत्त्वज्ञानंफलशिरस्कंसिध्यतिमननाद्यभावेश्रवणमात्रेणनैवतदुपपद्यतेमननादिनाप्रतिबंधाप्रध्वंसित्वात्कस्यफलव त्वानजनकत्वायोगादित्यर्थः॥परामर्शवाक्यस्यतात्पर्यमाह॥यदित्यादिना॥कर्मनिमित्तंब्रह्मक्षत्रादितदेववर्णाश्रमावस्थादिरूपमात्मन्यविद्ययारोपित

क्षत्रादिकर्मनिमित्तंवर्णाश्रमादिलक्षणंआत्मन्यविद्ययाध्यारोपेणप्रत्ययविषयंक्रियाकारकफलात्मकमविद्याप्रत्ययविषयंरज्ज्वामिवसर्प प्रत्ययस्तदुपमर्दनार्थमाह॥आत्मनोवाअरेमैत्रेयिदर्शनेनश्रवणेनमत्याविज्ञानेनइदंसर्वंविदितंभवति॥३५॥ननुकथमन्यस्मिन्विदितेऽ न्यद्विदितंभवतिनैषदोषःनह्यात्मव्यतिरेकेणान्यत्किंचिदस्तियद्यस्तिनतद्विदितंस्यान्नत्वन्यदस्त्यात्मैवतुसर्वंतस्मात्सर्वमात्मनिविदितेवि

आत्मनोवाअरेदर्शनेनश्रवणेनमत्याविज्ञानेनेदꣳसर्वंविदितं॥३५॥

दितंस्यात्कथंपुनरात्मैवसर्वमित्येतच्छ्रावयतिब्रह्मतंपरादाद्ब्रह्मब्राह्मणजातिस्तंपुरुषंपरादात्परादध्यात्पराकुर्यात्कंयोन्यत्रात्मनःआ त्मस्वरूपव्यतिरेकेणात्मैवनभवतीयंब्राह्मणजातिरितितांयोवेदतंपरादध्यात्साब्राह्मणजातिरनात्मस्वरूपेणमांपश्यतीति स्यप्रत्ययोमि थ्याज्ञानंतस्यविषयतयास्थितंक्रियाद्यात्मकंतदुपमर्दनार्थमाहेतिसंबंधः॥अविद्याध्यारोपितप्रत्ययविषयमित्येतद्व्याकरोति॥अविद्येतिअवि द्याजनितप्रत्ययविषयत्वेदृष्टांतमाह॥रज्ज्वामिति॥आत्मनिविदितेसर्वंविदितमित्युक्तमाक्षिपति॥नन्विति॥दृष्टविरोधंनिराचष्टे॥नैषदोषइति॥आ त्मनिज्ञातेज्ञानमेवसर्वंततोर्थांतरस्याभावादित्युक्तमेवस्फुटयति॥यदीत्यादिना॥आकांक्षापूर्वकमुत्तरवाक्यमुदाहृत्यव्याचष्टे॥कथमित्यादिना॥पुरुषंवि

कैवल्यासंबंधिनंकुर्यात्=५

पराकरणे पुरुषस्यापराधित्वं दर्शयति॥ अनात्मेति॥ परमात्मातिरेकेण दृश्यमानामपि ब्राह्मणजातिं स्वस्वरूपेण पश्यन्कथमपराधी स्यादित्याशंक्याह ॥ परमात्मेति॥ इदं ब्रह्मेत्युत्तरवाक्यानुवादस्तस्य व्याख्यानं॥ यान्यनुक्रांतानीत्यादि आत्मैव सर्वमित्येतत्प्रतिपादयति॥ यस्मादित्यादिना॥ स्थितिकाले तिष्ठति तस्मादात्मैव सर्वं तद्व्यतिरेकेणाग्रहणादिति योजना॥ ३६॥ स्थित्यवस्थायां सर्वस्यात्ममात्रत्वं ज्ञातुमशक्यं ज्ञापकाभावादित्याक्षिपति॥ कथं

परमात्मा हि सर्वेषामात्मा तथा क्षत्रं क्षत्रियजातिस्तथा लोका देवा भूतानि सर्वमिदं ब्रह्मेति यावंत्यत्र प्रक्रांतानि यान्यनुक्रांतानि तानि सर्वाण्यात्मैव यदयमात्मा योयमात्मा द्रष्टव्यः श्रोतव्य इति प्रकृतो यस्मादात्मनो जायते आत्मन्येव लीयते आत्ममयं च स्थितिकाले आत्मव्यतिरेकेणाग्रहणादात्मैव सर्वं॥ ३६॥ कथं पुनरिदानीमिदं सर्वमात्मैवेति गृहीतुं शक्यते चिन्मात्रानुगमात्सर्वत्र चित्स्वरूपतैवेति गम्यते तत्र

ब्रह्म तं परादाद्योन्यत्रात्मनो ब्रह्म वेद क्षत्रं तं परादाद्योन्यत्रात्मनः क्षत्रं वेद लोकास्तं परादुर्योन्यत्रात्मनो लोकान्वेद देवास्तं परादुर्योन्यत्रात्मनो देवान्वेद भूतानि तं परादुर्योन्यत्रात्मनो भूतानि वेद सर्वं तं परादाद्योन्यत्रात्मनः सर्वं वेदेदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमानि भूतानीदꣳ सर्वं यदयमात्मा॥ ३६॥

दृष्टांत उच्यते यत्स्वरूपव्यतिरेकेण अग्रहणं यस्य तस्य तदात्मत्वमेव लोके दृष्टं स यथा स इति दृष्टांतो लोके यथा दुंदुभेर्भेर्या देहन्यमानस्य ताड्यमानस्य दंडादिना न बाह्यांछब्दान्बहिर्भूतान्छब्दविशेषान्दुंदुभिशब्दसामान्यान्निष्कृष्टान्दुंदुभिशब्दविशेषान्न शक्नुयाद्ग्रहणाय ग्रहीतुं

पुनरिति॥ घटः स्फुरतीत्यादिप्रत्ययमाश्रित्य परिहरति॥ चिन्मात्रेति॥ स यथा दुंदुभेरित्यादिवाक्यमवतारयति॥ तत्रेति॥ सर्वत्र चिद्व्यतिरेकेणासत्त्वं सप्तम्यर्थः॥ दृष्टांते विवक्षितं संक्षिपति॥ यत्स्वरूपेति॥ दुंदुभिर्दृष्टांतमादायाक्षराणि व्याचष्टे॥

उच्चनीचान् २

॥ बृहदारण्यक॥

वृ.र.
५८

१=वितस्तित्रयदीर्घाताम्रनिर्मिताचर्मछिन्नचतुर्विंशत्यंगुलवदनहयाभेरीवर्तुलचर्मवद्धैकाननादुंदुभिरितिभेदः

शब्दविशेषानेवविशदयति॥दुंदुभीति॥कथंतर्हिदुंदुभिशब्दविशेषाणांग्रहणंतदाह॥दुंदुभेस्त्विति॥दुंदुभिशब्दसामान्यस्येतियावत्॥उक्तेर्थेदुंदुभ्या
घातस्येत्यादिवाक्यमुत्थाप्यव्याचष्टे॥दुंदुभ्याघातस्येति॥वाशब्दार्थमाहतद्गताविशेषाइति॥उक्तमर्थंव्यतिरेकमुखेनविशदयति॥नत्विति॥विवक्षितं
दार्ष्टांतिकमाचष्टे॥तथेति॥तत्रैववस्तुविशेषग्रहणसंभावनामभिप्रेत्यस्वप्नजागरितयोरित्युक्तं॥३७॥तथादुंदुभिदृष्टांतवदितियावत्॥शंखस्यतुग्रहणे

अ.
४

दुंदुभेस्तुग्रहणेनदुंदुभिशब्दसामान्यस्यविशेषणत्वेनदुंदुभिशब्दाएतइतिशब्दविशेषागृहीताभवंतिदुंदुभिशब्दसामान्यव्यतिरेकेणा
भावात्तेषांदुंदुभ्याघातस्यवादुंदुभेराहननमाघातःदुंदुभ्याघातविशिष्टस्यशब्दसामान्यस्यग्रहणेनतद्गताविशेषाःगृहीताभवंति
नतुतस्यैवनिर्भिद्यग्रहीतुंशक्यंतेविशेषरूपेणाभावात्तेषांतथाप्रज्ञानव्यतिरेकेणस्वप्नजागरितयोर्नकश्चिद्वस्तुविशेषोगृह्यतेतस्मा

सयथादुंदुभेर्हन्यमानस्यनबाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणायदुंदुभेस्तुग्रहणेनदुंदुभ्याघातस्यवाशब्दोगृहीतः॥३७॥सय
याशंखस्यध्मायमानस्यनबाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणायशंखस्यतुग्रहणेनशंखध्मस्यवाशब्दोगृहीतः॥३८॥

त्प्रज्ञानव्यतिरेकेणाभावोयुक्तस्तेषां॥३७॥तथासयथाशंखस्यध्मायमानस्यशब्देनसंयोज्यमानस्यापूर्यमाणस्यनबाह्यांछब्दांछक्नुया
दित्येवमादिपूर्ववत्तथावीणायैवीणायाःवाद्यमानायाअनेकदृष्टांतोपादानमिहसामान्यबहुत्वख्यापनार्थंअनेकेहि

नेत्यादिवाक्यमादिशब्दार्थः॥ दुंदुभेस्तुग्रहणेनेत्यादिवाक्यंदृष्टांतयति॥ पूर्ववदिति॥ ३८॥ तथेतिदृष्टांतद्वयपरामर्शी॥एकेनैवदृष्टांतेनविवक्षिता
र्थसिद्धौकिमित्यनेकदृष्टांतोपादानमित्याशंक्याह॥अनेकेति॥इहेतिजगदुच्यतेश्रुतिर्वा॥सामान्यबहुत्वमेवस्फुटयति॥अनेकेहीति ॥

रामः
४८

तेषांस्वस्वसामान्येंतर्भावेपिकुतोब्रह्मणिपर्यवसानमित्याशंक्याह॥तेषामिति॥कथमित्यस्मात्पूर्वंतथेत्यध्याहारःइतिमन्यतेश्रुतिरितिशेषः॥विमतंतत्सा
मान्यातिरेकितदतिरेकेणागृह्यमाणत्वाद्यद्यदतिरेकेणागृह्यमाणंतत्तदतिरेकिनभवतियथादुंदुभ्यादिशब्दास्तत्सामान्यातिरेकेणागृह्यमाणास्तदतिरेके

विलक्षणाश्चेतनाचेतनरूपाःसामान्यविशेषास्तेषांपारंपर्येणगत्यायथैकस्मिन्महासामान्येंतर्भावःप्रज्ञानघनेकथंनामप्रदर्शयितव्य
इतिदुंदुभिशंखवीणाशब्दसामान्यविशेषाणांयथाशब्दत्वेअंतर्भावःएवंस्थितिकालेतावत्सामान्यविशेषाव्यतिरेकाद्ब्रह्मैकत्वंशक्य
मवगंतुं॥३९॥एवमुत्पत्तिकालेप्रागुत्पत्तेर्ब्रह्मैवेतिशक्यमवगंतुं॥यथाग्नेर्विस्फुलिंगधूमांगारार्चिषांप्राग्विभागादग्निरेवेतिभवत्यग्नि

सयथावीणायैवाद्यमानायैनबाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणायवीणायैतुग्रहणेनवीणावादस्यवाशब्दोगृहीतः॥३९॥

कत्वमेवंजगन्नामरूपविकृतंप्रागुत्पत्तेःप्रज्ञानघनएवेतियुक्तंगृहीतुमित्येतदुच्यतेसयथार्द्रैधाग्नेःआर्द्रैरेधोभिरिद्धोग्निरार्द्रैधा
ग्निःतस्माद्भ्याहितात्पृथग्धूमाःपृथग्नानाप्रकारंधूमग्रहणंविस्फुलिंगादिप्रदर्शनार्थंधूमविस्फुलिंगादयोविनिर्गच्छंतिएवंयथा
यंदृष्टांतःअरेमैत्रेयिअस्यपरमात्मनःप्रकृतस्यमहतोभूतस्यनिश्वसितमेतन्निश्वसितमिवनिश्वसितंयथाऽप्रयत्नेनैवपुरुषनिश्वासो
भवत्येवंवाअरेकिंत

णनसंतीत्यनुमानंविवक्षन्नाह॥दुंदुभीति॥शब्दत्वेंतर्भावस्तथाप्रज्ञानघनेसर्वंजगदंतर्भवतीतिशेषः॥दृष्टांतत्रयमवष्टभ्यनि
ष्टंकितमर्थमुपसंहरतिएवमिति॥३९॥सयथार्द्रैध्याग्नेरित्यादिवाक्यस्यतात्पर्यमाह॥एवमित्यादिना॥स्थितिकालवदित्येवंशब्दार्थः॥तत्रवाक्यमवतार्यव्या
चष्टे॥इत्येतदिति॥महतोनवछिन्नस्यभूतस्यपरमार्थस्येतियावत्॥निश्वसितमिवेत्युक्तंव्यनक्ति॥यथेति॥अरेमैत्रेयितत्तोजातमितिसंबंधःतदेवाकांक्षापूर्वं

स्थापिताल्=५

निर्गताःटंकाःदोषाःयस्मात् २

बृ॰विप्रा॰य॥कि॰ता॰टि॰॥

इतिहासइतिब्राह्मणमेवेतिसंबंधः॥संवादादिरित्यादिपदेनप्राणसंवादादिग्रहणंअसद्वाइदमग्रआसीदित्यादीत्यत्रादिशब्देनासदेवेदमग्रआसीदित्यादिगृह्यते॥देवजनविद्यानृत्यगीतादिशास्त्रंवेदःसोयंवेदाद्बहिर्नभवतीत्यर्थःइत्याद्याविद्येतिसंबंधःआदिशब्दःशिल्पशास्त्रसंग्रहार्थः॥प्रियमित्येतदुपासीतेत्याद्याइत्यत्रादिशब्दःसत्यस्यसत्यमित्युपनिषत्संग्रहार्थः॥तदेतेश्लोकाइत्यादयइत्यत्रादिशब्देनतदप्येषश्लोकोभवतिअसन्नेवसभवती

न्निश्वसितमिवततोजातमित्युच्यतेयदृग्वेदोयजुर्वेदःसामवेदोथर्वांगिरसश्चतुर्विधंमंत्रजातमितिहासइत्युर्वशीपुरूरवसोःसंवादादिःउर्वशीहाप्सराइत्यादिब्राह्मणमेवपुराणमसद्वाइदमग्रआसीदित्यादिविद्यादेवजनविद्यावेदःसोयमित्याद्याउपनिषदःप्रियमित्येतदुपासीतेत्याद्याःश्लोकाःब्राह्मणप्रभवामंत्रास्तदेतेश्लोकाइत्यादयःसूत्राणिवस्तुसंग्रहवाक्यानिवेदयथात्मेत्येवोपासीतेत्यादीनिअनु

सयथार्द्रैधाग्नेरभ्याहितात्पृथक्धूमाविनिश्चरंत्येवंवाअरेस्यमहतोभूतस्यनिश्वसितमेवैतद्यदृग्वेदोयजुर्वेदःसामवेदोथर्वांगिरसइतिहासःपुराणंविद्याउपनिषदःश्लोकाःसूत्राण्यनुव्याख्यानानिव्याख्याना

व्याख्यानानिमंत्रविवरणानिव्याख्यानान्यर्थवादाः॥अथवावस्तुसंग्रहवाक्यविवरणान्यनुव्याख्यानानियथाचतुर्थाध्यायेआत्मेत्येवोपासीतेत्यस्ययथावान्योसावन्योहमस्मीतिनसवेदयथापशुरेवमित्यस्यायमेवाध्यायशेषःमंत्रविवरणानिव्याख्यानानिएवमष्टविधं

त्यादिगृह्यते॥इत्यादीनीत्यादिपदमथयोन्यांदेवतामुपास्तेब्रह्मविदाप्नोतिपरमित्यादिगृहीतुं॥अर्थवादेषुव्याख्यानपदप्रवृत्तौहेत्वभावंशंकित्वापक्षांतरमाह॥अथवेति॥इतिहासादिशब्दव्याख्यानमुपसंहरति॥एवमिति॥ब्राह्मणमितिहासादिपदवेदनीयमितिशेषः॥ऋगादिशब्दानामितिहासादिशब्दानांचप्रसिद्धार्थत्यागेकोहेतुरित्याशंक्य

तृतीयाध्यायशेषः३ सैषान्नब्राह्मणंयथा३

प्रमाणांतरापेक्षत्वाद्धेतोर्वेदस्य प्रामाण्यं तच्च पौरुषेयत्वात्प्रमाणांतरानपेक्षस्य हेतोरभावान्नेति चेन्नेत्याह बुद्धीति ४ ३ तर्हि अभिव्यक्तमेव कृतकत्वं तस्मादप्रामाण्यमिति चेत्तत्राह प्रत्यक्षा
निश्वसितश्रुतिरितिहासादिशब्दानां प्रसिद्धार्थत्यागे हेतुः परिशेषस्त्वन्यत्रेत्यभिप्रेत्याह॥ एवं मंत्रेति॥ ननु प्रथमे कांडे वेदस्य नित्यत्वेन प्रामाण्यं
स्थापितं तदनित्यत्वे तद्धानिरित्यत आह॥ नियतेति॥ नियतेत्यादौ वेदो विशेष्यते॥ कल्पांते तं तर्हि तान्वेदानित्यादिवाक्यान्नियतरचनावत्त्वं वे
दस्य गम्यते॥ अनादिनिधना नित्यादेश्च सदातनत्वं तस्य निश्चीयते॥ न च कृतकत्वादप्रामाण्यं प्रत्यक्षादौ व्यभिचारान्न च पौरुषेयत्वादनपेक्षत्वहेत्व
भावादप्रामाण्यं बुद्धिपूर्वप्रणीतत्वाभावेन तत्सिद्धेर्न चोन्मत्तवाक्यसादृश्यमबाधितार्थत्वादिति भावः॥ सिद्धे वेदस्य प्रामाण्ये फलितमाह॥ तस्मादि
अनपेक्षत्वसिद्धेः १

ब्राह्मणमेवं मंत्रब्राह्मणयोरेव ग्रहणं॥ नियतरचनावतो विद्यमानस्यैव वेदस्याभिव्यक्तिः पुरुषनिश्वासवन्न च पुरुष
बुद्धिप्रयत्नपूर्वकः अतः प्रमाणनिरपेक्ष एव स्वार्थे तस्माद्यत्तेनोक्तं तत्तथैव प्रतिपत्तव्यमात्मनः श्रेयइच्छद्भिः ज्ञानं वा कर्म वेति॥ नाम

न्यस्यैवैतानि निश्वसितानि॥ ४०॥

प्रकाशवशाहि रूपस्य निष्क्रियाव्यवस्था नामरूपयोरेव हि परमात्मोपाधिभूतयोर्व्याक्रियमाणयोः सलिलफेनवत्तत्वान्यत्वेनानिर्व
क्तव्ययोः सर्वावस्थयोः संसारत्वमित्यतो नाम्न एव निश्वसितत्वमुक्तं तद्वचनेनैवेतरस्य निश्वसितत्वसिद्धेः ति॥ नामप्रपंचसृष्टिरेवात्रोप
दिशन रूपप्रपंचसृष्टिः साचोपदेष्टव्या सृष्टिपरिपूर्तेरन्यथानुपपत्तेरित्याशंक्याह॥ नामेति॥ यद्यपि नाम तंत्रारूपसृष्टिरिति नामसृष्टिवचनेन रू
पसृष्टिरर्थादुक्ता तथापि सर्वे संसारसृष्टिर्नोक्ता नामरूपयोरेव संसारत्वे प्राक्तत्सृष्टेः संसारो न स्यादित्याशंक्याह॥ नामरूपयोरिति॥ सर्वावस्थ
योर्व्यक्ताव्यक्तावस्थयोरिति यावत्॥ नामप्रपंचस्यैवात्र सर्गोक्तिमुपपादितामुपसंहरति॥ इतीति॥ अतः शब्दार्थं स्फुटयति॥ तद्वचनेनेति ॥

अज्ञानप्रभवा लोका वेदाश्च ज्ञानसंभवाः विदितात्मसतत्त्वस्य नेह नानास्ति किंचनेति स्मृतेः १

निश्वसितश्रुतिं विधांतरेणावतारयति॥ अथवेत्यादिना॥ मिथ्यात्वेपि प्रतिबिंबवत्प्रामाण्यसंभवादुन्मत्तादिवाक्यानां च मिथ्याज्ञानाधीनप्रयत्नजन्यत्वे नामानत्वाहेतुदस्यतदभावाद्विषयाव्यभिचाराच्च नाप्रामाण्यमित्याह॥ तदाशंकेति॥ अन्योग्रंथो बुद्धादिप्रणीतः स्वर्गकामश्चैत्यं वंदेदित्यादिः॥४०॥ स यथा सर्वासामपामित्यादि समनंतरग्रंथमुत्थापयति॥ किंचान्यदिति॥ तदेव व्याकरोति॥ न केवलमिति॥ प्रलयकाले च प्रज्ञानव्यतिरेकेणाभावाज्जगतो ब्रह्मत्व

अथवा सर्वस्य द्वैतजातस्याविद्याविषयत्वमुक्तं ब्रह्मतं परादादिदं सर्वं यदयमात्मेति तेन वेदस्याप्रामाण्यमाशंक्येत तदाशंकानिवृत्त्यर्थमिदमुक्तं पुरुषनिश्वासवदप्रयत्नोत्थितत्वात्प्रमाणं वेदो न यथान्यो ग्रंथ इति॥४०॥ किंच अन्यन्न केवलं स्थित्युत्पत्तिकालयोरेव प्रज्ञानव्यतिरेकेणाभावाज्जगतो ब्रह्मत्वं प्रलयकाले च जलबुद्बुदफेनादीनामिव सलिलव्यतिरेकेणाभाव एवं प्रज्ञानव्यतिरेकेण तत्कार्याणां

स यथा सर्वासामपां समुद्र एकायनमेवं सर्वेषां स्पर्शानां त्वगेकायन

नामरूपकर्मणां तस्मिन्नेव लीयमानानामभावः तस्मादेकमेव ब्रह्म प्रज्ञानघनमेकरसं प्रतिपत्तव्यमित्यत आह प्रलयदर्शनाय दृष्टांतः स इति दृष्टांतो यथा येन प्रकारेण सर्वासां नदीवापीतडागादिगतानामपां समुद्रोब्धिरेकायनमेकगमनमेकप्रलयोऽविभागप्राप्तिरित्य

मिति संबंधः॥ उक्तमर्थं दृष्टांतेन स्पष्टयति॥ जलेति॥ तथापि प्रज्ञानमेकैकमेवं स्यान्न ब्रह्मेत्याशंक्याह॥ तस्मादिति॥ सत्यज्ञानादिवाक्याद्ब्रह्मणस्तन्मात्रत्वादित्यर्थः॥ यथोक्तं ब्रह्म चेत्प्रतिपत्तव्यं किमिति तर्हि स यथेत्यादिवाक्यमित्याशंक्य तत्क्षेपत्वेन प्रलयं दर्शयितुं दृष्टांतवचनमेतदित्याह॥ अत आहेति॥ प्रलीयतेस्मिन्निति प्रलय एकश्चासौ प्रलयश्चेति एकप्रलयः॥ तडागादिगतानामपां कुतः समुद्रे लयो न हि तासां तेन संगतिरित्याशंक्याह॥ अवि

स्पर्शसामान्यस्य ५

अत्रहिसमुद्रशब्देनजलसामान्यमुच्यतेतद्व्यतिरेकेणचजलविशेषाणामभावोविवक्षितः॥तेषांतत्संस्थानमात्रत्वादतश्चासामस्मिन्नविभागस्यप्राप्तिरितिसमुद्रेऽविभागप्राप्तिरित्यर्थः॥पिच्छिलादीनामित्यादिशब्देनानुक्ताःस्पर्शविशेषाःसर्वेगृह्यन्ते॥विषयाणामिंद्रियकार्यत्वाभावात्कुतःस्पर्शानांत्वचिलयःस्यादित्याह॥त्वगिति॥स्पर्शविशेषाणांस्पर्शसामान्यंतर्भावंप्रपंचयति॥तस्मिन्निति॥तथापिसमस्तस्यजगतोब्रह्मव्यतिरेकेणाभावाद्ब्रह्म

यथायंदृष्टांतएवंसर्वेषांस्पर्शानांमृदुकर्कशकठिनपिच्छिलादीनांवायोरात्मभूतानांत्वगेकायनंत्वगितित्वग्विषयंस्पर्शसामान्यमात्रं॥तस्मिन्प्रविष्टाःस्पर्शविशेषाःआपइवसमुद्रंतद्व्यतिरेकेणाभावभूताभवंतितत्स्यैवहितेसंस्थानमात्राआसंस्तथातदपिस्पर्शसामान्यमात्रंत्वक्छब्दवाच्यंमनःसंकल्पेमनोविषयसामान्यमात्रेत्वग्विषयइवस्पर्शविशेषाःप्रविष्टंतद्व्यतिरेकेणाभावभूतंभवत्येवंमनो

मेवं॰सर्वेषां॰रसानांजिव्हैकायनमेवं॰सर्वेषांगंधानांनासिकेएकायन

विषयोपिबुद्धिविषयसामान्यमात्रेप्रविष्टःतद्व्यतिरेकेणाभावभूतोभवतिविज्ञानमात्रमेवभूत्वाप्रज्ञानघनेपरेब्रह्मणिआपइवसमुद्रेप्रलीयतेएवंपरंपराक्रमेणशब्दादौसहग्राहकेणकरणेनप्रलीनेप्रज्ञानघनेउपाध्यभावात्सैंधवघनवत्प्रज्ञानघनमेकरसमनंतरमपारंनिरंतरंब्रह्मव्यवतिष्ठते॥ तमित्येतत्कथंप्रतिज्ञातमित्याशंक्यपरंपरयाब्रह्मणिसर्वविलयंदर्शयितुंक्रममनुक्रामति॥तथेति॥मनसिसतिविषयविषयिभावस्यदर्शनादसतिचादर्शनान्मनःस्पंदितमात्रंविषयजातमितितस्यतद्विषयमात्रेप्रविष्टस्यतदतिरेकेणासत्वमित्यर्थः॥संकल्पविकल्पात्मकमनःस्पंदितंहितस्यसंकल्पात्मकेमनस्यंतर्भावात्तस्यचसंकल्पस्याध्यवसायपारतंत्र्यदर्शनादध्यवसायात्मिकायांचबुद्धौतद्विषयस्यपूर्ववदनुप्रवेशान्मनोविषय

मनोमात्रबुद्धिविषयसामान्येप्रविष्टस्तद्व्यतिरेकेण

सत्वमित्याह॥ एवमिति॥

षैय४

सर्वंजगदुक्तेनन्यायेनबुद्धिमात्रंभूत्वायच्छेद्वाङ्मनसीप्राज्ञइत्यादिःतद्यच्छेच्छांतआत्मनीतिश्रुत्याब्रह्मणिपर्यवस्यतीत्याह॥विज्ञानमात्रमिति॥ननुजगदिदंवि
लीयमानंशक्तिशेषमेवविलीयतेतत्त्वज्ञानादृतेतस्यनिःशेषनाशानाश्रयणात्तथाचकुतोब्रह्मैकरसस्यप्रतिपत्तिरतआह॥एवमिति॥शक्तिशेषत्वेपि
तस्यादुर्निरूपत्वादस्यैकरसस्यधीरविरुद्धेतिभावः एकायनप्रक्रियातात्पर्यमुपसंहरति॥तस्मादिति॥घ्राणविषयसामान्यमित्यादावेकायनमितिसर्वत्रसंबंधः॥क

तस्मादात्मैवैकमद्वयमितिप्रतिपत्तव्यंतथासर्वेषांगंधानांपृथिवीविशेषाणांनासिकेघ्राणविशेषेसामान्यंतथासर्वेषांरसानामपू
विशेषाणांजिव्हेंद्रियविषयसामान्यं॥तथारूपाणांतेजोविशेषाणांचक्षुर्विषयसामान्यंतथाशब्दानांश्रोत्रविषयसामान्यंपूर्ववत्तथा
श्रोत्रादिविषयसामान्यानांमनोविषयसामान्येसंकल्पेमनोविषयसामान्यस्यापिबुद्धिविषयसामान्येविज्ञानमात्रेविज्ञानमात्रंभूत्वाप

मेवं॰सर्वेषां॰रूपाणांचक्षुरेकायनमेवं॰सर्वेषां॰शब्दानां॰श्रोत्रमेकायनमेवं॰सर्वेषां॰संकल्पानांमनएकायनमेव
॰सर्वासांविद्यानां॰हृदयमेकायनमेवं॰सर्वेषांकर्मणां॰हस्तावेकायनमेवं॰सर्वेषामानंदानामुपस्थएकायनमेवं॰स
र्वेषांविसर्गाणांपायुरेकायनमेवं॰सर्वेषामध्वनांपादावेकायनमेवं॰सर्वेषांवेदानांवागेकायनं॥४१॥ रस्मिन्प्रज्ञानघनेप्रलीय

तेतथाकर्मेंद्रियाणांविषयावदनादानगमनविसर्गानंदविशेषास्तेक्रियासामान्येष्वेवप्रविष्टानविभागयोग्याभवंतिसमुद्रइवअपूविशेषा
स्तानिच

थंपुनरत्रप्रतिपर्यायंब्रह्मणिपर्यवसानंतत्राह॥तथेति॥यथासर्वेषुपर्यायेषुब्रह्मणिपर्यवसानंतथोच्यतइतियावत्॥पूर्ववदितित्वग्विषयसामा
न्यवदित्यर्थः॥संकल्पेलयइतिशेषः॥विज्ञानमात्रइत्यत्रापितथैव॥एवंसर्वेषांकर्मणामित्यादेरर्थमाह॥तथाकर्मेंद्रियाणामिति॥क्रियासामान्यानांसत्तात्मसं
लयइतिशेषः१

क्रियाज्ञानशक्त्योश्चिदुपाधिभूतयोश्चिद्भेदाद्भेदमभिप्रेत्य प्राणश्चेत्यादिभाष्यं॥ तत्र तयोरन्योन्याभेदे मानमाह॥ यो वा इति॥ श्रुतिमुखात्करणल
योन प्रतिभाति स्वयं च व्याख्यायते तत्र को हेतुरिति शङ्कते॥ नन्विति॥ श्रुत्या करणलयस्यानुक्तत्वमंगीकरोति॥ बाढमिति॥ इष्टमभिप्रायं प्रकटयति
॥ किंत्विति॥ करणस्य विषयसाजात्यं विवृणोति॥ विषयस्यैवेति॥ किमत्र प्रमाणमित्याशंक्यानुमानं सूचयति॥ प्रदीपवदिति॥ चक्षुस्तैजसं रूपादिवि

सामान्यानि प्राणमात्रं प्राणश्च प्रज्ञानमात्रमेवं यो वै प्राणः सा प्रज्ञा या वै प्रज्ञा स प्राण इति कौषीतकिनोऽधीयंते न नु सर्वत्र विषयस्यैव प्रलयो
भिहितो न तु करणस्य तत्र कोऽभिप्राय इति बाढं किंतु विषयसमानजातीयं करणं मन्यते श्रुतिः न तु जात्यंतरं विषयस्यैव स्वात्मग्राहकत्वेन सं
स्थानांतरं करणं नाम यथा रूपविशेषस्यैव संस्थानं प्रदीपः करणं सर्वरूपप्रकाशने एवं सर्वविषयविशेषाणामेव स्वात्मविषयप्रकाशकत्वेन

स यथा सैंधवखिल्य उदके प्रास्त उदकमेवानुविलीयेत न हास्योद्ग्रहणायेव स्याद्यतो यतस्त्वाददीत लवणमेवैवं वा

संस्थानांतराणि करणानि प्रदीपवत्तस्मान्न करणानां पृथक्प्रलये यत्नः कार्यो विषयसामान्यात्मकत्वाद्धि विषयप्रलयेनैव प्रलयः सिद्धो भवति
करणानामिति॥ ४१॥ तत्रेदं सर्वं यदयमात्मेति प्रतिज्ञातं तत्र हेतुरभिहितः आत्मसामान्यत्वमात्मजत्वमात्मप्रलयत्वं च तस्मादुत्पत्तिस्थितिप्र
लयकालेषु प्रज्ञानव्यतिरेकेणाभावात्प्रज्ञानं ब्रह्मैवात्मैवेदं सर्वमिति प्रतिज्ञातं यत्तत्तर्कतः साधितं मध्ये रूपस्यैव व्यंजकत्वात्तत्प्रतिपन्नवदि
त्यादीन्यनुमानानि शास्त्रप्रकाशिकायामधिगंतव्यानि॥ करणानां विषयसाजात्ये फलितमाह॥ तस्मादिति॥ पृथग्विषयप्रलयादिति शेषः॥ एकायनप्रक्रि
यासमाप्ताविति शब्दः॥ ४१॥ स यथा सैंधवखिल्यादेः संबंधं वक्तुं वृत्तं कीर्तयति॥ तत्रेत्यादिना॥ पूर्वसंदर्भस्तत्रेत्युच्यते॥ प्रतिज्ञातेऽर्थे पूर्वोक्तं हेतुमनूद्य साध्य

सिद्धिफलं दर्शयति॥ तस्मादिति॥

शैकलः५

उक्तहेतोर्यथोक्तं ब्रह्मैवसर्वमिदंजगदितियत्प्रतिज्ञातमिदंसर्वंयदयमात्मेतितत्पूर्वोक्तदृष्टांतप्रबंधरूपतर्कवशात्साधितमितियोजना॥उत्तरवाक्यस्वविषयपरिशेषार्थमुक्तप्रलयेपौराणिकसंमतिमाह॥स्वाभाविकइति॥कार्याणांप्रकृतावाश्रितत्वंस्वाभाविकत्वं॥प्रलयांतरेपितेषांसंमतिंसंगिरते॥

स्वाभाविकोयंप्रलयइतिपौराणिकावदंतियस्तुबुद्धिपूर्वकःप्रलयोब्रह्मविदांब्रह्मविद्यानिमित्तोऽयमात्यंतिकइत्याचक्षतेअविद्यानिरोधद्वारेणयोभवतितदर्थोयंविशेषारंभःतत्रदृष्टांतउपादीयतेसयथेतिसैंधवखिल्यःसिंधोर्विकारःसैंधवःसिंधुशब्देनउदकमभिधीयतेस्यंदनात्सिंधुरुदकंतद्विकारस्तत्रभवोवासैंधवश्चासौखिल्यश्चेतिसैंधवखिल्यःस्वार्थेयप्रत्ययःउदकेसिंधौस्वयोनौप्रास्तःप्रक्षिप्तःउदकमेवविलीयमानमनुविलीयेत॥यत्तद्भौमतेजससंपर्कात्काठिन्यप्राप्तिःखिल्यस्यस्वयोनिसंपर्कादपगच्छतितदुदकस्यविलयनंतदनु

अरइदंमहद्भूत

सैंधवखिल्योविलीयतइत्युच्यतेतदेतदाहउदकमेवानुविलीयेतेतिनहनैवास्यखिल्यस्योद्ग्रहणायउद्धृत्यपूर्ववद्ग्रहणायग्रहीतुंनैवसमर्थःकश्चित्स्यात्तुनिपुणोपिइवशब्दोऽनर्थकःग्रहणायनैवसमर्थःकस्माद्यतोयस्माद्यस्माद्देशात्तदुदकमाददीतगृहीत्वास्वादयेल्लवणास्वादमेवतदुदकंनतुखिल्यभावोयथायंदृष्टांतः॥एवमेवतुअरेमैत्रेयिइदंपरमात्माख्यंमहद्भूतं यत्त्विति ॥ द्वितीयंप्रलयमधिकृत्यानंतरग्रंथमवतारयति॥अविद्येति॥तत्रेत्यात्यंतिकप्रलयोक्तिः॥उदकंविलीयमानमित्ययुक्तंकाठिन्यविलयेपितल्लयादर्शनादित्याशंक्याह॥यत्तदिति॥नहेतिप्रतीकमादायव्याचष्टे॥नैवेति॥अन्वयप्रदर्शनार्थंनैवेतिपुनरुक्तं॥महद्भूतमेकमद्वैतमित्युत्तरत्रसंबंधः॥अस्यार्थस्यसर्वोपनिषत्प्रसिद्धत्वप्रद

मैत्रेयी ४ मैरणधर्मासि ४

इदंमहद्भूतमित्यत्रेदंशब्दार्थंविशदयति॥ यस्मादित्यादिना॥ तदिदंपरमात्माख्यंमहद्भूतमिति पूर्वेणसंबंधः॥ खिल्यभावापत्तिकार्यंकथयति॥ मत्यैत्यादिना॥ कोसौखिल्यभावोभिप्रेतस्तत्राह॥ नामरूपेति॥ कार्यकरणसंघातेतादात्म्याभिमानद्वाराजात्यभिमानोत्रखिल्यभावइत्यर्थः॥ इति शब्देनाभिमानोलक्ष्यते॥ यथोक्तेखिल्यभावेसतिकुतोभूतस्यमहत्वमित्याशंक्याह॥ सखिल्यभावइतिखिल्यभावःस्वशब्दार्थःपरस्यपरिशुद्धत्वार्थ

यस्मान्महतोभूतादविद्यायापरिच्छिन्नासैतीकार्यकरणोपाधिसंबंधात्खिल्यभावमापन्नासिमैर्त्याजन्ममरणाशनायापिपासादिसंसार धर्मवत्यसिनामरूपकार्यात्मिकामुष्यान्वयाहमितिसखिल्यभावस्तवकार्यकरणभूतोपाधिसंपर्कभ्रांतिजनितोमहतिभूतेस्वयोनौमहा समुद्रस्थानीयेपरमात्मन्यजरेऽमरेऽभयेशुद्धेसैंधवघनवदेकरसेप्रज्ञानघनेऽनंतेऽपारेनिरंतरेऽविद्याजनितभ्रांतिभेदवर्जितेप्रवेशितस्तस्मि

मनंतमपारंविज्ञानघनएवै

न्नविशेस्वयोनिग्रस्तेखिल्यभावेऽविद्याकृतेभेदभावेप्रणाशितेइदमेकमद्वैतंमहद्भूतंमहच्चतद्भूतंचमहद्भूतंसर्वमहत्तरत्वादाकाशादिकारण त्वाच्चभूतं॥ त्रिष्वपिकालेषुस्वरूपाव्यभिचारात्सर्वदैवपरिनिष्पन्नमितित्रैकालिकोनिष्ठाप्रत्ययःअथवाभूतशब्दःपरमार्थवाचीमहच्चपारमार्थि कंचेत्यर्थः॥ लौकिकंतु मजरादिविशेषणानि॥ केनरूपेणैकरस्यंतदाह॥ प्रज्ञानेति॥ तस्यापरिच्छिन्नत्वमाह॥ अनंतइति॥ तस्यसापेक्ष त्वंवारयति॥ अपारइति॥ प्रतिभासमानेभेदेकथंयथोक्तंतत्वमित्याशंक्याह॥ अविद्येति॥ भवतुयथोक्तेतत्वेखिल्यभावस्यप्रवेशस्तथापिकिंस्याद तआह॥ तस्मिन्निति॥ महत्वंसाधयति॥ सर्वेति॥ भूतत्वमुपपादयति॥ त्रिष्वपीति॥ महदित्युक्तेपारमार्थिकंचेतिविशेषणंकिमर्थमित्याशंक्याह॥ लौकि

बृ०टी०

जाग्रत्कालीनं परिदृश्यमानं हिमवदादि महद्यद्यपि भवति तथापि स्वप्नमायादिसमत्वान्न तत्परमार्थवस्तु न हि दृश्यं जडं इंद्रजालादेर्विशेष्यते ऽतो लौकिका न्महतो ब्रह्म व्यावर्त्तयितुं विशेषणमित्यर्थः॥ आपेक्षिकं स्यादानंत्यमिति शेषः॥ अवधारणरूपमर्थमेव स्फोरयति॥ नान्यदिति॥ एतेभ्यो भूतेभ्यः समु त्थायेत्यादि समनंतरवाक्यस्य व्यावर्त्यामाशंकामाह॥ यदीदमिति॥ वस्तुतः शुद्धत्वे किं सिध्यति तदाह॥ संसारेति तर्हि तस्मिन्निमित्ताभावान्न तस्य खिल्य

यद्यपि महद्भवति स्वप्नमायाकृतं हिमवदादिपर्वतोपमं न परमार्थवस्तु तो विशिनष्टि इदं तु महच्च तद्भूतं चेति अनंतं नास्यांतो विद्यत इत्यनं तं कदाचिदापेक्षिकं स्यादित्यतो विशिनष्टि अपारमिति विजस्ति र्विज्ञानं विज्ञानं च तद्घनं चेति विज्ञानघनः घनशब्दो जात्यंतरप्रतिषेधार्थो यथा सुवर्णघनो ऽयोघन इति एवशब्दो ऽवधारणार्थो नान्यज्जात्यंतरमंतराले विद्यत इत्यर्थः॥ यदीदमेकमद्वैतं परमार्थतः स्वच्छं संसारदुःखा

तेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति ॥

संस्पृष्टं॥ किंनिमित्तो ऽयं खिल्यभाव आत्मनो जातो मर्त्तः सुखी दुःख्यहं ममेत्येवमादिलक्षणो ऽनेकसंसारधर्मोपद्रुत इत्युच्यते॥ एतेभ्यो भूते भ्यो यान्येतानि कार्यकरणविषयाकारपरिणतानि नामरूपात्मकानि सलिलफेनबुद्बुदोपमानि स्वच्छस्य परमात्मनः सलिलोपमस्य येषां वि षयपर्यंतानां प्रज्ञानघने ब्रह्मणि परमार्थविवेकविज्ञानेन प्रविलापनमुक्तं त्वमिति मत्वाह॥ किंनिमित्त इति॥ खिल्यभावमेव विशिनष्टि॥ जात इति॥

अनेकः संसाररूपो धर्मो ऽशनायापिपासादिस्तेनोपद्रुतो दूषित इति यावत्॥ खिल्यभावे निमित्तं दर्शयन्नुत्तरमाह॥ उच्यत इति॥ एतच्छब्दार्थं व्याकरोति॥ यानी ति॥ स्वच्छस्य परमात्मनः कार्यकरणविषयाकारेण परिणतानीति यावत्॥ तानि व्यवहारसिध्यर्थं विशिनष्टि नामरूपात्मकानीति॥ तेषामतिदुर्बलत्वं सूचयति॥

[illegible]

तेषांप्रत्यस्तत्वेपिप्रकृतत्वाभावेकथमेतच्छब्देनपरामर्शःस्यादित्याशंक्याह॥ येषामिति॥ उक्तमेकायनप्रक्रियायामितिशेषः॥ ब्रह्मणिप्रज्ञानघने भूतानांप्रलयेदृष्टांतमाहनदीति॥ हेतौपंचमीतिदर्शयति हेतुभूतेभ्यइति॥ पूर्वस्मिन्ब्राह्मणेषष्ठ्यंतसत्यशब्दवाच्यतयातेषांप्रकृतत्वमाह॥ सत्येति ॥ यथासैंधवःसन्खिल्यःसिंधोस्तेजःसंबंधमपेक्ष्योद्गच्छतितथाभूतेभ्यःखिल्यभावोभवतीत्याह॥ सैंधवेति॥ समुत्थानमेवविवृणोति॥ यथेत्यादिना॥ ता

नदीसमुद्रवदेतेभ्योहेतुभूतेभ्यःसत्यशब्दवाच्येभ्यःसमुत्थायसैंधवखिल्यवद्यथाद्भ्यःसूर्यचंद्रादिप्रतिबिंबोयथावास्वच्छस्यस्फटिकस्याल क्तकाद्युपाधिभ्योरक्तादिभावःएवंकार्यकरणभूतभूतोपाधिभ्योविशेषात्मखिल्यभावेनसम्यगुत्थाययेभ्योभूतेभ्यउत्थितस्तानियदाकार्यकर णविषयाकारपरिणतानिभूतान्यात्मनोविशेषात्मखिल्यहेतुभूतानिशास्त्राचार्योपदेशेनब्रह्मविद्ययानदीसमुद्रवत्प्रविलापितानिविनश्यं

नप्रेत्यसंज्ञास्तीत्यरेब्रवीमीतिहोवाचयाज्ञवल्क्यः॥४२॥

तिसलिलफेनबुद्बुदादिवत्तेषुविनश्यत्सुअन्वेषविशेषात्मखिल्यभावोविनश्यति॥ यथोदकालक्तकादिहेत्वपनयेसूर्यचंद्रस्फटिकादिप्र तिबिंबोविनश्यतिचंद्रादिस्वरूपमेवपरमार्थतोव्यवतिष्ठतेतद्वत्प्रज्ञानघनमनंतमपारंस्वच्छंव्यवतिष्ठतेनतत्रप्रेत्यविशेषसंज्ञास्तिकार्य करणसंघातेभ्योविमुक्तस्येतिएवमरेमैत्रेयिब्रवीमिनास्ति

न्येवेत्यादिव्याचष्टे॥ येभ्यइति॥ खिल्यहेतुभूतानितत्रहेतुतोपेतानीतियावत॥ ब्रह्म विद्योत्पत्तौहेतुमाह॥ शास्त्रेति॥ तत्फलंसदृष्टांतमाचष्टे॥ नदीति॥ यथासलिलेफेनादयोविनश्यंतितथातेषुभूतेषुविनश्यत्सुसत्स्वनुपश्चात्खिल्यभा वोनश्यतीत्याह॥ सलिलेति॥ किंपुनर्भूतानांखिल्यभावस्यचविनाशेसत्यवशिष्यतेतदाह॥ यथेति॥ तत्रेतिकैवल्योक्तिः॥ उक्तमेववाक्यार्थंस्फुटयति॥

स्थितं४

ब्रह्मविदोऽशरीरस्य विशेषसंज्ञाभावं कैमुतिकन्यायेन कथयति॥ शरीरावस्थितस्येति॥ सुषुप्तस्येति यावत्॥ सर्वतो मुक्तस्येति शेषः॥४२॥१२॥ उक्तं परमार्थदर्शनमेव व्यक्तीकर्तुं चोदयति॥ एवमिति॥ तेन याज्ञवल्क्येनेति यावत्॥ इति वदता विरुद्धधर्मवत्त्वमुक्तमिति शेषः॥ एवं वदनेऽपि कुतो विरुद्धधर्मत्वोक्तिस्त

विशेषसंज्ञेत्यहमसावमुष्य पुत्रो ममेदं क्षेत्रं धनं सुखी दुःखीत्येवमादिलक्षणाऽविद्याकृतत्वात्तस्या अविद्यायाश्च ब्रह्मविद्यया निरन्वयतो नाशितत्वात्कुतो विशेषसंज्ञासंभवो ब्रह्मविदश्चैतन्यस्वभावावस्थितस्य शरीरावस्थस्यापि विशेषसंज्ञा नोपपद्यते किं पुनः कार्यकरणविमुक्तस्य सर्वत इति ह उवाच उक्तवान्किल परमार्थदर्शनं मैत्रेय्यै भार्यायै याज्ञवल्क्यः॥४२॥ एवं प्रतिबोधिता साह किल उवाच उक्तवती मैत्रेयी अत्रैवैतस्मिन्नेवैकस्मिन्वस्तुनि ब्रह्मणि विरुद्धधर्मत्वमाचक्षाणेन भगवता मम मोहः कृतस्तदाह अत्रैव मा भगवा

साहोवाच मैत्रेय्यत्रैव मा भगवानमूमुहन्न प्रेत्य संज्ञास्तीति स होवाच न वा अरेऽहं मोहं ब्रवीम्य

न्मूमुहन्मोहं कृतवान्कथं तेन विरुद्धधर्मवत्त्वमुक्तमित्युच्यते पूर्वं विज्ञानघन एवेति प्रतिज्ञाय पुनर्न प्रेत्य संज्ञास्तीति कथं विज्ञानघन एव कथं वा न प्रेत्य संज्ञास्तीति॥ न ह्युष्णः शीतश्चाग्निरेवैको भवति अतो मूढास्म्यत्र स होवाच याज्ञवल्क्यो न वा अरे मैत्रेय्यहं मोहं ब्रवीमि मोहनं वाक्यं न ब्रवीमीत्यर्थः॥ ननु कथं विरुद्धधर्मत्वमवोचो विज्ञानघनं संज्ञाऽभाववचनं मयेदमेकस्मिन्धर्मिण्यभिहितं त्वयैवेदं

त्राह॥ कथमिति॥ एकस्यैव विज्ञानघनत्वे संज्ञाराहित्ये च कुतो विरोधधीरित्याशंक्याह॥ नहीति॥ विरोधबुद्धिफलमाह॥ अत इति॥ अत्रेत्युक्तविषयपरामर्शार्थः॥ न वा इति प्रतीकं गृहीत्वा व्याकरोति॥ अर इति॥ मोहनं वाक्यं ब्रवीत्येवं भवानिति शंकते॥ नन्विति॥ समाधत्ते॥ न मयेति॥ कथं तर्हि ममैकस्मिन्नेव वस्तुनि वि

त्वयातर्हि किंमुक्तमितितत्राह॥मयात्विति॥खिल्यभावस्यविनाशेप्रत्यगात्मरूपमेवविनश्यतीत्याशंक्याह॥नपुनरिति॥ब्रह्मस्वरूपस्यानाशेविज्ञानघन
स्यकिमायातमित्याशंक्याह॥तदिति॥विज्ञानघनस्यप्रत्यक्त्वंदर्शयति॥आत्मेति॥कथंतर्हितान्येवानुविनश्यतीतितत्राह॥भूतनाशेति॥खिल्यभावस्यावि

विरुद्धधर्मत्वेनएकंवस्तुपरिगृहीतंभ्रांत्यानतुमयोक्तंमयात्विदमुक्तंयःत्वविद्याप्रत्युपस्थापितःकार्यकरणसंबंध्यात्मनःखिल्यभावस्तस्मि
न्विद्ययानाशितेतन्निमित्तायाविशेषसंज्ञाशरीरादिसंबंधिन्यन्यत्वदर्शनलक्षणासाकार्यकरणसंघातोपाधौप्रविलापितेनश्यतिहेतुभावादुद
काद्याधारनाशादिवचंद्रादिप्रतिबिंबस्तन्निमित्तश्चप्रकाशादिः॥नपुनःपरमार्थचंद्रादित्यस्वरूपनाशवदसंसारिब्रह्मस्वरूपस्यविज्ञानघन

त्वंवाअरइदंविज्ञानाय॥४३॥

स्यनाशः तद्धिज्ञानघनइत्युक्तंसआत्मासर्वस्यजगतःपरमार्थतोभूतनाशान्नविनाशीविनाशीत्वविद्याकृतखिल्यभावोवाचारंभणं
विकारोनामधेयमितिश्रुत्यंतरादयंतुपारमार्थिकोऽविनाशीवाअरेयमात्माऽतोलंपर्याप्तंवेअरेइदंमहद्भूतमनंतमपारंयथाव्याख्यातंविज्ञाना
यविज्ञातुंनहिविज्ञातुर्विज्ञातेर्विपरिलोपोविद्यतइतिहिवक्ष्यति॥४३॥कथंतर्हिप्रेत्यसंज्ञानास्तीत्युच्यतेशृणु द्याकृतत्वेप्रमाणमाह॥वाचारंभण
मिति॥खिल्यभाववत्परमात्मनोपिनाशित्वंस्यादितिचेन्नेत्याह॥अयंत्विति॥पारमार्थिकत्वेप्रमाणमाह॥अविनाशीति॥अविनाशित्वफलमाह॥अतइति॥पर्या
प्तंविज्ञातुमितिसंबंधःइदमित्यादिपदानांगतार्थत्वाद्व्याख्येयत्वंसूचयति॥यथेति॥विज्ञानघनएवेत्यत्रवाक्यशेषंप्रमाणयति॥नहीति॥४३॥आत्मनोविज्ञानघ
नत्वंप्रामाणिकंचेत्तर्हिनिषेधवाक्यमयुक्तमितिशंकते॥कथमिति॥अविद्याकृतविशेषविज्ञानाभावाभिप्रायेणनिषेधवाक्योपपत्तिरित्युत्तरमाह॥शृणि

=१ खिल्यसद्दिते द्वै

यस्मिन्नुक्तलक्षणे खिल्यभावे सति यस्माद्यथोक्ते ब्रह्मणि द्वैतमुपलक्ष्यते तस्मात्तस्मिन्सतीतर इतरं जिघ्रतीति संबंधः॥ द्वैतमिवेत्युक्तमनूद्य व्याचष्टे॥ भि
न्नमिवेति॥ इवशब्दस्योपमार्थत्वमुपेत्य शंकते॥ नन्विति द्वैतेनाद्वैतस्योपमीयमानत्वाद्दृष्टांतस्य दार्ष्टांतिकस्य च तस्य वस्तुत्वं स्यादुपमानोपमेययोश्चंद्रमुख
योर्वस्तुत्वोपलंभादित्यर्थः॥ द्वैतप्रपंचस्य मिथ्यात्ववादिश्रुतिविरोधान्न तस्य सत्यतेति परिहरति॥ न वाचारंभणमिति॥ तत्र तस्मिन्खिल्यभावे सतीति याव

यत्र यस्मिन्नविद्याकल्पिते कार्यकरणसंघातोपाधिजनिते विशेषात्मनि खिल्यभावे हि यस्मात् द्वैतमिव परमार्थतोऽद्वैते ब्रह्मणि द्वैतमिव भि
न्नमिव वस्त्वंतरमात्मन उपलक्ष्यते॥ ननु द्वैतेनोपमीयमानत्वात् द्वैतस्य पारमार्थिकत्वमिति न वाचारंभणं विकारो नामधेयमिति श्रुत्यंतरादेक
मेवाद्वितीयमात्मैवेदं सर्वमिति च तत्तत्र यस्माद्द्वैतमिव तस्मादेवेतरोऽसौ परमात्मनः खिल्यभूतः आत्माऽपरमार्थतः चंद्रादेरिवोदके चंद्रादिप्र

यत्र हि द्वैतमिव भवति तदितर इतरं जिघ्रति॥

तिबिंबः इतरो द्रष्टा इतरेण चक्षुरादिकरणेनेतरं द्रष्टव्यं रूपादिकं पश्यति॥ इतर इतरं इति कारकप्रदर्शनार्थं पश्यतीति क्रियाफलयोरभि
धानं यथा छिनत्तीति यथोद्यम्योद्यम्य निपातनं छेद्यस्य च द्वैधीभाव उभयं छिनत्तीत्येकेनैव शब्देनाभिधीयते फलावसानत्वात्क्रियायाः क्रिया

तु॥ स्वप्नादिद्वैतमिव जागरितेपि तत् द्वैतं यस्मादालक्ष्यते तस्मात्परमात्मनः सकाशादितरोसावात्मा खिल्यभूतोऽपरमार्थतः सन्नितरं जिघ्रतीति योजना॥ परस्मा
दितरस्मिन्नात्मनि अपरमार्थे खिल्यभूते दृष्टांतमाह॥ चंद्रादेरिवेति॥ इतरशब्दमनूद्य तस्यार्थमाह॥ इतरो द्रष्टेति॥ अविद्यादशायां सर्वाण्यपि कारकाणि संतिक
र्तृकर्मनिर्देशस्य सर्वकारकोपलक्षणत्वादित्याह॥ इतरेति॥ क्रियाफलयोरेकशब्दत्वे दृष्टांतं विवृणोति॥ यथेति॥ दृष्टांतेपि विप्रतिपत्तिमाशंक्यानंतरोक्तं हेतुमेवस

अतश्चजिघ्रतीत्यत्रापिक्रियाफलयोरेकशब्दत्वमविरुद्धमितिशेषः॥उक्तंवाक्यार्थमनूद्यवाक्यांतरेष्वतिदिशति॥इतरइति॥तथेतरोद्रष्टेतरेणचक्षु
षेतरंद्रष्टव्यंपश्यतीत्यादिद्रष्टव्यमितिशेषः॥उत्तरेष्वपिवाक्येषुपूर्ववाक्यवत्कर्तृकर्मनिर्देशस्यसर्वकारकोपलक्षणत्वंक्रियापदस्यचक्रियातत्फलाभि
धायित्वंतुल्यमित्याह॥सर्वमिति॥यत्रहीत्यादिवाक्यार्थमुपसंहरति॥इयमिति॥यत्रवाअस्येत्यादिवाक्यस्यतात्पर्यमाह॥यत्रत्विति॥उक्तेर्थेवाक्याक्ष

व्यतिरेकेणचतत्फलस्यानुपलंभादितरोघ्रातादितरेणघ्राणेनेतरंघ्रातव्यंजिघ्रतितथासर्वंपूर्ववद्धिजानातीयमविद्यावदवस्थायत्रतुब्रह्म
विद्ययाऽविद्यानाशमुपगमितातत्रात्मव्यतिरेकेणान्यस्याभावोयत्रवैअस्यब्रह्मविदःसर्वंनामरूपाद्यात्मन्येवप्रविलापितमात्मैवसंवृत्तंय
त्रैवमात्मैवाभूत्॥तत्तत्रकेनकरणेनकंद्रष्टव्यंकःपश्येत्तथाजिघ्रेद्धिजानीयात्सर्वत्रहिकारकसाध्याक्रियाऽतःकारकाऽभावेऽनुपपत्तिःक्रिया

तदितरइतरंपश्यतितदितरइतरꣳशृणोतितदितरइतरमभिवदतितदितरइतरंमनुतेतदितरइतरंविजानातियत्रवा
अस्यसर्वमात्मैवाभूत्तत्केनकंजिघ्रेत्॥ याःक्रियाभावेचफलाभावःतस्मादविद्यायामेवसत्यांक्रियाकारकफलव्यवहारोनब्रह्म
विदःआत्मत्वादेवसर्वस्यनात्मव्यतिरेकेणकारकंक्रियाफलंवास्तिनचानात्मासन्सर्वमात्मैवभवतिकस्यचित्तस्मादविद्ययैवानात्मत्वंपरि
कल्पितंनतुपरमार्थतआत्मव्यतिरेकेणास्तिकिंचित्॥ राणिव्याचष्टे॥यत्रेति॥तमेवार्थंसंक्षिपति॥यत्रैवमिति॥सर्वंकर्तृकरणादीतिशेषः॥तत्के
नेत्यादिव्याकरोति॥तत्तत्रेति॥किंशब्दस्याक्षेपार्थंकथयति॥सर्वत्रहीति॥ब्रह्मविदोपिकारकद्वाराक्रियादिस्वीक्रियतामित्याशंक्याह॥आत्मत्वादिति॥सर्व
स्यात्मत्वासिद्धिमाशंक्यसर्वमात्मैवाभूदितिश्रुत्यासमाधत्ते॥नचेति॥कथंतर्हिसर्वमात्मव्यतिरेकेणभातीत्याशंक्याह॥तस्मादिति॥भेदभावस्याविद्या

तद्धेतोरज्ञानस्यापनीतत्वादिति शेषः॥ एकत्वप्रत्ययाद्ज्ञाननिवृत्तिद्वारा क्रियादिप्रत्यये निवृत्तेपि क्रियादि स्यान्नेत्याह॥ अत इति॥ करणप्रमाणयोरभा
वेकार्यस्य विरुद्धत्वादिति यावत्॥ ननु किंशब्दे प्रश्नार्थे प्रतीयमाने कथं क्रियातत्साधनयोरत्यंतनिवृत्तिर्विदुषो विवक्ष्यते तत्राह॥ केनेति॥ किंशब्दस्य
प्रागेवाक्षेपार्थत्वमुक्तं तच्चाक्षेपार्थवचो विदुषः सर्वप्रकारक्रियाकारकाद्यसंभवप्रदर्शनार्थमित्यत्यंतमेव क्रियानिवृत्तिर्विदुषो युक्तेत्यर्थः॥ सर्वप्रकारा

तस्मात्परमार्थात्मैकत्वप्रत्यये क्रियाकारकफलप्रत्ययानुपपत्तिरतो विरोधाद्ब्रह्मविदः क्रियाणां तत्साधनानां चात्यंतमेव निवृत्तिः केन
कमिति क्षेपार्थवचनं प्रकारांतरानुपपत्तिदर्शनार्थं॥ केनचिदपि प्रकारेण क्रियाकरणादिकारकानुपपत्तेः केनचित्किंचित्कश्चित्कथंचिन्न

तत्केन कं पश्येत्तत्केन कं शृणुयात्तत्केन कमभिवदेत्तत्केन कं मन्वीत तत्केन कं विजानीया

पश्येदेवेत्यर्थः यत्राप्यविद्यावस्थायामन्योन्यं पश्यति तत्रापि येनेदं सर्वं विजानाति तं केन विजानीयाद्येन विजानाति तस्य करणस्य विज्ञे
ये विनियुक्तत्वात्ज्ञातुश्च ज्ञेय एव हि जिज्ञासा नात्मनि न चाग्नेरिवात्मात्मनो विषयो न चाविषये ज्ञातुर्ज्ञानमुपपद्यते

नुपपत्तिमेवा
भिनयति केनचिदिति॥ कैवल्यावस्थामास्थाय संज्ञाभाववचनमित्युक्त्वा तत्रैव किंपुनर्न्यायं वक्तुमविद्यावस्थायामपि साक्षिणो ज्ञानाविषयत्वमाह॥ यत्रापीति
॥ येन कूटस्थबोधेन व्याप्तो लोकः सर्वं जानाति तं साक्षिणं केन करणेन को वा ज्ञाता जानीयादित्यत्र हेतुमाह॥ येनेति॥ येन चक्षुरादिनालोको जानाति तस्य विषय
ग्रहणेनैवोपक्षीणत्वान्न साक्षिणि प्रवृत्तिरित्यर्थः॥ आत्मनोऽसंदिग्धभाववत्वाच्च प्रमेयत्वासिद्धिरित्याह॥ ज्ञातुश्चेति॥ किं चात्मा स्वेनैव ज्ञायते ज्ञात्रंतरेण वा
नाद्य इत्याह॥ न चेति॥ न द्वितीय इत्याह॥ न चाविषय इति॥ ज्ञात्रंतरस्याभावात्तस्याविषयो यमात्माकुतस्तेन ज्ञातुं शक्यते॥ न हि ज्ञात्रंतरमस्ति नान्योतोस्ति द्रष्टे

आत्मनिप्रमातृप्रमाणयोरभावेज्ञानाविषयत्वंफलतीत्याह॥तस्मादिति॥विज्ञातारमित्यादिवाक्यस्यार्थंप्रपंचयति॥यत्रत्विति॥तदेवस्वरूपापेक्षंविज्ञानघ
नत्वंविशेषविज्ञानापेक्षंतुसंज्ञाभाववचनमित्यविरोधइति॥इतिचतुर्थेचतुर्थंब्राह्मणं॥४४॥पूर्वोत्तरब्राह्मणयोःसंगतिंवक्तुंवृत्तंकीर्त्तयति॥यत्केवलमिति
॥कैवल्यंव्याचष्टे॥कर्मेति॥निरपेक्षमितितत्रात्मज्ञानमुक्तमितिसंबंधःततोनिराकांक्षत्वंसिद्धमितिचकारार्थः आत्मज्ञानंसंन्यासिनामेवेतिनियंतुंविशिन
ष्टि॥सर्वेति॥ननुकृतस्तत्वोनैराकांक्ष्यंसत्यपितस्मिन्विज्ञेयांतरसंभवादतआह॥आत्मनिचेति॥नवाअरेपत्युरित्यादावुक्तंस्मारयति॥आत्माचेति॥तस्यनिरति

तस्माद्येनेदंसर्वंविजानातितंविज्ञातारंकेनकरणेनकोवाऽन्योविजानीयाद्यदातुपुनःपरमार्थविवेकिनोब्रह्मविदोविज्ञातैवकेवलोऽद्वयोवर्त्तते
तंविज्ञातारमरेकेनविजानीयादिति॥इतिचतुर्थस्यचतुर्थंब्राह्मणं॥४४॥यत्केवलंकर्मनिरपेक्षममृतत्वसाधनंतदुक्तव्यमितिमैत्रेयीब्राह्मण

येनेदꣳसर्वंविजानातितंकेनविजानीयाद्विज्ञातारमरेकेनविजानीयादिति॥४४॥चतुर्थंब्राह्मणं॥

मारब्धंतत्रात्मज्ञानंसर्वसंन्यासांगविशिष्टमात्मनिचविज्ञातेसर्वमिदंविज्ञातंभवत्यात्माचप्रियःसर्वस्मात्तस्मादात्माद्रष्टव्यःसचश्रोतव्योमंतव्यो
निदिध्यासितव्यइतिचदर्शनप्रकाराउक्तास्तत्रश्रोतव्यआचार्यागमाभ्यांमंतव्यस्तर्कतस्तत्रचतर्कउक्तःआत्मैवेदंसर्वमितिप्रतिज्ञातस्यहेतुवच
नमात्मैकसामान्यत्वमात्मैकोद्भवत्वमात्मैकप्रलयत्वंच॥तत्रायं ग्रयप्रेमास्पदत्वेनपरमानंदत्वेफलितमाह॥तस्मादिति॥सचेद्दर्शनार्हस्तर्हितद्दर्शनेका
निसाधनानीत्याशंक्याह॥सचेति॥दर्शनप्रकाराःदर्शनस्योपायप्रभेदाः॥श्रवणमननयोःस्वरूपविशेषंदर्शयति॥तत्रेति॥कोसौतर्कोयेनआत्मामंतव्योभवतित
त्राह॥तत्रचेति॥दुंदुभ्यादिग्रंथःसप्तम्यर्थः॥उक्तमेवतर्कंसंगृह्णाति॥आत्मैवेति॥प्रधानादिवादमादायहेत्वसिद्धिशंकायांतन्निराकरणार्थमिदंब्राह्मणमितिसं

कथंहेतसिद्धिशंकोद्भियतेतत्राह॥यस्मादिति॥तस्मात्तथाभूतंभवितुमर्हतीतिउत्तरत्रसंवंधः॥अन्योन्योपकार्योपकारकभूतंजगदेकचैतन्यानुविद्धमेकप्र
वृत्तिकंचेत्यत्रव्याप्तिमाह॥यच्चेति॥दृष्टंस्वप्नादीतिशेषः॥दृष्टांतेसिद्धमर्थंदार्ष्टांतिकेयोजयति॥तस्मादिति॥तच्छब्दार्थंस्फुटयति॥परस्परेति॥तथाभू
तमित्येककारणपूर्वकत्वादिगृह्यते॥विमतमेककारणकंपरस्परोपकार्योपकारकभूतत्वात्स्वप्नवदित्ययुक्तंहेत्वसिद्धेर्नहिसर्वंजगत्परस्परोपकार्योप

हेतुरसिद्धइत्याशंक्यतेआत्मैकसामान्योद्भवप्रलयाख्यस्तदाशंकानिवृत्त्यर्थमेतद्ब्राह्मणमारभ्यतेयस्मात्परस्परोपकार्योपकारकभूतंजग
त्सर्वंपृथिव्यादियच्चलोकेपरस्परोपकार्योपकारकभूतंतदेककारणपूर्वकमेकसामान्यात्मकमेकप्रलयंचदृष्टंतस्मादिदमपिपृथिव्यादिलक्ष
णंजगत्परस्परकार्यकारणत्वात्तथाभूतंभवितुमर्हति॥एषह्यर्थोऽस्मिन्ब्राह्मणेप्रकाश्यतेऽथवाआत्मैवेदंसर्वमितिप्रतिज्ञातस्यात्मोत्पत्तिस्थिति
लयत्वंहेतुमुक्त्वापुनरागमप्रधानेनमधुब्राह्मणेनप्रतिज्ञातस्यार्थस्यनिगमनंक्रियतेतथाहिनैय्यायिकैरुक्तं॥हेत्वपदेशात्प्रतिज्ञायाःपुनर्वचनं
निगमनमिति॥अन्येव्याख्यातंआदुंदुभिदृष्टांतात्क्तोतव्यार्थमागमवचनंप्राङ्मधुब्राह्मणान्मंतव्यार्थमुपपत्तिप्रदर्शनेनमधुब्राह्मणेनतुनिदिध्या
सनविधिरुच्यतइतिसर्वथापितुयथागमेनावधारितंतर्कतस्तथैवमंतव्यंयथातर्कतोमतस्यतर्कागमाभ्यांनिश्चितस्यतथैवनिदिध्यासनंक्रि
यतइतिपृथङ्निदिध्यासनविधिरनर्थकएवतस्मात्पृथक्प्रकरणविभागोनर्थकइत्यस्मदभिप्रायः॥ कारकभूतमित्याशंक्याह॥एषहीति॥हेत्वसि
द्धिशंकांपरिहर्तुंब्राह्मणमितिसंगतिमुक्त्वाप्रकारांतरेणतामाह॥अथवेति॥प्रतिज्ञाहेतूक्रमेणोक्त्वाहेतुसहितस्यप्रतिज्ञातार्थस्यपुनर्वचनंनिगमनमित्यत्रता
र्किकसंमतिमाह॥तथाहीति॥भर्तृप्रपंचानांब्राह्मणारंभप्रकारमनुवदति॥अन्यैरिति॥द्रष्टव्यादिवाक्यादारभ्यदुंदुभिदृष्टांतादागमवचनंश्रोतव्यइत्युक्तश्रवण
निरूपणार्थं॥दुंदुभिदृष्टांतादारभ्यमधुब्राह्मणात्प्रागुपपत्तिप्रदर्शनेनमंतव्यइत्युक्तमनननिरूपणार्थमागमवचनं॥निदिध्यासनंव्याख्यातुंपुनरेतद्ब्राह्मणमित्य

एतत् दूषयति॥ सर्वथापीति॥ श्रवणादेर्विधेयत्वेपीतियावत्॥ अन्वयव्यतिरेकाभ्यांश्रवणे प्रवृत्तस्यतत्सौष्कल्येसत्यर्थलब्धंमननंनविधिमपेक्षते॥ यथातर्कतोमतंतत्वंतथातस्यतर्कागमाभ्यांनिश्चितस्योभयसामर्थ्यादेवनिदिध्यासनसिद्धेस्तदपिविध्यनपेक्षितमेवेत्यर्थः॥ त्रयाणांविध्यनपेक्षितत्वेफलितमाह॥ तस्मादिति॥ इतिपरकीयव्याख्यानमयुक्तमितिशेषः॥ सिद्धांतेपिश्रवणादिविध्यभ्युपगमात्कथंपरकीयंप्रस्थानंप्रत्याख्यातमित्याशंक्याह॥ सर्वथापितिति॥

श्रवणमनननिदिध्यासनानामितिसर्वथापिलभ्यायहूयस्यार्थोस्मिन्ब्राह्मणउपसंह्रियतेइयंपृथिवीप्रसिद्धासर्वेषांभूतानांमधुसर्वेषांब्रह्मादिस्तंबपर्यंतानांभूतानांप्राणिनांमधुकार्यंमध्विवमधुयथैकोमधपूपोनेकैर्मधुकरैर्निर्वर्तितः॥ एवमियंपृथिवीसर्वभूतनिर्वर्त्तितातथासर्वा

इयंपृथिवीसर्वेषांभूतानांमध्वस्यैपृथिव्यैसर्वाणिभूतानिमधुयश्चायमस्यांपृथिव्यांतेजोमयोमृतमयःपुरुषोयश्चायमध्यात्मं शारीरस्तेजोमयोमृतमयःपुरुषोयमेवसयोयमात्मे

णिभूतानिपृथिव्यैपृथिव्याअस्यामधुकार्यंकिंचयश्चायंपुरुषोऽस्यांपृथिव्यांतेजोमयश्चिन्मात्रप्रकाशमयोऽमृतमयअमरणधर्मापुरुषोयश्चायमध्यात्मंशारीरःशरीरेभवःपूर्ववत्तेजोऽमृतमयःपुरुषःसचलिंगाभिमानीसचसर्वेषांभूतानामुपकारकत्वेनमधुसर्वाणिचभूतान्यस्यमधुचशब्दसामर्थ्यादेवमेतच्चतुष्टयंतावदेकंसर्वभूतकार्यं॥ मयो तद्विध्यभ्युपगमेपीतियावत्॥ एवंसंगतिंब्राह्मणस्योक्त्वातदक्षराणिव्याकरोति॥ इयमित्यादिनायदुक्तंमध्विवमध्वितितद्विवृणोति॥ यथेति॥ नकेवलमुक्तमधुद्वयमेवकिंतुमध्वंतरंचास्तीत्याह॥ किंचेति॥ पुरुषशब्दस्यक्षेत्रज्ञविषयत्वंवारयति॥ सचेति॥ तस्यपृथिवीवन्मधुत्वमाह॥ सचसर्वेषामिति॥ सर्वेषांचभूतानांतत्प्रतिमधुत्वंदर्शयति॥ सर्वाणिचेति॥ नन्वाद्यमेवमधुद्वयंश्रुतमश्रुतंतुमधुद्वयमशक्यंकल्पयितुंकल्पकाभावादतआह॥ चशब्देति॥ प्रथमपर्यायार्थमुपसंहरति॥ एवमिति॥ पृथिवीसर्वाणिभूतानि पृथिव्यंशाभिमानी५

मधुशब्दार्थमाह॥सर्वेति॥अस्येति पृथिव्यादेरिति यावत्॥परस्परमुपकार्योपकारकभावे फलितमाह॥अत इति॥अस्येति सर्वं जगदुच्यते॥यस्मा
त्परस्परोपकार्योपकारकभूतमित्यादिभवत्वनेनन्यायेन मधुपर्यायेषु सर्वेषु कारणोपदेशो ब्रह्मोपदेशस्तु कथमित्याशंक्याह॥यस्मादिति॥सप्रकृ
तआत्मैवायंचतुर्धोक्तोभेदइतियोजना॥इदमितिचतुष्टयकल्पनाधिष्ठानविषयंज्ञानंपरामृशति॥इदंब्रह्मेत्यत्रचतुष्टयाधिष्ठानमिदंशब्दार्थः॥तृती

सर्वाणिचभूतान्यस्यकार्यमतोऽस्यैककारणपूर्वकतायस्मादेकस्मात्कारणादेतज्जातंतदेवैकंपरमार्थतोब्रह्मेतरत्कार्यंवाचारंभणंविका
रोनामधेयमात्रमित्येषमधुपर्यायाणांसर्वेषामर्थःसंक्षेपतःअयमेवसयोऽयंप्रतिज्ञातइदंसर्वंयदयमात्मेतिइदममृतंयन्मैत्रेय्यैअमृतत्व

दममृतमिदंब्रह्मेदꣳसर्वं॥४५॥इमाआपःसर्वेषांभूतानांमध्वासामपाꣳसर्वाणिभूतानिमधुयश्चायमास्वप्सुतेजोमयोऽमृत
मयःपुरुषोयश्चायमध्यात्मꣳरैतसस्तेजोमयोऽमृतमयःपुरुषोऽयमेवसयोऽयमात्मेदममृतमिदंब्रह्मेदꣳसर्वं॥४६॥

साधनमुक्तमा
त्मविज्ञानमिदंतदमृतमिदंब्रह्मयद्ब्रह्मतेब्रवाणिब्रह्मज्ञपयिष्यामीत्यध्यायादौप्रकृतंयद्विषयाचविद्याब्रह्मविद्येत्युच्यतेइदंसर्वंयस्माद्ब्रह्म
णोविज्ञानात्सर्वंभवति॥१॥तथाआपोऽध्यात्मंरेतस्यपांविशेषतोऽवस्थानं॥२॥तथाग्निर्वाच्यग्नेर्विशेषतोऽवस्थानं॥३॥तथावायुरध्यात्मंप्राणे

येचतस्यप्रकृतत्वंदर्शयति॥यद्विषयेति॥इदंसर्वमित्यत्रब्रह्मज्ञानमिदमित्युक्तं॥सर्वंसर्वाप्तिसाधनमितियावत्॥तदेवस्पष्टयति॥यस्मादिति॥४५॥१॥
यथापृथिवीमधुत्वेनव्याख्यातातथान्योपिव्याख्येयइत्याह॥तथेति॥रेतसइतिविशेषणस्यार्थमाह॥अध्यात्ममिति॥आपोरेतोभूत्वाशिश्नंप्राविशन्नितिश्रु
त्यंतरं॥२॥पृथिव्यामप्सुचोक्तन्यायमग्नावतिदिशति॥तथेति वाङ्मयइत्यस्यार्थमाह॥वाचीति॥अग्निर्वाग्भूत्वामुखंप्राविशदितिहिश्रूयते॥३॥अग्नावुक्तन्या

वायुः प्राणो भूत्वा नासिके प्राविशदिति श्रुत्यंतरमाश्रित्याह॥ अध्यात्ममिति॥ पृथिव्यादीनां तदंतर्वर्तिनां च पुरुषाणामेकवाक्योपात्तानामेकरूपं मधुत्वमिति शं
कां परिहरन्नवांतरविभागमाह॥ भूतानामिति॥ पृथिव्यादीनां कार्यत्वं तेजोमयादीनां करणत्वमित्यत्र सप्तान्नाधिकारसंमतिमाह॥ तथेति॥ यद्यप्यादित्यस्तु ती

भूतानां शरीरारंभकत्वेनोपकारान्मधुत्वं तदंतर्गतानां तेजोमयादीनां करणत्वेनोपकारान्मधुत्वं तथा चोक्तं तस्यैवाचः पृथिवी शरीरं ज्योती रूपमय

अयमग्निः सर्वेषां भूतानां मध्वस्याग्नेः सर्वाणि भूतानि मधु यश्चायमस्मिन्नग्नौ तेजोमयोमृतमयः पुरुषो यश्चायमध्यात्मं वाङ्मयस्ते ॰
जोमयोमृतमयः पुरुषोयमेव सयोयमात्मेदममृतमिदं ब्रह्मेदꣳ सर्वं॥ ४७॥ अयं वायुः सर्वेषां भूतानां मध्वस्य वायोः सर्वाणि भूतानि मधु
यश्चायमस्मिन्वायौ तेजोमयोमृतमयः पुरुषो यश्चायमध्यात्मं प्राणस्तेजोमयोमृतमयः पुरुषोयमेव सयोयमात्मेदममृतमिदं ब्रह्मेदꣳ
सर्वं॥ ४८॥ अयमादित्यः सर्वेषां भूतानां मध्वस्यादित्यस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्नादित्ये तेजोमयोमृतमयः पुरुषो यश्चायमध्या
त्मं चाक्षुषस्तेजोमयोमृतमयः पुरुषोयमेव सयोयमात्मेदममृतमिदं ब्रह्मेदꣳ सर्वं॥ ४९॥ इमा दिशः सर्वेषां भूतानां मध्वासां दिशाꣳ सर्वाणि
भूतानि मधु यश्चायमासु दिक्षु तेजोमयोमृतमयः पुरुषो यश्चायमध्यात्मꣳ श्रौत्रः प्रातिश्रुत्कस्तेजोमयोमृतमयः पुरुषोयमेव सयोयमात्मे
दममृतमिदं ब्रह्मेदꣳ सर्वं॥ ५०॥

मग्निरिति॥ ४॥ तथादित्योमधु चाक्षुषोध्यात्मं॥ ५॥ तथा दिशो मधु दिशां यद्यपि श्रोत्रमध्यात्मं तथापि शब्दः प्रति
श्रवणवेलायां तु विशेषतः सन्निहितो भवतीत्यध्यात्मं प्रातिश्रुत्कः प्रतिश्रुतिकायां प्रतिश्रवणवेलायां भवः प्रातिश्रुत्कः॥ ६॥ ये भूतेन्तर्भवति तथापि देवता
भेदमाश्रित्याग्नावुक्तन्यायं तस्मिन्नतिदिशति॥ तथेति॥ आदित्यश्चक्षुर्भूत्वाक्षिणी प्राविशदिति श्रुतिमाश्रित्याह॥ चाक्षुष इति॥ ५॥ आदित्यगतन्यायं दिक्षु संपादयति॥

तवेति दिशः श्रोत्रं भूत्वा कर्णौ प्राविशन्निति श्रुतेः॥

श्रोत्रमेवदिशामध्यात्मंतथाचाध्यात्मंश्रोत्रमित्येववक्तव्येकथंप्रातिश्रुत्कमितिविशेषणमित्याशंक्याह॥दिशामिति॥तथापीत्यस्मिन्नर्थेतुशब्दः॥६॥दिक्षुव्यव
स्थितन्यायंचंद्रेदर्शयति॥तथेति॥चंद्रमामनोभूत्वाहृदयंप्राविशदितिश्रुतिमनुसृत्याह॥अध्यात्ममिति॥७॥चंद्रवद्विद्युतोपिमधुत्वमाह॥तथेति॥अध्यात्मं

तथाचंद्रअध्यात्मंमानसः॥७॥तथाविद्युत्वक्तेजसिभवस्तेजसोध्यात्मं॥८॥तथास्तनयित्नुःशब्देभवःशाब्दोध्यात्मंयद्यपितथापिस्वरेविशे

अयंचंद्रःसर्वेषांभूतानांमध्वस्यचंद्रस्यसर्वाणिभूतानिमधुयश्चायमस्मिंश्चंद्रेतेजोमयोमृतमयःपुरुषोयश्चायमध्यात्मंमा
नसस्तेजोमयोमृतमयःपुरुषोयमेवसयोयमात्मेदममृतमिदंब्रह्मेदंसर्वं॥५१॥इयंविद्युत्सर्वेषांभूतानांमध्वस्यैविद्युतः
सर्वाणिभूतानिमधुयश्चायमस्यांविद्युतितेजोमयोमृतमयःपुरुषोयश्चायमध्यात्मंतैजसस्तेजोमयोमृतमयःपुरुषोयमे
वसोयमात्मेदममृतमिदंब्रह्मेदंसर्वं॥५२॥अयंस्तनयित्नुःसर्वेषांभूतानांमध्वस्यस्तनयित्नोःसर्वाणिभूतानिमधुयश्चाय
मस्मिंस्तनयित्नौतेजोमयोमृतमयःपुरुषोयश्चायमध्यात्मंशाब्दःसौवरस्तेजोमयोमृतमयःपुरुषोयमेवसयोयमात्मेदमम
तमिदंब्रह्मेदंसर्वं॥५३॥अयमाकाशःसर्वेषांभूतानांमध्वस्याकाशस्यसर्वाणिभूतानिमधुयश्चायमस्मिन्नाका शेतेजोमयोम
तमयःपुरुषोयश्चायमध्यात्मंहृद्याकाशस्तेजोमयोमृतमयःपुरुषोयमेवसयोयमात्मेदममृतमिदंब्रह्मेदंसर्वं॥५४॥ ॥

षतोभवतीतिसौवरोध्यात्मं॥९॥तथाकाशोध्यात्मंहृदयाकाशः॥१०॥ तैजसइत्यस्यार्थमाह॥त्वगिति॥पर्जन्योपिविद्युदादिवत्सर्वेषांभूतानांमधुभ
वतीत्याह॥तथेति॥अध्यात्मंशाब्दसौवरइत्यस्यार्थमाह॥शब्देभवइति॥यद्यप्यध्यात्मंशब्देभवइतिव्युत्पत्त्याशाब्दःपुरुषस्तथापिस्वरेविशेषतोभवतीत्यध्या

स्तनयित्नावुक्तन्यायमाकाशेतिदिशति॥तथेति॥१०॥पर्यायांतरंवृत्तमनूद्योत्थापयति॥आकाशांताइति॥प्रतिशरीरिणंसर्वेषांशरीरिणांप्रत्येकमितिया
वत्॥धर्मस्यशास्त्रैकगम्यत्वेनपरोक्षत्वादयमितिनिर्देशानर्हत्वमाशंक्याह॥अयमितीतियद्यपिधर्मोप्रत्यक्षोयमितिनिर्देशानर्हस्तथापिपृथिव्यादेर्धर्मे
कार्यस्यप्रत्यक्षत्वात्तेनकारणस्याभेदमौपचारिकमादायप्रत्यक्षघटादिवदयंधर्मइतिव्यपदेशोपपत्तिरित्यर्थः॥कोसौधर्मोयस्यप्रत्यक्षत्वेनव्यपदेशस्तत्रा

आकाशांताःपृथिव्यादयोभूतगणादेवतागणाश्चकार्यकरणसंघातात्मानउपकुर्वंतोमधुभवंतिप्रतिशरीरिणमित्युक्तंयेनैतेप्रयुक्ताःशरी
रिभिःसंबध्यमानामधुत्वेनोपकुर्वंतितद्वक्तव्यमितीदमारभ्यतेअयंधर्मोयमितिअप्रत्यक्षोपिधर्मःकार्येणतत्प्रयुक्तेनप्रत्यक्षेणव्यपदि
श्यतेअयंधर्मइतिप्रत्यक्षवद्धर्मश्चव्याख्यातःश्रुतिस्मृतिलक्षणःक्षत्रादीनामपिनियंता॥जगतोवैचित्र्यकृत्पृथिव्यादीनांपरिणामहेतुत्वा

अयंधर्मःसर्वेषांभूतानांमध्वस्यधर्मस्यसर्वाणिभूतानिमधु

त्प्राणिभिरनुष्ठीयमानरूपश्चतेनचायंधर्मइतिप्रत्यक्षेणव्यपदेशःसत्यधर्मयोश्चाभेदेननिर्देशःकृतःशास्त्राचारलक्षणयोरिहतुभेदेनव्य
पदेशः॥एकत्वेसत्यपिदृष्टादृष्टभेदरूपेणकार्यारंभकत्वाद्यत्त्वदृष्टो

ह॥धर्मश्चेति॥व्याख्यातस्तत्क्रियोरूपमत्यस्तजतधर्ममित्यादाविति शेषः॥त
र्हितस्यप्रत्यक्षत्वान्नचोदनालक्षणत्वमित्याशंक्यगौणत्वमुख्यत्वाभ्यामविरोधमभिप्रेत्याह॥श्रुतीति॥तस्मिन्नेवकार्यलिंगकमनुमानंसूचयति॥क्षत्रादी
नामिति॥तत्रैवानुमानांतरंविवक्षितोक्तं॥जगतइति॥जगद्वैचित्र्यकारित्वेहेतुमाह॥पृथिव्यादीनामिति॥धर्मस्यप्रत्यक्षेणव्यपदेशेहेत्वंतरमाह॥प्राणिभिरि
ति॥तेनानुष्ठीयमानाचारेणप्रत्यक्षेणधर्मस्यवक्ष्यमाणत्वेनेतियावत्॥ननुतृतीयाध्यायेयोवैसधर्मःसत्यंवैतदितिसत्यधर्मयोरभेदवचनात्तयोर्भेदेनात्रपर्यायद्वयोपादा
शास्त्रोक्तलक्षणोधर्मःआचारलक्षणःसत्यइतिभेदःधर्मोदृष्टःसत्यस्त्वनुष्ठीयमाणत्वाद्दृष्टः=५

सैंमष्टिव्यष्ट्यात्मना २

कथमेकत्वेसतिभेदेनोक्तिरित्याशंक्याह॥दृष्टेति॥अदृष्टेनरूपेणकार्यारंभकत्वंप्रकटयति॥यस्त्विति॥सामान्यात्मनारंभकत्वमुदाहरति॥सामान्यरूपेणेति॥
विशेषात्मनाकार्यारंभकत्वंव्यनक्ति॥विशेषेति॥धर्मस्यद्वौभेदावुक्तौतयोर्मध्येप्रथममधिकृत्ययश्चेत्यादिवाक्यमित्याह॥तत्रेति॥द्वितीयंविषयीकृत्ययश्चा

ऽपूर्वाख्योधर्मःससामान्यविशेषात्मना ऽदृष्टेनरूपेणकार्यमारभतेसामान्यरूपेणपृथिव्यादीनांप्रयोक्ताभवतिविशेषरूपेणचाध्यात्मंकार्य
करणसंघातस्यतत्रपृथिव्यादीनांप्रयोक्तरियश्चायमस्मिन्धर्मेतेजोमयस्तथाध्यात्मंकार्यकरणसंघातकर्त्तरिधर्मेभवोधार्मः॥११॥तथादृष्टे

यश्चायमस्मिन्धर्मेतेजोमयोमृतमयःपुरुषोयश्चायमध्यात्मंधार्मस्तेजोमयोमृतमयःपुरुषोयमेवसयोयमात्मेदममृतमिदंब्रह्मे
दंसर्वं॥५५॥इदंसत्यंसर्वेषांभूतानांमध्वस्यसत्यस्यसर्वाणिभूतानिमधुयश्चायमस्मिन्सत्येतेजोमयोमृतमयःपुरुषोयश्चा
यमध्यात्मंसात्यस्तेजोमयोमृतमयःपुरुषोयमेवसयोयमात्मेदममृतमिदंब्रह्मेदंसर्वं॥५६॥ नानुष्ठीयमानेनाचाररूपेणसत्याख्यो
भवतिसएवधर्मःसोपिद्विप्रकारएवसामान्यविशेषात्मरूपेणसामान्यरूपःपृथिव्यादिसमवेतोविशेषरूपःकार्यकरणसंघातसमवेतः॥
तत्रपृथिव्यादिसमवेतेवर्तमानक्रियारूपेसत्येतथाध्यात्मंकार्यकरणसंघातसमवेतरिसत्येभवःसात्यःसत्येनवायुराबातीतिश्रुसंतरात्॥१२॥

यमध्यात्ममित्यादिप्रवृत्तमित्याह॥तथेति॥११॥इदंसत्यमित्यस्मिन्पर्यायेसत्यशब्दार्थमाह॥तथादृष्टेनेतिसोपीत्यपिशब्दोधर्मोदाहरणार्थः॥द्वयोरपिप्र
कारयोर्विनियोगंविभजते॥सामान्यरूपइति॥उभयत्रसमवेतशब्दस्तत्रकारणत्वेनानुगतार्थः॥यश्चायमस्मिन्नित्यादिवाक्यस्यविषयमाह॥तत्रेति॥सत्येय
श्चेत्यादिवाक्यमितिशेषः॥यश्चायमध्यात्ममित्यादिवाक्यस्यविषयमाह॥तथाध्यात्ममिति॥सत्यस्यपृथिव्यादौकार्यकरणसंघातेचकारणत्वेप्रमाणमाह॥सत्ये

इदंमानुषमित्यत्रमानुषग्रहणंसर्वजात्युपलक्षणमित्यभिप्रेत्याह॥धर्मसत्याभ्यामिति॥कथंपुनरेषाजातिःसर्वेषांभूतानांमधुभवतितत्राह॥तत्रेति
॥भोगभूमिःसप्तम्यर्थःयश्चायमस्मिन्नित्यादिवाक्यद्वयस्यविषयभेदंदर्शयति॥तत्रेति॥व्यवहारभूमावितियावत्॥धर्मादिवदित्यपेरर्थः॥निर्दे
शःस्वशरीरनिष्ठाजातिराध्यात्मिकी॥शरीरांतराश्रितातुबाह्येतिभेदः॥वस्तुतस्तुतत्रनोभयथात्वमित्यभिप्रेत्यनिर्देशभागित्युक्तं॥१३॥अंतिमपर्या

धर्मसत्याभ्यांप्रयुक्तोयंकार्यकरणसंघातविशेषःसयेनजातिविशेषेणसंयुक्तोभवतिसजातिविशेषोमानुषादिस्तत्रमानुषादिजातिवि
शिष्टाएवसर्वेप्राणिनिकायाःपरस्परोपकार्योपकारकभावेनवर्तमानादृश्यंतेअतोमानुषादिजातिरपिसर्वेषांभूतानांमधुतत्रमानु

इदंमानुषꣳसर्वेषांभूतानांमध्वस्यमानुषस्यसर्वाणिभूतानिमधुयश्चायमस्मिन्मानुषेतेजोमयोमृतमयःपुरुषोयश्चाय
मध्यात्मंमानुषस्तेजोमयोमृतमयःपुरुषोयमेवसयोयमात्मेदममृतमिदंब्रह्मेदꣳसर्वं॥५७॥ षादिजातिरपिबाह्याध्यात्मिकी
चेत्युभयथानिर्देशभाग्भवति॥१३॥यस्तुकार्यकरणसंघातोमानुषादिजातिविशिष्टःसोयमात्मासर्वेषांभूतानांमधुनन्वयंशारीरशब्दे
ननिर्दिष्टःपृथिवीपर्यायएवनपार्थिवांशस्यैवतत्रग्रहणादिहतुसर्वात्माऽप्रत्यस्तमिताध्यात्माधिभूताधिदेवादिसर्वविशेषःसर्वभूत
देवतागणविशिष्टःकार्यकरणसंघातःसोऽयमात्मेत्युच्यते॥तस्मिन्नस्मिन्नात्मनितेजोमयोऽमृतमयःपुरुषो यमवतारयति॥यस्त्विति॥
आत्मनःशारीरेणगतत्वात्पुनरुक्तिरनुपयुक्तेतिशंकते॥नन्विति॥अवयवावयविविषयत्वेनपर्यायद्वयमपुनरुक्तमितिपरिहरति॥नेत्यादिना॥प
रमात्मानंव्यावर्तयति॥सर्वभूतेति॥चेतनंव्यवच्छिनत्तिकार्येति॥यश्चायमस्मिन्नित्यादिवाक्यविषयमाह॥तस्मिन्निति॥यश्चायमध्यात्ममितिकिमि

समष्टिर्हिरण्यगर्भः३

अत्रेत्यंत्य पर्यायोक्तिः॥यश्चाय मात्मेत्यस्यार्थमाह॥यस्त्विति॥१४॥सवाअयमात्मेत्यस्यार्थमाह॥यस्मिन्निति॥परिशिष्टः पूर्वपर्यायेष्वनुपदिष्टोंत्येप
र्यायेऽयमात्मेत्युक्तो विज्ञानमयो यस्मिन्नात्मनि खिल्यदृष्टांतवचसा प्रवेशितस्तेन परेणात्मना तादात्म्यं गतो विद्वानत्रात्मशब्दार्थइत्यर्थः उक्तमात्मश
ब्दार्थमनूद्य सर्वेषामित्यादि व्याचष्टे॥तस्मिन्निति॥अविद्ययाकृतः कार्यकरणसंघात एवोपाधिस्तेन विशिष्टे जीवे तस्मिन्परमार्थात्मनि ब्रह्मणि ब्रह्मविद्य

ऽमूर्तरसः सर्वात्मको निर्दिश्यते एकदेशेन तु पृथिव्यादिषु निर्दिष्टोत्राध्यात्मविशेषाभावात्स न निर्दिश्यते यस्तु परिशिष्टो विज्ञानमयो य
दर्थोयं देहलिंगसंघातः आत्मा स यश्चायमात्मेत्युच्यते॥१४॥यस्मिन्नात्मनि परिशिष्टो विज्ञानमयोंत्ये पर्याये प्रवेशितः सोयमात्मा तस्मिन्न
विद्याकृतकार्यकरणसंघातोपाधिविशिष्टे ब्रह्मविद्यया परमार्थात्मनि प्रवेशिते स एव मुक्तोनंतरोऽबाह्यः कृत्स्नः प्रज्ञानघनभूतः सर्वेषांभूता

अयमात्मा सर्वेषां भूतानां मध्वस्यात्मनः सर्वाणि भूतानि मधु यश्चायमस्मिन्नात्मनि तेजोमयोमृतमयः पुरुषो यश्चायमात्मा तेजो
मयोमृतमयः पुरुषोयमेव स योयमात्मेदममृतमिदं ब्रह्मेदं सर्वं॥५८॥ नामयमात्मा सर्वैरुपास्यः सर्वेषां भूतानामधिपतिः सर्वभूतानां
स्वतंत्रो न कुमारामात्यवत्किं तर्हि सर्वेषां भूतानां राजा राजत्वविशेषणमधिपतिरिति॥भवति कश्चिद्राजोचितवृत्तिमाश्रित्य राजा न त्वधिपतिरतो
विशिनष्ट्यधिपतिरिति यां प्रवेशिते स एवायमात्मा यथोक्तविशेषणः सर्वैरुपास्यः सर्वेषां भूतानामधिपतिरिति संबंधः॥व्याख्येयं पदमादाय तस्य वाच्यमर्थ
माह॥सर्वेषामिति॥तस्यैव विवक्षितोर्थः सर्वैरुपास्य इत्युक्तः॥स्वातंत्र्यं व्यतिरेकद्वारा स्फोरयति॥नेत्यादिना॥सर्वेषां भूतानां राजेत्येतावतैव यथोक्तार्थसिद्धौ किमि
त्यधिपतिरिति विशेषणमित्याशंक्याह॥राजत्वेति॥राजत्वजात्यनाक्रांतोपि कश्चित्तदुचितपरिपालनादिव्यवहारवानित्युपलब्धं न पुनस्तस्य स्वातंत्र्यं राजपरत्वात्तस्मा

राजाधिपतिरित्युभयोरपि मिथो विशेषणविशेष्यत्वमभिप्रेत्य वाक्यार्थं निगमयति॥ एवमिति॥ उक्तस्य विद्याफलस्य तृतीयेनैकवाक्यत्वमाह॥ यदुक्तमिति॥ तदेव व्याख्यानं स्फोरयति॥ एवमिति॥ मैत्रेयीब्राह्मणोक्तक्रमेणेति यावत्॥ एवमित्यस्यार्थं कथयति॥ यथेति॥ मधुब्राह्मणे पूर्वब्राह्मणे चोक्तक्रमेणात्मनि श्रवणादित्रयं संपाद्य विद्वान्ब्रह्मा भवदिति संबंधः॥ ननु मोक्षावस्थायामेव विदुषो ब्रह्मत्वापरिच्छिन्नत्वं न प्राच्यामविद्यादशायामित्याशंक्याह॥ तस्मादिति

एवं सर्वभूतात्मा विद्वान्ब्रह्मविन्मुक्तो भवति॥ यदुक्तं ब्रह्मविद्यया सर्वं भविष्यंतो मनुष्या मन्यंते किमु तद्ब्रह्मावेद्यस्मात्तत्सर्वमभवदिती दं तद्व्याख्यातमेवमात्मानमेव सर्वात्मत्वेनाचार्यागमाभ्यां श्रुत्वा मत्वा तर्कतो विज्ञाय साक्षादेवं यथा मधुब्राह्मणे न दर्शितं तथा तस्माद्ब्रह्म विज्ञानादेवंलक्षणात्पूर्वमपि ब्रह्मैव सदविद्यया अब्रह्मासीत्सर्वमेव च सदसर्वमासीत्तां त्वविद्यामस्माद्विज्ञानात्तिरस्कृत्य ब्रह्मविद्ब्रह्मैव स

स वा अयमात्मा सर्वेषां भूतानामधिपतिः सर्वेषां भूतानां राजा ॥

न्ब्रह्माभवत्सर्वं सत्सर्वमभवत्परिसमाप्तः शास्त्रार्थो यदर्थः प्रस्तुतस्तस्मिन्नेतस्मिन्सर्वात्मभूते ब्रह्मविदि सर्वात्मनि सर्वं जगत्समर्पितमित्येतस्मि न्नर्थे दृष्टांत उपादीयते॥ तद्यथा रथनाभौ च रथनेमौ चाराः सर्वे समर्पिता इति प्रसिद्धोऽर्थ एवमेतस्मिन्नात्मनि परमात्मभूते ब्रह्मविदि सर्वाणि भूतानि ब्रह्मादिस्तंबपर्यंतानि सर्वे देवा अग्न्यादयः सर्वे लोका भूरादयः सर्वे प्राणा वागादयः सर्व एत आत्मानो ॥ समानाधिकरणं पंचमीत्रयं॥ एवंलक्षणाद्ब्रह्मास्मी ति श्रवणादिकृतात्तत्साक्षात्कारादिति यावत्॥ अब्रह्मत्वादिधीध्वस्तिस्तर्हि कथमित्याशंक्याह॥ तां त्विति॥ वृत्तमनूद्योत्तरग्रंथमवतारयति॥ परिसमाप्त इति॥ यस्य शा स्त्रस्यार्थो विषयप्रयोजनाख्यो ब्रह्मकंडिकायां चतुर्थादौ च प्रस्तुतस्तस्यार्थो यथोक्तन्यायेन निर्धारित इत्यनुवादार्थः॥ सर्वात्मभूतत्वं सर्पादिवत्कल्पितानां सर्वेषामात्मभावे

सर्वंब्रह्मतद्रूपत्वंसर्वात्मत्वंसर्वएतआत्मानइतिकुतोभेदोक्तिरात्मैक्यस्यशास्त्रीयत्वादित्याशंक्याह॥जलचंद्रवदिति॥दार्ष्टांतिकभागस्यसंपिंडितमर्थमाह॥
सर्वमिति॥उक्तस्यसर्वात्मभावस्यतृतीयेनैकवाक्यत्वंनिर्दिशति॥यदुक्तमिति॥सर्वात्मभावेविदुषःसप्रपंचत्वंस्यादित्याशंक्याह॥सएषइति॥सर्वेणकल्पि
तेनद्वैतेनसहितमधिष्ठानभूतंब्रह्मप्रत्यग्भावेनपश्यन्विद्वान्सर्वोपाधिस्तद्रूपेणस्थितःसर्वोभवतितदेवंकल्पितंसप्रपंचत्वमविद्वद्दृष्ट्याविदुषोभीष्टमित्यर्थः॥

जलचंद्रवत्प्रतिशरीरानुप्रवेशिनोऽविद्याकल्पिताःसर्वंजगदस्मिन्समर्पितं॥यदुक्तंब्रह्मविद्वामदेवःप्रतिपेदेऽहंमनुरभवंसूर्यश्चेतिसएष
सर्वात्मभावोव्याख्यातःसएषविद्वान्ब्रह्मवित्सर्वोपाधिःसर्वात्मासर्वोभवतिनिरुपाधिर्निरुपाख्योनंतरोबाह्यःकृत्स्नःप्रज्ञानघनोऽजोजरोऽ
मरोऽमृतोऽभयोऽचलोनेतिनेत्यस्थूलोनणुरित्येवंविशेषणोभवतितमेतमर्थमजानंतस्तार्किकाःकेचनपंडितंमन्याश्चागमविदःशास्त्रार्थंविरुद्धं

तद्यथारथनाभौचरथनेमौचाराःसर्वेसमर्पितास्एवमेवास्मिन्नात्मनिसर्वाणिभूतानिसर्वेदेवाःसर्वेलोकाःसर्वेप्राणाःसर्वए
तआत्मानःसमर्पिताः॥५९॥ मन्यमानाःविकल्पयंतोमोहमगाधमुपयांति॥तमेतमर्थमेतौमंत्रावनुवदतःअनेजदेकंमनसोजवीय
स्तदेजनितन्नेजतीतितथाचतैत्तिरीयकेयस्मात्परंनापरमस्तिकिंचिदेतत्सामगायन्नास्तेऽहमन्नमहमन्नमित्यादितथाचछांदोग्येजक्ष
न्क्रीडन्रममाणःसयदिपितृलोककामःसर्वगंधःसर्वरसःसर्वज्ञःसर्वविदित्यादि विद्वद्दृष्ट्यातस्यनिष्प्रपंचत्वंदर्शयति॥निरुपाधिरिति॥निरुपाख्य
त्वंशब्दप्रत्ययागोचरत्वंब्रह्मणःसप्रपंचत्वमविद्याकृतंनिष्प्रपंचत्वंतात्त्विकमित्यागमार्थाविरोधउक्तःकथंतर्हितार्किकमीमांसकाश्चशास्त्रार्थंविरुद्धंपश्यंतो
ब्रह्मास्तिनास्तीत्यादिविकल्पयंतोमोमुह्यंतेतत्राह॥तमेतमिति॥वादियामोहस्याज्ञानंमूलमुक्त्वाप्रकृतेब्रह्मणोद्वैरूप्येप्रमाणमाह॥तमित्यादिना॥तैत्तिरीय

छांदोग्यश्रुतावादिशब्देनसत्यकामःसत्यसंकल्पोविजरोविमृत्युरित्यादिगृहीतं॥श्रुतिसिद्धेर्द्वैरूप्येस्मृतिमपिसंवादयति तथेति॥पूर्वोक्तप्रकारेणागमार्थवि
रोधसमाधानेविद्यमानेपितदज्ञानाद्धादिविभ्रांतिरित्युपसंहरति॥इत्येवमादीति॥विकल्पमेवस्फुटयति॥अस्तीति॥सर्वत्रश्रुतिस्मृतिष्वात्मनीतिया
वत॥केतर्हिपारंब्रह्मविद्यायाःसमधिगच्छंतितत्राह॥तस्मादिति॥ब्रह्मज्ञानफलमाह॥तएवेति॥५०॥तद्यथेत्यादिवाक्यार्थविस्तरेणोक्त्वाद्वंतंकीर्त

आथर्वणेचदूरात्सुदूरेतदिहांतिकेचकठवल्लीष्वणोरणीयान्महतोमहीयान्कस्तंमदामदंतदधावतोन्यानत्येतितिष्ठदितिच॥तथा
गीतासुअहंक्रतुरहंयज्ञःपिताहमस्यजगतोनादत्तेकस्यचित्पापंसमंसर्वेषुभूतेषुअविभक्तंविभक्तेषुग्रसिष्णुप्रभविष्णुचेत्येवमाद्या
गमार्थविरुद्धमिवप्रतिभातंमन्यमानाःस्वचित्तसामर्थ्यादर्थनिर्णयायविकल्पयंतोस्त्यात्मानास्त्यात्माकर्ताकर्तामुक्तोबद्धःक्षणिकोवि
ज्ञानमात्रंशून्यंचेत्येवंविकल्पयंतोनपारमधिगच्छंत्यविद्यायाःविरुद्धधर्मदर्शित्वात्सर्वत्रतस्मात्तत्रयएवश्रुत्याचार्यदर्शितमार्गानुसारि
णस्तएवाविद्यायाःपारमधिगच्छंतितएवचास्मान्मोहसमुद्रादगाधादुत्तरिष्यंतिनेतरेस्वबुद्धिकौशलानुसारिणः॥५१॥परिसमाप्ताब्रह्म
विद्याऽमृतत्वसाधनभूतायांमैत्रेयीपृष्टवतीभर्तारंयदेवभगवानमृतत्वसाधनंवेदतदेवमेब्रूहीतिएतस्याःब्रह्मविद्यायाःस्तुत्यर्थेयमा
ख्यायिकाआनीतातस्याआख्यायिकायाःसंक्षेपतोर्थप्रकाशनार्थावेतौमंत्रौभवतःएवंहिमंत्रब्राह्मणाभ्यांस्तुतत्वादमृतत्वंसर्वप्राप्तिसाध
नत्वंब्रह्मविद्यायाःप्रकटीकृतंराजमार्गमुपनीतंभवति॥यथा यति॥परिसमाप्तेति॥ब्रह्मविद्यापरिसमाप्ताचेत्किमुत्तरग्रंथेनेत्याशंक्याह॥एतस्या
इति॥इयमिति प्रवर्ग्यप्रकरणस्यामाख्यायिकांपरामृशति॥आनीतेदंवैतन्मधित्यादिनाब्राह्मणेनेतिशेषः॥तदेतदृषिरित्यादेस्तात्पर्यमाह॥तस्याइति॥
तद्वांनरेत्यादिरेकोमंत्रः॥आथर्वणायेत्यादिपरः॥मंत्रब्राह्मणाभ्यांवक्ष्यमाणरीत्याब्रह्मविद्यायाःस्तुतत्वेकिंसिध्यतीत्याशंक्याह॥एवंहीतितस्याःमुक्तिसाधन

बृ॰र॰
६३

केनप्रकारेणब्रह्मविद्यायाःस्तुतत्वंतदाह॥अपिचेति॥अपिशब्दःस्तावकब्राह्मणसंभावनार्थः॥मंत्रद्वयसमुच्चयार्थश्चशब्दः॥एवंशब्दसूचितंस्तुतिप्रकारमे
वप्रकटयति॥इंद्रेति॥तस्मादुष्प्रापत्वेहेतुमाह॥यस्मादिति॥महांतमायासंस्फुटयति॥ब्राह्मणस्येति॥कृतार्थेनापींद्रेणरक्षितत्वेविद्यायाःदौर्लभ्येफलितम
ह॥तस्मादिति॥नकेवलमुक्तेनप्रकारेणविद्यास्तूयतेकिंतुप्रकारांतरेणापीत्याह॥अपिचेति॥तदेवप्रकारांतरंप्रकटयति॥सर्वेति॥केवलयेत्यस्यव्याख्यानं॥

आदित्यउद्यन्कार्वरंतमोपनयतीतितद्वत्॥अपिचैवंस्तुताब्रह्मविद्यायाइंद्रराजरक्षितासादुष्प्राप्यादेवैरपि॥यस्मादश्विभ्यामपिदेवभिष
ग्भ्यामिंद्ररक्षिताविद्यामहतायासेनप्राप्ताब्राह्मणस्यशिरश्छित्वाश्व्यंशिरःप्रतिसंधायतस्मिन्निंद्रेणछिंनेपुनःस्वशिरएवप्रतिसंधायतेन
ब्राह्मणस्यस्वशिरसैवोक्ताशेषाब्रह्मविद्याश्रुतातस्मान्नतःपरतरंकिंचित्पुरुषार्थसाधनंनभूतंनभाविवाकुतएववर्त्तमानमितिनातःपरास्तु
तिरस्तिअपिचैवंस्तूयतेब्रह्मविद्यासर्वपुरुषार्थानांकर्महिसाधनमितिलोकेप्रसिद्धंतच्चकर्मवित्तसाध्यंतेनाशापिनास्तिअमृतत्वस्ययदिदम
मृतत्वंकेवलयात्मविद्ययाकर्मनिरपेक्षयाप्राप्यतेयस्मात्कर्मप्रकरणेवक्तुंप्राप्तापिसतीप्रवर्ग्यप्रकरणेकर्मप्रकरणादुत्तीर्यकर्मणावि
रुद्धत्वात्केवलसंन्याससहिताभिहिताःमृतत्वसाधनायतस्मान्नातःपरंपुरुषार्थसाधनमस्तिअपिचैवंस्तुताब्रह्मविद्यासर्वोहिलोकोद्वंद्वा
रामःसर्वेनैवरेमेतस्मादेकाकीनरमतेइतिश्रुतेर्याज्ञवल्क्योलोकसाधारणोपिसन्नात्मज्ञानबलाद्भार्यापुत्रवित्तादिसंसाररतिंपरित्यज्यप्र
ज्ञानतृप्तआत्मरतिर्बभूव॥अपिचैवंस्तुताब्रह्मविद्यायस्माद्याज्ञवल्क्येनसंसारमार्गाद्व्युत्तिष्ठतापिप्रियायैभार्यायैप्रीत्यर्थमेवाभिहिता कर्मनिरपेक्ष

येति॥तत्रहेतुः॥यस्मादिति॥किमितिकर्मप्रकरणेप्राप्तापिप्रकरणांतरेकथ्यतेतत्राह कर्मणेतिप्रसिद्धंपुमर्थोपायंकर्मेत्यत्वाविद्यायामेवादरेतदधिकतासमधिग
तेतिफलितमाह॥तस्मादिति॥प्रकारांतरेणब्रह्मविद्यायाःस्तुतिंदर्शयति॥अपिचेति॥अनात्मासक्तिंत्यक्त्वात्मन्येवात्मरतिहेतुत्वान्महतीयंविद्येत्यर्थः॥विधांतरे

अ॰
४

रामः
६३

प्रकारेण २ कैरस्यंमधुइयंपृथिवीसर्वेषामित्यादि ४

कथंब्रह्मविद्याभार्यायैप्रीत्यर्थमेवोक्तेतिगम्यतेतत्राह॥ प्रियमिति आख्यायिकायाःस्तुत्यर्थत्वंप्रतिपाद्यतत्तमनूद्याकांक्षापूर्वकंतामवतार्यव्याकरोति॥ तत्रेत्या
दिना॥ ब्रह्मविद्यासप्तम्यर्थः॥ पदार्थमुक्त्वावाक्यार्थमाह॥ यदिति॥ दध्यङ्ङित्यादिव्याकुर्वन्नाकांक्षापूर्वकंप्रवर्ग्यप्रकरणस्थामाख्यायिकामनुकीर्तयति॥ कथ
मित्यादिना॥ आभ्यामश्विभ्यामितियावत्॥ केनक्रमेणोवाचेत्यपेक्षायामाह॥ तदेनयोरिति॥ एनयोरश्विनोस्तन्मधुप्रीत्यास्पदमासीत्तद्दृष्ट्वाताभ्यांप्रार्थितोब्रा

प्रियंभाषसएह्यास्वेतिलिंगात्तत्रेयंस्तुत्यर्थाख्यायिकेत्यवोचामकापुनःसाऽऽख्यायिकेत्युच्यतेइदमित्यनंतरनिर्दिष्टंव्यपदिशतिबु
द्धौसंनिहितत्वाद्धिशब्दःस्मरणार्थः तदित्याख्यायिकानिर्वृत्तंप्रकरणांतराभिहितंपरोक्षंवैशब्देनस्मारयन्निहव्यपदिशतियत्त
त्प्रवर्ग्यप्रकरणेसूचितंनाविष्कृतंमधुतदिदंमधुइहानंतरंनिर्दिष्टंइयंपृथिवीत्यादिना॥ कथंतत्रप्रकरणांतरेसूचितंदध्यङ्हवाआ
भ्यामाथर्वणोमधुनामब्राह्मणमुवाचतदेनयोःप्रियंधामतदेवैनयोरेतेनोपगच्छति॥ सहोवाचेंद्रेणवाउक्तोऽस्म्येतच्चेदन्यस्माअनुब्रूया
स्ततएवतेशिरश्छिंद्यामितितस्माद्वैबिभेमियद्वैमेसशिरोनछिंद्यात्तद्वामुपनेष्यइतितौहोचतुरावांत्वातस्मात्त्रास्यावहेइतिकथंमात्रास्ये
थेइतियदानौउपनेष्यसेऽथतेशिरश्छित्त्वान्यत्राहृत्योपनिधास्यावोऽथाश्वस्यशिरआहृत्यतत्तेप्रतिधास्यावस्तेननावनुवक्ष्यसिसयदाना
वनुवक्ष्यसिअथतेतदिंद्रःशिरश्छेत्स्यत्यथतेस्वंशिरआहृत्यतत्तेप्रतिधास्यावइतितथेतितौहोपनिन्येतौयदोपनिन्येऽथास्यशिरश्छित्त्वा
न्यत्रोपनिदधतुः ह्मणस्तदुवाचेत्यर्थः॥ यदश्विभ्यांमधुप्रार्थितंतदेतेनवक्ष्यमाणेनप्रकारेणप्रयच्छन्नेवैनयोरश्विनोराचार्यत्वेनब्राह्मणःसमीपगमनंक
तवानित्याह॥ तदेवेति॥ आचार्यत्वानंतरंब्राह्मणस्यवचनंदर्शयति॥ सहोवाचेति॥ एतच्छब्दोमध्वनुभवविषयः॥ यद्यर्थोयच्छब्दस्तच्छब्दस्तर्हीत्यर्थोवांयु
वामुपनेष्येशिष्यत्वेनस्वीकरिष्यामीतियावत्॥ तौदेवभिषजावश्विनौशिरःछेदनिमित्तंमरणंपंचम्यर्थः॥ नावावामुपनेष्यसेशिष्यत्वेनस्वीकरिष्यसियदे
सहोवाचेत्यादिनायावत्त्वित्यस्मात्पूर्वकंडिकात्रयंप्रवर्ग्यकांडस्यप्रथमब्राह्मणस्थं ७

अथशब्दस्तदेत्यर्थोब्राह्मणस्यानुज्ञानंतर्यमथेत्युक्तंमधुप्रवचनानंतर्यंतृतीयस्याथशब्दस्यार्थः यदश्वस्यशिरोब्राह्मणेनिबद्धंतस्यच्छेदनानंतर्यंचतुर्थ
स्याथशब्दस्यार्थः॥तर्हिसमस्तमपिमधुप्रवर्ग्यप्रकरणेप्रदर्शितमेवेतिकृतमनेनब्राह्मणेनेतीत्याशंक्याह॥यावत्त्विति॥प्रवर्ग्यप्रकरणेस्थिताख्यायिका
किमर्थमत्रानीतेत्याशंक्यैतस्याःब्रह्मविद्यायाःस्तुत्यर्थेयमाख्यायिकेत्यत्रोक्तमुपसंहरति॥तत्रेति॥ब्राह्मणभागव्याख्यांनिगमयति॥इदमिति॥तद्वामित्या

अथाश्वस्यशिरआहृत्यतद्धास्यप्रतिदधतुस्तेनचाभ्यामनूवाचसयदाभ्यामनूवाचाथास्यतदिंद्रःशिरश्छिच्छेदाथास्यस्वंशिरःआहृत्यतद्धास्य
प्रतिदधतुरितियावत्तुप्रवर्ग्यकर्मांगभूतंमधुतावदेवतत्राभिहितंनतुकक्ष्यंआत्मज्ञानाख्यंतत्रयाआख्यायिकाऽभिहितासेहस्तुत्यर्थाप्रदर्श्य
ते॥इदंवैतन्मधुदध्यङ्ङाथर्वणोऽनेनप्रपंचेनाश्विभ्यामुवाचतदेतदृषिःतदेतत्कर्मऋषिर्मंत्रःपश्यन्नुपलभमानअवोचतउक्तवान्कथंतद्दंस

इदंवैतन्मधुदध्यङ्ङाथर्वणोश्विभ्यामुवाचतदेतदृषिःपश्यन्नवोचत्तद्वांनरासनयेदंसउग्रमाविष्कृणोमितन्यतुर्नवृष्टिं

इतिव्यवहितेनसंबंधःदंसइतिकर्मणोनामधेयंतद्दंसःकिंविशिष्टंउग्रंक्रूरंवांयुवयोःहेनराहेनराकारौअश्विनौतच्चकर्मकिंनिमित्तंसनये
लाभायलाभलुब्धोहिलोकेपिक्रूरंकर्माचरतितथैवैतौउपलभ्येतेयथालोकेतदाविःप्रकाशंकृणोमिकरोमियद्रहसिभवद्भ्यांकृतंकिमिवेत्युच्यते
तन्यतुःपर्जन्यःनइव॥नकारस्तूपरिष्टादुपचारःउपमार्थीयोवेदे॥नप्रतिषेधार्थःयथाश्वंनअश्वमिवेतिपद्दृत दिमंत्रमुत्थाप्यव्याचष्टे॥तदेतदिति॥कथंलाभा
यापिक्रूरकर्मानुष्ठानमतआह॥लाभेति॥ननुप्रतिषेधेमुख्योनकारःकथमिवार्थेव्याख्यायतेतत्राह॥नकारस्त्विति॥वेदेपदादुपरिष्टाद्योनकारःश्रुतःसखलूपचारःस
तूपमार्थोपिसंभवतिननिषेधार्थएवेत्यर्थः॥तत्रोदाहरणमाह॥यथेति॥अश्वंनगूढमश्विनेत्यत्रनकारोयथोपमार्थीयस्तथाप्रकृतेपीत्यर्थः॥तदेवस्पष्टयति॥अश्वमिवे
अन्येद्युःशाकंद

यद्दिशुपमार्थीयेनकारेसतिवाक्यस्वरूपमनूद्यतदर्थंकथयति॥तन्यतुरित्यादिना॥विद्यास्तुतिद्वारातद्दंतावश्विनावत्रनस्तूयेतेकिंतुक्रूरकर्मकारित्वेननिं
द्येतेतदाप्याख्यायिकाविद्यास्तुत्यर्थत्वयुक्तमितिशंकतेनन्विति॥आख्यायिकायाविद्यास्तुत्यर्थत्वमविरुद्धमितिपरिहरति॥नैषइति लोममात्रमपिनहीं
यतेयस्मात्तस्माद्विद्यास्तुत्यातद्दतोस्तुतिरेवात्रविवक्षितेतियोजना॥यद्यपिक्रूरकर्मकारिणोरश्विनोर्नदृष्टहानिस्तथाप्यदृष्टहानिःस्यादेवेत्याशंक्यकै
मुतिकन्यायेनाह॥नचेति॥कथंपुनर्निंदायांदृश्यमानायांस्तुतिरिष्यतेतत्राह॥निंदामिति॥नहिनिंदानिंद्यंनिंदितुमपितुविधेयंस्तोतुमितिन्यायादित्यर्थः॥

तन्यतुरिववृष्टिंयथापर्जन्योवृष्टिंप्रकाशयतिस्तनयित्वादिशब्दैस्तद्वद्दंहंयुवयोःक्रूरंकर्माविष्कृणोमीतिसंबंधः॥नन्वश्विनोःस्तुत्यर्थैकथ
मिमौमंत्रौस्यातांनिंदावचनौहीमौनैषदोषःस्तुतिरेवैषाननिंदावचनौयस्मादीदृशमपिअतिक्रूरंकर्मकुर्वतोर्युवयोर्नलोमचनमीयतइति

दध्यङ्ह यन्मध्वाथर्वणोवामश्वस्यशीर्ष्णाप्रयदीमुवाचेति

नचान्यत्किंचिद्धीयतस्वेतिस्तुतावेतौभवतःनिंदाप्रशंसांहिलौकिकाःस्मरंतितथाप्रशंसारूपाचनिंदालोकेप्रसिद्धा॥दध्यङ्नामाथर्वणः
हइतिअनर्थकोनिपातःयन्मधुकक्ष्यमात्मज्ञानलक्षणमाथर्वणोवांयुवाभ्यामश्वस्यशीर्ष्णाशिरसाप्रयदींमुवाचयत्प्रोवाचमधुईमित्यन
र्थकौनिपातः॥६०॥इदंवैतन्मध्वित्यादिपूर्ववन्मंत्रांतर यथानिंदाननिंद्यंनिंदितुमेवतथास्तुतिरपिस्तुत्यंस्तोतुमेवनभवतिकिंतुनिंदितुमपितथाचनौ
नयोर्व्यवस्थितत्वमित्याह॥तथेति॥तद्वामित्यादिमंत्रस्यपूर्वार्धव्याख्यायाख्यायिकायाःस्तुत्यर्थत्वविरोधंचोधृत्यउत्तरार्धंव्याचष्टे॥दध्यङ्नामेति॥यत्कक्ष्यंज्ञानाख्यं
मधुतदाथर्वणोयुवाभ्यामश्वस्यशिरसाप्रोवाचयच्चासौमधुयुवाभ्यामुक्तवांस्तदहमाविष्कृणोमीतिसंबंधः॥समानार्थत्वेकिमितिपुनरुच्यतेतत्राह॥मंत्रांतरेति॥

पूर्वब्राह्मणेनास्यब्राह्मणस्य१ =३ निंदास्तुत्योः

प्रशब्दस्यउवाचेतिक्रियापदेनसंबंधः=५

तुल्यार्थस्यब्राह्मणस्यतात्पर्यमाह॥तथेति॥विशेषणकृत्यंदर्शयन्व्याकरोति॥दध्यङ्नामेति॥प्रथममश्व्यमित्यादिपदार्थवचनमश्वस्येत्यादौछित्वेत्यस्यकर्मोक्तिः॥अश्व्यंशिरइत्यत्रत्वन्वयार्थमुक्तमितिविभागः॥प्रेक्षापूर्वकारिणामीदृशीप्रवृत्तिरयुक्तेतिशंकित्वासमाधत्ते॥सकिमर्थमिति॥ऋतायन्नित्यत्रार्थप्रदर्शनार्थंतथान्योमंत्रस्तामेवाख्यायिकामनुसरतिस्मआथर्वणोदध्यङ्नामाऽथर्वणोऽन्योविद्यतइतिअतोविशिनष्टिदध्यङ्नामाथर्वणस्तस्मैदधीचेआथर्वणायहेअश्विनावितिमंत्रदृशोवचनमश्व्यमश्वस्यसंभूतंशिरोब्राह्मणस्यशिरसिछिन्नेअश्वस्यशिरश्छित्वाईदृशमतिक्रूरंकर्मकृत्वाऽश्व्यंशिरोब्राह्मणंप्रतिऐरयतंगमितवंतौयुवांसचआथर्वणोवांयुवाभ्यांतन्मधुप्रवोचत्यत्पूर्वंप्रतिज्ञातंवक्ष्यामीति॥सकिमर्थमेवंजीवितसंदेहमारुह्यप्रावोचदित्युच्यतेऋतायन्यत्पूर्वंप्रतिज्ञातंसत्यंतत्परिपालयितुमिच्छन्जीवितादपिहिसत्यधर्मपरिपालनागुरु

इदंवैतन्मधुदध्यङ्ङाथर्वणोऽश्विभ्यामुवाचतदेतदृषिःपश्यन्नवोचत्आथर्वणायाश्विनादधीचेऽश्व्यꣳशिरःप्रत्यैरयतंसवांमधुप्रवोचदृतायन्त्वाष्ट्रंयद्दस्रावपिकक्ष्यंवामिति॥६१॥ तरेत्येतस्यलिंगमेतत्किंतन्मधुप्रवोचदित्युच्यतेत्वाष्ट्रंत्वष्टाऽदित्यःतस्यसंबंधियज्ञस्यशिरश्छिन्नंत्वष्टाभवत्तत्प्रतिसंधानार्थंप्रावर्ग्यंकर्मतत्रप्रावर्ग्यकर्मांगभूतंयद्विज्ञानंतत्त्वाष्ट्रंमधुयज्ञस्यशिरश्छेदनप्रतिसंधानादिविषयंदर्शनंत्वाष्ट्रंयन्मधुहेदस्रौदस्रावितिपरबलानामुपक्षयितारौशत्रूणांवाहिंसितारौअपिचनकेवलंत्वाष्ट्रमेवमधुकर्मसंबंधियुवाभ्यामवोचदपिचकक्ष्यंगोप्यंरहस्यंपरमात्मसंबंधियद्विज्ञानंमधुमधुब्राह्मणेनोक्त सिद्धमर्थंकथयति॥जीवितादपीति॥यज्ञस्यशिरोछिद्यततदेवअश्विनावब्रुवद्भिषजौवैआवांइदंयज्ञस्यशिरःप्रतिधत्तमित्यादिश्रुत्यंतरमाश्रित्याह॥यज्ञस्येत्यादिना॥प्रवर्ग्यकर्मण्येवंप्रवृत्तेपिविज्ञानेकिमायातंतदाह॥तत्रेति॥उक्तमेवसंगृह्णाति॥यज्ञस्येति॥यद्यथोक्तदर्शनंत

अध्यायद्वयप्रकाशितं तत्तीयचतुर्थाभ्यामध्यायाभ्यां प्रकटितमिति यावत्॥ १६॥ उक्तमंत्राभ्यां वक्ष्यमाणमंत्रयोरपुनरुक्तत्वार्थवत्त्वं वक्तुं वृत्तं कीर्तयति॥ उ
क्ताविति॥ आख्यायिकाविशेषणप्राप्तं संकोचं परिहरति॥ द्वयोरिति॥ उत्तरमंत्रद्वयप्रवृत्तिं प्रतिजानीते॥ ब्रह्मेति॥ संप्रत्यवांतरसंगतिमाह॥ यत्सस्वं चेति
॥ हिरण्यगर्भकर्तृकं शरीरनिर्माणमत्र नोच्यते किंतु प्रकरणबलादीश्वरकर्तृकमित्याह॥ यत इति॥ शरीरसृष्ट्यपेक्षया लोकसृष्टिप्राथम्यं पुरस्तादेहसृष्ट्यनं

मध्यायद्वयप्रकाशितं तत्त्वं वां युवाभ्यां प्रावोचदित्यनुवर्तते॥ १६॥ इदं वै तन्मध्विति पूर्ववदुक्तौ द्वौ मंत्रौ प्रवर्ग्यसंबंध्याख्यायिकोपसंहर्त्तारौ द्व
योः प्रवर्ग्यकर्मार्थयोरध्याययोरर्थः आख्यायिकाभूताभ्यां मंत्राभ्यां प्रकाशितो ब्रह्मविद्यार्थयोस्त्वध्याययोरर्थ उत्तराभ्यामृग्भ्यां प्रकाशयित
व्य इत्यतः प्रवर्त्तते यत्सस्वं च मधूक्तवानाथर्वणो युवाभ्यामित्युक्तं किं पुनस्तन्मध्वित्युच्यते॥ पुरश्चक्रे पुरः पुराणि शरीराणि यत इयमव्याकृतव्या

इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच तदेतदृषिः पश्यन्नवोचत्॥ पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः

करणप्रक्रिया स परमेश्वरो नामरूपे अव्याकृते व्याकुर्वाणः प्रथमं भूरादीन्लोकान्सृष्ट्वा चक्रे कृतवान् द्विपदो द्विपादुपलक्षितानि मनुष्य
शरीराणि तथा पुरः शरीराणि चक्रे चतुष्पदश्चतुष्पादुपलक्षितानि पशुशरीराणि पुरः पुरस्तात्स ईश्वरः पक्षी लिंगशरीरं भूत्वा पुरः शरीराणि पु
रुष आविशदित्यस्यार्थमाचष्टे श्रुतिः स वा अयं पुरुषः सर्वासु पूर्षु सर्वशरीरेषु पुरिशयः पुरि शेत इति पुरिशयः सन्पुरुष इत्युच्यते नैनेनानेन
किंचन किंचिदपि अनावृतं अनाच्छादितं तथा नैनेन किंचनासंवृतं अंतरननुप्रवेशितं॥ बाह्यतरं प्रवेशात्पूर्वमिति यावत्॥ स हि सर्वेषु शरीरेषु वर्त्तमानः पु
रिशेत इति व्युत्पत्त्या पुरिशयः सन्पुरुषो भवतीत्युक्त्वा प्रकारांतरेण पुरुषत्वं व्युत्पादयति॥ नेत्यादिना॥ वाक्यद्वयस्यैकार्थत्वमाशंक्य सर्वं जगदोतप्रोतत्वेनात्मव्याप्तिमि

त्यर्थविशेषमाश्रित्याह॥ बाह्येति॥

सकृदुच्चरितंद्धित्वबहुत्वबोधकंतंत्रं=२ मधुब्राह्मणं १

पूर्णत्वेसत्यात्मनोदिव्योह्यमूर्तइत्यादिश्रुतिमाश्रित्यफलितमाह॥एवमिति॥मंत्रब्राह्मणयोरर्थवैमत्यमाशंक्याह॥पुरइति॥१८॥प्राचीनमेवब्राह्मणमनूद्य
मंत्रांतरमवतारयति॥इदमिति॥प्रतिशब्दस्तंत्रेणोच्चरितः॥रूपंरूपमुपाधिभेदंप्रतिप्रतिरूपोरूपांतरंप्रतिबिंबरूपंबभूवेत्येतत्प्रतिरूपोबभूवेत्यत्र
विवक्षितमितियोजना॥अनुरूपोवेत्युक्तंविवृणोति॥यादृगित्यादिनाउक्तमर्थमनुभवारूढंकरोति॥नहीति॥रूपांतरभवनेकर्त्रंतरंवारयति॥सएव

भूतेनांतर्भूतेनचनानावृतमेवंसएवनामरूपात्मनांतर्बहिर्भावेनकार्यकरणरूपेणव्यवस्थितःपुरश्चक्रइत्यादिमंत्रःसंक्षेपतःआत्मैकत्व
माचष्टइत्यर्थः॥१८॥इदंवैतन्मध्वित्यादिपूर्ववत्॥रूपंरूपंप्रतिप्रतिरूपोरूपांतरंबभूवेत्यर्थःप्रतिरूपोनुरूपोवायादृक्संस्थानौमातापि
तरौतत्संस्थानस्तदनुरूपएवपुत्रोजायते॥नहिचतुष्पदोद्विपाज्जायतेद्विपदोवाचतुष्पात्सएवहिपरमेश्वरोनामरूपेव्याकुर्वाणोरूपं

परःसपक्षीभूत्वापुरःपुरुषआविशदितिसवाअयंपुरुषःसर्वासुपूर्षुपरिशयोनैनेनकिंचनानावृतंनैनेनकिंचनासंवृतं॥१८॥
इदंवैतन्मधुदध्यङ्ङाथर्वणोश्विभ्यामुवाचतदेतदृषिःपश्यन्नवोचत्॥रूपं२रूपंप्रतिरूपोबभूवतदस्यरूपंप्रतिचक्षणाय॥इंद्रो
मायाभिःपुरुरूपईयते॥ रूपंप्रतिरूपोबभूवकिमर्थंपुनःप्रतिरूपमागमनंतस्येत्युच्यतेतदस्यात्मनोरूपंप्रतिचक्षणायप्रतिख्यापनाययदि
हिनामरूपेनव्याक्रियेतेतदास्यात्मनोनिरुपाधिकंरूपंप्रज्ञानघनाख्यंनप्रतिख्यायेतयदापुनःकार्यकरणात्मनानामरूपेअव्याकृतेव्याकृतेभव
तःतदास्यरूपंप्रतिख्यायेतइंद्रःपरमेश्वरोमायाभिःप्रज्ञाभिःनामरूपभूततत्कृत हीति॥प्रतिख्यापनायशास्त्राचार्यादिभेदेनतत्प्रकाशनाये
त्यर्थः॥तदेवव्यतिरेकेणान्वयेनचस्फुटयति॥यदिहीत्यादिना॥मायाभिःप्रज्ञाभिरितिपरपक्षमुक्त्वास्वपक्षमाह॥मायाभिरिति ॥

मिथ्याधीहेतुभूतानाद्यनिर्वाच्यदंडायमानाज्ञानवशादेषबहुरूपोभातिप्रकारभेदात्तुबहूक्तिरितिवाक्यार्थमाह॥एकरूपएवेति॥अविद्याप्रज्ञाभिर्बहु
रूपोगम्यतेइतिपूर्वेणसंबंधः॥परस्यबहुरूपत्वेनिमित्तंप्रश्नपूर्वकंनिवेदयति॥कस्मादित्यादिना॥यथारथेषुयुक्तावाजिनोरथिनंस्वगोचरंदेशंप्रणयि
तुंप्रवर्त्ततेतथास्यप्रतीचोरथस्थानीयेशरीरेयुक्ताहरयःस्वविषयप्रकाशनायपस्मात्प्रवर्त्ततेतस्मादिंद्रियाणांतद्विषयाणांचबहुलत्वात्तद्रूपैरेषबहुरूपोभ
वतीतियोजना॥हरिशब्दस्येंद्रियेषुप्रवृत्तौनिमित्तमाह॥हरणादिति॥प्रतीचोविषयान्प्रतीतिशेषः॥इंद्रियबाहुल्येहेतुमाह॥प्राणीति॥इंद्रियविषयबा

मिथ्याभिमानैर्वानतुपरमार्थतःपुरुरूपोबहुरूपईयतेगम्यतेएकरूपएवप्रज्ञानघनःसन्नविद्याप्रज्ञाभिः॥कस्मात्पुनःकारणाद्युक्तार
थइववाजिनःस्वविषयप्रकाशनायहियस्मादस्यहरयोहरणादिंद्रियाणिशताशतानिदशचप्राणिभेदबाहुल्यात्कृतानिदशचभवंतितस्मा

युक्ताह्यस्यहरयःशतादश

दिंद्रियविषयबाहुल्यात्तत्प्रकाशनायैवचयुक्तानिनात्मप्रकाशनायपरांचिखानिव्यतृणत्स्वयंभूरितिहिकाठकेतस्मात्तैरेवविषयस्वरू
पैरीयते॥नप्रज्ञानघनैकरसेनस्वेनरूपेणएवंतर्ह्ययमन्यःपरमेश्वरोअन्येहरयइत्येवंप्राप्तेउच्यते॥अयंवैहरयोऽयंवैदशचसहस्राणिबहूनिचा
नंतानिच

हुल्यात्तत्त्यगात्माबहुरूपइतिशेषः॥नन्वात्मानंप्रकाशयितुमिंद्रियाणिप्रवृत्तानिनतुरूपादिकमेवतत्कथंतद्विषयवशादात्मनोन्यथाप्रथेत्याशं
क्याह॥तत्प्रकाशनायेति॥तस्मादिंद्रियविषयबाहुल्यादित्यत्रोक्तमुपसंहरति॥तस्मादिति॥यद्वायथोक्तश्रुतिवशेनलब्धमर्थमाह॥तस्मादिति॥यस्मादिंद्रिया
णिपराग्विषयेप्रवृत्तानितस्मात्तैरिंद्रियैर्विषयस्वरूपैरेवायंप्रत्यगात्मागम्यते॥नतुस्वासाधारणेनरूपेणेत्यर्थः॥युक्ताहीतिसंबंधमाश्रित्यशंकते॥एवंतर्हीति॥

अयमित्यादिवाक्येनपरिहरति॥अयमिति॥

बृ॰र॰
६७

अयमात्माब्रह्म १

तत्तदिंद्रियादिरूपेणात्मन एवाविद्यया भानात्संबंधस्य कल्पितत्वान्नाद्वैतहानिरित्यर्थः॥ इंद्रियानंत्ये हेतुमाह॥ प्राणिभेदस्येति॥ वाक्यार्थव्याख्यानार्थमि-
त्थंगतेन तत्संदर्भेण भूमिकामारचय्य तत्परं वाक्यमवतार्य व्याकरोति॥ किंबहुनेत्यादिना॥ न केवलमध्यायद्वयस्यैवार्थः संक्षिप्योपसंहृतः किंतु स-

अ॰
४

प्राणिभेदस्यानंत्यात्॥ किंबहुना तदेतद्ब्रह्म य आत्मा अपूर्वं नास्य कारणं पूर्वं विद्यत इत्यपूर्वं नास्यापरं कार्यं विद्यत इत्यनपरं नास्य जात्यंत-
रमंतराले विद्यत इत्यनंतरं अबाह्यं तथा बहिरस्य न विद्यत इत्यबाह्यं किं पुनस्तन्निरंतरं ब्रह्मायमात्मा कोसौ यः प्रत्यगात्मा द्रष्टा श्रोता मंता बो-

स्वयं वै हरयो यं वै दश च सहस्राणि बहूनि चानंतानि च तदेतद्ब्रह्मापूर्वमनपरमनंतरमबाह्यमयमात्मा ब्रह्म सर्वानुभूरित्यनुशा-
सनं॥ ६३॥ पंचमं ब्राह्मणं॥ अथ वंशः पौतिमाष्यो गौपवनाद्गौपवनः पौतिमाष्यात्पौतिमाष्यो गौपवनाद्गौपवनः कौशिकात्कौ-
शिकः कौंडिन्यात्कौंडिन्यः शांडिल्याच्छांडिल्यः कौशिकाच्च गौतमाच्च गौतमः॥ ६४॥ आग्निवेश्यादाग्निवेश्यः शांडिल्याच्चानभि-
म्लाताच्चानभिम्लात आनभिम्लातादानभिम्लात आनभिम्लातादानभिम्लातो गौतमाद्गौतमः सैतवप्राचीनयोग्याभ्यां

द्धा विज्ञाता सर्वानुभूः सर्वात्मना सर्वमनुभवतीति सर्वानुभूरित्येतदनुशासनं सर्ववेदांतोपदेशः एष सर्ववेदांतानामुपसंहृतोर्थः॥ ए-
तदमृतमभयं परिसमाप्तश्च शास्त्रार्थः॥ ॥ इति चतुर्थस्याध्यायस्य पंचमं ब्राह्मणं॥ ॥ अथेदानीं ब्रह्मविद्यार्थस्य मधुकांडस्य वंशः
स्तुत्यर्थो ब्रह्मविद्यायाः
र्ववेदांतानामित्याह॥ एष इति॥ तस्योभयविधपुरुषार्थरूपत्वमाह॥ एतदिति॥ वक्तव्यांतरपरिशेषशंकां परिहरति॥
परिसमाप्तश्चेति॥ इति चतुर्थस्य पंचमं ब्राह्मणं॥ ब्रह्मविद्यां संक्षेपविस्तराभ्यां प्रतिपाद्य वंशब्राह्मणतात्पर्यमाह॥ अथेति॥ महाजनपरिगृहीता हि ब्रह्मवि-

राम॰
६७

ब्राह्मणस्यार्थांतरमाह॥ मंत्रश्चेति॥ स्वाध्यायः स्वाधीनोच्चारणक्षमत्वे सत्यध्यापनं॥ जपस्तु प्रत्यहमावृत्तिरिति भेदः॥ यथोक्तरीत्या ब्राह्मणारंभे स्थि
तेवंशशब्दार्थमाह॥ तत्रेति॥ तदेव स्फुटयति॥ यथेति॥ शिष्यावसानोपलक्षणीभूतात्सौतिमाष्यादारभ्य तदादिर्वेदाख्यमूलपर्यंतोयंवंशः प
र्वणः पर्वणोभिद्यत इति संबंधः॥ वंशशब्देन निष्पन्नमर्थमाह॥ अध्यायचतुष्टयस्येति॥ अथात्र शिष्याचार्यवाचकशब्दाभावे कुतोन्वयस्येति

मंत्रश्चायं स्वाध्यायार्थो जपार्थश्च तत्र वंश इव वंशो यथा वेणुर्वंशः पर्वणः पर्वणो हि भिद्यते तद्वद् ग्रात्स्रभृत्यामूलप्राप्तेरयं वंशोऽध्यायच

सैतव प्राचीनयोग्यै पाराशर्यात्पाराशर्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्च गौतमाच्च गौतमो भरद्वाजाद्भरद्वाजः पाराशर्या
त्पाराशर्यो वैजवापायनाद्वैजवापायनः कौशिकायनेः कौशिकायनिः॥ ६५॥ घृतकौशिकात् घृतकौशिकः पाराशर्यायणात्पा
राशर्यायणः पाराशर्यात् पाराशर्यो जातूकर्ण्याज्जातूकर्ण्य आसुरायणाच्च यास्काच्चासुरायणस्त्रैवणेस्त्रैवणिरौपजंधनेरौपजंध
निरासुरेरासुरिर्भारद्वाजाद्भारद्वाज आत्रेयादात्रेयो मांटेर्मांटिर्गौतमाद्गौतमो गौतमाद्गौतमो वात्स्याद्वात्स्यः शांडिल्याच्छांडिल्यः
कैशोर्यात्काप्यात्कैशोर्यः काप्यः॥ कुमारहारितात्कुमारहारितो गालवाद्गालवो विदर्भीकौंडिन्याद्विदर्भीकौंडिन्यो वत्सनपा
तो बाभ्रवाद्वत्सनपाद्बाभ्रवः पथः सौभरात्पंथाः

तुष्टयस्याचार्यपरंपराक्रमो वंश इत्युच्यते॥ तत्र प्रथमांतः शिष्यः पंचम्यंतः आचा
र्यः परमेष्ठी विराड् ब्रह्मणो हिरण्यगर्भात्ततः परमाचार्यपरंपरा नास्ति

तत्राह॥ तत्रेति॥ परमेष्ठी ब्रह्मशब्दयोरेकार्थत्वमाशंक्याह॥ परमेष्ठी
ति॥ कुतस्तर्हि ब्रह्मणो विद्याप्राप्तिस्तत्राह॥ ततइति॥ स्वयंप्रतिभातवेदो हिरण्यगर्भो नाचार्यांतरमपेक्षते ईश्वरानुगृहीतस्वबुद्धावाविर्भूताद्वेदादेव विद्या

बृ॰ टी॰ ६८

कुतस्तर्हि वेदो जायते तत्राह ॥ यस्तु नरिति ॥ परस्यैव ब्रह्मणो वेदरूपेणावस्थानात्तस्य नित्यत्वान्न हेत्वपेक्षेत्यर्थः ॥ आदावंते च कृतमंगलाग्रंथाः प्र

यस्तु नर्ब्रह्म तन्नित्यं स्वयंभु तस्मै ब्रह्मणे स्वयंभुवे नमः ॥ ॥ हरिः ॐ तत्सदिति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविंदभगव

सौभरो यास्यादांगिरसाद्यास्य आंगिरस आभूतेस्त्वाष्ट्रादाभूतिस्त्वा
ष्ट्रो विश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामश्विनौ दधीच आथर्वणाद्द
ध्यङ्ङाथर्वणोऽथर्वणो दैवादथर्वा दैवो मृत्योः प्राध्वंसनान्मृत्युः प्रा
ध्वंसनः प्रध्वंसनात्प्रध्वंसन एकर्षेरेकर्षिर्विप्रचित्तेर्विप्रचित्तिर्व्य
ष्टेर्व्यष्टिः सनारोः सनारुः सनातनात्सनातनः सनगात्सनगः परमेष्ठिनः पर
मेष्ठी ब्रह्मणो ब्रह्म स्वयंभु ब्रह्मणे नमः ॥ ६६ ॥ इति द्वितीयोऽध्यायः ॥ ॥

ॐ तत्सत्

त्पूज्यपादशिष्यश्रीमच्छंकरभगवत्पूज्यपादकृतौ श्रीमद्बृहदारण्यभाष्ये चतुर्थोऽध्यायः ॥ ॥

चारिणो भवंतीति द्योतयितुमंते ब्रह्मणे नम इत्यु

क्तं व्याचष्टे ॥ तस्मै इति ॥ इति श्रीमद्बृहदारण्यभाष्यटीकायां चतुर्थोऽध्यायः समाप्तः ॥ ४ ॥ मूलं २२५ भाष्य १४०० टीका १५०० एकत्र श्लोकसंख्या ३१२५ ॥

अ॰ ४

राम॰ ६८

॥ ॐ तत्सत्

ॐ तत्सत

इतिसटीकबृहदारण्योपनिषद्भाष्यस्यसप्तमोध्यायःसमाप्तः

वेदत्रयी संदुह्यतेऽर्थमिति संदोहः

श्रीगणेशायनमः॥ ॐनमोभगवतेविस्लवेनमः॥ यद्विद्यावशाद्विश्वंद्दश्यतेरशनाहिवत्॥ यद्विद्ययाचतद्धानिस्तंवंदेपुरुषोत्तमं॥ नमस्त्रय्यंतसंदोहस
रसीरुहभानवे॥ गुरवेपरपक्षौघध्वांतध्वंसपटीयसे॥ भगवत्पादपादाब्जद्वंद्वंद्वंद्व निबर्हणं॥ सुरेश्वरादिसद्भृंगैरवलंवितमाभजे॥२॥ बृहदारण्यकेभाष्ये
शिष्योपकृतिसिद्धये॥ सुरेश्वरोक्तिमाश्रित्यक्रियतेन्यायनिर्णयः॥४॥ काण्वोपनिषद्विवरणव्याजेनाशेषाणामेवोपनिषदांशोधयितुकामोभगवान्भाष्य
कारोविघ्नोपशमादिसमर्थंशिष्टाचारप्रमाणकंपरापरगुरुनमस्काररूपंमंगलमाचरति॥ नमोब्रह्मादिभ्यइति॥ वेदोहिरण्यगर्भोवाब्रह्मतन्नमस्कारेणसर्व
देवतानमस्कृताभवंतितदर्थत्वात्तदात्मकत्वाच्च॥ एषउह्येवसर्वेदेवाइतिश्रुतेः॥ आदिपदेनपरमेष्ठिप्रभृतयोगृह्यंते॥ यद्यपितेषामुक्तोब्रह्मांतर्भावस्तथापि

श्रीगणेशायनमः॥ ॐनमःपुरुषोत्तमाय॥ ओंनमोब्रह्मादिभ्योब्रह्मविद्यासंप्रदायकर्तृभ्योवंशऋषिभ्योनमोगुरुभ्यः॥ उषावाअ
श्वस्येत्येवमाद्यावाजसनेयिब्राह्मणोपनिषत्तस्याइयमल्पग्रंथावृत्तिरारभ्यतेसंसारव्याविवृत्सुभ्यः संसारहेतुनिवृत्तिसाधनब्र
ह्मात्मैकत्वविद्याप्रतिपत्तये॥

तेषुनादरनिरासार्थंपृथग्ग्रहणं॥ चतुर्थीनमोयोगेनमःशब्दस्त्रिविधप्रह्वीभावविषयः॥ ननुब्रह्मविद्यांवक्तुकामे
नकिमित्येतेनमस्क्रियंतेसैवहिवक्तव्येत्यतआह॥ ब्रह्मविद्येति॥ एतेषांतत्संप्रदायकर्तृत्वेवंशब्राह्मणंप्रमाणयति॥ वंशऋषिभ्यइति॥ यद्यपितत्रपौतिमा
ष्यादयोब्रह्मांताःसंप्रदायकर्तारःश्रूयंतेतथापिगुरुशिष्यक्रमेणब्रह्मणःप्राथम्यमितितदादित्वमितिभावः॥ संप्रत्यपरगुरून्नमस्करोति॥ नमोगुरुभ्यइति॥
यद्यपिब्रह्मविद्यासंप्रदायकर्त्रंतर्भावादेतेप्रागेवनमस्कृतास्तथापिशिष्याणांगुरुविषयादरातिरेककार्यार्थंपृथग्गुरुनमस्करणंयस्यदेवेपराभक्तिरित्या
दिश्रुतेरिति॥ यदुद्दिश्यमंगलमाचरितंतत्प्रतिज्ञातुंप्रतीकमादत्ते॥ उषावाइति॥ एतेनचिकीर्षितायावृत्तेर्भर्तृप्रपंचभाष्येणागतार्थत्वमुक्तं॥ तद्धिद्वयाहेत्या
दिमाध्यंदिनश्रुतिमधिकृत्यप्रवृत्तं॥ इयंपुनरुषावाअश्वस्येत्यादिकाण्वश्रुतिमाश्रित्येति॥ अथोद्देश्यंनिर्दिशति॥ तस्याइति॥ भर्तृप्रपंचभाष्याद्विशेषांतरमाह॥

अल्पग्रंथेति॥ अस्याः ग्रंथतोल्पत्वेपिनार्थतस्तथात्वमितिग्रंथग्रहणं॥ वृत्तिशब्दोभाष्यविषयः सूत्रानुकारिभिर्वाक्यैः सूत्रार्थस्यस्वपदानांचोपवर्णनस्य
भाष्यलक्षणस्यात्रभावादिति॥ ननुकर्मकांडाधिकारिणोविलक्षणोधिकारीनज्ञानकांडेसंभवत्यर्थित्वादेः साधारणत्वाद्वैराग्यादेश्चदुर्वचनत्वात्। नचनिरधि
कारंशास्त्रमारंभमर्हतीत्यतआह॥ संसारेति॥ कर्मकांडेहिस्वर्गादिकामः संसारपरवशोनरपशुरधिकारी॥ इहतुसंसाराद्व्यावृत्तिमिच्छवोविरक्ताः नचवैराग्यं
दुर्वचंशुद्धबुद्धेर्विवेकिनोब्रह्मलोकांतेसंसारेतत्संभवात्॥ उक्तंहि॥ शोध्यमानंतुतच्चित्तमीश्वरार्पितकर्मभिः॥ वैराग्यंब्रह्मलोकादौव्यनक्त्याशुसुनिर्मलमिति॥
अतोयथोक्तविशिष्टाधिकारिभ्योवृत्तेरारंभः संभवतीत्यर्थः॥ तथापिविषयप्रयोजनसंबंधानामभावेकथंवृत्तिरारभ्यतेतत्राह॥ संसारहेत्विति॥ प्रमातृताप्रमुखः
कर्तृत्वादिरनर्थः संसारस्तस्यहेतुरात्माःविद्यातन्निवृत्तेः साधनंब्रह्मात्मैकत्वविद्यातस्याःप्रतिपत्तिरप्रतिबद्धायाप्राप्तिस्तदर्थंवृत्तिरारभ्यतइतियोजना॥ एतदु

सेयंब्रह्मविद्योपनिषच्छब्दवाच्यातत्पराणांसहेतोः संसारस्यात्यंतावसादनादुपनिपूर्वस्यसदेस्तदर्थत्वात्तादर्थ्याद्ग्रंथोप्युपनिषदुच्यते॥

क्तंभवतिसनिदानानर्थनिवृत्तिः शास्त्रस्यप्रयोजनं॥ ब्रह्मात्मैक्यविद्यातदुपायस्तदैक्यंविषयः संबंधोज्ञानफलयोरुपायोपेयत्वंशास्त्रतद्विषययोर्विषय
विषयित्वंतदारभ्यंशास्त्रमितिप्रयोजनादिषुप्रवृत्त्यंगतयोक्तेष्वपिसर्वव्यापाराणांप्रयोजनार्थत्वात्तस्यप्राधान्यं॥ उक्तंहि॥ सर्वस्यैवहिशास्त्रस्यकर्म
णोवापिकस्यचित्॥ यावत्प्रयोजनंनोक्तंतावत्तत्केनगृह्यतइति॥ तथाचशास्त्रारंभौपयिकंप्रयोजनमेवनामव्युत्पादनद्वारान्युत्पादयति॥ सेयमिति॥
अध्यात्मशास्त्रेषुप्रसिद्धासंनिहिताचात्रब्रह्मात्मैक्यविद्यातन्निष्ठानांसर्वकर्मसंन्यासिनांसनिदानस्यसंसारस्यात्यंतनाशकत्वाद्भवत्युपनिषच्छब्दवाच्या
उपनिषदंभोब्रूहीत्याद्याचश्रुतिस्तस्मादुपनिषच्छब्दवाच्यत्वप्रसिद्धेर्विद्यायास्ततोयथोक्तफलसिद्धिरित्यर्थः॥ कथंतस्यास्तच्छब्दवाच्यत्वेप्येतावानर्थ
उपलभ्यतेतत्राह॥ उपनिपूर्वस्येति॥ अस्यार्थः॥ षद्लृविशरणगत्यवसादनेष्विति स्मर्यतेसदेर्धातोरुपनिपूर्वस्यक्विबंतस्यसहेतुसंसारनिवर्तकब्रह्म

अथआ

विद्यार्थत्वादुपनिषच्छब्दवाच्यासाभवत्युक्तफलवती॥उपशब्दोहिसामीप्यमाह तच्चासतिसंकोचके प्रतीचिपर्यवस्यतिनिशब्दश्चनिश्चयार्थस्तस्मादैका
त्म्यंनिश्चितं॥तद्विद्यासहेतुंसंसारंसादयतीत्युपनिषदुच्यते॥उक्तंहि॥अवसादनार्थस्यचावसादादितिब्रह्मविद्यैवचेदुपनिषदिष्यतेकथंतर्हिग्रंथेवृद्धा
स्तच्छब्दंप्रयुंजते॥नखल्वेकस्यशब्दस्यानेकार्थत्वंन्याय्यमित्याशंक्याह॥तादर्थ्यादिति॥ग्रंथस्यब्रह्मविद्याजनकत्वादुपचारात्तत्रोपनिषत्पदमित्यर्थः॥
यथोक्तविद्याजनकत्वेग्रंथस्यकिमितितदध्येतृणांसर्वेषांविद्यानभवतीत्याशंक्यश्रवणादिपराणामेवारण्यानुवचनादिनियमाधीताक्षरेभ्यस्तज्जन्मे
तिबृहदारण्यकनामनिर्वचनपूर्वकमाह॥सेयमिति॥बृहदारण्यानुवचनादिनियमाधीतवेदांतानामपिकेषांचिद्विद्यानुपलंभात्कुतोयथोक्ताक्षरेभ्यस्त
दुत्पत्तिरित्यतआह॥बृहत्वादिति॥उपनिषदंतरेभ्योग्रंथपरिमाणातिरेकादस्यबृहत्वंप्रसिद्धं॥अर्थतोपितस्यनदस्तिब्रह्मणोखंडैकरसस्यात्रप्रतिपाद्यत्वा

सेयंषडध्याय्यरण्येऽनूद्यमानत्वादारण्यकंबृहत्त्वात्परिमाणतो बृहदारण्यकंतस्यास्यकर्मकांडेनसंबंधोभिधीयते॥सर्वोप्ययंवेदः
प्रत्यक्षानुमानाभ्यामनवगतेष्टानिष्टप्राप्तिपरिहारोपायप्रकाशनपरः॥

तज्ज्ञानहेतूनांचांतरंगबहिरंगाणांभूयसामिहप्रतिपादनादतोबृह
त्वादारण्यकत्वाच्चबृहदारण्यकं॥नचैतदशुद्धबुद्धेरधीतमपिविद्यामादधाति॥कषायेकर्मभिः पक्वेततोज्ञानमितिस्मृतेरित्यर्थः॥ज्ञानकांडस्यविशि
ष्टाधिकार्यादिवैशिष्ट्येपिकर्मकांडेननियतपूर्वापरभावानुपपत्तिलभ्यःसंबंधोवक्तव्यःसचपरीक्षकविप्रतिपत्तेरशक्योविशेषतोज्ञातुमित्याशंक्या
हतस्येति॥प्रतिज्ञातंसंबंधंप्रकटयितुमसिद्धप्रमाणभावानांवेदांतानांसंबंधाभिधानावसराभावात्तत्प्रामाण्यंप्रतिपाद्यपश्चात्तेषांकर्मकांडेनसंबंधवि
शेषवचनमुचितमितिमन्वानस्तत्प्रामाण्यंसाधयति॥सर्वोपीति॥प्रत्यक्षानुमानाभ्यामित्यागमातिरिक्तप्रमाणोपलक्षणार्थं॥एषोर्थोध्ययनविध्युपात्तः
सर्वोपिकांडद्वयात्मकोवेदोमानांतरानधिगतंयदिष्टोपायादितत्ज्ञानपरस्तथाचाज्ञातज्ञापकत्वाविशेषात्तुल्यंप्रामाण्यंकांडयोरिति॥अथवावेदनंवेदोनु

भवः सचशब्देतरमानायोग्योरूपादिहीनत्वादेतदप्रमेयमितिहिश्रुतिः सचेष्टानिष्टप्राप्तिपरिहारोपायस्तस्यैवतत्तदात्मनावस्थानात्तत्सच्चत्यच्चाभवदि
त्यादिश्रुतेः सचप्रकाशनः सर्वप्रकाशकत्वात्तमेवभांतमनुभातिसर्वमितिश्रुतेः सचपरोऽविद्यातत्कार्यातीतत्वाद्विरजः परआकाशादित्यादिश्रुतेरेवंरूपो
वेदः वेदनीयश्चिदेकरसः प्रत्यग्धातुरेवसर्वोपिकार्यकारणात्मकप्रपंचः आत्मैवेदंसर्वमितिश्रुतेः तथाचयथोक्तंवस्तुस्वरूपंप्रकाशयंतोवेदांताविधिवा
क्यवत्प्रमाणमिति॥ अथवाप्रत्यक्षादिमानानवगतोयोसाविष्टप्राप्त्याद्युपायोब्रह्मात्मातस्यप्रकाशनपरः सर्वोप्ययंवेदस्तस्यैवाज्ञातत्वात्तत्रकर्मकांडंकर्मानु
ष्ठानप्रयुक्तबुद्धिद्वाराब्रह्माधिगतावारादुपकारकंविविदिषंतियज्ञेनेतिश्रुतेर्ज्ञानकांडंतुसाक्षादेवतत्रोपयुक्तं॥ परमपुरुषस्योपनिषदत्वश्रवणात्सर्वेवे
दायत्पदमामनंतीतिश्रुतेस्तद्युक्तंकर्मकांडवत्ज्ञानकांडस्यापिप्रामाण्यमिति॥ अधिकारिसौलभ्यप्रतिपादनद्वाराज्ञानकांडप्रामाण्यमेवस्फुटयति॥ सर्वपु

**सर्वपुरुषाणांनिसर्गतएवतत्प्राप्तिपरिहारयोरिष्टत्वात्॥ दृष्टविषयेचेष्टानिष्टप्राप्तिपरिहारोपायज्ञानस्यप्रत्यक्षानुमानाभ्यामेवसि
द्धत्वान्नागमान्वेषणा॥**

रुषाणामिति॥ अयमर्थः॥ सुखंमेस्यात्दुःखंमाभूदितिस्वभावतः शास्त्रंविनासर्वेषांपुरुषाणामनवच्छिन्नसुखादिमात्रे
भिलाषोपलंभात्तन्मात्रस्यचमोक्षत्वात्तत्कामिनोज्ञानकांडाधिकारिणः सुलभत्वात्तस्मिन्प्रमांस्वार्थविषयामादधत्कथंतदप्रामाण्यमिति॥ ननुवेदस्यकार्य
परतयाप्रामाण्यात्कर्मकांडवत्कांडांतरस्यापिकार्यपरतयाप्रामाण्यमेष्टव्यमितिनेत्याह॥ दृष्टविषयेति॥ क्रियाकारकफलेतिकर्तव्यतानामन्यतमस्मिन्कार्ये
समीहितप्राप्त्याद्युपायभूतेव्युत्पत्तिकालेप्रत्यक्षादिसिद्धेतथाविधकार्यधियोऽन्यथालब्धत्वात्तत्रनागमोनुसंधेयः॥ नहिलोकवेदयोस्तद्भिद्यते॥ अलौकिकेत
स्मिन्नव्युत्पत्तिप्रसंगात्नचाव्युत्पन्नानिपदानिबोधकानि॥ अतिप्रसंगात्॥ नचब्रह्मण्यपितुल्याव्युत्पत्त्यनुपपत्तिस्तस्मिन्ब्रह्मत्वेनात्मत्वेनचप्रसि
द्धेस्तत्तत्सामान्योपाधौविज्ञानादिपदानांव्युत्पत्तेः सुकरत्वात्तानिचालौकिकमखंडंप्रत्यग्ब्रह्मनिर्लुठितसामान्यविशेषंलक्षणयाबोधयंति॥ तस्मा

द्धैववेदप्रमाणकंनकार्यमितिभावः॥किंच॥तिष्ठतुवेदांतप्रामाण्यंकर्मकांडेपिव्यतिरिक्तात्मास्तित्वादौसिद्धेर्थेप्रामाण्यमावश्यकंतदभावेतत्प्रामाण्या
योगात्॥नहिभविष्यद्देहसंबंध्यात्मसद्भावानधिगमेपारलौकिकप्रवृत्तिविस्रंभस्तस्मात्कर्मकांडप्रामाण्यमिच्छतासिद्धेर्थेभविष्यद्देहसंबंधिन्यात्मनिस्व
र्गादौचतत्प्रामाण्यस्याभ्युपेयत्वात्कार्येवेदप्रामाण्यानियमाद्वेदांतानामपिस्वार्थेमानत्वंसिध्यतीत्याह॥नचेति॥ननुदेहांतरसंबंध्यात्मज्ञानंविनापिविधिव
शाद्दृष्टार्थक्रियासुप्रवृत्तिःस्यादितिनेत्याह॥स्वभावेति॥यदात्मादेहांतरसंबंधीशास्त्रान्मानांतराच्चनप्रमितस्तदाभोक्तुरनवगमान्नप्रेक्षापूर्वकारीयागा
द्यनुतिष्ठेत॥लोकायतस्यव्यतिरिक्तास्मास्तित्वमजानतोजन्मांतरेष्टानिष्टाप्तिहानीच्छयावैदिकक्रियास्वप्रवृत्तेर्दर्शनादतोनातिरिक्तात्मज्ञानंविनासांपरा

नचासतिजन्मांतरसंबंध्यात्मास्तित्वविज्ञानेजन्मांतरेष्टानिष्टप्राप्तिपरिहारेच्छास्यात्॥स्वभाववादिदर्शनात्॥तस्माज्जन्मांतरसंबंध्या
त्मास्तित्वेजन्मांतरेष्टानिष्टप्राप्तिपरिहारोपायविशेषेचशास्त्रंप्रवर्त्तते॥येयंप्रेतेविचिकित्सामनुष्येऽस्तीत्येकेनायमस्तीतिचैकइत्यु
पक्रम्यास्तीत्येवोपलब्धव्यइत्येवमादिनिर्णयदर्शनात्॥यथाचमरणंप्राप्येत्युपक्रम्ययोनिमन्येप्रपद्यंतेशरीरत्वायदेहिनः॥स्थाणु
मन्येनुसंयंतियथाकर्मयथाश्रुतमितिच॥

यिकेप्रवृत्तिरित्यर्थः॥ननुविधयःसाधनविशेषंबोधयंतोनातिरिक्तात्मास्तित्वादौमानंवाक्यभेदप्र
संगादित्यतआह॥तस्मादिति॥अतिरिक्तात्मधियंविनापारलौकिकप्रवृत्त्यनुपपत्त्याकर्मकांडप्रामाण्यायोगादितियावत्॥विधीनांश्रुत्यर्थाभ्यामुभया
र्थत्वमविरुद्धमित्यर्थः॥नकेवलंविधिभिरेवार्थादासिद्धमतिरिक्तात्मास्तित्वं॥किंतुश्रुत्यापिस्वमुखेनोक्तमित्याह॥येयमिति॥निर्णयदर्शनाद्व्यति
रिक्तात्मास्तित्वमितिसंबंधःतत्रैवप्रकृतोपयोगित्वेनोपक्रमोपसंहारांतरेदर्शयति॥यथेति॥पूर्ववदेवसंबंधद्योतनार्थश्चकारः॥उपक्रमोपसंहारैक
रूप्यात्कठवल्लीनामतिरिक्तात्मास्तित्वेतात्पर्यमुक्त्वाबृहदारण्यकवाक्यस्यापितत्रतात्पर्यमाह॥स्वयमिति॥नहिप्रसिद्धजडत्वस्यदेहादेःस्वयंज्योति

श्वमितिज्योतिर्ब्राह्मणगतोपक्रमस्तद्विषयो देहादिव्यतिरिक्तात्मानमधिकरोतितंप्रेतंविद्याकर्मणीपूर्वोपार्जितेफलदानायानुगच्छतः सचगलाज्ञानकर्मा नुगुणंफलमनुभवतीतिशारीरकब्राह्मणगतोपसंहारोपिजन्मांतरसंबंधविषयोनचात्रैवभस्मीभवतोदेहादेर्जन्मांतरसंबंधोयुक्तस्तेनात्मादेहादिव्यति रिक्तोजन्मांतरसंबंधीसिद्धोब्राह्मणाभ्यामित्यर्थः॥ अजातशत्रुब्राह्मणेनचैवलाज्ञापयिष्यामीत्युपक्रमोव्यतिरिक्तात्मास्तित्वविषयोनहिप्रत्यक्षेदेहादौ जिज्ञासास्ति॥ तत्रैवोपसंहारेयएषविज्ञानमयः पुरुषइतिविज्ञानमयविशेषणादतिरिक्तात्मास्तित्वंदर्शितं॥ नहिदेहादेर्विज्ञानमयत्वमस्ति॥ तस्मात्तद् प्युपक्रमोपसंहाराभ्यांव्यतिरिक्तात्मास्तित्वंगमयतीत्याह॥ ज्ञपयिष्यामीत्युपक्रम्येति॥ नचोदाहृतानांवाक्यानामप्रामाण्यंतत्प्रामाण्यस्यौत्पत्तिकसूत्रेहेत्व

स्वयंज्योतिरित्युपक्रम्यतंविद्याकर्मणीसमन्वारभेते॥ पुण्योवैपुण्येनकर्मणाभवति॥ ज्ञपयिष्यामीत्युपक्रम्यविज्ञानमयइतिचव्यतिरि क्तात्मास्तित्वं॥ तत्प्रत्यक्षविषयमेवेतिचेत्॥ नवादिविप्रतिपत्तिदर्शनात्॥ नहिदेहांतरसंबंधिनआत्मनः प्रत्यक्षेणास्तित्वविज्ञाने लोकायतिकाबौद्धाश्चनः प्रतिकूलाः स्युर्नास्त्यात्मेतिवदंतः॥ नहिघटादौप्रत्यक्षविषयेकश्चिद्विप्रतिपद्यतेनास्तिघटइति ॥ ॥

विशेषादभ्युपेयत्वादितिभावः॥ यथोक्तात्मन्यहंप्रत्ययोमानंतत्रदेहाकारास्फुरणादतिरिक्तात्मास्तित्वस्यतेनैवस्फूर्त्युपपत्तेः अतोनतत्रश्रुतिप्रामाण्य मितिशंकते॥ तत्प्रत्यक्षेति॥ प्रत्यक्षस्यविषयोऽवकाशोयस्मिन्निति अतिरिक्तात्मास्तित्वमुच्यते॥ यद्यपिव्यतिरिक्तात्मास्तित्वंत्वदभिप्रायेणाहंधीगो चरस्तथापिनसाव्यतिरेकमात्मनोगोचरयति॥ युक्त्यागमविवेकशून्यानामहंप्रत्ययभाजांव्यतिरेकप्रत्ययप्राप्तौविपश्चितांविप्रतिपत्त्यभावप्रसंगा दितिपरिहरति॥ नवादीति॥ वेदप्रतिकूलवादिनोनास्तिकानेवविवादंसूचतीत्याह॥ नहीति॥ तेषुप्रातिकूल्यसंभावनार्थंविशेषणंनेत्यादीतिवदंतः संतोनोस्माकंप्रतिकूलानहिस्युः॥ एवंवदनस्यैवासंभवादध्यक्षविरोधादितियोजना॥ प्रत्यक्षेविषयेविप्रतिपत्त्यभावेदृष्टांतमाह॥ नहीति ॥ ॥ ॥

तत्रव्यभिचारंशंकते॥स्थाण्वादाविति॥प्रत्यक्षेधर्मिणिस्थाणुर्वापुरुषोवेतिविप्रतिपत्तेरुपलंभान्नप्रत्यक्षेविप्रतिपत्त्यभावोव्यभिचारादितिशंकार्थः॥आदि
पदेनपाषाणादौगजादिविप्रतिपत्तिःसंगृह्यते॥किंप्रत्यक्षमात्रेविप्रतिपत्तिःकिंवातेनविविक्तेप्रतिपन्ने॥नाद्यःअंगीकारात्॥नचैवमात्मनिप्रत्यक्षेविप्र
तिपत्तावपिनागमान्वेषणातेनैवतन्निरासेनतन्निर्णयादितिमन्वानोद्वितीयंदूषयति॥नेत्यादिना॥प्रत्यक्षतोविविक्तेर्थेविप्रतिपत्त्यभावंप्रपंचयति॥नही
ति॥आत्मनःस्थूलदेहव्यतिरिक्तत्वंनप्रत्यक्षमितिप्रतिपाद्यसूक्ष्मदेहव्यतिरिक्तत्वमपिनाहंप्रत्ययग्राह्यमित्याह॥वैनाशिकास्त्विति॥तेखल्वहमितिधियम
नुभवंतितथापिदेहांतरंस्थूलदेहातिरिक्तंसूक्ष्मंतत्रप्रधानभूतायाबुद्धेरतिरिक्तस्यात्मनोनास्तित्वमेवपश्यंति॥तन्नाहंधियासूक्ष्मदेहातिरिक्तात्मसिद्धिरि
त्यर्थः॥किंचप्रत्यक्षस्यविषयोरूपादिस्तद्ग्राहित्वंतद्वैलक्षण्यंतदात्मनोनास्ति॥अशब्दमस्पर्शमरूपमित्यादिश्रुतेः॥नहिरूपादितदाधारंविनाप्रत्यक्षंक्रमतेऽतोन

स्थाण्वादौपुरुषादिदर्शनान्नेतिचेत्॥ननिरूपितेऽभावात्॥नहिप्रत्यक्षेणनिरूपितेस्थाण्वादौविप्रतिपत्तिर्भवति॥वैनाशिकास्त्वहमिति
प्रत्ययेजायमानेपिदेहांतरव्यतिरिक्तस्यनास्तित्वमेवप्रतिजानते॥तस्मात्प्रत्यक्षविषयवैलक्षण्यात्प्रत्यक्षान्नात्मास्तित्वसिद्धिस्तथानुमाना
दपि॥अथात्मास्तित्वेलिंगस्यदर्शितत्वात्लिंगस्यचप्रत्यक्षविषयत्वान्नेतिचेत्॥

देहाद्व्यतिरिक्तात्मास्तित्वस्यप्रत्यक्षात्सिद्धिरित्याह॥तस्मादिति
॥प्रत्यक्षतोविविक्तेविप्रतिपत्त्ययोगात्स्वकृतेचतद्दर्शनादितियावत्॥अथेच्छादयःक्वचिदाश्रिताःगुणत्वाद्रूपवदित्यनुमानादतिरिक्तात्मसिद्धिरितिनेत्याह॥त
थेति॥नास्तित्वप्रसिद्धिरितिसंबंधार्थस्तथाशब्दःअयंभावःइच्छादीनांस्वातंत्र्येस्वरूपासिद्धिः॥पारतंत्र्येपरस्पराश्रयत्वमाधारस्येदानीमेवसाध्यमानत्वा
त्॥क्वचिच्छब्देनचाश्रयमात्रवचनेसिद्धसाधनत्वंमनसस्तदाश्रयस्यसिद्धत्वादात्मोक्तौचदृष्टांतस्यसाध्यविकलतेति॥यत्प्राणेननप्राणितीत्यादिश्रुत्या
प्राणनादिव्यापाराख्यस्यलिंगस्यात्मास्तित्वेप्रदर्शितत्वात्तस्यचव्याप्तिसापेक्षस्यप्रत्यक्षादिसिद्धात्मविषयत्वान्नतस्यशब्दैकगम्यतेतिशंकते॥श्रुत्येति॥

आत्मनःस्वातंत्र्येणलिंगगम्यत्वाभिप्रायेणश्रुत्यालिंगंनोपन्यस्तमितिपरिहरति॥नेति॥योऽचेतनव्यापारःसचेतनाधिष्ठानपूर्वकोयथारथादिव्या
पारःप्राणनादिव्यापारस्याप्यचेतनव्यापारत्वाच्चेतनाधिष्ठानपूर्वकत्वमितिसंभावनामात्रेणलिंगोपन्यासोनहिनिश्चायकत्वेनतदुपन्यस्यते॥
आत्मनोजन्मांतरसंबंधस्यप्रमाणांतरेणाग्रहणात्तद्व्याप्तलिंगायोगादित्याह॥जन्मांतरेति॥ननुव्यतिरिक्तात्मास्तित्वमागमैकगम्यंचेत्कथंतत्प्रत्य
समनुमेयंचेतिवादिनोवदंतीतितत्राह॥आगमेनत्विति॥येयंप्रेतेविचिकित्सेत्याद्यागमेनकोह्येवान्यादित्यादिवेदोक्तैश्चप्राणनादिभिर्लौकिकैर्लिंग
विशेषैरात्मास्तित्वेसिद्धेयथोक्तात्मसिद्धिमनुसरंतोवादिनोवैदिकमेवाहंप्रत्ययंप्रतिलभमानावैदिकान्येवचलिंगानिपश्यंतःस्वोत्प्रेक्षानिर्मितानिता

न॥जन्मांतरसंबंधस्याग्रहणात्॥आगमेनत्वात्मास्तित्वेऽवगतेवेदप्रदर्शितलौकिकलिंगविशेषैश्चतदनुसारिणोमीमांसकास्ता
र्किकाश्चाहंप्रत्ययंलिंगानिचवैदिकान्येवस्वमतिप्रभवानीतिकल्पयंतोवदंतिप्रत्यक्षश्चानुमेयश्चात्मेति॥सर्वथाप्यस्त्यात्मादेहां
तरसंबंधीत्येवंप्रतिपत्तुर्देहांतरगतेष्टानिष्टप्राप्तिपरिहारोपायविशेषार्थिनस्तद्विशेषज्ञापनायकर्मकांडंसमारब्धं॥नत्वात्मेन
इष्टानिष्टप्राप्तिपरिहारेच्छाकारणमात्मविषयमज्ञानंकर्तृत्वभोक्तृत्वस्वरूपाभिमानलक्षणंतद्विपरीतब्रह्मात्मस्वरूपविज्ञानेनापनीतं॥

नीतिकल्पयंतोद्विधात्मानंवदंतिवस्तुतस्त्वात्मायथोक्तश्रुत्यैकसमधिगम्यइत्यर्थः॥तस्यास्येत्यादिनाकांडयोःसंबंधंप्रतिज्ञायतादर्थ्येनसिद्धेर्थेवेदांत
प्रामाण्यंसर्वोपीत्यादिनाप्रसाध्याधुनाकर्मभिःशुद्धबुद्धेर्वैराग्यादिद्वाराज्ज्ञानोत्पत्तिरितितयोःसंबंधंकथयति॥सर्वथापीति॥आगमान्मानांतराद्वाव्य
तिरिक्तात्मास्तित्वप्रतिपत्तावपीत्यर्थः॥पुरुषार्थोपायविशेषार्थिनोज्ञापनार्थंकर्मकांडमारब्धंचेत्तर्हितत्रोक्तकर्मभिरेवविवक्षितपुमर्थसिद्धेर्वेदांतारं
भवैयर्थ्यान्नसंबंधोक्तिःसावकाशेत्याशंक्याह॥नत्विति॥आत्माज्ञानंखल्वनर्थकारणमन्वयव्यतिरेकशास्त्रगम्यंमिथ्याज्ञानकार्यलिंगकंचतच्चा

परंपरया

कर्त्रभोक्तृब्रह्मात्मज्ञानादपनेयं॥ नहितत्कर्मकांडोक्तैरेवकर्मभिः शक्यमपनेतुंविरोधाभावात्॥ तस्मात्तद्धानार्थंज्ञानसिद्धयेवेदांतारंभसंभवादुक्तसं
बंधसिद्धिरित्यर्थः॥ यदिकर्मभिरज्ञानंननिवर्ततेमानिवर्त्तिष्टसत्येवतस्मिन्कर्मवशान्मोक्षःस्यादित्याशंक्याह॥ यावद्धीति॥ सम्यग्ज्ञानमेवसाक्षान्मो
क्षहेतुर्नकर्मतत्तुप्रणाड्यातदुपयोगि॥ नहिसत्येवाज्ञानेमुक्तिस्तस्मिन्सतिसंसारस्यदुर्वारत्वात्॥ तस्मात्कर्मकांडस्यवैराग्यद्वाराप्रवेशोमुक्ताविति
भावः॥ अयमित्यज्ञोनिर्दिश्यते॥ रागद्वेषादीत्यादिशब्देनाविद्यास्मिताभिनिवेशागृह्यंते॥ दोषाणांस्वाभाविकत्वंशास्त्रानपेक्षत्वं॥ अपिकारःसंभावना
र्थः॥ दृष्टत्वमन्वयव्यतिरेकसिद्धत्वं॥ अदृष्टत्वंशास्त्रमात्रगम्यत्वं॥ अधर्मोपचयप्राचुर्येहेतुमाह॥ स्वाभाविकेति॥ अथवैराग्यार्थंकर्मफलप्रपंचयन्नध

यावद्धितन्नापनीयतेतावदयंकर्मफलरागद्वेषादिस्वाभाविकदोषप्रयुक्तःशास्त्रविहितप्रतिषिद्धातिक्रमेणापिप्रवर्त्तमानोमनोवा
क्कायैर्दृष्टादृष्टानिष्टसाधनान्यधर्मसंज्ञकानिकर्माण्युपचिनोतिबाहुल्येन॥ स्वाभाविकदोषबलीयस्त्वात्॥ ततःस्थावरांताधोग
तिः कदाचिच्छास्त्रकृतसंस्कारबलीयस्त्वंततोमनआदिभिरिष्टसाधनंबाहुल्येनोपचिनोतिधर्माख्यं॥ तद्द्विविधं॥ ज्ञानपूर्वकंकेव
लंच॥ तत्रकेवलंपितृलोकादिप्राप्तिफलंज्ञानपूर्वकंदेवादिब्रह्मलोकांतप्राप्तिफलंच॥ तथाचशास्त्रमात्मयाजीश्रेयान्देवयाजीइत्यादि॥

र्मफलमाह॥ ततइति॥ उक्तंहि॥ शारीरजैःकर्मदोषैर्यातिस्थावरतांनरइति॥ तर्त्किंपुण्योपचयाभावादनवकाशंस्वर्गादिफलमितिनेत्याह॥ कदाचिदिति
॥ शास्त्रीयसंस्कारस्यबलीयस्त्वेफलितमाह॥ ततइति॥ आदिशब्दोवाग्देहविषयःफलविभागंवक्तुंकर्माभिव्यनक्ति॥ तद्द्विविधमिति॥ तस्यमुक्तिफलत्वंनि
रसितुंफलंविभजते॥ तत्रेति॥ केवलमिष्टादिकर्मेतिशेषःकर्मणापितृलोकइतिहिवक्ष्यति॥ तस्मिन्फलेनानात्वमभिप्रेत्यादिशब्दः॥ विद्ययादेवलोकइतिश्रु
तिमाश्रित्याह॥ ज्ञानेति॥ देवलोकोयस्यादिर्ब्रह्मलोकश्चांतोयस्यतस्यार्थस्यप्राप्तिरेवफलमस्येतिविग्रहः॥ उक्तेर्थेशातपथींश्रुतिंप्रमाणयति॥ तथाचेति॥ सर्वत्रप

कामनापुरःसरंदेवान्यजमानोदेवयाजीतयोर्मध्येकतरःश्रेयानितिविचारेसत्यात्मयाजीश्रेयानितिनिर्णयःकृतोऽतोज्ञानपूर्वंकर्मदेवलोकस्यकामनापू
र्वंपितृलोकस्यप्रापकमित्यर्थः॥प्रवृत्तंचनिवृत्तंचद्विविधंकर्मवैदिकं॥इहवामुत्रवाकाम्यंप्रवृत्तंकर्मकीर्त्यते॥निष्कामंज्ञानपूर्वंतुनिवृत्तमभिधी
यतइत्यादिमनुस्मृतिंचात्रैवोदाहरति॥स्मृतिश्चेति॥धर्माधर्मयोरेकैकस्यफलमुक्त्वामिश्रयोःफलमाह॥साम्येति॥उक्तंहि॥उभाभ्यांपुण्यपापाभ्यां
मानुष्यंलभतेवशइति॥त्रिविधमपिकर्मफलंवैराग्यार्थंसंक्षिप्योपसंहरति॥एवमिति॥साचाविद्याकृतत्वादनर्थरूपेत्याह॥स्वाभाविकेति॥विचि
त्रकर्मजन्यतयातस्याःवैचित्र्यमाह॥धर्माधर्मेति॥ तर्हिधर्माधर्माभ्यामेवतन्निर्माणसंभवात्कृतमविद्ययेत्यतआह॥नामेति॥तेषांसूक्ष्मावस्थाऽवि

स्मृतिश्चद्विविधंकर्मवैदिकमित्याद्यासाम्येचधर्माधर्मयोर्मनुष्यत्वप्राप्तिरेवंब्रह्माद्यास्थावरांतास्वाभाविकाऽविद्यादिदोषवतोधर्माधर्म
साधनकृतासंसारगतिर्नामरूपकर्माश्रया॥तद्वेदंव्याकृतंसाध्यसाधनरूपंजगत्प्रागुत्पत्तेरव्याकृतमासीत्सएषबीजांकुरादिवदवि
द्याकृतःसंसारआत्मनिक्रियाकारकफलाध्यारोपलक्षणोऽनादिरनंतोऽनर्थइत्येतस्माद्विरक्तस्याविद्यानिवृत्तयेतद्विपरीतब्रह्मवि
द्याप्रतिपत्त्यर्थोपनिषदारभ्यते॥

द्यातदालंबनेतियावत्॥धर्माधर्मादेरविद्यायाश्चनिमित्तत्वोपादानत्वाभ्यामुपयोगइतिभावः॥ननुसंसारगतेरावि
द्यकत्वमयुक्तंप्रत्यक्षादिप्रतिपन्नत्वात्तन्नामरूपाभ्यामेवव्याक्रियतेतिश्रुतौचनामरूपात्मनोजगतोभिव्यक्तिश्रवणात्॥नचप्रामाणिकस्याविद्याकृत
त्वमतआह॥तद्वेदमिति॥जगतःस्वरूपमात्मातत्राध्यस्तत्वात्तस्मादात्मतत्वेऽनभिव्यक्तेप्रत्यक्षादिनाश्रुत्याचाभिव्यक्तमिवदृश्यमानमपिजगदनभिव्य
क्तमेवेतिनतस्याविद्याकृतत्वक्षतिरितिभावः॥अविद्याकृतांसंसारगतिमनुभाषते॥सएषइति॥अविद्याकृतत्वेकथमनादित्वमित्याशंक्यतस्यप्रवाहरू
पेणेत्याह॥बीजांकुराविवेति॥चैतन्यवदात्मनितस्याविद्याकृतत्वानुपपत्तिमाशंक्यनानारूपत्वेनततोविलक्षणत्वादेकरूपेयुक्तंतस्यकल्पितत्वमित्याह

अविद्यारूपेण

क्रियेति॥तर्हिकदाचित्तत्तयासाधनापेक्षामंतरेणनाशोभविष्यतीत्याशंक्याह॥अनादिरिति॥अनादेरपिसंसारस्यप्रागभाववन्निवृत्तिःस्यादितिचेत्तया
पिब्रह्मविद्यामंतरेणनाशोनास्तीत्याह॥अनंतइति॥प्रयत्नतोहेयत्वंद्योतयितुमनर्थइतिविशेषणं॥नैसर्गिकइतिपाठेतुकारणरूपेणतत्वमुन्नेयं॥य स्वरूपं
स्मात्कर्मसंसारफलंनमोक्षंफलयति॥तस्मात्तन्निदानसंसारनिवर्त्तकाऽऽत्मज्ञानार्थित्वेनसाधनचतुष्टयसंपन्नमधिकारिणमधिकृत्यवेदांतारंभःसंभव
तीत्युपसंहरति॥इत्येतस्मादिति॥यथोक्तज्ञानार्थत्वेनोपनिषदारंभेब्रह्मवाइदमग्रआसीदित्यारब्धव्यं॥तस्मादारभ्यज्ञानोपदेशादुषावाअश्वस्येत्यारंभस्तु
नयुक्तःसाक्षादत्रतदनुक्तेरित्याशंक्यास्मादारभ्योपनिषदारंभेऽभीष्टफलमभिधित्समानःप्रथममश्वमेधोपासनफलमाह॥अस्यत्विति॥राजयज्ञत्वादश्व
मेधस्यतदनधिकारिणामपिब्राह्मणादीनांतत्फलार्थिनामस्मादेवोपासनात्तत्प्राप्तिरितिमत्वाश्रुतौतदुपासनोक्तिरित्यर्थः॥किमत्रनियामकमित्याशंक्य

अस्यत्वश्वमेधकर्मसंबंधिविज्ञानस्यप्रयोजनंयेषामश्वमेधेनाधिकारस्तेषामस्मादेवविज्ञानात्तत्फलप्राप्तिर्विद्ययावाकर्मणावात
द्धैतल्लोकजिदेवेत्येवमादिश्रुतिभ्यः॥कर्मविषयत्वमेवविज्ञानस्येतिचेत्॥न॥योश्वमेधेनयजतेयउचैनमेवंवेदेतिविकल्पश्रुतेर्विद्याप्रक
रणेचाम्नानात्कर्मांतरेचसंपादनदर्शनाद्विज्ञानात्तत्फलप्राप्तिरस्तीत्यवगम्यते॥

विकल्पश्रवणंकेवलस्यापिज्ञानस्यसाधनत्वंसूचयतीत्यर्थतो
विकल्पश्रुतिमुदाहरति॥विद्ययेति॥तत्फलप्राप्तिरितिपूर्वेणसंबंधः॥तत्रैवश्रुत्यंतरमाह॥तद्धेति॥तदेतत्प्राणदर्शनंलोकप्राप्तिसाधनमितियावत्॥आदिश
ब्देनकेवलोपास्त्याब्रह्मलोकाप्तिवादिन्यःश्रुतयोगृह्यंते॥अश्वमेधेयदुपासनंतस्याप्यश्वादिवत्तच्छेषत्वेनफलवत्वान्नस्वातंत्र्येणतद्वत्वमंगेषुस्वतंत्रफलाभावादि
तिशंकते॥कर्मविषयत्वमिति॥ज्ञानस्यक्रत्वर्थत्वंदूषयति॥नेति॥पूर्वत्रार्थतोदर्शितांविकल्पश्रुतिमत्रहेतुतयास्वरूपतोनुक्रामति॥योश्वमेधेनेतिसस्सर्वंपाप्मानं
तरतितरतिब्रह्महत्यामितिसंबंधः॥ज्ञानकर्मणोस्तुल्यफलत्वस्यन्याय्यत्वादितिशेषः॥उपास्तिफलश्रुतेरर्थवादत्वमाशंक्याश्वमेधवदुपास्तेरपिकर्मत्वाद्विहितत्वा

कर्मप्रकरणात्सुत्थितत्वाच्चमैवमित्याह॥ विद्येति॥ फलश्रुतेरर्थवादत्वाभावेहेत्वंतरमाह॥ कर्मांतरे चेति॥ अश्वमेधातिरिक्तेकर्मण्ययंवावलोकोग्निरित्या
दौनित्याग्न्यादावेतल्लोकादिसंपादनस्यस्वतंत्रफलोपासनस्यदर्शनान्नफलश्रुतेरर्थवादतेत्यर्थः॥ अश्वमेधोपासनंनक्रत्वर्थंकिंतुपुरुषार्थंतत्रचाधिका
रोश्वमेधक्रत्वनधिकारिणामपीत्येतावदेवेष्टंचेदुपासनेकर्मप्रकरणस्थेपितल्लाभाद्विद्याप्रकरणेनास्याध्ययनमनर्थवदित्याशंक्याह॥ सर्वेषामिति॥ परत्वे
हेतुःसमष्टीति॥ अनुवृत्तव्यावृत्तरूपहिरण्यगर्भप्राप्तिहेतुत्वात्तस्यश्रेष्ठतेत्यर्थः॥ तस्यपुण्यश्रेष्ठत्वेपिप्रकृतेकिमायातंतदाह॥ तस्यचेति॥ यदाक्रतुप्रधानस्या
श्वमेधस्योपास्तिसहितस्यापिसंसारफलत्वंतदात्मीयसामग्निहोत्रादीनांसंसारफलत्वंकिंवाच्यमित्यस्मिन्कर्मराशौबंधहेतौविरक्ताःसाधनचतुष्टयविशि
ष्टाज्ञानमपेक्षमाणास्तदुपायेश्रवणादावेवसर्वकर्मसंन्यासपूर्वकेकथंप्रवर्त्तेरन्नित्याशयवतीश्रुतिरुपासनंविद्यारंभेःभिदधातीतितेनोषावाअश्वस्येत्याद्यु

सर्वेषांचकर्मणांपरंकर्माश्वमेधः समष्टिव्यष्टिप्राप्तिफलत्वात्तस्यचेहब्रह्मविद्याप्रारंभेआम्नानंसर्वकर्मणांसंसारविष—
यत्वप्रदर्शनार्थंतथाचदर्शयिष्यतिफलमशनायामृत्युभावंननित्यानांसंसारविषयफलत्वमितिचेत्॥ न॥ सर्वकर्मफलोपसं
हारश्रुतेः॥

पनिषदारंभोयुक्तोस्यविशिष्टाधिकारिसमर्पकत्वादित्यर्थः॥ उपासनफलस्यसंसारगोचरत्वमेवकुतःसिद्धमतआह॥ तथाचेति
॥ अशनायाहिमृत्युःसवैनेवरेमेसोऽबिभेदितिभयारत्यादिश्रवणादुपास्तियुक्तक्रतुफलस्यसूत्रस्यबंधमध्यपातित्वाद्विशिष्टोपिक्रतुर्नमुक्तयेपर्याप्नो
तीत्यर्थः॥ उक्तेसर्वकर्मणांबंधफलत्वेनित्यनैमित्तिकानांनतत्फलत्वंतेषांविध्युद्देशेफलाश्रुतेर्नष्टाश्वदग्धरथन्यायेनमुक्तिफलत्वलाभादितिशंकते
॥ ननित्यानामिति॥ एतावान्वैकामइतिसर्वकर्मणामविशेषेणफलसंबंधश्रवणात्सम्यादेश्वकाम्यफलत्वस्यविध्युद्देशवशात्सिद्धत्वात्कर्मणापितृ
लोकइतिवाक्यस्यनित्यादिकर्मफलविषयत्वान्नमोक्षफलताशंकेतिपरिहरति॥ नेति॥ उक्तमेवस्फुटयति॥ सर्वंहीति॥ पत्नीसंबंधमानमाह॥

जायेति॥तथापिकथंकर्मणः सर्वस्यकामोपायत्वंतत्राह॥एतावान्वैकामइति॥कथंतर्हितेषांफलभेदोलभ्यतेतत्राह॥पुत्रेति॥अथैवंफलविभागेकथं
समष्टिव्यष्टिप्राप्तिफलत्वमश्वमेधस्योक्तमतआह॥अन्नात्मकतांचेति॥अस्याध्यायस्यावसानेकर्मफलस्यहिरण्यगर्भरूपतांत्रयमित्याद्याश्रुतिरुपसंहरि
ष्यतीत्यर्थः॥उपसंहारश्रुतेस्तात्पर्यमाह॥सर्वकर्मणामिति॥कर्मफलंसंसारश्चेत्त्वात्कदनुष्ठानात्तदभावान्मुक्तानांपुनर्बंधः स्यादित्याशंक्याह॥इदमेवेति॥
तर्हितस्यामवस्थायामितियावत् तस्यपुनर्व्याकरणेकारणमाह॥तदेवेति॥व्याकृताव्याकृतात्मनः संसारस्यचप्रामाणिकत्वेनसत्यत्वमाशंक्याविद्याकृतत्वेनत
न्मिथ्यात्वमुक्तंस्मारयति॥सोयमिति॥सएवहिभ्रांतिविषयोनप्रामाणिकस्तत्कुतोस्यसत्यतेत्यर्थः॥कथमस्यात्मन्यद्वयेकूटस्थेप्राप्तिरित्याशंक्याह॥क्रिये

सर्वंहिपत्नीसंबद्धंकर्मजायामेस्यादेतावान्वैकामइतिनिसर्गतएवसर्वकर्मणांकाम्यत्वंदर्शयित्वापुत्रकर्मापरविद्यानांचायंलोकः पि
तृलोकोदेवलोकइतिफलंदर्शयित्वान्नात्मकतांचांतेउपसंहरिष्यतित्रयंवाइदंनामरूपंकर्मेति॥सर्वकर्मणांफलंव्याकृतंसं
सारएवेति॥इदमेवत्रयंप्रागुत्पत्तेस्तर्ह्यव्याकृतमासीत् तदेवपुनः सर्वप्राणिकर्मवशाद्व्याक्रियतेबीजादिववृक्षः सोयंव्याकृताऽ
व्याकृतरूपः संसारोऽविद्याविषयः क्रियाकारकफलात्मकतयात्मरूपत्वेनाध्यारोपितोऽविद्ययैवमूर्तामूर्ततद्वासनात्मकोऽतोविल
क्षणोऽनामरूपकर्मात्मकोऽद्वयोनित्यशुद्धबुद्धमुक्तस्वभावोपिक्रियाकारकफलभेदादिविपर्ययेणावभासते॥

ति॥समारोपमूलकारणमा
ह॥अविद्ययेति॥आत्मन्यविद्यारोपितंद्वैतमित्यत्रद्वेवावब्रह्मणोरूपेमूर्तंचैवामूर्तंचेत्यादिवाक्यंप्रमाणयति॥मूर्तेति॥नन्वात्मन्यारोपोनोपपद्यतेतस्यनि
त्यशुद्धबुद्धमुक्तस्वभावस्यद्वैतविलक्षणत्वादसतिसादृश्येऽध्यासासिद्धेरतआह॥अतइति॥संसाराद्वैलक्षण्यमेवप्रकटयति॥अनामेति॥आदिपदेनान्येपि
विपर्ययप्रभेदाः संगृह्यंते॥आरोपेप्रमिणोमिकरोमिभुंजेचेत्यनुभवंप्रमाणयति॥अवभासतइति॥आत्मन्यध्यासः सादृश्याद्यभावेपिनभसिमलिनत्वादिव

यतोऽनुभूयते॥तः सविलासाविद्यानिवर्तकब्रह्मविद्यार्थत्वेनोपनिषदारंभः संभवतीत्युपसंहरति॥अतइति॥एतावदित्यनर्थोक्तिः॥तत्वज्ञानादज्ञाननि
वृत्तौदृष्टांतमाह॥रज्वामिवेति॥एवमुपनिषदारंभेस्थितेप्राथमिकब्राह्मणयोरवांतरतात्पर्यमाह॥तत्रतावदिति॥आद्यस्यपुनरवांतरतात्पर्यंदर्शयति॥
तत्रेति॥नन्वश्वमेधस्यांगबाहुल्येकस्मादश्वाख्यांगविषयमेवोपासनमुच्यतेतत्राह॥प्राधान्यादिति॥तदेवकथमितितदाह॥प्राधान्यंचेति॥प्रजापतिदेव

अतोऽस्मात्क्रियाकारकफलभेदस्वरूपादेतावदिदमितिसाध्यसाधनरूपाद्विरक्तस्यकामादिदोषकर्मबीजभूताऽविद्यानिवृत्तये॥रज्वामिव
सर्पविज्ञानापनयायब्रह्मविद्यारभ्यते॥तत्रतावदश्वमेधविज्ञानायउषावाअश्वस्येत्यादितत्राश्वविषयमेवदर्शनमुच्यतेप्राधान्यादश्वस्य॥प्राधा

श्रीगणेशायनमः॥हरिः ॐ पूर्णमदः पूर्णमिदंपूर्णात्पूर्णमुदच्यते॥पूर्णस्यपूर्णमादायपूर्णमेवावशिष्यते।ॐ शांतिः शांतिः शांतिः॥

न्यंचतन्नामांकितत्वात्क्रतोः प्राजापत्यत्वाच्च॥उषाइति ब्राह्मोमुहूर्तउषा वैशब्दः स्मरणार्थः प्रसिद्धंकालंस्मारयति शिरःप्राधान्याच्छिरःप्रधानंश
रीरावयवानामश्वस्यमेध्यस्यमेधार्हस्ययज्ञियस्यउषाः शिरइतिसंबंधः कर्मांगस्यपशोः संस्कर्तव्यत्वात्कालादिदृष्टयः शिरआदिषुक्षिप्यंते॥

ताकत्वाच्चाश्वस्यप्राधान्यमित्याह॥प्राजापत्यत्वाच्चेति॥प्रतीकमादायव्याचष्टे॥उषाइत्यादिना॥स्मरणार्थत्वमेवनिपातस्यस्फुटयति॥प्रसिद्धमिति॥शास्त्री
येलौकिकेचव्यवहारेप्रसिद्धोब्राह्मोमुहूर्तस्तंकालमितियावत्॥उषसिशिरःशब्दप्रयोगेदिनावयवेषुतस्यप्राधान्यंहेतुमाह॥प्राधान्यादिति॥तथापि
कथंतत्रतच्छब्दप्रयोगस्तत्राह॥शिरश्चेति॥आश्वमेधिकाश्वशिरस्सुषसोदृष्टिः कर्तव्येत्याह॥अश्वस्येति॥कालादिदृष्टिरश्वांगेषुकिमितिक्षिप्यतेऽश्वांग
दृष्टिरेवतेषुकिंनस्यादित्याशंक्याह॥कर्मांगस्येति॥अंगेष्वनंगमतिक्षेपेहेत्वंतरमाह॥प्राजापत्यत्वंचेति॥अश्वस्यसेत्स्यतीतिशेषः॥अत्रहेतुः प्रजापतीति॥

ननुकालादिदृष्टयोश्वावयवेष्वारोप्यंतेनतस्यप्रजापतित्वंक्रियतेतत्राह॥कालेति॥कालाद्यात्मकोहिप्रजापतिस्तथाचयथाप्रतिमायांविष्णुत्वकर
णंतदृष्टिस्तथाकालादिदृष्टिरश्वावयवेषुतस्यप्रजापतित्वकरणमश्वमेधाधिकारीहिसत्यश्वेकर्मणोवीर्यवत्तरत्वार्थकालादिदृष्टिरश्वावयवेषुकुर्या
त्तदनधिकारीतुअश्वाभावेस्वात्मानमश्वंकल्पयित्वास्वशिरःप्रभृतिषुकालादिदृष्टिकरणेनप्रजापतित्वंसंपाद्यप्रजापतिरस्मीतिज्ञानात्तद्भावंप्रतिपद्यते
तिभावः॥चक्षुषिसूर्यदृष्टौहेतुमाह॥शिरसइति॥उषसोनंतरत्वंसूर्येदृष्टंचक्षुषिचशिरसोनंतरत्वंदृश्यतेतस्मात्तत्रतदृष्टिर्युक्तेत्यर्थः॥तत्रैवहेत्वंतरमाह॥

प्राजापत्यत्वंचप्रजापतिदृष्ट्यध्यारोपणा कालत्वलोकदेवतात्मत्वाध्यारोपणंचप्रजापतित्वकरणंपशोरेवंरूपोहिप्रजापतिर्विष्णुत्वादिक
रणमिवप्रतिमादौ सूर्यश्चक्षुःशिरसोनंतरत्वात्॥सूर्याधिदेवतत्वाच्च॥वातःप्राणोवायुस्वाभाव्यात्॥व्यात्तंविवृतंमुखमग्निर्वैश्वानरःवैश्वान

ॐहरिःॐ उषावाअश्वस्यमेध्यस्यशिरःसूर्यश्चक्षुर्वातःप्राणोव्यात्तमग्निर्वैश्वानरःसंवत्सरआत्माश्वस्यमेध्यस्यद्यौःपृष्ठमं
तरिक्षमुदरंपृथिवीपाजस्यंदिशःपार्श्वे

रइत्यग्नेर्विशेषणंवैश्वानरोनामाग्निर्विवृतंमुखमित्यर्थः॥मुखस्याग्निदैवतत्वात्संवत्सर
आत्मासंवत्सरोद्वादशमासस्त्रयोदशमासोवा॥आत्माशरीरं कालावयवानांचसंवत्सरःशरीरं शरीरंचात्मा मध्यंह्येषामंगानामात्मेतिश्रुतेः॥

सूर्येति॥आदित्यश्चक्षुर्भूत्वाक्षिणीप्राविशदितिश्रुतेश्चक्षुषिसूर्योधिष्ठात्रीदेवतातेनसामीप्यात्तत्रतदृष्टिरित्यर्थः॥अश्वप्राणेवायुदृष्टौचलनस्वाभाव्यंहेतुर
श्वस्यविदारितेमुखेभवत्वग्निदृष्टिःतथापिपर्यायोपादानंव्यर्थमित्याशंक्यक्रव्यादादिनिवृत्त्यर्थंविशेषणमित्याह॥वैश्वानरइत्यग्नेरिति॥अग्निर्वाग्भू
त्वामुखंप्राविशदितिश्रुतिमाश्रित्यमुखेतदृष्टौहेतुमाह॥मुखस्येति॥अधिकमासमनुसृत्यत्रयोदशमासोवेत्युक्तं॥शरीरेसंवत्सरदृष्टिरित्यत्रात्मत्वंहेतुमा

व्या

खुरलक्षणं

ह॥कालेति॥आत्माहस्तादीनामंगानामितिशेषः॥कालावयवानांसंवत्सरस्यात्मत्ववदंगानांशरीरस्यात्मत्वेप्रमाणमाह॥मध्यंहीति॥पुनरुक्तेरर्थवत्वमा
ह॥अश्वस्येति॥पृष्ठेद्युलोकदृष्टौहेतुमाह॥ऊर्ध्वत्वेति॥उदरेंतरिक्षदृष्टौनिमित्तमाह॥सुषिरत्वेति॥पादाअस्यंतेअस्मिन्निति व्युत्पत्तिमाश्रित्यविवक्षि
तमाह॥पादेति॥अश्वस्यहिखुरेपादासनत्वसामान्यात् पृथिवीदृष्टिरित्यर्थः॥पार्श्वयोर्दिक्चतुष्टयदृष्टौहेतुमाह॥पार्श्वेनेति॥द्वेपार्श्वेचतस्रश्चदिश
स्तत्रकथंतयोस्तदारोपणंद्वाभ्यामेवद्वयोःसंबंधादितिशंकते॥पार्श्वयोरिति॥यद्यपिद्वेदिशौद्वाभ्यांपार्श्वाभ्यांसंबध्येतेतथाप्यश्वस्यप्राङ्मुखत्वेप्रत्यङ्मु

अश्वस्यमेध्यस्येतिसर्वत्रानुषंगार्थंपुनर्वचनं द्यौः पृष्ठंऊर्ध्वत्वसाम्या दंतरिक्षमुदरं सुषिरत्वसामान्या त्पृथिवीपाजस्यंपादस्यमितिवर्णव्य
त्ययेनपादासनस्थानमित्यर्थः॥दिशश्चतस्रोपिपार्श्वे पार्श्वेनदिशांसंबंधा त्पार्श्वयोर्दिशांचसंख्यावैषम्यादयुक्तमितिचेत्॥नसर्वमुखत्वो

अवांतरदिशः पर्शवऋतवोंगानिमासाश्चार्द्धमासाश्चपर्वाण्यहोरात्राणिप्रतिष्ठानक्षत्राण्यस्थीनिनभोमांसान्यूवध्यं
सिकताः सिंधवोगुदा

पपत्तेरश्वस्यपार्श्वाभ्यामेवसर्वदिशांसंबंधाददोषः॥अवांतरदिशआग्नेय्याद्याः पर्शवः पार्श्वास्थीनि ऋत
वोंगानिसंवत्सरावयवत्वादंगसाधर्म्या न्मासाश्चार्धमासाश्चपर्वाणिसंधयः संधिसामान्या दहोरात्राणिप्रतिष्ठाबहुवचनात्प्राजापत्यदैवपित्र्य
मानुषाणिप्रतिष्ठाः पादाः प्रतितिष्ठत्येतैरिति॥

खत्वेचदक्षिणोत्तरयोस्तन्मुखत्वेचप्राक्प्रतीच्योर्दिशोस्ताभ्यांसंबंधसंभवात्तत्रतद्दृष्टिरविरुद्धेतिपरिहर
ति॥नेत्यादिना॥तदुपपत्तौचाश्वस्यचलिष्णुत्वंहेतूकर्त्तव्यं॥पार्श्वास्थिष्ववांतरदिशामारोपेपार्श्वदिक्संबंधोहेतुः ऋतवः संवत्सरस्यांगानिहस्तादीनिचदेहस्यावयवा
स्तस्मात्तदृष्टिरंगेषुकर्त्तव्येत्याह॥ऋतवइति॥अस्तिहिमासादीनांसंवत्सरसंधित्वमस्तिचशरीरसंधित्वंपर्वणामतस्तेषुमासादिदृष्टिरित्याह॥संधीति॥युगसहस्रा

भ्यां प्राजापत्यमेकमहोरात्रमयनाभ्यां दैवं पक्षाभ्यां पित्र्यं षष्टिघटिकाभिर्मानुषमिति भेदः॥ प्रतिष्ठाशब्दस्य पादविषयत्वं व्युत्पादयति॥ प्रतितिष्ठतीति॥ पादेष्व
होरात्रदृष्टिसिध्यर्थमुक्तमुपपादयति॥ अहोरात्रैरिति॥ अस्थिषु नक्षत्रदृष्टौ हेतुमाह॥ शुक्लेति॥ नभःशब्देनांतरिक्षं किमिति न गृह्यते मुख्ये सत्युपचारायोगा
दित्याशंक्य पुनरुक्तिं परिहर्त्तुमित्याह॥ अंतरिक्षस्येति॥ उदकं सिंचंति मेघा मांसानि रुधिरं अतः सेककर्तृत्वसामान्यान्मांसेषु मेघदृष्टिरित्याह॥ उदकेति॥ अश्वज

अहोरात्रैर्हि कालात्मा प्रतितिष्ठति॥ अश्वश्च पादैः नक्षत्राणि अस्थीनि॥ शुक्लत्वसामान्यात् नभो नभस्था मेघाः अंतरिक्षस्योदरत्वोक्ते मांसान्युदक
रुधिरसेचनसामान्या दूवध्यं उदरस्थमर्धजीर्णमशनं सिकताः विश्लिष्टावयवसामान्यात् सिंधवः स्यंदनसामान्यान्नद्यो गुदा नाड्यो बहुवचनाच्च॥ य
कृच्च क्लोमानश्च हृदयस्याधस्ताद्दक्षिणोत्तरौ मांसखंडौ क्लोमान इति नित्यं बहुवचनमेकस्मिन्नेव पर्वताः काठिन्यादुच्छ्रितत्वाच्च ओषधयश्च क्षुद्राः स्थाव

यकृच्च क्लोमानश्च पर्वता ओषधयश्च वनस्पतयश्च लोमान्युद्यन्पूर्वार्द्धो निम्लोचन्जघनार्द्धो यद्विजृंभते तद्विद्योतते यद्विधूनुते
तत्स्तनयति यन्मेहति तद्वर्षति वागेवास्य वाक्॥ १॥ राः वनस्पतयश्च महांतो लोमानि केशाश्च यथासंभवं उद्यन्नुद्गच्छन् भवति सवि
ता आमध्यान्हादस्य पूर्वार्धो नाभेरूर्ध्वमित्यर्थः॥ निम्लोचन्नस्तं यन्नामध्यान्हाज्जघनार्धोऽपरार्धः पूर्वापरत्वसाधर्म्याद्यद्विजृंभते गात्राणि
विनामयति विक्षिपति तद्विद्योतते मुखघनविदारणसामान्याद्यद्विधूनुते गात्राणि कंपयति तत्स्तनयति॥ ठरविपरिवर्तिन्यर्धजीर्णसिकतादृष्टे
हेतुः॥ विश्लिष्टेति॥ किमिति गुदशब्देन पायुरेव न गृह्यते शिराग्रहणे हि मुख्यार्थातिक्रमः स्यात्तत्राह॥ बहुवचनादिति॥ चकारोऽवधारणार्थः॥ यद्यपि बहूत्त्या
शिराभ्योऽर्थांतरमपि गुदशब्दमर्हति तथापि स्यंदनसादृश्यात्तास्वेव सिंधुदृष्टिरिति तासामिह ग्रहणमिति भावः॥ कुतो मांसखंडयोर्द्वित्वमेकत्र बहुवचनाद्दहुत्व

नइति॥तयोःपर्वतदृष्टौहेतुद्वयमाह॥काठिन्यादित्यादिना॥सुदृढत्वसाधर्म्याद्दोषधिदृष्टिर्लोमसुमहत्त्वसामान्याद्वनस्पतिदृष्टिश्चाश्वकेशेषुकर्त्तव्येत्याह॥य
थासंभवमिति॥पूर्वत्वसामान्यान्मध्यान्हात्प्रागवस्थादित्यदृष्टिरश्वस्यनाभेरूर्ध्वभागेकर्त्तव्येत्याह॥उद्यन्नित्यादिना॥अपरत्वसादृश्यादश्वस्यनाभेरप
रार्धभागेमध्यान्हादनंतरभाव्यादित्यदृष्टिःकार्येत्याह॥निम्लोचन्नित्यादिना॥विजृंभतइत्यात्रौप्रत्ययार्थोनविवक्षितःविजृंभणंमुखंविदारयति॥विद्योत
नंपुनर्मेघविदारणमतोविद्योतनदृष्टिर्जृंभणेकर्त्तव्येत्याह॥मुखेति॥स्तनयतीतिस्तनितमुच्यतेतदृष्टिर्गात्रकंपनेकर्त्तव्येत्यत्रहेतुमाह॥गर्जनेति॥मूत्रकर
णेवर्षणदृष्टौकारणमाह॥सेचनेति॥अश्वस्यहेषितशब्देनास्यारोपणमित्यतोनसादृश्यंवक्तव्यमित्याह॥नात्रेति॥१॥अश्वावयवेषुकालादिदृष्टीर्विधाया

गर्जनशब्दसामान्याद्यन्मेहतिमूत्रंकरोत्यश्वस्तद्वर्षतिवर्षणंतत्सेचनसामान्याद्वागेवशब्दएवअस्याश्वस्यवागिति॥नात्रकल्पने
त्यर्थः॥अहर्वाइतिसौवर्णराजतौमहिमाख्यौग्रहावश्वस्याग्रतःपृष्ठतश्चस्थाप्येतेतद्विषयमिदंदर्शनंअहःसौवर्णोग्रहःदीप्तिसामा

अहर्वा अश्वं पुरस्तान्महिमान्वजायत

न्यात्॥वैअहरश्वंपुरस्तान्महिमान्वजायतेतिकथमश्वस्यप्रजापतित्वात्प्रजापतिर्ह्य
द्वित्यादिलक्षणोन्हात्मस्यते॥अश्वंलक्षयित्वाऽजायतसौवर्णोमहिमग्रहोवृसमनुविद्योततेविद्युतइतियद्वत्॥ श्वंप्रजापतिरूपंविवक्षित्वाकंडि
कांतरंगृहीत्वातात्पर्यमाह॥अहर्वेत्यादिना॥ग्रहोहवनीयद्रव्याधारोपात्रविशेषोअग्रतःपृष्ठतश्चेतिसंज्ञपनात्प्रागूर्ध्वंचेतियावत्॥प्रसिद्धातावदन्हि
दीप्तिःसौवर्णेचग्रहेसास्त्यतस्तस्मिन्नहर्दृष्टिरितिदर्शनंविभजते॥अहरिति॥अश्वसंज्ञपनात्पूर्वंयोमहिमाख्योग्रहःस्थाप्यतेसचेदहर्दृष्ट्योपास्यते॥
कथंसोश्वमन्वजायतेतिपश्चादश्वस्यतज्जन्मवाचोयुक्तिरितिशंकते॥अहरश्वमिति॥नायंपश्चादर्थोनुशब्दःकिंतुलक्षणार्थस्तथाचाश्वस्यप्रजापति
सोमादि

ग्रं

रूपत्वात्तं लक्षयित्वा ग्रहस्य यथोक्तस्य प्रवृत्तेरुपदेशादश्वमन्वजायतेत्यविरुद्धमिति परिहरति॥ अश्वस्येति॥ तदेव स्फुटयति॥ प्रजापतिरिति॥ काल
लोकदेवतात्मा प्रजापतिरश्वात्मना दृश्यमानोऽत्राह दृष्ट्या दृष्टेन ग्रहेण लक्ष्यते॥ तथा चाश्वमन्वजायतेति श्रुतिरविरुद्धेत्यर्थः॥ अनुशब्दो न पश्चाद्वाचीत्यत्र
दृष्टांतमाह॥ वृक्षमिति॥ यदा वृक्षं लक्षयित्वा तस्याग्रे विद्युद्धि द्योतते तदा वृक्षमनु विद्योततेसेति प्रयुज्यते॥ तथा चात्राप्यनुशब्दो न पश्चादर्थ इत्यर्थः॥ यत्र च
स्थाने ग्रहः स्थाप्यते तत्पूर्वसमुद्रदृष्ट्याध्येयमित्याह॥ तस्येति॥ पूर्ववत्मंत्रसादृश्यं॥ कथं सप्तमी प्रथमार्थे योज्यते छंदस्यर्थानुसारेण व्यत्यय संभवादित्याह॥ विभ

तस्य ग्रहस्य पूर्वे पूर्वः समुद्रे समुद्रो योनिर्विभक्तिव्यत्ययेन योनिरित्यासादनस्थानं॥ तथा रात्रिः राजतो ग्रहो वर्णसामान्याज्जघन्यत्वसामान्या
द्वा॥ एनमश्वं पश्चात्पृष्ठतो महिमान्वजायत॥ तस्यापरे समुद्रे योनिः महिमा महत्वादश्वस्य हि विभूतिरेषा सौवर्णो राजतश्च ग्रहावुभयतः स्थाप्येते॥

तस्य पूर्वे समुद्रे योनी रात्रिरेनं पश्चान्महिमान्वजायत तस्यापरे समुद्रे योनिरेतौ वा अश्वं महिमानावभितः संबभूवतुर्हयो भूत्वा देवा
नवह तावेतौ वै महिमानौ महिमाख्यौ ग्रहावश्वमभितः संबभूवतुः॥ उक्तलक्षणावेव संभूतावित्यमसावश्वो महत्वयुक्त इति ॥

क्तीति॥ यथा सौवर्णे ग्रहेऽहर्दृष्टिरुपदिष्टा तथा राजते ग्रहे रात्रिदृष्टिः कर्तव्येत्याह॥ तथेति॥ अस्ति हि चंद्रातपवत्वाद्रात्रेः शौक्ल्यमस्ति च राजतस्य ग्रहस्य तद्युक्तं
तत्र रात्रिदर्शनमित्याह॥ वर्णेति॥ रजतं सुवर्णाज्जघन्यमन्हश्च रात्रिरतो वा सादृश्यात्तत्र रात्रिदृष्टिरित्याह॥ जघन्येति॥ प्रजापतिरूपं प्रकृतमश्वं लक्षयित्वा तत्सं
ज्ञपनात्पश्चादस्य प्रवृत्तिर्दर्शयति॥ एनमिति॥ तदासादनस्थाने पश्चिमसमुद्रदृष्टिर्विधेयेत्याह॥ तस्येति॥ कथमेतौ ग्रहौ महिमाख्यावुक्तौ महत्वोपेतत्वादित्या
ह॥ महिमेति॥ अथाश्वविषयं दर्शनमादिश्य ग्रहविषयं तदादिशतो वाक्यभेदः स्यान्नेत्याह॥ अश्वस्येति॥ किमत्र नियामकमित्याशंक्य पुनरुक्तिरिति मत्वाह॥ तावि

त्यादिना॥वेशब्दार्थंकथयति॥एवेति॥वाक्यशेषोप्यत्रानुगुणीभवतीत्याह॥तथाचेति॥हयशब्दनिष्पत्तिपुरःसरंतदर्थमाह॥हयइति॥वाज्यादिशब्दानांजातिवि
शेषवाचित्वादत्रापितदेवग्राह्यमितिपक्षांतरमाह॥जातीति॥देवानांदेवत्वप्रापकत्वंकथमस्येत्याशंक्याह॥प्रजापतित्वादिति॥अश्वंस्तोतुमारभ्यकल्पांतरो
क्यातन्निंदावचनमनुचितमितिशंकते॥नन्विति॥उपक्रमविरोधोनास्तीतिपरिहरति॥नेत्यादिना॥समुत्पद्यभूतानिद्रवंत्यस्मिन्नितिव्युत्पत्त्यापरमगंभीरस्ये
श्वरस्यसमुद्रशब्दतामाह॥परमात्मेति॥तत्रयोनित्वमुत्पादकत्वंबंधुत्वंस्थापकत्वंसमुद्रत्वंविलापकत्वमितिभेदः॥अथपरमात्मयोनित्वादिवचनमुपास्याश्वस्य

पुनर्वचनंस्तुत्यर्थंतथाचहयोभूत्वेत्यादिस्तुत्यर्थमेवहयोहिनोतेर्गतिकर्मणोविशिष्टगतिरित्यर्थः॥जातिविशेषोवादेवानवहद्देवत्वमगमयत्प्र
जापतित्वाद्देवानांवावोढाभवत्॥ननुनिंदैववाहनत्वं॥नैषदोषःवाहनत्वंस्वाभाविकमश्वस्यस्वाभाविकत्वादुत्क्रायप्राप्तिर्देवादिसंबंधोश्वस्ये

द्वाजीगंधर्वानर्वासुरानश्वोमनुष्यान्समुद्रएवास्यबंधुःसमुद्रोयोनिः॥२॥प्रथमंब्राह्मणं॥१॥

तिस्तुतिरेवैषातथावाज्यादयोजातिविशेषावाजीभूत्वागंधर्वानवहदित्यनुषंगःतथार्वाभूत्वाऽसुरानश्वोभूत्वामनुष्यान्समुद्रएवेति॥प
रमात्मावंधुःबंधनंबध्यतेस्मिन्नितिसमुद्रोयोनिःकारणमुत्पत्तिंप्रतिएवमसौशुद्धयोनिःशुद्धस्थितिरितिस्तूयते॥अप्सुयोनिर्वाअश्वइ
तिश्रुतेःप्रसिद्धएववासमुद्रोयोनिः॥२॥तृतीयस्यप्रथमंब्राह्मणं॥१॥अथाग्नेरश्वमेधोपयोगिकस्योत्पत्तिरुच्यते॥ क्वोपयुज्यतेतत्राह॥एवमिति॥
श्रुत्यंतरानुरोधेनसमुद्रोयोनिरित्यत्रसमुद्रशब्दस्यरूढिमनुजानाति॥अप्सुयोनिरिति॥२॥तृतीयस्यप्रथमंब्राह्मणं॥१॥ॐअश्वादिदर्शनोक्त्यनंतरंअग्नि
दर्शनंवक्तुंब्राह्मणांतरमवतारयति॥अथेति॥नैवेहेत्यादौतदृष्टिर्नास्तीतिचेत्सत्यंतत्राग्नेर्जन्मवक्तुंभूमिकाक्रियतइत्याह॥अग्नेरिति॥वायोरग्निरित्या

दोप्रसिद्धंतज्जन्मेतिचेत्सत्यंतद्विशेषस्यात्रजन्मोक्तिरित्याह॥अश्वमेधेति॥दर्शनेविधित्सितेकिंजन्मोक्त्येतिचेत्तत्राह॥तद्विषयेति॥अग्निदर्शनस्य
विधातुमिष्टस्यविध्यर्थमुपास्याग्निस्तुतिफलात्तदुत्पत्तिरिष्टाशुद्धजन्मत्वादुत्कृष्टत्वेनायमुपास्योराजादिवदित्यर्थः॥तात्पर्यमुक्त्वावाक्यमादायाक्षराणि
व्याचष्टे॥नैवेत्यादिना॥नामरूपाभ्यांविभक्तोविशेषोयस्मिन्निति बहुव्रीहिः॥अत्रशून्यवादीलब्धावकाशोविमृश्यपरेष्टमुत्सवष्टंभेनस्वपक्षमाह॥कि
मित्यादिना॥कार्यस्यप्रागसत्वेहेत्वंतरमाह॥उत्पत्तेश्चेति॥विमतंप्रागसदुत्पद्यमानत्वाद्यन्नैवंनतदेवंयथापरेष्टंब्रह्मेत्यर्थः॥हेतुसिद्धिंशंकित्वोत्तरमाह

तद्विषयदर्शनविवक्षयैवोत्पत्तिःस्तुत्यर्थानैवेहकिंचनाग्रआसीदिहसंसारमंडलेकिंचनकिंचिदपिनामरूपप्रविभक्तविशेषंनैवासीत्नबभूवा
ग्रेप्रागुत्पत्तेर्मनआदेःकिंशून्यमेवस्यान्नैवेहकिंचनेतिश्रुतेःनकार्यंकारणंवासीदुत्पत्तेश्चउत्पद्यतेहिघटःअतःप्रागुत्पत्तेर्घटस्यनास्तित्वं॥ननुका

नैवेहकिंचनाग्रआसीन्मृत्युनैवेदमावृतमासी

रणस्यननास्तित्वंमृत्पिंडादिदर्शनाद्यन्नोपलभ्यतेतस्यैवनास्तितास्तुकार्यस्यनतुकारणस्योपलभ्यमानत्वान्नप्रागुत्पत्तेःसर्वानुपलंभादनुपल
ब्धिश्चेदभावहेतुःसर्वस्यजगतःप्रागुत्पत्तेःनकार्यंकारणंवोपलभ्यतेतस्मात्सर्वस्यैवाभावोस्तुनमृत्युनैवेदमावृतमासीदितिश्रुतेः॥ ॥उत्पद्यतेही

ति॥घटग्रहणंकार्यमात्रस्योपलक्षणार्थं॥उक्तमनुमानंनिगमयति॥अतइति॥तत्रतार्किकोब्रूते॥नन्विति॥यदुक्तंनकार्यंकारणंवासीदितितत्रभागेबाधोभागे
चानुमतिरित्यर्थः॥कार्यस्यापिकथंप्रागसत्वोपपत्तिरित्याशंक्याह॥यन्नेति॥एतेनानुमानस्यसिद्धसाध्यतोक्ताकार्यवत्कारणस्यापिप्रागसत्वंकिंनस्यादित्याशंक्यो
क्तहेतुत्वाभावान्नैवमित्याह॥नत्विति॥शून्यवाद्याह॥नप्रागुत्पत्तेरिति॥विमतंप्रागसद्योग्यत्वेसतितदानुपलब्धत्वात्संमतवन्नचासिद्धोहेतुःश्रुतेरनतिशंक्यत्वा

यति॥ अनुपलब्धिश्चेति॥ कार्यवत्कारणस्यापि प्रागसत्वे प्राप्ते सिद्धांतयति॥ नेत्यादिना॥ नैवेत्यादिश्रुतिरव्याकृतनामरूपादिविषया न प्रागसत्वं कार्यकारणयोराह॥ अन्यथा वाक्यशेषविरोधादित्यर्थः॥ श्रुतिं विवृणोति॥ यदिहीति॥ द्वयोरसत्वेपि का वाचोयुक्तेरनुपपत्तिस्तत्राह॥ नहीति॥ मा तर्हि वाक्यमेवाभूदित्याशंक्याह॥ ब्रवीति चेति॥ मृत्युनेत्यादिवाक्यार्थमुपसंहरति॥ तस्मादिति॥ श्रुतेः प्रामाण्यादिति॥ तत्प्रामाण्यस्य प्रमाणलक्षणे स्थितत्वादिति यावत्॥ परकीयेनुमाने श्रुतिविरोधमभिधायानुमानविरोधमाह॥ अनुमेयत्वाच्चेति॥ कार्यकारणयोः सत्वस्यानुमेयतया तदसत्वमनुमातुमशक्यमुपजीव्यविषयतया सत्वानुमानस्य बलीयस्त्वादित्यर्थः॥ कार्यकारणयोः सत्वानुमानं प्रतिज्ञाय प्रथमं कारणसत्वमनुमिनोति॥ अनुमीयते चेत्यादिना॥ कार्यं

यदि हि किंचिदपि नासीद्येनाव्रियते यच्चाप्याव्रियते तदा नावक्ष्यन्मृत्युनैवेदमावृतमिति श्रुतिः॥ न हि भवति गगनकुसुमच्छन्नो वंध्यापुत्र इति ब्रवीति च मृत्युनैवेदमावृतमासीदिति॥ तस्माद्येनावृतं कारणेन यच्चावृतं कार्यं प्रागुत्पत्तेस्तदुभयमासीच्छ्रुतेः प्रामाण्यादनुमेयत्वाच्चा॰ऽनुमीयते च प्रागुत्पत्तेः कार्यकारणयोरस्तित्वं कार्यस्य हि ततो जायमानस्य कारणे सत्युत्पत्तिदर्शनादसति चादर्शनाज्जगतोपि प्रागुत्पत्तेः कारणास्तित्वमनुमीयते घटादिकारणास्तित्ववत्॥ घटादिकारणस्यापि असत्वमेवानुपमृद्य मृत्पिंडादिकं घटाद्यनुत्पत्तेरिति चेत् न मृदादेः कारणत्वात्॥ मृत्सुवर्णादि हि तत्र कारणं घटरुचकादेर्न पिंडाकारविशेषः॥

स हीति॥ विमतं सत्पूर्वं कार्यत्वात्कुंभवदित्यर्थः॥ नानुपमृद्य प्रादुर्भावादिति न्यायेन दृष्टांतस्य साध्यवैकल्यं चोदयति॥ घटादीति॥ न तावदसिद्धो घटः स्वकारणमुपमृद्नाति॥ असतो॰ऽकारकत्वात्सिद्धस्य तूपमर्दकत्वेनासत्पूर्वकत्वमिति कुतः साध्यविकलतेत्याह॥ नेति॥ किंचान्वयिद्रव्यमेव सर्वत्र कारणं न पिंडादिविशेषोनन्वयादनवस्थानाच्चेति कुतः साध्यवैकल्यमित्याह॥ मृदादेरिति॥ तदेव स्फुटयति॥ मृत्सुवर्णादिति॥ तत्रेति दृष्टांतोक्तिः॥ किंचान्वयव्यतिरेकाभ्यां कारणमवधेयं॥ न च पिंडाभावे घटो न भवतीति व्यतिरेकोस्ति पिंडाभावेपि शकला

दिभ्योपिघटाद्युद्भवोपलंभादित्याह॥तदभावेति॥तदेवस्फुटयति॥असत्यपीति॥त्वन्मतेपिव्यतिरेकराहित्यंतुल्यमित्याशंक्याह॥असतीति॥मृदाद्येवघ
टादिकारणंचेत्किमितिपिंडादेरसत्येवततोघटाद्युत्पत्तिरित्याशंक्याह॥सर्वमिति॥ब्रह्मणित्वविद्यावशादुपपत्तिरितिभावः॥अन्वयिद्रव्यंपूर्वोत्पन्नस्व
कार्यतिरोधानेनकार्यांतरंजनयतिचेत्कार्यतादात्म्येनस्वयमपिनश्येत्तत्रोत्तरकार्योत्पत्तिर्हेत्वभावादित्याशंक्याह॥नचेति॥कार्यांतरेप्यनुवृत्तिदर्शनात्पिं
डरूपकार्यात्मनाऽभावाच्चेत्यर्थः॥अन्वयिद्रव्यस्यैवकारणत्वेफलितमाह॥तस्मादिति॥अन्वयिनोमृदादेर्नाभावेनाऽभावान्नकारणतेतिशंकते॥पिंडा

तदभावेभावादसत्यपिपिंडाकारविशेषेमृत्सुवर्णादिकारणद्रव्यमात्रादेवघटरुचकादिकार्योत्पत्तिर्दृश्यते॥तस्मान्नपिंडाकारविशे
षोघटरुचकादिकारणमसतितुमृत्सुवर्णादिद्रव्येघटरुचकादिर्नजायतइतिमृत्सुवर्णादिद्रव्यमेवकारणंनतुपिंडाकारविशेषः॥
सर्वंहिकारणंकार्यमुत्पादयत्पूर्वोत्पन्नस्यात्मकार्यस्यतिरोधानंकुर्वत्कार्यांतरमुत्पादयति एकस्मिन्कारणेयुगपदनेककार्यविरोधा
न्नचपूर्वकार्योपमर्देकारणस्यस्वात्मोपमर्दोभवति॥तस्मात्पिंडाद्युपमर्देकार्योत्पत्तिदर्शनमहेतुः प्रागुत्पत्तेःकारणासत्वेपिंडादिव्यतिरे
केणमृदादेरसत्वादयुक्तमितिचेत्पिंडादिपूर्वकार्योपमर्देमृदादिकारणंनोपमृद्यतेघटादिकार्यांतरेप्यनुवर्ततइत्येतदयुक्तं॥पिंडघटादि
व्यतिरेकेणमृदादिकारणस्यानुपलंभादितिचेत्॥न॥मृदादिकारणानांघटाद्युत्पत्तौपिंडादिनिवृत्तावनुवृत्तिदर्शनात्सादृश्यादन्वयद
र्शनंनकारणानुवृत्तिरितिचेत्॥ दीति॥तदेवचोद्यंविवृणोति॥पिंडादित्यादिना॥मृद्घटःस्वर्णकुंडलमित्यादितादात्म्यप्रत्ययस्यपिंडाद्यतिरि
क्तमृदाद्यभावेऽनुपपत्तेरनुगतंमृदाद्युपेयमितिपरिहरति॥नेति॥किंचयापिंडात्मनापूर्वेद्युर्मृदासीत्सैवाद्यघटाद्यभूदितिप्रत्यभिज्ञयामृदोन्वयि
न्याःसिद्धेस्तत्कारणत्वंदुरपन्हवमित्याह॥मृदादीति॥यत्सत्तत्क्षणिकंयथादीपःसंतश्चेमेभावाइत्यनुमानात्सर्वार्थानांक्षणिकत्वसिद्धेरन्वयदृष्टिःसादृ

श्यादनुवृत्तिरितिशंकते॥सादृश्यादिति॥

प्रत्यभिज्ञासिद्धस्याप्यर्थविरुद्धं क्षणिकार्थबोधिलिंगमनुष्णत्वानुमानवन्न मानमिति दूषयति॥ नेत्यादिना॥ सादृश्यादीत्यादिशब्देन प्रत्यभिज्ञाभ्रांतित्वादिग्रह्यते॥ प्रत्यक्षत्वात्कारणैक्यं गम्यते अनुमानात्तद्भेदः तो द्वयोर्विरुद्धत्वस्याव्यभिचारित्वान्नाध्यक्षेणानुमानबाधौ वैपरीत्यसंभवादित्याशंक्याह॥ नचेति॥ प्रत्यभिज्ञामुपजीव्य क्षणिकत्वानुमानाप्रवृत्तावप्युपजीव्यजातीयत्वात्तत्प्राबल्यादुपजीवकजातीयकमुक्तानुमानं दुर्बलं तद्बाध्यमित्यर्थः॥ प्रत्यभिज्ञास्वार्थे स्वतो न मानं बुध्यंतरसंभवादेव बुद्धीनां मानत्वस्य बौद्धैरिष्टत्वान्न च बुध्यंतरं स्थायित्वसाधकमस्तीति प्रत्यभिज्ञायमानस्यापि क्षणिकत्वमित्याशंक्याह॥ सर्वत्रेति॥ प्रसंगमेव प्रकटयति॥ यदि चेति॥ क्षणिकत्वादिबुद्धेरपि स्वार्थे स्वतो मानत्वाभावात्तादृग्बुध्यंतरापेक्षायां तस्यापि तथात्वेनानवनपिंडादिगतानां मृदाद्यवयवानामेव घटादौ प्रत्यक्षत्वेऽनुमानाभासात्सादृश्यादिकल्पनानुपपत्तेः न च प्रत्यक्षानुमानयोर्विरुद्धाव्यभिचारिताप्रत्यक्षपूर्वकत्वादनुमानस्य सर्वत्रैवानाश्वासप्रसंगात्॥ यदि च क्षणिकं सर्वं तदेवेदमिति गम्यमानं तद्बुद्धेरपि अन्यतद्बुध्यपेक्षत्वे तस्या अप्यन्यतत्बुध्यपेक्षत्वमित्यनवस्थायां तत्तदृशमिदमित्यस्या अपि बुद्धेर्मृषात्वात्सर्वत्रानाश्वासः तेव तदिदं बुध्योरपि कर्त्रभावे संबंधानुपपत्तिः॥ सादृश्यात्तत्संबंध इति चेत्॥ न तदिदं बुध्योरितरेतरविषयत्वानुपपत्तेः॥ असति चेतरेतरविषयत्वे सादृश्यग्रहणानुपपत्तिः ॥ ॥

स्यानाद्बुद्धेः स्वतः प्रामाण्यमुपेयं तथा च प्रत्यभिज्ञानं सर्वं तथैव बाधादित्यर्थः॥ किंच॥ प्रत्यभिज्ञाया भ्रांतित्वं वदता स्वरूपानपह्नवात्तदिदं बुध्योः सामानाधिकरण्येन संबंधो वाच्यः स च वक्तुं न शक्यते क्षणद्वयसंबंधिनो द्रष्टुरभावादित्याह॥ तदिदमिति॥ असति संबंधे बुध्योः सादृश्यात्तद्धीरिति शंकते॥ सादृश्यादिति॥ तयोः स्वासंवेद्यत्वाद्ग्राहकांतरस्य चाभावान्न सादृश्यसिद्धिरिति दूषयति॥ न तदिदं बुध्योरिति॥ तथापि किमिति सादृश्यासिद्धिरित्याशंक्याह॥ असति चेति॥ सादृश्यासिद्धिमभ्युपेत्य शंकते॥ असत्येवेति॥ यत्र सत्येवार्थधीस्तत्रैव साधकापेक्षा नान्यत्रेति भावः॥ तत्र बाह्यार्थवादिनं प्रत्याह॥ न तदिदं बुध्यो

रिति॥ विज्ञानवाद्याह॥ असदिति॥ तथासत्यनालंबनं क्षणिकं विज्ञानमित्यस्यापि ज्ञानस्याऽसद्विषयतया विज्ञानवादासिद्धिरित्याह॥ नेति॥ शून्यवा
द्याह॥ तदपीति॥ सर्वा धीरसद्विषयेत्येषापि धीरसद्विषया स्यात्ततश्च सर्वबुद्धेरसद्विषयत्वासिद्धिरिति दूषयति॥ नेत्यादिना॥ परपक्षासंभवात्तत्प्रत्यभि
ज्ञायाः स्थायिहेतुसिद्धो दृष्टांतस्य साध्यवैकल्यं परिहृत्यावांतरप्रकृतमुपसंहरति॥ तस्मादिति॥ संप्रति कारणसत्त्वानुमानं निगमयति॥ अत इति॥ कार्यकार
णयोर्द्वयोरपि प्रागुत्पत्तेः सत्त्वमनुमेयमिति प्रतिज्ञाय कारणास्तित्वं प्रपंचितं॥ इदानीं कार्यास्तित्वानुमानं दर्शयति॥ कार्यस्येति॥ प्रागुत्पत्तेः सद्भावः प्रसिद्ध इति

असत्येव सादृश्ये तत्बुद्धिरिति चेत्॥ न॥ तदिदं बुध्योरपि सादृश्यबुद्धिवदसद्विषयत्वप्रसंगात् सद्विषयत्वमेव सर्वबुद्धीनामस्त्विति चेन्न बु
द्धिबुद्धेरप्यसद्विषयत्वप्रसंगात्तदप्यस्त्विति चेन्न सर्वबुद्धीनां मृषात्वे सत्यबुध्यनुपपत्तेः॥ तस्मादसदेतत्सादृश्यात्तद्बुद्धिरित्यतः सिद्धः प्राक्का
र्योत्पत्तेः कारणसद्भावः कार्यस्य चाभिव्यक्तिलिंगत्वात्कार्यस्य च सद्भावः प्रागुत्पत्तेः सिद्धः॥ कथमभिव्यक्तिलिंगत्वादभिव्यक्तिलिंगमस्येत्यभि
व्यक्तिः साक्षाद्विज्ञानालंबनत्वप्राप्तिर्यद्धि लोके प्रावृतं तमआदिना घटादिवस्तु तदालोकादिना प्रावरणतिरस्कारेण विज्ञानविषयत्वं प्राप्नुव
त्प्राक्सद्भावं न व्यभिचरति॥ तथेदमपि जगत्प्रागुत्पत्तेरित्यवगच्छामः॥

चकारार्थः॥ प्रतिज्ञाभागं विभजते॥ कार्यस्येति॥ हेतुभागमाक्षिपति॥ कथ
मिति॥ अभिव्यक्तिर्लिंगमस्येति व्युत्पत्त्या कथमभिव्यक्तिलिंगत्वादिति कार्यसत्त्वे हेतुरुच्यते सिद्धे हि सत्त्वेऽभिव्यक्तिर्लिंगमस्येति सिध्यति तद्धेतुत्वाच्च सत्त्वसिद्धि
रित्यन्योन्याश्रयादित्यर्थः संप्रतिपन्नयाऽभिव्यक्त्या विप्रतिपन्नं सत्त्वं साध्यते तत्रान्योन्याश्रयत्वमिति परिहरति॥ अभिव्यक्तिरिति॥ कथं तर्हि इहानुमानं प्रयोक्त
व्यमित्याशंक्य प्रथमं व्याप्तिमाह॥ यद्धीति॥ यत्त्वभिव्यज्यमानं तत्प्रागभिव्यक्तेरस्ति यथा तमोंतःस्थं घटादीत्यर्थः संप्रत्यनुमिनोति॥ तथेति॥ विमतं प्रागभिव्य
क्तेः सदभिव्यक्तिविषयत्वाद्यद्ध्यभिव्यज्यते तत्प्राक्सत् संप्रतिपन्नवदित्यर्थः॥ ननु तमोंतःस्थो घटोऽभिव्यंजकसामीप्यादभिव्यज्यते न तत्र प्राक्कालीनं सत्त्वं प्रयो

जकमित्याशंक्याह॥ नहीति॥ उक्तेनुमानेकार्यस्यसदोपलब्धिप्रसंगंविपक्षेवाधकमाशंकते॥ नेत्यादिना॥ उक्तानुमाननिषेधोनञर्थः अविद्यमानत्वाभावा
दितिच्छेदः॥ अनुमानेबाधकोपन्यासंविवृणोति॥ नहीति॥ वर्त्तमानवदतीतमागामिघटादिसदेवचेदुपलब्धिसामग्र्यांसत्यांतद्वत्प्रागूर्ध्वंचोर्ध्वमुपल
भ्येतनचैवमुपलभ्यतेतस्मादयुक्तंकार्यस्यसदासत्वमित्यर्थः॥ मृत्पिंडग्रहणंविरोधिकार्यांतरोपलक्षणार्थंअसन्निहितेसतीतिच्छेदः॥ नतावद्विद्य
मानत्वमात्रंकार्यस्यसदोपलंभापादकंसतोपिघटादेरभिव्यक्त्यनभिव्यक्त्योरुपलब्ध्यत्वादितिसमाधत्ते॥ नेति॥ अभिव्यक्तिसामग्रीसत्वंत्वभिव्यक्तिसा

नह्यविद्यमानोघटउदितेप्यादित्येउपलभ्यते नतेऽविद्यमानत्वाभावादुपलभ्येतेवेतिचेत्॥ नहितवघटादिकार्य्यंकदाचिदप्यविद्यमान
मित्युदितेआदित्येउपलभ्येतैवमृत्पिंडेऽसन्निहितेतमआद्यावरणेचासतिविद्यमानत्वादितिचेत्न॥ द्विविधत्वादावरणस्यघटादिकार्य
स्यद्विविधंह्यावरणंमृदादेरभिव्यक्तस्यतमःकुड्यादिप्राङ्मृदोभिव्यक्तेर्मृदाद्यवयवानांपिंडादिकार्यांतररूपेणसंस्थानंतस्मात्प्रागुत्पत्तेर्वि
द्यमानस्यैवघटादिकार्यस्यावृतत्वादनुपलब्धिर्नष्टोत्पन्नभावाभावशब्दप्रत्ययभेदस्त्वभिव्यक्तितिरोभावयोर्द्विविधत्वापेक्षःपिंडकपाला
देरावरणवैलक्षण्यादयुक्तमितिचेत्तमःकुड्यादिहिघटाद्यावरणंघटादिभिन्नदेशंदृष्टंनतथाघटादिभिन्नदेशेदृष्टेपिंडकपालेतस्मात्पिंडक
पालसंस्थानयोर्विद्यमानस्यैवघटस्यावृतत्वादनुपलब्धिरितितदयुक्तमावरणधर्मवैलक्षण्यादितिचेत्॥ धकंनतुसतस्तत्सामग्रीनियमोस्ती

तिअभिप्रेत्याह॥ द्विविधत्वादिति॥ उत्पन्नस्यकुड्याद्यावरणमनुत्पन्नस्यविशिष्टंकारणमितिद्वैविध्यमेवप्रतिज्ञापूर्वकंसाधयति॥ घटादीति॥ यदोपलभ्य
मानकारणावयवानांकार्यांतराकारेणस्थितिस्तदानेदंकार्यमुपलभ्यतेतत्रान्यथाचोपलभ्यतइत्यन्वयव्यतिरेकसिद्धंकारणस्यकार्यांतररूपेणास्थितस्यका
र्यावरकत्वमितिद्रष्टव्यंविशिष्टस्यकारणस्यावरकत्वसिद्धोसिद्धमर्थमाह॥ तस्मादिति॥ प्राक्कार्यास्तित्वेसदातदुपलब्धिप्रसंगबाधकंनिराकृत्यनष्टोघटो

नास्तीत्यादिप्रयोगप्रत्ययभेदानुपपत्तिंबाधकांतरमाशंक्याह॥नष्टेति॥कपालादिनातिरोभावेनष्टव्यवहारःपिंडाद्यावरणभंगेनाभिव्यक्तादुत्पन्नव्यवहा
रोदीपादिनातमोनिरासेनाभिव्यक्तौभावव्यवहारःपिंडादिनातिरोभावेऽभावव्यवहारः॥तदेवंकार्यस्यसदासत्वेपिप्रयोगप्रत्ययभेदसिद्धिरित्यर्थः पिंडादि
नाघटाद्यावरणंतेनसमानदेशत्वाद्यद्यस्यावरणंनतत्तेनसमानदेशंयथाकुड्यादीतिशंकते॥पिंडेति॥व्यतिरेक्यनुमानंविवृणोति॥नमृदित्यादिना॥अनुमान
फलंनिगमयति॥तस्मादिति॥किमिदंसमानदेशत्वंकिमेकाश्रयत्वंकिंवैककारणत्वंइतिविकल्प्याद्यंविरुद्धत्वेनदूषयति॥नेत्यादिना॥क्षीरेणसंकीर्णस्योदकादे

नक्षीरोदकादेःक्षीराद्यावरणेनैकदेशत्वदर्शनाद्घटादिकार्येकपालचूर्णाद्यवयवानामंतर्भावादनावरणत्वमितिचेत्नविभक्तानांकार्यांतरत्वादा
वरणत्वोपपत्तेः॥आवरणाभावएवयत्नःकर्त्तव्यइतिचेत्पिंडकपालावस्थयोर्विद्यमानमेवघटादिकार्यमावृतत्वान्नोपलभ्यतइतिचेद्घटादि
कार्यार्थिनातदावरणविनाशेएवयत्नःकर्तव्योनघटाद्युत्पत्तौनचैतदस्तितस्मादयुक्तंविद्यमानस्यैवावृतत्वादनुपलब्धिरितिचेन्नाऽनियमा
न्नहिविनाशमात्रप्रयत्नादेवघटाद्यभिव्यक्तिर्नियतातमआद्यावृतेघटादौप्रदीपाद्युत्पत्तौप्रयत्नदर्शनात्सोपितमोनाशायैवेतिचेद्दीपाद्युत्प
त्तावपियःप्रयत्नःसोपितमस्तिरस्करणायतस्मिन्नेवघटःस्वयमेवोपलभ्यते॥

राव्रियमाणस्येतियावत्॥द्वितीयमुत्थापयति॥घटादीति॥यस्येदंका
र्यंतस्मिन्मृदात्मनितेषामवस्थानात्तद्वत्तेषामनावरणत्वमित्यर्थः॥घटावस्थमृन्मात्रवृत्तिकपालादेर्घटानावरणत्वमिष्टमेवेतिसिद्धसाध्यताऽव्यक्तघटावस्थ
मृद्वृत्तिकपालादेरनावरणत्वसाधनेहेत्वसिद्धिःघटस्यकपालादेश्चाश्रयमृदवयवभेदादितिदूषयति॥नविभक्तानामिति॥विद्यमानस्यैवावृतत्वादनुपलब्धिश्चे
दावरणतिरस्कारेयत्नःस्यान्नघटादेरुत्पत्तावतोऽनुभवविरोधःसत्कार्यवादिनःस्यादितिशंकते॥आवरणेति॥तदेवप्रपंचयति॥पिंडेतियन्नावृतंवस्तुव्यज्यतेत
न्नावरणभंगएवयत्नइति॥व्याप्त्यभावान्नानुभवविरोधोस्तीतिदूषयति॥नानियमादिति॥अनियमंसाधयति॥नहीति॥तमसावृतेघटादौदीपोत्पत्तौयत्नोस्तीत्य

वृ·र·
१४

त्वचोदयति॥सोपीति॥अनुभवविरोधमाशंक्योक्तमेवव्यनक्ति॥दीपादीति॥दीपस्तमस्तिरयतिचेत्कथंकुंभोपलब्धिरतआह॥तस्मिन्निति॥तत्रहेतु
माह॥नहीति॥अनुभवमनुसृत्यपरिहरति॥नेत्यादिना॥किमिदानीमावरणभंगेप्रयत्नोनेत्येवनियमोस्तुनेत्याह॥क्वचिदिति॥अनियमंनिगमयन्न
नुभवविरोधाभावमुपसंहरति॥तस्मादिति॥किंचअभिव्यंजकव्यापारेसतिनियमेनघटोभिव्यज्यतेतदभावेनेत्यन्वयव्यतिरेकाववधारितोघटार्थःकुलालादि

भा·

नहिघटेकिंचिदाधीयतइतिचेत्॥नप्रकाशवतोघटस्योपलभ्यमानत्वाद्यथाप्रकाशविशिष्टोघटउपलभ्यतेप्रदीपकरणेननतथाप्राक्प्रदी
पकरणात्तस्मान्नतमस्तिरस्कारायैवप्रदीपकरणंकिंतर्हिप्रकाशवत्त्वायप्रकाशवत्त्वेनैवोपलभ्यमानत्वात्॥क्वचिदावरणविनाशेपियत्नःस्याद्य
थाकुड्यादिविनाशेतस्मान्ननियमोस्त्यभिव्यक्त्यर्थिनावरणविनाशएवयत्नःकार्यइति॥नियमार्थवत्त्वाच्चकारणेवर्त्तमानंकार्यंकार्यांतरेणावरण
मित्यवोचाम॥तत्रयदिपूर्वाभिव्यक्तस्यकार्यस्यपिंडस्यव्यवहितस्यवाकपालस्यविनाशएवयत्नःक्रियेततदाविदलचूर्णाद्यपिकार्यंजायेततेना
प्यावृतोघटोनोपलभ्यतइतिपुनर्यत्नांतरापेक्षैवतस्माद्घटाद्यभिव्यक्त्यर्थिनोनियतएवकारकव्यापारोर्थवांस्तस्मात्प्रागुत्पत्तेरपिसदेवकार्यं॥अती
तानागतप्रत्ययभेदाच्चातीतोघटोऽनागतोघटइत्येतयोश्चप्रत्यययोर्वर्त्तमानघटप्रत्ययवन्ननिर्विषयत्वंयुक्तंअनागतार्थिप्रवृत्तेश्चनह्यसत्यर्थित
याप्रवृत्तिर्लोकेदृष्टायोगिनांचातीतानागतज्ञानस्यसत्यविषयत्वादसंश्चेद्भविष्यन्घटः॥

व्यापारस्तदैर्थवत्त्वार्थमभिव्यक्त्यर्थएवप्रयत्नोवक्तव्यःआ
वरणभंगस्त्वार्थिकइत्याह॥नियमेति॥उक्तंस्मारयन्नेतदेवविवृणोति॥कारणइत्यादिना॥आवृतिभंगार्थेयत्नेयतोघटानुपलब्धिरतस्तदुपलब्ध्यर्थत्वेननि
यतःसन्यत्नःसफलःस्यादितिफलितमाह॥तस्मादिति॥प्रकृतमभिव्यक्तिलिंगकमनुमानंनिर्दोषत्वादादेयमन्वानस्तत्फलमुपसंहरति॥तस्मात्प्रागिति
॥कार्यस्यसत्त्वेयुक्त्यंतरमाह॥अतीतेति॥विमतंसदर्थंप्रमाणत्वात्संप्रतिपन्नवदित्यर्थः॥तदेवानुमानंविशदयति॥अतीतइति॥तत्रैवोपपत्त्यंतरमाह॥अना
स्या

रामः
१४

गतेति॥ आगामिनि घटे तदर्थित्वेन लोके प्रवृत्तिर्दृष्टा॥ न चात्यंतासति सा युक्ता तेन तस्या सद्विलक्षणतेत्यर्थः॥ किंच योगिनामीशस्य चातीतादिविषयं प्रत्यक्ष
ज्ञानं दृष्टं तच्च विद्यमानोपलंभनमतो घटस्य सदा सत्वमित्याह॥ योगिनां चेति॥ ईश्वरसमुच्चयार्थश्चकारः॥ भविष्यद्ग्रहणं अतीतोपलक्षणार्थं ऐश्वरं यौगिकं
चेति द्रष्टव्यं॥ प्रसंगस्येष्टत्वमाशंक्याह॥ न चेति॥ अधिकबलं हि बाधकं न चाऽनतिशयादीशादिज्ञानादधिकबलं ज्ञानं दृष्टमतो बाधकाभावान्न तन्मिथ्येत्यर्थः
॥ तस्य सम्यक्त्वेऽपि पूर्वोत्तरकालयोरसद्घटविषयत्वं किं न स्यादित्याशंक्याह॥ घटेति॥ पूर्वोत्तरयोः कालयोरिति शेषः घटस्य प्रागसत्वाभावे हेत्वंतरमाह॥ विप्रति
षेधादिति॥ स हि कारकव्यापारदशायामसन्निति कोऽर्थः किं तस्य भविष्यता तदानास्ति किं वार्थक्रियासामर्थ्यं आद्ये न्याहतिं साधयति॥ यदीति॥ घटार्थकु

ऐश्वरं भविष्यद्घटविषयं प्रत्यक्षज्ञानं मिथ्या स्यात्॥ न च प्रत्यक्षमुपचर्यते॥ घटसद्भावे ह्यनुमानमवोचाम विप्रतिषेधाच्च॥ यदि हि घटो भविष्य
तीति कुलालादिषु व्याप्रियमाणेषु घटार्थं प्रमाणेन निश्चितं येन च कालेन घटस्य संबंधो भविष्यतीत्युच्यते तस्मिन्नेव काले घटोऽसन्निति
विप्रतिषिद्धमभिधीयते भविष्यन् घटोऽसन्निति न भविष्यतीत्यर्थः अयं घटो न वर्तत इति यद्घटस्य प्रागुत्पत्तेर्घटोऽसन्नित्युच्येत घटार्थं
प्रवृत्तेषु कुलालादिषु तत्र यथा व्यापाररूपेण वर्तमानास्तावत् कुलालादयस्तथा घटो न वर्तत इत्यसच्छब्दस्यार्थश्चेन्न विरुध्यते ॥ ॥ ॥

लालादिषु व्याप्रियमाणेषु सत्सु घटो भविष्यतीति प्रमाणेन निश्चितं चेत्कथं तद्विरुद्धं प्रागसत्वमुच्यते कारकव्यापारावच्छिन्ने न हि काले न घटस्य भ
विष्यत्त्वेनातीतत्वेन वा भविष्यत्त्वभूदिति वा संबंधो विवक्ष्यते तथा च तस्मिन्नेव काले घटस्य तथाविधसत्वनिषेधे व्याहतिरतिव्यक्तेत्यर्थः॥ तामेवाभिन
यति भविष्यन्निति॥ यो हि कारकव्यापारदशायां भविष्यत्वादिरूपेणास्ति स तदानास्तीत्युक्ते तस्य तस्यामवस्थायां तेनाकारेणासत्वमर्थो भवति तथा च घटो
यदा येनाकारेणास्ति स तदा तेनाकारेण नास्तीति व्याहतिरित्यर्थः॥ द्वितीयमुत्थापयति॥ अथेति॥ प्रागुत्पत्तेर्घटार्थं कुलालादिषु प्रवृत्तेषु असौ असन्नि

तुंकृत्या

त्ति॥ असद्व्दार्थस्स्वयमेवविवेचयति॥ तत्रेत्यादिना॥ तत्रसिद्धांतीब्रूते॥ नविरुध्यतइति॥ कथंपुनः सत्कार्यवादिनस्तदसत्वमविरुद्धमित्याह॥ कस्मादि
ति॥ प्रागुत्पत्तेस्तुअसद्व्यावृत्तिरूपंसत्वंघटस्यसिषाधयिषितंतच्चेद्भवानपितस्यसदातनमर्थक्रियासामर्थ्यंनिषेधन्ननुमन्यतेनावयोर्विप्रतिपत्तिरित्य
भिप्रेत्याह॥ स्वेनहीति॥ ननुत्वन्मतेसर्वस्यसन्मात्रत्वाविशेषात्पिंडादेर्वर्त्तमानताघटस्यस्यात्तस्यचातीतताभविष्यत्ताचपिंडकपालयोः स्यादितिसांकर्यमा
शंक्याह॥ नहीति॥ व्यवहारदशायांयथाप्रतिभासमनिर्वाच्यसंस्थानभेदाश्रयणादित्यर्थः॥ प्रागवस्थायांघटस्यार्थक्रियासामर्थ्यलक्षणसत्वनिषेधेविरोधा
भावमुपपादितमुपसंहरति॥ तस्मादिति॥ उक्तमेवव्यतिरेकद्वाराविवृणोति॥ यदीत्यादिना॥ यदाकारकाणिव्याप्रियंतेतदाघटोऽसन्निति तस्यभविष्यत्वादि

कस्मात्स्वेनहिभविष्यद्रूपेणघटोवर्त्ततेनहिपिंडस्यवर्त्तमानताकपालस्यवाघटस्यभवति॥ नचतयोर्भविष्यत्ताघटस्यतस्मात्कुलालादिव्या
पारवर्त्तमानतायांप्रागुत्पत्तेर्घटोऽसन्नितिनविरुध्यते॥ यदिघटस्ययत्स्वंभविष्यत्ताकार्यरूपंतत्प्रतिषिध्येततत्प्रतिषेधेविरोधःस्यान्नतु
तद्भवान्प्रतिषेधति॥ नचसर्वेषांक्रियावतांकारकाणामेकैववर्त्तमानताभविष्यत्तावा अपिचचतुर्विधानामभावानांघटस्येतरेतराभावोघटा
दन्योदृष्टोयथाघटाभावःपटादिरेव॥

रूपंतत्कालेनिषिध्यतेचेदुक्तविधव्याघातःस्यात्॥ नचतस्यतस्मिन्कालेभविष्यत्वादिरूपंसत्वंनिषिध्यतेअर्थ
क्रियासामर्थ्यस्यैवनिषेधात्तन्नविरोधावकाशोस्तीत्यर्थः नहिपिंडस्येत्यादिनासांकर्यसमाधिरुक्तस्तमिदानींसर्वतंत्रसिद्धांततयास्फुटयति॥ नचेति॥ भविष्य
त्वमतीतत्वंचेतिशेषः कार्यस्यप्रागुत्पत्तेर्नाशानाशाच्चोर्ध्वमसत्वाभावेहेत्वंतरमाह॥ अपिचेति॥ तदेवानुमानतयास्पष्टयितुंदृष्टांतंसाधयति॥ चतुर्विधा
नामिति॥ षष्ठीनिर्धारणेघटान्योन्याभावस्यपटादन्यत्वेतत्राप्यन्योन्याभावांतरांगीकारादनवस्थेत्याशंक्याह दृष्टइति॥ नयौक्तिकमन्यत्वंकिंतुघटोन
भवतिपटइतिप्रातीतिकं॥ तथाचघटाभावःपटादिरेवेतिपटादेस्ततोन्यत्वाद्घटान्योन्याभावस्यापिघटादन्यत्वसिद्धिरित्यर्थः॥ ननुघटाभावःपटादि

रित्ययुक्तं विशेषणत्वेन घटस्यापि पटादावंतर्भावप्रसंगादिति चेन्नैवं दृष्टपदेन स्वीकृतत्वाद्घटाभावस्य पटादित्वाभावेपि न स्वातंत्र्यमभावत्ववि
रोधान्नापि तदन्योन्याभावः पटादेर्धर्मः संसर्गाभावांतर्भावापातात् ॥ न च स घटस्यैव धर्मः स्वरूपं वा घटो घटो न भवतीति प्रतीत्यभावादित्यभिप्रेत्या
ह ॥ न घटस्वरूपमेवेति ॥ यदि प्रतीतिमाश्रित्य घटान्योन्याभावः पटादिरिष्यते ॥ तदा पटादेर्भावस्याभावत्वविधानाद्व्याघात इत्याशंक्याह ॥ न चेति ॥ स्व
रूपपररूपाभ्यां सर्वं सदसदात्मकमिति हि वृद्धाः ॥ तथा च पटादेः स्वेनात्मना भावत्वं घटतादात्म्याभावात्तदभावत्वं चेति अव्याहतिरित्यर्थः ॥ सिद्धे प्रतीत्य
नुसारिणि दृष्टांते विवक्षितमनुमानमाह ॥ एवमिति ॥ किंच तेषामभावानां घटाद्भिन्नत्वात्पटवदेव सत्त्वमेष्टव्यमित्यनुमानांतरमाह ॥ तथेति ॥ अनुमानफ

न घटस्वरूपमेव न च घटाभावः सन्पटोऽभावात्मकः किं तर्हि भावरूप एवैवं घटस्य प्राक्प्रध्वंसात्यंताभावानामपि घटादन्यत्वं स्याद्घटे
न व्यपदिश्यमानत्वाद्घटस्येतरेतराभाववत्तथैव भावात्मकताऽभावानामेवं च सति घटस्य प्रागभाव इति न घटस्वरूपमेव प्रागुत्पत्तेर्नास्त
य घटस्य प्रागभाव इति घटस्य यत्स्वरूपं तदेवोच्येत घटस्येति व्यपदेशानुपपत्तिः ॥ अथ कल्पयित्वा व्यपदिश्येत शिलापुत्रकस्य शरीरमिति
यद्वत्तथापि घटस्य प्रागभाव इति कल्पितस्यैवाभावस्य घटेन व्यपदेशो न घटस्वरूपस्यैवार्थांतरं घटाद्घटस्याभाव इत्युक्तोत्तरमेतत् ॥

लं कथयति ॥ एवं चेति ॥ तेषां घटादन्यत्वे तस्यानाद्यनंतत्वमद्वयत्वं सर्वात्मकत्वं च प्राप्नोति ॥ सत्वे च तेषामभावाभावान्न भावाभावयोर्मिथः संगतिरित्यर्थः ॥ न
नु प्रसिद्धोऽभावो भाववदशक्योऽपन्होतुमिति चेत्तत्तर्हि घटस्य स्वरूपमर्थांतरं चेति विकल्प्याद्यमनूद्य दूषयति ॥ अथेत्यादिना ॥ प्रागभावादेर्घटत्वेपि संबंधंक
ल्पयित्वा घटस्येत्युक्तिरिति शंकते ॥ अथेति ॥ संबंधस्य कल्पितत्वे संबंधिनोप्यभावस्य तथात्वं स्यादिति दूषयति ॥ तथापीति ॥ यत्र संबंधं कल्पयित्वा व्यपदेश
स्तत्र न वास्तवो भेदो यथा राहुशिरसोस्तथात्रापि विकल्पिते संबंधे भेदस्य तथात्वाद्वास्तवत्वं संबंधिनोरन्यतरस्य स्यान्न चाभावस्य तथा सापेक्षत्वादतो घटस्तथै

त्यर्थः ॥ कल्पांतरमनुवदति ॥ अथेति ॥ अनुमानफलंवदद्भिर्घटस्यकारणात्मनाध्रुवत्ववचनेनसमाहितमेतदित्याह ॥ उक्तोत्तरमिति ॥ असत्कार्यवादेदोषांत
रमाह ॥ किंचेति ॥ स्वहेतुसंबंधः सत्तासंबंधोवाजन्मेतितार्किकाः नचप्रागुत्पत्तेरसतः संबंधः तस्यसतोवृत्तेरित्यर्थः ॥ युतसिद्धयोरज्जुघटयोर्मिथः सं
योगेपृथक्सिद्धिरपेक्ष्यतेअयुतसिद्धानांपरस्परपरिहारेणप्रतीत्यनर्हाणांकार्यकारणादीनांमिथोयोगेपृथक्सिद्ध्यभावोनदोषमावहतीतिशंकते ॥
अयुतेति ॥ परिहरतिनेति ॥ उक्तमेवस्फोरयति ॥ भावेति ॥ व्यवहारदृष्ट्याकार्यकारणयोःसाधितांतुल्यावृत्तिमुपसंहरति ॥ तस्मादिति ॥ नैवेहेत्य

किंचान्यत प्रागुत्पत्तेःशशविषाणवदभावभूतस्यघटस्यस्वकारणसत्तासंबंधानुपपत्तिर्हिनिष्ठत्वात्संबंधस्यअयुतसिद्धानामदोषइतिचे
न्नभावाभावयोरयुतसिद्धत्वानुपपत्तेर्भावभूतयोर्हियुतसिद्धताऽयुतसिद्धतावास्यात्नतुभावाभावयोरभावयोर्वातस्मात्सदेवकार्यंप्रा

दशनायया ऽशनायाहिमृत्यु

गुत्पत्तेरितिसिद्धं ॥ किंलक्षणेनमृत्युनावृतमित्यतआह ॥ अशनायया अशितुमिच्छाऽशनायासैवमृत्योर्लक्षणंतयालक्षितेनमृत्युनाऽश
नाययाकथमशनायामृत्युरित्युच्यते ॥
त्रसर्वस्यप्रागुत्पत्तेरसत्त्वशंकामृत्युनेत्यादिवाक्यव्याख्यानेननिरस्तासंप्रतिमृत्युशब्दस्यार्थांतरेरू
ढत्वान्नतेनावरणंजगतःसंभवतीत्याक्षिपति ॥ किंलक्षणेनेति ॥ अनभिव्यक्तनामरूपमध्यक्षाद्ययोग्यमपंचीकृतमहाभूतावस्यातिरिक्तंमायारूपं
साभासंमृत्युरित्युच्यते ॥ नहिसर्वंकार्यमवांतरकारणादुत्पत्तुमर्हतीत्यभिप्रेत्याह ॥ अतआहेति ॥ कथंयथोक्तोमृत्युरशनाययालक्ष्यतेनहिमूलकार
णस्याशनायादिमत्त्वमशनायापिपासेप्राणस्येतिस्थितेरितिशंकते ॥ कथमिति ॥ मूलकारणस्यैवसूत्रत्वंप्राप्तस्यसर्वसंहर्तृत्वान्मृत्युत्वेसतिवाक्यशेषो

पपत्तिरितिपरिहरति॥उच्यतइति॥प्रसिद्धमेवप्रकटयति॥योहीति॥तथापिप्रसिद्धंमृत्युंहित्वाकथंहिरण्यगर्भोपादानमतआह॥बुध्यात्मनइति॥उ
क्तंहेतुंकृत्वाफलितमाह॥इतिसइति॥ननुनतेनजगदाव्रियतेमूलकारणेनैवतदावरणात्तत्कथंवाक्योपक्रमोपपत्तिरतआह॥तेनेति॥ननुहिरण्य
गर्भेप्रकृतेकथंस्त्रीत्वनिर्देशनपुंसकप्रयोगस्तत्राह॥तदिति॥मनसइतिवाक्यार्थमधुनाकथयति॥सप्रकृतइति॥भूतसृष्ट्यतिरेकेणभौतिकसमनसः

अशनायाहिमृत्युर्हिशब्देनप्रसिद्धंहेतुमवद्योतयतियोह्यशितुमिच्छतिसोऽशनायानंतरमेवहंतिजंतूंस्तेनासावशनायालक्ष्यतेमृ
त्युरितिअशनायाहीत्याह॥बुध्यात्मनोऽशनायाधर्मइतिसएषबुध्यवस्थोहिरण्यगर्भोमृत्युरित्युच्यते॥तेनमृत्युनेदंकार्यमावृतमासी
त् यथापिंडावस्थायांमृदाघटादयआवृताःस्युरितितद्वत्॥तन्मनोऽकुरुततदितिमनसोनिर्देशःसप्रकृतोमृत्युर्वक्ष्यमाणकार्यसिसृक्षया

तन्मनोकुरुतात्मन्वीस्यामितिसोर्चन्नचरत्तस्यार्चतआपोजायंता ॥

तत्कार्यालोचनक्षमंमनःशब्दवाच्यंसंकल्पादिलक्षणमंतःकरणमकुरुतकृतवान्केनाभिप्रायेणमनोऽकरोदित्युच्यते॥आत्मन्वीआ
त्मवानितिस्यांभवेयमहमनेनात्मनामनसामनस्वीस्यामित्यभिप्रायःसप्रजापतिरभिव्यक्तेनमनसासमनस्कःसन्नर्चन्नर्चयन्पूजयन्ना
त्मानमेवकृतार्थोस्मीत्यचरच्चरणमकरोत्तस्यप्रजापतेरर्चतःपूजयतःआपोरसात्मिकाःपूजांगभूताअजायंततउत्पन्नाः॥ सृष्टिरयुक्तेतिमत्वाह
कृति॥केनेति॥अपंचीकृतानांभूतानांहिरण्यगर्भदेहभूतानांप्रागेवलब्धात्मकत्वात्तेभ्योमनोव्यक्तिरविरुद्धेतिमन्वानोब्रूते॥उच्यतइति॥स्वात्मवत्त्व
स्यस्वाभाविकत्वान्नतदाशंकुनीयमित्याशंक्यवाक्यार्थमाह॥अहमिति॥मनसोव्यक्तस्योपयोगमाह॥सप्रजापतिरिति॥ननुतैत्तिरीयकाणामाकाश

दिसृष्टिरुच्यतेतत्कथमिहापामादौसृष्टिवचनंतत्राह॥अत्रेति॥सप्तम्याहिरण्यगर्भकर्तृकसर्गोक्तिः॥त्रयाणांपंचीकृतानामितियावत्॥नन्वाकाशाद्यात्ते
त्तिरियकेसृष्टिरिहत्वबाद्येसुदितानुदितहोमवद्विकल्पोभविष्यतिनेत्याह॥विकल्पेति॥पुरुषतंत्रत्वात्क्रियायाः युक्तोविकल्पः सिद्धेर्थेतुपुरुषानधी
नेनासौसंभवत्यतःसृष्टिर्विवक्षिताचेदाकाशाद्येवसायुक्ताविद्याप्रधानत्वात्तुनादरःसृष्टाविति भावः॥अपामत्रसृष्टिवचनमनुपयुक्तंनस्रष्टुस्ताभिरेवपू
जासिध्यतीत्याशंक्यआश्वमेधिकाग्नेरर्कनामसिध्यर्थंतदुपयोगमुपन्यस्यति॥अर्चतइति॥कोसौहेतुरित्यपेक्षायामर्चतिपदावयवस्यार्कशब्देनसंगति

अत्राकाशप्रभृतीनांत्रयाणांउत्पत्त्यनंतरमितिवक्तव्यंश्रुत्यंतरसामर्थ्यात्॥विकल्पासंभवाच्चसृष्टिक्रमस्यअर्चतेपूजांकुर्वतेवैमेमह्यंकंउ
दकमभूदित्येवममन्यतयस्मान्मृत्युस्तदेवतस्मादेवहेतोरर्कस्याग्नेरश्वमेधक्रतूपयोगिकस्यार्कत्वमर्कत्वेहेतुरित्यर्थः॥अग्नेरर्कना

चेतेवैमेकमभूदितितदेवार्कस्यार्कत्वंकꣳहवाअस्मैभवतियएवमेतदर्कस्यार्कत्वंवेद॥१॥

मनिर्वचनमेतदर्चनात्सुखहेतुपूजाकरणापूसंबंधाच्चाग्नेरेतद्गौणंनामार्कइति यएवंयथोक्तमर्कस्यार्कत्वंवेदजानातिकमुदकंसुखंवा
नामसामान्यात्॥हवैइत्यवधारणार्थौभवत्येवेतिअस्मैएवंविदेएवंविदर्थंभवति॥१॥आपोवाअर्कः॥कः पुनरसावर्कइत्युच्यते ॥

रितिमन्वानःसन्नाह॥अर्कत्वमिति॥एवंमृत्योरर्कत्वेपिकथमग्नेरर्कत्वमित्याशंक्यमृत्युसंबंधादित्याह॥अग्नेरिति॥किमर्थमग्नेरर्कनामनिर्वचनमित्या
शंक्यापूर्वक्रियायोगस्यफलांतराभावादुपासनार्थमित्याह॥अग्नेरिति॥निर्वचनमेवस्फोरयति॥अर्चनादिति॥फलवत्वाच्चयथोक्तनामवतोग्नेरुपास्तिरत्र
विवक्षितेत्याह॥यएवमिति॥१॥अपामर्कत्वश्रवणान्नाग्नेरर्कत्वमितिशंकते॥कःपुनरिति॥प्रकरणमाश्रित्यतासामर्कत्वमौपचारिकमित्युत्तरमाह॥उच्य

तइति॥ तासंतहिरण्मयमंडं संबभूवेतिश्रुतिमनुरुंधन्नुपचारे हेत्वंतरमाह॥ अप्सुचेति॥ मुख्यमर्कत्वमपांवारयति॥ नपुनरिति॥ ननुश्रुतिलिंगवाक्यप्रक
रणस्थानसमाख्यानांसमवायेपारदौर्बल्यमर्थविप्रकर्षात् प्रकरणादापोवाअर्कइतिवाक्यंबलवदित्याशंक्यवाक्यसहकृतंप्रकरणमेवकेवलवाक्याद्ब
लवदित्याशयवानाह॥ वक्ष्यतिचेति॥ भूतांतरसहितास्वप्सुकारणभूतासुपृथिवीद्वारापार्थिवोग्निःप्रतिष्ठितइत्युक्तमिदानींपृथिवीसर्गंताभ्योदर्शयति॥

आपोवायाअर्चनांगभूतास्ताएवार्कोग्नेरर्कस्यहेतुत्वादप्सुचाग्निः प्रतिष्ठितइतिनपुनःसाक्षादेवार्कस्ताःतासामप्रकरणादग्नेश्चप्रकरणं॥
वक्ष्यतिचायमग्निरर्कइतितत्तत्रयदपांशरइवशरोदध्नइवमंडभूतमासीत्तत्समहन्यतसंघातमापद्यततेजसाबाह्यांतःपच्यमानंलिंगव्य

आपोवाअर्कस्तद्यदपां॰शरआसीत्तत्समहन्यतसापृथिव्यभव

त्ययेनवायोऽपांशरःससमहन्यतेतिसापृथिव्यभवत्ससंघातोयेयंपृथिवीसाऽभवत्ताभ्योद्भ्योंऽडमभिनिर्वृत्तमित्यर्थः॥ तस्यांपृथिव्यामु
त्पादितायांसमृत्युःप्रजापतिरश्राम्यत्क्रमयुक्तोबभूव॥ सर्वोहिलोकःकार्यंकृत्वाश्राम्यतिप्रजापतेश्चतन्महत्कार्यंयत्पृथिवीसर्गःकिंतस
श्रांतस्येत्युच्यतेतस्यश्रांतस्यसंतप्तस्यखिन्नस्यतेजोरसस्तेजएवरसस्तेजोरसःरसःसारःनिरवर्ततप्रजापतिशरीरान्निष्क्रांतइत्यर्थः॥

तदित्यादिना॥ अप्सुभूतांतरसहितासूत्पन्नासुसतीष्विति सप्तम्यर्थः शरइवशरइत्युक्तमेवव्याचष्टे॥ दध्नइवेति॥ संघातेसहकारिकारणमाह॥ तेजसेति
॥ यत्तदितिपदेनपुंसकत्वेनश्रुतेकथंतयोःशरशब्देनकारणस्योक्तत्वाद्विनापुल्लिंगेनान्वयस्तत्राह॥ लिंगव्यत्ययेनेति॥ उक्तानुपपत्तिद्योतनार्थो
वाशब्दःव्यत्ययेनान्वयमेवाभिनयति॥ योपामिति॥ वाक्यतात्पर्यमाह॥ ताभ्यइति॥ स्थूलप्रपंचात्मकविराजःसूक्ष्मप्रपंचात्मकसूत्रादुत्पत्तिंवक्तुंपातनि

लयति॥सर्वोहीति॥इदानींविराडुत्पत्तिमुपदिशति॥किंतस्येत्यादिना॥ ॥अग्निशब्दार्थंस्फुटयति॥सोंडस्येतितस्यप्रथमशरीरित्वेमानमाह॥सवाइति॥ग॥
विराजोध्यानार्थमवच्छेदभेदमाह॥सत्रेति॥कोस्यत्रेधाभावस्यकर्त्तेतिवीक्षायामाह॥स्वयमेवेति॥कथमेकस्यत्रिधात्वमन्यथावाकथमेकत्वमित्याह॥कथमि
ति॥मृदोघटशरावाद्यनेकरूपत्ववद्विराजोबहुरूपत्वंसाधयति॥आहेत्यादिना॥कथमग्निंतृतीयमित्यश्रुतंकल्प्यतेतत्राह॥सामर्थ्यस्येति॥वाय्वादित्ययोरि

कोसौनिष्क्रांतोग्निः॥सोंडस्यांतर्विराड्प्रजापतिःप्रथमजःकार्यकरणसंघातवान्जातः॥सवैशरीरीप्रथमइतिस्मरणात्॥२॥सचजातः
प्रजापतिस्त्रेधात्रिप्रकारमात्मानंस्वयमेवकार्यकरणसंघातंव्यकुरुतव्यभजदित्येतत्कथंत्रेधेत्याहादित्यंतृतीयमग्निवाय्वपेक्षयात्रयाणांपूर
णमकुरुतेत्यनुवर्त्ततेतथाग्न्यादित्यापेक्षयावायुंतृतीयंतथावाय्वादित्यापेक्षयाग्निंतृतीयमितिद्रष्टव्यं॥सामर्थ्यस्यतुल्यत्वात्त्रयाणांसंख्यापू

त्तस्यामश्राम्यतस्यश्रांतस्यतप्तस्यतेजोरसोनिरवर्त्तताग्निः॥२॥सत्रेधात्मानंव्यकुरुतादित्यंतृतीयंवायुंतृतीय९ ॥

रणत्वे॥सएषप्राणःसर्वभूतानामात्माप्यग्निवाय्वादित्यरूपेणविशेषतःस्वेनैवमूर्त्यात्मनात्रेधाविहितोविभक्तोनविराट्स्वरूपोपमर्द
नेनतस्यास्यप्रथमजस्याग्नेरश्वमेधोपयोगिकस्यार्कस्यविराजस्त्रित्यात्मकस्याश्वस्येवदर्शनमुच्यते॥ वाग्नेरपिसंख्यापूरणत्वशक्तेरविशिष्ट
त्वादग्निंतृतीयंअकुरुतइत्युपसंख्यायतेसत्रेधात्मानमितिचोपक्रमादित्यर्थः॥ननुकिमयंत्रेधाभावोविराड्स्वरूपोपमर्देनक्रियते॥नहितस्मिन्सत्येव
युक्तोविरोधादतआह॥सएषइति॥यथातंत्वस्यानुपमर्दनेनमूलकारणात्पटोजायतेतथासर्वेषांभूतानांप्राणतयासाधारणोप्ययंस्वेनैवस्वतंत्रेणानुगते
नमृत्युरूपेणत्रेधाविभागस्यकर्त्तानचैकस्यबहुरूपत्वविरोधोमायाविवदुपपत्तेरित्यर्थः तस्यप्राचीत्यादेस्तात्पर्यमाह॥तस्येति॥उक्तानिविशेषणानिप्रक

रणाविच्छेदार्थमनूद्यंते॥ अग्निविषयंदर्शनमिदानीमुच्यते चेन्नैवेहेत्यादिपूर्वोक्तमनर्थकमित्याशंक्याह॥ सर्वाहीति॥ स्तुतिमेवाभिनयति॥ इत्थमिति
॥कर्मांगस्याग्नेः संस्कर्तव्यत्वाच्चित्याग्निशिरसिप्राचीदृष्टिः कर्तव्येत्याह॥ तस्येति॥ आरोपेसादृश्यमाह॥ विशिष्टत्वेति॥ शिरसोनंतरभावित्वात्तद्बाहूरै
शान्यादिदृष्टिमाह॥ असौचेति॥ कथमीमिंशब्दोबाहुवाचीत्याशंक्यतदुपपत्तिमाह॥ ईरयतेरिति॥ गत्यर्थप्रयोगादीमिशब्दोबाहुमधिकरोतीत्यर्थः॥ त

सर्वाहिपूर्वोक्तोत्पत्तिरस्यस्तुत्यर्थमित्यवोचामइत्थमसौशुद्धजन्मेतितस्यप्राचीदिक्शिरोविशिष्टत्वसामान्यादसौचासौचईशान्याग्नेय्याविर्मौ
बाहूईरयतेर्गतिकर्मणः॥ अथास्याग्नेः प्रतीचीदिक्पुच्छंजघन्योभागः प्राङ्मुखस्यप्रत्यक्दिक्संबंधादसौचासौचवायव्यनैर्ऋत्यौसक्थ्यौ

सएषप्राणस्त्रेधाविहितस्तस्यप्राचीदिक्शिरोसौचासौचेर्मावथास्यप्रतीचीदिक्पुच्छमसौचासौचसक्थ्यौदक्षिणाचोदीचीचपा
र्श्वेद्यौः पृष्ठमंतरिक्षमुदरमियमुरः सएषोप्सुप्रतिष्ठितोयत्रक्वचैतितदेवप्रतितिष्ठत्येवंविद्वान्॥३॥ सक्थिनीपृष्ठकोणत्व

सामान्याद्दक्षिणाचोदीचीचपार्श्वेउभयदिक्संबंधसामान्यात्॥ द्यौः पृष्ठमंतरिक्षमुदरमितिपूर्ववदियमुरः अधोभागसामान्यात्सएषोग्निः
प्रजापतिरूपोलोकत्रयात्मकोग्निरप्सुप्रतिष्ठितः एवमिमेलोकाअप्स्वंतरितिश्रुतेः यत्रक्वचयस्मिन्कस्मिंश्चिदेतिगच्छति॥ पुच्छादिषुप्रतीच्या

दिदृष्टीरध्यस्यति॥ अथेत्यादिना॥ चित्यस्याग्नेः शिरसिबाह्वोः प्राच्यादिदृष्टिकरणानंतरमित्यर्थः सक्थिपदंपृष्ठनिष्ठोन्नतास्थिद्वयविषयं॥ उभयशब्देनप्रा
चीप्रतीचीद्वयंगृह्यते॥ उरसिपृथिवीदृष्टिमाहइयमिति॥ उपास्यमुक्तमग्निमनुवदतिसएषइति॥ तस्योपासनार्थमेवाप्सुप्रतिष्ठितत्वंगुणमुपदिशति॥
अग्निरिति॥ भूतांतरसहितानामपांसर्वलोककारणत्वादशेषलोकात्मकोग्निस्तत्रप्रतिष्ठितः संभवतीत्यत्रश्रुत्यंतरंसंवादयति॥ एवमिति॥ यथैतेषुलोके

लानांभूतानांसन्निवेशविशेषागृह्यंते॥अप्सुभूतांतरसहितासुकारणभूताखितियावत्॥फलश्रुतिंव्याचष्टे॥यत्रेति॥अस्यौपास्तिफलमपपुनर्मृत्युंजय
तीत्यादिनावक्ष्यते॥किमिदमस्थानेफलसंकीर्तनमतआह॥गुणेति॥३॥उत्तरग्रंथमवतार्यतस्यपूर्वग्रंथेनसंबंधंवक्तुंवृत्तंकीर्त्तयति॥सोकामयतइत्यादि
ना॥अवांतरव्यापारमंतरेणकर्त्तृत्वानुपपत्तिरितिमत्वापृच्छति॥सकिंव्यापारइति॥कामनादिरूपमवांतरव्यापारमुत्तरवाक्यावष्टंभेनदर्शयति॥उ

तदेवतत्रैवप्रतितिष्ठतिस्थितिंलभते॥कोसावेवंयथोक्तमप्सुप्रतिष्ठितत्वमग्नेर्विद्वान्विजानन्गुणफलमेतत्॥३॥सोकामयतयोसौमृ
त्युःसोऽबादिक्रमेणात्मनात्मानमंडस्यांतःकार्यकरणसंघातवंतंविराजमग्निमसृजतत्रेधाचात्मानमकुरुतेत्युक्तं॥सकिंव्यापारःसन्नसृ
जतेत्युच्यतेसमृत्युरकामयतकामितवान्किंद्वितीयोमेममात्माशरीरंयेनाहंशरीरीस्यांसजायेतोत्पद्येतेत्येवमेतदकामयतसएवंकाम

सोकामयतद्वितीयोमआत्माजायेतेतिसमनसावाचंमिथुनꣲसमभवदशनायामृत्युस्तद्यद्रेतआसीत्ससंवत्सरोभव ॥

यित्वामनसापूर्वोत्पन्नेनवाचंत्रयीलक्षणांमिथुनंद्वंद्वभावंसमभवत्संभवनंकृतवान्मनसात्रयीमालोचितवांस्त्रयीविहितंसृष्टिक्रमंमन
सान्वालोचयदित्यर्थः॥कोसावशनायालक्षितोमृत्युरशनायालक्षणोमृत्युरित्युक्तंतमेवपरामृशत्यन्यत्रप्रसंगोमाभूदिति ॥ ॥

च्यतइति॥कामनाकार्यंमनःसंयोगमुपन्यस्यति॥सएवमिति॥कोयंमनसासहवाचोद्वंद्वभावस्तत्राह॥मनसेति॥वाक्यार्थमेवस्फुटयति॥त्रयीविहि
तमिति॥वेदोक्तसृष्टिक्रमालोचनंप्रजापतेर्नेदंप्रथमंसंसारस्यानादित्वादितिवक्तुमनुशब्दःसोकामयतेत्यादौसर्वनाम्नोऽव्यवहितविराड्विषयत्वमाशं
क्यपरिहरति॥कोसावित्यादिना॥कथंतयामृत्युर्लक्ष्यतेतत्राह॥अशनायेति॥किमितितर्हिपुनरुक्तिरित्याशंक्याह॥तमेवेति अन्यत्रानंतरप्रकृतेवि

राडात्मनीतियावत्॥ अवांतरव्यापारांतरमाह॥ तदित्यादिना प्रसिद्धं रेतो व्यावर्तयति॥ ज्ञानेति॥ ननु प्रजापतेर्न ज्ञानं कर्म वा संभवति तत्रानधिकारादि
त्याशंक्यासीत्तदस्यार्थमाह॥ जन्मांतरेति॥ वाक्यस्यापेक्षितं पूरयित्वा वाक्यांतरमादाय व्याकरोति॥ तद्भावेत्यादिना॥ ननु संवत्सरस्य प्रागेव सिद्धत्वान्न प्र
जापतेस्तन्निर्माणेन तदात्मत्वमित्याशंक्योत्तरवाक्यमुपादत्ते॥ न हपुरेति॥ तद्व्याचष्टे पूर्वमिति॥ प्रजापतेरादित्यात्मकत्वात्तदधीनत्वाच्च संवत्सरव्यवहा

तत्तत्र मिथुने यद्रेत आसीत्प्रथमशरीरिणः प्रजापते रुत्पत्तौ कारणं रेतो बीजं ज्ञानकर्मरूपं त्रय्यालोचनायां यद्दृष्टवानासीज्जन्मांतरकृतं
तद्भावभावितोऽपः सृष्ट्वा तेन रेतसा बीजेनाप्स्वनुप्रविश्यांडरूपेण गर्भीभूतः स संवत्सरोऽभवत्संवत्सरः संवत्सरकालनिर्माता संवत्सरः प्र

न ह पुरा ततः संवत्सर आस तमेतावंतं कालमबिभर्यावान्संवत्सरस्तमेतावतः कालस्य परस्तादसृजत तं जातमभिव्याददा
त्स भाणकरोत्सैव वागभवत्॥४॥

जापतिरभवत्॥ न ह पुरा पूर्वं ततस्तस्मात्संवत्सरपरिमाणं कालनिर्मातुः प्रजापतेः संवत्सरः का
लो नाम नास ह न बभूव ह॥ तं संवत्सरकालनिर्मातारं अंतर्गर्भं प्रजापतिं॥ यावानिह प्रसिद्धः कालः एतावंतं एतावत्संवत्सरपरिमाणं का
लमबिभर्भृतवान्यावान्संवत्सर इह प्रसिद्धस्ततः परस्तात्किंकृतवांस्तमेतावातः कालस्य संवत्सरमात्रस्य परस्तादूर्ध्वमसृजत सृष्ट
वानंडमभिनदित्यर्थः॥

रस्यादित्यात्पूर्वं तावत्व्यवहारो नासीदेवेत्यर्थः कियंतं कालमंडरूपेण गर्भो बभूवेत्यपेक्षायामाह॥ तमित्यादिना
॥ अवांतरव्यापारमनेकविधमभिधाय विराडुत्पत्तिमाकांक्षाद्वारोपसंहरति॥ यावानित्यादिना॥ केयं पूर्वमेव गर्भतया विद्यमानस्य विराजः सृष्टिस्तत्रा
ह॥ अंडमिति॥ विराडुत्पत्तिमुक्त्वा शब्दमात्रस्य सृष्टिं विवक्षुर्भूमिकां करोति॥ तमेवमिति॥ अयोग्येऽपि पुत्रभक्षणे प्रवर्तकं दर्शयति॥ अशनायावत्त्वा

दिति॥ विराजोभयकारणमाह॥ स्वाभाविकेति॥ इंद्रियंदेवतांचव्यावर्त्तयति॥ वाकृशब्दइति॥४॥ इदानीमृगादिसृष्टिमुपदेष्टुंपातनिकांकरोति॥ सइ
त्यादिना॥ ईक्षणेप्रतिबंधकसद्भावंदर्शयति॥ अशनायावानिति॥ अभिपूर्वोमन्यतिरितिरुद्रोस्यपशूनभिमन्येतनास्यरुद्रः पशूनभिमन्यतइत्यादि
शास्त्रमत्रप्रमाणयितव्यं॥ अन्नस्यकनीयस्त्वेकाहानिरित्याशंक्याह बह्विति॥ तथापिविराजोभक्षणेकास्तितस्तत्राह॥ तद्भक्षणेहीति॥ तस्यान्नात्म

तमेवंकुमारंजातमग्निंप्रथमशरीरिणमशनायावत्त्वान्मृत्युरभिव्याददान्मुखविदारणंकृतवानत्तुंसचकुमारोभीतःस्वाभाविक्याविद्य
यायुक्तोभाणित्येवंशब्दमकरोत्सैववागभवद्वाकृशब्दोऽभवत्॥४॥ सऐक्षतसएवंभीतंकृतरवंकुमारंदृष्ट्वामृत्युरैक्षतईक्षितवान्॥
अशनायावानपियदिकदाचिद्वेइमंकुमारमभिमंस्येऽभिपूर्वोमन्यतिर्हिंसार्थःहिंसिष्यइत्यर्थःकनीयोन्नंकरिष्येकनीयोल्पमन्नंकरि

सऐक्षतयदिवाइममभिमꣳस्येकनीयोन्नंकरिष्यइतिसतयावाचातेनात्मनेदꣳसर्वमसृजतयदिदंकिंच॥

ष्यइत्येवमीक्षित्वातद्भक्षणादुपरराम बहुह्यन्नंकर्त्तव्यंदीर्घकालभक्षणायनकनीयस्तद्भक्षणेहिकनीयोन्नंस्याद्बीजभक्षणइवसस्या
भावः सएवंप्रयोजनमन्नबाहुल्यमालोच्यतयैववाचापूर्वोक्तयातेनैवाचात्मनामनसामिथुनीभावमालोचनमुपगम्योपगम्येदंसर्वं
स्थावरंजंगमंचासृजतयदिदंकिंचयत्किंचेदं॥ कृत्वात्तदुत्पादकत्वाच्चेतिशेषः॥ कारणनिवृत्तौकार्यनिवृत्तिरित्यत्रदृष्टांतमाह॥ बीजेति॥
यथोक्तेक्षणानंतरंमिथुनभावद्वारात्रयीसृष्टिंप्रस्तौति॥ सएवमिति॥ ननुविराजःसृष्ट्यास्थावरजंगमात्मनोजगतःसृष्टेरुक्तत्वात्किंपुनरुक्त्ये
त्याशयेनदृष्ट्वापरिहरति॥ किंतदिति॥ गायत्र्यादीनीत्यादिपदेनोष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुप्जगतीछंदांसुक्तानिकेवलानांछंदसांसर्गासं

भवात्तदारूढानामृग्यजुः सामात्मनां मंत्राणां सृष्टिरत्र विवक्षितेत्याह॥ स्तोत्रेति॥ उद्गात्रादिना गीयमानमृग्जातं स्तोत्रं तदेव होत्रादिना शस्यमानं शस्त्रं॥ स्तुतमनुशंसतीति हि श्रुतिः यन्न गीयते न च शस्यते ऽध्वर्युप्रभृतिभिश्च प्रयुज्यते तद्यजुरत्र ग्राह्यमित्यभिप्रेत्यादिपदं॥ अत एव त्रिविधानित्युक्तं॥ अजाद्यो ग्राम्याः पशवो गवयादयस्त्वारण्या इति भेदः कर्मसाधनभूतानसृजतेति संबंधः समनसा वाचं मिथुनं समभवदित्युक्तत्वात्प्रागेव त्रय्याः सिद्धत्वान्न तस्याः सृष्टिः श्लिष्टेति शंकते॥ नन्विति॥ व्यक्ताव्यक्तविभागेन परिहरति॥ नेत्यादिना॥ इति मिथुनीभावसर्गयोरुपपत्तिरिति शेषः अत सर्गश्चान्नसर्गश्चेति द्वयमुक्तं॥

किं तदृचो यजूंषि सामानि छंदांसि च सप्त गायत्र्यादीनि स्तोत्रशस्त्रादिकर्मांगभूतांस्त्रिविधान्मंत्रान् गायत्र्यादिछंदोविशिष्टान्यज्ञांश्च तत्साध्यान् प्रजाः तत्कर्त्रीः पशूंश्च ग्राम्यानारण्यान् कर्मसाधनभूतान्॥ ननु त्रय्या मिथुनीभूतयाऽसृजतेत्युक्तं ऋगादीनि ह कथमसृजतेति॥ नैष दोषो

ऋचो यजूंषि सामानि छंदांसि यज्ञान्प्रजां पशून्

मनसस्त्वव्यक्तोऽयं मिथुनीभावस्त्रय्या बाह्यस्तु ऋगादीनां विद्यमानानामेव कर्मसु विनियोगभावेन व्यक्तीभावः सर्ग इति॥ स प्रजापतिरेवमन्नं द्विभुद्ध्यापद्य देवक्रियां क्रियासाधनीभूतं फलं वा किंचिदसृजत तत्तदत्तुं भक्षयितुमध्रियत धृतवान्मनः सर्वं वा अत्तीति तस्मादत्तीति त तस्माददितेरदितिनाम्नो मृत्योरदितित्वं प्रसिद्धं॥ इदानीमुपास्यस्य प्रजापतेर्गुणांतरं निर्दिशति॥ स प्रजापतिरित्यादिना॥ कथं मृत्योरदितिनामत्वं सिद्धवदुच्यते तत्राह॥ तथा चेति॥ अदितेः सर्वात्मत्वं वदता मंत्रेण सर्वकारणस्य मृत्योरदितिनामत्वं सूचितमिति भावः मृत्योरदितित्वविज्ञानवतो वांतरफलमाह॥ सर्वस्येति॥ सर्वात्मनेति कुतो विशेष्यते तत्राह॥ अन्यथेति॥ सर्वरूपेणावस्थानाभावे सर्वान्नभक्षणस्याशक्यत्वादित्यर्थः॥ विरोधमेव साधय

ति॥ नहीति फलस्योपासनाधीनत्वात्प्रजापतिमदितिनामानमात्मत्वेनध्यायन्ध्येयात्माभूत्वानत्तद्रूपत्वमापन्नः सर्वस्यान्नस्यात्तास्यादित्यर्थः॥ अन्नमन्नमेवा स्यसदानकदाचित्तदस्यात् भवतीति वक्तुमनंतरवाक्यमादत्ते॥ सर्वमिति॥ अतएवेत्युक्तंव्यक्तीकरोति॥ सर्वात्मनोहीति॥ ५॥ उपास्तिविधौसफलेसति समाप्तिरेवब्राह्मणस्योचिताकिमुत्तरग्रंथेनेत्याशंक्यप्रतीकमादायतात्पर्यमाह॥ सोकामयतेत्यादिना॥ तदेवाश्वमेधस्याश्वमेधत्वमित्येतदंतंवाक्यमिद

तथाचमंत्रोः दितिर्द्यौरित्यादिः सर्वस्यैतस्यजगतोन्नभूतस्यात्तासर्वात्मनैवभवत्यन्यथाविरोधान्नहिकश्चित्सर्वस्यैकोत्तादृश्यतेतस्मात्स र्वात्माभवतीत्यर्थः सर्वमस्यान्नंभवतीत्यतएवसर्वात्मनोह्यत्तुः सर्वमन्नंभवतीत्युपपद्यतेयएवमेतद्यथोक्तमदितेर्मृत्योः प्रजापतेः

सयद्यदेवासृजततत्तदत्तुमध्रियतसर्वंवाअत्तीतितददितेरदितित्वꣳ सर्वस्यै
तस्यात्ताभवतिसर्वमस्यान्नंभवतियएवमेतददितेरदितित्वंवेद॥ ५ ॥

सर्वस्यादनाददितित्वंवेदतस्यैतत्फलं॥ ५॥ सोकामयतेत्यश्वाश्वमेधयोर्निर्वचनार्थमिदमाह॥ भूयसामहतायज्ञेनभूयः पुनरपिय जेयेति॥ जन्मांतरकरणापेक्षयाभूयः शब्दः सप्रजापतिर्जन्मांतरेश्वमेधेनायजत ॥ मानिर्दिश्यते॥ भूयोदक्षिणाकत्वादश्वमेधस्यभूयस्त्व मितिशब्दः कामयतेत्यनेनसंबध्यते॥ कथंपुनस्तेनयक्ष्यमाणस्यप्रजापतेर्भूयः शब्दोक्तिर्नहिसपूर्वमश्वमेधमन्वतिष्ठत्कर्मानधिकारत्वात्तत्राह ॥ जन्मांतरेति॥ तदेवस्पष्टयति॥ सप्रजापतिरिति॥ अथातीतेजन्मनियजमानोश्वमेधस्यकर्त्ताभूदधुनाहिरण्यगर्भोभूयोयजेयेत्याह॥ तथाचकर्त्तृ भेदात्भूयः शब्दासामंजस्यमतआह॥ सतद्भावेति॥ सप्रजापतिरश्वमेधवासनाविशिष्टोज्ञानकर्मफलत्वेनकल्पादौनिर्वृत्तोभूयोयजेयेत्याह ॥

रं॰

कर्त्तभोक्तोरैक्येन साधकफलावस्थयोर्यजमानसत्रयोर्भेदाभावादित्यर्थः॥ प्रजापतिरीश्वरोनतस्यदुःखात्मकलनुष्टानेच्छा युक्तेत्याशंक्यप्रकृतिवश
दुपपत्तिमभिप्रेत्याह॥ सोश्वमेधेति॥ कथमेतावताविवक्षितास्तुतिः सिद्धेत्याशंक्याह॥ एवमिति॥ श्रमकार्यमाह॥ सतपइति॥ वसुरादीनां यशस्त्वे
हेतुमाह॥ यशोहेतुत्वादिति॥ तदेवसाधयति॥ तेष्वहीति॥ प्राणा एवेति तथाशब्दार्थः सत्सुहि तेषुशरीरे बलंभवतीति पूर्ववदेवहेतुरुन्नेयः॥ उक्त

सतद्भावभावित एवकल्यादौव्यवर्त्ततसोश्वमेधक्रियाकारकफलात्मत्वेननिर्वृत्तः सन्नकामयतभूयसायज्ञेनभूयोयजेयेत्येवंम
हत्कार्यकामयित्वालोकवदश्राम्यत्सतपोऽतप्यततस्यश्रांतस्यतप्तस्येति पूर्ववद्यशोवीर्यमुदक्रामदिति॥ स्वयमेवपदार्थमाह
प्राणाश्चक्षुरादयः वैयशोहेतुत्वात्तेषुहिसत्सुख्यातिर्भवतितथावीर्यं बलंअस्मिन्शरीरेनह्युत्क्रांतप्राणोयशस्वीबलवान्वाभव

सोकामयत भूयसायज्ञेनभूयोयजेयेति सोश्राम्यत्सतपोतप्यततस्यश्रांतस्यतप्तस्ययशोवीर्यमुदक्राम
त्प्राणावैयशोवीर्यंतत्प्राणेषूत्क्रांतेषुशरीरं ॐ श्वयितुमध्रियततस्यशरीरएवमनआसीत्॥ ६ ॥

ति॥ तस्मात्प्राणा एवयशोवीर्यंचास्मिञ्छरीरेतदेवंप्राणलक्षणंयशोवीर्यमुदक्रामदुत्क्रांतवत्तदेवंयशोवीर्यभूतेषुप्राणेषूत्क्रांतेषुशरी
रान्निष्क्रांतेषुनिर्गतेषुतच्छरीरंप्रजापतेः श्वयितुमुच्छूनभावंगंतुमध्रियतामेध्यंचाभवत्तस्यप्रजापतेः शरीरान्निर्गतस्यापितस्मिन्नेवश
रीरेमनआसीद्यथाकस्यचित्प्रियेविषयेदूरंगतस्यापिमनोभवतितद्वत्॥ ६॥ सतस्मिन्नेवशरीरे मर्थंव्यतिरेकद्वारास्फोरयति॥ नहीतिप्राणा
नांयशस्त्वंवीर्यत्वंचोपसंहृत्यवाक्यार्थंनिगमयति॥ तदेवमिति॥ तत्प्राणेष्वित्यादिव्याचष्टे॥ तदेवमित्यादिना॥ शरीरान्निर्गतस्यप्रजापतेर्मुक्तत्वमाशं

...क्याह॥ तस्येति॥ ६॥ सम्यग्ज्ञानाभावादंगेसस्पि

नपुनस्तस्मिन्प्रवेशोयुक्तः॥परित्यक्तपरिग्रहायोगादितिशंकते॥सतस्मिन्निति॥अज्ञानवशात्परित्यक्तपरिग्रहोपिसंभवतीत्याह॥उच्यतइति॥वीत
देहस्यकामनाःयुक्तेतिशंकते॥कथमिति॥सामर्थ्यातिशयादशरीरस्यापिप्रजापतेस्तदुपपत्तिरितिमन्वानोब्रूते॥मेध्यमिति॥कामनाफलमाह॥इ
तिप्रविवेशेति॥तथापिकथंप्रकृतनिरुक्तिसिद्धिरित्याशंक्याह॥यस्मादिति॥यच्छब्दोयस्मादितिव्याख्यातः देहस्याश्वत्वेपिकथंप्रजापतेस्तथात्वमित्या
शंक्यतत्तादात्म्यादित्याह॥ततइति॥अश्वस्यप्रजापतित्वेनस्तुतत्वात्तस्योपास्यत्वंफलतीतिभावः॥तथापिकथमश्वमेधनामनिर्वचनमित्याशंक्याह॥य

गतमनाःसन्किमकरोदित्युच्यतेसोकामयतकथंमेध्यंमेधार्हंयज्ञियंमेममेदंशरीरंस्यात्किंचात्मन्वीआत्मवांश्चानेनशरीरेणशरीरवान्स्या
मितिप्रविवेशयस्मात्तच्छरीरंयद्वियोगाद्गतयशोवीर्यंसदश्वदश्वयत्ततस्तस्मादश्वःसमभवत्॥ततोश्वनामाप्रजापतिरेवसाक्षादत्रस्तूयतेय

सोकामयतमेध्यंमइदँस्यादात्मन्व्यनेनस्यामितिततोश्वःसमभवद्यदश्वत्तन्मेध्यमभूदितितदेवाश्वमेधस्याश्वमेधत्व

स्माच्चपुनस्तत्प्रवेशाद्गतयशोवीर्यत्वादमेध्यंसन्मेध्यमभूत्तदेवतस्मादेवाश्वमेधस्याश्वमेधनाम्नः क्रतोरश्वमेधत्वमश्वमेधनामलाभः॥क्रिया
कारकफलात्मकोहिक्रतुःसचप्रजापतिरेवेतिस्तूयते॥क्रतुनिर्वर्त्तकस्याश्वस्यप्रजापतित्वमुक्तमुषावाअश्वस्येत्येवमादिना॥

स्माच्चेति॥क्रतोस्तदात्मकस्यप्रजापतेरितियावत्॥देहोपिप्राणवियोगादश्वयत्पुनस्तत्प्रवेशाच्चमेधार्होभूदतःसोश्वमेधस्तत्तादात्म्यात्प्रजापतिरपित
थेत्यर्थः॥ननुप्रजापतित्वेनाश्वमेधस्यस्तुतिर्नोपयोगिनीअग्नेरुपास्यत्वेनप्रस्तुतत्वात्क्रतूपासनाभावादतआह॥क्रियेति॥ननुक्रत्वंगस्याश्वस्याश्वमे
धक्रत्वात्मनश्चाग्नेरुक्तरीत्यास्तुतत्वात्तदुपास्तेश्चप्रागेवोक्तत्वादेषहवाअश्वमेधमित्यादिवाक्यंनोपयुज्यतेतत्राह॥क्रतुनिर्वर्तकस्येति॥उक्तंचचित्यस्या

ग्नेस्तस्यप्राचीदिगित्यादिनाप्रजापतित्वमितिशेषः अश्वोपासनमग्न्युपासनंचैकमेवेतिवक्तुमुत्तरंवाक्यमित्याह॥ तस्यैवेति॥ यएवंमेतददितेरदितित्वंवे
देत्यादौप्रागेवविहितमुपासनंकिंपुनरारंभेणेत्याशंक्याह॥ पूर्वत्रेति॥ यद्यपिविधिरदितित्वंवेदेतिश्रुतस्तथापिसःगुणोपास्तिविधिर्नप्रधानविधिस्त्रतुप्र
धानविधिरुपास्तिप्रकरणत्वादपेक्ष्यतेःतोश्वमेधंवेदेतिप्रधानविधिरितिभावः तात्पर्यमुक्त्वावाक्यमादायाक्षराणिव्याकरोति॥ एषइति॥ यथोक्तमित्युभ

तस्यैवाश्वस्यमेध्यस्यप्रजापतिस्वरूपस्याग्नेश्चयथोक्तस्यक्रतुफलात्मकरूपतयासमस्योपासनंविधातव्यमित्यारभ्यते॥ पूर्वत्रक्रिया
पदस्यविधायकस्याश्रुतत्वात्क्रियापदापेक्षितत्वाच्चप्रकरणस्यायमर्थोवगम्यतेएषहवैअश्वमेधंक्रतुंवेदयःकश्चिदेनमश्वंअग्निरूपं

मेषहवाअश्वमेधंवेदयएनमेवंवेद

अर्कंचयथोक्तमेवंवक्ष्यमाणेनसमासेनप्रदर्श्यमानेनविशेषणेनविशिष्टंवेदसएषोश्वमेधंवेदनान्यः तस्मादेवंवेदितव्यइत्यर्थः॥
कथं॥ तत्रपशुविषयमेवतावद्दर्शनमाह॥ तत्रप्रजापतिर्भूयसायज्ञेनभूयोयजेयेतिकामयित्वात्मानमेवपशुंमेध्यंकल्पयित्वातंप
शुमनवरुध्यैवोत्सृष्टंपशुमवरोधमकृत्वैवमुक्तप्रग्रहममन्यताचिंतयत॥ यत्रप्रजापतित्वमनुकृष्यते तमनवरुध्येत्यादि
भिः॥ प्रदर्श्यमानविशेषणं॥ विधिरत्रस्पष्टोनभवतीत्याशंक्याह॥ तस्मादिति॥ अश्वमेधोविशेष्यत्वेनसंबध्यते॥ एवंशब्दास्त्रसिद्धार्थत्वंभा
तिकुतोविधिरित्याह॥ कथमिति॥ एषहवाअश्वमेधंवेदेत्यादौविवक्षितस्यविधेर्भूमिकांकरोति॥ तत्रेत्यादिना॥ उपास्तिविधिप्रस्तावः स
प्रम्यर्थः॥ कथंनुपशुविषयंदर्शनंतद्दर्शयति॥ तत्रेति॥ एवमनंतरवाक्येप्रवृत्तेसतीतियावत॥ अथविवक्षितविधिमभिदधाति॥ यस्माच्चेति॥

प्रजापतिरित्थंफलावस्थायाममन्यतेत्यत्रकिंप्रमाणमित्याशंक्यसंप्रतितत्कार्यभूतासुप्रजासुतथाविधचेष्टादृष्टिरित्याह॥अतएवेति॥प्रोक्षितंमंत्रसंस्कृ
तंपशुमितियावत्॥फलावस्थप्रजापतिवदित्येवंशब्दार्थः॥उपासनविधिरुक्तःसंप्रतिप्रतीकमादायतात्पर्यमाह॥एषइतिद्विविधोहिक्रतुःकल्पि

तंसंवत्सरस्यपूर्णस्यपरस्तादूर्ध्वमात्मनेआत्मार्थमालभतप्रजापतिदेवताकत्वेनेत्येतदालभतालंभंकृतवानपशूनन्यान्ग्राम्यानारण्यांश्च
यथादेवतंप्रतिप्रत्यैोहत्प्रतिगमितवान्यस्माच्चैवंप्रजापतिरमन्यततस्मादेवमन्योप्युक्तेनविधिनात्मानंपशुमश्वंमेध्यंकल्पयित्वासर्वदेवत्यो
हंप्रोक्ष्यमाणःआलभ्यमानस्त्वहंमद्देवत्यएवस्यामन्येइतरेपशवोग्राम्यारण्यायथादेवतमन्याभ्योदेवताभ्यःआलभ्यंतेमदवयवभूताभ्यए

तमनवरुध्येवामन्यततत्ऽसंवत्सरस्यपरस्तादात्मनआलभतपशूनदेवताभ्यःप्रत्यैोहत्तस्मात्सर्वदेवत्यंप्रोक्षितंप्राजा
पत्यमालभंत॥एषवाअश्वमेधोयएषतपतितस्यसंवत्सरआत्मा वेतिविद्यात॥अतएवेदानींसर्वदेवत्यंप्रोक्षितंप्राजापत्य

मालंभतेयाज्ञिकाएवंएषवाअश्वमेधोयएषतपतियस्त्वेवंपशुसाधनकःक्रतुःसएषसाक्षात्फलभूतोनिर्दिश्यतेएषवैअश्वमेधः॥को
सैायएषसवितातपतिजगदवभासयतितेजसातस्यास्यक्रतुफलात्मनःसंवत्सरःकालविशेषःआत्माशरीरंतन्निर्वर्त्यत्वात्संवत्सर
स्य॥ तपशुहेतुकोबाह्यतद्धेतुकश्वसचद्विप्रकारोपिफलरूपेणस्थितःसवितैवेतिउपास्तिफलंवक्तुंएतद्वाक्यमित्यर्थः॥विशेषोक्तिंविनाना
स्तिबुभुत्सोपशांतिरित्याह॥कोसाविति॥क्रतुफलात्मकः॥सवितामंडलंदेवतावेतिसंदेहेद्वितीयंगृहीत्वातस्येत्यादिव्याचष्टे॥तस्येति॥आदित्योदया
दुदयाभ्यामहोरात्रिद्वारासंवत्सरव्यवस्थानात्तन्निर्मातुस्तस्ययुक्तंतत्तादात्म्यमित्यर्थः॥क्रतोरादित्यत्वमुक्त्वातदंगस्याग्नेस्तद्वत्वंवक्तुमयमग्निरर्कइ

तिवाक्यं तस्यार्थमाह॥ तस्यैवेति॥ ननु पूर्वोक्तस्यैवाग्नेरादित्यत्वं कुतो नियम्यते ऽन्यश्चित्योग्निरन्यश्चाग्निरादित्यः किं न स्यादित्याशंक्याह॥ तस्य चे
ति॥ तथापि कथं तस्यैवादित्यत्वं तत्राह॥ तथा चेति॥ तस्य प्राचीत्यादिना लोकात्मत्वं चित्याग्नेरुक्तं तदिहाप्युच्यते तस्मात्तस्यैवाग्नादित्यत्वमिष्टमित्य
र्थः॥ अग्न्यादित्यभेदस्य लोकवेदसिद्धत्वान्न तयोरैकेन क्रतुना तादात्म्यमित्याशंक्याह॥ ताविति॥ यथाविशेषितत्वमादित्यरूपत्वं कुतस्तस्य चा
र्कस्य क्रतुरूपत्वं साधनत्वेन भेदादित्याशंक्योपचारादित्याह॥ क्रियात्मक इति॥ तथापि कथमादित्यस्य क्रतुतादात्म्योक्तिरित्याशंक्याह॥ क्रतुसाध्य

तस्यैव क्रत्वात्मनोयं पार्थिवोग्निरर्कः साधनभूतः तस्य चार्कस्य क्रतोश्चित्यस्येमे लोकास्त्रयोपि आत्मानः शरीरावयवाः तथा च व्याख्यातं
तस्य प्राची दिगित्यादिना॥ तावग्न्यादित्यावेतौ यथाविशेषितावर्काश्वमेधौ क्रतुफले अर्को यः पार्थिवोग्निः स साक्षात्क्रतुरूपः क्रियात्म

ऽयमग्निरर्कस्तस्येमे लोका आत्मानस्तावेतावर्काश्वमेधौ सो पुनरेकैव देवता भवति

कः क्रतोरग्निसाध्यत्वात्तद्रूपेणैव निर्देशः क्रतुसाध्यत्वाच्च फलस्य क्रतुरूपेणैव निर्देश आदित्योश्वमेध इति॥ तौ साध्यसाधनौ क्रतुफ
लभूतावग्न्यादित्यौ सा उ पुनर्भूय एकैव देवता भवति॥ का सा मृत्युरेव पूर्वमप्येकैवासीत् क्रियासाधनफलभेदाय विभक्ता ॥

त्वादिति॥ नन्वादित्यस्य क्रतुफलत्वेन क्रतुत्वे तद्धेतोरग्नेस्तादात्म्यायोगादयुक्तमग्नेरादित्यत्वमित्याशंक्याह॥ ताविति॥ क्रतुफलत्वात्तदात्मा सविता
तद्धेतुश्चित्योग्निस्तावुक्तविभागाद्युत्यादितोपासनादिव्यापारौ संतावेकैव प्राणाख्या देवतेति तयोरैक्योक्तिरित्यर्थः॥ एकैवेत्युक्ते प्रकृतयोरग्न्यादित्य
योरन्यतरपरिशेषं शंकते॥ कासेति॥ कथं द्वयोरेकत्वमेकत्वे वा कथं द्वित्वं तत्राह॥ पूर्वमपीति उक्तेर्थे वाक्योपक्रममनुकूलयति॥ तथा चेति॥ सा पुनरि

त्यत्रपुनरित्यादेरर्थंनिगमयति॥सापुनरिति॥ननुफलकथनार्थमुपक्रम्यप्राणात्मनाग्न्यादित्ययोरेकत्वंवदताप्रक्रांतंविस्मृतमितिनेत्याह॥यःपुनरि
ति॥एकत्वमभिन्नत्वं॥७॥तृतीयेद्वितीयंब्राह्मणं॥२॥१॥ब्राह्मणांतरमवतार्यतस्यपूर्वेणसंबंधाप्रतीतेर्नसोस्तीत्याक्षिपतिद्वयाहेत्यस्येति॥विवक्षितं
संबंधंवक्तुंवृत्तंकीर्त्तयति॥कर्मणामितिसाकाष्ठासापरागतिरितिश्रुतेरुक्तापरागतिर्मुक्तिरित्याशंक्याह॥मृत्य्वात्मभावइति॥अश्वमेधोपासनस्यस

तथाचोक्तंमंत्रेधात्मानंव्यकुरुतेतिसापुनरपिक्रियानिर्वृत्युत्तरकालमेकैवदेवताभवतिमृत्युरेवफलरूपोयः॥पुनरेवमेनमश्वमेधंमृत्यु
मेकांदेवतांवेदअहमेवमृत्युरस्म्यश्वमेधएकादेवतासामद्रूपाश्वाग्निसाधनसाध्येतिसोपजयतिपुनर्मृत्युंपुनर्मरणंसकृन्मृत्वापुनर्म
रणायनजायतइत्यर्थः॥अपजितोपिमृत्युरेनंपुनराप्नुयादित्याशंक्याह॥नैनंमृत्युराप्नोतिकस्मान्मृत्युरस्यैवंविदआत्माभवति॥किंचमृ

मृत्युरेवापपुनर्मृत्युंजयतिनैनंमृत्युराप्नोतिमृत्युरस्यात्माभवत्येतासांदेवतानामेकोभवतियएवंवेद॥७॥द्वितीयंब्राह्मणं॥२॥१॥

त्युरेवफलरूपःसन्नेतासांदेवतानामेकोभवतितस्यैतत्फलं॥७॥तृतीयाध्यायस्यद्वितीयंब्राह्मणं॥२॥१॥द्वयाहेत्यस्यकःसंबंधःकर्मणां
ज्ञानसहितानांपरागतिरुक्तामृत्य्वात्मभावोश्वमेधगत्युक्त्याऽथेदानींमृत्य्वात्मभावसाधनभूतयोःकर्मज्ञानयोर्यतउद्भवस्तत्प्रकाश
नार्थमुद्गीथब्राह्मणमारभ्यते॥ननुमृत्य्वात्मभावःपूर्वत्रज्ञानकर्मणोःफलमुक्तं॥ श्वमेधस्यकेवलस्यवाफलमुक्तंनोपास्त्यंतराणांकर्मांत
राणांचेत्याशंक्याश्वमेधफलोक्त्योपास्त्यंतराणांकेवलानांसमुच्चितानांचफलमुपलक्षितमित्याह॥अश्वमेधेति॥वृत्तमनूद्योत्तरब्राह्मणस्यतात्पर्य
माह॥अथेति॥ज्ञानयुक्तानांकर्मणांसंसारफलत्वप्रदर्शनानंतरमितियावत्॥ज्ञानकर्मणोरुद्भावकस्यप्राणस्यस्वरूपंनिरूपयितुंब्राह्मणमित्युत्थाप्य

मृत्युमतिक्रांतोदीप्यतइतिमृत्योरतिक्रमस्यवक्ष्यमाणज्ञानकर्मफलत्वात्पूर्वत्रचतदंतर्भावस्यतत्फलस्योक्तत्वादुभयस्यापिफलस्यभेदात्पूर्वोत्तरयो
र्ज्ञानकर्मणोर्विषयशब्दितोद्देश्यभेदान्नपूर्वोक्तयोस्तयोरुद्भवकारणप्रकाशनार्थंब्राह्मणमित्यर्थः॥पूर्वोत्तरज्ञानकर्मफलभेदाभावादेकविषयत्वा
दुद्भावकप्रकाशनार्थंब्राह्मणंयुक्तमितिपरिहरति॥नायमिति॥वाक्यशेषविरोधंशंकित्वादूषयति॥नन्वित्यादिना॥स्वाभाविकःशास्त्रानाधेयोयोयंपा

उद्गीथज्ञानकर्मणोस्तुमृत्य्वात्मभावातिक्रमणंफलंवक्ष्यत्यतोभिन्नविषयत्वात्फलस्यनपूर्वकर्मज्ञानोद्भवप्रकाशनार्थमितिचेन्नायंदोषो
ग्न्यादित्यात्मभावत्वादुद्गीथफलस्यपूर्वत्राप्येतदेवफलमुक्तमेतासांदेवतानामेकोभवतीति॥ननुमृत्युमतिक्रांतइत्यादिविरुद्धंनस्वाभा
विकपाप्मासंगविषयत्वादतिक्रमणस्य॥कोसौस्वाभाविकःपाप्मासंगोमृत्युःकुतोवातस्योद्भवःकेनवातस्यातिक्रमणंकथंवेत्येतस्यार्थ

द्वयाह प्राजापत्या

स्यप्रकाशनायाख्यायिकारभ्यते॥कथं॥द्वयाःद्विप्रकाराः॥हइतिपूर्ववृत्तावद्योतकोनिपातोवर्त्तमानप्रजापतेःपूर्वजन्मनियद्वृत्तंतदेव
द्योतयतिहशब्देनप्राजापत्याःप्रजापतेर्वृत्तजन्मावस्थस्यापत्यानिप्राजापत्याःकेतेदेवाश्चासुराश्चतस्यैवप्रजापतेःप्राणावागादयः ॥

प्माविषयासंगरूपोमृत्युस्तस्यातिक्रमणंवाक्यशेषेकथ्यतेनहिरण्यगर्भाख्यस्यमृत्योरतःपूर्वोक्तज्ञानकर्मभ्यांतुल्यविषयत्वमेवोत्तरज्ञानकर्मणोरित्यर्थः
ज्ञानकर्मणोरुद्भावकंवक्तुंब्राह्मणमारभ्यतामाख्यायिकातुकिमर्थेत्याशंक्यतस्यास्तात्पर्यमाह॥कोसाविति॥कथंयथोक्तोब्राह्मणाख्यायिकयोरर्थःशक्यो
ज्ञातुमित्याकांक्षांनिक्षिप्याक्षराणिव्याकरोति॥कथमित्यादिना॥निपातार्थमेवस्फुटयति॥वर्त्तमानेति॥प्रजापतिशब्दोभविष्यद्वृत्यायजमानंगोचरयतीत्या

शंकां वारयति॥ तस्यैवेति॥ यजमानेषु प्राणेषु देवत्वमसुरत्वं च विरुद्धं न सिध्यतीति शंकते॥ कथमिति॥ तेषु तदुभयमौपाधिकं साधयति॥ उच्यत इति॥ शा
स्त्रानपेक्षयोर्ज्ञानकर्मणोरुत्पादकमाह॥ प्रत्यक्षेति॥ सन्निधानासन्निधानाभ्यां प्रमाणद्वयोक्तिः स्वेष्वेवासुषु रमणं नामात्मंभरित्वं॥ तत इत्यादिवाक्यद्वयं प्र
कृतव्याचष्टे॥ यस्माच्चेति॥ देवानामल्पत्वं प्रपंचयति॥ स्वाभाविकीति॥ महत्तरत्वे हेतुः दृष्टप्रयोजनत्वादिति असुराणां बहुत्वं प्रपंचयति॥ शास्त्रजनितेति

कथं पुनस्तेषां देवासुरत्वं उच्यते शास्त्रजनितज्ञानकर्मभाविताः द्योतनाद्देवा भवंति त एव स्वाभाविकप्रत्यक्षानुमानजनितदृष्टप्रयोजनक
र्मज्ञानभाविता असुराः स्वेष्वेवासुषु रमणात्सुरेभ्यो वा देवेभ्योन्यत्वात्॥ यस्माच्च दृष्टप्रयोजनज्ञानकर्मभाविता असुरास्ततस्तस्मात्कानीय
साः कनीयांस एव कानीयसाः स्वार्थे णि वृद्धिः कनीयांसो अल्पा एव देवाः ज्यायसा असुरा ज्यायांसोऽसुराः॥ स्वाभाविकी हि कर्मज्ञानप्रवृत्तिर्मह

देवाश्चासुराश्च ततः कानीयसा एव देवा ज्यायसा असुरास्त एषु लोकेष्वस्पर्धंत

त्तरा प्राणानामशास्त्रजनिताया: कर्मज्ञानप्रवृत्तेः दृष्टप्रयोजनत्वादत एव कनीयस्त्वं देवानां शास्त्रजनितप्रवृत्तेरल्पत्वादत्यंतयत्नसा
ध्या हि सा ते देवाश्चासुराश्च प्रजापतिशरीरस्था एषु लोकेषु निमित्तभूतेषु स्वाभाविकेतरकर्मज्ञानसाध्येष्वस्पर्धंत स्पर्धां कृतवंतः॥ देवानां
चासुराणां च वृत्त्युद्भवाभिभवौ स्पर्द्धा असुराणां बाहुल्यमिति शेषः तदेव साधयति॥ अत्यंतेति॥ उभयेषां देवासुराणां मिथः संघर्षं दर्शयति॥ ते देवाश्चेति॥
कथं ब्रह्मादीनां स्थावरांतराणां भोगस्थानानां स्पर्द्धानिमित्तत्वमित्याशंक्य तेषां शास्त्रीयेतरज्ञानकर्मसाध्यत्वात्तयोश्च देवासुरजयाधीनत्वात्तस्य च स्पर्धापूर्व
कत्वात्परंपरया लोकानां तन्निमित्तत्वमित्यभिप्रेत्य विशिनष्टि॥ स्वाभाविकेति॥ का पुनरेषां स्पर्धा नामेत्याशंक्याह॥ देवानां चेति॥ तामेव सफलां विवृणोति॥

कदाचिदित्यादिना॥ अधिकृतैरसुरपराजये देवजये च प्रयतितव्यमित्यनुग्रहबुध्या जयफलमाह॥ एवमिति॥ आकांक्षापूर्वकमनंतरवाक्यमादाय
व्याकरोति॥ त एवमित्यादिना॥ योयमुद्गीथो नाम कर्मांगभूतः पदार्थस्तत्कर्तृप्राणस्य स्वरूपाश्रयणमेव कथं सिध्यतीत्याशंक्याह॥ उद्गीथेति॥ किंतत्क

कदाचिच्छास्त्रजनितकर्मज्ञानभावनारूपा वृत्तिः प्राणानामुद्भवति यदा चोद्भवति तदा दृष्टप्रयोजना प्रत्यक्षानुमानजनितकर्मज्ञानभावनारू
पा तेषामेव प्राणानां वृत्तिरासुर्यभिभूयते स देवानां जयोऽसुराणां पराजयः कदाचित्तद्विपर्ययेण देवानां वृत्तिरभिभूयते आसुर्या उद्भवः सोऽ
सुराणां जयो देवानां पराजयः एवं देवानां जये धर्मभूयस्त्वादुत्कर्षः आप्रजापतित्वप्राप्तेरसुरजयेऽधर्मभूयस्त्वादपकर्ष आस्थावरत्वप्रा
प्तेरुभयसाम्ये मनुष्यत्वप्राप्तिस्त एवं कनीयस्त्वादभिभूयमानाः असुरैर्देवा बाहुल्यादसुराणां किं कृतवंत इत्युच्यते॥ ते देवा असुरैरभिभूय

ते ह देवा ऊचुर्हंतासुरान्यज्ञ उद्गीथेनात्ययामेति॥ १॥

माना ह किल ऊचुरुक्तवंतः कथं हंत इदानीमस्मिन्यज्ञे ज्योतिष्टोमे उद्गीथेन उद्गीथकर्मपदार्थकर्तृस्वरूपाश्रयणेनात्ययामातिगच्छाम॥ असु
रानभिभूय स्वं देवभावं शास्त्रप्रकाशितं प्रतिपद्यामह इत्युक्तवंतोऽन्योन्यं उद्गीथकर्मपदार्थकर्तृस्वरूपाश्रयणं च ज्ञानकर्मभ्यां॥ कर्म वक्ष्यमाणं
मंत्रजपलक्षणं विधित्स्यमानं तदेतानि जपेदिति ज्ञानं त्विदमेव निरूप्यमाणं॥ नन्विदमभ्यारोहजपविधिशेषोऽर्थवादो न ज्ञाननिरूपणपरं॥

र्म किं वा ज्ञानं तदाह॥ कर्मेति॥ तान्येतान्यसतो मा सद्गमयेत्यादीनि यजूंषि जपेदिति विधित्स्यमानमिति योजना॥ द्वयाहेत्यादि न ज्ञाननिरूपणपरं जपविधि
शेषत्वेनार्थवादत्वात्तत्कुतोऽत्र ज्ञानस्य निरूप्यमाणत्वमित्याक्षिपति॥ नन्विति॥ आभिमुख्येनारोहति देवभावमनेनेत्यभ्यारोहो मंत्रजपः तद्विधिशेषोऽर्थवादो

दूयाहेति

हूयाहेत्यादिवाक्यमित्यर्थः॥ उपास्तिविधिश्रवणात्तत्परं वाक्यं न जपविधिशेषइति दूषयति॥ नेति॥ माभूज्जपविधिशेषः तथाप्युद्गायेत्यौद्गात्रस्य कर्मणः संनिधाने पुरातनकल्पनाप्रकारस्य हूयाहेत्यादिना श्रवणात्तद्विधिशेषोऽर्थवादोऽयमिति शंकते॥ उद्गीथेति॥ नेदं वाक्यं ज्ञानं चोद्गीथविधिशेषस्तत्प्रकरणस्थत्वाभावेन सन्निध्यभावादिति दूषयति नाप्रकरणादिति॥ उद्गीथस्तर्हि किं विधीयते न खल्वविहितमंगं भवति तत्राह॥ उद्गीथस्य चेति॥ अन्यत्रेति कर्मकांडोक्तिः अथो द्गायेत्युद्गीथविधिरपि इह प्रतीयते तत्कथं संनिधिरपोद्यते तत्राह॥ विद्येति॥ उद्गीथविधिरिह प्रतीयमानः प्राणस्योद्गातृदृष्ट्योपासनविधिरन्यथाप्रकरणविरोधादित्यर्थः॥ जपविधिशेषत्वमुद्गीथविधिशेषत्वं वा ज्ञानस्य नास्तीत्युक्तमिदानीं जपविधिशेषत्वाभावे युक्त्यंतरमाह॥ अन॥ यएवंवेदेति वचनात्॥ उद्गीथप्रस्तावे पुराकल्पश्रवणादुद्गीथविधिपरमिति चेन्नाप्रकरणादुद्गीथस्य चान्यत्र विहितत्वाद्विद्याप्रकरणत्वाच्चाभ्यारोहजपस्यानित्यत्वादेवं वित्प्रयोज्यत्वाद्विज्ञानस्य च नित्यवच्छ्रवणात्तद्धैतल्लोकजिदेवेति च श्रुतेः॥ प्राणस्य वागादीनां चशुध्यशुद्धिवचनान्न ह्यनुपास्यत्वे प्राणस्य शुद्धिवचनं॥ वागादीनां च सहोपन्यस्तानामशुद्धिवचनं वागादिनिंदया मुख्यप्राणस्तुतिश्चैषाभिप्रेतोपपद्यते॥ भ्यारोहेति॥ अनित्यत्वं साधयति॥ एवंविदिति॥ प्राणविज्ञानवतानुष्ठेयो जपो न तद्विज्ञानात्प्रागस्ति तन्नासौ पश्चाद्भावी प्रागेव सिद्धं विज्ञानं प्रयोजयतीत्यर्थः॥ तस्यापि प्राचीनत्वं कथमित्याशंक्याह॥ विज्ञानस्य चेति॥ यएवं विद्वान्पौर्णमासीं यजतइति वद्य एवं वेदेति विज्ञानं श्रुतं न हि प्रयाजादि पौर्णमासीप्रयोजकं तस्या एव तत्प्रयोजकत्वात्तथा प्राणवित्प्रयोज्यो जपो न विज्ञानप्रयोजकस्तस्य स्वप्रयोजकत्वेन प्रागेव सिद्धेरावश्यकत्वादित्यर्थः॥ फलवत्वाच्च प्राणविज्ञानं स्वतंत्रं विधित्सितमित्याह॥ तद्धेति॥ प्राणोपास्तेर्विवक्षितत्वे हेत्वंतरमाह॥ प्राणस्येति॥ यद्धि स्तूयते तद्विधीयतइति न्यायमाश्रित्योक्तमेव प्रपंचयति॥ नहीति॥ अतश्च प्राणोपास्तिरत्र विधित्सितेत्याह ॥

मृत्युमिति॥ फलवचनंप्राणस्यानुपास्यत्वेनोपपद्यत इतिसंबंधः॥ उक्तमेवव्यनक्ति॥ प्राणेति॥ मृत्युमोक्षणानंतरं वागादीनांयदग्न्यादित्वं फलंतदध्या
त्मपरिच्छेदं हित्वोपासितुराधिदैविकप्राणस्वरूपापत्तेरुपपद्यते॥ तस्माद्विधित्सितैवात्रप्राणोपास्तिरित्यर्थः॥ उक्तन्यायेनप्राणोपास्तिमुपेत्यप्राणदे
वतांशुध्यादिगुणवतीमाक्षिपति॥ भवत्विति॥ यथाप्राणस्योपास्तिः शास्त्रदृष्टत्वादिष्टातथास्यगुणसंबंधःश्रुतत्वादेष्टव्यउपास्त्यावुपास्येचगुणवतिप्राणे
प्रामाणिकप्राप्तेरविशेषादितिसिद्धांतीब्रूते॥ नन्विति॥ प्राणस्योपास्यत्वेविशुध्यादिगुणवादस्यस्तुत्यर्थत्वेनार्थवादत्वसंभवान्नयथोक्तादेवतासा
दितिपूर्ववाद्याह॥ नस्यादिति॥ विशुध्यादिगुणवादस्यार्थवादत्वेपिनाभूतार्थवादत्वमितिपरिहरति॥ नेति॥ विशुध्यादिगुणविशिष्टप्राणदृष्टेरत्र

मृत्युमतिक्रांतोदीप्यतइत्यादिफलवचनंच॥ प्राणस्वरूपापत्तिर्हिफलंतद्यद्वागाद्यग्न्यादिभावः॥ भवतुनामप्राणस्योपासनंनतुविशुध्या
दिगुणवत्तेति॥ ननुस्यात्क्रतुत्वान्नस्यादुपास्यत्वेस्तुत्यर्थत्वोपपत्तेः॥ न॥ अविपरीतार्थप्रतिपत्तेःश्रेयःप्राप्त्युपपत्तेर्लोकवत्॥ योह्यविप
रीतमर्थंप्रतिपद्यतेलोकेसइष्टंप्राप्नोतिअनिष्टाद्वानिवर्त्ततेनविपरीतार्थप्रतिपत्यातथेहापिश्रोतशब्दजनितार्थप्रतिपत्तौश्रेयःप्रा
प्तिरुपपन्नानविपर्ययेनचोपासनार्थश्रुतशब्दोत्थविज्ञानविषयस्यायथार्थत्वेप्रमाणमस्ति॥ नचतद्विज्ञानस्यापवादःश्रूयते

फलप्राप्तिः श्रुतानसाज्ञानस्यमिथ्यार्थत्वेयुक्तासम्यग्ज्ञानादेवपुमर्थाप्तेः संभवादतःस्तुतिरपियथार्थैवेत्यर्थः॥ लोकदृष्टांतंव्याचष्टे॥ योहीति॥ इ
हेतिवेदाख्यदार्ष्टांतिकोक्तिः॥ ननुविशुध्यादिगुणवतींदेवतांवदंतिवाक्यान्युपासनाविध्यर्थत्वान्नस्वार्थेप्रामाण्यंप्रतिपद्यंतेतत्राह॥ नचेति॥ अन्यपरा
णामपिवाक्यानांमानांतरसंवादविसंवादयोरसतोःस्वार्थेप्रामाण्यमनुभवानुसारिभिरेष्टव्यमित्यर्थः॥ ननुप्राणस्यविशुध्यादिवादोनस्वार्थेमानमन्यपरत्वा
दादित्ययूपादिवाक्यवदतआह॥ नचेति॥ आदित्ययूपादिवाक्यार्थज्ञानस्यप्रत्यक्षादिनापवादवद्विशुध्यादिगुणविज्ञानस्यनापवादःश्रुतस्तस्माद्विशुध्यादिवा

द्स्यस्वार्थमानत्वमप्रत्यूहमित्यर्थः॥विशुध्यादिगुणकप्राणविज्ञानात्फलश्रवणात्तद्वादस्ययथार्थत्वमेवेत्युपसंहरति॥ननइति॥लोकवद्वेदेपिसम्यग्ज्ञाना
दिष्टप्राप्तिरनिष्टपरिहारश्चेत्यन्वयमुखेनोक्तमर्थंव्यतिरेकमुखेनापिसमर्थयते॥विपर्ययेचेत्यादिना॥शास्त्रस्यानर्थार्थत्वमिष्टमितिशंकांनिराचष्टे॥न
चेतिअपौरुषेयस्यासंभावितसर्वदोषस्याशेषपुरुषार्थहेतोः शास्त्रस्यानर्थार्थत्वमेष्टुमशक्यमित्यर्थः॥शास्त्रस्ययथाभूतार्थत्वंनिगमयतितस्मादिति॥उ
पासनार्थंज्ञानार्थंचेतिशेषः॥शास्त्राद्यथार्थप्रतिपत्तेःश्रेयःप्राप्तिरित्यत्रव्यभिचारंचोदयति॥नामादाविति॥नदेवस्फुटयति॥स्फुटमिति॥अब्रह्मणिब्रह्म

ततःश्रेयःप्राप्तिदर्शनाद्यथार्थतांप्रतिपद्यामहेविपर्ययेचानर्थप्राप्तिदर्शनाद्योहिविपर्ययेणार्थंप्रतिपद्यतेलोकेपुरुषंस्थाणुरित्यमित्रंमि
त्रमितिवासोऽनर्थंप्राप्नुवन्दृश्यतेआत्मेश्वरदेवतादीनामप्ययथार्थानामेवचेद्ग्रहणंश्रुतितोऽनर्थप्राप्त्यर्थंशास्त्रमितिध्रुवंप्राप्नुयाल्लोक
वदेवनचैतदिष्टं तस्माद्यथाभूतानेवात्मेश्वरदेवतादीन्ग्राहयत्युपासनार्थंशास्त्रं॥नामादौब्रह्मदृष्टिदर्शनादयुक्तमितिचेत्स्फुटं ना
मादेरब्रह्मत्वंतत्रब्रह्मदृष्टिंस्थाण्वादाविवपुरुषदृष्टिंविपरीतांग्राहयत्शास्त्रंदृश्यतेतस्माद्यथार्थमेवशास्त्रतःप्रतिपत्तेःश्रेयइत्ययुक्त
मितिचेत्॥न॥प्रतिमावद्भेदप्रतिपत्तेःनामादावब्रह्मणिब्रह्मदृष्टिंविपरीतांग्राहयतिशास्त्रंस्थाण्वादाविवपुरुषदृष्टिमितिनैतत्साध्ववो
चःकस्माद्भेदेनहिब्रह्मणोनामादिवस्तुप्रतिपन्नस्यनामादौविधीयतेब्रह्मदृष्टिःप्रतिमादाविवविष्णुदृष्टिरालंबनत्वेनहिनामादिप्रतिपत्तिःप्र
तिमावदेवनतुनामाद्येवब्रह्मेति॥

दृष्टिरतस्मिंस्तद्बुद्धित्वान्मिथ्याधीःसाचयावन्नाम्नोगतमित्यादिश्रुत्याफलवतीततःशास्त्राद्यथार्थप्रतिपत्तिरेव
फलमित्ययुक्तमित्यर्थः॥भेदाग्रहपूर्वकोन्यस्यान्यात्मनावभासोमिथ्याज्ञानमत्रतुभेदेभासमानेन्यत्रान्यदृष्टिर्विधीयते॥यथाविष्णोर्भेदेप्रतिमायांगृह्य
माणेतत्रविष्णुदृष्टिःक्रियतेतन्नेदंमिथ्याज्ञानमित्याह॥नेति॥नञर्थंस्पष्टयति॥नामादाविति॥प्रश्नपूर्वकंहेतुमाचष्टे॥कस्मादिति॥प्रतिमायांविष्णुदृष्टिं

प्रत्यालंबनत्वमेवनविष्णुतादात्म्यंनामादेस्तुब्रह्मतादात्म्यंश्रुतमितिवैषम्यमाशंक्याह॥ आलंबनत्वेनेति॥ उक्तमर्थंवैधर्म्यदृष्टांतेनस्पष्टयति॥ यथेति॥
कर्ममीमांसकोब्रह्मविद्वेषंप्रकटयन्नत्रस्ययवतिष्ठते॥ ब्रह्मेति॥ केवलातदृष्टिरेवनाम्निचोद्यतेचोदनावशाच्चफलंसेत्स्यसि॥ ब्रह्मतुनास्तिमानाभावादि
त्यर्थः॥ अथयथादेवानांप्रतिमादिषुउपास्यमानानामन्यत्रसत्वंयथाचवस्वाद्यानांपितॄणांब्राह्मणादिदेहेतर्प्यमाणानामन्यत्रसत्वंतथाब्रह्मणोपिनामा
दावुपास्यत्वादन्यत्रसत्वंभविष्यतीत्याशंक्याह॥ एतेनेति॥ नामादौब्रह्मदर्शनेनेतियावत्॥ दृष्टांतासिद्धेर्नक्वापिब्रह्मास्तीतिभावः॥ सत्यज्ञानादिलक्षणं
ब्रह्मनास्तीत्ययुक्तंसदेवसोम्येदमित्यादिश्रुतेरित्याह॥ नेति॥ किंचब्रह्मदृष्टिःसत्यार्थाशास्त्रीयदृष्टित्वादियमेवर्गाग्निःसामेतिदृष्टिवदित्याह ऋगादिषि

यथास्थाणावनिर्ज्ञातेनस्थाणुरितिपुरुषएवायमितिप्रतिपद्यतेविपरीतंनतुतथानामादौब्रह्मदृष्टिर्विपरीताब्रह्मदृष्टिरेवकेवलानास्ति
ब्रह्मेतिचेदेतेनप्रतिमाब्राह्मणादिषुविष्ण्वादिदेवपित्रादिदृष्टीनांतुल्यता॥ नर्गादिषुपृथिव्यादिदृष्टिदर्शनाद्विद्यमानपृथिव्यादिवस्तुदृ
ष्टीनामेवर्गादिविषयेप्रक्षेपदर्शनात्तस्मात्तत्सामान्यान्नामादिषुब्रह्मादिदृष्टीनांविद्यमानब्रह्मादिविषयत्वसिद्धिः॥ एतेनप्रतिमाब्राह्मणा
दिषुविष्ण्वादिदेवपित्रादिबुद्धीनांचसत्यवस्तुविषयत्वसिद्धिःमुख्यापेक्षत्वाच्चगौणत्वस्यपंचाग्न्यादिषुचाग्नित्वादेर्गौणत्वान्मुख्याग्न्या
दिसद्भावववन्नामादिषुब्रह्मत्वस्यगौणत्वान्मुख्यब्रह्मसद्भावोपपत्तिः क्रियार्थैश्चाविशेषाद्विद्यार्थानां॥

ति॥ तदेवस्पष्टयति॥ विद्यमानेति॥ ता
भिर्दृष्टिभिःसामान्यंदृष्टित्वंतस्मादितियावत्॥ यत्तुदृष्टांतासिद्धिरितितत्राह॥ एतेनेति॥ ब्रह्मदृष्टेःसत्यार्थत्ववचनेनेतियावत्॥ ब्रह्मास्तित्वेहेत्वंतरमाह॥
मुख्यापेक्षत्वादितिउक्तमेवविवृणोतिपंचेति॥ पंचाग्नयोद्युपर्जन्यपृथिवीपुरुषयोषितः॥ आदिपदंवाग्धेन्वादिग्रहार्थं॥ ननुवेदांतवेद्यंब्रह्मेष्यतेनचते
भ्यस्तत्सिद्धिःसिध्यतितेषांविधिवैधुर्येणाप्रामाण्यात्तत्कुतोब्रह्मसिद्धिरतआह॥ क्रियार्थैश्चेति॥ विमतंस्वार्थेप्रमाणंअज्ञातज्ञापकत्वात्संमतवदतोवेदांत

शास्त्रादेव ब्रह्मसिद्धिरित्यर्थः॥ सिद्धसाध्यार्थभेदेन वैषम्यादविशिष्टत्वमनिष्टमित्याशंक्योक्तं विवृणोति॥ यथाचेति विशिष्टत्वं स्वरूपोप
कारित्वं फलोपकारित्वं च प्रोक्तप्रकारं परामृष्टमेवमित्यादिष्टं॥ अलौकिकत्वं साधयति॥ प्रत्यक्षादीति॥ किंच वेदांतानामप्रामाण्यं बुध्यनुत्पत्तेर्वा
संशयाद्युत्पत्तेर्वा नाद्य इत्याह॥ न चेति॥ न द्वितीय इत्याह॥ न चानिश्चितेति॥ कोटिद्वयास्पर्शित्वाद्बाधाच्चेत्यर्थः॥ क्रियार्थैर्वाक्यैर्विद्यार्थानां वाक्या
नां साधर्म्यमुक्तमाक्षिपति॥ अनुष्ठेयेति॥ साधर्म्यस्यायुक्तत्वमेव व्यनक्ति॥ क्रियार्थैरिति वाक्योत्थबुद्धेर्यथार्थत्वाद्द्विध्यभावेपि वाक्यप्रामाण्यमज्ञात

यथाच दर्शपूर्णमासादिक्रियेदंफलाविशिष्टेति कर्तव्यताकारं एवं क्रमप्रयुक्तांगा चेत्येतदलौकिकं वस्तु प्रत्यक्षाद्यविषयं तथाभूतं च वेदवा
क्यैरेव ज्ञाप्यते॥ तथा परमात्मेश्वरदेवतादिवस्तु स्वस्थूलादिधर्मकमशनायाद्यतीतं चेत्येवमादिविशिष्टमिति वेदवाक्यैरेव ज्ञाप्यत इत्यलौ
किकत्वात्तथाभूतमेव भवितुमर्हतीति॥ न च क्रियार्थैर्वाक्यैर्ज्ञानवाक्यानां बुध्युत्पादकत्वे विशेषोस्ति॥ न चानिश्चिता विपर्यस्ता वा परमात्मा
दिवस्तुविषया बुद्धिरुत्पद्यते॥ अनुष्ठेयाभावादयुक्तमिति चेत् क्रियार्थैर्वाक्यैर्यस्यांशभावनाऽनुष्ठेया ज्ञाप्यतेऽलौकिक्यपि न तथा परमा
त्मेश्वरादिविज्ञानेऽनुष्ठेयं किंचिदस्त्यतः क्रियार्थैः साधर्म्यमित्ययुक्तमिति चेन्न ज्ञानस्य तथाभूतार्थविषयत्वात्॥ न ह्यनुष्ठेयस्यत्र्यंश
स्य भावनाख्यस्यानुष्ठेयत्वात्तथात्वं किं तर्हि प्रमाणसमधिगतत्वात्॥

ज्ञापकत्वेनाविरुद्धमिति परिहरति॥ न ज्ञानस्येति॥ अनुष्ठेयनिष्ठत्वमं
तरेण कुतो वस्तुनि प्रयोगप्रत्यययोस्तथार्थत्वमित्याशंक्य तयोर्विषयतथार्थत्वं तदपेक्षां स्वप्रामाण्यार्थं वेति विकल्प्याद्यं दूषयति॥ नहीति॥ तदुभयविष
यस्य कर्तव्यार्थस्य तथात्वं न कर्तव्यत्वापेक्षं किंतु मानगम्यत्वादन्यथा विप्रलंभकविधिवाक्येपि तथात्वापत्तेरित्यर्थः॥ द्वितीयं प्रत्याह॥ न चेति॥ बुद्धिग्र
हणं प्रयोगोपलक्षणार्थं॥ कर्तव्यतार्थविषयप्रयोगादेर्नानुष्ठेयविषयत्वान्मानत्वं किंतु प्रमाकरणत्वात्तज्जन्यत्वाच्चान्यथोक्तातिप्रसक्तितादवस्थ्यादतो

विषयेण तथार्थत्वं ३   अनुष्ठेयनिष्ठापेक्षा ३   तयोः प्रयोगप्रत्यययोः अनुष्ठेयत्वान्मानत्वमनुष्ठेयनिष्ठत्वया वा मानत्वं = ३

नुष्टेयनिष्ठत्वंमानत्वेऽनुपयुक्तमित्यर्थः॥कुतस्तर्हिकार्याकार्यधियाविस्याशंक्याह॥वेदेति॥वैदिकस्यार्थस्याबाधेनतथार्थत्वेसिद्धेसमीहितसाधन
त्वविशिष्टंचेद्वस्तुतदाकर्त्तव्यमितिधियानुतिष्टति॥तच्चेदनिष्टसाधनत्वविशिष्टंतदानकार्यमितिधियानानुतिष्टत्यतोमानस्योऽनुष्ठानाननुष्ठा
नहेतूकार्याकार्यधियावित्यर्थः॥तथापिब्रह्मणोवाक्यार्थत्वंपदार्थत्वंवानाद्यइत्याह॥अननुष्टेयत्वइति॥तस्याकार्यत्वेपिवाक्यार्थत्वंकिंनस्या

नचतद्विषयायाबुद्धेरनुष्ठेयविषयत्वात्तथार्थत्वंकिंतर्हिवेदवाक्यजनितत्वादेववेदवाक्याधिगतस्यवस्तुनस्तथात्वेसत्यनुष्ठे
यविशिष्टत्वंचेदनुतिष्ठतिनचेदनुष्ठेयविशिष्टंनानुतिष्ठति॥अननुष्ठेयत्वेवाक्यप्रमाणत्वानुपपत्तिरितिचेत्॥नह्यनुष्ठेयेऽसति
पदानांसंहतिरुपपद्यते॥अनुष्ठेयत्वेतुसतितादर्थ्येनपदानिसंहन्यंते॥तत्रानुष्ठेयनिष्ठंवाक्यंप्रमाणंभवतीदमनेनेवंकर्त्तव्य
मितिनत्विदमनेनैवमित्येवंप्रकाराणांपदशतानामपिवाक्यत्वमस्तिकुर्यात्क्रियेतकर्त्तव्यंभवेत्स्यादितिपंचममित्येवमादीनामन्य
तमेऽसत्यतःपरमात्मेश्वरादीनामवाक्यप्रमाणत्वं॥पदार्थत्वेचप्रमाणांतरविषयत्वंअतोऽसदेतदितिचेत् नास्तिमेरुर्वर्णचतुष्ट
योपेतइत्येवमाद्यननुष्ठेयेपिवाक्यदर्शनात्॥नचमेरुर्वर्णचतुष्टयोपेतइत्येवमादिवाक्यश्रवणेमेर्वादावनुष्ठेयत्वबुद्धिरुत्पद्यते

दित्याशंक्याह॥नहीति॥उभयत्रासतीतिच्छेदः॥द्वितीयंदूषयति॥पदार्थत्वेचेति॥ब्रह्मणः शास्त्रार्थत्वमेतदित्युच्यते॥कार्यास्पृष्टेर्थेवाक्यप्रा
माण्यंदृष्टांतेनसाधयति॥नेत्यादिना॥शुक्लकृष्णलोहितमिश्रितलक्षणंवर्णचतुष्टयंतद्विशिष्टोमेरुरस्तीत्यादिप्रयोगेमेर्वादावकार्येपिसा
म्यग्धीदर्शनात्तत्वमसिवाक्यादपिकार्यास्पृष्टेब्रह्मणिसम्यग्ज्ञानसिद्धिरित्यर्थः दृष्टांतेपिकार्यधीरेववाक्यादुदेतीत्याशंक्याह॥नचेति॥नन्
तत्रक्रियापदाधीनापदसंगतिर्युक्तावेदांतेषुपुनस्तदभावात्सदसंहत्ययोगात्कुतोवाक्यप्रमाणकत्वंब्रह्मणःसंभवतीतत्राह ॥

तथेति॥विमतमफलंसिद्धार्थज्ञानत्वात्संमतवदितिअनुमानात्तत्वमादेःसिद्धार्थस्यायुक्तंमानत्वमितिशंकते॥मेवीदीति॥श्रुतिविरोधेनानुमानंधुनी
ते॥नेत्यादिना॥विद्वदनुभवविरोधाच्चनैवमित्याह॥संसारेति॥फलश्रुतेरर्थवादत्वेनामानत्वादनुमानाबाधकतेत्याशंक्याह॥अनन्येति॥पर्णम
यीत्वाधिकरणन्यायेनजुह्वांफलश्रुतेरर्थवादत्वंयुक्तं॥ब्रह्मधियोन्यशेषत्वप्रापकाभावात्तत्फलश्रुतेरर्थवादत्वासिद्धिरित्यन्यथाशारीरकानारंभः
स्यादित्यर्थः॥श्रुत्यनुभवाभ्यांवाक्योत्थज्ञानस्यफलवत्त्वदृष्टेर्युक्ताकार्यास्पृष्टेर्थेतत्वमस्यादेर्मानतेत्युक्तं॥संप्रतिशास्त्रस्यकार्यपरत्वानियमेहेत्वंत
रमाह॥प्रतिषिद्धेति॥यद्यपिकलंजभक्षणादेरधःपातस्यचसंबंधोनकलंजंभक्षयेदित्यादिवाक्यात्प्रतीयते॥तथापितस्यानुष्टेयत्वाद्वाक्यस्यानुष्टेय

तथास्तिपदसहितानांपरमात्मेश्वरादिप्रतिपादकवाक्यपदानांविशेषणविशेष्यभावेनसंहतिःकेनवार्यतेमेवीदिज्ञानवत्परमा
त्मज्ञानेप्रयोजनाभावादयुक्तमितिचेत्॥नब्रह्मविदाप्नोतिपरं॥भिद्यतेहृदयग्रंथिरितिफलश्रवणात्॥संसारबीजाविद्यादिदोष
निवृत्तिदर्शनाच्चानन्यशेषत्वाच्चतत्वानस्यजुह्वामिवफलश्रुतेरर्थवादत्वानुपपत्तिःप्रतिषिद्धानिष्टफलसंबंधश्चवेदादेवविज्ञायते
॥नचानुष्ठेयःसः॥नचप्रतिषिद्धविषयेप्रवृत्तक्रियस्याकरणादन्यदनुष्ठेयमस्त्यकर्त्तव्यताज्ञाननिष्ठतैवहिपरमार्थतःप्रतिषेधविधीनां
स्यात्॥

निष्टत्वसिद्धिरित्याशंक्याह॥नचेति॥संबंधस्याभावार्थत्वान्नानुष्टेयतेत्यर्थः॥अभक्षणादिकार्यमितिविधिपरत्वमेवनिषेधवाक्यस्य
किन्नस्यादित्याशंक्याह॥नचेति॥तस्यापिकार्यार्थत्वेविधिनिषेधभेदभंगान्नञश्चस्वसंबंध्यभावबोधेनमुख्यस्यार्थांतरेवृत्तौलक्षणापातान्निषिद्धवि
षयेरागादिनाप्रवृत्तक्रियावतोनिषेधशास्त्रार्थधीसंस्कृतस्यनिषेधश्रुतेरकरणात्प्रसक्तक्रियानिवृत्युपलक्षितादौदासीन्यादन्यदनुष्टेयंनप्रतिभाती
त्यर्थः॥भावविषयंकर्त्तव्यत्वंविधीनामर्थोऽभावविषयंतुनिषेधानामितिविशेषमाशंक्याह॥अकर्त्तव्यतेति॥अभावस्यभावार्थत्वाभावात्कर्त्तव्यताविषयत्वा

इदंवाक्यममकलंजभक्षणाभावंद्योतयति=४

प्रतिषेधज्ञानवतोपि कलंजभक्षणादिज्ञानदर्शनात्तन्निवृत्तेर्नियोगाधीनत्वात्तन्निष्ठमेव वाक्यमेष्टव्यमिति चेन्नेत्याह॥ क्षुधार्त्तस्येति॥ विषलिप्तबा णहतस्य पशोर्मांसं कलंजं ब्रह्मवधाद्यभिशापयुक्तस्यान्नपानादि तस्मिन्नभक्ष्येऽभोज्ये च प्राप्ते यद्भक्ष्यमज्ञानं क्षुत्क्षामस्योत्पन्नं तन्निषेधधीसंस्कृत स्यतद्धीस्मृत्या बाध्यमित्यत्र लौकिकदृष्टांतमाह॥ मृगतृष्णिकायामिति॥ तथापि प्रवृत्त्यभावसिद्धये विधिरर्थ्यतामिति चेन्नेत्याह॥ तस्मिन्निति॥ तदभावः प्रवृत्त्यभावो न विधिजन्यप्रयत्नसाध्यो निमित्ताभावेनैव सिद्धेरित्यर्थः॥ दृष्टांतमुपसंहरति॥ तस्मादिति॥ दार्ष्टांतिकमाह॥ त

क्षुधार्त्तस्य प्रतिषेधज्ञानसंस्कृतस्याभक्ष्येऽभोज्ये वा प्रत्युपस्थिते कलंजाभिशस्तान्नादाविदं भक्ष्यमदो भोज्यमिति वाऽज्ञानमुत्पन्नं तद्विषयया प्रतिषेधज्ञानस्मृत्या बाध्यते मृगतृष्णिकायामिव पेयज्ञानं तद्विषयया यथात्म्यज्ञानेन तस्मिन्बाधिते स्वाभाविकविपरीतज्ञाने ऽनर्थकरीतद्भक्षणभोजनप्रवृत्तिर्न भवति विपरीतज्ञाननिमित्तप्रवृत्तेर्निवृत्तिरेव न पुनर्यत्नः कार्यः तदभावे तस्मात्प्र तिषेधविधीनां वस्तुयाथात्म्यज्ञाननिष्ठत्वेन पुरुषव्यापारनिष्ठतागंधोप्यस्ति तथेहापि परमात्मादियाथात्म्यज्ञानविधीनां तावन्मात्रपर्यवसानत्वं स्यात्॥ तथा तद्विज्ञानसंस्कृतस्य तद्विपरीतार्थज्ञाननिमित्तानां प्रवृत्तीनामनर्थार्थत्वेन ज्ञायमानत्वात्परमात्मा दियाथात्म्यज्ञानस्मृत्या स्वाभाविके तन्निमित्तविज्ञाने बाधिते ऽभावः स्यात्॥ थेति॥ न केवलं तत्त्वमस्यादिवाक्यानां सिद्धवस्तुमात्रपर्यवसा नता किंतु सर्वकर्मनिवर्त्तकत्वमपि सिध्यतीत्याह॥ तथेति॥ अकर्त्रभोक्तृब्रह्माहमिति ज्ञानसंस्कृतस्य प्रवृत्तीनामभावः स्यादिति संबंधः तस्माद्ब्र ह्मभावाद्विपरीतोर्थो यस्य कर्तृत्वादिज्ञानस्य तन्निमित्तानामनर्थार्थत्वेन ज्ञायमानत्वादिति हेतुः॥ कदा पुनस्तासामभावः स्यादत आह॥ परमात्मा दीति॥ भ्रांतिप्राप्तभक्षणादिनिरासेन निवृत्तिनिष्ठतया निषेधवाक्यस्य मानत्ववत्तत्त्वमादेरपि प्रत्यग्ज्ञानोत्थकर्तृत्वादिनिवर्त्तकत्वेन मानत्वोपप

दृष्टांतदार्ष्टांतिकयोर्वैषम्यमाशंकते नन्विति॥ तस्य निषिद्धत्वादनर्थार्थत्वमेव यद्वस्तुयाथात्म्यं तज्ज्ञानेन निषेधे कृते तत्संस्कारद्वारा संपादित
स्मृत्या शास्त्रीयज्ञानेन विपरीतज्ञाने बाधिते तत्कार्यप्रवृत्त्यभावो निमित्ताभावे नैमित्तिकाभावन्यायेन युक्तो न तथाग्निहोत्रादिप्रवृत्त्यभावो युक्तो
ब्रह्मविदाग्निहोत्रादि न कर्तव्यमिति निषेधानुपलंभादित्यर्थः॥ तत्त्वमस्यादिवाक्येनार्थान्निषिद्धमग्निहोत्रादीति मन्वानः साम्यमाह॥ नेत्यादिना
शास्त्रीयप्रवृत्तीनां गर्भवासादिहेतुत्वादनर्थार्थत्वमहं कर्तेत्याद्यभिमानकृतत्वेन विपरीतज्ञाननिमित्तत्वमेतदेव दृष्टांतावष्टंभेन स्पष्टयति॥ कलंजे

ननु कलंजादिभक्षणादेरनर्थार्थत्वेन वस्तुयाथात्म्यज्ञानस्मृत्या स्वाभाविके तद्भक्षणत्वादिविपरीतज्ञाने निवर्तिते तद्भक्षणाद्यनर्थप्रवृत्त्य
भाववत् प्रतिषेधविषयत्वाच्छास्त्रविहितप्रवृत्त्यभावो न युक्त इति चेत्॥ न विपरीतज्ञाननिमित्तत्वानर्थार्थत्वाभ्यां तुल्यत्वात् कलंजभक्षणा
दिप्रवृत्तेर्मिथ्याज्ञाननिमित्तत्वमनर्थार्थत्वं च यथा तथा शास्त्रविहितप्रवृत्तीनामपि॥ तस्मात्परमात्मयाथात्म्यविज्ञानवतः शास्त्रविहित
प्रवृत्तीनामपि मिथ्याज्ञाननिमित्तत्वेनानर्थार्थत्वेन च तुल्यत्वात्परमात्मज्ञानेन विपरीतज्ञाने निवर्तिते युक्त एवाभावो ननु तत्र युक्तो नित्या
नां तु केवलशास्त्रनिमित्तत्वादनर्थार्थत्वाभावाच्चाभावो न युक्त इति चेन्नाविद्यारागद्वेषादिदोषवतो विहितत्वात्॥ यथा स्वर्गका
मादिदोषवतो दर्शपूर्णमासादीनि काम्यानि कर्माणि विहितानि तथा सर्वानर्थबीजाविद्यादिदोषवतः तज्जनितेष्टानिष्टप्राप्तिपरि
हाररागद्वेषादिदोषवतश्च ति॥ काम्यानामज्ञानहेतुत्वानर्थार्थत्वाभ्यां विदुषस्तेषु प्रवृत्त्यभावो युक्तो नित्यानां तु शास्त्रमात्रप्रयुक्तानुष्ठान
त्वान्नाज्ञानकृतत्वं प्रत्यवायाख्यानर्थध्वंसित्वाच्च नानर्थकत्वं अतस्तेषु प्रवृत्त्यभावो युक्तो न भवतीति शंकते॥ नन्विति॥ नित्यानां शास्त्रमात्रकृता
नुष्ठानत्वमसिद्धमिति परिहरति नेत्यादिना तदेव प्रपंचयति॥ यथेति॥ अविद्यादीत्यादिशब्देनास्मितादिचतुष्टयोक्तिः ॥

कर्मस्वरूपमात्रबोधकोविधिरुत्पत्तिविधिर्यथाग्नेयोष्टाकपालोभवति॥ अंगसंबंधबोधकोविधिर्नियोगविधिः॥ यथादध्नाजुहोतीति प्रयोगप्राशुभवबोधकोविधिः॥ प्रयोगविधिः अवि
लंबापरपर्यायंप्रयोगप्राशुभावंविधत्ते॥ सचांगवाक्यैकवाक्यतामापन्नः प्रधानविधिरेव॥ सचसांगंप्रधानमनुष्ठापयत्॥ विलंबेप्रमाणाभावात्॥ अविलंबापरपर्यायंप्राशुभा
वंविधत्ते॥ यथावेदंकृत्वावेदिंकरोतीत्यादि॥ फलविशेषसंबंधबोधकोविधिरधिकारविधिः॥ यथादर्शपौर्णमासाभ्यांस्वर्गकामोयजेतेति॥ तथाहि फलस्वाम्यबोधकोवि
धिरधिकारविधिः॥ फलस्वाम्यंचकर्मजन्यफलभोक्तृत्वंसचयजेतस्वर्गकामइत्येवंरूपः = ३ निमित्त

तैरविद्यादिभिर्जनितेष्टप्राप्तौतादृगनिष्टाप्राप्तौचक्रमेणरागद्वेषवतः पुरुषस्येष्टप्राप्तिमनिष्टपरिहारंचवांछतस्ताभ्यामेवरागद्वेषाभ्यामिष्टंमेभूयादनिष्टं
माभूदित्यविशेषकामनाभिप्रेरिताविशेषप्रवृत्तियुक्तस्यनित्यानिविधीयंते स्वर्गकामः पशुकामइतिविशेषार्थिनः काम्यानितुल्यंतूभयेषांकेवलशास्त्र
निमित्तत्वमित्यर्थः॥ किंच॥ काम्यानांदुष्टत्वंब्रुवतानित्यानामपितद्दिष्टमुत्पत्तिविनियोगप्रयोगाधिकारविधिरूपेविशेषाभावादित्याह॥ नचेति॥

तत्प्रेरिताविशेषप्रवृत्तेरिष्टानिष्टप्राप्तिपरिहारार्थिनोनित्यानिकर्माणिविधीयंतेनकेवलंशास्त्रविहितान्येव॥ नचाग्निहोत्रदर्शपूर्ण
मासचातुर्मास्यपशुबंधसोमानांकर्मणांस्वतः काम्यनित्यत्वविवेकोस्तिकर्तृगतेनहिस्वर्गादिकामदोषेणकामार्थतातथाऽविद्यादि
दोषवतः स्वभावप्राप्तेष्टानिष्टप्राप्तिपरिहारार्थिनस्तदर्थान्येवनित्यानीतियुक्तंतंप्रतिविहितत्वात्॥ नपरमात्मयाथात्म्यविज्ञानवतः
शमोपायव्यतिरेकेणकिंचित्कर्मविहितमुपलभ्यते

कथंतर्हिकाम्यनित्यविभागस्तत्राह॥ कर्तृगतेनेति॥ स्वर्गकामः पशुकामइतिविशेषार्थि
नः काम्यविधिरिष्टंमेस्यादनिष्टंमाभूदित्यविशेषकामप्रेरिताविशेषितप्रवृत्तिमतोनित्यविधिरित्युक्तमित्यर्थः॥ नन्वविद्यादिदोषवतोनित्यानिक
र्माणीत्ययुक्तंपरमात्मज्ञान वतोपियावज्जीवश्रुतेस्तेषामनुष्टेयत्वादित्याशंक्यश्रुतेरविरक्तविषयत्वान्नैवमित्याह॥ नपरमात्मेतियोगारूढस्य
तस्यैवशमः कारणमुच्यतइतिस्मृतेः ज्ञानपरिपाककारणंकर्मोपशमएवप्रतीयतेनतथाकर्मविधिरित्यर्थः॥ नकेवलंविहितंनोपलभ्यतेनसंभवति

॥ टी० ९॥

कर्मनिमित्तेति॥ यदानासित्वंसंसारीकिंत्वकर्त्रभोक्तृब्रह्मासीतिश्रुत्याज्ञाप्यतेतदादेवतायाःसंप्रदानत्वंकरणत्वंव्रीह्यादेरित्येतत्सर्वमुपमर्दि
तंभवति॥ तत्कथमकर्त्रादिज्ञानवतःसंभवतिकर्मविधिरित्यर्थः उपमर्दितमपिवासनावशादुद्भविष्यतिततश्चविदुषोपिकर्मविधिःस्यादित्या
शंक्याह॥ नचेति॥ वासनावशादुद्भूतस्याभासत्वादात्मस्मृत्यापुनःपुनर्बाधाच्चविदुषोनकर्मप्रवृत्तिरित्यर्थः॥ किंच अनवच्छिन्नंब्रह्मास्मीतिस्म
रतस्तदात्मकस्यदेशादिसापेक्षंकर्मनिरवकाशमित्याह॥ नहीति॥ विदुषोभिक्षाटनादिवत्कर्मावसरःस्यादितिशंकते॥ भोजनादीति॥ अपरोक्षज्ञा

कर्मनिमित्तदेवतादिसर्वसाधनविज्ञानोपमर्देनह्यात्मज्ञानंविधीयते॥ नचोपमर्दितक्रियाकारकादिविज्ञानस्यकर्मप्रवृत्तिरुपपद्य
तेविशिष्टक्रियासाधनादिज्ञानपूर्वकत्वात्क्रियाप्रवृत्तेर्नहिदेशकालाद्यनवच्छिन्नास्थूलाद्व्यादिब्रह्मप्रत्ययधारिणःकर्मावसरोस्ति॥
भोजनादिप्रवृत्त्यवसरवत्स्यादितिचेत् न अविद्यादिकेवलदोषनिमित्तत्वाद्भोजनादिप्रवृत्तेरावश्यकत्वानुपपत्तेः॥ ननुतथाऽनियतंक
दाचित्क्रियतेकदाचिन्नक्रियतेचेतिनित्यंकर्मोपपद्यतेकेवलदोषनिमित्तत्वात्तुभोजनादिकर्मणोऽनियतत्वंस्याद्दोषोद्भवाभिभवयोरनि
यतत्वात्कामानामिवकाम्येषु॥ शास्त्रनिमित्तकालाद्यपेक्षत्वाच्चनित्यानामनियतत्वानुपपत्तिर्दोषनिमित्तत्वेसत्यपियथाकाम्याग्निहोत्रस्य
शास्त्रविहितत्वात्सायंप्रातःकालाद्यपेक्षत्वमेवं॥ नवतोवापरोक्षज्ञानवतोवाभोजनादिप्रवृत्तिर्नाद्योनभ्युपगमात्तस्यप्रतीतेर्बाधितानुवृत्तिमात्रत्वादग्नि
होत्रादेरबाधिताभिमाननिमित्तस्यतथात्वानुपपत्तेरित्यभिप्रेत्याह॥ नेति॥ नद्वितीयः॥ परोक्षज्ञानिनःशास्त्रानपेक्षक्षुत्पिपासादिदोषकृतत्वात्तत्प्रवृत्तेरि
ष्टत्वादित्याह॥ अविद्यादीति॥ अग्निहोत्राद्यपितथास्यादितिचेन्नेत्याह॥ नत्विति॥ भोजनादिप्रवृत्तेरावश्यकत्वानुपपत्तिंविवृणोति॥ केवलेति॥ ननुतथे
त्यादिप्रपंचयति॥ शास्त्रनिमित्तेति॥ तर्हिशास्त्रविहितकालाद्यपेक्षत्वान्नित्यानामदोषप्रभवत्वंभवेदित्याशंक्याह॥ दोषेति॥ एवंदोषकृतत्वेपिनित्यानांशा

शास्त्रविहितकालाद्यपेक्षत्वमेव [illegible]॥

एवमिति॥ भोजनादेर्दोषकृतत्वेपि चातुर्वर्ण्यं चरेद्भैक्ष्यं यतीनां तु चतुर्गुणमित्यादिनियमवद्विदुषोग्निहोत्रादिनियमोपिस्यादिति शंकते॥ तद्भोजना
दीति॥ विदुषो नास्ति भोजनादिनियमोतिक्रांतविधित्वात्॥ नचैतावतायथेष्टचेष्टापत्तिरधर्माधीनाऽविवेककृताहिंसा न तौ विदुषो विद्येतेऽतोऽ
विद्यावस्थायामप्यसतीयथेष्टचेष्टाविद्यादशायां कुतः स्यात्तत्संस्कारस्याप्यभावाद्बाधितानुवृत्तेश्चाग्निहोत्रादेस्तन्नाभासत्वान्नबाधितानुवृत्तिरि
त्याह॥ नेति॥ किंच॥ अविदुषां विविदिषूणामेव नियमस्तेषां विधिनिषेधगोचरत्वान्नचतेषामप्येषज्ञानोदयपरिपंथीतस्यान्यनिवृत्तिरूपस्य
स्वयंक्रियात्वाभावान्नापिसक्रियामाक्षिपत्ब्रह्मविद्यांप्रतिक्षिपति॥ अन्यनिवृत्त्यात्मनस्तदाक्षेपकत्वासिद्धेरित्याह॥ नियमस्येति॥ कर्मसुरागादि

तद्भोजनादिप्रवृत्तौ नियमवत्स्यादिति चेन्न॥ नियमस्याक्रियात्वात् क्रियायाश्चाप्रयोजकत्वात्॥ नासौ ज्ञानस्यापवादकः स्यात्
स्मात्परमात्मयाथात्म्यज्ञानविधेरपि तद्विपरीतस्थूलदेहादिज्ञाननिवर्त्तकत्वात्सामर्थ्यात्सर्वकर्मप्रतिषेधविषयार्थत्वं संप
द्यते कर्मप्रवृत्त्यभावस्यतुल्यत्वात् यथाप्रतिषेधविषये

मतोधिकाराद्बहिरक्तस्यज्ञानाधिकारात्ज्ञानिनो हेत्वभावादेव कर्माभावात्तस्य
भोजनाद्यतुल्यत्वात्तत्त्वमादेः सर्वव्यापारोपरमात्मकज्ञानहेतोर्निवर्त्तकत्वेन प्रामाण्यं प्रतिपादितमुपसंहरति॥ तस्मादिति॥ तस्य विधिरूपपादकं
वाक्यं तस्य निषेधवाक्यवत्तत्त्वज्ञानहेतोस्तद्विरोधिमिथ्याज्ञानध्वंसित्वादशेषव्यापारनिवर्त्तकत्वेन कूटस्थवस्तुनिष्ठस्य युक्तं प्रामाण्यं मिथ्याज्ञान
ध्वंसे हेत्वभावे फलाभावन्यायेन सर्वकर्मनिवृत्तेरित्यर्थः॥ तत्र दोषांतं हेतुमेव स्पष्टयति॥ कर्मप्रवृत्तीति॥ यथाप्रतिषेध्येभक्षणादौ प्रतिषेधशास्त्र
वशात्प्रवृत्त्यभावस्तथा तत्त्वमस्यादिवाक्यसामर्थ्यात्कर्मस्वपि प्रवृत्त्यभावस्य तुल्यत्वात्प्रामाण्यमपि तुल्यमित्यर्थः प्रतिषेधशास्त्रसाम्येतत्त्वमस्यादि
शास्त्रस्योच्यमाने तथैव निवृत्तिनिष्ठत्वं स्यान्न वस्तुप्रतिपादकत्वमित्याशंक्याह॥

तस्मादिति॥ प्रतिषेधो हि प्रसक्तक्रियां निवर्त्तयंस्तदुपलक्षितौदासीन्यात्मके वस्तुनि पर्यवस्यति तथा तत्त्वमस्यादिवाक्यस्यापि वस्तुप्रतिपादकत्वमविरुद्धमित्यर्थः वेदांतानां सिद्धे प्रामाण्यवदर्थवादादीनामन्यपराणामपि संवादविसंवादयोरभावे स्वार्थे मानत्वसिद्धौ सिद्धा विशुध्यादिगुणवती प्राणदेवतेति चकारार्थः॥१॥ ज्ञानमिह परीक्ष्यमाणमित्येतत्प्रसंगागतं विचारं परिसमाप्य ते ह वाचमित्यादि व्याचष्टे॥ ते देवा इति॥ अचेतनाया वाचो नियोज्यत्वं वारयति वागभिमानिनीमिति॥ नियोक्तृणां देवानामभिप्रायमाह॥ वाग्देवतेति॥ नन्वौद्गात्रं कर्म जपमंत्रप्रकाश्या देवता निर्वर्त्तयिष्यति न तु वाग्देवतेति तत्राह॥ तामेवेति॥ असतो मा सद्गमयेति जपमंत्राभिधेयां दृष्टवंत इति पूर्वेण संबंधः॥ वागाद्याश्रयं कर्तृत्वादि दर्शय-

तस्मात्प्रतिषेधविधिवच्च वस्तुप्रतिपादनं तत्परत्वं च सिद्धं शास्त्रस्य॥१॥ ते देवाः ह एवं विनिश्चित्य वाचं वागभिमानिनीं देवतामूचुरुक्तवंतः त्वं नोऽस्मभ्यमुद्गाय औद्गात्रं कर्म कुरुष्व वाग्देवतानिर्वर्त्यमौद्गात्रं कर्म दृष्टवंतस्तामेव च देवतां जपमंत्राभिधेयां असतो मा सद्गमयेति अत्र चोपासनायाः कर्मणश्च कर्तृत्वेन वागादय एव विवक्ष्यंते॥ कस्मात्॥ यस्मात्परमार्थतस्तत्कर्तृकस्तद्विषय एव च सर्वो ज्ञानकर्मसंव्यवहारो वक्ष्यति हि ध्यायतीव लेलायतीवेत्यात्मकर्तृकत्वाभावं विस्तरतः षष्ठे

तोऽर्थवादस्य प्रासंगिकं तात्पर्यमाह॥ अत्र चेति॥ आत्माश्रयकर्तृत्वादाववभासने तस्य वागाद्याश्रयत्वभासनमयुक्तमित्याह॥ कस्मादिति॥ परस्य जीवस्य वा कर्तृत्वादि विवक्षितमिति विकल्प्याद्यं दूषयति॥ यस्मादिति॥ विचारदशायां वागादिसंघातस्य क्रियादिशक्तिमत्त्वात्कर्तृत्वादिस्तदाश्रयो यस्मात्प्रतीतस्तस्मात् परस्यात्मनः स्वतस्तच्छक्तिशून्यस्य न तदाश्रयत्वमित्यर्थः किंचाविद्याश्रयः सर्वो व्यवहारो न तद्धीने परस्मिन्नवतरतीत्याह॥ तद्विषयेति॥ कर्त्ता शास्त्रार्थवत्त्वादिति न्यायेन कर्तृत्वमात्मनोंगीकर्त्तव्यमित्याशंक्य यथा च तक्षोभयथेति न्यायादौपाधिकं तस्मिन् कर्तृत्वमभिप्रेत्याह॥ वक्ष्यति हीति॥ यदुक्तमविद्याविषयः सर्वो व्यवहार इति तत्र

इहापीति॥इतश्चपरस्मिन्नात्मनिकर्तृत्वादिव्यवहारोनास्तीत्याह॥अव्याकृतात्विति॥अनामरूपकमीत्मकमित्यस्मादुपरिष्टात्तत्पदमध्याहर्त्तव्यंपृथ
गविद्याविषयत्वात्क्रियाकारकफलजातादितिशेषः॥माभूत्परमात्माकर्तृत्वाद्याश्रयोजीवस्तुस्यादितिद्वितीयमाशंक्याह॥यस्त्विति॥जीवश
ब्दवाच्यस्यविशिष्टस्यकल्पितत्वान्नतात्विकंकर्तृत्वादिकंकिंतुतद्द्वारास्वरूपेसमारोपितमितिभावः॥आत्मनितात्विककर्तृत्वाद्यभावेफलितम

इहापिचाध्यायांतेउपसंहरिष्यत्यव्याकृतादिक्रियाकारकफलजातंत्रयंवाइदंनामरूपंकर्मेत्यविद्याविषयमव्याकृतात्तुयत्परंपरमा
त्माख्यंविद्याविषयंअनामरूपकमीत्मकंनेतिनेतीतरप्रत्याख्यानेनोपसंहरिष्यतिपृथक्॥यस्तुवागादिसमाहारोपाधिपरिकल्पितः
संसार्यात्मातंचवागादिसमाहारपक्षपातिनमेवदर्शयिष्यतिएतेभ्योभूतेभ्यःसमुत्थायतान्येवानुविनश्यतीति॥तस्माद्युक्तावागादीनामे

तेहवाचमूचुस्त्वंनउद्गायेतितथेतितेभ्योवागुदगायद्योवाचिभोग

वज्ञानकर्मकर्तृत्वफलप्राप्तिविवक्षा॥तथेति॥तथात्वितिदेवैरुक्तावाक्तेभ्योऽर्थिभ्योर्थायोदगायत्॥उद्गानंकृतवतीकः पुनरसौदेवेभ्योर्था
यउद्गानकर्मणावाचानिर्वर्त्तितःकार्यविशेषइत्युच्यतेयोवाचिनिमित्तभूतायांवागादिसमुदायस्ययउपकारोनिष्पद्यतेवदनादिव्यापारेणस
एव

र्थवादतात्पर्यमुपसंहरति॥तस्मादिति॥तात्पर्यमर्थवादस्योक्तानियुक्तयावाग्देवतयायत्कृतंतदुपन्यस्यति॥तथेत्यादिना॥उद्गातृत्वंजपमंत्र
प्रकाश्यत्वंचात्मनोंगीकृत्यवागुद्गानेप्रवृत्ताचेत्तयाकश्चिदुपकारोदेवानामुद्गानेननिर्वर्त्तनीयःसचनास्तीतिशंकते॥कः पुनरिति॥वदनादिव्यापारेसतियः
सुखविशेषःसंघातस्यनिष्पद्यतेसएवकार्यविशेषइत्याह॥उच्यतइति॥योवाचीतिप्रतीकमादायव्याख्यायते॥कथंपुनर्वाचोवचनंचक्षुषोदर्शनमित्यादि

बृ·र·
३३

भा·

सर्वेषामिति॥ किंच॥ देवार्थमुद्गायंस्त्वावाचःस्वार्थमपिकिंचिदुद्गानमस्तितथाचज्योतिष्टोमेद्वादशस्तोत्राणितत्रत्रिषुपवमानाख्येषुस्तोत्रेषुयाजमानंफल
मुद्गानेनकृत्वाविशिष्टेषुनवसुस्तोत्रेषुयत्कल्याणवदनसामर्थ्यंतदात्मनेस्वार्थमेवाऽगायदित्याह॥ तंभोगमिति॥ ऋत्विजांक्रीतत्वान्नफलसंबंधःसंभ
सतिसामत्वेगीतिभावावस्थायांप्राणस्योक्तंबाह्यमांतरंचसौस्वर्यंसौवर्णमितिगुणद्वयमनुवदति॥ममेति॥तस्यैववैकल्पिकींप्रतिष्ठामुक्तामनु
स्मारयति॥गीतीति॥यद्वेवेत्यादिनोक्तंपरामृशति॥एवंगुणोहमिति॥इत्येवमभिमानाभिव्यक्तिपर्यंतंयोध्यायतितस्येदंफलमित्युपसंहरति॥

इति॥२८॥तृतीयेपंचकाणं॥३॥

ब्राह्मणांतरमवतार्यसंबंधंवक्तुंवृत्तंकीर्त्तयति॥आत्मैवेत्यादिनाकेवलप्राणदर्शनेनचप्रजापतित्वप्राप्तिर्व्याख्यातेतिसंबंधः॥इदानीमात्मेत्या
देरत्त इदमित्यतः प्राक्तनग्रंथस्यापाततस्तात्पर्यमाह॥प्रजापतेरिति॥आदिपदेनसर्वात्मत्वादिगृह्यतेफलोत्कर्षापवर्णनंकुत्रोपयुज्यतेतत्राह
॥तेनचेति॥कर्मकांडपदेनपूर्वग्रंथोपिसंगृहीतः फलातिशयोहेत्वतिशयापेक्षोऽन्यथाकस्मिकत्वापातादतोज्ञानकर्मफलभूतसूत्रविभूतिरुच्य
मानाज्ञानकर्मणोर्महत्वंदर्शयतीत्याह॥सामर्थ्यादिति॥आपातिकतात्पर्यमुक्त्वापरमतात्पर्यमाह॥विवक्षितंत्विति॥किंच॥विमतंसंसारांतर्भूतं

आत्मैवेदमग्रआसीत्॥ज्ञानकर्मभ्यांसमुच्चिताभ्यांप्रजापतित्वप्राप्तिर्व्याख्याताकेवलप्राणदर्शनेनचतदेतल्लोकजिदेवेत्यादिनाप्रजा
पतेः फलभूतस्यसृष्टिस्थितिसंहारेषुजगतः स्वातंत्र्यादिविभूत्युपवर्णनेनज्ञानकर्मणोर्वैदिकयोः फलोत्कर्षोवर्णयितव्यइत्येवमर्थ
मारभ्यते तेनचकर्मकांडविहितज्ञानकर्मस्तुतिः कृताभवेत्सामर्थ्याद्विवक्षितंत्वेतत्सर्वमप्येतत्ज्ञानकर्मफलंसंसारएव॥भयारत्या
दियुक्तत्वश्रवणात्कार्यकारणलक्षणत्वाच्चस्थूलव्यक्तानित्यविषयत्वाच्चेति॥ब्रह्मविद्यायाः केवलायाः वक्ष्यमाणायामोक्षहेतुत्वमित्युत्त
रार्थंचेति॥नहिसंसारविषयात्साध्यसाधनादिभेदलक्षणाद्विरक्तस्यात्मैकत्वज्ञानविषयेऽधिकारोऽतृषितस्येवपाने

कार्यकारणात्मत्वा
दस्मदादिकार्यकारणवदित्याह॥कार्येति॥प्राजापत्यपदस्यसंसारांतर्भूतत्वेहेत्वंतरमाह॥स्थूलेति॥स्थूलत्वंसाधयति व्यक्तेतिअनित्यत्वाद्दृश्यत्वाच्च प्र
जापतित्वंसंसारांतर्गतमित्याह॥अनित्येति॥इतिशब्दोविवक्षितार्थसमाप्त्यर्थः॥किमित्येतद्विवक्षितमुपवर्ण्यतेतत्राह॥ब्रह्मविद्याया इति॥तच्चेदंविव
क्षितार्थवचनमेकाकिन्याविद्यायावक्ष्यमाणायाःमुक्तिहेतुत्वमित्युत्तरार्थमितिद्रष्टव्यं॥यदाहिकर्मज्ञानफलंप्रजापतित्वंसंसारइत्युच्यतेतदातस्यैता
त्सर्वस्मात्तस्माद्विरक्तस्यवक्ष्यमाणविद्यायामधिकारःसेत्स्यतीत्यर्थः॥अथयपसकस्यचिदर्थितामात्रेणतत्राधिकारसंभवाद्वैराग्यंनमृग्यमित्याशंक्याह

संसार एव विषयः संसारविषयः ज्ञानमेव विषयः ज्ञानविषयः = १

उभयत्रापि विषयशब्दः पूर्वेण समानाधिकरणः॥ विवक्षितमर्थमुपसंहरति॥ तस्मादिति॥ वैराग्यमंतरेण ज्ञानानधिकारात्ज्ञानादिफलस्य प्रजापतित्व-
स्योत्कर्षवतः संसारत्ववचनं ततो विरक्तस्य वक्ष्यमाणविद्यायामधिकारार्थं विरक्तस्य विद्याधिकारे मोक्षादपि वैराग्यं स्यादित्याशंक्याह॥ तथा
चेति॥ ननु मोक्षार्थं विद्यायां प्रवर्त्तितव्यं मोक्षस्यापुरुषार्थत्वान्न प्रेक्षावता प्रार्थ्यते तत्राह॥ तदेतदिति॥ आपातिकमनापातिकं च तात्पर्यमुक्त्वा
प्रतीकमादायाक्षराणि व्याकरोति॥ आत्मैवेति॥ तस्याश्वमेधाधिकारे प्रकृतत्वं सूचयति॥ अंडज इति॥ पूर्वस्मिन्नपि ब्राह्मणे तस्य प्रस्तुतत्वम

तस्माज्ज्ञानकर्मफलोत्कर्षोपवर्णनमुत्तरार्थं॥ तथा च वक्ष्यति तदेतत्पदनीयमस्य तदेतत्प्रेयः पुत्रादित्यादि आत्मैव आत्मेति
प्रजापतिः प्रथमजोंडजः शरीर्यभिधीयते वैदिकज्ञानकर्मफलभूतः स एव किं इदं शरीरभेदजातं॥ तेन प्रजापतिशरीरेणावि

हरिः ॐम्॥ आत्मैवेदमग्र

भक्तमात्मैवासीदग्रे प्राक्छरीरांतरोत्पत्तेः स च पुरुषविधः पुरुषप्रकारः शिरःपाण्यादिलक्षणो विराट् स एव प्रथमः संभूतः अनुवीक्ष्या
न्वालोचनं कृत्वा कोऽहं किंलक्षणो वास्मीति नान्यद्वस्त्वंतरमात्मनः प्राणपिंडात्मकात्कार्यकारणरूपान्नापश्यन्न ददर्श

स्तीत्याह॥ वैदिकेति॥
स एवासीदिति संबंधः॥ स्थित्यवस्थायामपि प्रजापतिरेव समष्टिदेहस्तद्व्यष्ट्यात्मना तिष्ठतीति विशेषासिद्धिरित्याशंक्याह॥ तेनेति॥ आत्मशब्देन प
रस्यापि ग्रहसंभवे किमिति विराडेवोपादीयत इत्याशंक्य वाक्यशेषादित्याह॥ स चेति॥ वक्ष्यमाणमन्वालोचनादि विराडात्मकर्त्तृकमेवेत्याह॥ स एवेति
स्वरूपधर्मविषयौ द्वौ विमर्शौ नान्यदिति वाक्यमादायाक्षराणि व्याचष्टे॥ वस्त्वंतरमिति॥ दर्शनशक्त्यभावादेव वस्त्वंतरं प्रजापतिर्न दृष्टवानित्याशंक्याह॥

केवलंत्वेति॥सोहमित्यादिव्याचष्टे॥तथेति॥यथासर्वात्माप्रजापतिरहमितिपूर्वस्मिन्जन्मनिश्रौतेनविज्ञानेनसंस्कृतोविराडात्मातथेदानीमपिफलावस्थः सोहंप्रजापतिरस्मीतिप्रथमंव्याहृतवानितियोजनाव्याहरणफलमाह॥ततइति॥किमितिप्रजापतेरहमितिनामोच्यतेसाधारणंह्येदंसर्वेषामित्याशंक्योपासनार्थमित्याह॥तस्येति॥आध्यात्मिकस्यचास्मुषस्यपुरुषस्याहमितिरहस्यंनामेतियतोवक्ष्यत्यतः श्रुतिसिद्धमेवैतन्नामास्यध्या

केवलंत्वात्मानमेवसर्वात्मानमपश्यत्तथापूर्वजन्मश्रौतविज्ञानसंस्कृतः सोहंप्रजापतिः सर्वात्माहमस्मीत्यग्रेव्याहरद्व्याहृतवानततस्तस्माद्यतः पूर्वज्ञानसंस्कारादात्मानमेवाहमित्यभ्यधादग्रेतस्मादहंनामाभवत्तस्योपनिषदहमितिश्रुतिप्रदर्शितमेवनामवस्यति॥तस्माद्यस्मात्कारणेप्रजापतावेवंवृत्तंतस्मात्तत्कार्यभूतेषुप्राणिष्वेतर्ह्येतस्मिन्नपिकालेआमंत्रितः कस्त्वमित्युक्तः सन्नहमयमि

आसीत्पुरुषविधः सोनुवीक्ष्यनान्यदात्मनोपश्यत्सोहमस्मीत्यग्रेव्याहरत्ततोहंनामाभवत्

त्येवाग्रउक्त्वाकारणात्माभिधानेनात्मानमभिधायाग्रेपुनर्विशेषनामजिज्ञासवेऽथानंतरंविशेषपिंडाभिधानंदेवदत्तोयज्ञदत्तोवेतिप्रब्रूतेकथयतियन्नामास्यविशेषपिंडस्यमातापितृकृतंभवतितत्कथयति सचप्रजापतिरतिक्रांतजन्मनिसम्यक्कर्मज्ञानभावनानुष्ठानैः साधकावस्थायांयद्यस्मात्कर्मज्ञानभावनानुष्ठानैः प्रजापतत्वप्रतिपित्सूनांपूर्वः नार्थमिहोक्तमित्यर्थः॥प्रजापतेरहंनामत्वेलोकसिद्धिंप्रमाणयितुमुत्तरंवाक्यमित्याह॥तस्मादिति॥उपासनार्थंप्रजापतेरहंनामोक्त्वापुरुषनामनिर्वचनंकरोति॥सचेत्यादिना॥पूर्वस्मिन्जन्मनिसाधकावस्थायांकर्माद्यनुष्ठानैरहमहमिकयाप्रजापतित्वप्रेप्सूनांमध्येपूर्वोयः सम्यक्कर्मज्ञानाद्यनुष्ठानैः सर्वंप्रतिबंधकंयस्माददहत्तस्मात्सप्रजापतिः

प्रथमः सन्निति॥ सर्वस्माद्स्मात्प्रजापतित्वप्रतिपित्सुसमुदायात्प्रथमः सन्नौषदितिसंबंधः॥ आकांक्षापूर्वकं दाह्यं दर्शयति॥ किमित्यादिना॥ पूर्वं प्रजा
पतित्वप्रतिबंधकप्रध्वंसित्वे सिद्धमर्थमाह॥ यस्मादिति॥ पुरुषगुणोपासकस्य फलमाह॥ यथेति अयं प्रजापतिरितिभविष्यद्वृत्त्यासाधकोक्तिः पुरुषः प्र
जापतिरितिफलावस्थः सकथ्यते॥ कोसावोषतीत्यपेक्षायामाह॥ तं दर्शयतीति॥ पुरुषगुणप्रजापतिरहमस्मीतियोविद्यात्सोन्यानोषतीत्यर्थः॥ वि

प्रथमः सन्नस्मात्प्रजापतित्वप्रतिपित्सुसमुदायात्सर्वस्मादादावौषत अदहत्किमासंगाज्ञानलक्षणान्सर्वान्पाप्मनः प्रजापतित्वप्रति
बंधकारणभूतान्यस्मादेवं तस्मात्पुरुषः पूर्वः औषदितिपुरुषो प यथायं प्रजापतिरोषित्वाप्रतिबंधकान्पाप्मनः सर्वान्पुरुषः प्रजाप
तिरभवदेवमन्योपिज्ञानकर्मभावनानुष्टानवन्हिनाकेवलज्ञानबलाद्वौषतिभस्मीकरोतिहवैसः तं कं यः अस्माद्विदुषः पूर्वः प्रथमः प्र

तस्माद्प्येतर्ह्यामंत्रितोहमयमित्येवाग्र उक्त्वाथान्यन्नामप्रब्रूतेयदस्यभवतिसयत्पूर्वोस्मात्सर्वस्मात्सर्वान्पाप्मनऔषत्त
स्मात्पुरुष ओषतिहवैसतंयोस्मात्पूर्वोबुभूषतियएवं वेद॥१॥

जापतित्वंबुभूषतिभावितुमिच्छतितमित्यर्थः॥ तं दर्शयतिय
एवं वेदेति॥ सामर्थ्यात्ज्ञानभावनाप्रकर्षवान्॥ नन्वनर्थायप्राजापत्यप्रतिपित्सैवं विदाचेद्दह्यते॥ नैषदोषः ज्ञानभावनोत्कर्षाभावा
त्प्रथमं प्रजापतित्वप्रतिपत्त्यभावमात्रत्वाद्दाहस्योत्कृष्टसाधनः प्रथमं प्रजापतित्वं प्राप्नुवन् न्यूनसाधनोनप्राप्नोतीतिस तं दहतीत्युच्य
तेनपुनः प्रत्यक्षमुत्कृष्टसाधनेनेतरोदह्यते

द्यासाम्येकथमेषाव्यवस्थेत्याशंक्याह॥ सामर्थ्यादिति॥ हेतुसाम्येदाहकत्वानुपपत्तेस्तत्प्रकर्षवानित
रान्दहतीत्यर्थः॥ प्रसिद्धं दाहमादायचोदयति॥ नन्विति॥ तथाचतत्प्रेप्सायोगात्तदुपास्त्यसिद्धिरित्यर्थः॥ विवक्षितं दाहं दर्शयन्नुत्तरमाह॥ नैषइति॥ तदेव

वृत्तं

औपचारिकंदाहंदृष्टांतेनसाधयति॥यथेति॥आजिर्मर्यादातांसरंतिधावंतीत्याजिसृतस्तेषामितियावत्॥१॥ज्ञानकर्मफलंसौत्रंपदमुत्कृष्टत्वा
न्मुक्तिस्तदन्यमुक्त्यभावात्तद्धेतुसम्यग्धीसिद्ध्यर्थंप्रवृत्तिरनर्थिकेत्याशंक्यसोऽविभेदित्यस्यतात्पर्यमाह॥यदिदमिति॥तुष्टूषितंस्तोतुमभिप्रेत
मितियावत्॥आहविवक्षितार्थसिध्यर्थंहेतुंभयभात्कमितिशेषः॥ज्ञानकर्मफलंत्रैलोक्यात्मकसूत्रत्वमुत्कृष्टमपिसंसारांतर्भूतमेवनकैव

यथालोकेआजिसृतांयःप्रथममाजिमुपसर्पतितेनेतरेदग्धाइवापहृतसामर्थ्याभवंतितद्वत्॥१॥यदिदंतुष्टूषितंकर्मकांडविहि
तज्ज्ञानकर्मफलंप्राजापत्यलक्षणंनैवतत्संसारविषयमत्यक्रामदितीसमर्थंप्रदर्शयिष्यन्नाह॥सोऽविभेत्॥सप्रजापतिः॥योऽयंप्रथ

सोऽबिभेत्तस्मादेकाकीबिभेतिसहायमीक्षांचक्रेयन्मदन्यन्नास्तिकस्मान्नुबिभेमीतितत‌एवास्यभयंवीयाय

मःशरीरीपुरुषविधोव्याख्यातःसःअविभेत्॥भीतवानस्मदादिवदेवेत्याह॥यस्मादयंपुरुषविधःशरीरकरणवानात्मनाशवि
परीतदर्शनवत्त्वादबिभेत्तस्मात्तत्सामान्यादद्यत्वेऽप्येकाकीबिभेति॥किंच॥अस्मदादिवदेवभयहेतुविपरीतदर्शनापनोदकारणं
यथाभूतार्थदर्शनं॥सोऽयंप्रजापतिरीक्षामीक्षणंचक्रेकृतवान्सहकथमित्याह॥

त्यमितिवक्तुमुत्तरवाक्यमित्यर्थः॥अहमेकाकीकोऽपिमां
हनिष्यतीत्यात्मनाशविषयविपरीतज्ञानवत्त्वात्प्रजापतिर्भीतवानित्यत्रकिंप्रमाणमित्याशंक्यकार्यगतेनलिंगेनकारणेप्रजापतौतदनुमेयमि
त्याह॥यस्मादिति॥तत्सामान्यादेकाकित्वाविशेषादितियावत्॥प्रजापतेःसंसारांतर्भूतत्वेहेत्वंतरमाह॥किंचेति॥यथास्मदादिभीरज्जुस्थाण्वादौ
सर्पपुरुषादिभ्रमजनितभयनिवृत्तयेविचारेणतत्त्वज्ञानंसंपाद्यते॥तथाप्रजापतिरपिभयस्यतद्धेतोश्चविपरीतधियोध्वस्तिहेतुंतत्त्वज्ञानंविचार्यसंपादि
तं॥४

परमार्थदर्शनमेवप्रश्नपूर्वकं विशदयति॥कथमित्यादिना॥तस्मिन्नित्यत्रतस्मादित्यादौपठितव्यंमकुब्दोपलक्षितंप्रत्यक्षैतन्यमद्वितीयब्रह्मरू
पेणज्ञात्वासहेतुभीतिंप्रजापतिरासिपतीत्युक्तं॥इदानींतत्वज्ञानफलमाह॥ततइति॥कस्माद्धीत्यादेरुत्तरस्यपूर्वेणपौनरुक्त्यमित्याशंक्यविदुषो
हेत्वभावान्नभयमित्युक्तसमर्थनार्थत्वादुत्तरस्यनैवमित्याह॥तस्येत्यादिना॥अनुपपत्तौहेतुमाह॥यस्मादिति॥परमार्थदर्शनेपिवस्त्वंतरात्किमिति
भयंनभवतीत्याशंक्याह॥द्वितीयंचेति॥अन्वयव्यतिरेकाभ्यांद्वैतस्याविद्याप्रत्युपस्थापितत्वेपिकुतस्तदुत्थद्वैतदर्शनंभयकारणंनभवतीत्याशंक्याह॥

यद्यस्मान्मत्तोन्यदात्मव्यतिरेकेणवस्त्वंतरंप्रतिद्वंद्वीभूतंनास्तितस्मिन्नात्मविनाशहेत्वभावेकस्मान्नुबिभेमीतिततएवयथाभूतात्मदर्श
नादस्यप्रजापतेर्भयंवीयायविस्पष्टमपगतवत्॥तस्यप्रजापतेर्यद्भयंतत्केवलाविद्यानिमित्तमेवपरमार्थदर्शनेऽनुपपन्नमित्याह॥क

कस्माद्ध्यभेष्यद्द्वितीयाद्वैभयंभवति॥२॥

स्मात्स्यभेष्यत्किमित्यसौभीतवान्परमार्थनिरूपणायांभयमनुपपन्नमेवेत्यभिप्रायः॥यस्माद्द्वितीयाद्वस्त्वंतराद्वैभयंभवतिद्विती
यंचवस्त्वंतरमविद्याप्रत्युपस्थापितमेव॥नह्यदृश्यमानंद्वितीयंभयजन्महेतुः॥तत्रकोमोहःकःशोकएकत्वमनुपश्यतइतिमंत्रवर्णा
च्चएकत्वदर्शनेनभयमपनुनोदापनोदितंतद्युक्तं॥कस्माद्द्वितीयाद्वस्त्वंतराद्भयंभवतितदेकत्वदर्शनेनद्वितीयदर्शनमपनीतमितिनास्तिय

नहीति॥तत्वज्ञानेसत्यज्ञानायोगात्तदुत्थंद्वैतंतद्दर्शनंचायुक्तमित्यतोहेत्वभावाद्भयानुपपत्तिरित्यर्थः॥अद्वैतज्ञानेभयनिवृत्तिरित्यत्रमंत्रंसंवादयति॥तत्रेति॥
विराडैक्यदर्शनेनैवप्रजापतेर्भयमपनीतंनाद्वैतदर्शनेनेत्यस्मिन्नर्थेपियन्मदन्यन्नास्तीत्यादिशकंव्याख्यातुमित्याशंकांगीकुर्वन्नाह॥यच्चेति॥तदेवप्रश्नद्वा

यकरयति॥कस्मादित्यादिना॥

प्रथमव्याख्यानानुसारेण चोद्यमुत्थापयति॥ अत्रेति॥ प्रजापतेर्ब्रह्मात्मैक्यज्ञानाद्गीतिध्वस्तिरुक्ता न च तस्य तज्ज्ञानं युक्तं हेत्वभावादित्याह॥ कुत इति य
स्मादस्माकमैक्यधीस्तस्मादेव तस्यापि स्यादित्याशंक्याह॥ कोवेति॥ न हि तस्य शास्त्रश्रवणमाचार्याभावान्नापि संन्यासस्तस्यत्रैवर्णिकविषयत्वान्नापि
शमाद्यैश्वर्यासक्तत्वादतोऽस्माकमिव प्रसिद्धश्रवणादिविद्याहेत्वभावान्न प्रजापतेरैक्यधीर्युक्तेत्यर्थः॥ उपदेशानपेक्षमेव प्रजापतेरैक्यज्ञानं प्रादुर्भूतमि
ति शंकते॥ अथेति॥ अतिप्रसक्त्या प्रत्याह॥ अस्मदादेरिति॥ प्रजापतेर्यजमानावस्थायामाचार्यस्य सत्वाच्छ्रवणाद्यावृत्तेरैक्यज्ञानोदयात्तत्संस्कारोऽस्य तथा
विधमेव तज्ज्ञानं फलावस्थायामपि स्यादिति चोदयति॥ अथेति॥ दूषयति॥ एकत्वेति॥ अज्ञानध्वंसित्वेनार्थवत्त्वमित्याशंक्याह॥ यथेति॥ तत्र गमकमा

अत्र चोदयंति कुतः प्रजापतेरेकत्वदर्शनं जातं को वा अस्मा उपदिदेश यद्यनुपदिष्टमेव प्रादुरभूदस्मदादेरपि तथा प्रसंगोऽथ जन्मांतर
कृतसंस्कारहेतुकमेकत्वदर्शनानर्थक्यप्रसंगो यथा प्रजापतेरतिक्रांतजन्मावस्थस्यैकत्वदर्शनं विद्यमानमप्यविद्याबंधकारणं नाप
निन्ये यतोऽविद्यासंयुक्त एवायं जातोऽबिभेत्॥ एवं सर्वेषामेकत्वदर्शनानर्थक्यं प्राप्नोति अंत्यमेव निवर्त्तकमिति चेन्न॥ ह॥ यत इति॥ दार्ष्टां

तिकमाह॥ एवमिति॥ नन्वस्मिन्नेव जन्मनि प्रजापतेरैक्यधीरनपेक्षा जायते॥ ज्ञानमप्रतिघं यस्येति स्मृतेर्न च तदुत्पत्त्यनंतरमेव सहेतुं बंधं निरुणद्धि भया
रत्यादिफलेन प्रारब्धकर्मणा प्रतिबंधादतो मरणकालीनं तदज्ञानध्वंसीति शंकते॥ अंत्यमेवेति॥ प्रवृत्तफलस्य कर्मणः सोपपादकाज्ञानलेशाद्धि ज्ञाने
शक्तिप्रतिबंधकत्वेपि जन्मांतरादि सर्वसंसारहेत्वज्ञानध्वंसि ज्ञाने सामर्थ्यप्रतिबंधकत्वेमानाभावान्मध्ये जातं ज्ञानमनिवर्त्तकमित्यशक्यं वक्तुमंत्यस्य
च ज्ञानस्य निवर्तकत्वेनांत्यत्वं हेतुर्यजमानांतरस्यांत्ये ज्ञाने तद्ध्वंसित्वादृष्टेरंत्यत्वस्याज्ञानध्वंसित्वेनानियमान्न च यजमानांतरे प्रजापतौ चांत्यं ज्ञानं ज्ञा
नत्वादज्ञानध्वंसि पूर्वज्ञानेषु बंधहेत्वज्ञानध्वंसित्वादृष्टेर्ज्ञानत्वहेतोरनैकांत्यान्न चांत्यमैक्यज्ञानमैक्यज्ञानत्वादज्ञानध्वंसीति युक्तमुपांत्यतादृग्ज्ञान

पू १ परोक्षज्ञानं ३ अपरोक्षज्ञानं ४

सर्वेषामुपदेशं विना पूर्वसंस्कारात् ज्ञानोत्पत्तेर् विशेषात्=२ प्रजापतेर्ज्ञानोत्पत्तौ समर्थकारणाभावात् १

वृद्धं त्वेपि तद्योगादुपात्ते हेतोरनैकांत्यादित्यभिप्रेत्य दूषयति नेत्यादिना॥ उक्तप्रकारणाभावात्तदंतरेण चोत्पत्तावतिप्रसंगात्संस्काराधीनत्वेपिवि
शेषाऽभावादंत्यस्य च ज्ञानस्य चाज्ञानध्वंसित्वासिद्धेर् युक्तं प्रजापतेरेकत्वदर्शनमित्युपसंहरति॥ तस्मादिति॥ प्रजापतेः सुप्तप्रतिबुद्धवत्प्रकृष्टा
दृष्टोत्थकार्यकरणवत्त्वात् पूर्वकल्पीयपदपदार्थवाक्यस्मरणवतः स्मृतिविपरिवर्तिनो वाक्यादिहि चार्यमाणाद् दृष्टसहकृतात्तत्त्वज्ञानं स्यात् लोके विशि
ष्टादृष्टोत्थकार्यकरणानां प्रज्ञायतिशयदर्शनात्तेन च ज्ञानेन जन्मांतरहेत्वविद्याक्षयेप्यारब्धं कर्म तज्जं च भयारत्याद्यविद्यालेशतो भविष्यतीति परि
हरति॥ नैष दोष इति॥ संगृहीतमर्थं समर्थयते॥ यथेत्यादिना॥ धर्मादिचतुष्टयाद्विपरीतमधर्मादिचतुष्टयं तत्र हेतोः सर्वस्य पाप्मनो ज्ञानाद्यतिशये

पूर्ववत्पुनः प्रसंगेनानैकांत्यात्तस्मादनर्थकमेवैकत्वदर्शनमिति चेत् नैष दोषः उत्कृष्टहेतूद्भवत्वाल्लोकवद्यथा पुण्यकर्मो
द्भवैर्विविक्तैः कार्यकरणैः संयुक्ते जन्मनि सति प्रज्ञामेधास्मृतिवैशारद्यं दृष्टं तथा प्रजापतेर्धर्मज्ञानवैराग्यैश्वर्यविपरीतहेतुसर्व
पाप्मदाहाद्विशुद्धैः कार्यकरणैः संयुक्तमुत्कृष्टं जन्म तदुद्भवं चानुपदिष्टमेव युक्तमेकत्वदर्शनं प्रजापतेस्तथा च स्मृतिः॥ ज्ञानमप्र
तिघं यस्य वैराग्यं च प्रजापतेः॥ ऐश्वर्यं चैव धर्मश्च सह सिद्धं चतुष्टयमिति॥ सहसिद्धत्वे भयानुपपत्तिरिति चेत्॥ न ह्यादित्येन स
हतमउदेति॥ ननाशादिति यावत्॥ उत्कृष्टत्वं प्रकृष्टज्ञानादिशालित्वं॥ उक्तजन्मफलमाह॥ तदुद्भवं चेति॥ तस्य ज्ञानादिवैशारद्ये पौरा
णिकीं स्मृतिमुदाहरति॥ तथा चेति॥ अप्रतिघमप्रतिबद्धं निरंकुशमित्येतत्॥ प्रत्येकं संबध्यते॥ तस्यैतच्चतुष्टयं सहसिद्धं सह निरवर्ततेति संबंधः
॥ सहसिद्धत्वस्मृतेः सोऽबिभेदिति श्रुतिविरुद्धत्वादप्रामाण्यमिति विरोधाधिकरणन्यायेन शंकते॥ सहसिद्धत्व इति॥ सत्येव सहजे ज्ञाने स्वहेतोर्भ
यमपि स्यादिति चेन्नेत्याह॥ नहीति॥ अन्येनाचार्येणानुपदिष्टमेव प्रजापतेर्ज्ञानमुदेतीत्येवमर्थपरत्वात् सहसिद्धवाक्यस्य तज्ज्ञानात्प्राक्तस्य भयमविरुद्धमूर्ध्वं

विलसैणः७

वाक्यात्तेनाद्वैतविरोधः श्रुतिसमर्थितमेषाम्॥

तं त्वरत्तौ ४

ज्ञानोत्पत्तेराचार्याद्यनपेक्षत्वे श्रद्धादिविधानानर्थक्यादनेकश्रुतिस्मृतिविरोधः स्यादिति शंकते॥ श्रद्धेति॥ आदिपदेन शमादिग्रहः॥ अस्मदादिषु तेषां हेतुत्वमिति चेन्नेत्याह॥ प्रजापतेरिवेति॥ चोदितं विरोधं निराकरोति॥ नेत्यादिना॥ निमित्तानां विकल्पः समुच्चयो गुणवत्त्वमगुणवत्त्वमित्यनेन प्रकारेण कार्योत्पत्तौ विशेषसंभवान्न श्रद्धादिविध्यानर्थक्यमित्यर्थः॥ संग्रहवाक्यं विवृणोति॥ लोके हीति॥ तद्धि सर्वं विकल्पादि यथा

नान्यानुपदिष्टार्थत्वात्सहसिद्धवाक्यस्य श्रद्धातात्पर्यप्रणिपातादीनामहेतुत्वमिति चेत्॥ स्यान्मतं श्रद्धावांल्लभते ज्ञानं तत्परः संयतेंद्रियः॥ तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया इत्येवमादीनां श्रुतिस्मृतिविहितानां ज्ञानहेतूनामहेतुत्वं प्रजापतेरिव जन्मांतरकृतधर्महेतुत्वे ज्ञानस्येति चेत्॥ न॥ निमित्तविकल्पसमुच्चयगुणवदगुणवत्त्वभेदोपपत्तेः॥ लोके हि नैमित्तिकानां कार्याणां निमित्तभेदोऽनेकधा विकल्प्यते तथा च निमित्तसमुच्चयस्तेषां च विकल्पितानां समुच्चितानां च पुनर्गुणवदगुणवत्त्वकृतो भेदो भवति॥ तद्यथा रूपज्ञान एव तावन्नैमित्तिके कार्ये तमसि विनालोकेन चक्षुरूपसंनिकर्षो नक्तंचराणां रूपज्ञाने निमित्तं भवति मनएव केवलं रूपज्ञाननिमित्तं योगिनां॥ अस्माकं तु संनिकर्षालोकाभ्यां सह तथादित्यचंद्राद्यालोकभेदैः समुच्चिता निमित्तभेदा भवति॥ तथा आलोकविशेषगुणवदगुणवत्त्वेन भेदाः स्युरेवमेवात्मैकत्वज्ञानेऽपि क्वचिज्जन्मांतरकृतं कर्म निमित्तं भवति यथा प्रजापतेः॥ ज्ञातुं शक्यं॥ तथैकस्मिन्नेव नैमित्तिके रूप

ज्ञानाख्यकार्ये दर्शयामीत्याह॥ तद्यथेति॥ तत्र विकल्पमुदाहरति॥ तमसीत्यादिना॥ समुच्चयं दर्शयति॥ अस्माकं त्विति॥ विकल्पितानां समुच्चितानां च निमित्तानां गुणवदगुणवत्त्वप्रयुक्तं भेदं कथयति॥ तथेति॥ आलोकविशेषस्य गुणवत्त्वं बहुलत्वमगुणवत्त्वं मंदप्रभत्वं चक्षुरादेर्गुणवत्त्वं निर्मलत्वादि तिमिरोपहतत्वादि वाऽगुणवत्त्वमिति भेदः॥ दृष्टांतं प्रतिपाद्य दार्ष्टांतिकमाह॥ एवमिति॥ तथान्यस्यापि प्रजापतितुल्यस्य वामदेवादेर्जन्मांतरीयसाधनवशादीश्वरानु

ग्रहादस्मिन्जन्मनिस्मृतवाक्यादैक्यज्ञानमुदेतीतिशेषः॥भृगुस्तत्तुल्योवाधिकारीक्वचिदित्युच्यते॥तपोन्वयव्यतिरेकाख्यमालोचनंश्वेतकेतुप्रभृ
तीषुज्ञाननिमित्तानांसमुच्चयंदर्शयति॥क्वचिदित्यादिना॥एकांतंनियतमावश्यकंज्ञानोदयलाभेनिमित्तत्वमितियावत्॥अथप्रणिपातादिव्य
तिरेकेणनप्रजापतेरपिज्ञानंसंभवतिसामग्र्यभावादतआह अधर्मादीति॥प्रणिपातादेर्ज्ञानोदयप्रतिबंधकनिवर्त्तकत्वात्प्रजापतेश्वतन्निवृत्ते
र्जन्मांतरीयसाधनायत्तत्वादाधुनिकप्रणिपातादिविनास्मृतवाक्यादैवैक्यधीःसंभवतीत्यर्थः॥तर्हिश्रवणादिव्यतिरेकेणापिप्रजापतेर्ज्ञानंस्यादि
त्याशंक्याह॥वेदांतेति॥नतैर्विनाज्ञानंकस्यचिदपिस्यात्प्रजापतेस्तुजन्मांतरीयश्रवणवशादिदानीमनुस्मृतवाक्यात्तदुत्पत्तिरितिशेषः॥तर्हिश्रद्धा

क्वचित्तपोनिमित्तंतपसाब्रह्मविजिज्ञासस्वेतिश्रुतेः॥क्वचिदाचार्यवान्पुरुषोवेदश्रद्धावांल्लभतेज्ञानंतद्विद्धिप्रणिपातेन॥आचार्या
द्धैवद्रष्टव्यःश्रोतव्यइतिश्रुतिस्मृतिभ्यः॥एकांतज्ञानलाभनिमित्तत्वंश्रद्धाप्रभृतीनां॥अधर्मादिनिमित्तवियोगहेतुत्वाद्वेदांतश्रवण
मनननिदिध्यासनानांचसाक्षाज्ज्ञेयविषयत्वात्पापादिप्रतिबंधक्षयेचात्ममनसोर्भूतार्थज्ञाननिमित्तस्वाभाव्यात्तस्मादहेतुत्वंनजा
तुज्ञानस्यश्रद्धाप्रणिपातादीनामिति॥२॥

दिक्रमपिप्रतिबंधनिवर्त्तकत्वेनप्रजापतेरादरणीयंतन्निवृत्तिमंतरेणज्ञानोत्पत्त्यनुपपत्तेरित्या
शंक्याह॥पापादीति॥आत्ममनसोर्मिथःसंयुक्तयोःसंबंधियत्पापंतत्कार्यंचरागादितेनज्ञानोत्पत्तौप्रतिबंधस्यपूर्वोक्तेनन्यायेनसत्त्वेसतिप्रजाप
तेरीश्वरानुग्रहात्स्मृतवाक्यस्यपरमार्थज्ञानोत्पत्तौकेवलस्यनिमित्तत्वात्तस्याधुनिकश्रद्धाद्यतिरेकेणज्ञानोदयेपिनतद्विधिवैयर्थ्यमस्माकंतद्दृशा
देवतदुत्पत्तेर्वाक्यतात्पर्यादिज्ञानंसर्वेषामेवज्ञानसाधनमाचार्यादिषुपुनर्विकल्पसमुच्चयावित्यर्थः॥अधिकारिभेदेनज्ञानहेतुषुविकल्पेपितेषा
मस्मासुसमुच्चयान्नश्रुतिस्मृतिविरोधोस्तीत्युपसंहरति॥तस्मादिति॥२॥प्रजापतेर्भयाविष्टत्वेनसंसारांतर्भूतत्वमुक्तमिदानींतत्रैवहेत्वंतरमाह॥

इतश्चेति॥अरत्याविष्टत्वेप्रजापतेरेकाकित्वंहेतूकरोति॥यतइति॥कार्यस्याऽरतेःकारणस्याऽरतेर्लिंगमित्यनुमानंसूचयति॥इदानीमपीति॥आदि
पदेनभयाविष्टत्वादिग्रहः॥अरतिंप्रतियोगिनिरुक्तिद्वारानिर्वक्ति॥रतिर्नामेति॥कथंतर्हियथोक्ताऽरतिनिरसनमित्याशंक्यसद्वितीयमैच्छदित्येत
द्व्याचष्टे॥सतस्याइतिसहेत्यस्यवाक्यस्यपातनिकांकरोति॥तस्येति॥तेनभावेनेतियावत्॥कथमभिमानमात्रेणयथोक्तपरिमाणत्वंतत्राह॥सत्येति॥

इतश्चसंसारविषयएवप्रजापतित्वंयतःसप्रजापतिर्वैनैवरेमेरतिंनान्वभवदरत्याविष्टोभूदित्यर्थोस्मादाद्यदिवदेवयतःइदानीमपित
स्मादेकाकित्वादिधर्मवत्त्वादेकाकीनरमतेरतिंनानुभवतिरतिर्नामेष्टार्थसंयोगजाक्रीडातत्प्रसंगिनइष्टवियोगान्मनस्याकुलीभावोऽर
तिरित्युच्यते॥सतस्याअरतेरपनोदायद्वितीयमरत्युपघातसमर्थंस्त्रीवस्त्वैच्छतगृद्धिमकरोत्॥तस्यचैवंस्त्रीविषयंगृध्यतःस्त्रियाप

सवैनैवरेमेतस्मादेकाकीनरमतेसद्वितीयमैच्छत्सहैतावानासयथास्त्रीपुमाꣳसौसंपरिष्वक्तौ

रिष्वक्तस्यैवात्मनोभावोबभूवसतेनसत्येप्सुत्वात्हएतावानेतत्परिमाणआसबभूवहकिंपरिमाणइत्याह॥यथालोकेस्त्रीपुमांसा
वरत्यपनोदायसंपरिष्वक्तौयत्परिमाणौस्यातांतथातत्परिमाणोबभूवेत्यर्थः॥सतथातत्परिमाणमेवेममात्मानंद्वेधाद्विःप्रकारमपा
तयत्पातितवानिममेवेत्यवधारणंमूलकारणाद्विराजोविशेषणार्थं॥ निपातोअवधारणे॥तस्यैवपुनरनुवादोऽन्वयार्थः॥परिमाणमेवप्रश्न
पूर्वकंविवृणोति॥किमित्यादिना॥संप्रतिस्त्रीपुंसयोरुत्पत्तिमाह॥सतथेति॥ननुद्वेधाभावोविराजोवासंसक्तस्त्रीपुमानस्यपिंडस्यवानाद्यःसशब्देन
विराड्ग्रहायोगात्तस्यकर्मत्वाद्वितीयेत्वात्मशब्दानुपपत्तिस्तत्राह॥इममिति॥तथाचसशब्देनकर्तृतयाविराड्ग्रहणमविरुद्धमित्यर्थः॥तदेवस्फुटयति॥

नेत्यादिना॥कस्यतर्हिद्विधाकरणमित्याह॥किंतर्हीति॥तच्चद्विधाकरणंकर्मेतिशेषः॥कथंतर्हितत्रात्मशब्दःसंभवतीत्याशंक्याह॥सएवचेति॥त
थाभूतःसंसक्तजायापुंपरिमाणोभूदितियावत्॥नकेवलंमनुःशतरूपेत्यनयोरेवदंपत्योरिदंनिर्वचनं॥किंतुलोकप्रसिद्धयोःसर्वयोरेवत
योरेतद्द्रष्टव्यं॥सर्वत्रास्यसंभवादित्याह॥लौकिकयोरिति॥उक्तेनिर्वचनेलोकानुभवमनुकूलयति॥तस्मादिति॥प्रागितिसहधर्मचारिणीसं

नक्षीरस्यसर्वोपमर्देनदधिभावापत्तिवद्विराट्सर्वोपमर्देनैतावानास किंतर्हिआत्मनाव्यवस्थितस्यैवविराजःसत्यसंकल्पत्वाद्
त्मव्यतिरिक्तंस्त्रीपुंसंपरिष्वक्तपरिमाणंशरीरांतरंबभूवसएवचविराट्तथाभूतःसहैतावानासेतिसामानाधिकरण्यात्ततस्त
स्मात्पातनात्पतिश्चपत्नीचाभवतामितिदंपत्योर्निर्वचनं॥लौकिकयोरतएवतस्माद्यस्मादात्मनएवार्धःपृथग्भूतोयेयंस्त्रीतस्मा

सइममेवात्मानंद्वेधापातयत्ततःपतिश्चपत्नीचाभवतांतस्मादिदमर्धबृगलमिवस्वइतिहस्माहयाज्ञवल्क्यस्तस्मा
दयमाकाशःस्त्रियापूर्यतएवतांसमभवत्ततोमनुष्याअजायंत॥३॥

दिदंशरीरमात्मनोर्धबृगलमर्धंचतद्बृगलंचतदर्धबृ
गलंविदलमर्धविदलमिवेत्यर्थः॥प्राक्स्त्र्युद्वहनात्कस्यार्धबृगलमित्युच्यते॥स्वआत्मनइतिएवमाहस्मउक्तवान्किलयाज्ञवल्क्यःय
ज्ञस्यवल्कोवक्तायज्ञवल्कःतस्यापत्यंयाज्ञवल्क्योदेवरातिरित्यर्थः॥ब्रह्मणोवाऽपत्यंयस्मादयंपुरुषार्धआकाशःस्त्र्यर्धशून्यःपुनरुद्व
हनात्तस्मात्पूर्यतेस्त्र्यर्धेनपुनः बंधात्पूर्वमित्यर्थः॥आकांसाद्वाराषष्ठीमादायानुभवमवलंब्यव्याचष्टे॥कस्येत्यादिना॥अनुभवसिद्धेर्थेप्रामा
णिकसंमतिमाह॥एवमिति॥वल्कशब्दोविकारार्थःद्विधापातनेसत्येकोभागःपुरुषोऽपरस्तुस्त्रीत्यत्रैवहेत्वंतरमाह॥यस्मादिति॥

बृ.र.
५६

उद्वूहनात्प्रागवस्थायामाकाशः पुरुषार्धः स्त्र्यर्धशून्यो यस्मादसंपूर्णो वर्त्तते तस्मादुद्वूहनेन प्राप्तस्त्र्यर्धेन पुनरितरो भागः पूर्यते॥ यथा विदला
र्धौ संपूर्णौ संपुटीकरणेन पुनः संपूर्णः क्रियते तद्वदिति योजना॥ पूर्वमपि स्वाभाविकयोग्यतावशेन संसर्गोऽभूदनादित्वात्संसारस्येति सूच
यितुं पुनरित्युक्तं॥ पुरुषार्धस्येतरार्धस्य च मिथः संबंधान्मनुष्यादिसृष्टिरित्याह तामित्यादिना॥ ३॥ स्मार्त्तप्रतिषेधमिति॥ न सगोत्रां समानप्रव

संपुटीकरणेनेव विदलार्धः तां स प्रजापतिर्मन्वाख्यः शतरूपाख्यामात्मनो दुहितरं पत्नीत्वेन कल्पितां समभवन्मैथुनमुपगत
वांस्ततस्तस्मात्तदुपगमनान्मनुष्या अजायंत॥ सन्ना:॥ ३॥ सा शतरूपा उ हेयं सेयं दुहितृगमने स्मार्त्तप्रतिषेधमनुस्मरंती ईक्षांचक्रे
कथं न्विदमकृत्यं यन्मामात्मन एव जनयित्वोत्पाद्य संभवत्युपगच्छति यद्यप्ययं निर्घृणः अहं हंतेदानीं तिरोऽसानि जात्यंतरे

सोऽहेयमीक्षांचक्रे कथं नु मात्मन एव जनयित्वा संभवति हंत तिरोऽसानीति सा गौरभवदृषभ इतरस्तां समेवाभवत्ततो
गावोऽजायंत वडवेतराभवदश्ववृष इतरो गर्दभीतरा गर्दभ इतरस्तां समेवाभवत्तत एकशफमजायताजेतराभवद्बस्त इ
तरोऽविरितरा मेष इतरस्तां समेवाभवत्॥ णतिरस्कृता भवानीत्येवमीक्षित्वा सा गौरभवदुत्पाद्यप्राणिकर्मभिश्चोद्यमाना
याः पुनः पुनः सैव मतिः शतरूपायाः मनोश्चाभवत्ततश्चऋषभ इतरस्तां समेवाभवदित्यादि पूर्ववत् रांभार्यां विंदेदित्यादिकमिति यावत्
॥ अकृत्यं हीदं यद्दुहितृगमनं मातृतश्चापंचमात्पुरुषात्पितृतश्चासप्तमादिति स्मृतेरिति मत्वाह॥ कथमिति॥ तयोर्जात्यंतरगमनं कथमित्याशंक्या
ह॥ यद्यपीति॥ शतरूपायां गोभावमापन्नायामृषभादिभावोऽभवत्तु तावता यथोक्तदोषपरिहारस्तयोर्वडवादिभावे तु न कारणमस्तीत्याशंक्याह॥

भा.

रामः
५६

उत्पाद्येतिततस्तस्यागोभावादनंतरमितियावत्॥गवांजन्मार्थेमिथःसंभवनंततःशब्दार्थः॥तत्रतेषामुत्पत्तौसत्यामितियावत्॥वाक्यद्वये
वीप्साविवक्षितेत्याह॥तामिति॥तामेवाभिनयति॥तामजामिति॥तांवडवांतांगर्दभींचेत्यपिद्रष्टव्यं॥ततोमिथःसंभवनाद्यथोक्तादितियावत्॥
विशेषाणामानंत्यात्प्रत्येकमुपदेशासंभवंमन्वानःसंक्षिप्योपसंहरति॥एवमेवेति॥तद्विभजते॥इदंमिथुनमिति॥पशुकर्मप्रयोगोन्यायः॥४॥य

ततोगावोजायंततथावडवेतराभवदश्ववृषइतरस्तथागर्दभीतरागर्दभइतरस्तत्रवडवाश्ववृषादीनांसंगमात्ततएकशफंएकखु
रमश्वाश्वतरगर्दभाख्यंत्रयमजायततथाऽजेतराभवद्बस्तःछागइतरस्तथाऽविरितरामेषइतरःसतांसमेवाभवत्॥तामितिवीप्सा
तामजांतामविंचेतिसमभवदेवेत्यर्थः ततःअजाश्चावयश्चाजावयोऽजायंतएवमेवयदिदंकिंचयत्किंचेदंमिथुनंस्त्रीपुंलक्षणंद्वंद्वमा

ततोजावयोजायंतैवमेवयदिदंकिंचमिथुनमापिपीलिकाभ्यस्तत्सर्वमसृजत॥४॥सोवेदहंवावसृष्टिरस्म्यहंहीदंस
र्वमसृक्षीतिततःसृष्टिरभवत्सृष्ट्यांहास्यैतस्यांभवतियएवंवेद॥५॥ पिपीलिकाभ्यः पिपीलिकाभिःसहानेनैवन्यायेनतत्सर्वम
सृजतजगत्सृष्टवान्॥४॥सप्रजापतिःसर्वमिदंजगत्सृष्ट्वाऽवेत्कथमहंवावअहमेवसृष्टिःसृज्यतइतिसृष्टंजगदुच्यतेसृष्टिरितियन्मया
सृष्टंजगन्मदभेदत्वादहमेवास्मिनमत्तोव्यतिरिच्यते॥ यद्यपिमन्वादिसृष्टिरेवोक्तातथापिसर्वासृष्टिरुक्तैवेतिसिद्धवत्कृत्याह॥सप्रजापति
रितिअवगतिंप्रश्नपूर्वकंविशदयति॥कथमित्यादिना॥कथंसृष्टिरस्मीत्यवधार्यतेकर्तृक्रिययोरेकत्वायोगादित्याशंक्याह॥सृज्यतइतीति॥पदा
र्थमुक्त्वावाक्यार्थमाह॥यन्मयेति॥जगच्छब्दादुपरितच्छब्दमध्याहृत्याहमेवतदस्मीतिसंबंधः॥तत्रहेतुमाह॥मदभेदत्वादितिएवकारार्थमाह॥नेति

उक्तवान् २

कृतइत्यादिना॥नहिसृष्टस्स्रष्टुरर्थांतरं तस्यैवतेन मायाविवदवस्थानादित्यर्थः॥ततःसृष्टिरित्यादिव्याचष्टे॥यस्मादितिकिमर्थस्स्रष्टुरेषाविभूतिरु
पद्दिश्येत्याशंक्याह॥सृष्ट्यामिति॥जगतिभवतीतिसंबंधः॥वाक्यार्थमाह॥प्रजापतिवदिति॥५॥ननुसर्वासृष्टिरुक्ताउक्तंचप्रजापतेर्विभूतिसंकी

र्तनएतदहंहियस्मादिदंसर्वंजगदसृक्षिसृष्टवानस्मितस्मादित्यर्थः॥यस्मात्सृष्टिशब्देनात्मानमेवाभ्यधात्प्रजापतिस्ततस्तस्मात्सृ
ष्टिरभवत्सृष्टिनामाभवत्स्रष्ट्यांजगतिहअस्यप्रजापतेरेतस्यामेतस्मिन्जगति प्रजापतिवत्स्रष्टाभवतिस्वात्मनोऽनन्यभूतस्यजग
तःकः॥यएवंप्रजापतिवद्यथोक्तंस्वात्मनानन्यभूतंजगत्साध्यात्माधिभूताधिदैवंजगदहमस्मीतिवेद॥५॥एवंसप्रजापतिर्जगदिदंमि
थुनात्मकंसृष्ट्वाब्राह्मणादिवर्णनियंत्रीर्देवताःसिसृक्षुरादावथेतिशब्दद्वयमभिनयप्रदर्शनार्थमनेनप्रकारेणमुखेहस्तौप्रक्षिप्याभ्यम

अथेत्यभ्यमंथत्समुखाच्चयोनेर्हस्ताभ्यांचाग्निमसृजततस्मादेतदुभयमलोकमंतरतोऽलोमकाहियोनिरंतरत

थदाभिमुख्येनमंथनमकरोत्समुखंहस्ताभ्यामथित्वासमुखाच्चयोनेर्हस्ताभ्यांचयोनिभ्यामग्निंब्राह्मणजातेरनुग्रहकर्तारम
सृजतसृष्टवान्॥यस्माद्दाहकस्याग्नेर्योनिरेतदुभयंहस्तौमुखंचतस्मादुभयमप्येतदलोमकंलोमविवर्जितंकिंसर्वमेवनअंतर
तोअभ्यंतरतोस्तिहियोन्यासामान्यमुभयस्यकिमलोमकाहियोनिरंतरतःस्त्रीणां तेनफलंकिमवशिष्यतेयदर्थमुत्तरंवाक्यमित्या

शंक्याह॥एवमिति आदावभ्यमंथदितिसंबंधः अभिनयप्रदर्शनमेवविशदयति॥अनेनेति॥मुखादेरग्निंप्रतियोनित्वेगमकमाह॥यस्मादि
ति॥प्रत्यक्षविरोधंशंकित्वादूषयति॥किमित्यादिना॥हस्तयोर्मुखेचयोनिशब्दप्रयोगेनिमित्तमाह॥अस्तिहीति॥प्रजापतेर्मुखादित्यमग्निःसृष्टो

तथेति॥ उक्तेर्थेश्रुतिस्मृतिसंवादं दर्शयति॥ तस्मादिति॥ आग्नेयो वै ब्राह्मण इत्याद्याश्रुतिस्तदनुसारिणी च स्मृतिर्द्रष्टव्या॥ अग्निमसृजतेत्येतदु
पलक्षणार्थमित्यभिप्रेत्य स्पष्टं तरमाह॥ तथेति॥ बलभिदिंद्रः आदिशब्देन वरुणादिर्गृह्यते क्षत्रियं चासृजतेत्यनुवर्त्तते॥ उक्तमर्थं प्रमाणेन द्र
ढयति॥ तस्मादिति॥ ऐंद्रो राजन्य इत्याद्याश्रुतिस्तदनुसारिणी च स्मृतिरवधेया॥ विशं चासृजेति पूर्ववत्॥ ईहाश्रयादूरुतो जातत्वं वस्वादेर्ज्येष्ठ
त्वं च तच्छब्दार्थः॥ पद्भ्यां शूद्रो अजायतेत्याद्याश्रुतिस्तथाविधा च स्मृतिरनुसर्त्तव्या॥ अग्निसर्गस्य वक्ष्यमाणेंद्रसर्गोपलक्षणत्वे सति सृष्टिसाकल्यादे

तथा ब्राह्मणोपि मुखादेवजज्ञे प्रजापतेस्तस्मादेकयोनित्वाज्ज्येष्ठेनेवानुजो नुगृह्यते ग्निना ब्राह्मणस्तस्माद्ब्राह्मणो ग्निदैवत्यो मुख
वीर्यश्चेति श्रुतिप्रसिद्धं॥ तथा बलाश्रयाभ्यां बाहुभ्यां बलभिदादिकं क्षत्रियजातिनियंतारं क्षत्रियं च तस्मादैंद्रः क्षत्रं बाहुवीर्यं चेति
श्रुतौ स्मृतौ चावगतं तथोरुतईहा चेष्टा तदाश्रयाद्वस्वादिलक्षणं विशो नियंतारं विशं च तस्मात्पूष्यादिपरो वस्वादिदैवत्यश्च वैश्य
स्तथा पूषणं पृथ्वीदैवतं शूद्रं च पद्भ्यां परिचरणक्षममसृजतेति श्रुतिस्मृतिप्रसिद्धं॥ अत्र क्षत्रादिदेवतासर्गमिहानुक्तं वक्ष्यमाणम
प्युक्तवदुपसंहरति सृष्टिसाकल्यानुकीर्त्यै॥ यथेयं श्रुतिर्व्यवस्थिता तथा प्रजापतिरेव सर्वे देवा इति निश्चितोर्थः॥ स्रष्टुरनन्यत्वात्स्रष्टा
नां प्रजापतिनैव तु सृष्टत्वाद्देवानामथैवं प्रकरणार्थव्यवस्थिते तत्स्तुत्यभिप्रायेणाऽविद्वन्मतांतरनिंदोपन्यासो न अन्यनिंदार्थ एव॥

ष उ एव सर्वे देवा इत्युपसंहारसिद्धिरिति फलितमाह॥ अत्रेति॥ उक्तेन वक्ष्यमाणोपलक्षणं सर्वशब्दः सूचयतीति भावः॥ किंच सृष्टिरत्र न विव
क्षिता किंतु येन प्रकारेण सृष्टिश्रुतिः स्थिता तेन प्रकारेण देवतादि सर्वं प्रजापतिरेवेति विवक्षितमित्याह॥ यथेति॥ तत्र हेतुमाह॥ स्रष्टुरिति॥ त
थापि कथं देवतादि सर्वं प्रजापतिमात्रमित्याशंक्याह॥ प्रजापतिनेति॥ यद्यदिदमित्यादिवाक्यस्य तात्पर्यमाह॥ अथेति ॥

स्रष्टा प्रजापतिरेव सृष्टं सर्वं कार्यमिति प्रकरणार्थे पूर्वोक्तप्रकारेण व्यवस्थिते सत्यनंतरं तस्यैव स्तुतिविवक्षया तद्यदिदमित्याद्यविद्वन्मतांत
रस्य निंदार्थं वचनमित्यर्थः॥ मतांतरे निंदिते पि कथं प्रकरणार्थः स्तुतो भवतीत्याशंक्याह॥ अन्येति॥ एकैकं देवमित्यस्य तात्पर्यमाह॥ नामेति॥
काठकं कालापकमितिवन्नामभेदात्क्रतुषु तत्तद्देवतास्तुतिभेदाद्धुटशकटादिवदर्थक्रियाभेदाच्च प्रत्येकं देवानां भिन्नत्वात्कर्मिणामेतद्वचनमित्य
र्थः॥ आदिशब्देन रूपादिभेदात्तद्भेदत्वं संगृह्णाति॥ नन्वत्र कर्मिणां निंदा न प्रतिभाति तन्मतोपन्यासस्यैव प्रतीतेरित्याशंक्याह॥ तन्नेति॥ एकस्यैव

किंत्वन्यस्तुतये तत्तत्र कर्मप्रकरणे केवलेयाज्ञिकाः यागकाले यदिदं वच आहुरमुमग्निं यजामुमिंद्रं यजेत्यादिनाम शस्त्रस्तोत्रकर्मादिभि
न्नत्वाद्भिन्नमेवाग्न्यादिदेवमेकैकं मन्यमाना आहुरित्यभिप्रायः॥ तन्न तथा विद्याद्यस्मादेतस्यैव प्रजापतेः सा विसृष्टिर्देवभेदः सर्व एष उ

स्तद्यदिदमाहुरमुं यजामुं यजेत्येकैकं देवमेतस्यैव सा विसृष्टिरेष उ ह्येव सर्वे देवाः ॥

ह्येव प्रजापतिरेव प्राणः सर्वे देवाः॥ अत्र विप्रतिपद्यंते॥ पर एव हिरण्यगर्भ इत्येके संसारीत्यपरे पर एव तु मंत्रवर्णात्॥ इंद्रं मित्रं
वरुणमग्निमाहुरिति श्रुतेः॥ एष ब्रह्मैष इंद्र एष प्रजापतिरेते सर्वे देवा इति श्रुतेः स्मृतेश्च॥ प्राणस्यानेकविधो देवताप्रभेदः शाल्यब्राह्मणेव
स्यत इति विवक्षित्वा विशिनष्टि॥ प्राण इति॥ अग्न्यादयो देवाः सर्वे प्रजापतिरेवेत्युक्तं संप्रति तत्स्वरूपनिर्दिधारयिषया तत्र विप्रतिपत्तिं दर्शयति॥
अत्रेति॥ हिरण्यगर्भस्य परत्वमाद्ये द्वितीये कल्पे संसारित्वं विधेयमिति विभागः॥ तत्र पूर्वपक्षं गृह्णाति॥ पर एव त्विति॥ नन्वेकस्यानेकात्मकत्वं मंत्रव
र्णादवगम्यते न तु परमात्मत्वं प्रजापतेरित्याशंक्य ब्राह्मणवाक्यमुदाहरति॥ एष इति॥ ब्रह्म प्रजापतौ सूत्रविराजौ॥ एष शब्दः परमात्मविषयः॥ स्मृतेश्च

तत्रैववाक्यांतरंपठति॥योसाविति॥कर्मेंद्रियाविषयत्वमतींद्रियत्वं॥अग्राह्यत्वंज्ञानेंद्रियाविषयत्वं॥तत्रहेतुमाह॥सूक्ष्मोव्यक्तइति॥नच
तस्यासत्वंप्रमात्राद्दिभावाभावसाक्षित्वेनसदासत्वादित्याहसनातनइति॥इतश्चतस्यनासत्वंसर्वेषामात्मत्वादित्याह॥सर्वेति॥अंतःकर
णाविषयत्वमाह॥अचिंत्यइति॥योसौपरमात्मायथोक्तविशेषणःसएवस्वयंविराडात्मनाभूतवानित्याह॥सएवेति॥मंत्रब्राह्मणस्मृतिषुप
रस्यदेवतात्मत्वदृष्टेरत्रचसूत्रेस्यतत्प्रतीतेस्तस्यपरत्वमित्युक्तं॥इदानींपूर्वपक्षांतरमाह॥संसार्येवेति॥सर्वपाप्मदाहश्रवणमात्रेणकथंप्रजाप
तेःसंसारित्वंतत्राह॥नहीति॥अंतरस्तद्धर्मोपदेशादित्यत्रपरस्यापिसर्वपाप्मोदयांगीकारान्नेदंसंसारित्वेलिंगमित्याशंक्याह॥भयेति॥असृजतेतिश्रव

एतमेकेवदंत्यग्निंमनुमन्येप्रजापतिमिति॥योसावतींद्रियोग्राह्यःसूक्ष्मोव्यक्तःसनातनः॥सर्वभूतमयोऽचिंत्यःसएवस्वयमु
द्बभावितिचसंसार्येववास्यात्॥सर्वान्पाप्मनऔषदितिश्रुतेः॥नह्यसंसारिणःपाप्मदाहप्रसंगोस्ति॥भयारतिसंयोगश्रवणा
च्च॥अथयन्मर्त्यःसन्नमृतानसृजतेतिच॥हिरण्यगर्भंपश्यतजायमानमितिचमंत्रवर्णात्॥स्मृतेश्चकर्मविपाकप्रक्रियायां॥
ब्रह्माविश्वसृजोधर्मोमहानव्यक्तमेवच॥उत्तमांसात्विकीमेतांगतिमाहुर्मनीषिणइति॥अथैवंविरुद्धार्थानुपपत्तेःप्रामाण्यव्या
घातइतिचेत॥

णादितिसंबंधः॥नकेवलंमर्त्यत्वश्रुतेरेवसंसारित्वंकिंतुजन्मश्रुतेश्चेत्याह॥हिरण्यगर्भमिति॥यथोक्तहेतूनांसंसार्येवस्या
दितिप्रतिज्ञयान्वयः॥कर्मफलदर्शनाधिकारेब्रह्मेत्याद्यायाःस्मृतेश्चतत्फलभूतस्यप्रजापतेःसंसारित्वमेवेत्याह॥स्मृतेश्चेति॥विराड्ब्रह्मेत्युच्यते॥
विश्वसृजोमन्वादयः॥धर्मस्तदभिमानिनीदेवतायमः॥महान्प्रकृतेराद्योविकारः॥सूत्रंअव्यक्तंप्रकृतिरितिभेदः॥अस्तुतर्हिद्विविधवाक्यवशात्प्रजा
पतेःसंसारित्वमसंसारित्वंचेत्याशंक्याह॥अथेति॥तत्द्विविधवाक्यश्रवणानंतर्यमथशब्दार्थः॥एवंशब्दःसंसारित्वासंसारित्वप्रकारपरामर्शार्थः॥वि
रोधकृतमप्रामाण्यंनिराकरोति॥

आँसीनेइत्यादिश्रुतिभिः स्वतोऽसंसारीत्यर्थः ५

नेत्यादिना॥ स्वतोऽसंसारित्वंकल्पनयाचसंसारित्वमितिकल्पनांतरसंभवात्द्विविधश्रुतीनामविरोधात्प्रामाण्यसिद्धिरित्यर्थः कल्पनयासंसा
रित्वमित्येतद्विशदयति॥ उपाधीति॥ औपाधिकीपरस्यविशेषकल्पनेत्यत्रप्रमाणमाह॥ आसीनइतिस्वारस्येनकूटस्थोप्यात्मामनसः शीघ्रंदू
रगमनदर्शनात्तदुपाधिकोदूरंव्रजति॥ यथास्वप्नेशयानोपिमनसोगतिभ्रांत्यासर्वत्रयातीवभातितथाजागरेपीत्यर्थः॥ कल्पितेनहर्षादिविकारे
णस्वाभाविकेनतदभावेनचयुक्तमात्मानंनकश्चिदपिनिश्चेतुंशक्नोतीत्याह॥ कस्तमिति॥ आदिपदेनध्यायतीवेत्यादिश्रुतयोगृह्यंते॥ उदाहृतश्रुती
नांतात्पर्यमाह॥ उपाधीतिकिंतर्हिपारमार्थिकंतदाह॥ स्वतइति॥ पूर्वेणसंबंधः॥ हिरण्यगर्भस्यवास्तवमवास्तवंचरूपंनिरूपितमुपसंहरति॥ स

नकल्पनांतरोपपत्तेः अविरोधादुपाधिविशेषसंबंधाद्विशेषकल्पनांतरमुपपद्यते॥ आसीनोदूरंव्रजतिशयानोयातिसर्वतः॥ क
स्तंमदामदंदेवंमदन्योज्ञातुमर्हतीत्येवमादिश्रुतिभ्यः॥ उपाधिवशात्संसारित्वंनपरमार्थतः स्वतोऽसंसार्येवमेकत्वंनानात्वंचहिर
ण्यगर्भस्य॥ तथासर्वजीवानांतत्वमसीतिश्रुतेर्हिरण्यगर्भेतुउपाधिशुध्यतिशयापेक्षयाप्रायशः परएवेतिश्रुतिस्मृतिवादाः प्रवृ
त्ताः संसारित्वंतुक्वचिदेवदर्शयंतिजीवानांतुउपाधिगताशुद्धिबाहुल्यात्संसारित्वमेवप्रायशोभिलप्यते॥ व्यावृत्तकृत्स्नोपाधिभेदापे
क्षयातुसर्वः परत्वेनैवाभिधीयतेश्रुतिस्मृतिवादैः

वमिति॥ तस्याप्यस्मदादिवन्नस्वतोब्रह्मत्वंकिंतुसंसारित्वमेवस्वाभाविकमित्याशंक्यदृष्टां
तस्यसाध्यविकलतामाह॥ तथेति॥ सर्वजीवानामेकत्वंनानात्वंचेतिपूर्वेणसंबंधः॥ तेषांस्वतोब्रह्मत्वेप्रमाणमाह॥ तत्वमिति॥ कस्तर्हिहिरण्यग
र्भेविशेषोयेनासावस्मदादिभिरुपास्यतेतत्राह॥ हिरण्यगर्भेत्विति॥ ननुश्रुतिस्मृतिवादेषुक्वचित्तस्यसंसारित्वमपिप्रदर्श्यतेसत्यंतत्तुकल्पित
मित्यभिप्रेत्याह॥ संसारित्वंत्विति॥ अस्मदादिषुतुल्यमेतदित्याशंक्याह॥ जीवानांत्विति॥ कथंतर्हितत्वमसिसेत्त्रज्ञंचापिमांविद्धीत्यादिश्रुतिस्मृ

स्वमतेतत्वनिश्चयमुक्त्वापरमतेतदभावमाह॥ तार्किकैस्त्विति॥ नन्वेकजीववादेपिसर्वव्यवस्थानुपपत्तेस्तत्वनिश्चयदौर्लभ्यंतुल्यमितिचेन्नेत्याह॥
येत्विति॥ स्वप्नवत्प्रबोधात्प्रागशेषव्यवस्था॥ संभवादूर्ध्वंचतदभावस्येष्टत्वादेकमेवब्रह्माज्ञानाद्यविद्यावशादेवव्यवहारास्पदमितिपक्षेनकाचनदोष
कलेतिभावः॥ सर्वदेवतात्मकस्यप्रजापतेःस्वतोसंसारित्वंकल्पनयावैपरीत्यमितिस्थितेसत्यथेत्याद्युत्तरग्रंथस्यतात्पर्यमाह॥ तत्रेति॥ विवक्षितइ

तार्किकैस्तुपरित्यक्त्वागमबलैरस्तिनास्तिकर्त्ताकर्त्तेत्यादिविरुद्धंबहुतर्कयद्भिराकुलीकृतःशास्त्रार्थस्तेनार्थनिश्चयोदुर्लभः॥ ये
तुकेवलशास्त्रार्थानुसारिणःशांतदर्पास्तेषांप्रत्यक्षविषयइवनिश्चितःशास्त्रार्थोदेवतादिविषयस्तत्रप्रजापतेरेकस्यदेवस्यात्राद्य
लक्षणोभेदोविवक्षितइति॥ तत्राग्निरुक्तोत्ताद्यःसोमइदानीमुच्यते॥ एकस्यैवप्रजापतेर्द्विधोपास्यत्वायाग्निसर्गमुक्त्वाऽन्नसर्गमाह॥

अथयत्किंचेदमार्द्रंतद्रेतसोसृजततदुसोमएतावद्वाइदꣳसर्वमन्नंचैवान्नादश्चसोमएवान्नमग्निरन्नादः ॥

अथयत्किंचइदंलोकेआर्द्रंद्रवात्मकंतद्रेतसःआत्मनोबीजादसृजतरेतसआपइतिश्रुतेः॥ अंवात्मकश्चसोमस्तस्माद्यदार्द्रंप्रजापति
नारेतसःसृष्टंतदुसोमएवएतावद्वैएतावदेवनातोधिकमिदंसर्वंकिंतदन्नंचैवसोमो त्युत्तरग्रंथप्रवृत्तिरितिशेषः॥ तस्यविषयंपरिशिनष्टि
॥ तत्राग्निरिति॥ अत्राद्ययोर्निर्धारणार्थासप्तमी॥ संप्रतिप्रतीकमादायाक्षराणिव्याकरोति॥ अथेति॥ अतःसर्गानंतर्यमथशब्दार्थः॥ रेतसःसकाशादपां
सर्गेपिसोमशब्देकिमायातमित्याशंक्याह॥ अवात्मकश्चेति॥ श्रद्धाख्याहुतेःसोमोत्पत्तिश्रवणात्तत्रशैत्योपलब्धेश्चेतिभावः॥ सोमस्यद्रवात्मकत्वेफलि
तमाह॥ तस्मादिति॥ अग्नीषोमयोरत्राद्ययोःसृष्टावपिजगतिस्रष्टव्यांतरमवशिष्टमस्तीत्याशंक्याह॥ एतावदिति॥ आप्यायकःसोमोद्रवात्मकत्वादन्नंचाप्या

बृ॰ र॰
६०

भा॰

द्रवात्मकत्वादितिसोमएवान्नमग्निरन्नादइत्यवधारणस्यविवक्षितमर्थमाह॥तत्रेति॥यथोक्तंवाक्यंसप्तम्यर्थः यथाश्रुतमवधारणमवधार्यकुतोवि
धांतरेणतद्व्याख्यानमित्याशंक्याह॥अर्थबलाद्धीति अन्नादस्यसंहर्तृत्वादग्नित्वमन्नस्यचसंहरणीयतयासोमत्वमवधारयितुंयुक्तमित्यर्थः॥न
न्वन्नस्यसोमत्वेननियमोग्नेरपिजलादिनासंहार्यत्वाच्चाग्नित्वेननियमःसोमस्यापिकदाचिदिज्यमानत्वेनात्तृत्वात्कुतोर्थबलमित्याशंक्याह॥अ
ग्निरपीति॥सोपिसंहार्यश्चेत्सोमएवसचसंहर्ताचेदग्निरेवेत्यवधारणसिद्धिरित्यर्थः॥प्रजापतेःसर्वात्मत्वमुपक्रम्यजगतोद्वेधाविभक्तत्वाभिधानं

द्रवात्मकत्वादाप्यायकमन्नाद्यग्निरौष्ण्याद्रूक्षत्वाच्चतत्रैवमवध्रियतेसोमएवान्नंयद्दृश्यतेतद्देवसोमइत्यर्थोयएवचात्तासएवाग्निरर्थ
बलाद्ध्यवधारणं॥अग्निरपिकचिद्धूयमानःसोमपक्षस्यैवसोमोपीज्यमानोग्निरेवात्तृत्वादेवमग्नीषोमात्मकंजगदात्मत्वेनपश्यन्न

सैषाब्रह्मणोतिसृष्टिर्यच्छ्रेयसोदेवानसृजताथयन्मर्त्यःसन्नमृतानसृजततस्मादतिसृष्टिरतिसृष्ट्याꣳहास्यैतस्यांभव
तियएवंवेद॥६॥ केनचनदोषेणलिप्यतेप्रजापतिश्चभवति॥सैषाब्रह्मणःप्रजापतेरतिसृष्टिरात्मनोप्यतिशयाकासेत्याह
यच्छ्रेयसःप्रशस्यतरान्आत्मनःसकाशाद्यस्मादसृजतदेवान्सैषातस्माद्देवसृष्टिरतिसृष्टिःकथंपुनरात्मनोतिशयासृष्टिरित्य
तआह॥ कुत्रोपयुक्तमित्याशंक्यतस्यसूत्रेपर्यवसानात्तस्मिन्नात्मबुध्योपासकस्यसर्वदोषराहित्यंफलमत्रविवक्षितमित्याह॥एव
मिति॥अनुग्राहकदेवसृष्टिंशिष्ट्वातदुपासकस्यफलोक्त्यर्थमादौदेवसृष्टिंस्तौति॥सैषेति॥अग्निर्मूर्द्धेत्यादिश्रुतेरग्न्यादयोस्यावयवास्तत्कथं
तत्सृष्टिस्ततोतिशयवतीत्याशंकते॥कथमिति॥प्रजापतेर्यजमानावस्थापेक्षयादेवसृष्टेरुत्कृष्टत्ववचनमविरुद्धमितिपरिहरति॥अतआ

श्रीः॥
रामः
६०

देवसृष्टेरतिसृष्टित्वाभावशंकानुवादार्थोयशब्दः ज्ञानस्येत्युपलक्षणंकर्मणोपीतिद्रष्टव्यं॥ अतिसृष्ट्यामित्यादिव्याचष्टे॥ तस्मादिति देवतादिस्रष्टातदात्मा प्रजापतिरहमेवेत्युपासितुस्तद्भावापत्यातत्स्रष्टृत्वंफलतीत्यर्थः॥ ६॥ पूर्वोत्तरग्रंथयोः संबंधंवक्तुंप्रतीकमादायवृत्तंकीर्त्तयति॥ तद्धेत्यादिनातस्मादेयत्वार्थंवैदिकमित्युक्तं॥ साधनमित्युक्तेमुक्तिसाधनंपुरःस्फुरतितंनिरस्यति॥ ज्ञानेतिएकरूपस्यमोक्षस्यानेकरूपं

अथयद्यस्मान्मर्त्यः सन्मरणधर्मासन्नमृतानमरणधर्मिणोदेवान्कर्मज्ञानवह्निनासर्वानात्मनः पाप्मनः उषित्वाऽसृजततस्मादियमति सृष्टिरुत्कृष्टज्ञानस्यफलमित्यर्थः॥ तस्मादेनामतिसृष्टिंप्रजापतेरात्मभूतांयोवेदसएतस्यामतिसृष्ट्यांप्रजापतिरिवभवतिप्रजापतिवदेवस्रष्टाभवति ॥ ६ ॥ ॥ ॥ तद्धेदंतर्ह्यव्याकृतमासीत्॥ सर्ववैदिकंसाधनंज्ञानकर्मलक्षणं॥ कर्त्राद्यनेककारका

तद्धेदंतर्ह्यव्याकृतमासीत्

पेक्षंप्रजापतित्वफलावसानंसाध्यमेतावदेवयदेतद्व्याकृतंजगत्संसारोऽथैतस्यैवसाध्यसाधनलक्षणस्यव्याकृतस्यजगतोव्याकरणात्प्राग्बीजावस्थायातांनिर्दिदिक्षत्यंकुरादिकार्यानुमितामिववृक्षस्यकर्मबीजोऽविद्याक्षेत्रोह्यसौसंसारवृक्षःसमूलउद्धर्त्तव्य इति॥ नसाधनंभवतीतिभावः॥ मुक्तिसाधनंमानवस्तुतंत्रंतत्वज्ञानं॥ इदंतुकारकसाध्यमतोपिनतद्धेतुरित्याह॥ कर्त्रादीति॥ किंच॥ इदंप्रजापतित्वफलावसानंमृत्युरस्यात्माभवतीतिश्रुतेः नचतदेवकैवल्यंभयारत्यादिश्रवणादतोपिनेदंमुक्त्यर्थमित्याह॥ प्रजापतित्वेति॥ किंच॥ नित्यसिद्धामुक्तिरिदंतुसाध्यफलमतोपिनमुक्तिहेतुरित्याह॥ साध्यमिति॥ किंच॥ मुक्तिर्व्याकृतादर्थांतरमन्यदेवतद्विदितादित्यादिश्रुतेरिदंतुनामरूपंव्या

कृतमतोपिनतद्धेतुरित्याह॥ सत्यादेवेति॥

संप्रत्यव्याकृतकंडिकामवतारयन्प्रवेशवाक्यात्प्राक्तनस्य तद्धेदमित्यादेर्वाक्यस्यतात्पर्यमाह॥ अथेति॥ ज्ञानकर्मफलोक्त्यानंतर्यमथशब्दार्थः॥
बीजावस्थासाभासप्रत्यगविद्यातस्यानिर्दिष्टमिष्टत्वमेवनसाक्षान्निर्देश्यत्वमनिर्वाच्यत्वादितिवक्तुंनिर्दिदिक्षतीत्युक्तं॥ वृक्षस्यबीजावस्थांलोकेनि
र्दिशतीतिसंबंधः॥ यत्नानेप्रमर्थास्तित्तदेववाच्यंकिमितिप्रत्यगविद्योच्यतेतत्राह॥ कर्मेति॥ उद्धर्तव्य इतितन्मूलनिरूपणमर्थवदितिशेषः॥ अ
र्थपुरुषार्थमर्थयमानस्यतदुद्धारोपिकोपयुज्यतेतत्राह॥ तदुद्धरणेहीति॥ ननुसंसारस्यमूलमेवनास्तिस्वभाववादात्प्रधानाद्येववातन्मूलंनाज्ञातं

तदुद्धरणेहिपुरुषार्थपरिसमाप्तिः॥ तथाचोक्तंऊर्ध्वमूलोऽवाक्शाखइतिकाठके॥ गीतासुचऊर्ध्वमूलमधःशाखमिति॥ पुराणेचब्र
ह्मवृक्षःसनातनइति॥ तद्धतदितिबीजावस्थंजगत्प्रागुत्पत्तेस्तर्हितस्मिन्कालेपरोक्षत्वात्सर्वनाम्नाऽप्रत्यक्षाभिधानेनाभिधीयते॥
भूतकालसंबंधित्वादव्याकृतभाविनोजगतःसुखग्रहणार्थमैतिह्यप्रयोगोहशब्दःएवंहतदासीदित्युच्यमानेसुखंतांपरोक्षामपि
जगतोवस्थांप्रतिपद्यतेयुधिष्ठिरोहकिलराजासीदित्युक्तेयद्वदिदमितिव्याकृतनामरूपात्मकंसाध्यसाधनलक्षणंयथावर्णितमभि
धीयते॥ ब्रह्मेत्याशंक्यश्रुतिस्मृतिभ्यांपरिहरति॥ तथाचेति॥ ऊर्ध्वमुत्कृष्टंकारणंकार्यापेक्षयापरमव्याकृतंमूलमस्येतिवेत्यूर्ध्वमूलोहिरण्य
गर्भादयोमूलापेक्षयाअर्वाच्यःशाखाइवावाक्शाखएवमूर्ध्वमूलमधःशाखमित्यादिगीतापिनेतव्या॥ अस्तिहिसंसारस्यमूलंनेदममूलंभविष्य
तीतिश्रुतेः॥ तच्चाज्ञातंब्रह्मैवेतिश्रुतिस्मृतिप्रसिद्धमितिभावः॥ संप्रतिप्रतीकमादायपदानिव्याचष्टे॥ तद्धेत्यादिना॥ अप्रत्यक्षाभिधानेनतदिति
सर्वनाम्नाबीजावस्थंजगदभिधीयतेपरोक्षत्वादितिसंबंधः॥ कथंजगतोबीजावस्थत्वमित्याशंक्यतर्हीत्यस्यार्थमाह॥ प्रागिति॥ कथंतस्यपरोक्षत्वं
तत्राह॥ भूतेति॥ निपातार्थमाह॥ सुखेति॥ हशब्दार्थमभिनयति॥ किलेति॥ यथावर्णितमित्यनर्थत्वेनसंसारेऽसारत्वोक्तिःपदद्वयसामानाधिकर

तदिदमिति॥एकत्वमभिनयेनोदाहरति॥तदेवेति॥एकत्वावगतिफलंकथयति॥अथेति॥सामानाधिकरण्यवशादेकत्वेनिश्चितेसत्यनंतरंनास
तोविद्यतेभावोनाभावोविद्यतेसतइतिस्मृतिरनुसृताभवतीतिभावः॥अज्ञातंब्रह्मजगतोमूलमित्युक्त्वातद्विवर्तोजगदितिनिरूपयति॥तदेवंभू
तमिति॥तृतीयामित्थंभावार्थत्वेनव्याचष्टे॥नाम्नेति॥क्रियापदप्रयोगाभिप्रायंतदनुवादपूर्वकमाह॥व्याक्रियतेति॥तत्रपदच्छेदपूर्वकंतद्व्याख्य
मर्थमाह॥व्याक्रियतेत्यादिनास्वयमेवेतिकुतोविशेष्यतेकारणमंतरेणकार्योत्पत्तिरयुक्तेत्याशंक्याह॥सामर्थ्यादिति॥निर्हेतुकार्यसिद्ध्यनुपपत्या

तदिदंशब्दयोः परोक्षप्रत्यक्षावस्थजगद्वाचकयोःसामानाधिकरण्यादेकत्वमेवपरोक्षप्रत्यक्षावस्थस्यजगतोवगम्यते॥तदेवेदमि
दमेवचतदव्याकृतमासीदित्यर्थेवंसति॥नासतउत्पत्तिर्नसतोविनाशःकार्यस्येत्यवधृतंभवति॥तदेवंभूतंजगदव्याकृतंसन्नाम

तन्नामरूपाभ्यामेवव्याक्रियतासौनामायमिदंरूपइति

रूपाभ्यामेवनाम्नारूपेणेवचव्याक्रियतव्याक्रियतेतिकर्मकर्तृप्रयोगात्तत्स्वयमेवात्मैवव्याक्रियतविआअक्रियतविस्पष्टंनामरू
पविशेषावधारणमर्यादंव्यक्तीभावमापद्यत॥सामर्थ्यादाक्षिप्तनियंतृकर्तृसाधनक्रियानिमित्तंअसौनामेतिसर्वनाम्नाऽविशेषाऽभिधा
नेननाममात्रंव्यपदिशतिदेवदत्तोयज्ञदत्तइतिवानामास्येत्यसौनामायं क्षिप्तोनियंताजनयिताकर्त्ताचोत्पत्तौसाधनक्रियाकरणव्यापारस्त
न्निमित्तंतदपेक्ष्यव्यक्तीभावमापद्यतइतियोजनानामसामान्यंदेवदत्तादिनाविशेषनाम्नासंयोज्यसामान्यविशेषवानर्थोनामव्याकरणवाक्येविवक्षि
तइत्याह॥असावित्यादिना॥असौशब्दःश्रोतोव्यत्ययत्वेननेयोरूपसामान्यंशुक्लकृष्णादिविशेषेणसंयोज्योच्यतेरूपव्याकरणवाक्येनेत्याह ॥

तथेत्यादिना॥ अव्याकृतमेवव्याकृतात्मनाव्यक्तमित्येतत्सुप्तप्रबुद्धदृष्टांतेनस्पष्टयति॥ तदिदमिति॥ तद्धेत्यत्रमूलकारणमुक्त्वातन्नामरू
पाभ्यामित्यादिनातत्कार्यमुक्तमिदानींप्रवेशवाक्यस्यसशब्दापेक्षितमर्थमाह॥ यदर्थइति कांडद्वयात्मनोवेदस्यारंभोयस्यपरस्यप्रतिपत्त्य
र्थोविज्ञायते॥ कर्मकांडंहिस्वार्थानुष्ठानाहितचित्तशुद्धिद्वारातत्त्वज्ञानोपयोगीष्यतेज्ञानकांडंतुसाक्षादेवतत्रोपयुज्यतेसर्वेवेदायत्पदमाम
नंतीतिचश्रूयतेसपरोऽत्रप्रविष्टोदेहादावितियोजना॥ सर्वस्याम्नायस्यब्रह्मात्मनिसमन्वयमुक्त्वातत्रविरोधसमाधानार्थमाह॥ यस्मिन्निति॥ अ
ध्यासस्यचतुर्विधख्यातीनामन्यतमत्वंवारयति॥ अविद्ययेति॥ तस्यामिथ्याज्ञानत्वेनसादित्वादनाद्यध्यासहेतुत्वासिद्धिरित्याशंक्याह॥ स्वाभावि

तथेदमितिशुक्लकृष्णादीनामविशेषः इदंशुक्लमिदंकृष्णंवारूपमस्येतीदंरूपः॥ तदिदमव्याकृतंवस्त्वेतर्हीतस्मिन्नपिकालेना
मरूपाभ्यामेवव्याक्रियतेऽसौनामायमिदंरूपइति॥ यदर्थः सर्वशास्त्रारंभोयस्मिन्नविद्ययास्वाभाविक्याकर्तृक्रियाफलाध्यारोप
णाकृतायःकारणंसर्वस्यजगतोयदात्मकेनामरूपे॥ सलिलादिवस्वच्छान्मलमिवफेनमव्याकृतेव्याक्रियेते

क्येति॥ विद्याप्रागभावत्वम
विद्यायाव्यावर्त्तयति॥ कर्त्रिति॥ नहितदुपादानत्वमभावत्वेसंभवतिनचोपादानांतरमस्तीतिभावः॥ अन्वयस्तुसर्वत्रयच्छब्दस्यपूर्ववत्द्रष्टव्यः॥ आत्म
निकर्तृत्वाध्यासस्याविद्याकृतत्वोक्त्यासमन्वयेविरोधःसमाहितःसंप्रत्यध्यासकारणस्योक्तत्वेपिनिमित्तोपादानभेदंसांख्यवादमाशंक्योक्तमेवकार
णंतद्भेदनिराकरणार्थंकथयति॥ यःकारणमिति श्रुतिस्मृतिवादेषुपरस्यतत्कारणत्वंप्रसिद्धमितिभावः॥ नामरूपात्मकस्यद्वैतस्याविद्याविद्यमा
नदेहत्वाद्विद्यापनोद्यत्वंसिध्यतीत्याह॥ यदात्मकेति॥ व्याकर्तुरात्मनःस्वभावतःशुद्धत्वेदृष्टांतमाह॥ सलिलादिति॥ व्याक्रियमाणयोर्नामरू
पयोःस्वतोऽशुद्धत्वेदृष्टांतमाह॥ मलमिवेतियथाफेनादिजलोत्थंतन्मात्रमेवतथाऽज्ञातब्रह्मोत्थंजगद्ब्रह्ममात्रंतज्ज्ञानबाध्यंचेतिभावः ॥

नित्यशुद्धत्वादिलक्षणमपिवस्तुनस्वतोऽज्ञाननिवर्त्तकंकेवलस्यातत्साधकत्वाद्वाक्योत्थबुद्धिरस्यारूढंतुतथेतिमन्वानोब्रूते यश्चेति॥आकाशो वैनामनामरूपयोर्निर्वहितातेयदंतरातद्ब्रह्मेतिश्रुतिमाश्रित्याह॥ताभ्यामिति॥नामरूपात्मकद्वैतासंस्पर्शित्वादेवनित्यशुद्धत्वंअशुद्धेर्द्वैतसं बंधाधीनत्वात्तत्राविद्याप्रयोजिकेत्यभिप्रेत्यतत्त्वंबंधंनिषेधति बुद्धेति॥तस्मादेवदुःखाद्यनर्थासंस्पर्शित्वमाह॥मुक्तेति॥विद्यादशायांशुध्यादि सद्भावेपिबंधावस्थायांनैवमितिचेन्नेत्याह॥स्वभावइति॥अव्याकृतवाक्योक्तमज्ञातंपरमात्मानंपरामृश्यति॥सइति॥तमेवकार्यस्यप्रत्यंचंनि

यश्चताभ्यांनामरूपाभ्यांविलक्षणःस्वतोनित्यशुद्धबुद्धमुक्तस्वभावःसएषोऽव्याकृतेआत्मभूतेनामरूपेव्याकुर्वन्ब्रह्मादिस्तंबप र्यंतेषुदेहेष्विहकर्मफलाश्रयेष्वशनायादिमत्सुप्रविष्टः॥नन्वव्याकृतंस्वयमेवव्याक्रियतेत्युक्तंकथमिदानीमुच्यतेपरएवात्मा

तद्धेदमप्येतर्हिनामरूपाभ्यामेवव्याक्रियतेसौनामायमिदंरूपइतिसएषइहप्रविष्ट

व्याकृतंव्याकुर्वन्निहप्रविष्टइति॥नैषदोषःपरस्यात्मनोऽव्याकृतजगदात्मत्वेनविवक्षितत्वादाक्षिप्तनियंतृकर्त्तृक्रियानिमित्तंहि जगदव्याकृतंव्याक्रियतेत्यवोचाम

दिशति॥एषइति॥आत्माहिस्वतोनित्यशुद्धत्वादिरूपोपिस्वाविद्यावष्टंभान्नामरूपेव्याकरोतीतित त्सर्जनस्याविद्यामयत्वंविवक्षित्वाह॥अव्याकृतेइति॥तयोरात्मनाव्याकृतत्वेतदतिरेकेणाभावःफलतीतिमत्वाविशिनष्टि॥आत्मेति॥जनिम न्मात्रमिहशब्दार्थंकथयति ब्रह्मादीति॥तत्रैवदुःखादिसंबंधोनात्मनीतिमन्वानोविशिनष्टि॥कर्मेति॥ब्रह्मात्मैक्यपदद्वयसामानाधिकरण्याधि गतेहेतुमाह॥प्रविष्टइति॥परमात्मास्रष्टास्रष्टेप्रविष्टोजगतीत्यादिष्टमाक्षिपति॥नन्विति॥पूर्वापरविरोधंसमाधत्ते नेत्यादिना॥व्याक्रियतेतिकर्मकर्त्रे

आसिन्नेति॥मुच्यतेवत्सः स्वयमेवेतिवत्कर्मकर्त्तरिलकारोव्याकरणसौकर्यापेक्षयासत्येव कर्त्तरिनिर्वहतीतिभावः॥अव्याकृतशब्दस्यनियंत्रादियु
क्तजगद्वाचित्वेहेत्वंतरमाह॥इदंशब्देति॥कथमुक्तसामानाधिकरण्यमात्राद्व्याकृतस्यजगतोनियंत्रादियुक्तत्वंतत्राह॥यथेति॥नियंत्रादीत्यादिश
ब्देनकर्त्तृकरणादिग्रहणं॥निमित्तादीत्यादिपदेनोपादानमुच्यते॥विमतंनियंत्रादिसापेक्षंकार्यत्वात्संप्रतिपन्नवदित्यर्थः॥कस्तर्हिप्रागवस्थेसंप्र
तितनेचजगतिविशेषस्तत्राह॥व्याकृतेति॥कथंपुनरव्याकृतेनजगद्वाचिनापरोगृह्यतेएकस्यशब्दस्यानेकार्थत्वायोगादतआह॥दृष्टश्चेति॥उक्त

इदंशब्दसामानाधिकरण्याच्चाव्याकृतशब्दस्ययथेदंजगन्नियंत्राद्यनेककारकनिमित्तादिविशेषवद्व्याकृतंतथाऽपरित्यक्तान्य
तमविशेषवदेवतदव्याकृतंव्याकृताव्याकृतमात्रंतुविशेषोदृष्टश्चलोकेविवक्षातःशब्दप्रयोगोग्राममआगतोग्रामःशून्यइतिकदा
चिद्ग्रामशब्देननिवासमात्रविवक्षायांग्रामःशून्यइतिशब्दप्रयोगोभवति॥कदाचिन्निवासिजनविवक्षायांग्राममआगतइतिकदाचि
दुभयविवक्षायामपिग्रामशब्दप्रयोगोभवतिग्रामंचनप्रविशेदितियथातद्वदिहापिजगदिदमव्याकृतंव्याकृतंचेत्यभेदविवक्षाया
मात्मानात्मनोर्भवतिव्यपदेशःतथेदंजगदुत्पत्तिविनाशात्मकमितिकेवलजगद्व्यपदेशस्तथामहानजआत्माऽस्थूलोऽनणुःसएषने
तिनेतीत्यादिकेवलआत्मव्यपदेशःननुपरेणव्याकर्त्राव्याकृतंसर्वतोव्याप्तंसर्वदाजगत्सकथमिहप्रविष्टःपरिकल्प्यतेऽप्रविष्टोहिदेशःप
रिच्छिन्नेनप्रवेष्टुंशक्यतेयथापुरुषेणग्रामादिः॥ मेवस्फुटयति॥कदाचिदिति॥उभयविवक्षयाग्रामशब्दप्रयोगस्यदार्ष्टांतिकमाह॥तद्वदिति
इहेत्यव्याकृतवाक्योक्तिः॥निवासमात्रविवक्षयाग्रामशब्दप्रयोगस्यदार्ष्टांतिकमाह॥तथेति॥निवासिजनविवक्षयातत्प्रयोगस्यापिदार्ष्टांतिकंक
थयति॥तथामहानिति॥अव्याकृतवाक्यपरस्यप्रकृतत्वात्तस्यप्रवेशवाक्येसशब्देनपरामृष्टस्यसशेषकार्येप्रवेशउक्तस्तंचप्रकारांतरेणाक्षिपति॥

कथमितिसूचितामनुपपत्तिमेवस्पष्टयति॥ अप्रविष्टोहीति॥ दृष्टांतावष्टंभेनप्रवेशवादीशंकते॥ पाषाणेति॥ तदेवविवृणोति॥ अथापीत्यादिना॥ परस्यपरिपूर्णस्यक्वचित्प्रवेशाभावेपीतियावत्॥ तच्छब्दः सृष्टकार्यविषयः॥ धर्मांतरंजीवाख्यं॥ दृष्टांतंव्याचष्टे॥ यथेतिपाषाणादावाद्यः सर्पादिस्तत्रप्रविष्टइतिशंकापोहार्थंसहजंविशेषणं॥ सर्पादेरस्मादिरूपेणस्थितभूतपंचकपरिणामत्वात्तत्रसहजत्वंपाषाणादौया निभूतानिस्थितानितेषांपरिणामः सर्पादिस्तद्रूपेणतत्रभूतानामनुप्रवेशवदपरिछिन्नस्यापिपरस्यजीवाकारेणबुध्यादौप्रवेशसिद्धिरित्य

नाकाशेनकिंचित्नित्यप्रविष्टत्वात्पाषाणेसर्पादिवद्धर्मांतरेणेतिचेद्यथापिस्यान्नपरआत्मास्वेनैवरूपेणप्रविवेशकिंतर्हितत्स्य एवधर्मांतरेणोपजायतेतेनप्रविष्टइत्युपचर्यते॥ यथापाषाणेसहजोंतस्थः सर्पोनारिकेलेवातोयंन॥ तत्सृष्ट्वातदेवानुप्राविशदितिश्रुतेः॥ यः स्रष्टासभावांतरमनापन्नएवकार्यंसृष्ट्वापश्चात्तत्प्राविशदितिहिश्रूयते॥ यथाभुक्त्वागच्छतीतिभुजिगमिक्रिययोः पूर्वापरकालयोरितरेतरविच्छेदोः विशिष्टश्चकर्त्तातद्वदिहापिस्यात् नतुतत्स्यस्यैवभावांतरोपजननंस्यतत्संभवति॥ नचस्थानांतरेणवियुज्यस्थानांतरसंयोगलक्षणःप्रवेशोनिरवयवस्यापरिछिन्नस्यदृष्टः॥ सावयवएवप्रवेशश्रवणादितिचेत्॥ ॥

र्थः॥ आक्षेप्ताब्रूते॥ नेति॥ तदेवस्पष्टयति॥ यः स्रष्टेति॥ ननुतक्ष्णानिर्मितेवेश्मनितक्ष्णोन्यस्यापिप्रवेशोदृश्यते॥ तथापरेणसृष्टेजगत्यन्यस्यप्रवेशोभविष्यतिनेत्याह॥ यथेति॥ पाषाणसर्पन्यायेनकार्यस्यस्यैवपरस्यजीवाख्येपरिणामेतत्सृष्ट्वेत्यादिश्रवणमनुपपन्नमितिव्यतिरेकंदर्शयति॥ नत्विति॥ अस्तुतर्हिपरस्यमार्जारादिवत्पूर्वावस्थात्यागेनावस्थांतरसंयोगात्माप्रवेशोनेत्याह॥ नचेति॥ निरवयवोऽपरिछिन्नश्चात्मातस्यस्थानांतरेणवियोगंप्राप्यस्थानांतरेणसहसंयोगलक्षणोयः प्रवेशः ससावयवेपरिछिन्नेचमार्जारादौदृष्टप्रवेशसदृशोनभवतीतियोजना वियुज्येतिपाठेतु नेंनस्थानांतरसंयोगलक्षणःप्रवेशोनिरवयवस्यापरिछिन्नस्यदृष्टइतिपाठः ६

सावयवइति॥प्रवेशश्रुतेरन्यथोपपत्तेर्वक्ष्यमाणत्वान्नैवमितिपरिहरति॥नेत्यादिना॥अमूर्त्तत्वंनिरवयवत्वं॥पुरुषत्वंपूर्णत्वं॥प्रकारांतरेण
प्रवेशोपपत्तिंशंकते॥प्रतिबिंबेति॥आदित्यादेर्जलादिनासंनिकर्षादिसंभवात्प्रतिबिंबाख्यप्रवेशोपपत्तिरात्मनितुपरस्मिन्नसंगेऽनवछि
न्नेकेनचिदपितदभावान्नयथोक्तप्रवेशसिद्धिरित्याह॥नवस्त्वंतरेणेति॥प्रकारांतरेणचोदयति॥द्रव्यइति॥परस्यापिकार्येप्रवेशइतिशेषः
॥गुणापेक्षयापरस्यवैलक्षण्यंदर्शयन्परिहरति॥नेत्यादिना॥स्वातंत्र्यश्रवणमेषसर्वेश्वरइत्यादि॥पनसादिफलेबीजस्यप्रवेशवत्कार्येपर

न॥दिव्योह्यमूर्त्तः पुरुषोनिष्कलंनिष्क्रियमित्यादिश्रुतिभ्यः सर्वव्यपदेश्यधर्मविशेषप्रतिषेधश्रुतिभ्यश्च॥प्रतिबिंबप्रवेशवत्
इतिचेत्॥न॥वस्त्वंतरेणविप्रकर्षानुपपत्तेः॥द्रव्येगुणप्रवेशवदितिचेत्॥न॥अनाश्रितत्वान्नित्यपरतंत्रस्यैवाश्रितस्यगुणस्यद्र
व्येप्रवेशउपचर्यते॥नतुब्रह्मणः स्वातंत्र्यश्रवणात्तथाप्रवेशउपपद्यते॥फलेबीजवदितिचेत्नसावयवत्ववृद्धिक्षयोत्पत्ति
विनाशादिधर्मवत्वप्रसंगात्॥नचैवंधर्मवत्वंब्रह्मणोऽजोऽजरइत्यादिश्रुतिन्यायविरोधात्॥अन्यएवसंसारीपरिछिन्नइहप्रवि
ष्टइतिचेन्नसेयंदेवतैक्षतेत्यारभ्यनामरूपेव्याकरवाणीतितस्याएवप्रवेशव्याकरणकर्तृत्वश्रुतेस्तथातत्सृष्ट्वातदेवानुप्रावि
शत्॥ स्यप्रवेशः स्यादितिशंकित्वादूषयति॥फलइत्यादिना॥विनाशादीत्यादिशब्देनाऽनात्मत्वानीश्वरत्वादिगृह्यते॥प्रसंगस्येष्टत्वमा
शंक्यनिराचष्टे॥नचेति॥जन्मादीनांधर्माणांधर्मिणोभिन्नत्वासंभवादिन्यायः॥बीज फलयोरवयवावयवित्वंपाषाणसर्पयोराधाराधेयतेत्य
पुनरुक्तिः॥परस्यसर्वप्रकारप्रवेशासंभवेश्रुतेरालंबनंवाच्यमित्याशंक्यपूर्वपक्षमुपसंहरति॥अन्यएवेति॥जगतोहिपरः स्रष्टेतिवेदांतमर्या
दास्रष्टैवचप्रवेष्टाप्रविश्यव्याकरवाणीतिप्रवेशव्याकरणयोरेककर्तृत्वश्रुतेस्तस्मात्परस्मादन्यस्यप्रवेशोनयुक्तिमानितिसिद्धांतयति नेत्यादिना॥

॥तच्छ्रुति॥ नैवेतितिरीयश्रुतिसंवादयति॥

ऐतरेयश्रुतिरपियथोक्तमर्थमुपोद्बलयतीत्याह॥सएतमेवेति॥श्रीनारायणाख्यमंत्रमपिअत्रानुकूलयति॥सर्वाणीति॥वाक्यांतरमुदाहरति॥त्वंकु
मारइति॥अत्रैववाक्यशेषस्यानुगुण्यंदर्शयति॥पुरइति॥उदाहृतश्रुतीनांतात्पर्यमाह॥नपरादिति॥परस्यप्रवेशेप्रविष्टानांमिथोभेदात्तदभिन्न
स्यतस्यापिनानात्वप्रसक्तिरितिशंकतेप्रविष्टानामिति॥नपरस्यानेकत्वमेकत्वश्रुतिविरोधादितिपरिहरति॥नेत्यादिनाविचारंविचरतीतियावत्
परस्यप्रवेशेननानात्वप्रसंगंप्रत्याख्यायदोषांतरंचोदयति॥प्रवेशइति॥तेषांसंसारित्वेपिपरस्यकिमायातंतत्राह॥तदनन्यत्वादिति॥श्रुत्यवष्टंभेनदू

सएतमेवसीमानंविदार्यैतयाद्वाराप्रापद्यत सर्वाणिरूपाणिविचित्यधीरोनामानिकृत्वाभिवदन्यदास्ते॥त्वंकुमारउतवाकुमारीत्वं
जीर्णोदंडेनवंचसि॥पुरश्चक्रे॥रूपंरूपमितिचमंत्रवर्णात्॥नपरादन्यस्यप्रवेशः॥प्रविष्टानामितरेतरभेदात्परस्यानेकत्वमितिचेत्
॥न॥एकोदेवोबहुधासंनिविष्टःएकःसन्बहुधाविचारत्वमेकोसिबहूननुप्रविष्टःएकोदेवःसर्वभूतेषुगूढःसर्वव्यापीसर्वभूतांतरा
त्मेत्यादिश्रुतिभ्यःप्रवेशउपपद्यतेनोपपद्यतइतितिष्ठतुतावत्प्रविष्टानांसंसारित्वात्तदनन्यत्वाच्चपरस्यसंसारित्वमितिचेत्॥न॥अश
नायाद्यत्ययश्रुतेः॥सुखित्वदुःखित्वादिदर्शनान्नेतिचेत्॥न॥नलिप्यतेलोकदुःखेनबाह्यइतिश्रुतेः॥प्रत्यक्षादिविरोधादयुक्तमितिचे
त्॥नोपाध्याश्रयज नितविशेषविषयत्वात्प्रत्यक्षादेः॥

षयति॥नेति॥अनुभवमनुसृत्यशंकते॥सुखीति॥नासंसारित्वमितिशेषः॥गूढाभि
संधिरुत्तरमाह॥नेति॥आगमोहिपरस्यासंसारित्वेमानंत्वयोच्यते॥सचाध्यक्षविरुद्धः॥स्वार्थेनमानंनचवैपरीत्यंज्येष्ठत्वेनबलवत्त्वादितिशंकते॥
प्रत्यक्षादीतिशंकितेपूर्ववादिनिस्वाशयमाविष्कृतवतिसिद्धांतीस्वाभिसंधिमाह॥नोपाधीति॥उपाधिरंतःकरणंतदाश्रयत्वेनजनितोविशेषश्चि
दाभासस्तद्गतदुःखादिविषयत्वात्प्रत्यक्षादेराभासत्वात्तेनात्मन्यसंसारित्वागमस्यनविरोधोस्तीत्यर्थः॥किंच॥

प्रत्यक्षादीनामनात्मविषयत्वादात्मविषयत्वाच्चागमस्य भिन्नविषयतया नानयोर्मिथो विरोधोऽस्तीत्यभिप्रेत्यात्मनोऽध्यक्षाद्यविषयत्वे श्रुतीरुदाहरति॥ नदृष्टेरिति॥ सुख्यहमित्यादिप्रतिभासस्य तर्हि का गतिरित्याशंक्य पूर्वोक्तमेव स्मारयति॥ किं तर्हीति॥ बुध्यादिरुपाधिस्तत्रात्मप्रतिच्छाया तत्प्रतिबिंबस्तद्विषयमेव सुख्यहमित्यादिविज्ञानमिति योजना॥ आत्मनो दुःखित्वाभावे हेत्वंतरमाह॥ अयमिति॥ अयं देहोऽहमिति दृश्येन द्रष्टुस्तादात्म्याध्यासदर्शनाद्दृश्यविशिष्टस्यैव प्रत्यक्षविषयत्वान्न केवलस्यात्मनो दुःखादिसंसारोऽस्तीत्यर्थः॥ किंच अस्थूलादिविशेषणमक्षरं प्रक्रम्य तस्यैव प्रत्यगात्मत्वं दर्शयंती श्रुतिरात्मनः संसारित्वं वारयतीत्याह॥ नान्यदिति॥ किंच॥ पादयोर्दुःखं शिरसि दुःखमिति

नदृष्टेर्द्रष्टारं पश्येर्विज्ञातारमरे केन विजानीयादविज्ञातं विज्ञात्रित्यादिश्रुतिभ्यो नात्मविषयं विज्ञानं॥ किं तर्हि बुध्याद्युपाध्यात्मप्रतिच्छायाविषयमेव सुखितोऽहं दुःखितोऽहमित्येवमादि प्रत्यक्षविज्ञानमयमहमिति विषयेण विषयिणः सामानाधिकरण्योपचारात्॥ नान्यदतोऽस्ति द्रष्टृ इत्यन्यात्मप्रतिषेधाच्च॥ देहावयवविशेष्यत्वाच्च सुखदुःखयोर्विषयधर्मत्वमात्मनस्तु कामाय इत्यात्मार्थत्वश्रुतेरयुक्तमिति चेत्॥

देहावयवावच्छिन्नत्वेन तत्प्रतीतेस्तद्धर्मत्वनिश्चयान्नात्मनि संसारित्वं प्रामाणिकमित्याह॥ देहेति॥ श्रुतिवशादात्मनः संसारित्वं शंकते॥ आत्मनस्त्विति॥ सुखं तावदात्माश्रयमात्मनस्तु कामायेति सुखसाधनस्यात्मार्थत्वश्रुतेरतस्तदविनाभूतं दुःखमपि तत्रेत्यात्मन्यसंसारित्वमयुक्तमित्यर्थः॥ आविद्यकसंसारित्वानुवादेनात्मनो निरतिशयानंदत्वप्रतिपादकमात्मनस्तु कामायेत्यादिवाक्यमिति मत्वाह॥ नेति॥ तदाविद्यकसंसारानुवादीत्यत्र गमकमाह॥ यत्रेति॥ अनेन हि वाक्येनाविद्यावस्थायामेवात्मार्थत्वं सुखादेरस्यावगम्यते ऽतो न तस्यात्मधर्मत्वमित्यर्थः॥ आत्मनि संसारित्वस्याप्रतिपाद्यत्वेऽपि गमकमाह॥ तत्केनेति॥

आत्मनोऽसंसारित्वे विहृदनुभवमनुकूलयितुं च शब्दः तर्कशास्त्रप्रामाण्यादात्मनः संसारित्वमिति शंकते॥ तार्किकेति॥ बुध्यादिचतुर्दशगुणवा
नात्मेति तार्किकसमयस्तेन विरोधात्तस्यासंसारित्वमयुक्तं॥ तर्काविरुद्धो हि सिद्धांतो भवतीत्यर्थः॥ सर्वतर्काविरोधी वा कतिपयतर्काविरोधी
वा सिद्धांतः॥ नाद्यः॥ तार्किकादिसिद्धांतस्यापि मिथो वैदिकतर्कैश्च विरोधादसिद्धिप्रसंगात्॥ द्वितीये तु श्रौततर्काविरोधादात्मासंसारित्वसिद्धां
तोऽपि सिध्येदित्यभिसंधायाह॥ न युक्त्यापीति॥ किंच॥ दुःखादिरात्मधर्मो न भवति वेद्यत्वाद्रूपादिवदित्याह॥ नहीति॥ प्रत्यक्षाविषयत्वोक्त्या प्र
तीचस्तद्विषयदुःखाविशेष्यत्वमयुक्तं॥ प्रत्यक्षाप्रत्यक्षयोः शब्दाकाशयोरिव दुःखात्मनोरपि गुणगुणित्वसंभवादिति शंकते आकाशस्येति॥ यत्र ध

न॥ यत्र वा अन्यदिव स्यादित्यविद्याविषयात्मार्थत्वाभ्युपगमात्तत्केन कं पश्येन्नेह नानातत्र को मोहः कः शोक इत्यादिना विद्याविषये
तत्प्रतिषेधाच्च॥ नात्मधर्मत्वं तार्किकसमयविरोधादयुक्तमिति चेत् न युक्त्याप्यात्मनो दुःखित्वानुपपत्तेः॥ न हि दुःखेन प्रत्यक्षविषये
णात्मनो विशेष्यत्वं प्रत्यक्षाविषयत्वादाकाशस्य शब्दगुणवत्त्ववदात्मनो दुःखित्वमिति चेन्नैकप्रत्ययविषयत्वानुपपत्तेः न हि सुखग्राह
केण प्रत्यक्षविषयेण प्रत्ययेन नित्यानुमेयस्यात्मनो विषयीकरणमुपपद्यते॥ तस्य च विषयीकरणे आत्मन एकत्वाद्विषय्यभावप्रसंग

मेधर्मिभावस्तत्रैकज्ञानगम्यत्वं दृष्टं यथा शुक्लो घट इति तेन द्यापैकं व्यावर्त्तमानं दुःखात्मनोर्धर्मधर्मित्वं व्यावर्त्तयति॥ शब्दाकाशयोरपि गुणगुणिभावो ना
स्माकं संमतः शब्दतन्मात्रमाकाशमिति स्थितेरित्याशयेनाह नैकेति॥ कथं तदनुपपत्तिस्तत्राह॥ नहीति॥ नित्यानुमेयस्येति जरत्तार्किकमतानुसारेण
सांख्यसमयानुसारेण चोक्तं॥ आधुनिकं तार्किकं प्रत्याह॥ तस्य चेति॥ सुखादिवदात्मनोऽपि प्रत्यक्षेण विषयीकारे सत्येकस्मिन्देहे तदैक्यसंमतेरात्मां
तरस्य तत्रायोगादेकत्र भोक्तृद्वयानिष्टेः पुरुषांतरस्यान्यप्रत्यप्रत्यक्षत्वाद्द्रष्टृभावादात्मदृश्यत्वासिद्धिरित्यर्थः॥ दीपस्य सव्यवहारहेतुत्वेन विषयविषयित्ववदेक

ऐकज्ञानेगम्यत्वं ४ अहंप्रत्ययेन २

सामान्यतोदृष्टमपि देहेऽहंभावोनास्तीति शंकते॥

एकस्यैवेति॥आत्मनोविषयविषयित्वंकात्स्न्येनांशाभ्यांवाआद्येपियुगपत्क्रमेणवानाद्यइत्याह नयुगपदिति॥क्रियायांगुणत्वंकर्तृत्वंतत्रप्राधा
न्यंकर्मत्वमतोयुगपदेकक्रियांप्रत्येकस्यसाकल्येनगुणप्रधानत्वायोगान्नैवमित्यर्थः॥नद्वितीयः॥एकभावेन्याभावादितिमत्वाकल्पांतरंप्र
त्याह॥आत्मनीति॥एतेनप्रदीपदृष्टांतोपिप्रतिनीतस्तस्यांशाभ्यांतद्भावेप्रकृतानअनुकूलत्वात्॥ननुविज्ञानवादिनोयुगपदेकस्यविज्ञानस्यसा
कल्येनग्राह्यग्राहकत्वमुपपद्यंतितथात्वदात्मनोपिस्यात्तत्राह॥एतेनेति॥एकस्योभयत्वनिरासेनेत्यर्थः॥माभूत्प्रत्यक्षमागमिकंपारिभाषिकंचात्म
नःसंसारित्वमानुमानिकंतुभविष्यतिदुःखादिकंचिदाश्रितंगुणत्वाद्रूपवदित्याश्रयेसिद्धेपरिशेषादात्मनस्तदाश्रयत्वादित्याशंक्याह॥प्रत्यक्षे

एकस्यैवविषयविषयित्वंदीपवदितिचेन्नयुगपदसंभवादात्मन्यंशानुपपत्तेश्च॥एतेनविज्ञानस्यग्राह्यग्राहकत्वंप्रत्युक्तं॥प्रत्य
क्षानुमानविषययोश्चदुःखात्मनोर्गुणगुणित्वेनानुमानं॥दुःखस्यनित्यमेवप्रत्यक्षविषयत्वाद्रूपादिसामानाधिकरण्याच्च॥
मनःसंयोगजत्वेप्यात्मनिदुःखस्यसावयवत्वविक्रियावत्वानित्यत्वप्रसंगान्नह्यविकृत्यसंयोगिद्रव्यंगुणःकश्चिदुपयन्नपयन्वाद
ृष्टःक्वचित्

ति॥नहिमिथोविरुद्धयोर्गुणगुणित्वमनुमेयंदुःखादेश्चसाभासबुद्धिस्थत्वात्पारिशेष्यासिद्धिरित्यर्थः॥साभासांतःकरणनिष्ठंदुः
खादीत्यत्रप्रमाणाभावात्कथंसिद्धसाधनत्वमित्याशंक्यदुःख्यहमित्यादिप्रत्यक्षस्यतत्रप्रमाणत्वादुक्तानुमानस्यसिद्धसाध्यतयापरिशेषासिद्धि
रित्याह॥दुःखस्येति॥यत्ररूपादिमतिदेहेदाहच्छेदादिदृष्टंतत्रैवतत्कृतदुःखाद्युपलंभान्नात्मनस्तद्वत्वमितिहेत्वंतरमाह॥रूपादीति॥यत्वात्म
मनःसंयोगादात्मनिबुध्यादयोनववैशेषिकागुणाभवंतीतितद्दूषयति॥संयोगेति॥दुःखस्यात्मनिमनःसंयोगजत्वेभ्युपगतेपिमनोवदात्मनःसं
योगित्वात्सावयवत्वादिप्रसंगादात्मत्वमेवनस्यादित्यर्थः॥तत्रसंयोगित्वेनसक्रियत्वंसाधयति॥नहीति॥संप्रतिसक्रियत्वेनसावयवत्वंप्रतिपाद

यद्वादुःखाद्यात्मनोविक्रियेतिकेश्चिदिष्टत्वात्तस्यसक्रियत्वमविरुद्धमित्याशंक्याह॥नचेति॥आत्मानपरिणामीनिरवयवत्वान्नभोवदिति भावः॥किंच॥आत्मानगुणीनित्यत्वात्सामान्यवदित्याह॥अनित्येतिनित्यंपश्यामइतिशेषः॥वाशब्देनअनुकर्षार्थः आकाशेव्यभिचारमाशं क्याह॥नचेति॥आकाशस्यनित्यत्वंचेदात्मनआकाशःसंभूतइत्यादिश्रुतिविरोधःस्यादितिसूचयितुमागमवादिभिरित्युक्तं॥परमाण्वादौव्यभि चारमाशंक्याह॥नचान्यइतिनतावदणवःसंतित्र्यणुकेतरसत्वेमानाभावात्दिशश्चाकाशेंतर्भवंतिकालस्तुसर्वेनिमेषाजज्ञिरइत्यादिश्रुतेरुत्प त्तिमान्मनोप्यन्नमयंश्रुतिप्रसिद्धमतोनक्वचिद्व्यभिचारइतिभावः॥यस्मिन्विक्रियमाणेतदेवेदमितिबुद्धिर्नविहन्यतेतदपिनित्यमितिन्याये

नचनिरवयवंविक्रियमाणंदृष्टंक्वचिदनित्यगुणाश्रयंवानित्यंनचाकाशआगमवादिभिर्नित्यतयाभ्युपगम्यतेनचान्योदृष्टांतोस्ति विक्रियमाणमपितत्त्वत्वयानिवृत्तेर्नित्यमेवेतिचेन्न द्रव्यस्यावयवान्यथात्वव्यतिरेकेणविक्रियानुपपत्तेः॥सावयवत्वेपिनित्य त्वमितिचेन्नसावयवस्यावयवसंयोगपूर्वकत्वेसतिविभागोपपत्तेः॥वज्रादिष्वदर्शनान्नेतिचेन्नानुमेयत्वात्संयोगपूर्वत्वस्यविभाग

नपरिणामवादीशंकते॥विक्रियमाणमिति॥तत्त्वत्ययःतदेवेदमितिप्रत्ययः॥विक्रियांवदताद्रव्यस्यावयवान्यथात्वंवाच्यंतदेवतस्यानित्यत्वंअत्यं ताभावस्यप्रामाणिकत्वेदुर्वचत्वादितिपरिहरति॥नद्रव्यस्येति॥आत्मनःसक्रियत्वंसावयवत्वंवास्तुतथापिनानित्यत्वमितिस्याद्वादीशंकते॥ सावयवत्वेपीति॥यत्सावयवंतदवयवसंयोगकृतंयथापटादितथासतिसंयोगस्यविभागावसानत्वादवयवविभागेद्रव्यनाशोवश्यंभावी तिदूषयति॥नसावयवस्येति॥यत्सावयवंतदवयवसंयोगपूर्वकमितिनव्याप्तिःसावयवेष्वेववज्रादिष्ववयवसंयोगपूर्वकत्वेप्रमाणाभावादितिशं कते॥वज्रादिष्विति॥विमतमवयवसंयोगपूर्वकंसावयवत्वात्पटवदित्यनुमानेनपरिहरति॥नानुमेयत्वादिति॥आत्मनोमनःसंयोगजन्यदुःखादिगुणवत्वेसा

दुःखित्वमद्वयं

तस्मादिति॥आत्मनोनर्थध्वंसार्थं शास्त्रारंभान्यथानुपपत्त्या संसारित्वेतत्यर्थापत्त्याशंकते॥परस्येति॥अविद्याविद्यमानमात्मस्थमनर्थभ्रमं निराकर्तुं तदारंभः संभवतीत्यन्यथोपपत्त्यासमाधत्ते॥नाविद्येति॥परस्यैवाविद्याकृतसंसारित्वभ्रांतिध्वंसार्थं शास्त्रमित्येतद्दृष्टांतेन स्पष्टयति॥आत्मनीति॥यत्तु परस्या दुःखित्वमन्यस्य दुःखिनोऽसत्त्वं तत्राह॥कल्पितेति॥नतावत्परस्मादन्यो दुःखीनान्योतोस्ति द्रष्टेत्यादिश्रुतेः॥नपुनरनाद्यनिर्वाच्याज्ञानसंबंधात्तज्जन्यैर्बुद्ध्यादिभिरैक्याध्यासमापन्नः सं—स्यतितथा च कल्पिताकारद्वारा दुःखिनः परस्यात्मनोंगीकारात् नार्थापत्तेरुत्थानमित्यर्थः॥परस्य प्रवेशे प्राप्तं

तस्मान्नात्मनो दुःखाद्यनित्यगुणाश्रयोपपत्तिः॥परस्मादुःखित्वेऽन्यस्य च दुःखिनोऽभावे दुःखोपशमनाय शास्त्रारंभानर्थक्यमिति चेन्नाविद्याध्यारोपितदुःखित्वभ्रमापोहार्थत्वादात्मनि प्रकृतसंख्यापूरणभ्रमापोहवत्॥कल्पितदुःखात्माभ्युपगमाच्च॥जलसूर्यादिप्रतिबिंबवदात्मप्रवेशश्च प्रतिबिंबवद्व्याकृते कार्ये उपलभ्यत्वं॥प्रागुत्पत्तेरनुपलब्ध आत्मापश्चात्कार्ये च सृष्टे व्याकृते बुद्धेरंतरुपलभ्यमानः सूर्यादिप्रतिबिंबवज्जलादौकार्ये सृष्ट्वा प्रविष्ट इव लक्ष्यमाणो निर्दिश्यते॥स एष इह प्रविष्टः॥तत्सृष्ट्वा तदेवानुप्राविशत्स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत॥सेयं देवतैक्षत हंताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य एवमादिभिः

दोषपरंपरां पराकृत्य तत्प्रवेशस्वरूपं निरूपयति॥जलेति॥यथा जले सूर्यादेः प्रतिबिंबलक्षणः प्रवेशो दृश्यते तथात्मनोपि सृष्टे कार्ये काल्पनिकः प्रवेश इत्यर्थः॥अनवच्छिन्नाद्वयचिद्धातोर्नास्त्यंतरेण संनिकर्षासंभवान्न प्रतिबिंबाख्यप्रवेशः संभवतीत्याशंक्यावस्त्वंतरकल्पनया कल्पितसंनिकर्षाद्यादाय प्रतिबिंबपक्षं साधयति॥आत्मेति॥तदेव प्रपंचयति॥प्रागुत्पत्तेरित्यादिना॥स्वाभिप्रेतं प्रवेशं प्रतिपाद्य परेष्टं प्रत्याचष्टे॥नत्विति॥कुतश्चिद्दिशो देशात्कालाद्वापक्रमणेन दिगंतरे देशांतरे कालांतरे च प्राप्तिलक्षण इति यावत् ॥

यत्तु परस्मादन्यस्य प्रवेष्टृत्वमिति तत्राह॥ नचेति॥ अथेदं प्रवेशादिवस्तुतो विद्यमानमस्तु किमित्याविद्यं कल्प्यते तत्राह॥ उपलब्धीति॥ आत्मज्ञा नार्थत्वेन प्रवेशादीनां कल्पितत्वात्तद्वाक्यानां नस्वार्थे पर्यवसानमित्यर्थः॥ फलवत्संनिधावफलं तदंगमिति न्यायमाश्रित्योक्तमेव प्रपंचय ति॥ उपलब्धेरित्यादिना॥ ततः शब्दो भक्तियोगपरामर्शी॥ तदित्यात्मज्ञानमुच्यते॥ तस्याग्र्यत्वं साधयति॥ प्राप्यते हीति॥ सृष्ट्यादिवाक्यानामे

न तु सर्वगतस्य निरवयवस्य दिग्देशकालांतरापक्रमणप्राप्तिलक्षणः प्रवेशः कदाचिदप्युपपद्यते नच परादात्मनोऽन्योस्ति द्रष्टा नान्यदतोस्ति द्रष्टृ नान्यदतोस्ति श्रोतृ इत्यादिश्रुतेरित्यवोचाम॥ उपलब्ध्यर्थत्वाच्च सृष्टिप्रवेशस्थित्यप्ययवाक्यानामुपलब्धेः पुरुषार्थश्रवणादात्मानमेवावेत् तस्मात्तत्सर्वमभवत्॥ ब्रह्मविदाप्नोति परं॥ स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति॥ आचा

आनखाग्रेभ्यो यथा क्षुरः क्षुरधाने वहितः स्या

र्यवान्पुरुषो वेद॥ तस्य तावदेव चिरमित्यादिश्रुतिभ्यः ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरं॥ तत्प्रयग्र्यं सर्वविद्यानां प्राप्यते ह्यमृ तं ततइत्यादिस्मृतिभ्यश्च भेददर्शनापवादाच्च सृष्ट्यादिवाक्यानामात्मैकत्वदर्शनार्थपरत्वोपपत्तिस्तस्मात्कार्यस्थस्योपलभ्यत्वमेव प्रवेश उपचर्यते॥ आनखाग्रेभ्यो नखाग्रमर्याद आत्मनश्चैतन्यमुपलभ्यते तत्र कथमिव प्रविष्ट इत्याह॥ कथ्यज्ञानार्थत्वे हेत्वंतर

माह॥ भेदेति॥ कल्पितप्रवेशं प्रतिपादितमुपसंहरति॥ तस्मादिति॥ का पुनरस्य प्रवेशस्य मर्यादेत्याशंक्याह॥ आनखाग्रेभ्य इति॥ संभवति मर्यादांतरे किमिति प्रवेशस्येयमेव मर्यादेत्याशंक्याह॥ नखाग्रेति॥ दृष्टांतद्वयमाकांक्षापूर्वकमुत्थापयति॥ तत्रेति॥ प्रवेशाधारो देहादिः सप्त

बृ॰ र॰
९८

यथेति॥तद्व्याचष्टे॥लोकइति॥तत्रप्रवेशितत्वंक्षुरस्यकथंसिद्धमतआह॥अंतस्थउपलभ्यतेइति॥विश्वंभरस्याग्निविषयत्वंव्युत्पादयतिविश्व
स्येति॥तस्यतद्वर्त्तित्वंमहाभूतत्वाज्जाठरत्वाद्वाद्रष्टव्यं॥काष्ठादावग्नेरवहितत्वेयुक्तिमाह॥तत्रेति॥दृष्टांतद्वयेविवक्षितमंशमनूद्यदार्ष्टांति
कमाह॥यथेत्यादिनाआत्मनोजाग्रत्स्वप्नयोर्देहेद्वयीवृत्तिःस्यात्तुसामान्यवृत्तिरेवेत्यवांतरविभागमाह तत्रहीति॥अवस्थाद्वयंसप्तम्यर्थः॥

भा॰

यथालोकेक्षुरःक्षुरधानेक्षुरोधीयतेस्मिन्निितिक्षुरधानंतस्मिन्नापितोपस्कराधानेक्षुरःअंतस्थोपयोपलभ्यतेऽवहितःप्रवेशितःस्या
यथावाविश्वंभरोग्निर्विश्वस्यभरणाद्विश्वंभरकुलायेनीडेऽग्निःकाष्ठादाववहितःस्यादित्यनुवर्त्तते॥तत्रहिसमथ्यमानउपल
भ्यते॥यथाचक्षुरःक्षुरधानेकदेशेऽवस्थितोयथाचाग्निःकाष्ठादौसर्वतोव्याप्यावस्थितएवंसामान्यतोविशेषतश्चदेहंसंव्याप्याव

द्विश्वंभरोवाविश्वंभरकुलायेतंनपश्यंत्यकृत्स्नोहिस

स्थितआत्मातत्रहिसप्राणनादिक्रियावान्दर्शनादिक्रियावांश्चोपलभ्यते॥तस्मात्तत्रैवप्रविष्टंतमात्मानंप्राणनादिक्रियाविशि
ष्टंनपश्यंतिनोपलभंते॥नन्वप्राप्तप्रतिषेधोयंतंनपश्यंतीतिदर्शनस्याप्रकृतत्वा नकेवलंविशेषवृत्तिरेवतदोपलब्धाकिंतुसामा
न्यवृत्तिश्चेतिचकारार्थः॥अवस्थांतरेसैवेत्यपितस्यैवार्थः॥वाक्यांतरमवतारयितुंभूमिकामाह॥तस्मादिति॥यस्माद्द्वयीवृत्तिरात्मनःशरी
रेदृश्यतेतस्मात्तत्रैवजलसूर्यवद्विद्ययाप्रविष्टोयमितियोजना॥व्याकृताज्जगतःसकाशादात्मानंपृथक्कर्त्तुंतंनपश्यंतीतिवाक्यंतद्व्याच
ष्टे॥तमात्मानमिति॥विशिष्टंपश्यंतोपिकेवलमात्मानंनपश्यंतीतियावत्॥चाक्षुषत्वनिषेधस्येष्टत्वमाशंक्यव्याचष्टे॥नोपलभंतइति॥उक्त

रामः
९८

प्रतिषेधस्यप्राप्तिंदर्शयन्परिहरति॥नेत्यादिना॥तन्नामरूपाभ्यांसएषइत्यादिवाक्यानांज्ञानार्थत्वेमानमाह॥रूपमिति॥विशिष्टस्यदर्शनेपि
पूर्णस्यादर्शनेहेतूक्तिरनंतरवाक्यमित्याह॥तत्रेतिप्रतिज्ञावाक्यार्थेस्थितेसतीतियावत्॥तस्मात्तद्दर्शनेपिपूर्णस्यादर्शनमितिशेषः॥वि
शिष्टस्यापिपूर्णत्वमात्मत्वादन्यथाप्राणनादिकर्तृत्वायोगादितिशंकते॥कुतइति॥प्राणनादिक्रियाकर्त्ताप्राणादिभिःसंहतत्वात्पूर्णोनभव

नैषदोषःसृष्ट्यादिवाक्यानामात्मैकत्वप्रतिपत्त्यर्थपरत्वात्प्रकृतमेवतस्यदर्शनं॥रूपंरूपंप्रतिरूपोबभूवतदस्यरूपंप्रति
चक्षणायेतिमंत्रवर्णात्तत्रप्राणनादिक्रियाविशिष्टस्यादर्शनेहेतुमाह॥अकृत्स्नोऽसमस्तोहियस्मात्सप्राणनादिक्रियाविशिष्टः॥

प्राणन्नेवप्राणोनामभवतिवदन्वाक्पश्यंश्चक्षुःशृण्वञ्छ्रोत्रं

कुतःपुनरकृत्स्नत्वमित्युच्यतेप्राणन्नेवप्राणनक्रियामेवकुर्वन्प्राणोनामप्राणसमाख्यःप्राणाभिधानोभवति॥प्राणनक्रियाक
र्तृत्वाद्धिप्राणःप्राणितीत्युच्यते॥नान्यांक्रियांकुर्वन्यथालावकःपाचकइतितस्मात्क्रियांतरविशिष्टस्यानुपसंहारादकृत्स्नोहिसः
तथावदन्क्रियांकुर्वन्वक्तीतिवाक्पश्यंश्चक्षुश्चष्टेद्रष्टाइतिचक्षुःशृण्वञ्छृणोतीतिश्रोत्रं॥

तीत्युत्तरवाक्यैरुत्तरमाह॥उच्यतइति
॥आत्मनिप्राणशब्दप्रवृत्तिमुपपादयति॥प्राणनक्रियाकर्तृत्वादिति॥तत्कर्तृत्वादात्माप्राणउच्यतेप्राणितीतिव्युत्पत्तेरितियोजनासदृष्टांतमे
वकारार्थमाह॥नान्यामिति॥एवकारार्थमनूद्यहेत्वर्थमुपसंहरति॥तस्मादिति॥स्वापावस्थायांसमस्तकरणोपसंहारेपिप्राणस्यव्यापारदर्शनात्सा
धारण्यावगमात्प्राणन्नित्यादिवाक्यमादौव्याख्यायक्रियाशक्तित्वेनप्राणसादृश्यार्थाद्वाचोवदन्नित्येतत्पूर्वकमुत्तरवाक्यानिव्याचष्टे॥तथेत्यादिना॥

प्राणनवदनाभ्यामनुक्तकर्मेंद्रियव्यापारमुपलक्ष्यवाक्यद्वयतात्पर्यमाह॥प्राणन्नेवेति॥प्राणवागाद्युपाधिद्वारेणात्मनीतिशेषः॥दृष्टिश्रुतिभ्यामनु
क्तज्ञानेंद्रियव्यापारोपलक्षणंकृत्वानंतरवाक्ययोस्तात्पर्यमाह॥पश्यन्निति॥चक्षुराद्युपाधिद्वारात्मनीतिपूर्ववत्॥उक्तबुद्धींद्रियव्यापाराभ्यामनुक्त
तद्व्यापारमनुपलक्ष्यात्मनःस्पृष्टत्वादिपरिच्छेदोनसिध्यतिसंबंधंविनोपलक्षणायोगादित्याशंक्याह नामरूपेत्यादिना॥प्रकाश्यप्रकाशकातिरि
क्तज्ञेयाभावात्तदुपलंभेचचक्षुःश्रोत्रयोरिवत्वगादेरपिकरणत्वादेकार्थत्वरूपसंबंधादुपलक्षणसंभवादात्मनःस्पृष्टत्वादिसिद्धिरित्यर्थः॥तथा

प्राणन्नेवप्राणोवदन्वागित्याभ्यांक्रियाशक्त्युद्भवःप्रदर्शितोभवतिपश्यंश्चक्षुःशृण्वञ्छ्रोत्रमित्याभ्यांविज्ञानशक्त्युद्भवःप्रदर्श्यतेनाम
रूपविषयत्वाद्विज्ञानशक्तेःश्रोत्रचक्षुषीविज्ञानस्यसाधनेविज्ञानंतुनामरूपसाधनंनहिनामरूपव्यतिरिक्तंविज्ञेयमस्तितयोश्चो

मन्वानोमन

पलंभेकरणंचक्षुःश्रोत्रेक्रियाचनामरूपसाध्याप्राणसमवायिनीतस्याःप्राणाश्रयायाअभिव्यक्तौवाक्करणंतथापाणिपादपायूप
स्थाख्यानिसर्वेषामुपलक्षणार्थावागेतदेवहिसर्वंव्याकृतंत्रयंवा॰ पुक्तकर्मेंद्रियव्यापारेणानुक्ततद्व्यापारोपलक्षणादात्मनोनगंतृत्वादिपरिच्छे
दःसंगच्छते॥विनासंबंधमुपलक्षणासिद्धेरित्याशंक्याह॥क्रियाचेत्यादिना सर्वाक्रियानामरूपव्यंग्याप्राणाश्रयाचतत्रप्राणाश्रयनामविषयोच्चा
रणक्रियाव्यंजकत्वंवाचोहस्तादीनांतदाश्रयादानादिव्यंजकत्वात्तस्मादेकाश्रयक्रियाव्यंजकत्वयोगादुपलक्षणसंभवादात्मनोगंतृत्वादिसिद्धिरि
त्यर्थः॥शक्तिद्वयोद्भवोक्त्यासमस्तसंसारस्यप्रतीच्यध्यासोत्रविवक्षितइत्याह॥एतदेवेति॥उद्भूतंशक्तिद्वयमेतच्छब्दार्थः॥उक्तेर्थेवाक्यशेषमनुकूलयति॥

आत्मामन्वानःसन्मनइत्युच्यतेमनुतइतिव्युत्पत्तेरितिवाक्यांतरंव्याचष्टे॥मन्वानइति॥करणेप्रसिद्धस्यमनःशब्दस्यकथमात्मनिवृत्तिरित्याशंक्यव्युत्
तिभेदमाह॥ज्ञानशक्तीत्यादिना॥आत्मादिशब्देभ्योविशेषमाह॥तानीति॥कृत्स्नात्मवस्त्ववद्योतकानिनभवंतीत्येतदेवस्फुटयति॥एवंहीति॥प्राणादि
नांकर्मनामत्वेसतीतियावत्॥अवद्योत्यमानोपिनकृत्स्नोदृष्टःस्यादितिशेषः॥अकृत्स्नदर्शिनोप्यात्मदर्शित्वमाशंक्याह॥सयइति॥आत्मोपासि

——इदंनामरूपंकर्मेतिहिवक्ष्यतिमन्वानोमनोमनुतइतिज्ञानशक्तिविकाशानांसाधारणंकरणंमनःमनुतेनेनेतिपुरुषस्तुक
र्तासन्मन्वानोमनइत्युच्यते॥तान्येतानिप्राणादीन्यस्यात्मनःकर्मनामानिकर्मजानिनामानिकर्मनामान्येवनतुवस्तुमात्रविषया
ण्यतोनकृत्स्नात्मवस्त्ववद्योतकानिएवंह्यसावात्माप्राणनादिक्रिययातत्तत्क्रियाजनितप्राणनादिनामरूपाभ्यांव्याक्रियमाणो

स्तान्यस्यैतानिकर्मनामान्येवसयोतएकैकमुपास्तेनसवेदाकृत्स्नोह्येषोतएकैकेनभवत्या

वद्योत्यमानोपिसयोतोस्मात्प्राणनादिक्रियासमुदायादेकैकंप्राणंचक्षुरितिवाविशिष्टमनुपसंहृतेतरविशिष्टक्रियात्मकंमनसायमात्मे
त्युपास्तेचिंतयतिनसवेदनसम्यग्जानातिब्रह्मकस्मादकृत्स्नोऽसमस्तोहियस्मादेषआत्माअस्मात्प्राणनादिसमुदायादतःप्रविभक्तएकैके
नविशेषणेनविशिष्टइतरधर्मांतरानुपसंहारात्भवतियावदयमेवंवेदपश्याम्यहंशृणोमिस्पृशामीतिवास्वभावप्रवृत्तिविशिष्टंवेदतावदंजसा
कृत्स्नमात्मानंनवेद॥कथंपुनःपश्यन्वेदेत्याह॥ तुरात्मदर्शनासत्त्वमयुक्तमितिशंकित्वापरिहरति॥कस्मादित्यादिना॥तस्माद्विशिष्टात्मदर्शीनब्र
ह्मात्मत्वदर्शीतिशेषः॥उपास्तिर्ज्ञानमुपास्तइतिजानातिनस्वभावादुपासनमित्युक्तत्वात्तथाचजानन्नजानातीतिव्याहतिरित्याशंक्याह॥यावदिति॥यएवंवे

आकांक्षापूर्वकं विद्यासूत्रमवतारयति॥ कथमिति॥ तत्र व्याख्येयं पदमादत्ते॥ आत्मेतीति॥ तद्व्याचष्टे॥ प्राणादीति॥ तस्मिन्दृष्टे पूर्वोक्तदोषराहित्यं दर्शयति॥ स तथेति॥ तत्तद्विशेषणव्याप्तिद्वारेणेति यावत्॥ कथं तत्तद्विशेषोपसंहारी तेन तेनात्मनातिष्ठन्कृत्स्नः स्यात्तत्राह॥ वस्तुमात्रेति॥ स्वतोऽस्य प्राणनादिसंबंधे संभवति किमित्युपाधिसंबंधेनेत्याशंक्याह॥ तथा चेति॥ आत्मनि सर्वोपसंहारवति दृष्टे पूर्वोक्तदोषाभावात्तं पश्यन्नेवात्मदर्शीत्युपसंहरति तस्मादिति॥ यथोक्तात्मोपासने पूर्वोक्तदोषाभावे प्रागुक्तमेव हेतुं स्मारयति॥ एवमिति॥ तस्यार्थं स्फोरयति॥ स्वेनेति॥ वाङ्मनसातीतेनाका

आत्मेत्येव आत्मा इति प्राणादीनि विशेषणानि यान्युक्तानि तानि यस्य स आप्नुवंस्तान्यात्मेत्युच्यते॥ स तथा कृत्स्नविशेषोपसंहारी सकृत्स्नो भवति वस्तुमात्ररूपेण हि प्राणाद्युपाधिविशेषक्रियाजनितानि विशेषणानि व्याप्नोति तथा च वक्ष्यति॥ ध्यायतीव लेलायतीवेति॥ तस्मादात्मेत्येवोपासीत॥ एवं कृत्स्नो ह्यसौ स्वेन वस्तुरूपेण गृह्यमाणो भवति॥ कस्मात्कृत्स्न इत्याशंक्याह॥ अत्रास्मिन्नात्मनि हि यस्मान्निरुपाधिके जलसूर्यप्रतिबिंबभेदा इवादित्ये प्राणाद्युपाधिकृता विशेषाः प्राणादिकर्मजनामाभिधेयाः यथोक्ता ह्येत एकमभिन्नतां भवंति प्रतिपद्यंते अत आत्मेत्येवोपासीतेति॥ आत्मेत्येवोपासीतेति नापूर्वविधिः पक्षे प्राप्तत्वात् यस्मात्सादपरोक्षाद्ब्रह्म कतम आत्मेति योऽयं विज्ञानमय इत्येवमाद्यात्मप्रतिपादनपराभिः श्रुतिभिरात्मविषयं विज्ञानमुत्पादितं यंकारणेन प्रत्यग्भूतेनेति यावत्॥ आकांक्षापूर्वकमुत्तरवाक्यं सतात्स्यर्थमवतार्य व्याकरोति॥ कस्मादित्यादिना॥ तस्माद्यथोक्तमात्मानमेवोपासीतेति शेषः॥ अस्यैव द्योतको हि द्वितीयो हि शब्दः॥ विद्यासूत्रं विधिस्पर्शं विना विवक्षितेऽर्थे व्याख्याय पूर्वविधिरयमिति पक्षं प्रत्याह॥ आत्मेत्येवेति॥ अत्यंताप्राप्तार्थो ह्यपूर्वविधिर्यथा स्वर्गकामोऽग्निहोत्रं जुहुयादिति॥ नायं तथा पक्षे प्राप्तत्वादात्मोपासनस्य तस्य तत्प्राप्तिश्च पुरुषविशेषापेक्षया विचारावसाने स्पष्टीभविष्यतीत्यर्थः॥ इदानीमात्मज्ञानस्याविधेयत्वख्यापनार्थं वस्तुस

उत्पाद्यतामुक्तश्रुतिभिरात्मविज्ञानंकिंतावतेत्यत आह॥ तत्रेति॥ कारकादीत्यादि पदं तद्वांतर भेद विषयं॥ नन्वविद्यायामपनीतायामपि रागद्वेषादि स
द्भावात द्वैधीप्रवृत्तिः स्यान्नहि विद्वद्विदुषोर्व्यवहारे कश्चिद्विशेषः पश्वादिभिश्चाविशेषादिति न्यायादत आह॥ तस्यामिति॥ बाधितानुवृत्तिमात्रान्न
द्वैधीप्रवृत्तिर्बाधिताभिमानमंतरेण तद्योगादिति भावः विदुषः सुषुप्तत्वमावर्त्तयति॥ पारिशेष्यादिति॥ श्रौतज्ञानात्पूर्वमपि सर्वासां चित्तवृत्तीनां
जन्मनैवात्मचैतन्यव्यंजकत्वात्प्राप्तमात्मज्ञानं श्रौते तु ज्ञाने नास्त्यनात्मेति स्फुरणमात्मज्ञानमेवेति नित्यप्राप्तिमभिप्रेत्याह तस्मादिति॥ अस्मिन्पक्षे इति
नित्यप्राप्तत्वपक्षोक्तिः अपूर्वविधिवादीशंकते तिष्ठतु तावदिति॥ सर्वेषां स्वभावतो विषयप्रवणानींद्रियाणि नात्मज्ञानवार्त्तामपि मृष्यंते तत्स्वतः प्राप्त

तत्रात्मस्वरूपविज्ञानेनैव तद्विषयानात्माभिमानबुद्धिः कारकादिक्रियाफलाध्यारोपणात्मिकाः विद्या निवर्तिता तस्यां निवर्त्तितायां
कामादिदोषानुपपत्तेरनात्मचिंतानुपपत्तिः पारिशेष्यादात्मचिंतैव तस्मात्तदुपासनमस्मिन्पक्षे न विधातव्यं प्राप्तत्वात्तिष्ठतु तावत्
सिद्धात्मोपासनप्राप्तिर्नित्यावेत्य पूर्वविधिः स्यात॥ ज्ञानोपासनयोरेकत्वे सत्यप्राप्तत्वान्न स वेदेति विज्ञानं प्रस्तुत्यात्मेत्येवोपासीतेत्य
भिधानाद्वेदोपासनशब्दयोरेकार्थतावगम्यतेः नेनह्येतत्सर्वं वेदात्मानमेवावेदित्यादिश्रुतिभ्यश्च विज्ञानमुपासनं तस्य चाप्राप्तत्वाद्विध्य
र्हत्वं त्वादात्मज्ञाने भवत्यपूर्वविधिरिति भावः॥ विशिष्टस्याधिकारिणः शब्दज्ञानं शब्दादेव सिद्धमिति कथमप्राप्तिरित्याशंक्याह॥ ज्ञानेति॥ न खल्व
त्र शाब्दज्ञानं विवक्षितं किंतूपासनं नाम मानसं कर्म तदेव ज्ञानावृत्तिरूपत्वाज्ज्ञानमित्येकत्वे सत्यप्राप्तत्वाद्विधेयमित्यर्थः॥ तयोरेकत्वं विवृणोति॥ नेत्या
दिना॥ अनेनहीत्यादौ वेदशब्दस्यार्थांतरविषयत्वं वन्न स वेदेत्यत्रापि किं न स्यादित्याशंक्याह॥ अनेनेति॥ उक्तश्रुतिभ्यो यद्विज्ञानं श्रुतं तदुपासनमे
वेति योजना सपोतरएकैकमुपास्त इत्युपक्रमादात्मेत्येवोपासीतेत्युपसंहाराच्च न स वेदेत्यत्र तावद्वेदशब्दस्योपासनार्थत्वमेष्टव्यमन्यथोपक्रमोपसंहार

=यजेतेत्यत्रास्त्यंशद्वयंयजिधातुः प्रत्ययश्चतत्रप्रत्ययेऽप्यंशद्वयंआख्यातत्वंलिङ्त्वंचआख्यातत्वंदशलकारेषुविद्यतेलिङ्त्वंकेवलंलिङ्येवतत्राख्यातत्वलिङ्त्वाभ्यांभावनैवोच्यतेभा
वनानामभवितुर्भवनानुकूलोभावकव्यापारविशेषःसाचद्विविधाशाब्दीभावनार्थीभावनाचेतितत्रपुरुषप्रवृत्त्यनुकूलोव्यापारविशेषःशाब्दीभावनासाचलिङ्त्वांशेनोच्यतेलिङ्श्रवणेऽयं
मांप्रवर्तयतिमत्प्रवृत्त्यनुकूलव्यापारवानयमितिनियमेनप्रतीयमानत्वात्यच्चयस्मात्प्रतीयतेतत्तस्यवाच्यंयथागोशब्दस्यगोत्वंसचप्रवृत्त्यनुकूलोव्यापारविशेषोलोकेपुरुषनिष्ठोभिप्रायविशेषः
विरोधात्तथाचार्धवैशसासंभवादुपासनमेवसर्वत्रवेदनंतच्चसर्वथैवाप्राप्तमितितस्मिन्नपूर्वविधिःस्यादितिभावः॥इतश्चतस्मिन्नेष्टव्योविधिरित्याह॥नचे
ति॥अतःप्रवर्त्तकोविधिरूपेप्त्यतिशेषःसचात्यंताप्राप्तविषयत्वान्नियमादिरूपोनभवतीत्याह॥तस्मादिति॥आत्मोपास्तिर्विधेयेत्यत्रहेत्वंतरमाह॥
कर्मविधीति॥कर्मात्मज्ञानविध्योःशब्दानुसारेणाविशेषमभिदधाति॥यथेत्यादिनासंप्रत्यथेतोप्यविशेषमाह॥मानसेति॥तदेवदृष्टांतेनस्पष्टयति॥य

नचस्वरूपान्वाख्यानेपुरुषप्रवृत्तिरुपपद्यतेतस्मादपूर्वविधिरेवायंकर्मविधिसामान्याच्च॥यथायजेतजुहुयादित्यादयःकर्मविधयोन
तैरस्यात्मेत्येवोपासीतात्मावाअरेद्रष्टव्यइत्यादिआत्मोपासनविधेर्विशेषोवगम्यते॥मानसक्रियात्वाच्चविज्ञानस्य॥यथायस्यैदेवतायैहवि
र्गृहीतंस्यात्तांमनसाध्यायेद्वषट्करिष्यन्नित्याद्यामानसीक्रियाविधीयतेतथात्मेत्येवोपासीतमंतव्योनिदिध्यासितव्यइत्याद्याक्रियैववि
धीयतेज्ञानात्मिकातथावाचामवेदोपासनशब्दयोरेकार्थत्वमितिभावनांशत्रयोपपत्तेश्चयथाहियजेतेत्यस्यांभावनायांकिंकेनकथमि
तिभाव्याद्याकांक्षापनयकारणमंशत्रयमवगम्यते

थेति॥यदिक्रियाविधीयतेकथंज्ञानात्मिकेतिविशेष्यतेतत्राह॥तथेति॥इतश्चात्मोपासने
विधिरस्तीत्याह॥भावनेति॥वेदांतेषुभावनापेक्षितांशत्रयोपपत्तिंविशदयितुंदृष्टांतमाह॥यथेति॥भावनायांविधीयमानत्वेसतीतिशेषःप्रेरणाधर्मकश
ब्दव्यापारःस्वज्ञानकरणकःस्तुत्यादिज्ञानेतिकर्त्तव्यताकःपुरुषप्रयत्नभाव्यनिष्ठःशब्दभावनोच्यतेस्वर्गंयागेनप्रयाजादिभिरुपकृत्यसाधयेदितिपुरुषप्र
वेदेपुरुषाभावात्लिङादिशब्दनिष्ठएवशाब्दीभावनेत्युपदिशतिसाचशाब्दीभावनांशत्रयमपेक्षतेसाध्यंसाधनमितिकर्तव्यतांचसाध्यंस्वर्गःसाधनंलिङादिज्ञानंस्यकारणत्वेनान्वयत्वंइतिकर्तव्य
ताप्राशस्त्यज्ञानमितिकर्तव्यतात्वेनान्वितंयथावर्मवाएतद्यज्ञस्यक्रियतेयत्प्रयाजानुयाजाइतिप्रयाजादिस्तुतिज्ञानंतथाहिभाव्याकांक्षायांकिंभावयेत्स्वर्गंभावयेत्करणाकांक्षायांकेनभावयेत्यागेनभाव
येत्कथंभावाकांक्षायांयत्संनिधौपठितंअश्रूयमाणंफलंचक्रियाजातंतदेवोपकार्याकांक्षायांइतिकर्तव्यतात्वेनान्वयमनुभवितुंयोग्यंनतथाचप्रयाजानुयाजासहकृतेनदर्शपूर्णमासेनस्वर्गंभाव्यं= १
लिङ्त्वं ४

दृष्टांतस्यमर्थदार्ष्टांतिकेयोजयति॥तथेत्यादिना॥त्यागोनिषिद्धकाम्यवर्जनं॥उपरमोनित्यनैमित्तिकत्यागस्तितिक्षादीत्यादिपदंसमाधानादिसंग्रहार्थं
इत्यंशत्रयमितिसंबंधः॥शास्त्रंशांतोदांतइत्यादि॥उक्तप्रकारमंशत्रयं॥अन्यदपिसुलभमितिवक्तुमादिपदं॥विधियुक्तानांवेदांतानांकार्यपरत्वेपित
द्धीनानांतेषांवस्तुपरतेत्याशंक्याह॥यथाचेति॥विध्युद्देशत्वेनतच्छेषत्वेनेतियावत्अस्थूलादिवाक्यानामारोपितद्वैतनिषेधेनाद्वयंवस्तुसमर्पयतां

तथोपासीतेत्यस्यामपिभावनायांविधीयमानायांकिमुपासीतकेनोपासीतकथमुपासीतेत्यस्यामाकांक्षायामात्मानमुपासीतमनसा
त्यागब्रह्मचर्यशमदमोपरमतितिक्षादीतिकर्तव्यतासंयुक्तइत्यादिशास्त्रेणैवसमर्थ्यतेंशत्रयं॥यथाचकृत्स्नस्यदर्शपूर्णमासादिप्र
करणस्यदर्शपूर्णमासादिविध्युद्देशत्वेनोपयोगःएवमौपनिषदात्मोपासनप्रकरणस्यात्मोपासनविध्युद्देशत्वेनैवोपयोगः॥नेतिने
त्यस्थूलमेकमेवाद्वितीयमशनायाद्यतीतंइत्येवमादिवाक्यानामुपास्यात्मस्वरूपविशेषसमर्पणेनोपयोगःफलंचमोक्षोःविद्यानि
वृत्तिर्वा॥अपरेवर्णयंत्युपासनेनात्मविषयंविशिष्टंविज्ञानांतरंभावयेत्तेनात्माज्ञायतेःविद्यानिवर्तकंचतदेव॥नात्मविषयंवेदवाक्य
जनितंविज्ञानमित्येतस्मिन्नर्थेवचनान्यपिविज्ञायप्रज्ञांकुर्वीतद्रष्टव्यःश्रोतव्योमंतव्योनिदिध्यासितव्यःसोन्वेष्टव्यःसविजिज्ञासित
व्यइत्यादीनि॥नार्थांतराभावात्॥नचात्मेत्येवोपासीतेत्यपूर्वविधिः कथमुपास्तिविधिशेषत्वमित्याशंक्याह॥नेत्यादिना॥ब्रह्मवेदब्रह्मैवभ
वतितरतिशोकमात्मविदित्यादीनांफलार्पकत्वेनोपास्तिविध्युपयोगमभिप्रेत्याह॥फलंचेति॥मोक्षोब्रह्मप्राप्तिःआत्मोपासनंविधेयमितिपक्षमु
क्त्वापक्षांतरमाह॥अपरइति॥तस्यानुपयोगमाशंक्याह॥तेनेति॥शाब्दस्यज्ञानस्यासंसृष्टापरोक्षात्मविषयत्वाभावमितिशब्देनहेतूकरोति॥ज्ञानां
तरंवेदांतेषुविधेयमित्यत्रमानमाह॥एतस्मिन्निति॥पक्षद्वयेप्राप्तेप्रथमपक्षंप्रत्याह॥नार्थांतराभावादिति॥तत्रनअर्थमेवस्वयंन्याचष्टे॥नचेति॥

शाब्दज्ञानवतोविषयाभावान्नविधिःसंभवत्यविद्यातत्कार्यनिवृत्तेोस्वयंफलावस्थत्वाच्चेत्यर्थः॥हेतुभागंप्रश्नपूर्वकंविवृणोति॥कस्मादित्यादिना॥
आत्मोपदेशेनानात्मनिषेधद्वारावाक्योत्थज्ञानातिरेकेणेतियावत्॥कर्त्तव्यांतराभावेपिवाक्यजन्मविज्ञानमेवविधेयंस्यादित्याशंक्याह॥तत्र
हीति॥दृष्टांतेपिवाक्योत्थज्ञानातिरेकेणपुरुषप्रवृत्तिरसिद्धेत्याशंक्याह॥नहीति॥तदनुष्ठानंतर्हिवाक्यार्थज्ञानाधीनमितिव्यर्थोविधिस्तत्रा
ह॥तच्चेति॥अधिकारोविधिपुरुषसंबंधस्तत्कृतज्ञानापेक्षमनुष्ठानमित्यर्थवान्विधिरित्यर्थः॥नर्हिप्रकृतेपिवाक्योत्थज्ञानव्यतिरेकेणपुरुष

कस्मादात्मस्वरूपकथनानात्मप्रतिषेधवाक्यजनितविज्ञानव्यतिरेकेणार्थांतरस्यकर्त्तव्यस्यमानसस्यवाह्यस्यवाऽभावात्तत्र
हिविधेःसाफल्यंयत्रविधिवाक्यश्रवणमात्रजनितविज्ञानव्यतिरेकेणपुरुषप्रवृत्तिर्गम्यतेयथादर्शपूर्णमासाभ्यांस्वर्गकामो
यजेतेत्येवमादौनहिदर्शपूर्णमासविधिवाक्यजनितविज्ञानमेवदर्शपूर्णमासानुष्ठानंतच्चाधिकाराद्यपेक्षानुभाविनतुनेतिनेत्या
त्मप्रतिपादकवाक्यजनितविज्ञानव्यतिरेकेणदर्शपूर्णमासादिवत्पुरुषव्यापारःसंभवतिसर्वव्यापारोपशमहेतुत्वात्तद्वाक्यजनितवि
ज्ञानस्यनह्युदासीनविज्ञानंप्रवृत्तिजनकमब्रह्मानात्मविज्ञाननिवर्त्तकत्वाच्चैकमेवाद्वितीयंतत्त्वमसीत्येवमादिवाक्यानांनचतन्निवृत्तौ
प्रवृत्तिरुपपद्यतेविरोधाद्वाक्यजनितविज्ञानमात्रान्नाब्रह्मानात्मविज्ञाननिवृत्तिरितिचेन्नतत्त्वमसिनेतिनेत्यात्मैवेदमेकमेवाद्वितीयंब्रह्मै
वेदममृतंनान्यदतोस्तिद्रष्टृतदेवब्रह्मत्वंविद्धीत्यादिवाक्यानां व्यापारसंभवाद्विधिसाफल्यमित्याशंक्याह॥नत्विति॥अथविमतंप्रवर्त्तकंवैदिकज्ञा
नत्वाद्विधिवाक्योत्थज्ञानवदित्याशंक्यप्रवर्त्तकविषयत्वमुपाधिरित्याह॥नहीति॥मिथ्याज्ञाननिवर्त्तकत्वमुपाध्यंतरमाह॥अब्रह्मेति॥वाक्योत्थज्ञानस्यत
न्निवर्त्तकत्वेपिप्रवर्त्तकत्वंकिंनस्यादित्याशंक्याह॥नचेति॥द्वितीयोपाधेःसाधनव्याप्तिंशंकते॥वाक्येति॥ब्रह्मात्मैक्यधीपरवाक्योत्थविज्ञानस्याज्ञानतत्कार्यध्वं

तद्वादित्वाद्वस्तुपरत्वादितियावत्॥उक्तानांवाक्यानांविध्यपेक्षितार्थसमर्पकत्वेनतच्छेषत्वंशंकितमनुभाषतेद्रष्टव्येति॥सिद्धांतोपक्रमेणसमाहितमेतदि
त्याह॥नेति॥तदेवस्पष्टयति॥आत्मेति॥परोक्तमुद्भावयति॥आत्मस्वरूपेति॥कुत्रतर्हिविधिरात्मज्ञानेवावाक्यश्रवणेवातदर्थज्ञानस्मृतिसंतानेवाचित्तवृ
त्तिनिरोधेवानाद्यइत्याह॥नात्मवादीति॥द्वितीयंशंकतेनश्रवणेपीति॥अनिष्टार्थवादिवाक्यस्यासत्यादिलक्षणस्यविधिंविनाश्रवणवत्तत्त्वमादेरपितस्माद्व

तद्वादित्वात्॥द्रष्टव्यविधेर्विषयसमर्पकाण्येतानीतिचेन्नार्थांतराभावादित्युक्तोत्तरत्वादात्मवस्तुस्वरूपसमर्पकैरेववाक्यैस्तत्त्वमसीत्यादिभिः
श्रवणकालेएवतद्दर्शनस्यकृतत्वाद्द्रष्टव्यविधेरनुष्ठानांतरंकर्तव्यमित्युक्तोत्तरमेतदात्मस्वरूपान्वाख्यानमात्रेणात्मविज्ञानेविधिमंतरेण
नप्रवर्ततइतिचेत्॥नात्मवादिवाक्यश्रवणेनात्मविज्ञानस्यजनितत्वात्किंभोःकृतस्यकरणं॥तच्छ्रवणेपिनप्रवर्ततइतिचेन्नानवस्थाप्र
संगाद्यथात्मवादिवाक्यार्थश्रवणेविधिमंतरेणनप्रवर्ततेतथाविधिवाक्यार्थश्रवणेपिविधिमंतरेणनप्रवर्तयिष्यतइतिविध्यंतरापे
क्षातथातदर्थश्रवणेपीत्यनवस्थाप्रसज्येत॥वाक्यजनितात्मज्ञानस्मृतिसंततेःश्रवणविज्ञानमात्रादर्थांतरत्वमितिचेन्नार्थप्राप्तत्वाद्य
देवात्मप्रतिपादकवाक्यश्रवणादात्मविषयंविज्ञानमुत्पद्यतेतदेवतदुत्पद्यमानंतद्विषयंमिथ्याज्ञानंनिवर्तयदेवोत्पद्यतेआत्मविषय
मिथ्याज्ञाननिवृत्तौचतत्प्रभवाःस्मृतयोनभवंतिस्वाभाविक्योऽनात्मवस्तुभेदविषयाः॥ तेश्रवणमविरुद्धमित्यभिसंधायदोषांतरमाह

नेत्यादिना॥तत्त्वमादिश्रवणप्रयोजकोविधिरात्मनोपिप्रयुंक्तेश्रवणमितिचेन्नैवंसखल्वध्ययनविधिरन्योवाद्येतदपेक्षयाश्रुतस्यतत्त्वमस्यादेःस्वार्थबो
धित्वंकर्मवाक्यवदितिस्वार्थनिष्ठत्वाविशेषोद्वितीयेतस्याप्रमाणत्वात्तदीयस्वपरनिर्वाहकत्वंदूरोत्सारितमित्यभिप्रेत्यानवस्थांविवृणोति॥पर्येत्यादिना॥
॥तृतीयमाशंकते॥वाक्यजनितेति॥ततःसाविधेयेतिशेषः॥तस्याःविधेयत्वंदूषयति॥नेति॥अर्थप्राप्तिंविवृणोति॥यदेवेति॥अनात्मस्मृतिहेतुज्ञाननिवृत्तौ

इदानीमनात्मस्मृतेरनर्थत्वस्यान्वयव्यतिरेकसिद्धत्वाच्चात्मस्मृतिः स्वभावप्राप्तेत्याह॥ अनर्थत्वेति॥ अनात्मनोनर्थत्वनिश्चयाच्चतदीयस्मृत्यनुपपत्तावितर
स्मृतिरर्थप्राप्तेत्याह॥ आत्मावगताविति॥ आत्मनश्चपरमेष्टत्वावगमादर्थप्राप्तातदीयस्मृतिरित्याह॥ आत्मवस्तुनश्चेति॥ अर्थप्राप्त्याविधेयत्वाभावमुप
संहरति॥ तस्मादिति॥ अनात्मस्मृतिहेत्वज्ञानाभावादित्तछब्दार्थः अर्थतश्चिदेकरसात्मस्वभावबलादितियावत्॥ दृष्टफलत्वाच्चात्मस्मृतिर्नविधेयेत्या
ह॥ शोकेति॥ मिथ्याज्ञानमेवसानिवर्त्तयतिनशोकादीत्याशंक्याह॥ विपरीतेति॥ आत्मस्मृतेः शोकादिनिवर्त्तकत्वेमानमाह॥ तथाचेति॥ चतुर्थमुत्थापय

अनर्थत्वावगतेश्चआत्मावगतौहिसत्यामन्यद्वस्त्वनर्थत्वेनावगम्यतेअनित्यदुःखाशुध्यादिबहुदोषवत्त्वादात्मवस्तुनश्चतद्विलक्षणत्वा
त्तस्मादनात्मविज्ञानस्मृतीनामात्मावगतेरभावप्राप्तिः पारिशेष्यादात्मैकविज्ञानस्मृतिसंततेरर्थतएवभावान्नविधेयत्वंशोकमोहभया
यासादिदुःखदोषनिवर्त्तकत्वाच्चतत्स्मृतेर्विपरीतज्ञानप्रभवोहिशोकमोहादिदोषस्तथाचतत्रकोमोहोविद्वान्नबिभेतिकुतश्चनाभयंवै
जनकप्राप्तोसिभिद्यतेहृदयग्रंथिरित्यादिश्रुतिभ्योनिरोधस्तर्ह्यर्थांतरमितिचेद्यापिस्याच्चित्तवृत्तिनिरोधस्यवेदवाक्यजनितात्मविज्ञा
नादर्थांतरत्वात्॥ तंत्रांतरेषुचकर्त्तव्यतयावगतत्वाद्विधेयत्वमितिचेन्नमोक्षसाधनत्वेनानवगमान्नहिवेदांतेषुब्रह्मात्मविज्ञानादन्यत्प
रमपुरुषार्थसाधनत्वेनावगम्यते॥

ति॥ निरोधस्तर्हीति॥ यदिवाक्योत्थज्ञानादेरविधेयत्वंतर्हिचित्तवृत्तिनिरोधोमुक्तिसाधनत्वेनविधीयतांतात
स्योक्तज्ञानादेरर्थांतरत्वादित्यर्थः॥ चोद्यमेवविवृणोति॥ अथापीति॥ अर्थांतरत्वात्तस्यविधेयतेतिशेषः॥ तस्यमुक्तिहेतुत्वेनविधेयत्वेयोगशास्त्रंसंवाद
यति॥ तंत्रांतरेष्विति॥ अथयोगानुशासनमितिनिश्रेयसहेतुःसमाधिःसूत्रितस्तस्यचलक्षणमुक्तंयोगश्चित्तवृत्तिनिरोधइति तन्निरोधावस्थायांचात्म
नःस्वरूपप्रतिष्ठितत्वंकैवल्यमाख्यातंतदाद्रष्टुःस्वरूपेवस्थानमित्येवंयोगशास्त्रेमुक्तिहेतुत्वेनेष्टोनिरोधविधिरित्यर्थः॥ योगशास्त्रादपिबलवतींश्रु

चित्तवृत्तिनिरोधस्यमुक्तिहेतुत्वेपिनविधेयत्वंविधिंविनातत्सिद्धेरित्याह॥ अनन्येति॥ नतावद्यथाकथंचिन्निरोधोविधेयः सर्वस्यापितत्संभवाद्विधि वैयर्थ्यान्नापिसर्वात्मनातन्निरोधोविधेयोज्ञानादेवतत्सिद्धेर्विध्यानर्थक्यादित्यर्थः॥ नान्यः पंथाविद्यतेज्ञानादेवतुकैवल्यमित्यादिशास्त्रमनुसरन्नुपे त्यवादंत्यजति॥ अभ्युपगम्येति॥ निरोधस्यमुक्तिहेतुत्वमिदमापरामृष्टं॥ योगशास्त्रमपिश्रुतिस्मृतिविरोधेनप्रमाणं॥ एतेनयोगः प्रत्युक्तइतिन्याया

आत्मानमेवावेत्तस्मात्तत्सर्वमभवद्ब्रह्मविदाप्नोतिपरंसयोहवैतत्परमंब्रह्मवेदब्रह्मैवभवतिआचार्यवान्पुरुषोवेदतस्यतावदेवचिर मभयंहिवैब्रह्मभवतियएवंवेदेत्येवमादिश्रुतिशतेभ्यः॥ अनन्यसाधनत्वाच्चनिरोधस्यनह्यात्मविज्ञानतत्स्मृतिसंतानव्यतिरेकेणचित्त वृत्तिनिरोधस्यसाधनमस्त्य ऽभ्युपगम्येदमुक्तंनतुब्रह्मविज्ञानव्यतिरेकेणान्यन्मोक्षसाधनमवगम्यतेआकांक्षाभावाच्चभावनाभावोयद्व क्तंयजेतेत्येवमादौकिंकेनकथमितिभावनाकांक्षायांफलसाधनेतिकर्तव्यताभिराकांक्षापनयनंयथातद्वदिहाप्यात्मविज्ञानविधावप्युप पद्यतइतितदसदेकमेवाद्वितीयंतत्त्वमसिनेतिनेत्यनंतरमबाह्यमयमात्माब्रह्मेत्यादिवाक्यार्थविज्ञानसमकालमेवसर्वाकांक्षाविनिवृ त्तेर्नचवाक्यार्थविज्ञानेविधिप्रयुक्तः प्रवर्तते॥ विध्यंतरप्रयुक्तौचानवस्थादोषमवोचाम॥ नचैकमेवाद्वितीयंब्रह्मेत्यादिवाक्येषुविधिर वगम्यते॥ इतिभावः॥ वेदांतेषुविधेयाभावोक्त्याविधिर्निरस्तः संप्रत्यंशत्रयवतीभावनातेष्वस्तीत्युक्तंदूषयति॥ आकांक्षेति॥ तदेवस्फुटयितुमु क्तमनुवदति॥ यदुक्तमिति॥ आगमावष्टंभेननिराचष्टे॥ तदसदिति॥ विधिमंतरेणवाक्यार्थज्ञानेप्रवृत्त्ययोगाद्वैधमेवज्ञानंसर्वाकांक्षानिवर्तकमित्याशं क्याह॥ नचेति॥ यथाकर्मकांडेस्वाध्यायविधेरर्थावबोधपर्यंतत्वेनज्योतिष्टोमादिविध्यर्थज्ञानेविध्यंतरंनापेक्ष्यतेतथाज्ञानकांडेपिस्यादित्यर्थः॥ तत्रापिवे दः कृत्स्नोधिगंतव्यइतिविध्यंतरप्रयुक्तमेववाक्यार्थज्ञानमित्याशंक्याह॥ विध्यंतरेति॥ श्रुतहान्यश्रुतकल्पनाप्रसंगाच्चनविधिशेषत्वंवेदांतानामित्याह॥

वेदांताः स्वार्थेनमानंसिद्धार्थवाक्यत्वात्सोरोदीदित्यादिवदित्यनुमानात्तेषांविधिशेषत्वंप्रामाण्यार्थमेष्टव्यमितिशंकते॥वस्तुस्वरूपेति॥तदेवानुमानंप्रपंच
यति॥अथापीति॥विधेरश्रुतत्वेपीतियावत्॥फलवन्निश्चितज्ञानाजनकत्वमुपाधिरितिमन्वानःसमाधत्तेनविशेषादिति॥नञर्थंस्पष्टयति॥नवाक्य
स्येति॥विशेषंव्याचष्टे॥किंतर्हीति॥तस्यप्रामाण्यप्रयोजकत्वमन्वयव्यतिरेकाभ्यांदर्शयति॥तद्यत्रेति॥सामान्यन्यायंप्रकृतेयोजयन्स्फुटकृतिकिंचेति॥

आत्मस्वरूपान्वाख्यानेनैवावसितत्वाद्वस्तुस्वरूपान्वाख्यानमात्रत्वादप्रामाण्यमितिचेद्यथापिस्याद्यथासोरोदीद्यदरोदीत्तद्रुद्रस्यरुद्र
त्वमित्येवमादौवस्तुस्वरूपान्वाख्यानमात्रत्वादप्रामाण्यमेवमात्मार्थवाक्यानामपीतिचेन्नविशेषान्नवाक्यस्यवस्त्वन्वाख्यानंक्रियान्वा
ख्यानंवाप्रामाण्याप्रामाण्येकारणं॥किंतर्हिनिश्चितफलवद्विज्ञानोत्पादकत्वंतद्यत्रास्तितत्प्रमाणंवाक्यंयत्रनास्तितदप्रमाणंकिं
चभोःपृच्छामस्त्वां॥आत्मस्वरूपान्वाख्यानपरेषुवाक्येषुफलवन्निश्चितंविज्ञानमुत्पद्यतेनवोत्पद्यतेचेत्कथमप्रामाण्यमितिकिं
चनपश्यस्यविद्याशोकमोहभयादिसंसारबीजदोषनिवृत्तिविज्ञानफलंनशृणोषिवाकिं॥तत्रकोमोहःकःशोकएकत्वमनुपश्यतः
मंत्रविदेवास्मिनात्मवित्सोहंभगवःशोचामितंमाभगवांछोकस्यपारंतारयत्वितिएवमाद्युपनिषद्वाक्यशतान्येवंविद्यतेकिंसोरोदी
तइत्यादिषुनिश्चितंफलवत्वविज्ञानं॥नचेद्विद्यतेऽस्त्वप्रामाण्यं॥तदप्रामाण्येफलवन्निश्चितविज्ञानोत्पादकस्यकिमित्यप्रामाण्यंस्या

किंतेषुतादृग्ज्ञानमुत्पद्यतेनवेतिप्रश्नार्थः॥द्वितीयेऽनुभवविरोधःस्यादितिमत्वापक्षांतरमनूद्यप्रत्याह॥उत्पद्यतेचेदितिप्रामाण्येहेतुसद्भावान्नाप्रामाण्य
मित्यर्थः॥निश्चितज्ञानजनकत्वेपिफलवत्वविशेषणमसिद्धमित्याशंक्याह॥किंचेति॥विद्वदनुभवफलश्रुतिसिद्धंविशेषणमितिभावः॥दृष्टांतंविघटयि
तुंप्रश्नांतरंप्रस्तौति॥एवमिति वेदांतेष्वेवेतियावत्॥किंवानेतिशेषः॥आद्येसाध्यवैकल्यंमत्वाद्वितीयंदूषयति॥नचेदिति॥तर्हितद्दृष्टांतेनतत्वमस्यादेरपिस्या

तत्त्वमसि॑ दिवाक्ये २

विमतं स्वार्थमानं यथोक्तज्ञानजनकत्वाद्दर्शादिवाक्यवदिति भावः विपक्षे दोषमाह ॥ तदप्रामाण्ये चेति ॥ प्रवर्त्तकज्ञानजनकत्वमुपाधिरिति शं
कते ॥ नन्विति ॥ साधनव्याप्तिं धुनीते ॥ आत्मेति ॥ प्रवर्त्तकधीजनकत्वं धर्मिणि नास्तीत्यंगीकरोति ॥ सत्यमिति ॥ तर्हि यथोक्तोपाधिसद्भावादनुमा
नानुत्थानमित्याशंक्याह ॥ नैष दोष इति ॥ न हि प्रवर्त्तकधीजनकत्वं प्रामाण्ये कारणं निषेधवाक्येष्वप्रामाण्यप्रसंगान्न च निवर्त्तकधीजनकत्वमपि
तथाविधावप्रामाण्यप्रसंगान्न चोभयं प्रत्येकमुभयकारणत्वाभावेनाप्रामाण्यादिति भावः ॥ वेदांतेषु प्रवर्तकधीजनकत्वाभावेन केवलमदोषः किंतु
गुण इत्याह ॥ अलंकारश्चेति ॥ आत्मानं चेत्यादिश्रुतेरेतद्बुध्वेत्यादिस्मृतेश्चात्मज्ञानेन कृतकृत्यतानिदानेन च ज्ञानस्य प्रवर्त्तकत्वे तद्युक्तं प्रवृत्तीनां क्लेशास

तदप्रामाण्ये च दर्शपूर्णमासादिवाक्येषु को विस्रंभः ॥ ननु दर्शपूर्णमासादिवाक्यानां पुरुषप्रवृत्तिविज्ञानोत्पादकत्वात्प्रामाण्यमा
त्मविज्ञानवाक्येषु तन्नास्तीति सत्यमेवं नैष दोषः ॥ प्रामाण्यकारणोपपत्तेः प्रामाण्यकारणं च यथोक्तमेव नान्यदलंकारश्चायं यत्स
र्वप्रवृत्तिबीजनिरोधफलवद्विज्ञानोत्पादकत्वमात्मप्रतिपादकवाक्यानां नाप्रामाण्यकारणं ॥ यत्तूक्तं विज्ञाय प्रज्ञां कुर्वीतेत्यादिवचना
नां वाक्योत्थविज्ञानव्यतिरेकेणोपासनार्थत्वमिति ॥ सत्यमेतत् किंतु नापूर्वविध्यर्थता पक्षे प्राप्तस्य नियमार्थतैव पकत्वाद्तो यथोक्तज्ञानज
नकत्वं वाक्यानां भूषणमेवेत्यर्थः ॥ शब्दोत्थं ज्ञानं विधेयमिति ॥ प्रतिक्षिप्य पूर्वोक्तपक्षांतरमनुवदति ॥ यत्तूक्तमिति ॥ उपासनार्थत्वमित्यात्मोपासने न त
त्साक्षात्कारं भावयेदित्येवमर्थत्वमित्यर्थः ॥ अभ्युपगमवादेन परिहरति ॥ सत्यमिति यथोक्तेषु वाक्येष्वात्मोपासनं तत्साक्षात्कारमुद्दिश्य विधीयते चे
त्प्रकृतेष्वपि वाक्येतत्संभवान्नापूर्वविधिरिति प्रक्रमो भज्येतेत्याशंक्याह ॥ किंत्विति ॥ कथं तर्हि विध्यंगीकारस्तत्राचोयुक्तिरित्याशंक्याह ॥ पक्षेति ॥ यथा पक्षे
प्राप्तस्यावघातस्य व्रीहीनवहंतीति नियमरूपो विधिरंगीकृतस्तथात्मोपासनस्यापि पक्षे प्राप्तस्य तदेव कर्त्तव्यं नानात्मोपासनमिति यो नियमस्तदर्थता प्रकृ

तथाकृतेति न प्रकृत्य विरोधो मीमांसकस्य ॥

तैंत्रात्मस्वरूपविज्ञानेनैवेत्यादिपारिशेष्यादात्मचिंतैवेसंतंभाष्यंपूर्वमभिहितंसिद्धांतिना ६

पाक्षिकींप्राप्तिमुक्त्वामाक्षिपति॥कथमिति॥क्वापुनरत्रानुपपत्तिरित्याशंक्याह॥यावतेति॥आत्मनिवाक्योत्थेविज्ञानेसत्यनात्मस्मृतिहेतूनांमिथ्याज्ञा
नादीनामपनीतत्वाद्वैतभावेफलाभावन्यायेनतासामसंभवादात्मस्मृतिसंततिरेवपुनःसदास्यात्प्रकारांतरायोगादितिसिद्धांतिनोक्तत्वान्नात्मोपास
नस्यपक्षेप्राप्तिरित्यर्थः॥तस्यनित्यप्राप्तिमुक्त्वामंगीकरोति॥बाढमिति॥तर्हिनियमविधिवाचोयुक्तिरयुक्तेत्याशंक्याह॥यद्यपीति॥आत्मनिनित्या
परोक्षसंविदेकतानेस्मरणंविस्मरणंवायद्यपिनोपपद्यतेतथापितयोस्तस्मिन्ननुभवसिद्धत्वान्नियमविधेःसावकाशत्वमित्याशयेनाह॥शरीरेति
॥अथारब्धफलस्यापिकर्मणःसम्यक्ज्ञानात्निवृत्तेर्नविदुषोवागादीनांप्रवृत्तिरतआह॥लब्धेति यथामुक्तस्येषुपाषाणादेरप्रतिबंधाद्यावद्वेगंप्रव

कथंपुनरुपासनस्यपक्षप्राप्तिर्यावतापारिशेष्यादात्मविज्ञानस्मृतिसंततिर्नित्यैवेत्यभिहितं॥बाढं॥यद्यप्येवंशरीरारंभकस्यकर्मणोनिय
तफलत्वात्सम्यग्ज्ञानप्राप्तावप्यवश्यंभाविनीप्रवृत्तिर्वाङ्मनःकायानां॥लब्धप्रवृत्तेःकर्मणोबलीयस्त्वान्मुक्तेष्वादिप्रवृत्तिवत्॥तेनपक्षे
प्राप्तंज्ञानप्रवृत्तेर्दौर्बल्यंतस्मात्त्यागवैराग्यादिसाधनबलावलंबेनात्मविज्ञानस्मृतिसंततिर्नियंतव्याभवतिनत्वपूर्वाकर्त्तव्याप्राप्तत्वादि
त्यवोचाम॥तस्मात्प्राप्तविज्ञानस्मृतिसंताननियमविध्यर्थानिविज्ञायप्रज्ञांकुर्वीतेत्यादिवाक्यान्यन्यार्थासंभवात्॥ त्तिरवश्यंभाविनीतथाप्र

वृत्तफलस्यकर्मणोज्ञानेनोपजीव्यतयाततोबलवत्त्वात्तद्दशायांविदुषोपियावद्भोगंवागादिप्रवृत्तिर्ध्रौव्यमित्यर्थः॥आरब्धकर्मप्राबल्येफलितमाह॥तेने
ति॥आरब्धस्यकर्मणोयथोक्तेनन्यायेनप्राबल्येतद्दशायांक्षुधादिदोषोयदोद्भवतितदात्मनिविस्मरणादिसंभवात्तज्ज्ञानप्राप्तेःपाक्षिकत्वादवश्यंभाविक
र्मापेक्षयातद्दौर्बल्यंस्यादित्यर्थः॥तथापिनियमविध्यंगीकारस्यकिमायातंतदाह॥तस्मादिति॥ज्ञानस्यपक्षेप्राप्तत्वंतच्छब्दार्थः॥आदिपदंब्रह्मचर्यशमद
मादिसंग्रहार्थं॥विज्ञायेत्यादिवाक्यानांनियमविध्यर्थत्वमुपसंहरति॥तस्मादिति॥आदिपदेनप्रकृतमपिवाक्यंसंगृह्यते॥तच्छब्दार्थमेवस्फोटयति॥अन्या

इतिपरोयैस्मात्तदितिपरः इतिपरश्चासावात्मशब्दश्चेति=५ ग्रंथेन=५

शब्दज्ञानादेवपुमर्थसिद्धेस्तस्यतदावृत्तेस्तृतीयज्ञानस्यवाविधेयत्वाभावाद्वेदांताः शुद्धे सिद्धेर्थेमानमित्युक्तं इदानीमितिशब्दप्रयुक्तं चोद्यमुत्थापयति ॥अनात्मेति॥आत्मशब्दादूर्ध्वमितिशब्दप्रयोगादात्मशब्दार्थस्योपास्यत्वेनाविवक्षितत्वादात्मगुणकस्यानेकस्यानात्मनोऽव्याकृतशब्दितस्यप्रधानस्योपासनमस्मिन्वाक्ये विवक्षितमित्यर्थः॥उक्तमेवार्थंदृष्टांतेनस्पष्टयति यथेत्यादिना॥अनात्मोपासनमेवात्रविधित्सितमित्यत्रहेत्वंतरमाह॥आत्मे

अनात्मोपासनमिदमितिशब्दप्रयोगाद्यथाप्रियमित्येतदुपासीतेत्यादौनप्रियादिगुणएवोपास्यः किंतर्हि प्रियादिगुणवत्प्राणाद्येवोपास्यंतथेहापीतिपरात्मशब्दप्रयोगादात्मगुणवदनात्मवस्तूपास्यमितिगम्यतेआत्मोपास्यत्ववाक्यवैलक्षण्याच्चपरेणचवस्यत्यात्मानमेवलोकमुपासीतेतितत्रचवाक्येआत्मेवोपास्यत्वेनाभिप्रेतोद्वितीयाश्रवणादात्मानमेवेति॥इहतुनद्वितीयाश्रूयतेइतिपर

त्यात्मेत्येवोपासीतात्रह्येतेसर्वएकंभवंति

श्चात्मशब्द आत्मेत्येवोपासीतेतिअतोनात्मोपास्यआत्मगुणश्चान्य इतित्ववगम्यते॥न॥वाक्यशेषेआत्मनउपास्यत्वेनावगमाद्दर्शेव वाक्यस्यशेषेआत्मेवोपास्यत्वेनावगम्यते॥तदेतत्पदनीयमस्यसर्वस्ययदयमात्मांतरतरंयदयमात्मात्मानमेवावेदितिप्रविष्टस्यदर्शनप्रतिषेधादनुपास्यत्वमितिचेद्यस्यैवात्मनः प्रवेशउक्तस्तस्यैवदर्शनंवार्यतेतंनपश्यंतीति ति॥तदेवप्रपंचयति॥परेणेति॥ततोवैलक्षण्यं

दर्शयति॥इहत्विति॥वैलक्षण्यांतरमाह॥इतिपरश्चेति॥वैलक्षण्यफलमाह॥अतइति॥नात्रानात्मोपासनंविवक्षितमितिपरिहरति॥नेत्यादिना॥हेत्वर्थंस्फुटयति॥अस्यैवेति॥आत्मनश्चेदुपास्यत्वंतदाप्रक्रमविरोधः स्यादितिशंकते॥प्रविष्टस्येति॥आत्मनोदर्शनप्रतिषेधंप्रकटयति॥यस्येति॥तस्यै

= आत्मनः शब्दधियोर्विषयत्वद्योतक इतिशब्दः यस्य प्राणादिविशेषणान्युक्तानि तानि सर्वाण्याप्नुवन्नात्मेत्युच्यते तमात्मेत्येवोपासीत न केनचिद्विशेषणविशिष्टत्वेन शब्दप्रत्ययागम्यमात्मानमत्र संदधीतेतियावत् = ८

प्रकृतेति॥ तच्छब्दस्य प्रकृतपरामर्शित्वात्प्रविष्टस्य च प्रकृतत्वात्तस्य तेनोपादानादिति हेत्वर्थः॥ पूर्वपक्षं निगमयति॥ तस्मादिति॥ प्राणनादिविशिष्टस्य परिछिन्नत्वात्तस्य दृष्टत्वेपि पूर्णस्य न दृष्टतेति निषेधश्रुतिपर्यवसानान्नोपक्रमविरोधोस्तीति परिहरति॥ नेत्यादिना॥ तदेव विशदयति॥ दर्शनेति॥ कुयमयमभिप्रायभेदः श्रुतेरवगम्यते तत्राह॥ प्राणनादीति॥ प्राणन्नेवेत्यादिना क्रियाविशेषविशिष्टत्वेनात्मनो विशेषणात्तस्य दृष्टत्वेपि नासौ परिपूर्णो दृष्टः स्यादिति श्रुतेराशयो लक्ष्यते॥ केवलस्य तु तस्योपास्यत्वमभिसंहितमकृत्स्नत्वदोषाभावादित्यर्थः॥ उक्तमर्थं व्यतिरेकमुखेन साधयति॥ आत्म

प्रकृतोपादानात्तस्मादात्मनो नुपास्यत्वमिति चेन्नाकृत्स्नत्वदोषाद्दर्शनप्रतिषेधोऽकृत्स्नत्वदोषाभिप्रायेण नात्मोपास्यत्वप्रतिषेधाभिप्रायेण प्राणनादिक्रियाविशिष्टत्वेन विशेषणात्॥ आत्मनश्चेदुपास्यत्वमनभिप्रेतं प्राणनाद्येकैकक्रियाविशिष्टस्यात्मनोऽकृत्स्नत्ववचनमनर्थकं स्यादकृत्स्नो ह्येषोतएकैकेन भवतीत्यनेकैकविशिष्टस्त्वात्मा कृत्स्नत्वादुपास्य एवेति सिद्धं॥ यस्त्वात्मशब्दस्येति परः प्रयोगः आत्मशब्दप्रत्यययोरात्मतत्त्वस्य परमार्थतोऽविषयत्वज्ञापनार्थमन्यथात्मानमुपासीतेत्येवमवक्ष्यत्तथा चार्थादात्मनि आत्मशब्दप्रत्ययावनुज्ञातौ स्यातां तच्चानिष्टं नेति नेति विज्ञातारमरे केन विजानीयाद्विज्ञातं विज्ञातृ यतो वाचो निवर्तन्ते अप्राप्य मनसा सहेत्यादिश्रुतिभ्यः

नश्चेदिति॥ तस्यानुपास्यत्वार्थं तद्वचनमर्थवदित्याशंक्य तदुपास्यत्वनिषेधस्यात्मोपास्यत्वे पर्यवसानमभिप्रेत्याह॥ अनेकैकेति॥ उपक्रमोपसंहाराभ्यां उपास्यत्वमात्मनो दर्शितमिदानीमितिशब्दप्रयोगादनात्मोपासनमिदमित्युक्तं प्रत्याह॥ यस्त्विति प्रयोगशब्दादुपरिष्टात्तच्छब्दो द्रष्टव्यः॥ इतिशब्दस्य यथोक्तार्थत्वाभावे दोषमाह॥ अन्यथेति॥ न चात्मनः स्वातंत्र्येणानुपास्यत्वार्थमितिशब्दोर्थवान्पूर्वापरवाक्यविरोधादिति द्रष्टव्यं॥ इतिशब्दमंतरेण वाक्यप्रयोगे दोषम

तस्य शब्दप्रत्ययविषयत्वमिष्टमेवेति चेत्तत्राह॥ तच्चेति॥ आत्मोपास्यत्ववाक्यवैलक्षण्यादनात्मोपासनमेतदित्युक्तं दूषयति॥ यत्विति॥ आत्मैव ज्ञातव्यो नानात्मेति प्रतिज्ञायात्रहीत्यादिहेतुरुक्तः संप्रति तदेतत्पदनीयमित्यादिवाक्यापोद्यं चोद्यमुत्थापयति॥ अनिर्ज्ञातत्वेति॥ उत्तरमाह॥ अत्रेति॥ निर्धारणमेवस्फोरयति॥ अस्मिन्निति॥ नान्यदित्युक्तत्वादनात्मनो विज्ञातव्यत्वाभावश्चेदनेनहीत्यादि शेषविरोधस्यादिति शंकते॥ किंनेति॥ तस्याज्ञेयत्वे

यत्वात्मानमेव लोकमुपासीतेति तदनात्मोपासनप्रसंगनिवृत्तिपरत्वान्नवाक्यांतरं॥ अनिर्ज्ञातत्वसामान्यादात्मा ज्ञातव्यो ऽनात्मा च तत्र कस्मादात्मोपासन एव यत्न आस्थीयते आत्मेत्येवोपासीतेति नेतरविज्ञाने इत्यत्रोच्यते तदेतदेव प्रकृतं पदनीयं गमनीयं नान्यदस्य सर्वस्येति निर्धारणार्था षष्ठी॥ अस्मिन्सर्वस्मिन्नित्यर्थः यदयमात्मा यदेतदात्मतत्वं॥ किं न विज्ञातव्यमेवान्यत्॥ न किं तर्हि ज्ञा

तदेतत्पदनीयमस्य सर्वस्य यदयमात्मानेन ह्येतत्सर्वं वेद यथा ह वै पदेनानुविंदे

तव्यत्वेपि न पृथग्ज्ञानांतरमपेक्षते आत्मज्ञाना त्कस्मादनेनात्मनाज्ञातेन हि यस्मादेतत्सर्वमनात्मजातमन्यद्यत्तत्सर्वं समस्तं वेद जानाति नन्वन्यज्ञानेनान्यन्न ज्ञायत इत्यस्य परिहारं दुंदुभ्यादिग्रंथेन वक्ष्यामः निषेधति॥ नेति॥ तस्यापि ज्ञातव्यत्वेनान्यदिति वचनमनवकाशमित्याह॥ किं तर्हीति तस्य सावकाशत्वं दर्शयति॥ ज्ञातव्यत्वेपीति॥ आत्मनः सकाशादनात्मनोर्थांतरत्वात्तस्यात्मज्ञानाज्ज्ञातव्यत्वायोगाज्ज्ञातव्यत्वे ज्ञानांतरमपेक्षितव्यमेवेति शंकते॥ कस्मादिति॥ उत्तरवाक्येनोत्तरमाह॥ अनेनेति॥ आत्मन्यनात्मजातस्य कल्पितत्वात्तस्य तदतिरिक्तस्वरूपाभावात्तज्ज्ञानेनैव ज्ञातत्वसिद्धेर्नास्ति ज्ञानांतरापेक्षेत्यर्थः॥ लोकदृष्टिमाश्रित्यानेनेत्यादिवाक्यार्थमाक्षिपति॥ नन्विति॥ आत्मकार्यत्वादनात्मनस्तस्मिन्नंतर्भावात्तज्ज्ञानेन

ज्ञानमितितमितिपरिहरति॥ आत्मेति॥

आत्मतत्वस्य शास्त्राचार्यादयोयेउपायास्तेसत्याविद्याकल्पितत्वात्तेषां=१

सत्योपायाभावादात्मतत्वस्यपदनीयत्वासिद्धिरितिशंकते॥ कथमिति॥ असत्यस्यापिश्रुत्याचार्यादेरर्थक्रियाकारित्वसंभवादात्मतत्वस्यपदनीयत्वोप पत्तिरित्याह॥ उच्यतइति॥ विविदिषितंलब्धुमिष्टं॥ अन्वेषणोपायत्वंदर्शयितुंपदेनेतिपुनरुक्तिः॥ अनेनेत्यत्रवेदेतिज्ञानेनोपक्रम्यानुविंदेदितिलाभ मुक्त्वाकीर्तिमित्यादिश्रुतौपुनर्ज्ञानार्थेनविदिनोपसंहारादनुविंदेदितिश्रुतेरुपक्रमोपसंहारविरोधःस्यादितिशंकते॥ नन्विति॥ शंकितंविरोधंनिरा करोति॥ नेति॥ कथंतयोरेकार्थ्यंग्रामादौतदेकत्वाप्रसिद्धेरित्याशंक्याह॥ आत्मनइति॥ ग्रामादावप्राप्तेप्राप्तिरेवलाभोनज्ञानमात्रंतथात्रापिकिंनस्यादि

कथंपुनरेतत्पदनीयमित्युच्यतेयथाहवैलोकेपदेनगवादिखुरांकितोदेशःपदमित्युच्यतेतेनपदेननष्टंविविदिषितंपशुंपदेनान्विष्यमाणो नुविंदेतलभेतएवमात्मनिलब्धेसर्वमुपलभतइत्यर्थः॥ नन्वात्मनिज्ञातेसर्वमन्यज्ज्ञायतइतिज्ञानेप्रकृतेकथंलाभोऽप्रकृतउच्यतइति ॥ नज्ञानलाभयोरेकार्थत्वस्यविवक्षितत्वादात्मनोह्यलाभोऽज्ञानमेवतस्माज्ज्ञानमेवात्मनोलाभोनानात्मलाभवदप्राप्तप्राप्तिलक्षणआ त्मलाभोलब्धृलब्धव्ययोर्भेदाभावाद्यत्रह्यात्मनोऽनात्मालब्धव्योभवति॥ तत्रात्मालब्धालब्धव्योऽनात्मासचाप्राप्तउत्पाद्यादिक्रियाव्यवहि तःकारकविशेषोपादानेनक्रियाविशेषमुत्पाद्यलब्धव्यःसत्वप्राप्तप्राप्तिलक्षणोऽनित्योमिथ्याज्ञानजनितकामक्रियाप्रभवत्वात्स्वप्नपु त्रादिलाभवदयंतुतद्विपरीतआत्मा

त्याशंक्याह॥ नेत्यादिना॥ ज्ञानलाभशब्दयोरर्थभेदस्तर्हिकुत्रेत्याशंक्याह॥ यत्रहीति॥ अनात्मनिलब्धृलब्ध व्ययोर्ज्ञानज्ञेययोश्चभेदेक्रियाभेदात्फलभेदसिद्धिरित्यर्थः॥ नन्वात्मलाभोपिज्ञानाद्भिद्यतेलाभत्वादनात्मलाभवदित्याशंक्यज्ञानहेतुमात्रानधीनत्वमुपा धिरित्याह॥ सचेति॥ अप्राप्तत्वंव्यक्तीकरोति॥ उत्पाद्येति तद्व्यवधानमेवसाधयति॥ कारकेति॥ किंच॥ अनात्मलाभोऽविद्याकल्पितःकादाचित्कत्वात्संमत वदित्याह॥ सत्वेति॥ किंच॥ असावविद्याकल्पितोऽप्रामाणिकत्वात्संप्रतिपन्नवदित्याह॥ मिथ्येति॥ प्रकृतेविशेषंदर्शयति॥ अयंत्विति॥ वैपरीत्यमेवस्फोर

आत्मत्वादिति॥आत्मनस्तर्हि नित्यलब्धत्वान्न तत्रालब्धत्वबुद्धिः स्यादित्याशंक्याह॥नित्येति॥आत्मन्यलाभोऽज्ञानं लाभस्तु ज्ञानमित्येतद्दृष्टांतेन स्पष्टयति॥यथेत्यादिना॥शुक्तिकायाः स्वरूपेण गृह्यमाणाया अपीति योजना॥आत्मलाभोऽविद्यानिवृत्तिरेवेत्यत्रोक्तं वक्ष्यमाणं च गमकं दर्शयति॥तस्मादिति॥अविरोधमुपसंहरति॥तस्मादित्यादिना॥तयोरेकार्थत्वेपि कथमनुविंदेदिति मध्ये प्रयुज्यते तत्राह॥विंदतेरिति॥आदिमध्यावसानानामविरोधम्

आत्मत्वादेवं नोत्पाद्यादिक्रियाव्यवहितो तो नित्यलब्धस्वरूपत्वेपि सत्यविद्यामात्रं व्यवधानं॥यथा गृह्यमाणाया अपि शुक्तिकायाः विपर्ययेण रजताभासाया अग्रहणं विपरीतज्ञानव्यवधानमात्रं तथाग्रहणं ज्ञानमात्रमेव विपरीतज्ञानव्यवधानापोहार्थत्वाज्ज्ञानस्य॥एवमिहाप्यात्मनोऽलाभोऽविद्यामात्रव्यवधानं तस्माद्विद्यया तदपोहनमात्रमेव लाभो नान्यः कदाचिदप्युपपद्यते तस्मादात्मलाभे ज्ञा

देवं कीर्तिꣳ श्लोकं विंदते य एवं वेद ॥१॥

नादर्थांतरस्य साधनस्यानर्थक्यं वक्ष्यामः॥तस्मान्निराशंकमेव ज्ञानलाभयोरेकार्थत्वं विवक्षन्नाह ज्ञानं प्रकृत्यानुविंदेदिति विंदते लाभार्थत्वाद्गुणविज्ञानफलमिदमित्युच्यते यथायमात्मा नामरूपानुप्रवेशेन ख्यातिं गतः आत्मेत्यादिना नामरूपाभ्यां प्राणादिसंहतिं च श्लोकं प्राप्तवानित्येवं यो वेद स कीर्तिं ख्यातिं श्लोकं संघातमिष्टैः सह विंदते लभते॥कुतश्चात्मतत्त्वमेव ज्ञेयमनादृत्यान्यदित्याह ॥

त्का कीर्तिमित्यादिवाक्यमवतार्य व्याकरोति॥गुणेत्यादिना॥इतिशब्दादुपरिष्टाद्यथेत्यस्य संबंधो ज्ञानस्तुतिश्चात्र विवक्षिता॥ज्ञानिनामीदृक्फलस्यानभिलषितत्वादिति द्रष्टव्यं॥आत्मनः पदनीयत्वे तस्यैवाज्ञातत्वसंभवो हेतुरुक्तो धनात्तत्रैव हेत्वंतरत्वेनोत्तरवाक्यमवतारयति॥कुत इति॥अन्यदनात्मे

बृ·र·
७८

विरक्तस्य लोकवाह्यत्वात् १

विरक्तस्यपुत्रेप्रीत्यभावात्कथमात्मनस्तस्मात्प्रियतरत्वमित्याशंक्याह॥पुत्रोहीति॥प्रियतरमात्मतत्वमितिशेषः॥लोकदृष्टिमेवावष्टभ्याह॥तथेति॥वित्त पदेनमानुषवित्तवद्दैवंवित्तमपिगृह्यते॥विशेषाणामानंत्यात्प्रत्येकंप्रदर्शनमशक्यमित्याशयेनाह तथान्यस्मादिति॥पुत्रादौप्रीतिव्यभिचारेपिप्राणादौत द्व्यभिचारादात्मनोनप्रियतमत्वमितिशंकते॥तत्कस्मादिति॥पदांतरमादायव्याकुर्वन्परिहरति॥उच्यतइत्यादिना॥अंतरतरत्वेप्रियतमत्वसाधनेहेतु

भा·

तदेतदात्मतत्वंप्रेयःप्रियतरंपुत्रात्पुत्रोहिलोकेप्रियःप्रसिद्धः॥तस्मात्प्रियतरमितिनिरतिशयप्रियत्वंदर्शयति॥तथावित्ताद्धिरण्यरत्ना देस्तथान्यस्माद्यद्यल्लोकेप्रियत्वेनप्रसिद्धंतस्मात्सर्वस्मादित्यर्थः॥तत्कस्मादात्मतत्वमेवप्रियतरंनप्राणादीत्युच्यतेअंतरतरंवाह्यात्पुत्रवि त्तादेःप्राणपिंडसमुदायोह्यंतरोभ्यंतरःसंनिकृष्टआत्मनःतस्मादप्यंतरादंतरतरंयदयमात्मायदेतदात्मतत्वं॥योहिलोकेनिरतिशयप्रियः

तदेतत्प्रेयःपुत्रात्प्रेयोवित्तात्प्रेयोन्यस्मात्सर्वस्मादंतरतरंयदयमात्मा

ससर्वप्रयत्नेनलब्धव्योभवतितथायमात्मालौकिकप्रियेभ्यःप्रियतमस्तस्मात्तल्लाभेमहान्यत्नआस्थेयइत्यर्थः॥कर्तव्यताप्राप्तमप्यन्य प्रियलाभेयत्नमुत्सृज्यात्मलाभेयत्नःकर्तव्यःकस्मात्पुनरात्मानात्मप्रिययोरन्यतरप्रियहानेनेतरप्रियोपादानप्राप्तौआत्मप्रियोपादानेनैवेतरहानंक्रियते नविपर्ययइत्युच्यते

रात्मत्वमित्यभिप्रेत्यविशेषंव्यपदिशति॥यदयमिति॥आत्मनोनिरतिशयप्रेमास्पदत्वेपिकुतस्तस्यैवपदनीयत्वमित्याशं क्यवाक्यार्थमाह॥योहीत्यादिना॥पुत्रादिलाभेदारादीनांकर्तव्यत्वेनप्राप्तप्रयत्नविरोधादात्मलाभेप्रयत्नःसुकरोनभवतीत्याशंक्याह॥कर्तव्यतेति॥ आत्मनोनिरतिशयप्रेमास्पदत्वेयुक्तिंपृच्छति॥कस्मादिति॥आत्मप्रियस्योपादानमनुसंधानमितरस्यानात्मप्रियस्यहानमननुसंधानं ॥

राम:
१८

रंगा २ प्राप्तः आत्मलाभे यः प्रयत्नः तेन सह पुत्रादिलाभे प्रयत्नस्य विरोधात् २

विपर्ययोः नात्मनि पुत्रादावभिनिवेशे नात्मप्रियस्यानुसंधानमिति विभागः॥ युक्तिलेशं दर्शयितुमनंतरवाक्यमवतारयति॥ उच्यत इति॥ यः कश्चिदा
त्मप्रियवादी स तस्मादन्यं प्रियं ब्रुवाणं प्रति ब्रूयादिति संबंधः॥ वक्तव्यं प्रश्नपूर्वकं प्रकटयति॥ किमित्यादिना॥ आत्मप्रियवादिन्येवं वदत्यपि पुत्रादिनाश
स्तद्वाक्यार्थो नियतो न सिध्यतीत्याशंक्य परिहरति॥ स कस्मादित्यादिना॥ ह शब्दोवधारणार्थः समर्थपदादुपरि संबध्यते॥ तस्मादेवं वक्तीति शेषः उक्तं स

स यः कश्चिदन्यमनात्मविशेषं पुत्रादिकं प्रियतरमात्मनः सकाशाद्ब्रुवाणं ब्रूयादात्मप्रियवादी किं प्रियं तवाभिमतं पुत्रादिलक्षणं रोत्स्यत्या
वरणं प्राणसंरोधं प्राप्स्यति विनंक्ष्यतीति स कस्मादेवं ब्रवीति यस्मादीश्वरः समर्थः पर्याप्तो सावेवं वक्तुं ह यस्मात्तस्मात्तथैव स्याद्यत्तेनो
क्तं प्राणसंरोधं प्राप्स्यति॥ यथाभूतवादी हि सः तस्मात्स ईश्वरो वक्तुमीश्वरशब्दः क्षिप्रवाचीति केचित् भवेद्यदि प्रसिद्धिः स्यात्तस्मादुज्झ्

स योन्यमात्मनः प्रियं ब्रुवाणं ब्रूयात्प्रियं रोत्स्यतीती

झित्वान्यत्प्रियमात्मानमेव प्रियमुपासीत स य आत्मानमेव प्रियमुपास्ते आत्मैव प्रियो नान्योस्तीति प्रतिपद्यते अन्यल्लौकिकं प्रियमप्यप्रि
यमेवेति निश्चित्योपास्ते चिंतयति॥ न हास्यैवंविदः प्रियं प्रमायुकं प्रमरणशीलं भवति नित्यात्त्व मर्थ्यमनूद्य फलितमाह यस्मादिति॥ अथात्मप्रि
यवादिना यथोक्तं सामर्थ्यमेव कथं लब्धमित्याशंक्याह॥ यथेति॥ अतोन्यदार्तमित्यनात्मनो विनाशित्वाद्विनाशिनश्च दुःखात्मकत्वात्तत्प्रियत्वस्य भ्रांतिमात्र
त्वादात्मनस्तद्वैपरीत्यान्मुख्या प्रीतिस्तत्रैवेति भावः॥ पक्षांतरमनूद्य रूढप्रयोगाभावेन दूषयति॥ ईश्वरशब्द इति॥ अनात्मन्यमुख्या प्रीतिरिति स्थिते फलित
माह॥ तस्मादिति॥ उपास्तिमनूद्य तत्फलं कथयति॥ स य इति॥ अनुवादद्योतको ह शब्दः॥ प्रियमात्मसुखं तस्यापि लौकिकसुखवन्नाशः सुखत्वादित्याशंक्य तन्नित्य

सार्थमनुवादमात्रमत्रविवक्षितमित्याह॥ नित्येति॥

फलश्रुतेर्गत्यंतरमाह॥आत्मप्रियेति॥महद्धीदमात्मप्रियग्रहणंयत्तन्निष्ठस्यप्रियंनप्रणश्यतितस्मात्तदनुसंधानंकर्त्तव्यमितिस्तुत्यर्थंफलकीर्त्तनमि
त्यर्थः॥ पक्षांतरमाह प्रियगुणेति॥योमंदःसन्नात्मदर्शीतस्यप्रियगुणविशिष्टात्मोपासनेप्रियंप्राणादिननश्यतीतिफलंविधातुंफलवचनमित्यर्थः॥
नन्वात्मानंप्रियमुपासीनस्यप्रियंप्राणादिविद्यासामर्थ्यान्ननश्यतितथाचमंदविशेषणंमंदमित्याशंक्याह॥ताच्छील्येति॥ताच्छील्येर्थेविहितस्योकञ्प्रत्य
यस्यश्रुत्योपादानात्स्वभावहानायोगाच्चप्रमरणशीलत्वाभावेपिप्राणादेरास्तेतिकंअप्रमरणमविवक्षितमित्यर्थः॥८॥तदाहुरित्यादेर्गतेनग्रंथेनसंबंधंव

वादमात्रमेतदात्मविदोन्यस्यप्रियस्याप्रियस्यचाभावादात्मप्रियग्रहणंस्तुत्यर्थंवा॥प्रियगुणफलविधानार्थंवामंदात्मदर्शिनस्ताच्छील्य
प्रत्ययोपादानात्॥८॥सूत्रिताब्रह्मविद्यात्मेत्येवोपासीतेतियदर्थोपनिषत्कृत्स्नापितस्यैतस्यसूत्रस्यव्याचिख्यासुःप्रयोजनाभिधित्सयो

ष्वरोहतथैवस्यादात्मानमेवप्रियमुपासीतसयआत्मानमेवप्रियमुपास्तेनहास्यप्रियंप्रमायुकंभवति॥८॥

पोद्जिघांसतितदितिवक्ष्यमाणमनंतरवाक्येऽवद्योसंवस्तुआहुर्ब्राह्मणाब्रह्मविविदिषवोजन्मजरामरणप्रबंधचक्रभ्रमणकृतायासदुः
खोदकाऽपारमहोदधिप्लवभूतंगुरुमासाद्य कुरूचंकीर्त्तयति॥सूत्रितेति॥तस्यांप्रमाणमाह॥यदर्थेति॥तर्हिसूत्रव्याख्यानेनैवसर्वोपनिषदर्थस्सि
द्धेस्तदाहुरित्यादिवृथेत्याशंक्याह॥तस्येति॥विद्यासूत्रंव्याख्यातुमिच्छंतीश्रुतिःसूत्रितविद्याविवक्षितप्रयोजनाभिधानायोपोद्घातंचिकीर्षतिप्रतिपाद्यमर्थं
बुद्धौसंगृह्यतादर्थ्येनार्थांतरोपवर्णनस्यतथात्वाच्चिंताप्रकृतसिध्यर्थामुपोद्घातंप्रचक्षतइतिन्यायादित्यर्थः॥यद्ब्रह्मविद्ययेत्यादिवाक्यप्रकाश्यंचोद्यं
तच्छब्देनोच्यतेप्रकृतसंबंधासंभवादित्याह॥तदितीति॥ब्राह्मणमात्रस्यचोद्यकर्त्तृत्वंव्यावर्त्तयति॥ब्रह्मेति॥उक्तस्यब्रह्मवेदनेच्छावत्त्वंव्यावर्त्तयितुं

जन्मचजराचमरणंचतेषांप्रबंधेप्रवाहेचक्रवदनवरतंभ्रमणेनकृतंयदायासात्मकंदुःखंतदेवोदकंयस्मिन्नपारेसंसाराख्येमहोदधौतत्रप्लव
भूतंतरणसाधनंइतियावत् तत्तीरंतस्यसंसारसमुद्रस्यतीरंब्रह्मेत्यर्थः॥तेषांविविदिषायाःसाफल्यार्थंतत्प्रत्यनीकेसंसारेवैराग्यंदर्शयति॥धर्मेति
॥निर्वेदस्यनिरंकुशत्वंवारयति॥तद्विलक्षणेति॥उत्तरवाक्यमवतार्यव्याचष्टे॥किमित्यादिना॥अथपरायपात्तदक्षरमधिगम्यतइतिश्रुत्यंतरमाश्रित्य

तत्तीरमुत्तितीर्षवोधर्माधर्मसाधनतत्फललक्षणात्साध्यसाधनरूपान्निर्विण्णास्तद्विलक्षणनित्यनिरतिशयश्रेयःप्रतिपित्सवः
किमाहुरित्याह॥यद्ब्रह्मविद्ययाब्रह्मपरमात्मातद्ययावेद्यतेसाब्रह्मविद्यातयाब्रह्मविद्ययासर्वंनिरवशेषंभविष्यंतोभविष्यामइ
त्येवंमनुष्यायन्मन्यंतेमनुष्यग्रहणंविशेषतोधिकारज्ञापनार्थंमनुष्याएवहिविशेषतोभ्युदयनिःश्रेयससाधनेधिकृताइत्यभिप्रा

तदाहुर्यद्ब्रह्मविद्ययासर्वंभविष्यंतोमनुष्यामन्यंते

योयथाकर्मविषयेफलप्राप्तिंध्रुवांकर्मभ्योमन्यंतेतथाब्रह्मविद्यायाःसर्वात्मभावफलप्राप्तिंध्रुवामेवमन्यंतेवेदप्रामाण्यस्योभयत्रा
विशेषात्तत्रविप्रतिषिद्धंवस्तुलक्ष्यतेअतःपृच्छामःकिमुतद्ब्रह्मयस्यविज्ञानात्सर्वंभविष्यंतोमनुष्यामन्यंते॥ ८॥तद्ययेति॥मनुष्यायन्मन्यंते
तत्रविरुद्धंवस्तुभातीतिसंबंधःमनुष्यग्रहणस्यकृत्यमाह॥मनुष्येति॥ननुदेवादीनामपिविद्याधिकारोदेवताधिकरणन्यायेनवक्ष्यतेतत्कुतोमनुष्याणा
मेवाधिकारज्ञापनमित्यतआहमनुष्याइति॥विशेषतःसर्वाविसंवादेनेतियावत्॥तथापिकिमितितेज्ञानान्मुक्तिंसिद्धवद्ब्रुवंतीत्याशंक्याह॥यथेति॥
उभयत्रकर्मब्रह्मणोरितियावत्॥उत्तरवाक्यमुपादत्ते॥तत्रेति॥मनुष्याणांमतंतच्छब्दार्थः॥वस्तुशब्देनज्ञानात्फलमुच्यते ॥

आक्षेपगर्भस्यचोद्यस्यप्रवृत्तौविरोधप्रतिभासोहेतुरित्यतःशब्दार्थःतद्ब्रह्मपरिच्छिन्नमपरिच्छिन्नंवेतिकुतोब्रह्मणिचोद्यते॥तत्राह॥यस्येति॥प्र
श्नांतरंकरोति॥तत्किमिति॥ब्रह्मस्वात्मानमज्ञासीदतिरिक्तंवेतिप्रश्नस्यप्रसंगंदर्शयति॥यस्मादिति॥सर्वस्यअतिरिक्तविषयेज्ञानंप्रसिद्धंतत्किं
विचारेणेत्याशंक्याह॥ब्रह्मवेति॥सर्वंखल्विदंब्रह्मेत्यादौब्रह्मणःसर्वात्मत्वश्रवणादतिरिक्तविषयाभावादात्मानमेवावेदितिपक्षस्यसावकाशते
त्यर्थः॥किंशब्दस्यप्रश्नार्थत्वमुक्त्वाऽऽक्षेपार्थत्वमाह॥तद्यदीति॥ब्रह्महिकिंचिदज्ञात्वासर्वमभवज्ज्ञात्वावा॥नाद्यः॥ब्रह्मविद्यानर्थक्यादित्युक्त्वाद्वितीय

तत्किमवेद्यस्माद्विज्ञानात्तद्ब्रह्मसर्वमभवद्ब्रह्मचसर्वमितिश्रूयते॥तद्यदिविज्ञाययत्किंचित्सर्वमभवत्तथाऽन्येषामप्यस्तुकिंब्रह्मविद्य
या॥अथविज्ञायसर्वमभवद्विज्ञानसाध्यत्वात्कर्मफलेनतुल्यमेवेत्यनित्यत्वप्रसंगःसर्वभावस्यब्रह्मविद्याफलस्यानवस्थादोषश्च

किमुतब्रह्मावेद्यस्मात्तत्सर्वमभवदिति॥९॥

तदप्यन्यद्विज्ञायसर्वमभवत्ततःपूर्वमप्यन्यद्विज्ञायेति॥नतावदविज्ञायसर्वमभवच्छास्त्रार्थवैरूप्यदोषात्फलानित्यत्वदोषस्तर्हि
॥नैकोपिदोषोर्थविशेषोपपत्तेः॥९॥

मनुवदति॥अथेतिस्वरूपमन्यद्वाज्ञात्वाब्रह्मणःसर्वापत्तिरितिविकल्प्योभयत्रसाधारणंदूषणमाह॥विज्ञा
नेति॥द्वितीयेदोषांतरमाह॥अनवस्थेति॥वहिरेवाक्षेपंपरिहरति॥नतावदितिअज्ञात्वैवब्रह्मणःसर्वभावोस्मदादेस्तुज्ञानादितिशास्त्रार्थवैरूप्यंनचा
स्मदादेरपितदंतरेणतद्भावःशास्त्रानर्थक्याज्ज्ञानाद्ब्रह्मणःसर्वभावपक्षेसोक्तंदोषंआक्षेप्तास्मारयति॥फलेति॥सतोऽपरिच्छिन्नंब्रह्माविद्यातत्कार्यसंबं
धात्परिच्छिन्नवज्ज्ञातितन्निवृत्तौसोपाधिकंसर्वभावस्यसाध्यत्वंनचानवस्थाज्ञेयांतरानंगीकारान्नापिक्रियाविरोधोविषयत्वमंतरेणवाक्योत्थबुद्धेःस्फुरणादिति

॥परिहरति॥नैकोपीति॥

एतेनविद्यावैयर्थ्यमपिपरिहृतमित्याह॥अर्थेति॥यद्यपिब्रह्मापरिछिन्नंनित्यसिद्धंतथापितत्राविद्यातत्कार्यध्वंसरूपस्यार्थविशेषस्यज्ञाना
दुपपत्तेर्नतद्वैयर्थ्यमित्यर्थः॥९॥इदानींप्रश्नमनूद्यतदुत्तरत्वेनब्रह्मेत्यादिश्रुतिमवतारयति॥यदीत्यादिना॥तत्रवृत्तिकृतांमतानुसारेणब्रह्मश
ब्दार्थमाह॥ब्रह्मेति॥तस्यपरिछिन्नत्वाज्ज्ञानेनसर्वभावस्यसाध्यत्वसंभवादितिहेतुमाह॥सर्वभावस्येतिसिद्धांतेयथोक्तहेत्वनुपपत्तिंदोषमाह॥
नहीति॥सातर्हिविज्ञानसाध्याभूदित्यतआह॥विज्ञानेति॥हिरण्यगर्भस्यनोपदेशजन्यज्ञानाद्ब्रह्मभावःसहसिद्धंचतुष्टयमितिस्मृतेःस्वाभाविक

यदिकिमपिविज्ञायैवतद्ब्रह्मसर्वमभवत्ऽकामःकिमुतद्ब्रह्मावेद्यस्मात्तत्सर्वमभवदिति॥एवंचोदितेसर्वदोषानागंधितंप्रतिवचन
माह॥ब्रह्मापरंसर्वभावस्यसाध्यत्वोपपत्तेर्नहिपरस्यब्रह्मणःसर्वभावापत्तिर्विज्ञानसाध्याविज्ञानसाध्यांचसार्वभावापत्तिमाह॥तस्मा
त्तत्सर्वमभवदितितस्माद्ब्रह्मवाइदमग्रआसीदित्यपरंब्रह्मेहभवितुमर्हति॥मनुष्याधिकाराद्वातद्भावीब्राह्मणःस्यात्सर्वंभविष्यंतोमनु
ष्यामन्यंतइतिहिमनुष्याःप्रकृतास्तेषांचाभ्युदयनिःश्रेयससाधनेविशेषतोधिकारइत्युक्तंनपरस्यब्रह्मणोनाप्यपरस्यप्रजापतेः॥अ
तोद्वैतैकत्वापरब्रह्मविद्ययाकर्मसहितया

ज्ञानवत्वात्तस्मात्तत्सर्वमभवदितिचोपदेशाधीनधीसाध्योसौश्रुतोनचासीदित्यतीतकालावच्छेदस्लिका
लेतस्मिन्युज्यते॥समवर्ततेतिचजन्ममात्रंश्रूयतेकालात्मकेतत्संबंधस्यस्वाश्रयपराहतत्वान्मनुष्याणांप्रकृतत्वाच्चनापरंब्रह्मेहब्रह्मशब्दमित्यपरि
तोषाद्वृत्तिकारमतंहित्वाब्रह्मेतिब्रह्मभावीपुरुषोनिर्दिश्यतइतिभर्तृप्रपंचोक्तिमाश्रित्यतन्मतमाह॥मनुष्येति॥तदेवप्रपंचयति॥सर्वमित्यादिना॥द्वै
तैकत्वंसर्वजगदात्मकमपरंहिरण्यगर्भाख्यंब्रह्मतस्मिन्विद्याहिरण्यगर्भोहमितिअहंग्रहोपास्तिस्तयासमुच्चितयातद्भावमिहैवोपगतोहिरण्यगर्भप
देयद्गोज्यंततोपिदोषदर्शनाद्विरक्तःसर्वकर्मफलप्राप्त्यानिवृत्तकामादिनिगडःसाध्यांतराभावाद्विद्यामेवार्थयमानस्तंद्रष्टाब्रह्मभावीजीवोस्मिन्वाक्येब्रह्म

शब्दार्थइतिफलितमाह॥अतइति॥

कथं ब्रह्मभाविनि जीवे ब्रह्मशब्दस्य प्रवृत्तिरित्याशंक्याह॥ दृष्टश्चेति॥ आदिशब्देन ग्रहस्यः सदृशीं भार्यां विंदेतेत्यादिर्गृह्यते॥ इहेति प्रकृतवाक्यक
थनं॥ भर्तृप्रपंचव्याख्यानं दूषयति॥ तन्नेति॥ ब्रह्मशब्देन परस्मादर्थांतरस्य ग्रहे तस्य सर्वभावापत्तेः साध्यत्वादनित्यत्वापत्तेः न तन्मतमुचितमित्यर्थः
॥ साध्यस्यापि मोक्षस्य नित्यत्वमाशंक्य यत्कृतकं तदनित्यमिति न्यायमाश्रित्याह॥ नहीति॥ सामान्यन्यायं प्रकृते योजयति॥ तथेति॥ भवतु सर्वभा

ऽपरब्रह्मभावमुपसंपन्नो भोज्यादपावृत्तः सर्वप्राप्तोऽछिन्नकामकर्मबंधनः परब्रह्मभावी ब्रह्मविद्याहेतोर्ब्रह्मेत्यभिधीयते॥ दृष्टश्च
लोकेऽपि भाविनीं वृत्तिमाश्रित्य शब्दप्रयोगो यथौदनं पचतीति शास्त्रे च परिव्राजकः सर्वभूताभयदक्षिणामित्यादिस्तथेहेति केचिद्ब्र
ह्मभावी पुरुषो ब्राह्मण इति व्याचक्षते तन्न सर्वभावापत्तेरनित्यत्वदोषान्न हि सोऽस्ति लोके परमार्थतो यो निमित्तवशाद्भावांतरमापद्यते
नित्यश्चेति॥ तथा ब्रह्मविज्ञाननिमित्तकृता चेत्सर्वभावापत्तिर्नित्या चेति विरुद्धं अनित्यत्वे च कर्मफलतुल्यतेत्युक्तो दोषोऽविद्याकृताऽ
सर्वत्वनिवृत्तिं चेत्सर्वभावापत्तिं ब्रह्मविद्याफलं मन्यसे ब्रह्मभाविपुरुषकल्पनाऽनर्थिकास्यात्प्राग्ब्रह्मविज्ञानादपि सर्वो जंतुर्ब्रह्मत्वान्नित्यमे
व सर्वभावापन्नः परमार्थतोऽविद्ययात्वब्रह्मत्वमसर्वत्वं चाध्यारोपितं यथा शुक्तिकायां रजतं व्योम्नि वा तलमलवत्त्वादि तथेह ब्रह्मणि अध्या
रोपितमविद्ययाऽब्रह्मत्वमसर्वत्वं च ब्रह्मविद्यया निवर्त्यत इति मन्यसे यदि तदा युक्तं यत्परमार्थत आसीत्परं ब्रह्म ब्रह्मशब्दस्य मुख्यार्थ
भूतं ब्रह्म वा इदमग्र आसीदित्यस्मिन्वाक्य उच्यत इति वक्तुं ॥

वापत्तेरनित्यत्वं काहानिस्तत्राह॥ अनित्यत्वे चेति॥ किंच॥ जीवस्याब्रह्मत्वं
त्वाविद्याकृतं पारमार्थिकं वेति विकल्प्याद्यमनूद्य दूषयति॥ अविद्याकृतेति॥ तत्रानुवादभागं विभजते॥ प्रागित्यादिना॥ ब्रह्मभाविपुरुषकल्प
नानर्थैक्यमुक्तं व्यक्तीकरोति॥ तदेति॥ तस्मिन्पक्षे ब्रह्मज्ञानात्पूर्वमपि परमार्थतः परं ब्रह्मासीत्तदेव प्रकृते वाक्ये ब्रह्मशब्देनोच्यत इति युक्तं वक्तुं तद्धि ब्रह्म

भा·

॥ प्राग्ब्रह्मत्वभावं तत्त्वाभिति गोचरता ॥

गौर्वाहीकइतिवदमुख्यार्थोपिब्रह्मशब्दोनिर्वहतीत्याशंक्याह॥यथेति॥निरतिशयमहत्त्वसंपन्नंवस्तुब्रह्मशब्देनश्रुतमश्रुतस्तुब्रह्मभावीपुरुषःश्रुत
हान्याचाश्रुतकल्पनानन्यायवतीतस्मात्त्वत्कल्पनानयुक्तेतिव्यावर्त्यमाह॥नत्विति॥अग्निरधीतेनुवाकमित्यादौश्रुतहान्याऽश्रुतोपादानंदृष्टमित्या
शंक्याह॥महत्तरइति॥तत्राग्निशब्दस्यमुख्यार्थत्वेसत्यन्विताभिधानानुपपत्त्यावाक्यार्थासिद्धेस्तज्ज्ञानेप्रयोजनेश्रुतमपिहित्वाऽश्रुतंगृह्यते॥प्रकृते
त्वसतिप्रयोजनविशेषेश्रुतहान्यादिर्नयुक्तिमानित्यर्थः॥मनुष्याधिकारंनिर्वोढुंब्रह्मभाविपुरुषकल्पनेत्याशंक्यमहत्तरविशेषणंयद्ब्रह्मविद्ययेतिप
रस्यापितुल्यमधिकृतत्वंतस्यचाविद्याद्वाराधिकारत्वमविरुद्धमित्यग्रेस्फुटीभविष्यतीतिभावः॥द्वितीयंकल्पमुत्थापयति॥अविद्येति॥ब्रह्मविद्यावेय

यथाभूतार्थवादित्वाद्धेतुस्यनत्वियंकल्पनायुक्ताब्रह्मशब्दार्थविपरीतोब्रह्मभावीपुरुषोब्रह्मेत्युच्यतेइतिश्रुतहान्यश्रुतकल्पना
याअन्याय्यत्वान्महत्तरेप्रयोजनांतरेऽसत्यविद्याकृतव्यतिरेकेणाब्रह्मत्वमसर्वत्वंचविद्यतएवेतिचेत् नतस्यब्रह्मविद्ययापोहा
नुपपत्तेर्नहिकदाचित्क्वचित्साक्षाद्वस्तुधर्मस्यापोढ्रीदृष्टाकर्त्रीवाब्रह्मविद्याअविद्यायास्तुसर्वत्रैवनिवर्त्तिकादृश्यते॥तथेहापिअ
ब्रह्मत्वमविद्याकृतमेवनिवर्त्यतामसर्वत्वंचब्रह्मविद्ययानतुपारमार्थिकंवस्तुकर्त्तुंनिवर्त्तयितुंवार्हतिब्रह्मविद्यातस्माद्व्यर्थैवश्रु
तहान्यश्रुतकल्पनाब्रह्मण्यविद्यानुपपत्तिरितिचेन्नब्रह्मणिविद्या र्थ्यप्रसंगान्नैवमितिदूषयति॥नतस्येति॥अनुपपत्तिमेवसाधयति॥न
हीति॥साक्षादारोपमंतरेणेतियावत्॥वस्तुधर्मस्यपरमार्थभूतस्यपदार्थस्येत्यर्थः॥विद्यायास्तर्हिकथमर्थवत्त्वंतत्राह॥अविद्यायास्त्विति॥सर्वत्रश्रु
त्यादाविति यावत्॥विमतमविद्यात्मकंविद्यानिवर्त्यत्वाद्रजतादिवदित्यभिप्रेत्यदार्ष्टांतिकमाह॥तथेति॥विमतंनकारकंविद्यात्वाच्छुक्तिविद्यावदि
त्याशयेनाह॥नत्वितिअब्रह्मत्वादेर्वास्तवत्वायोगादयुक्ताब्रह्मभाविपुरुषकल्पनेत्युपसंहरति॥तस्मादिति॥ब्रह्मण्यविद्यानिरस्तिर्विद्याफलमित्यत्रचो

नहिसर्वज्ञेप्रकाशैकरसेब्रह्मण्यज्ञानमादित्येतमोवदुपपन्नमितिभावः॥तस्याज्ञातत्वमज्ञत्वंवाक्षिप्यतेनाद्यइत्याह॥नब्रह्मणीति॥नहितत्वम
सीतिविद्याविधानंविज्ञातेब्रह्मणियुक्तंपिष्टपिष्टिप्रसंगादतस्तदज्ञातमेष्टव्यमित्यर्थः॥ब्रह्मात्मैक्यमज्ञातंशास्त्रेणज्ञाप्यतेतद्विषयंचश्रवणादिविधीय
तेतेनतस्मिन्नज्ञातत्वमेष्टव्यमित्युक्तमर्थंदृष्टांतेनसाधयति॥नहीति॥मिथ्याज्ञानस्याज्ञानाव्यतिरेकात्ब्रह्मण्यविद्याध्यारोपणायांशुक्तौरूप्यारोपणं
दृष्टांतितमितिद्रष्टव्यं॥कल्पांतरमालंबते॥नब्रूमइति॥ब्रह्माविद्याकर्तृत्वेनभवतीत्यस्यपक्षस्याश्रुतोवार्थस्तदन्यस्तदाश्रयोस्तीतिवातत्राद्यमंगीकरोति॥भ

विधानान्नहिशुक्तिकायांरजताध्यारोपणेअसतिशुक्तिकात्वंज्ञाप्यतेचक्षुर्गोचरापन्नायामियंशुक्तिकानरजतमितितथासदेवेदंसर्वं
ब्रह्मैवेदंसर्वमात्मैवेदंसर्वंनेदंद्वैतमस्तिअब्रह्मेतिब्रह्मण्येकत्वविज्ञानंनविधातव्यंब्रह्मण्यविद्याध्यारोपणायामसत्यां॥नब्रूमःशुक्ति
कायामिवब्रह्मण्यतद्धर्माध्यारोपणानास्तीतिकिंतर्हिनब्रह्मस्वात्मन्यतद्धर्माध्यारोपयितृअविद्याकर्तृचेतिभवत्वेवंनाविद्याकर्तृभ्रांतं
चब्रह्मकिंतुनैवाब्रह्माविद्याकर्त्ताचेतनोभ्रांतोन्यइष्यते॥नान्योतोस्तिविज्ञातानान्यदतोस्तिविज्ञातृतत्वमस्यात्मानमेवावेदहंब्रह्मास्मि
न्योसावन्योहमस्मीतिनसवेदेत्यादिश्रुतिभ्यःस्मृतिभ्यश्चसमंसर्वेषुभूतेषुअहमात्मागुडाकेशशुनिचैवश्वपाकेचयस्तुसर्वाणिभूतानि
यस्मिन्सर्वाणिभूतानीतिचमंत्रवर्णात्नन्वेवंशास्त्रोपदेशानर्थक्यमितिवाढमेवमवगतेऽस्त्वेवानर्थक्यमवगमानर्थक्यमपीति
वत्वितिअनादित्वादविद्या
याःकर्त्रपेक्षाभावाद्विनाचद्वारंब्रह्मणिभ्रांत्यनभ्युपगमादित्यर्थः॥द्वितीयंप्रत्याह॥किंत्विति॥ब्रह्मणोन्यश्चेतनोनास्तीत्यत्रश्रुतिस्मृतीरुदाहरति॥नान्यो
तोस्तीत्यादिना॥ब्रह्मणोन्योचेतनोपिनास्तीत्यत्रमंत्रद्वयंपठति॥यस्त्विति ब्रह्मणोन्यस्याज्ञस्याभावेदोषमाशंकते॥नन्विति॥किमिदमानर्थक्यमवगतेः
नवगतेवाचोद्यतेतत्राद्यमंगीकरोति॥वाढमिति॥द्वितीयेनोपदेशानर्थक्यमवगमार्थत्वादितिद्रष्टव्यंउपदेशवदवगमस्यापिस्वप्रकाशेवस्तुनिनोपयोगोस्ती
अद्वैतसिद्धांतावगतेप्राप्तौसत्यांशास्त्रानर्थक्यमप्राप्तौवा=२

विप्रंकृते॥अवगमेति॥

अनवगमनिवृत्तिः=१ यथावस्तुनोनज्ञानाधीनत्वंस्वप्रकाशत्वात्तथातद्भिन्नायास्तस्याअपि=१ प्रत्यक्षतया=१

अनुभवमनुसृत्यपरिहरति॥नानवगमेतिसावस्तुनोभिन्नाचेद्द्वैतहानिरभिन्नाचेज्ज्ञानाधीनत्वासिद्धिरितिशंकते॥तन्निवृत्तेरिति॥अनवगमनिवृत्तेर्दृ
श्यमानतयास्वरूपापलापायोगात्प्रकारांतरासंभवाच्चपंचमप्रकारत्वमेष्टव्यमितिमत्वाह॥नदृष्टेति॥दृष्टमपियुक्तिविरोधेत्याज्यमित्याशंक्याह॥दृश्यमान
मिति॥दृष्टविरुद्धमपिकुतोनेष्यतेतत्राह॥नचेति॥अनुपपन्नत्वमंगीकृत्योक्तंतदेवनास्तीत्याह॥नचेति॥युक्तिविरोधेदृष्टिराभासीभवतीतिशंकते॥दृष्टीने
ति॥दृष्टिविरोधेयुक्तेरेवाभासत्वंस्यादितिपरिहरति॥तत्रापीति॥अनुपपन्नत्वंहिसर्वस्यदृष्टिबलादिष्टंदृष्टस्यत्वनुपपन्नत्वेनकिंचिन्निमित्तमस्तीत्यर्थः॥

चेन्नानवगमनिवृत्तेर्दृष्टत्वात्तन्निवृत्तेरप्यनुपपत्तिरेकत्वइतिचेन्नदृष्टविरोधाद्दृश्यतेह्येकत्वविज्ञानादेवानवगमनिवृत्तिः॥दृश्यमानमप्य
नुपपन्नमितिब्रुवतोदृष्टविरोधःस्यान्नचदृष्टविरोधःकेनचिदप्यभ्युपगम्यतेनचदृष्टेऽनुपपन्नंनामदृष्टत्वादेवदर्शनानुपपत्तिरितिचे
त्तत्राप्येषैवयुक्तिः॥पुण्योवैपुण्येनकर्मणाभवतितंविद्याकर्मणीसमन्वारभेतेमंतावोढाकर्त्ताविज्ञानात्मापुरुषइत्येवमादिश्रुतिस्मृति
न्यायेभ्यःपरस्माद्विलक्षणोन्यःसंसारीअवगम्यतेतद्विलक्षणश्चपरःसएषनेतिनेत्यशनायाद्यत्येतियआत्मापहतपाप्माविजरोविमृत्युरे
तस्यवाअक्षरस्यप्रशासनइत्यादिश्रुतिभ्यः॥कणादादिसपाठादितर्कशास्त्रेषुचसंसारिविलक्षणःईश्वरउपपत्तितःसाध्यतेसंसारदुःखापन
यार्थिप्रवृत्तिदर्शनात्स्फुटमन्यत्वमीश्वरात्संसारिणोवगम्यते

ब्रह्माभाविपुरुषकल्पनांनिराकृत्यस्वपक्षेशास्त्रस्यार्थवत्त्वमुक्तं॥संप्रतिप्रकारांतरेणपू
र्वपक्षयति॥पुण्यइति॥आदिशब्देनयोयंविज्ञानमयःप्राणेष्वित्याद्याश्रुतिर्गृह्यते॥कुरुकर्मैवतस्मात्त्वमित्याद्यास्मृतिः॥न्यायोमिथोविरुद्धयोरेकत्वायोगः॥
विलक्षणत्वमन्यत्वहेतुः॥जीवस्यपरस्मादन्यत्वेपिनतस्यततोन्यत्वमित्याशंक्याह॥तद्विलक्षणश्चेति॥परस्यतद्विलक्षणत्वंश्रुतितोदर्शयित्वातत्रैवोपपत्तिमाह
॥कणादेति॥क्षित्यादिकमुपलब्धिमत्कर्तृकंकार्यत्वाद्घटवदित्याद्योपपत्तिः॥तयोर्मिथोभेदेहेत्वंतरमाह॥संसारेति॥जीवस्यस्वगतदुःखध्वंसेदुःखंमेमाभूदित्यर्थित्वे

नप्रवृत्तिर्दृष्टानेशस्यसास्तिदुःखाभावात्ततोभेदस्तयोरित्यर्थः॥

बृ·र·
८३

भा·

इतश्चेश्वरस्यनप्रवृत्तिर्हेतुफलयोरभावादित्याह॥अवाकीति॥मिथोभेदेश्चोतंलिंगांतरमाह॥सोन्वेष्टव्यइति॥तत्रैवलिंगांतरमाह॥मुमुक्षोश्चेति॥गतिर्देव
यानाद्यातस्यामार्गविशेषार्चिरादिर्देशोगंतव्यंब्रह्मतेषामुपदेशास्तेर्चिषमभिसंभवंतीत्यादयस्तथापिकथंभेदसिद्धिस्तत्राह॥असतीति॥माभूदितिरित्या
शंक्याह॥तदभावेचेति॥कथंतर्हिगत्यादिकमुपपद्यतेतत्राह॥भिन्नस्येति॥जीवेश्वरयोर्मिथोभेदेहेत्वंतरमाह॥कर्मेति भेदेसत्युपपन्नासंभवतीतिशे

ऽवाक्यनादरोनमेपार्थास्तीतिश्रुतिस्मृतिभ्यः सोन्वेष्टव्यः सविजिज्ञासितव्यस्तंविदित्वानलिप्यतेब्रह्मविदाप्नोतिपरंएकधैवानुद्रष्टव्यमे
तद्योवाएतदक्षरंगार्गिविदित्वातमेवधीरोविज्ञायप्रणवोधनुःशरोह्यात्माब्रह्मतल्लक्ष्यमुच्यतइत्यादिकर्मकर्तृनिर्देशाच्चमुमुक्षोश्चगतिमा
र्गविशेषोपदेशादसतिभेदेकस्यकुतोगतिःस्यात्॥तदभावेचदक्षिणोत्तरमार्गविशेषानुपपत्तिर्गंतव्यदेशानुपपत्तिश्चेतिभिन्नस्यतुपरस्मा
दात्मनःसर्वमेतदुपपन्नंकर्मज्ञानसाधनोपदेशाच्चभिन्नश्चेद्ब्रह्मणःसंसारीस्याद्युक्तस्तंप्रत्यभ्युदयनिश्रेयससाधनयोःकर्मज्ञानसाधनयोरु
पदेशोनेश्वरस्याप्तकामत्वात्तस्माद्युक्तंब्रह्मेतिब्रह्मभावीपुरुषउच्यतइतिचेन्नब्रह्मोपदेशानर्थक्यप्रसंगात्संसारीचेद्ब्रह्मभाव्यब्रह्मसन्विदि
त्वात्मानमेवाहंब्रह्मास्मीतिसर्वमभवत्तस्यसंसार्यात्मविज्ञानादेवसर्वात्मभावस्यफलस्यसिद्धत्वात्॥परब्रह्मोपदेशस्यध्रुवमानर्थक्यंप्राप्तंत
द्विज्ञानस्यक्वचित्पुरुषार्थसाधनेऽविनियोगात्संसारिणएवाहंब्रह्मास्मीतिब्रह्मत्वसंपादनार्थउपदेशइतिचे

षः तदेवस्फुटयति॥भिन्नश्चे
दिति॥तद्वैदेप्रामाणिकेपिकथंब्रह्मभाविपुरुषकल्पनेत्याशंक्योपसंहरति॥तस्मादिति॥ब्रह्मभाविनोजीवस्यब्रह्मशब्दवाच्यत्वेब्रह्मोपदेशस्यानर्थक्य
प्रसंगान्नैवमितिदूषयति॥नेत्यादिना॥प्रसंगमेवप्रकटयति॥संसारीचेदिति॥विधिशेषत्वेनब्रह्मोपदेशोर्थवानितिचेत्तत्रकिंकर्मविधिशेषत्वेनोपास्तिवि
धिशेषत्वेनवातदर्थत्वमितिविकल्प्याद्यंदूषयति॥तद्विज्ञानस्येति॥अविनियोगाद्विनियोजकश्रुत्याद्यभावादितिशेषः॥कल्पांतरमादत्ते॥संसारिणइति॥

रामः
८३

ब्रह्मोपदेशस्यकथंसफलत्वमिति=१

उपदेशस्यज्ञानार्थत्वात्तदनपेक्षत्वाच्चसंपत्तेस्तस्यकथंतादर्थ्यमित्याशंक्याह॥अनिर्ज्ञातेहीति॥व्यतिरेकमुक्त्वान्वयमन्वाचष्टे॥निर्ज्ञातेतिपदयोःसामाना
धिकरण्येनजीवब्रह्मणोरभेदावगमाच्चसंपत्त्यसः संभवतीतिसमाधत्तेनेत्यादिना॥कथमेकत्वेगम्यमानेपिसंपदोनुपपत्तिरित्याशंक्याह॥अन्यस्यहीति॥
एकत्वेहेत्वंतरमाह॥इदमिति॥एकत्वेफलितमाह॥तस्मादिति॥किंच॥संपत्तिपक्षेतदापत्तिः फलमन्यद्वेतिविकल्प्यद्वितीयंप्रत्याह॥नचेति॥आद्यंदूष

दनिर्ज्ञातेहिब्रह्मस्वरूपेकिंसंपादयेदहंब्रह्मास्मीतिनिर्ज्ञातलक्षणेहिब्रह्मणिशक्यासंपत्कर्तुंनायमात्माब्रह्मयत्साक्षादपरोक्षाद्ब्रह्मयआ
त्मातत्त्वमसिसआत्माब्रह्मविदाप्नोतिपरमितिप्रकृत्यतस्माद्वाएतस्मादात्मनइतिसहस्रशोब्रह्मात्मशब्दयोःसामानाधिकरण्यादेकार्थत्वमे
वेत्यवगम्यतेअन्यस्यह्यन्यत्वेसंपत्क्रियतेनैकत्वेइदंसर्वंयदयमात्मेतिचप्रकृतस्यैवद्रष्टव्यस्यात्मनएकत्वंदर्शयतितस्मान्नात्मनोब्रह्मत्वसं
पदुपपत्तिर्नचाप्यन्यत्प्रयोजनंब्रह्मोपदेशस्यगम्यतेब्रह्मवेदब्रह्मैवभवतिअभयंवैजनकप्राप्तःअभयंहिवैब्रह्मभवतीतिचतदापत्तिश्रवणा
त्संपत्तिश्चेत्तदापत्तिर्नस्यान्नह्यन्यस्यान्यभावउपपद्यतेवचनात्संपत्तेरपितद्भावापत्तिःस्यादितिचेन्नसंपत्तेःप्रत्ययमात्रत्वाद्विज्ञान
स्यचमिथ्याज्ञाननिवर्तकत्वव्यतिरेकेणाकारकत्वमित्यवोचामनचवचनंवस्तुनःसामर्थ्यजनकंज्ञापकंहिशास्त्रंनकारकमितिस्थितिः
सएषइहप्रविष्टइत्यादिवाक्येषुचपरस्यैवप्रवेशइतिस्थितंतस्माद्ब्रह्मेतिनब्रह्मभाविपुरुषकल्पनासाध्वी

यति॥संपत्तिश्चेति॥तंयथायथे
त्यादिवाक्यमाश्रित्यशंकते॥वचनादिति॥संपत्तेरमानत्वान्नतद्बलादन्यस्यान्यत्वमित्याह॥नेति॥तस्याःमानत्वेप्येवंमानस्याकारकत्वान्नचसूत्राद्युपासना
द्यन्यस्यान्यत्वंस्थितस्यनष्टस्यवानुपपत्तेःश्रुतिश्चनपूर्वसिद्धसूत्रादिभावाभिधायिनीतत्सादृश्यात्तद्भावोपचारादतोब्रह्मभावःस्वतःसिद्धोनसंपाद्यमि
त्याह॥विज्ञानस्येति॥अथान्यस्यान्यभावेयथोक्तंवचनमेवशक्त्याधायकमित्याशंक्याह॥नचेति॥ब्रह्मोपदेशानर्थक्यप्रसंगान्नब्रह्मभाविपुरुषकल्पनेत्युक्त्वा

कं६२

ब्रह्मोपदेशस्यसंपक्षेषत्वेदोषांतरमाह॥इष्टार्थेति॥तदेवविवृण्वन्निष्टमर्थमाचष्टे॥सैंधवेति॥यथोक्तंवस्तुतात्पर्यगम्यमस्यामुपनिषदीत्यत्रहेतुमाह॥कांड
द्वयेपीति॥मधुकांडावगतमवधारणंदर्शयति॥इत्यनुशासनमिति॥मुनिकांडांतेव्यवस्थितमुदाहरति॥एतावदिति॥नकेवलमुपदेशस्यसंपक्षेषत्वेवृ
हदारण्यकविरोधःकिंतुसर्वोपनिषद्विरोधोस्तीत्याह॥तथेति॥इष्टमर्थमित्यमुक्त्वातद्बाधनंनिगमयति तत्रेति॥ननुबृहदारण्यकेब्रह्मकंडिकायांजीवप
रयोर्भेदोभिप्रेतउपसंहारेत्वभेदइतिव्यवस्थायांतद्विरोधःशक्यःसमाधातुमित्यतआह॥तथाचेतिब्रह्मभाविपुरुषकल्पनायामुपदेशानर्थक्यमिष्टार्थबाध

इष्टार्थबाधनाच्चसैंधवघनवदनंतरमबाह्यमेकरसंब्रह्मेतिविज्ञानंसर्वस्यामुपनिषदिप्रतिपिपादयिषितोर्थः॥कांडद्वयेप्यंतेऽवधारणाद
वगम्यतेइत्यनुशासनमेतावदरेखल्वमृतत्वमिति॥तथासर्वशाखोपनिषत्सुचब्रह्मैकत्वविज्ञानंनिश्चितोर्थः॥तत्रयदिसंसारीब्रह्मणोन्य
आत्मानमेवावेदितिकल्प्येतइष्टस्यार्थस्यबाधनंस्यात्॥तथाचशास्त्रमुपक्रमोपसंहारयोर्विरोधादसमंजसंकल्पितंस्याद्व्यपदेशानुपपत्ते
श्च॥यदिचात्मानमेवावेदितिसंसारीकल्प्येतब्रह्मविद्येतिव्यपदेशोनस्यादात्मानमेवावेदितिसंसारिणएववेद्यत्वोपपत्तेः॥आत्मेतिवेदितु
रन्यउच्यतइतिचेत् नाहंब्रह्मास्मीतिविशेषणादन्यश्चेद्वेद्यःस्यादयमसावितिवाविशेष्येत नत्वहमस्मीति अहमस्मीतिविशेषणादात्मानमे
वावेदितिचावधारणान्निश्चितमात्मैवब्रह्मेत्यवगम्यते तथाचसत्युपपन्नोब्रह्मविद्याव्यपदेशोनान्यथासंसारिविद्याह्यन्यथास्या

श्चेत्युक्तं॥इदानींब्रह्मेत्यादिवाक्येब्रह्मशब्देनपरस्याग्रहणेतद्विद्यायाब्रह्मविद्येतिसंज्ञानुपपत्तिदोषांतरमाह॥व्यपदेशानुपपत्तेश्चेति॥अत्रोक्तब्रह्मश
ब्दार्थाद्धेतुर्जीवादन्यस्तदात्मानमित्यत्रात्मशब्देनपरोगृह्यतेतद्विद्याचब्रह्मविद्येतिसंज्ञासिद्धिरितिशंकते॥आत्मेतीति॥वाक्यशेषविरोधान्नैवमित्या
ह॥नाहमिति॥तदेवप्रपंचयति॥अन्यश्चेदिति॥यथोक्तावगमेफलितमाह॥तथाचसतीति॥अत्यंतभेदेव्यपदेशानुपपत्तिंविशदयति॥संसारीति॥

जीवब्रह्मणोर्भेदाभेदोपगमादभेदेन ब्रह्मविद्येति व्यपदेशः सेत्स्यतीत्याशंक्याह॥ नचेति॥ स्यातां वा ब्रह्मात्मनोर्भेदाभेदौ तथापि भिन्नाभिन्नविद्यायां ब्रह्म
विद्येति नियतो व्यपदेशो न स्यादित्याह॥ नचेति॥ निमित्तं विषयः भिन्नाभिन्नविषया विद्या ब्रह्मविषयापि भवत्येवेति व्यपदेशसिद्धिमाशंक्याह॥ तदेति॥
उभयात्मकत्वाद्वस्तुनस्तद्विद्यापि तथेति विकल्पोपपत्तिमाशंक्याह॥ नचेति॥ अस्तु तर्हि वस्तु ब्रह्म वाऽब्रह्म वा वैकल्पिकमित्याशंक्याह॥ श्रोतुरिति॥ संश
यितमपि ज्ञानं वाक्यादुत्पद्यते चेत्तावतैव पुरुषार्थः श्रोतुः सिध्यतीत्याशंक्याह॥ निश्चितं चेति॥ श्रोतुर्निश्चितज्ञानस्य फलवत्त्वेपि वक्तुः संशयितमर्थं व

न च ब्रह्मत्वाब्रह्मत्वे ह्येकस्योपपन्ने परमार्थतस्तमः प्रकाशाविव भानोर्विरुद्धत्वान्न चोभयनिमित्तत्वे ब्रह्मविद्येति निश्चितो व्यपदेशो
युक्तः॥ तदा ब्रह्मविद्या संसारिविद्या च स्यान्न च वस्तुनोऽर्द्धजरतीयत्वं कल्पयितुं युक्तं तत्त्वज्ञानविवक्षायां श्रोतुः संशयो हि तथा स्यान्निश्चि
तं च ज्ञानं पुरुषार्थसाधनमिष्यते यस्य स्याद्द्धा न विचिकित्सास्ति संशयात्मा विनश्यतीति श्रुतिस्मृतिभ्यामतो न संशयितो वाक्यार्थो वाच्यः
परहितार्थिना ब्रह्मणि साधकत्वकल्पनास्मदादिष्विवापेशलात्तदात्मानमेवावेत्तस्मात्तत्सर्वमभवदितीति चेन्न शास्त्रोपलंभान्नह्यस्मत्कल्प
नेयं शास्त्रकृतात्तु तस्माच्छास्त्रस्यायमुपालंभः॥

दतो न काचन हानिरित्याशंक्याह॥ अत इति निश्चितस्यैव ज्ञातार्थस्य पुमर्थसाधनत्वेन संशयितस्ये
त्यतः शब्दार्थः जीवपरयोरत्यंतभेदस्य भेदाभेदयोश्चायोगात्परमेव ब्रह्म ब्रह्मशब्दवाच्यं न जीवस्तद्भावीत्युक्तं संप्रत्यत्यंताभेदपक्षे दोषमाशंकते॥ ब्रह्मणी
ति॥ तदात्मानमेवावेदिति ज्ञातृत्वं ब्रह्मण्युच्यते तदयुक्तं तस्य ज्ञानमूर्त्तित्वादत एव न तत्कर्मत्वमपि न च स्वकर्तृकर्मज्ञानान्मुक्तिः परस्य क्रियाकारकफल
विलक्षणत्वादतो न परं ब्रह्म ब्रह्मशब्दितमित्यर्थः॥ शास्त्रं ब्रह्मणि साधकत्वादिदर्शयति तच्चापौरुषेयमदोषान्नोपलंभार्हं तथा च तस्मिन्नविद्यकं साधक
त्वाद्यविरुद्धमिति समाधत्ते॥ न शास्त्रेति॥ स चायुक्तस्तस्यापौरुषेयत्वेनासंभावितदोषत्वादिति शेषः॥ ननु ब्रह्मणो नित्यमुक्तत्वपरीक्षणार्थं शास्त्रमप्युपाल

शास्त्राद्धिब्रह्मणोनित्यमुक्तत्वंगम्यतेसाधकत्वादिचतस्यतेनैवोच्यतेनचार्धजरतीयमुचितंतथाचवास्तवंनित्यमुक्तत्वंकल्पितमितरदित्यास्थेयंयदितस्य
नित्यमुक्तत्वार्थंसर्वथैवसाधकत्वादिनेष्यतेतदास्वार्थपरित्यागःस्यात्साधकत्वादिनाविनाभ्युदयनिःश्रेयसयोरसंभवान्नचब्रह्मणोन्यश्चेतनोचेतनोवास्ति
॥नान्योतोस्तिद्रष्टाब्रह्मैवेदंसर्वमित्यादिश्रुतेः॥तस्माद्यथोक्ताव्यवस्थास्थेयेत्यर्थः॥किंच॥सर्वस्यापिसंसारस्यब्रह्मण्यविद्ययाध्यासात्तदंतर्भूतंसाधकत्वा
द्यपितत्राध्यस्तमित्यभ्युपगमेकानुपपत्तिरित्याहनचेति॥तस्यतस्मिन्कल्पितत्वंकुतोवगतमित्याशंक्याह॥एकधेति॥उक्तश्रुतितात्पर्यंसंकलयति॥सर्वोहि

नचब्रह्मणदृष्टंचिकीर्षुणाशास्त्रार्थविपरीतकल्पनयास्वार्थपरित्यागःकार्योननैतावत्येवासमायुक्ताभवतःसर्वंहिनानात्वंब्रह्मणिकल्पित
मेवैकधैवानुद्रष्टव्यंनेहनानास्तिकिंचनयत्रहिद्वैतमिवभवतिएकमेवाद्वितीयमित्यादिवाक्यशतेभ्यःसर्वोहिलोकव्यवहारोब्रह्मण्येव
कल्पितोनपरमार्थःसन्नित्यत्यल्पमिदमुच्यतेइयमेवकल्पनाऽपेशलेति॥तस्माद्यत्प्रविष्टंस्रष्टृब्रह्मतत्ब्रह्मवैशब्दोवधारणार्थःइदंशरी
रस्थंयद्गृह्यतेऽग्रेप्राक्प्रतिबोधादपिब्रह्मैवासीत्सर्वंचेदंकिंतप्रतिबोधाद्ब्रह्मास्म्यसर्वंचेत्यात्मन्यध्यारोपात्कर्त्ताहंक्रियावान्फलानांचभोक्ता
सुखीदुःखीसंसारीतिचाध्यारोपयतिपरमार्थतस्तुब्रह्मैवतद्विलक्षणंसर्वंचतत्कथंचिदाचार्येणदयालुनाप्रतिबोधितंनासिसंसारीत्या
त्मानमेवावेत्स्वाभाविक

ति॥सर्वस्यद्वैतव्यवहारस्यब्रह्मणिकल्पितत्वेप्रकृतचोद्यस्याभासत्वंफलतीत्याह॥इत्यल्पमिति॥परपक्षंनिराकृत्यस्वपक्षंद
र्शयति॥तस्मादिति॥तद्व्यतिरेकेणजगन्नास्तीतिसूचयतिवैशब्दइति॥तत्पदार्थमुक्त्वात्वंपदार्थंकथयति॥इदमितितयोर्वस्तुतोभेदंशंकित्वापदांतरंव्याच
ष्टे॥प्रागिति॥तस्यापरिछिन्नत्वमाह॥सर्वंचेति॥कथंतर्हिविपरीतधीरित्याशंक्याह॥किंत्विति॥यथाप्रतिभासंकर्तृत्वादेर्वास्तवत्वमाशंक्यशास्त्रविरोधान्नैवमि
त्याह॥परमार्थतस्त्विति॥तद्विलक्षणमध्यस्तसमस्तसंसाररहितमितियावत्॥किमुतद्ब्रह्मेतिचोद्यंपरिहृत्यकिंतदवेदितिचोद्यांतरंप्रत्याह॥तत्कथंचिदिति॥

पूर्ववाक्योक्तमविद्याविशिष्टमधिकारित्वेनव्यवस्थितंब्रह्मनास्तिसंसारीत्याचार्येणदयावताकथंचिद्बोधितमात्मानमेवावेदितिसंबंधः॥आत्मैवप्रमेय
स्तज्ज्ञानमेवप्रमाणमित्येवमर्थत्वमेवकारस्यविवक्षन्नाह॥अविद्येति॥प्रकृतमात्मपदार्थंविविच्यवक्तुंपृच्छति॥ब्रूहीति॥सएषइहप्रविष्टइत्यत्रात्म
नोदर्शितत्वात्प्राणनादिलिंगस्यतस्यत्वयैवानुसंधातुंशक्यत्वान्नास्तिवक्तव्यत्वमित्याह॥नन्विति॥आत्मानंप्रत्यक्षयितुंपृच्छतस्तत्परोक्षवचनमनुत्तर
मितिशंकते॥नन्वसाविति॥आत्मानंचेत्प्रत्यक्षयितुमिच्छसितर्हिप्रत्यक्षमेवतंदर्शयामीत्याह॥एवंतर्हीति॥नेदंप्रतिज्ञानुरूपंप्रतिवचनमितिचोदयति

मविद्याध्यारोपितविशेषवर्जितमित्येवशब्दस्यार्थः॥ब्रूहिकोसावात्मास्वाभाविकोयमात्मानंविदितवद्ब्रह्म॥ननुनस्मरस्यात्मानंदर्शितो
ह्यसौयइहप्रविश्यप्राणित्यपानितिव्यानितिउदानितिसमानितीति॥नन्वसौगौरसावश्वइत्येवमसौव्यपदिश्यतेभवतानआत्मानंप्र
त्यक्षंदर्शयस्येवंतर्हिद्रष्टाश्रोतामंताविज्ञातासआत्मेतिनन्वत्रापिदर्शनादिक्रियाकर्तुःस्वरूपंनप्रत्यक्षंदर्शयसिनहिगमिरेवगंतुः
स्वरूपंछिदिर्वाछेत्तुः॥एवंतर्हिदृष्टेर्द्रष्टाश्रुतेःश्रोतामतेर्मन्ताविज्ञातेर्विज्ञातासआत्मेतिनन्वत्रकोविशेषोद्रष्टरियदिदृष्टेर्द्रष्टायदि
वाघटस्यद्रष्टासर्वथापिद्रष्टैवद्रष्टव्यस्त्वंतुभवान्विशेषमाहदृष्टेर्द्रष्टेति॥द्रष्टातुयदिदृष्टेर्यदिवाघटस्यद्रष्टाद्रष्टैवनविशेषोपपत्ते

नन्वत्रेति॥प्रत्यक्षत्वाद्दर्शनादिक्रियायास्तत्कर्तुःस्वरूपमपितथेत्याशंक्याह॥नहीतियद्दर्शनादिक्रियाकर्तृस्वरूपोक्तिमात्रेणजिज्ञासानोपशाम्य
तितर्हिदृष्ट्यादिसाक्षित्वेनात्मोक्त्यातुष्यतुभवानित्याह॥एवंतर्हिदृष्टेरिति॥पूर्वस्मात्प्रतिवचनादस्मिन्प्रतिवचनेद्रष्टृविषयोविशेषोनास्तीतिशं
कते॥नन्विति॥विशेषाभावंविशदयति॥यदीत्यादिना॥घटस्यद्रष्टादृष्टेर्द्रष्टेतिविशेषेप्रतीयमानेतदभावोक्तिर्व्याहतेत्याशंक्याह॥द्रष्टव्यएवेति॥
तथाद्रष्टर्यपिविशेषोभविष्यतीत्याशंक्याह॥द्रष्टात्विति॥वृत्तिमदंतःकरणावच्छिन्नःसविकारोघटद्रष्टाकूटस्थचिन्मात्रस्वभावःसन्निधिसत्तामात्रेणबुद्धित

दृष्टेर्द्रष्टेति विशेषणं कीदृगस्यापि दृष्टेरिति॥नेत्यादिना॥

एतदेवस्फुटयति॥अस्तीति॥सप्तमीद्रष्टारमधिकरोति॥द्रष्टेर्द्रष्टुस्तावदन्वयव्यतिरेकाभ्यांविशेषंविशदयति॥योदृष्टेरिति॥भवतुदृष्टिसद्भावेद्रष्टुःस
दातदृष्टृत्वंतथापिकथंकूटस्थदृष्टित्वमित्याशंक्याह॥तत्रेति॥नित्यत्वमुपपादयति॥अनित्याचेदिति॥उक्तपक्षपरामर्शार्थासप्तमी॥कादाचित्केद्रष्टृदृश्य
त्वेदृष्टांतमाह॥यथेति॥घटादिवत्दृष्टिरपिकदाचिदेवद्रष्टादृश्यतेनसर्वदेत्यनिष्टापत्यभावमाशंक्याह॥नचेति॥विकारिणश्चित्तस्याद्रष्टृत्वंक्रमद्रष्टृत्व
मन्यथाद्रष्टृत्वंचदृष्टंतत्साक्षिणोव्यावर्त्तमानंतस्यनिर्विकारत्वंगमयतीतिभावः॥दृष्टिद्वयंप्रमाणाभावादश्लिष्टमितिशंकते॥किमिति॥तदुभयमंगीकरोति॥

रस्त्यत्रविशेषोयोदृष्टेर्द्रष्टासदृष्टिश्चेद्भवतिनित्यमेवपश्यतिदृष्टिंनकदाचिदपिदृष्टिर्नदृश्यतेद्रष्ट्रातत्रद्रष्टुर्दृष्ट्यानित्ययाभवितव्यं
अनित्याचेत्द्रष्टुर्दृष्टिस्तत्रदृश्यायादृष्टिःसाकदाचिन्नदृश्येतापि॥यथाऽनित्ययादृष्ट्याघटादिवस्तुनचतद्दृष्टेर्द्रष्टाकदाचिदपि
नपश्यतिदृष्टिंकिंद्वेदृष्टीद्रष्टुर्नित्याअदृश्यान्याऽनित्यादृश्येतिवाढंप्रसिद्धातावदनित्यादृष्टिरंधानंधत्वदर्शनान्नित्यैवचेत्सर्वोनंधए
वस्याद्द्रष्टुस्तुनित्यादृष्टिर्नहिद्रष्टुर्दृष्टेर्विपरीलोपोविद्यतइतिश्रुतेरनुमानाच्चांधस्यापिघटाद्याभासविषयास्वप्नेदृष्टिरुपलभ्यते
सातर्हिइतरदृष्टिनाशेननश्यतिसाद्रष्टुर्दृष्टिस्तयाऽविपरिलुप्तयानित्ययादृष्ट्यास्वरूपभूतया

वाढमिति॥तत्रानित्यांदृष्टिमनुभवेनसाध
यतिप्रसिद्धेति॥उक्तमर्थंयुक्त्याव्यक्तीकरोति॥नित्यैवेति॥संप्रतिनित्यांदृष्टिंश्रुत्यासमर्थयतेद्रष्टुरिति॥तत्रैवोपपत्तिमाह॥अनुमानाच्चेति॥तदेववि
वृणोति॥अंधस्यापीति॥जागरितेचक्षुरादिहीनस्यापिस्वप्नेपुंसोवासनामयघटादिविषयादृष्टिरुपलब्धायाचसातस्मिन्कालेचक्षुरादिजनितदृष्ट्य
भावेपिस्वयमविनश्यंत्यनुभूयतेसाद्रष्टुःस्वभावभूतार्थदृष्टिर्नित्येष्टव्या॥विमतंनित्यमव्यभिचारित्वात्परेशात्मवदितिप्रयोगोपपत्तेरित्यर्थः॥नन्वात्मा
दृष्टिस्वभावश्चेत्कथंदृष्टेर्द्रष्टेत्युक्तमतआह॥तयेति॥नित्यत्वेहेतुः॥अविपरिलुप्तयेति॥नित्यद्वयंपरिहर्तुंस्वरूपभूतयेत्युक्तं॥तस्यादृष्ट्यंतरापेक्षांवारयति॥

स्वयमिति॥ उक्तमविपरिलुप्तत्वंव्यनक्ति॥ इतरामिति॥ आत्मादृष्टेर्द्रष्टेतिस्थितेफलितमाह॥ एवंचेति॥ अन्यश्चेतनोऽचेतनोवेतिशेषः॥ नित्यदृष्टिस्वभाव
मात्मपदार्थंपरिशोध्यश्रुत्यक्षराणियोजयति॥ तद्ब्रह्मेति॥ वाक्यशेषविरोधंचोदयति॥ नन्विति॥ किंकर्मत्वेनात्मनोज्ञानंविरुध्यतेकिंवासाक्षित्वेनेति
वाच्यंनाद्योनभ्युपगमादित्याहनेति॥ नद्वितीयइत्याह॥ एवमिति॥ तदेवस्पष्टयति॥ एवंदृष्टेरिति॥ तर्हितद्विषयंज्ञानांतरमपेक्षितव्यमितिकुतो

स्वयंज्योतिःसमाख्ययेतरामनित्यांदृष्टिंस्वप्नबुद्धांतयोर्वासनाप्रत्ययरूपांनित्यमेवपश्यन्दृष्टेर्द्रष्टाभवति॥ एवंचसतिदृष्टिरेवस्वरू
पमस्याग्नेरौष्ण्यवन्नकाणादानामिवदृष्टिव्यतिरिक्तोऽन्योऽचेतनोद्रष्टातद्ब्रह्मात्मानमेवनित्यदृग्रूपमध्यारोपितानित्यदृष्ट्यादिवर्जि
तमेवावेदिदितवत्॥ ननुविप्रतिषिद्धंनविज्ञातेर्विज्ञातारंविजानीयादितिश्रुतेर्विज्ञातुर्विज्ञानंनैवविज्ञानान्नविप्रतिषेधएवंदृष्टेर्द्रष्टे

ब्रह्मवाइदमग्रआसीत्तदात्मानमेवावेदहंब्रह्मास्मीतितस्मात्तत्सर्व

तिविज्ञायतएवान्यज्ज्ञानानपेक्षत्वाच्चनचद्रष्टुर्नित्यैवदृष्टिरित्येवंविज्ञातेद्रष्टृविषयांदृष्टिमन्यामाकांक्षतेनिवर्त्ततेहिद्रष्टृविषयदृष्ट्या
कांक्षातदसंभवादेव॥ नह्यविद्यमानेविषयेआकांक्षाकस्यचिदुपजायतेनचदृश्यादृष्टिर्द्रष्टारंविषयीकर्त्तुमुत्सहतेयतस्तामाकांक्षेत

विरोधोनप्रसरतीत्याशंक्याह॥ अन्यज्ज्ञानेति॥ नविप्रतिषेधइतिपूर्वेणसंबंधः॥ संगृहीतमर्थंविवृणोति॥ नचेति॥ नित्यैवस्वरूपभूतेतिशेषः॥ विज्ञात
त्वंवाक्यीयबुद्धिवृत्तिव्याप्यत्वंअन्यांदृष्टिंस्फुरणलक्षणां॥ आत्मविषयस्फुरणाकांक्षाभावंप्रतिपादयति॥ निवर्त्ततेहीति॥ आत्मनिस्फुरणरूपेस्फुरण
स्यान्यस्यासंभवेपिकृतस्तदाकांक्षोपशांतिरित्याशंक्याह॥ नहीति॥ किंचद्रष्टृरिदृश्यादृश्यावादृष्टिरपेक्षतेनाद्यइत्याहनचेति॥ आदित्यप्रकाश्यस्यरूपादेस्त

नद्वितीय इत्याह॥ नचेति॥ आत्मनोवृत्तिव्याप्यत्वेपिस्फुरणव्याप्यत्वानंगीकरणान्नवाक्यशेषविरोधोस्तीत्युपसंहरति॥ तस्मादिति॥ वाक्यांतरमाकां
क्षापूर्वकमादत्ते॥ तत्कथमिति॥ तदक्षराणिव्याचष्टे॥ दृष्टेर्द्रष्टेति इतिपदमवेदित्यनेनसंबध्यते ब्रह्मशब्दंव्याचष्टे॥ ब्रह्मेतीति॥ ब्रह्माहंपदार्थयो
र्मिथोविशेषणविशेष्यभावमभिप्रेत्यवाक्यार्थमाह॥ तदेवेति॥ आचार्योपदिष्टेर्थेस्वस्यनिश्चयंदर्शयति॥ यथेति॥ इतिशब्दोवाक्यार्थज्ञानसमाप्त्यर्थः॥
इदानींफलवाक्यंव्याचष्टेतस्मादिति॥ सर्वभावमेवव्याकरोति॥ अब्रह्मेति॥ ब्रह्मैवाविद्ययासंसरतिविद्ययाचमुच्यत इतिपक्षस्यनिर्दोषत्वमुपसंहरति॥

नचस्वरूपविषयाकांक्षास्वस्यैव तस्मादज्ञानाध्यारोपणनिवृत्तिरेवात्मानमेवावेदित्युक्तंनात्मनोविषयीकरणंतत्कथमवेदित्याहाहंदृष्टे
र्द्रष्टात्माब्रह्मास्मिभवामीतिब्रह्मेतियत्साक्षादपरोक्षात्सर्वांतर आत्माशनायाद्यतीतोनेतिनेत्यस्थूलमनण्वित्येवमादिलक्षणंतदेवाहम
स्मिनान्यःसंसारीयथाभवानाहेति तस्मादेवंविज्ञानात्तद्ब्रह्मसर्वमभवदब्रह्माध्यारोपणापगमात्तत्कार्यस्यासर्वत्वस्यनिवृत्त्यासर्वमभवत्त
स्माद्युक्तमेवमनुष्यामन्यंतेयद्ब्रह्मविद्ययासर्वंभविष्याम इति यत्पृष्टंकिमुतद्ब्रह्मावेद्यस्मात्तत्सर्वमभवदितितन्निर्णीतंब्रह्मवाइदमग्रआ
सीत्तदात्मानमेवावेत्तस्मात्तत्सर्वमभवदिति॥ तत्तत्रयोयोदेवानांमध्येप्रत्यबुध्यतप्रतिबुद्धवानात्मानंयथोक्तेनविधिनासएवप्रतिबुद्धआ
त्मातद्ब्रह्माभवत्तथर्षीणांतथामनुष्याणांचमध्येदेवादीनामित्यादिलोकदृष्ट्यपेक्षयानब्रह्मत्वबुध्योच्यते

तस्माद्युक्तमिति॥ एतत्संकीर्तयति॥ यत्पृ
ष्टमिति॥ यथाग्निहोत्रादिमनुष्यत्वादिजातिमंतमर्थित्वादिविशेषवंतंचाधिकारिणमपेक्षतेनतथाज्ञानमितिवक्तुंतद्योयोदेवानामित्यादिवाक्यंतदक्षरा
णिव्याचष्टे॥ तत्तत्रेति॥ यथोक्तेनविधिनान्वयादिकृतपदार्थपरिशोधनादिनेत्यर्थः॥ ज्ञानादेवमुक्तिर्नसाधनांतरादित्येवकारार्थः विवक्षितमधिकार्यनिय
मंप्रकटयति॥ तथेत्यादिना॥ योयःप्रत्यबुध्यतसएवतदभवदितिपूर्वेणसंबंधः॥ ब्रह्मैवाविद्ययासंसरतिमुच्यतेचविद्ययेत्युक्तत्वाद्देवादीनांविद्याविद्याभ्यां

देवादीनामित्यादीति तत्वदृष्ट्यैवभेदवचनेकाहानिरित्याशंक्याह॥पुरइति॥आविद्यकंभेदमनूद्यतत्तदात्मनास्थितब्रह्मचैतन्यस्यैवविद्याविद्याभ्यांबंधमोक्षोक्तेर्नपूर्वापरविरोधोस्तीतिफलितमाह॥अतइति॥अविद्यादृष्टिमनूद्यतत्वदृष्टिमन्वाचष्टे॥परमार्थतस्त्विति॥प्रतिबोधात्प्रागपितत्रदेवादिशरीरेषुपरमार्थतोब्रह्मैवासीच्चेदौपदेशिकंज्ञानमनर्थकमित्याशंक्याह॥अन्यथैवेति॥नानाजीववादस्यतुनावकाशःप्रक्रमविरोधा

पुरःपुरुषआविशदितिसर्वत्रब्रह्मैवांतःप्रविष्टमित्यवोचामातःशरीराद्युपाधिजनितलोकदृष्ट्यपेक्षयादेवादीनामित्युच्यते परमार्थतस्तुतत्रतत्रब्रह्मैवाग्रआसीत्प्राक्प्रतिबोधाद्देवादिशरीरेष्वन्यथैवविभाव्यमानंतदात्मानमेवावेत्तथैवचसर्वमभवदस्याःब्रह्मविद्यायाःसर्वभावापत्तिःफलमित्येतस्यार्थस्यद्रढिम्नेमंत्रानुदाहरतिश्रुतिःकथंतद्ब्रह्मैतदात्मानमेवाहमस्मीतिपश्यन्नेतस्मादेवब्रह्मणो

मभवत्तद्योयोदेवानांप्रत्यबुध्यतसएवतदभवत्तथर्षीणांतथामनुष्याणांतद्धैतत्पश्यन्नृषिर्वामदेवःप्रतिपेदे ॥

दर्शनादृषिर्वामदेवाख्यःप्रतिपेदेहप्रतिपन्नवान्किल॥सएतस्मिन्ब्रह्मात्मदर्शनेवस्थितःएतान्मंत्रान्ददर्शअहंमनुरभवंसूर्यश्चेत्यादीन्तदेतद्ब्रह्मपश्यन्नितिब्रह्मविद्यापरामृश्यतेअहंमनुरभवंसूर्यश्चेत्यादिनासर्वभावापत्तिंब्रह्मविद्याफलंपरामृशतिपश्यन्सर्वात्मभावंफलंप्रतिपेदेइतिअस्मात्प्रयोगाद्ब्रह्मविद्याऽसहायसाधनसाध्यंमोक्षंदर्शयति॥ दित्याशयेनाह॥तदिति॥तथैवेत्युत्पन्नज्ञानानुसारित्वपरामर्शःतद्धैतदितिवाक्यमवतार्यव्याकरोति॥अस्याइति॥मंत्रोदाहरणश्रुतिमेवप्रश्नद्वाराव्याचष्टे॥कथमित्यादिना॥ज्ञानान्मुक्तिरित्यस्यार्थवादोयमितिद्योतयितुंकिलेत्युक्तं॥आदिपदंसमस्तवामदेवसूक्तग्रहणार्थं॥तत्रावांतरविभागमाह॥तदेतदिति॥शतृप्रत्ययप्रयोगप्राप्तमर्थंकथयति ॥पश्यन्निति ॥

लक्षणहेत्वोःक्रियायाइतिहेतौशतृप्रत्ययविधानान्नैरंतर्यंचसतिहेतुत्वसंभवात्स्वकृतेचप्रत्ययबलाद्ब्रह्मविद्यामोक्षयोर्नैरंतर्यप्रतीतेस्तयासाधनांत
रानपेक्षयालभ्यंमोक्षंदर्शयतिश्रुतिरित्यर्थः॥अत्रोदाहरणमाह॥भुंजानइति॥भुजिक्रियामात्रसाध्याहितृप्तिस्तत्रप्रतीयतेतथापश्यन्नित्यादावपिब्र
ह्मविद्यामात्रसाध्यामुक्तिर्भातीत्यर्थः॥तद्धैतदित्यादिव्याख्यायतदिदमित्याद्यवतारयितुंशंकयति॥सेयमिति॥ऐदंयुगीनानांकलिकालवर्तिनामि

भुंजानस्तृप्यतीतियद्वत्सेयंब्रह्मविद्ययासर्वभावापत्तिरासीन्महतांदेवादीनांवीर्यातिशयान्नेदानीमैदंयुगीनानांविशेषतोमनुष्याणाम
ल्पवीर्यत्वादितिस्यात्कस्यचिद्बुद्धिस्तद्व्युत्थापनायाह॥तदिदंप्रकृतंब्रह्मयत्सर्वभूतानुप्रविष्टंदृष्टिक्रियादिलिंगमेतद्ध्येतस्मिन्नपि
वर्तमानकालेयःकश्चिद्व्यावृत्तबाह्यौत्सुक्यःआत्मानमेवैवंवेदाहंब्रह्मास्मीतिअपोह्योपाधिजनितभ्रांतिविज्ञानाध्यारोपितान्विशे

हंमनुरभवꣳसूर्यश्चेतितदिदमप्येतर्हियएवंवेदाहंब्रह्मास्मीतिसइदꣳसर्वंभवतितस्यहनदेवाश्चनाभूत्याईशत

षान्संसारधर्मानाधिगतमनंतरमबाह्यंब्रह्मैवाहमस्मिकेवलमितिसोऽविद्याकृताऽसर्वत्वनिवृत्तेर्ब्रह्मविज्ञानादिदंसर्वंभवतिनहिमहा
वीर्येषुवामदेवादिषुहीनवीर्येषुवार्तमानिकेषुमनुष्येषुब्रह्मणोविशेषःतद्विज्ञानस्यवास्तिवार्तमानिकेषुपुरुषेषुतुब्रह्मविद्याफलेनैकांति
कताशंक्यत तियावत्॥उत्तरवाक्यमुत्तरत्वेनावतार्यव्याकरोति॥तद्व्युत्थापनायेति॥तस्यताटस्थ्यंवारयति॥यत्सर्वभूतेति॥प्रविष्टेप्रमाणमुक्तं
स्मारयति॥दृष्टीति॥व्यावृत्तंबाह्येषुविषयेषुउत्सुकंसाभिलाषंमनोयस्यसतथोक्तः॥एवंशब्दार्थमेवाह॥अहमिति॥तदेवज्ञानंविवृणोति॥अपोह्येति॥
॥यद्वामनुष्योहमित्यादिज्ञानेपरिपंथिनिकथंब्रह्माहमितिज्ञानमित्याशंक्याह॥अपोह्येति॥अहमित्यात्मज्ञानंसदासिद्धमितिनतदर्थंप्रयतितव्यमित्याशं

संसारेति केवलमित्यद्वितीयत्वमुच्यते॥ज्ञानमुक्त्वातत्फलमाह॥सोविद्येति॥यत्तुदेवादीनांमहावीर्यत्वाद्ब्रह्मविद्ययामुक्तिःसिध्यतिनास्मदादीनामल्प
वीर्यत्वादितितत्राह॥नहीति॥श्रेयांसिबहुविघ्नानीतिप्रसिद्धिमाश्रित्यशंकते॥वार्त्तमानिकेष्विति॥शंकोत्तरत्वेनोतरंवाक्यमादायव्याकरोति॥अतआ
हेत्यादिना॥यथोक्तेनान्वयादिनाप्रकारेणब्रह्मविज्ञातुरितिसंबंधः॥अपिशब्दार्थंकथयति॥किमुतेति॥अल्पवीर्यास्तत्रविघ्नकरणेपर्याप्तानेतिकिमु
तवाच्यमितियोजना॥अप्राप्तप्रतिषेधायोगमभिप्रेत्यचोदयति॥ब्रह्मविद्येतिशंकानिमित्तंदर्शयन्नुत्तरमाह॥उच्यतइति॥अधमर्णानिवोत्तमर्णादेवाद

इत्यतआहतस्यहब्रह्मविज्ञातुर्यथोक्तेनविधिनादेवामहावीर्याश्चनअपिअभूत्यैअभवनायब्रह्मसर्वभावस्यनेशतेनपर्याप्ताः॥किमुतान्ये
ब्रह्मविद्याफलप्राप्तौविघ्नकरणेदेवादयईशतइतिकाशंकेत्युच्यतेदेवादीन्प्रत्यृणवत्त्वान्मर्त्यानांब्रह्मचर्येणऋषिभ्योयज्ञेनदेवेभ्यःप्रज
यापितृभ्यइतिहिजायमानमेवर्णवंतंपुरुषंदर्शयतिश्रुतिः॥पशुनिदर्शनाच्चायोअयंवेत्यादिलोकश्रुतेश्चात्मनोवृत्तिपरिपिपालयिषयाऽ
धमर्णानिवदेवाःपरतंत्रान्मनुष्यानमृतत्वप्राप्तिंप्रतिविघ्नंकुर्युरितिन्याय्यैवेषाशंकास्वपशूनस्वशरीराणीवचरक्षंतिदेवाःमहत्तरांहिवृत्तिं
कर्माधीनांदर्शयिष्यतिदेवादीनांबहुपशुसमतयैकैकस्यपुरुषस्य

योमर्त्यान्प्रतिविघ्नंकुर्वंतीतिशेषः॥कथंदेवादीन्प्रतिमर्त्यानामनृणीत्वंतत्राह॥ब्र
ह्मचर्येणेति॥यथापशुरेवंसदेवानामितिमनुष्याणांपशुसादृश्यश्रवणाच्चतेषांपारतंत्र्याद्देवादयस्तान्प्रतिविघ्नंकुर्वंतीत्याह॥पश्विति॥अथोअयंवाआत्मा
सर्वेषांभूतानांलोकइतिचतेषांसर्वप्राणिभोग्यत्वश्रुतेश्चसर्वेतद्विघ्नकराभवंतीत्याह॥अथोइति॥लोकश्रुत्यभिप्रेतमर्थंप्रकटयति आत्मनइति यथाध
मर्णान्प्रत्युत्तमर्णाविघ्नमाचरंतितथादेवादयःस्वस्थितिपरिरक्षणार्थंपरतंत्रान्कर्मिणःप्रत्यमृतत्वप्राप्तिमुद्दिश्यविघ्नंकुर्वंतीतितेषांतान्प्रतिविघ्नकर्तृत्व
शंकासावकाशैवेत्यर्थः॥पशुनिदर्शनेनविवक्षितमर्थंविवृणोति॥स्वपशूनिति॥पशुस्थानीयानांमनुष्याणांदेवादिभीरक्ष्यत्वेहेतुमाह॥महत्तरामितिइतश्चदेवादीनांमनु

ष्यामितिविघ्नंकुर्युरित्यमृतत्वप्राप्तिंसंभावितमित्याह॥

बृ॰र॰
८९

वैस्यंतीति १

तस्मादिति॥इतश्चतेषांतान्प्रतिविघ्नकर्तृत्वंभातीत्याह यथेति सोलोकोदेहः॥एवंविलंसर्वभूतभोज्योहमितिकल्पनावत्वं॥क्रियापदानुषंगार्थश्चकारः॥ब्र
ह्मवित्वेपिमनुष्याणांदेवादिपारतंत्र्याविघातात्किमितितेविघ्नमाचरंतीत्याशंक्याह॥ब्रह्मवित्वइति॥देवादीनांमनुष्यान्प्रतिविघ्नकर्तृत्वशंकामुपपादितामु
पसंहरति॥तस्मादिति॥नकेवलमुक्तहेतुबलादेवकिंतुसामर्थ्याच्चेत्याह॥प्रभाववंतश्चेति॥सामर्थ्याच्चेद्विद्याफलप्राप्तौतेषांविघ्नकरत्वंतर्हिकर्मफलप्रा
प्तावपिस्यादित्यतिप्रसंगंशंकते॥नन्विति॥भवतुतेषांसर्वत्रविघ्नाचरणमित्यतआह॥हंतेति॥अविश्रंभोविश्वासाभावः सामर्थ्याद्विघ्नकर्तृत्वेऽतिप्रसक्तंय

तस्मादेषांतन्नप्रियंयदेतन्मनुष्याविद्युरितिहिवक्ष्यतियथाहवैस्वायलोकायारिष्टिमिच्छेदेवंहैवंविदेसर्वाणिभूतान्यरिष्टिमिच्छंतीति
च॥ब्रह्मवित्वेपारार्थ्यनिवृत्तेर्नस्वलोकत्वंपशुत्वंचेत्यभिप्रायः॥प्रियारिष्टिवचनाभ्यामवगम्यतेतस्माद्ब्रह्मविदोब्रह्मविद्याफलप्राप्तिं
प्रतिकुर्युरेवविघ्नंदेवाः प्रभाववंतश्चहितेनन्वेवंसत्यन्यास्वपिकर्मफलप्राप्तिषुदेवानांविघ्नकरणंपेयपानसमंहंततर्ह्यविश्रंभोभ्यु
दयनिःश्रेयससाधनानुष्ठानेषुतथेश्वरस्याचिंत्यशक्तित्वाद्विघ्नकरणेप्रभुत्वंतथाकालकर्ममंत्रौषधितपसामेषांहिफलंसंपतिविप
त्तिहेतुत्वंशास्त्रेलोकेचप्रसिद्धं॥अतोप्यनाश्वासःशास्त्रार्थानुष्ठाने॥न॥
तरमाह॥तथेतिअतिप्रसंगांतरमाह॥तथाकालेति॥विघ्नकरणेप्रभुत्वमि

तिपूर्वेणसंबंधः॥ईश्वरादीनांयथोक्तकार्यकरत्वेप्रमाणमाह॥एषांहीति॥एषह्येवसाधुकर्मकारयति॥कर्मेहैवतदूचतुरित्यादिवाक्यंशास्त्रशब्दार्थः॥देवा
दीनांविघ्नकर्तृत्ववदीश्वरादीनामपितत्संभवाद्वेदार्थानुष्ठानेविश्वासाभावात्तदप्रामाण्यंप्राप्तमितिफलितमाह॥अतोपीति॥किमिदंनवैदिकस्यचोद्यंकिंवावैदि

= तथाप्रयागस्नानाद्येकस्मिन्कर्मणिकालकृतफलवैचित्र्यंयथैकराश्युत्पन्नानांकालसाम्येपिकर्मकृतवैचित्र्यात्फलवैचित्र्यंइंद्रशत्रोवर्धस्वेतिमंत्रस्यअश्विभ्यांगुरोराज्ञयार्कपत्रभक्षणेनां
धीभूतायसद्रसायनभूतमपूपंदत्तंराहोर्वामृतपानात्क्वचिद्दिक्रियाफलस्यमरणस्यनिरोधोयथायोगादीनांतपसांचशतजीवनश्रुत्युक्तायुरादिविपर्ययजनकत्वदर्शनात्क्वचिद्देशानांकाला
दिभ्यःप्राबल्यंयथाब्रह्मसभायांरैवतराज्ञःक्वचिन्मंत्राणांद्रव्यादिभ्यःप्राबल्यंयथाशुक्रोदरेपीतस्यकचस्यसंजीवनविद्यावशाज्जीवनादौ = ४

भा॰

राम॰
८९

द्ध्याश्रुतिपादयिषयादृग्धाद्यादानदर्शनात्प्राणिनांसुखदुःखादितारतम्यदृष्टेःस्वाभाववादेचनियतनिमित्तादानवैचित्र्यदर्शनयोरनुपपत्तेस्तद्योगा
त्कर्मफलंजगद्वैचित्र्यमित्यर्थः॥द्वितीयंप्रत्याह सुखेति॥कर्महेत्वेत्याद्याश्रुतिःकर्मणाबध्यतेजंतुरित्याद्यास्मृतिर्जगद्वैचित्र्यानुपपत्तिश्चन्यायः॥कथमेताव
तादेवादीनांकर्मफलेविघ्नकर्तृत्वाभावस्तत्राह॥कर्मणामिति॥कथंहेतुसिद्धिरित्याशंक्यकर्मणःस्वोत्पत्तौदेवाद्यपेक्षाव्यतिरेकमुखेनदर्शयति॥कर्महीति
स्वफलेपितस्यतत्सापेक्षत्वमस्तीत्याह॥लब्धेति॥निष्पन्नमपिकर्मपूर्वोक्तंकारकमनपेक्ष्यस्वफलदानेशक्तंनभवतीत्यर्थः॥कर्मणःस्वोत्पत्तौस्वफलेच

सर्वपदार्थानांनियतनिमित्तोपादानाज्जगद्वैचित्र्यप्रदर्शनाच्चस्वभावपक्षेचतदुभयानुपपत्तेःसुखदुःखादिफलनिमित्तंकर्मेत्येतस्मि
न्पक्षेस्थितेवेदस्मृतिन्यायलोकपरिगृहीतेदेवेश्वरकालास्तावन्नकर्मफलविपर्यासकर्त्तारःकर्मणांकांक्षितकारकत्वात्कर्महिशुभाशु
भंपुरुषाणांदेवकालेश्वरादिकारकमनपेक्ष्यनात्मानंप्रतिलभतेलब्धात्मकमपिफलदानेऽसमर्थं॥क्रियायाहिकारकाद्यनेकनिमित्तो
पादानस्वाभाव्यात्तस्मात्क्रियानुगुणाहिदेवेश्वरादयइतिकर्मसुतावन्नफलप्राप्तिंप्रत्यविस्रंभःकर्मणामप्येषांवशानुगत्वंक्वचित्स्वसाम
र्थ्यस्याप्राणोद्यत्वा

कारकसापेक्षत्वेहेतुमाह॥क्रियायाहीति॥कारकादीनामनेकेषांनिमित्तानामुपादानेनस्वभावोनिष्पद्यतेयस्याःसातथोक्ता
तस्याभावःकारकाद्यनेकनिमित्तोपादानस्वाभाव्यं तस्मादुभयत्रपरतंत्रंकर्मेत्यर्थः॥देवादीनांकर्मापेक्षितकारकत्वेफलितमाह॥तस्मादिति॥इतोपि
कर्मफलेनाविस्रंभोस्तीत्याह॥कर्मणामिति॥एषांदेवादीनांक्वचिद्विघ्नलक्षणेकार्येकर्मणांवशवर्त्तित्वमेष्टव्यं॥प्राणिकर्मापेक्षामंतरेणविघ्नकरणेऽति
प्रसंगादतोन्यत्रापिसर्वत्रतेषांतदपेक्षावाच्येत्यर्थः॥तत्रतेषांकर्मवशवर्त्तित्वहेत्वंतरमाह॥स्वसामर्थ्यस्येति॥विघ्नलक्षणंहिकार्यंदुःखमुत्पादयति
नचदुःखमृतेपापाद्युपपद्यतेदुःखविषयेपापसामर्थ्यस्यशास्त्राधिगतस्याप्रत्याख्येयत्वात्तस्मात्प्राणिनामदृष्टवशादेवदेवादयोविघ्नकारणमित्यर्थः॥

दृ१

आदिनाँविषादिँद्रव्येषुमारकादिगुणस्वभावग्रहणं=५ कँत्रचित्प्रतीतेरेवद्रव्यादिस्वभावेभ्यःप्राधान्यंयथाचक्रवाकुसाग्निभक्षणादौयथावामंत्रबद्धशस्त्राणांछेदनाद्यभावेच=१

देवादीनांकर्मपारतंत्र्येकर्मतत्परतंत्रंनस्यात्प्रधानगुणभाववैपरीत्यायोगादित्याशंक्याह॥कर्मेति॥इतश्चनामीषांनियतोगुणप्रधानभावोस्तीत्याह॥दुर्विज्ञेयश्चेति॥इतिशब्दोहेत्वर्थः॥यतोगुणप्रधानकृतोमतिविभ्रमोलोकस्योपलभ्यतेतस्मादसौदुर्विज्ञेयोननियतोस्तीतियोजना॥मतिविभ्रमेवादिविप्रतिपत्तिंहेतुमाह॥कर्मैवेत्यादिना॥कथंतर्हिनिश्चयस्तत्राह॥तत्रेति वेदवादीनुदाहरति॥पुण्योवाइति॥आदिपदेनधर्मरज्वाव्रजेदूर्ध्वमित्यादयःस्मृतिवादागृह्यंते॥सूर्योदयदाहसेचनादौकालज्वलनसलिलादेःप्राधान्यप्रसिद्धेनकर्मैवप्रधानमित्याशंक्याह॥यद्यपीति॥अनेकेति

कर्मकालदैवद्रव्यादिस्वभावानांगुणप्रधानभावस्त्वनियतोदुर्विज्ञेयश्चेतितत्कृतोमोहोलोकस्यकर्मैवकारकंनान्यत्फलप्राप्ताविति केचित्॥दैवमेवेत्यपरेकालइत्येकेद्रव्यादिस्वभावइतिकेचित्सर्वएतेसंहताएवेत्यपरेतत्रकर्मणःप्राधान्यमंगीकृत्यवेदस्मृतिवादाः पुण्योवैपुण्येनकर्मणाभवतिपापःपापेनेत्यादयो यद्यप्येषांस्वविषयेकस्यचित्प्राधान्योद्भवइतरेषांतत्कालीनप्राधान्यशक्तिसंभवस्तथापिनकर्मणःफलप्राप्तिंप्रत्यनैकांतिकत्वंशास्त्रन्यायनिर्धारितत्वात्कर्मप्राधान्यस्यनाविद्यापगममात्रत्वाद्ब्रह्मप्राप्तिफलस्ययदुक्तंब्रह्मप्राप्तिफलंप्रतिदेवाविघ्नंकुर्युरितितत्नदेवानांविघ्नकरणेसामर्थ्यंकस्माद्विद्याकालानंतरितत्वाद्ब्रह्मप्राप्तिफलस्यकथं

कत्वमप्रधानत्वं॥तत्रहेतुमाह॥शास्त्रेति॥श्रुतिस्मृतिलक्षणंशास्त्रमुदाहृतं॥जगद्वैचित्र्यानुपपत्तिर्न्यायः॥कर्मफलेदेवादीनांविघ्नकर्तृत्वंप्रसंगागतंनिराकृत्यविद्याफलेतेषांतदाशंक्यतंनिराकरोति॥नाविद्येति॥तत्रनञर्थमुक्तानुवादपूर्वकंविशदयति॥यदुक्तमिति॥तत्रप्रश्नपूर्वकंपूर्वोक्तंहेतुंस्फुटयति॥कस्मादिति॥आत्मनोब्रह्मत्वप्राप्तिरूपायामुक्तेरज्ञानध्वस्तिमात्रत्वात्तस्याश्चज्ञानेनतुल्यकालत्वात्तस्मिन्सतितत्फलस्यावश्यकत्वाद्देवादीनांविघ्नाचरणेनावकाशोस्तीत्यर्थः॥उक्तमेवार्थमाकांक्षापूर्वकंदृष्टांतेनसमर्थयते॥कथमित्यादिना ॥ सं६

नैय्यायिकादयः८

ब्रह्मविद्यातत्फलयोः समानकालत्वे फलितमाह॥ अतइति॥ देवादीनां ब्रह्मविद्याफले विघ्नकर्तृत्वाभावे हेत्वंतरमाह॥ यत्रेति॥ यस्यां विद्यायां सत्यां ब्रह्मविदो देवादीनामात्मत्वमेव तस्यां सत्यां कथं ते तस्य विघ्नमाचरेयुः स्वविषये तेषां प्रातिकूल्याचरणानुपपत्तेरित्यर्थः॥ उक्तेर्थे समनंतरवाक्यमुत्थाप्य व्याचष्टे तदेतदाहेति॥ कथं ब्रह्मविद्यासमकालमेव ब्रह्मविद्देवादीनामात्मा भवतितत्राह॥ अविद्यामात्रेति॥ अथेदं रजतमिति रजताकारायाः शुक्तिकायाः शुक्तिकात्वमविद्यामात्रव्यवहितं तथा ब्रह्मविदोपि सर्वात्मत्वे तन्मात्रव्यवधानात्तस्याश्च विद्योदयेनांतरीयकत्वेन निवृत्तेर्युक्तं विद्यातत्फल

यथालोके द्रष्टुश्चक्षुष आलोकेन संयोगो यत्कालस्तत्काल एव रूपाभिव्यक्तिरेवमात्मविषयं ज्ञानं यत्कालं तत्काल एव तद्विषयाज्ञानतिरोभावः स्यादतो ब्रह्मविद्यायां सत्यामविद्याकार्यानुपपत्तेः प्रदीप इव तमः कार्यस्तत्केकस्य विघ्नं कुर्युर्देवा यत्रात्मत्वमेव देवानां ब्रह्मविदः तदेतदाहात्मा स्वरूपं ध्येयं यत्तत्सर्वशास्त्रैर्विज्ञेयं ब्रह्म हि यस्मादेषां देवानां स ब्रह्मविद्भवति॥ ब्रह्मविद्यासमकालमेवाविद्यामात्रव्यवधानापगमाच्छुक्तिकाया इव रजताभासायाः शुक्तिकात्वमित्यवोचाम अतो नात्मनः प्रतिकूलत्वे देवानां प्रयत्नः संभवति तस्य ह्यनात्मभूतं फलं देशकालनिमित्तांतरितं तत्रानात्मविषये सफलः प्रयत्नो विघ्नाचरणाय देवादीनां न त्विह विद्यासमकाले आत्मभूते देशकालनिमित्तानंतरिते ऽवसरानुपपत्तेरेवं तर्हि विद्याप्रत्ययसंतत्यभावाद्विपरीतप्रत्ययतत्कार्ययोश्च दर्शनादंत्य एवात्मप्रत्ययो ऽविद्यानिवर्त्तको न तु पूर्व इति॥ योः समानकालत्वमुक्तं चैतस्प्रतिवचनदशायामित्यर्थः॥ उक्तस्य हेतोरपेक्षितं वदन्ब्रह्मविदो देवाद्यात्मत्वे फलितमाह॥ अतइति कैवल्ये तेषां विघ्नाकर्तृत्वेकुत्र तत्कर्तृतेत्याशंक्याह॥ यस्य हीति॥ तेषां निरंकुशप्रसरत्वं वारयति॥ न त्विति॥ सफलः प्रयत्न इति पूर्वेण संबंधः तस्य निरवकाशत्वादिति हेतुमाह॥ अवसरेति॥ ज्ञानस्यानंतरितस्फलत्वात्तत्फले देवादीनां न विघ्नकर्तृतेत्युक्तमुपेत्य स्वयूथ्यः शं

कै०॥ स्वंवृत्ति॥

बृ.र.
९१

ज्ञानस्यानंतरफलत्वेनतदज्ञानंनिवर्त्तयेदज्ञानामिवतत्वज्ञानामपिब्रह्मास्मीतिज्ञानसंतत्यभावान्नचाद्यमेवज्ञानमज्ञानध्वंसिप्रागिवोर्ध्वमपिरागा
देस्तत्कार्यस्यचदृष्टत्वादतोदेहपातकालीनंज्ञानमज्ञानंनिवर्त्तयतीतिकुतोजीवन्मुक्तिरित्यर्थः॥अंत्यज्ञानस्याज्ञाननिवर्त्तकत्वंतत्संततेर्वाप्रथमे
तस्यांत्यत्वादात्मविषयत्वाद्वातद्बुभुत्सितेतिविकल्प्योभयत्रदृष्टांताभावंमत्वाद्वितीयेदोषांतरमाह॥नप्रथमेनेति॥तदेवानुमानेनस्फोरयति॥यदिहि
ति॥कल्पांतरंशंकयति॥एवंतर्हीति॥अविछिन्नाज्ञानसंततिरज्ञानंनिवर्त्तयतीत्येतत्दूषयति॥नेत्यादिना॥जीवनादिहेतुकःप्रत्ययोबुभुत्सितोहं

नप्रथमेनानैकांतिकत्वात् यदिहिप्रथमआत्मविषयःप्रत्ययोऽविद्यांननिवर्त्तयतितथांत्योपितुल्यविषयत्वादेवंतर्हिसंततोऽविद्यानि
वर्त्तकोनविछिन्नइतिनजीवनादौसतिसंतत्यनुपपत्तेः॥नहिजीवनादिहेतुकेप्रत्ययेसतिविद्याप्रत्ययसंततिरुपपद्यतेविरोधाद्
यजीवनादिप्रत्ययतिरस्करणेनैवामरणांताविद्यासंततिरितिचेन्नप्रत्ययेयत्तासंतानानवधारणाच्छास्त्रार्थानवधारणदोषादियत्तां
प्रत्ययानांसंततिरविद्यायानिवर्त्तिकेत्यनवधारणाच्छास्त्रार्थोनावध्रियेततच्चानिष्टंसंततिमात्रत्वेनावधारितएवेतिचेन्नाद्यंतयोर
विशेषा

भोक्ष्येहमित्यादिलक्षणस्तस्यबुभुत्साद्युपप्लुतस्यब्रह्मास्मीत्यविछिन्नप्रत्ययसंततेश्चविरुद्धतयायौगपद्यायोगेहेतुमाह विरोधा
दिति॥प्रत्ययसंततिमुपपाद्यन्नाशंकते॥अथेति॥उक्तरीत्याप्रत्ययसंततिमुपेत्यदूषयति॥नेत्यादिना॥तमेवदोषंविशदयति॥इयत्तामिति॥शा
स्त्रार्थोज्ञानसंततिरज्ञानंनिवर्तयतीत्येवमात्मकः॥आत्मेत्येवोपासीतेतिश्रुतेरात्मज्ञानसंततिमात्रसद्भावेततोविद्याद्वाराऽविद्याध्वस्तिरितिशास्त्रा
र्थनिश्चयसिद्धिरित्याह॥संततीति॥आत्मधीसंततेःसत्वेपिनसात्मविषयत्वाद्विद्याद्वाराऽविद्यांनिवर्तयतिआद्यद्वित्रिक्षणस्यात्मधीसंततेर्व्यभिचारा
दितिपरिहरति॥नाद्यंतयोरिति॥पूर्वस्मिन्प्रत्ययेनाविद्यानिवर्तकत्वमंत्येतुतथेत्युक्तेतस्यांत्यत्वात्तथात्वंचेद्दृष्टांताभावआत्मविषयत्वात्तथात्वेप्रथमप्रत्यये

भा.

रामः
९१

इत्यंतसद्भावे २

व्यभिचारःस्यादित्युक्तौदोषौआद्यासंततिर्नाविद्याध्वंसिनीअंत्यातुतत्त्वेत्यंगीकारेपिविशेषाभावादंत्यत्वात्तस्याःनिवर्तकत्वेदृष्टांताभावःआत्मविष
यत्वात्तद्भावेत्वैनैकांतिकत्वमित्येतावेवदोषौस्यातामित्युक्तंविवृणोति॥प्रथमेति॥अंत्यप्रत्ययस्यसंततेश्चाविद्यानिवर्तकत्वासंभवेप्रथमस्यापिरागा
द्यनुवृत्त्यातदयोगाज्ज्ञानमज्ञानानिवर्तकमेवेतिचोदयति॥एवंतर्हीतिश्रुतिविरोधेनपरिहरति॥नतस्मादिति॥तासामर्थवादत्वेनाविवक्षि
तत्वंशंकते॥अर्थवादइतिचेदिति॥अतिप्रसंगेनदूषयति॥नसर्वेति॥यथोक्तश्रुतीनामर्थवादत्वेपिकथंसर्वशाखोपनिषदांतत्त्वप्रसक्तिरि

त्यथमाविद्याप्रत्ययसंततिर्मरणकालीनान्तावेतिविशेषाभावादाद्यंतयोःप्रत्यययोःपूर्वोक्तोदोषोप्रसज्येयातांएवंतर्ह्यनिवर्तकए
वेतिचेन्नतस्मात्तत्सर्वमभवदितिश्रुतेःभिद्यतेहृदयग्रंथिःतत्रकोमोहइत्यादिश्रुतिभ्यश्चार्थवादइतिचेन्नसर्वशाखोपनिषदाम
र्थवादत्वप्रसंगादेतावन्मात्रार्थत्वोपक्षीणाहिसर्वशाखोपनिषदःप्रत्यक्षप्रमितात्मविषयत्वादर्थस्त्वेवेतिचेन्नोक्तपरिहारत्वादविद्या
शोकमोहभयादिदोषनिवृत्तेःप्रत्यक्षत्वादितिचोक्तएवपरिहारःतस्मादाद्योऽन्त्यःसंततोऽसंततश्चेत्यचोद्यमेतत्॥अविद्यादिदोष
निवृत्तिफलावसानत्वाद्विद्यायाःयएवाविद्यादिदोषनिवृत्तिफलकृत्प्रत्ययआद्योऽन्त्यःसंततोऽसंततोवासएवविद्येत्यभ्युपगमान्न
चोद्यस्यावतारगंधोप्यस्ति॥ त्याशंक्याह॥एतावदिति॥एतावन्मात्रार्थत्वमात्मज्ञानात्तदज्ञाननिवृत्तिरित्येतावन्मात्रस्यार्थस्यसद्भावः॥अहं
धीगम्येप्रतीचितासांप्रवृत्तेःसंवादविसंवादाभ्यांमानत्वायोगादस्त्वेवार्थवादतेतिप्रसंगस्येष्टत्वंशंकते॥प्रत्यक्षेति॥प्रमातुरहंधीगम्यत्वानात्मनस्त
त्साक्षिणस्तस्यवेदांताःब्रह्मत्वंबोधयंतीतिनसंवादादिशंकेत्याह॥नोक्तेति॥विद्वदनुभवमाश्रित्यापिफलश्रुतेरर्थवादत्वंसमाहितमित्याह॥अविद्ये
ति॥आत्मज्ञानस्यतदज्ञाननिवर्तकत्वेस्थितेपरमतस्यनिरवकाशत्वंफलतीत्याह॥तस्मादिति॥चोद्यस्यानवकाशमेवविशदयति॥अविद्यादीति॥ज्ञानसंत

तेरंत्यज्ञानस्यचाज्ञानध्वंसित्वासिद्धेराद्यमेवज्ञानंतत्त्वेत्युक्तं॥

तैस्यतथाभूतस्येनयाषष्ठ्या=४

संप्रतिपरोक्तमनुवदति॥ यत्तूक्तमितिदर्शनान्नाद्यंज्ञानमज्ञानध्वंसीतिशेषः॥ प्रारब्धकर्मशेषस्यविद्वद्देहस्थितिहेतुत्वाद्विदुषोपियावदारब्धक्षयंरा
गाद्याभासविरोधात्तत्क्षयेचदेहाभासजगदाभासयोरभावान्नाद्यज्ञानस्याज्ञाननिवर्त्तकत्वानुपपत्तिरित्युत्तरमाह॥ नतच्छेषेति॥ तदेवप्रपंचयति॥ ये
नेत्यादिना॥ तच्छब्दस्याक्षिपतीत्यनेनसंबंधः॥ आक्षेपकत्वनियमंसाधयति॥ विपरीतेति॥ मिथ्याज्ञानेनरागादिदोषेणचनिमित्तेनप्रवृत्तत्वादितिया
वत्॥ तथाभूतस्येत्यस्यविवरणंविपरीतप्रत्ययेत्यादि॥ कर्मैवषष्ठ्याविशेष्यते॥ तावन्मात्रंप्रतिभासमात्रशरीरं॥ प्रारब्धकर्मणोप्यज्ञानजन्यत्वेनज्ञान
निवर्त्यत्वान्नज्ञानिनस्ततोदेहाभासादिसंभवतीत्याशंक्याह॥ मुक्तेष्ववदिति॥ यथाप्रवृत्तवेगस्येषादेर्वेगक्षयादेवाप्रतिबद्धस्यक्षयस्तथाभोगादेवा

यत्तूक्तंविपरीतप्रत्ययतत्कार्ययोश्चदर्शनादिति॥ नतच्छेषस्थितिहेतुत्वात् येनकर्मणाशरीरमारब्धंतद्विपरीतप्रत्ययदोषनिमित्त
त्वात्तस्यतथाभूतस्यैवविपरीतप्रत्ययदोषसंयुक्तस्यफलदानेसामर्थ्यमितियावच्छरीरपातस्तावत्फलोपभोगांगतयाविपरीतप्रत्य
यंरागादिदोषंचतावन्मात्रमाक्षिपत्येवमुक्तेष्ववत्प्रवृत्तफलत्वात्तद्धेतुकस्यकर्मणस्तेननतस्यनिवर्त्तिकाविद्याऽविरोधात्किंतर्हिस्वा
श्रयादेवस्वात्मविरोध्यविद्याकार्ययद्दुसित्सुतन्निरुणध्य रब्धस्ययोभोगेनत्वितरेक्षपयित्वासंपद्यतइतिन्यायान्नज्ञानादित्यर्थः॥ तद्धेतु
कस्यविपरीतप्रत्ययादिप्रतिभासकार्यजनकस्येतियावत्॥ ननुज्ञानमनारब्धकर्मवदारब्धमपिकर्मकर्मत्वाविशेषान्निवर्त्तयिष्यतिनेत्याह ते
नेति॥ अविद्यालेशेनसहारब्धस्यकर्मणोविद्यानिवर्त्तिकानभवतीत्यत्रहेतुमाह अविरोधादिति॥ नहिज्ञानादारब्धंकर्मक्षीयतेतदविरोधित्वादविद्या
लेशाच्चतदवस्थितेरन्यथाजीवन्मुक्तिशास्त्रविरोधादितिभावः॥ आरब्धस्यकर्मणोज्ञानानिवर्त्यत्वेज्ञानंकर्मनिवर्त्तकमितिकथंप्रसिद्धिरित्याह॥ किंत
र्हीति॥ प्रसिद्धिविषयमाह॥ स्वाश्रयादिति॥ ज्ञानविरोधियदज्ञानकार्यमनारब्धंकर्मज्ञानाश्रयप्रमात्राद्याश्रयादज्ञानफलात्मनाजन्माभिमुखंतन्निवर्त्तकं

ज्ञानमितिप्रसिद्धिरविरुद्धेत्यर्थः॥

विमतं न ज्ञाननिवर्त्यं कर्मत्वादारब्धकर्मवदित्यनुमानादनारब्धमपि कर्म न ज्ञाननिरस्यमित्याशंक्याह॥ अनागतत्वादिति॥ अनारब्धं कर्म फलरूपेणाप्रवृत्तत्वात्स्ववृत्तेन ज्ञानेन निवर्त्यं आरब्धं तु कर्म फलरूपेण जातत्वात्तद्भोगाद्दृते न निवृत्तिमर्हति॥ अनुमानं त्वागमापबाधितमप्रमाणमित्यर्थः॥ नन्वनारब्धकर्मनिवृत्तावपि विदुषश्चेदारब्धकर्म न निवर्त्तते॥ तथा च यथापूर्वं विपरीतप्रत्ययादिप्रवृत्तेर्विद्वदविद्वद्विशेषो न स्यादित्यत आह॥ किंचेति॥ हेतुसिध्यर्थं विपरीतप्रत्ययविषयं विशदयति॥ अनवधृतेति॥ संप्रति विद्वद्विषये विषयाभावाद्विपरीतप्रत्ययस्यानुत्पत्तिमुपन्यस्यति॥ स चेति॥ आशयस्याग्रहीतविशेषस्य सामान्यमात्रस्यालंबनस्येति यावत्॥ आश्रयस्येति पाठे

नागतत्वादतीतं हीतरत्॥ किंच न च विपरीतप्रत्ययो विद्यावतु उत्पद्यते निर्विषयत्वादनवधृतविषयविशेषस्वरूपं हि सामान्यमात्रमाश्रित्य विपरीतप्रत्यय उत्पद्यमान उत्पद्यते यथा शुक्तिकायां रजतमिति स च विषयविशेषावधारणवतोऽशेषविपरीतप्रत्ययाश्रयस्योपमर्दितत्वान्न पूर्ववत्संभवति शुक्तिकादौ सम्यक्प्रत्ययोत्पत्तौ पुनरदर्शनात्क्वचित्तु विद्यायाः पूर्वोत्पन्नविपरीतप्रत्ययजनितसंस्कारेभ्यो विपरीतप्रत्ययावभासाः स्मृतयो जायमाना विपरीतप्रत्ययभ्रान्तिमकस्मात्कुर्वंति यथा विज्ञातदिग्विभागस्याप्यकस्माद्दिग्विपर्ययविभ्रमः सम्यक्ज्ञानवतोपि चेत्पूर्ववद्विपरीतप्रत्यय उत्पद्यते

प्ययमेवार्थः॥ विदुषो विपरीतप्रत्ययादिप्रतिभासेपि न यथापूर्वं तत्सत्त्वं॥ यस्य तु यथापूर्वं संसारित्वमित्यादिन्यायविरोधादिति मत्वोक्तं॥ न पूर्ववदिति॥ तत्रानुभवं प्रमाणयति॥ शुक्तिकादाविति यथाऽज्ञानवतो विपरीतप्रत्ययभावोऽनुभूयते तथा तद्वतोपि क्वचिद्विपरीतप्रत्ययो दृश्यते तथा च कथं तत्त्वानुभवविरोधो न प्रसरेदित्याशंक्य परोक्षज्ञानवति विपरीतप्रत्ययसत्वेपि नापरोक्षज्ञानवति तद्दार्ढ्यमित्यभिप्रेत्याह॥ क्वचित्त्विति॥ परोक्षज्ञानाधारः सप्तम्यर्थः॥ पंचमीत्वपरोक्षज्ञानार्था॥ अकस्मादित्यज्ञानातिरिक्तक्लृप्तसामग्र्यभावोक्तिः॥ विदुषो मिथ्याज्ञानाभावमुक्त्वा विपक्षे दोषमाह सम्यगिति।

तत्पूर्वकमनुष्ठानमादिशब्दार्थः॥ सम्यग्ज्ञानाविस्रंभे दोषांतरमाह॥ सर्वं चेति॥ ज्ञानाद् ज्ञानध्वंसे तदुत्थमिथ्याज्ञानस्य सविषयस्य बाधितत्वा न्नविदुषो रागादिरित्युपपाद्य ज्ञानान्मोक्षे तज्जन्ममात्रेण शरीरस्थितिहेत्वभावात्पतेदिति सद्योमुक्तिपक्षं प्रत्याह॥ एतेनेति॥ प्रवृत्तफलस्य कर्म णो भोगादृते क्षयो नास्तीत्युक्तेन न्यायेनेति यावत्॥ आरब्धकर्मणा देहस्थितिमुक्त्वा इतरेषां ज्ञाननिवर्त्यत्वमुपसंहरति॥ ज्ञानोत्पत्तेरिति॥ तस्यह नदेवाश्चनेति विदुषो विद्याफलप्राप्तौ विघ्ननिषेधश्रुत्यनुपपत्त्या यथोक्तोऽर्थो भातीत्यर्थः॥ न केवलं श्रुतार्थापत्त्या यथोक्तार्थसिद्धिः किंतु श्रुतिस्मृति

सम्यग्ज्ञानेऽप्यविस्रंभात्क्वचिदपि शास्त्रार्थविज्ञानादौ प्रवृत्तिरसमंजसा स्यात्॥ सर्वं च प्रमाणमप्रमाणं संपद्येत प्रमाणाप्रमाणयोर्विशेषानु पपत्तेरेतेन सम्यग्ज्ञानानंतरमेव शरीरपाताभावः कस्मादित्येतत्परिहृतं ज्ञानोत्पत्तेः प्रागूर्ध्वं तत्काल जन्मांतरसंचितानां च कर्म णामप्रवृत्तफलानां विनाशः सिद्धो भवति फलप्राप्तिविघ्ननिषेधश्रुतेरेव क्षीयंते चास्य कर्माणि॥ तस्य तावदेव चिरं सर्वे पाप्मानः प्रदू यंते तं विदित्वा न लिप्यते कर्मणा पापकेन एतमु हैवैते न तरत इतोऽनेनं कृताकृते तपतः॥ एतं ह वाव न तपति॥ न बिभेति कुतश्चने त्यादिश्रुतिभ्यश्च॥ ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते इत्यादिस्मृतिभ्यश्च यत्तु ऋणैः प्रतिबध्यत इति॥ तन्न॥ अविद्याविषय त्वाद विद्यावान्ह्यृणी तस्य कर्तृत्वाद्युपपत्तेर्यत्र वा अन्यदिव स्यात्तत्रान्योऽन्यत्पश्येदिति हि वक्ष्यत्यनन्यत्वहृस्वात्मा स्वयं यत्राविद्यायां सत्या मन्यदिव स्यात्तिमिरकृतद्वितीयचंद्रवत्तत्राविद्याकृतानेककारकापेक्षं दर्शनादिकर्म तत्कृतफलं च दर्शयति तत्रान्योऽन्यत्पश्येदित्यादिना

श्यामपीत्याह क्षीयंते चेत्यादिना॥ जीवन्मुक्तिं साधयता ज्ञानफले प्रतिबंधाभाव उक्तः॥ इदानीं पूर्वोक्तिं शंकाबीजमनुवदति॥ यत्त्विति॥ ऋणित्वं हि विदुषो विदुषो वेति विकल्प्याद्यं दूषयन्द्वितीयमंगीकरोति॥ तन्नेत्यादिना॥ ऋणित्वस्येति शेषः॥ तदेव स्फुटयति॥ अविद्यावानिति॥ अविदुषोऽस्ति कर्तृत्वादी सत्रमा

वक्ष्यमाणवाक्यार्थंप्रकृतोपयोगित्वेनकथयतिअनन्यदिति॥ऋणित्वंविदुषोनेत्युक्तंव्यक्तीकर्तुंतस्यनास्तिकर्त्तव्यत्वादीत्यत्रापिप्रमाणमाह॥यत्रपुनरिति॥
विद्यायांसत्यामविद्यायास्तत्कृतानेकत्वभ्रमस्यचप्रहाणंयत्रसंपद्यते॥तत्रतस्मादेवकारणात्तत्केनेत्यादिनाकर्मादेरसंभवंदर्शयतीतियोजना॥प्रमा
णसिद्धमर्थंनिगमयति॥तस्मादिति॥अविद्याविषयमृणित्वमित्येतत्प्रपंचयन्नविद्यासूत्रमवतारयति॥एतच्चेति॥तदृणित्वमविद्याविषयंयथास्फु

यत्रपुनर्विद्यायांसत्यामविद्याकृतानेकत्वभ्रमप्रहाणात्तत्केनकंपश्येदितिकर्मासंभवंदर्शयतितस्मादविद्यावद्विषयएवऋणित्वंकर्म
संभवान्नेतरत्रएतच्चोत्तरत्रव्याचिख्यासिष्यमाणैरेववाक्यैर्विस्तरेणप्रदर्शयिष्यामः॥तद्यथेहैवतावदयंयः कश्चिदब्रह्मविदन्यामात्म
नोव्यतिरिक्तांयांकांचिद्देवतामुपास्तेस्तुतिनमस्कारयागवल्युपहारप्रणिधानध्यानादिनोपास्तेतस्याःगुणभावमुपगम्यास्तेअन्योसावना

आत्माह्येषांᳪसभवत्यथयोन्यांदेवतामुपास्तेन्योसावन्योहमस्मीतिनसवेदयथापशुरेवᳪसदेवानां ॥

त्मामतःपृथगन्योहमस्म्यधिकृतोमयास्मात्रणिवत्प्रतिकर्त्तव्यमित्येवंप्रत्ययःसन्नुपास्तेनसइत्थंप्रत्ययोवेदविजानातितत्त्वंनसकेवलमे
वंभूतोऽविद्वानविद्यादिदोषवानेवकिंतर्हियथापशुर्गवादिर्वाहनदोहनाद्युपकारैरुपभुज्यतएवंसइज्याद्यनेकोपकारैरुपभोक्तव्यत्वादे
कैकेनदेवादीनामतःपशुरिवसर्वार्थेषुकर्मस्वधिकृतइत्यर्थः॥ टंभवतितथाथयोन्यामित्याद्यावनंतरग्रंथएवकथ्यतेप्रथममित्यर्थः॥तदक्ष
राणिव्याकरोति॥अथेत्यादिना॥विद्यासूत्रानंतर्यमविद्यासूत्रस्याथशब्दार्थः॥यागोगंधपुष्पादिनापूजा॥बल्युपहारोनिवेद्यसमर्पणं॥प्रणिधा
नमैकाग्र्यं॥ध्यानंतत्रैवानंतरितप्रत्ययप्रवाहकरणं॥आदिपदंप्रदक्षिणादिग्रहणार्थं॥भेददर्शनमत्रोपासनंशास्त्रीयमित्यभिप्रेत्यैतदेवविवृणोति॥

अकामानिति॥तदस्मृतमाहुरिति॥

वाक्यांतरमवतार्यव्याचष्टे॥ नसकेवलमिति॥ सोऽविद्वानेवमुक्तदृष्टांतवशात्पशुरिवदेवादीनांभवति॥ तेषांमध्येतस्यैकैकेनबहुभिरुपकारैर्भोग्य
त्वादितियोजना॥ पशुसाम्येसिद्धमर्थंकथयति॥ अतइति॥ अथानेनाविद्यासूत्रेणकिंकृतंभवतीत्यपेक्षायामविद्यायाःसंसारहेतुत्वंसूत्रितमितिव
क्रमविद्याकार्यंकर्मफलंसंक्षिपति॥ एतस्येत्यादिना॥ कर्मसहायभूताविद्यादेवताध्यानात्मिका॥ शास्त्रीयवत्स्वाभाविककर्मणोपिद्वैविध्यंसूचयितुं

एतस्यह्यविदुषोवर्णाश्रमादिप्रविभागवतोह्यधिकृतस्यकर्मणोविद्यासहितस्यकेवलस्यचशास्त्रोक्तस्यकार्यंमनुष्यत्वादिकोब्रह्मांतः
